Address, *v. t.* आमंत्र् 10 A; सं-अभि-आ-भाष् 1 A, अभिधा 3 U, संबुध् c., आलप् 1 P; 'a. ed his mind to Surya' सूर्यं मनसाऽध्यायत्; 'a. me as is wont with you' (मां प्रति) यथाभ्यस्तमभिधीयताम् (U. 1). 2 नाम ग्रह् 9 P, नामग्राहं वद् 1 P or आह्वे 1 P. 3 प्रहि 5 P, प्रेष् 10. -*s.* अभि-सं-भाषणं, संबोधनं &c. 2 वचनं, आलापः; 'mode of a.' आमंत्रणपदं; संशयिते परिणये नैष समुदाचारः (S. 5) 'not the proper mode of a.'; 'of agreeable a.' मधुरालाप, प्रियंवद. 3 पटुता, दक्षता, नैपुण्यं. 4 (Of a letter) बाह्यनामन् *n.*; अदत्तबाह्यनामानं लेखं (Mu. 1) 'a letter without any a. upon it'; 'send the letter to my a.' दत्त-लिखित-मद्बाह्यनाम (मामुद्दिश्य) पत्रं प्रेषय. 5 (Place of residence &c.) नामधामविशेषाः.

Adduce, *v. t.* (proof, witness &c.) निर्दिश् 6 P, उपन्यस् 4 P, उपक्षिप् 6 P, उपानी 1 P; 'a. ing proofs' प्रमाणोपन्यासः.

Adept, *a.* निपुण, कुशल, प्रवीण, अभिज्ञ.

Adequate, *a.* पर्याप्त, समर्थ, क्षम, तुल्य योग्य, अनुरूप. **-ly,** *adv.* पर्याप्तं. **Adequacy,** *s.* क्षमता, सामर्थ्यं, &c.

Adhere, *v. i.* संज् pass., सञ्ज् 1 P, संसक्त-अनुषक्त- *a.* भू, संलग् 1 P, (loc.); अनुबंध् 9 P. 2 अवलंब् 1 A, पाल् 10, रक्ष् 1 P; 'a. s to his promise' प्रतिज्ञां पालयति-रक्षति. **-ence,** *s.* आसक्ति *f.*, आसंगः, अनुषंगः, अवलंबनं. **-ent,** *s.* पक्षीयः, पक्ष्यः, सपक्षः. 2 अनुषंगिन् *m.*, सहायः, अनुगामिन् *m.* **-Adhesion,** *s.* संसक्ति *f.*, आसंगः. आसक्ति, *f.* अवलंबनं; संलग्नत्वं. **-Adhesive,** *a.* संलग्नशील

Adieu, *adv.* स्वस्ति (dat). -*s.* आमंत्रणं, आप्रच्छनं; 'to bid a.' आप्रच्छ् 6 A आमंत्र् 10 A; आमंत्रयस्व सहचरं (S. 3).

Adjacent, *a.* आसन्न, समीप, समीपवर्तिन्, संश्लिष्ट, संनिहित, निकटवर्तिन्, निकट, पार्श्वस्थ.

Adjective, *s.* विशेषणं.

Adjoin, *v. t.* लग् 1 P, समीपे-निकटे-वृत् 1 A or स्था 1 P; *See* **Adjacent** above.

Adjourn, *v. t.* व्याक्षिप् 6 P, विलंब् c.; व्यवहारं त्यज् 1 P.

Adjudge, *v. t.* दा c. (दापयति). 2 निर्णयं कृ 8 U, निर्णयं समाप् c.

Adjudicate, *v. t.* निर्णी 1 P. *See* above.

Adjunct, *a.* संयुक्त, सहित. -*s.* अनुबंधः.

Adjure, *v. t.* सशपथं समादिश् 6 P, शप् c. **-ation,** *s.* सशपथं समादेशः, शपथः.

Adjust, *v. t.* समीकृ 8 U, समा-प्रतिसमा-धा 3 U, समायुज् 10, व्यवस्था c. (स्थापयति); (accounts) एकीकृ, संमिश्र् c. **-ment,** *s.* समाधानं, समायोगः, एकीकरणं.

Adjutant, *s.* सहायः, सहकारिन् *m.*

Admeasure, *v. t.* *See* '**Measure**'.

Administer, *v. t.* प्रशास् 2 P, निर्वह् c., निर्वृत् c.; 'a. justice' धर्म-न्याय-विवेचनं कृ, न्यायं प्रणी 1 P, or प्रवृत् c.; 'a. an oath' शप् c. 2 दा 3 U, प्रतिपद् c. **-Administration,** *s.* शासनं, प्रवर्तनं, निर्वाहः; राज्यधुरा; 'during his a.' तस्मिन् राज्यं (प्रजाः) शासति. 2 धर्मविवेचनं. 3 प्रकृति *f.*, सचिवाः. 4 साचिव्यं, मंत्रित्वं. **-Administrative,** *a.* शासनदक्ष, कार्यनिर्वाहकुशल. **-Administrator,** *s.* शासितृ *m.*, राज्यधुरंधरः. 2 प्रवर्तकः, प्रणेतृ *m.*

Admiral, *s.* नौसाधनाध्यक्षः.

Admire, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U. 2 विस्मयेन दृश् 1 P. **-able,** *a.* श्लाघ्य, अद्भुत, प्रशंसनीय, अनुपम. **-ably,** *adv.* श्लाघ्यप्रकारेण, साधु, अद्भुतं. **-ation,** *s.* प्रशंसा, श्लाघा. 2 विस्मयः, आश्चर्यं. **-er,** *s.* प्रशंसकः, श्लाघिन् *m.*; 'a. of ladies' कामिन् *m.*, कामुकः

Admit, *v. t.* प्रविश् c., अभ्यंतरीकृ 8 U; 'should be a. ed to all confidential matters' सर्वविश्रंभेष्वभ्यंतरीकरणीया (Ka. 101). 2 अंगी-स्वी-कृ, अभ्युपगम् 1 P, अभ्युपे 2 P; ग्रह् 9 P; 'a. of' ex. by adj. or noun denoting 'capability'; 'his remark a. s of no doubt' तस्य वचनं न संदेहास्पदं; 'her illness a. s of no delay' तस्या विकारो विलंबाक्षमः. **-Admission,** *s.* प्रवेशनं, प्रवेशः. 2 अभ्युपगमः, अंगीकारः, प्रतिपत्ति *f.* **-Admissible,** *a.* उपादेय, स्वीकरणीय, ग्राह्य. **-Admittance,** *s.* प्रवेशः-शनं.

Admix, *v. t.* संमिश्र् 10, संयुज् 7 U, 10, संकॄ 6 P. **-ture,** *s.* मिश्रणं, संकरः.

Admonish, *v. t.* उपदिश् 6 P, अनुबुध् c., विज्ञा c. (ज्ञापयति), अनुशास् 2 P. 2 निर्भर्त्स् 10 A, उपालभ् 1A, *See* **Censure.** **-er,** *s.* उपदेशकः, अनुबोधकः. **-Admonition,** *s.* अनुबोधनं, उपदेशः, अनुशासनं, उपालंभः.

Ado, *s.* श्रमः, दीर्घायासः.

Adolescence, *s.* यौवनदशा, यौवनं. **-Adolescent,** *a.* युवन् (यूनी *f.*), प्राप्तयौवन.

Adopt, *v. t.* परिग्रह् 9 P, पुत्रीकृ 8 U. 2 ग्रह्, स्वी-अंगी-कृ, अनुवृत् 1 A. **-ed,** *a.* परिगृहीत, स्वी-अंगी-कृत; 'a. son' कृतकः पुत्रः, दत्त्रिमः सुतः, दत्तकः; 'a. daughter' कृतिका दुहिता, अपत्यकृतिका. **-ion,** *s.* परिग्रहः, पुत्रीकरणं. 2 अंगी-स्वी-कारः, अनुवर्तनं.

Adore, *v. t.* आराध् c., नमस्यति (D), नमस्कृ 8 U, अर्च् 1 P, or c. पूज् 10, उपस्था 1 U, उपास् 2 A. **-ation,** *s.* पूजा, अर्चनं, नमस्कारः. **-er,** *s.* पूजकः, उपासकः, आराधकः, भक्तः, अर्चकः.

Adorn, *v. t.* वि-, भूष् 10, अलंकृ 8 U, परिष्कृ, संस्कृ, मंड्, 10, प्रसाध् c., शुभ् c. **-ing,** *s.* अलंकारः, भूषणं, प्रसाधनं, मंडनं

Adrift, *adv.* इतस्ततः प्लवमान *a.* 2 अशरण-अनाथ-निरालंब. *a.*

Adroit, *a.* निपुण, दक्ष, धूर्त, चतुर. **-ly,** *adv.* सनैपुण्यं, चतुरं &c. **-ness,** *s.* नैपुण्यं, दक्षता, &c.

Adry, *a.* *See* 'Thirsty'.

Adulate, *v. t.* श्लाघ् 1 A, स्तु 2 U, अनुनी 1 P. **-ion,** *s.* चाटूक्ति *f*, अतिप्रशंसा, श्लाघा, स्तुतिपूर्वकः अनुनयः, स्तवोक्ति *f.*, अतिस्तुति *f.* **-ory**. *a.* चाटूक्तिपूर्ण, प्रशंसागर्भ, अतिप्रशंसायुक्त.

Adult, *s.* प्रौढः, प्राप्तयौवनः, प्राप्तव्यवहारदशः, युवन् *m.*

Adulterate, *v. t.* अपद्रव्येण संमिश्र् 10, अशुद्धी कृ 8 U. **-ion,** *s.* दूषणं, मिश्रणं.

Adultery, *s.* व्यभिचारः; पारदार्यं, परभार्यालंघनं; (of a woman) परपुरुषसंगति *f.*, पतिलंघनं. **-Adulterer,** *s.* परस्त्रीगामिन् *m.* पारदारिकः, भुजंगः, विटः, जारः. **-Adulteress,** *s.* व्यभिचारिणी, जारिणी, पुंश्चली, परपुरुषसंगता, बंधकी. **-Adulterine,** *s.* जारजः.

Adumbrate, *v. t.* पांडुलेख्यं-प्रतिच्छायां-चित्रारंभं-कृ 8 U. **-tion,** *s.* प्रतिच्छाया, प्रतिबिंबं. 2 पांडुलेख्यकरणं.

Adust, *a.* दग्ध, भस्मी-भूत or कृत.

Advance. *v. i.* प्र-उत्-चल् 1 P, प्र-अभि-या 2 P, अभिमुखं या, or -गम् व्रज् 1 P, प्रगम्, प्रस्था 1 A; शत्रोरभिमुखं याति 'a. s against the enemy.' 2 वृध् 1 A, प्र-उप-चि pass. उन्नतिं-उत्कर्षं-या; 'a. ed some steps to receive' सादरमभिमुखदत्ताविरलपदः (Ka. 95); 'a. ed in age' परिणतवयस्, वयोवृद्ध, प्रवयस्; 'a. ed in knowledge' ज्ञानवृद्ध. -*v. t.* उच्चल् c., पुरस्कृ 8 U, अग्रे नी 1 P. 2 वृध् c., परिपुष् 4 P 3 उपक्षिप् 6 P, उपन्यस् 4 P, पुरो निधा 3 U. 4 प्राक् दा 3 U. -*s.* उच्चलनं, प्रगमनं, प्रयाणं. 2 उन्नति *f.*, क्रमशो वृद्धि *f.*, उत्कर्षः, वर्धनं; 'price of a book in a.' पुस्तकप्रकाशनात्पूर्वं दत्तं मूल्यं. **-ment,** *s.* उत्कर्षः, उन्नति *f.*, अभ्युदयः, वृद्धि *f.*, आगमः, उपचयः, 'a. in knowledge' विद्यागमः; 'a. of learning' ज्ञानोत्कर्षः.

Advantage, *s.* लाभः, हितं, गुणः, फलं, अर्थः. 2 अवसरः, अवकाशः. 3 आधिक्यं, उत्कर्षः; 'taking a. of my weak point' मम छिद्रेण लब्धावकाशः; 'show or set off to a.' लक्ष्मीं-शोभां-तन् 8 U, *See* **Add.** 'They had an a. over their enemy in bravery' शौर्ये ते शत्रुभ्योऽत्यरिच्यंत. -*v. t.* उपकृ 8 U, अनुग्रह् 9 P, लाभाय भू. **-ous,** *a.* फलद, हितावह, लाभकर. हितकर (री *f.*). **-ously,** *adv.* सफलं, सलाभं. 2 सावकाशं.

Advent, *s.* आगमनं, प्रवृत्ति *f.*; 'a. of spring' वसंतसमयावतारः, मधुप्रवृत्ति *f.* **-itious,** *a.* बाह्य, औपाधिक-आगंतुक (की *f.*), आहार्य.

Adventure, *s.* साहसं, अद्भुतं कर्म. 2 दैवाधीनं कर्मचेष्टितं. 3 वृत्तांतः, चरितं, चेष्टा, चेष्टितं, क्रिया. -*v. i.* दैवाधीनं कर्म कृ 8 U. 2 साहसेन व्यवसो 4 P, or प्रयत् 1 A. **-er,** *s.* साहसिकः, साहसव्यवसायिन् *m.* **-ous,** *a.* साहसिक (की *f.*), प्रगल्भ, निर्भय. 2 संदिग्ध, दैवायत्त.

Adverb, *s.* क्रियाविशेषणं, अव्ययं.

Adverse, *a.* प्रतिकूल, विपक्ष, वैरिन्, विपरीत, वाम, विरुद्ध, पराङ्मुख (खी *f.*). **-ary,** *s.* शत्रुः, अरिः. *See* **Enemy.** **-ative,** *a.* विरोध-दर्शिन्-दर्शक. **-ity,** *s.* विपद् *f.*,

आपद् f, विपत्ति f., आपत्कालः, व्यसनं, दुःखं.

Advert (to), *v. i.* उदाहृ 1 P, अनुलक्ष् 10, अधिकृत्य-उद्दिश्य-वद् 1 P or वच् 2 P. 2 अव-सं-ईक्ष् 1 A, मनः समाधा 3 U, अवधा, अवधानं दा 3 U. **-ence,** *s.* अवधानं, अवहितता, मनोयोगः, अवेक्षा.

Advertise, *v. t.* विज्ञा c. (ज्ञापयति), निविद् c., प्रकाश् c., बुध् c., वि-उद्-घुष् 10. **-er,** *s.* प्रकाशकः, ज्ञापकः.**-ment,** *s.* विज्ञापना, घोषणा.

Advise, *v. t.* उपदिश् 6 P, अनुशास् 2 P. 2 बुध् c., निविद् c., ज्ञा c. (ज्ञापयति). -*v. i.* विचर् c., आलोच् 10. **-able,** *a.* उचित, योग्य, युक्त. 2 उपदेष्टव्य. **-edly,** *adv.* सुविचारतः, ज्ञानतः, बोधपूर्वं. 2 सावधानं, अवधानेन. **-er,** *s.* उपदेशकः, उपदेष्टृ *m.* 2 सचिवः, अमात्यः, मंत्रिन् *m.*-**Advice,** *s.* उपदेशः, अनुशासनं, बोधनं. 2 समाचारः, वार्ता.

Advocate, *v. t.* परार्थं वद् 1 P, पक्षं समर्थ् 10 or रक्ष् 1 P. -*s.* परार्थं वक्तृ *m*, पक्षसमर्थकः, वक्तृ *m.* 2 आश्रयः, रक्षकः, प्रतिपालकः.

Adze, *s.* कुंठारिका, तक्षणी.

Aerial, *a. See* under **Air.**

Aeroplane, *s.* आकाशयानं, विमानं.

Aery, *a.* आध्यात्मिक. 2 अमूर्त. 3 मनःसृष्ट-कल्पित.

Afar, *adv.* दूरात्, आरात् ; दूरे-रं; ' a. off ' दूरस्थ *a.*

Affable, *a.* सुजन, सुशील. 2 मधुरालाप, प्रियवादिन्. **-Affability,** *s.* मधुरालापता, सुशीलत्वं, सौजन्यं, प्रश्रयः.**-Affably,** *adv.* चाटूक्त्या, मृदुवचनेन, सुजनवत्, सप्रश्रयं.

Affair, *s* कार्यं, व्यापारः, कर्मन् *n.*, अर्थः.

Affect, *v. t.* (To act upon) अभिभू 1 P, आकुलीकृ 8 U, उपहन् 2 P, विकृ, उपसृज् 6 P, सस्कृ ; क्लमलेशैरभिन्नं (S. 2) ' not a. ed by the slightest fatigue '; 'a. ed by a devil ' वेतालोपहत ; ' a. ed with many diseases' अनेकव्याध्युपसृष्ट ; ' our position is not in the least a. ed (it does not a. us in the least) ' न नः किंचिच्छिद्यते (S. B. 345). 2 (Pretend) Ex. by छद्म-छलं कृ, मिथ्या in comp., by कृतक-कृत्रिम-*a.* कृ ; ' a. ing a quarrel or anger ' कृतककलहं-कोपं कृत्वा. 3 आकुलीकृ, आर्द्रीकृ, द्रु c.; अवकाशं-पदं-ग्रह् 9 P; ' my words a. ed his heart ' मम वचसा तस्य हृदयं द्रवीभूतं, मम वचस्तस्य हृदये दृढं पदं लेभे. 4 मन् 4 A ; ' he a. s learning' पंडितंमन्योसौ. **-ation,** *s.* अहंकारः, आटोपः, मिथ्यागौरवं. 2 छद्मन् *n. See* **Pretext.** 3 विलासः, अभिनयः, हावः. **-ed,** *a.* आकुल, अभिभूत, उपहत, विकृत. 2 मिथ्या in comp.; कृतक, कृत्रिम ; ' by an a. courage ' मिथ्याप्रतापमात्मन्यारोप्य. 3 अहंकारिन्, मानिन्, सदर्प. **-edly,** *adv.* साहंकारं, साटोपं. **-ing,** *a.* करुणं, मर्मभेदिन्. **-ingly,** *adv.* करुण. **-ion,** *s.* प्रेमन् *m. n.*, अनुरागः, स्नेहः, प्रणयः, प्रीति *f.*, वात्सल्यं, (with loc.). 2 धर्मः, संस्कारः, विकारः, अनुभावः, वृत्ति *f.*, भावः, विक्रिया, रागः. **-ionate,** *a.* स्निग्ध, स्नेहशील, प्रणयिन्, सप्रणय, सानुराग, वत्सल. **-ionately,** *adv.* सप्रेमं, सस्नेहं, स्निग्धं, सानुरागं.

Affiance, *v. t.* प्रतिश्रु 5 P, वाचा दा 3 U. -*s.*, वाग्दानं. 2 विश्वासः, श्रद्धा.

Affidavit, *s.* शपथपत्रं, सशपथं लिखितो लेखः.

Affiliate, *v. t.* संश्लिष् c., संयुज् 10.

Affinity, *s.* संबंधः, संपर्कः, योगः. 2 बंधुता, त्वं, सादृश्यं, साम्यं.

Affirm, *v. t.* प्रतिज्ञा 9 A, वद् 1 P, वच् 2 P उपक्षिप् 6 P, उपन्यस् 4 P. 2 सनिश्चयं वद्, तथेति दृढं ब्रू 2 U. 3 दृढीकृ 8 U, निश्चित *a.* कृ, प्रमाणीकृ. **-ation,** *s.* उक्ति *f.* दृढवचनं, प्रमाणीकरणं, सनिश्चयं वचनं. 2 प्रतिज्ञा, पक्षः. **-ative,** *a.* स्वीकार or अंगीकारद्योतक or सूचक ; ' two negatives make one a.' द्वौ नञौ प्रकृतार्थं गमयतः. 2 पक्षानुकूल

Affix, *s.* आगमः. -*v. t.* अनुबंध् 9 P, सं-आयुज् 7 U, 10.

Afflict, *v. t.* क्लिश् 9 P, दु 5 P, परि-संतप् c., व्यथ् c. (व्यथयति), पीड् 10, बाध् 1 A, आयम् c. **-ed** *a.* आर्त, दुःखित, अभिभूत, पीडित, आतुर. 'to be a. for' तम् 4 P, पर्युत्सुक *a.* भू 1 P. **-ion,** *s.* क्लेशः, बाधा, पीडा, कष्टं, व्यथा, दुःखं. **-ing, -ive,** *a.* क्लेशावह, व्यथाकर (री *f.*).

Affluence, *s.* समृद्धि *f.*, सधनता, धनबाहुल्यं. **-Affluent,** *a.* समृद्ध, धनाढ्य, बहु-महाधन; 'a. circumstances' सधनता, सुस्थिति *f.* 2 एकस्थानं प्रति प्रवाहक. **-Afflux,** *s.* एकस्थानं प्रवाहः.

Afford, *v. t.* दा 3 U. 2 (To be able) शक् 5 P, समर्थ-क्षम-*a.* भू 1 P.

Affray, *s.* कलहः, द्वंद्वं, युद्धं.

Affright, *v. t.* संत्रस् c., भी c. (भापयते, भीषयते), उद्विज् c. -*s.* भयं, सं-त्रासः-साध्वसं.

Affront, *s.* अवज्ञा, निकृति *f.*, अपमानः, तिरस्कारः, मानभंगः. - *v. t.* (संमुखं-प्रत्यक्षं) अवज्ञा 9 U, अवमन् 4 A, आधिक्षिप् 6 P, तिरस्कृ 8 U.

Affusion, *s.* आसेकः.

Afire, Aflame, *a.* दह्यमान.

Afloat, *a.* प्लवमान; 'a rumour is a.' वार्ता प्रसृता.

Afoot, *adv.* पद्भ्याम्; 'set a.' प्रारभ् 1 A, *See* **Begin**; 'the army is a.' प्रचलितं सैन्यं; 'going a.' पादग, पादचारिन्.

Afore, *adv.* अग्रे, पुरः, संमुखं. **2** पूर्वं, पुरा, गतकाले; 'a. said,' पूर्वोक्त, प्रागुक्त. 'a. thought.' *s.* पूर्व-प्राक्-संकल्पितं; 'a.times,' *adv.* पुरा.

Afraid, *a.* भीत, भयान्वित, शंकान्वित; 'to be a.' त्रस् 1, 4 P, भी 3 P, (with abl.). **2** आ-शंक् 1 A, मन् 4 A.

Afresh, *adv.* पुनरपि, अभिनवं.

After, *prep.* अनु pr. to roots, पश्चात्; 'to go a.' अनुगम्, अनुसृ, 1 P. **2** (of time) परं, अनंतरं, ऊर्ध्वं, (with abl.); 'a. that' तस्मात्परं, तत ऊर्ध्वं; 'a. one another' आनुपूर्व्येण, अनुपूर्वशः. 'a. 10 years' दशवर्षे व्यतीते; 'a. eating' भोजनानंतरं; पश्चात् (gen.), अनु in comp.; 'a. a few days' दिनेषु गच्छत्सु; by gerund, or पूर्वकं in comp.; अनामयप्रश्नपूर्वकं (S. 5); 'he waters tree a. tree' वृक्षं वृक्षं सिंचति; 'in a. time' आगामिकाले, उत्तरकाले. **3** अनुसारेण-सारतः, अनुरूपं; 'you write a. his hand' लेखनं तस्यानुकरोषि; 'he is called a. his grandfather' स पितामहनाम्नाऽभिधीयते-आहूयते; *See* **Name**. In comp. e. g. 'a. ages,' ex. by उत्तर; 'a.-ages' उत्तरकालः; पुत्रपौत्राः; 'a. all' अंते, शेषे; 'a. birth,' *s.* जरायु *n.* 'a.-crop' शस्यस्य द्वितीयसंग्रहः; 'a. glow, *s.* सायं-संध्याप्रकाशः. 'a.-inquiry,' उत्तरजिज्ञासा; 'a.-life' आयुःशेषः, उत्तरवयस् *n.*; 'a. noon' *s.* अपराह्णः, पराह्णः, विकालः; (*a.*) अपराह्णतन (नी *f.*), वैकालिक (की *f.*); 'a. pains,' प्रसवोत्तरवेदना. 'a. thought,' उत्तरचिंता. अनुबोधः. 'a. wards' पश्चात्, अनंतरं, ततः परं, पर.

Again, *adv.* पुनः, भूयः; 'a. and a.' भूयो भूयः, वारंवारं; 'as much a.' द्विगुण *a.* **2** अपरं च, अन्यच्च, अपि च. 3 (With verbs) by प्रति pr.

Against, *prep.* प्रति-अभि pr. to nouns; प्रतिवातं 'a. the wind' &c. **2** अभिमुखं, प्रतिमुखं, संमुखं, in comp. or with gen. **3** विरुद्धं, प्रतिकूलं, or by अतिक्रम्य; 'a. my order' मम शासनस्य विरुद्धं, शासनमतिक्रम्य-उल्लंघ्य; 'assist him a. his brother' भ्रातरि बद्धवैरस्य तस्य साहाय्यं कुरु. **4** अर्थे, अर्थं; आपदर्थे धनं रक्षेत् 'should lay by wealth a. (as a provision for) calamities.'

Agape, *a.* जृंभमाण; 'with eyes a. with astonishment' विस्मयोत्फुल्ललोचन.

Agastric, *a.* जठरशून्य.

Age, *s.* युगं, कालः, समयः. 2 वयस् *n.*; 'a. of the world' कल्पः; 'old a.' वृद्धत्वं, वार्धक्यं, वृद्धभावः, परिणतं वयस् *n.* 'come of a.' प्राप्तव्यवहार; 'of the same a.' समकालीन, समानवयस्क; 'of age' ex. by वर्षीय *a.* वर्षात्मक *a.*; '5 years of a.' पंचवर्षीय-वर्षात्मक; 'about 8 years of a.' अष्टवर्षदेशीय; 'a. of majority' यौवनदशा, यौवनावस्था; व्यवहारज्ञतादर्शकवयस् *n.* 'he reached the 16th year of his a.' षोडशवर्षवयोवस्थामस्पृशत्. **-ed,** *a.* वृद्ध, जीर्ण, पुराण.

Agenda, *s.* कार्यक्रमपत्रं.

Agent, *s.* प्रतिहस्तः, प्रतिनिधिः. **2** (in grammar) कर्तृ *m.*; कारकः, कारः in comp. 3 हेतुः, कारणं, साधनं; शक्ति *f.* **-Agency,** *s.* कर्तृत्वं, निर्मातृत्वं; 'the action was done through his a.' तत्कर्तृका क्रिया, तस्य साहाय्येन संपादिता क्रिया. 2 कारणं. 3 नियोगिपदं, नियोज्यत्वं.

Agglomerate, *v. t.* संचि 5 U, एकत्र-राशीकृ 8 U.

Agglutinate, *v. t.* संयुज् 10., संश्लिष् c., संलग्न *a.* कृ 8 U, संसंज् c.

Aggrandize, *v. t.* वि-सं-प्र-वृध् c., आप्यै c., एध् c., स्फाय् c. (स्फावयति). उत्कृष् 1 P, उपचि 5 U. **-ment,** *s.* विवृद्धि *f.*, उन्नति *f.*, अभ्युदयः, उत्कर्षः, उपचयः, उदयः.

Aggravate, *v. t.* वृध् c., उपचि 5 U, प्रवृद्धिं नी 1 P. **2** प्रकुप् c., संक्षुभ् c., उद्दीप् c. **-ion,** *s.* वृद्धि *f.*, उपचयः. **2** प्रकोपनं-णं, उद्दीपनं.

Aggregate, *s.* संग्रहः, समाहारः, राशिः, समूहः, समुदायः. **-***v. t.* संग्रह् 9 P, राशीकृ 8 U, संचि 5 U, एकत्र कृ. **-ed,** *a.* एकीकृत, समुदित, संचित, समाहृत. **-ion,** *s.* संग्रहणं, राशीकरणं. **2** समूहः, *See* (*s*) above.

Aggress, *v. i.* (प्रथमं) आक्रम् 1 U, 4 P, लंघ् 1 A, 10, हिंसारंभं कृ 8 U. **-ion,** *s.* आ-अति-क्रमः, लंघनं. **2** प्रथमापकारः, हिंसारंभः. **-ive,** *a.* प्रथमापकारिन्, 'a. step' हिंसारंभः, प्रथमाक्रमः. **-or,** *s.* प्रथमापकारकः, आक्रामकः.

Aggrieve, *v. t.* अर्द् 1 P or c., दुःखाकुलीकृ 8 U, *See* **Afflict**.

Aghast, *a.* ससाध्वस, भयाभिभूत. **2** विस्मयाकुल, आश्चर्यचकित.

Agile, *a.* लघु, चपल, लघुशरीर.

Agitate, *v. t.* सं-वि-प्र-क्षुभ् c., आकुलीकृ 8 U, उद्विज् c.; धू 5, 9 U, प्रमंथ् 9 P, विलुड् c. (water). **2** Discuss, q. v. **-ed,** *a.*

क्षुब्ध, विह्वल, आकुल, विक्लव, पारिप्लव. 2 प्रमथित, विलोडित; 'to be a.', क्षुभ् 4, 9 P, 1 A, विह्वल &c. भू. **-ion,** *s.* संक्षोभः, उद्वेगः, उपप्लवः, आकुलत्वं. 2 विलोडनं. 3 विचारणा, वादानुवादः. **-or,** *s.* क्षोभकः.

Aglow, *a.* अग्नितप्त.

Agnate, *a.* संबंधिन्, संबद्ध.

Agnostic, *s.* अनीश्वर-निरीश्वर-वादिन् *m.*

Ago, *adv.* पूर्वं, प्राक्. (with abl.): 'long a.' पुरा; 'not long a.' नातिचिरात्प्राक्, अनतिपूर्वं.

Agony, *s.* व्यथा, यातना, वेदना, संतापः; 'in the a. es of death' मृत्युवेदनाभिभूत; 'sharp a.' तीव्रयातना-वेदना &c. **-ize,** *v. i.* व्यथ् 1 A. *-v. t.* Afflict, q. v.

Agrarian, *a.* भूमिविषयक, क्षेत्रसंबंधिन्.

Agree, *v. i.* संमन् 4 A, तथा-एवं-मन्; 'I don't a. with you' नैवमहं मन्ये. 2 एकचित्तीभू, एकमत *a.* भू; 'birds in their nests a.' स्नेहभावेनैकत्र वसंति; 'they all a. on this point' अस्मिन्विषये सर्वेषां तेषामैकमत्यम्. 3 ग्रह् 9 P, स्वीकृ 8 U, अनुमन् 4 A, अनुज्ञा 9 U. 4 संक्लृप् c., समयं-संविदं-कृ, प्रतिपद् 4 A, अभ्युप-इ 2 P or गम् 1 P, प्रतिश्रु 5 P. 5 आरोग्याय क्लृप् 1 A, हिताय भू, हितमावह् 1 P; '(living in) Bombay does not a. with my health' मुंबापुरनिवासो ममारोग्याय न कल्पते. 6 Resemble, q. v. **-able,** *a.* रम्य, सुख in comp. सुखस्पर्शता शिलाविशेषस्य (M. 4); मनोज्ञ, प्रिय, सूनृत, अभिमत, सुभग. 2 अनुरूप, योग्य, तुल्य, सदृश (शी *f.*). **-ably,** *adv.* यथासुखं. 2 अनुरूपं, अनुसारतः; 'a. to one's nature' सत्त्वानुरूपं. **-ment,** *s.* समयः, संविद् *f.* 2 ऐक्यं, संमति *f.* ऐकमत्यं. 3 सादृश्यं, संवादः. 4 अभ्युपगमः, स्वीकारः, प्रतिपत्ति *f.*

Agrestic, *a.* असभ्य, ग्राम्य, क्षेत्रिक.

Agriculture, *s.* कृषि *f.*, कर्षणं; 'science of a.' कृषिकर्मविद्या. **-Agriculturist,** *s.* कृषीवलः, कर्षकः, कृषिजीविन् *m.*, क्षेत्रिन् *m.* 2 वैश्यः, विश् *m.*

Agronomial, *a.* क्षेत्रकर्मविषयक, कृषिकर्मसंबंधिन्.

Aground, *adv.* तटस्थ *a.*, उत्तीरं, सैकतस्थं.

Ague, *s.* कंप-शीत-ज्वरः, विषमः; 'tertian a.' त्र्याहिकविषमः; 'quartan a.' चातुर्थिकविषमः.

Aguerried, *a.* युद्धपरिचित, युद्धाभ्यस्त.

Ah, *interj.* आः, हंत, हा, अहो, अहह.

Ahead, *adv.* अग्रे, पुरतः, पुरः.

Aheap, *adv.* संकलितं.

Aid, *v. t.* उपकृ 8 U, साहाय्यं कृ (with gen.). *-s.* साहाय्यं, उपकारः. 2 सहायः, उपकारकः. **-less,** *a.* असहाय. *See* **Help.** **Aid-de-camp,** *s.* आसन्नसहायः. 2 सेनापतिसहायः.

Ail, *v. t.* पीड् 10; दु 5 P. तप् c.; 'what a. s thee' किं त्वां व्यथयति or का ते पीडा. **-ing,** *a.* पीडित, क्षुद्ररोगपीडित. **-ment,** *s.* पीडा, आतंकः. 2 क्षुद्ररोगः, व्याधिः

Aim, *v. t.* लक्ष्यीकृ 8 U, उद्दिश् 6 P. संधा 3 U; 'well a. ed arrow' साधुकृतसंधानः शरः (S. 1.). 2 आप् desid. (ईप्सति), आकांक्ष् 1 P, लभ् desid. (लिप्सते); 'a. ed at the crown' राजपदं लिप्सांचक्रे &c. 3 लक्ष्यं प्रति क्षिप् 6 P or अस् 4 P. *-s.* लक्ष्यं-क्षं, शरव्यं. 2 संधानं; 'taking a.' शरसंधानं कुर्वन्. 3 अभिप्रायः, आशयः, वांछा, कांक्षा, हेतुः, चिकीर्षितं; 'friend, where are you going without any definite a.' हला क्वानिर्दिष्टकारणं गम्यते (V. 2)

Air, *s.* व्योमन् *n.*, आकाशः शं, नभस् *n.*, विहायस् *n.*; 'to take the a.' वातमासेव् 1 A; 'take a.' प्रकाशतां गम् 1 P. 2 वायुः, वातः, समीरणः. 3 तालः, रागः, मूर्छनः. 4 रूपं, आकारः, मुद्रा; 'with a dignified a.' सगौरवाकारेण; 'a. of conceit' अवलेपमुद्रा; 'with the a. of one who is offended' निकृतमिवात्मानं संदर्श्य. 5 गति *f.*, विधि *m.*, प्रकारः, रूपं; 'through a.' विहायसा, नभोवर्त्मना; 'to build castles in the a.' गगनकुसुमानि चि 5 U; 'a. balloon' आकाशयानं, व्योमयानं; 'a. bladder' वायुकोषः; 'a. hole' वातायनं, गवाक्षः. जालं; 'a. born,' 'aerial,' आकाशज; आकाशस्थ, नभःस्थ. **-y,** *a.* वायव (वी *f.*), वायुमय (यी *f.*). 2 सुवात, प्रवात; 'a. place' प्रवातं; प्रवातशयनं 'a bed in a. place (in the current of wind)'. 3 असार, फल्गु, खपुष्पवत् *ind.* **-Aeronaut,** *s.* वैमानिकः.

Ait, *s.* पुलिनं, अन्तरीपं.

Ajar, *adv.* अर्धविवृत *a.*

Akin, *a.* सगोत्र, सनाभि, सजातीय. 2 सदृश (शी *f.*), समान, संबंधिन्.

Alack, *See* **Alas.**

Alacrity, *s.* औत्सुक्यं, उत्साहः. 2 शीघ्रत्वं, क्षिप्रता, अविलंबः.

Alar, *a.* सपक्ष.

Alarm, *s.* त्रासः, शंका, भयं, साध्वसं. 2 सान्नहनिकं. 3 भयध्वनिः, भयाक्रंदनं; 'a. bell' भयसूचको घंटानादः. 4 प्राग्भयसूचना. *-v. t.* प्राक् सूचनां दा 3 U. 2 भी c., संत्रस् c., उद्विज् c. **-ed,** *a.* भीत, उद्विग्न, भयार्त, चकित. **-ing,** *a.* भयावह उद्वेगकर (री *f.*), त्रासजनन (नी *f.*), भयप्रद. **-ist,** *s.* भयोत्पादकः. **-Alarum,** *s.* सान्नहनिकं, भयध्वनिः, प्रबोधनघंटा.

Alas, *interj.* कष्टं, हा, हंत, हा धिक्, अहह, अहो बत. 2 अत्याहितं, अब्रह्मण्यं.

Alate, *a.* *See* 'Alar'.

Albeit, *adv.* यद्यपि.

Albescent, *a.* ईषत्श्वेत, श्वेतप्राय.

Albugineous, *a.* अंडशुक्लांशोपम.

Albugo, *s.* शुक्लं ; चक्षूरोगः.

Albumen, *s.* अंडशुक्लांशः.

Alchemy, *s.* रसविद्या, रससिद्धि *f.* **-Alchemist,** *s.* रसायनविद् *m.*, रसज्ञः.

Alcohol, *s.* मद्यसारः.

Alcoran, *s.* महंमदीय धर्मग्रंथः.

Alcove, *s.* कुंजः, पर्णशाला, निभृतस्थानं.

Alderman, *s.* पुराध्यक्षः ; वृद्ध-गुरु-जनः.

Ale, *s.* यवसुरा-रं, मद्यं ; 'a. house' शुंडा, पानागारं; 'keeper of an a. house' शौंडिकः.

Aleatory, *a.* यदृच्छाधीन.

Alert, *a.* जागरूक, दक्ष, सावधान, अवहित, अतंद्र, उद्यमिन्, उद्योगिन्. **-ness,** *s.* जागरूकता, अवधानं, दक्षता.

Alias, *adv.* अन्यथा (-अभिहित, *a.*); ex. by इति अपरनामधेय, *a.*

Alibi, *s.* अन्यस्थानवर्तित्वं.

Algebra, *s.* बीजगणितं. **-ical,** *a.* बीजविषयक.

Alien, *a.* विदेशीय, अन्यदेशीय. 2 विरक्त; विरुद्ध, भिन्न, असंस्तुत. **-ate,** *v. t.* (affection) विघट् *c.*, विश्लिष् *c.*, विनश् *c.*, विभिद् 7 P or *c.*, विच्छिद् 7 P or *c.* 2 (person) विरंज् *c.*, वि-अप-रक्त *a.* कृ 8 U. 3 पराधीन *a.* कृ, परस्वत्वे प्रतिपद् *c.* **-ation,** *s.* विघटनं, विरागः, विरक्ति *f.*

Alight, *v. i.* अवतॄ 1 P, उपविश् 6 P, अवनिपत् 1 P.

Alight, *a.* प्रदीप्त.

Alike, *a.* सदृश (शी *f.*), तुल्य, समान, सम.

Aliment, *s.* आहारः, भोजनं. **-Al, -Ary,** *a.* पोषक, पुष्टिप्रद, शक्तिवर्धक. **-ation,** *s.* पोषणं, भरणं

Alive, *a.* जीवत् (न्ती *f.*), सजीव, सचेतन ; 'I caught him a.' जीवग्राहमग्रहीषं (D. K. II. 4). 2 अभिज्ञ (with gen.), or विद् 2 P, *See* **Know.**

Alkali, *s.* क्षारः, सर्जिका, *See* **Natron.** *a.* **-fy,** *v. t.* क्षारीकृ 8 U. **-ne,** *a.* क्षारस्वभाव, क्षारविशिष्ट.

All, *s.* सर्वं, अखिलं, साकल्यं. **-***a.* सर्व-विश्व, *pron. a.*, अखिल, सकल, कृत्स्न, निखिल, समस्त ; 'not at a.' न किमपि, न मनागपि 'at a. times' सर्वदा; 'a. but' प्राय, कल्प, in comp.; 'a. but dead' मृतप्राय; छिन्नप्राय 'a. but cut'; 'a. of a sudden' अकस्मात्, सहसा, सपदि, एकपदे ; 'this is not a.' एतावतापि दोषो &c. न समाप्यते; 'a. I can' यथाशक्ति, यथासामर्थ्यं ; 'this is a. I can do to serve you' एतावान्मे विभवो भवंतं सेवितुं (M. 2); 'by a. means' सर्वथा ; 'a.-in-a. of one's life' जीवितसर्वस्वं ; 'a. at once' युगपत् ; 'a. round,' सर्वतः, सर्वदिक्षु, समंततः ; 'in a.' साकल्येन, पिंडीकृत्य, मिलित्वा ; 'give me 20 rupees in a.' एवं पिंडीकृत्य मह्यं विंशतिं रूपकान्देहि, सर्वे मिलित्वा सप्त वयं 'we are 7 in a.'; 'a.-bearing' सर्वंसह ; 'a.-conquering' सर्वदमन, सर्वजय, सर्वंदम ; 'a.-destroying' सर्वंकष ; 'a.-knowing' सर्वज्ञ, सर्वविद् ; 'a.-pervading' सर्वव्यापिन्, विश्वात्मन्, सर्वगत ; 'a. powerful' सर्वशक्तिमत्.

Allay, *v. t.* प्र-उप-शम् *c.* (शमयति), नियम् *c.*, निर्वा *c.* (वापयति); 'a. ing of heat' निर्वापणं. 2 सांत्व् 10, तुष् *c.* **-er,** *s.* शमकः, शांतिदः-करः. **-ment,** *s.* प्रशमनं, सांत्वनं ; 'a. of hunger' क्षुत्प्रतीकारः.

Allege, *v. t.* प्रतिज्ञा 9 A, वद् 1 P, दृढं ब्रू 2 U ; 'the charges a. ed against me' मयि समारोपिता दोषाः. 2 छद्म कृ 8 U, व्यपदिश् 6 P, मिथ्या वद्. 3 उदाहृ 1 P. **-ation,** *s.* प्रतिज्ञा, उक्ति *f.*, वचनोपन्यासः. 2 दोषारोपः, मिथ्याभियोगः 3 व्यपदेशः, छद्मन् *n.*, व्याजः.

Allegiance, *s.* निष्ठा, भक्ति *f.*, अनुरागः; 'a. to the king' राजनिष्ठा.

Allegory, *s.* रूपकं, दृष्टांतः. **-ical,** *a.* लाक्षणिक (की *f.*), रूपकमय (यी *f.*). **-ically,** *adv.* दृष्टांततः, दृष्टांतेन. **-ize,** *v. t.* दृष्टांतयति (D.), रूपकेण दृश् *c.*

Alleviate, *v. t.* उप-प्र-शम् *c.*, नियम् *c.*, सांत्व् 10 : निर्वा *c.* (वापयति), लघयति (D.), लघूकृ 8 U. **-ion,** *s.* उप-प्र-शमः, निर्वापणं ; 'a. of sorrow' दुःखनिर्वापणं. **-ive,** *a.* शांतिद, शमक.

Alley, *s.* उद्यानपथः, वीथि-थी *f.* 2 दुर्गममार्गः, संबाधपथः.

Alligate, *v. t.* सं-अनु-बंध् 9 P. **-ion,** *s.* संबंधः, संयोजनं.

Alligator, *s.* नक्रः, ग्राहः.

Alliteration, *s.* अनुप्रासः

Allocate, *v. t.* स्थानं दा 3 U. **-ion,** *s.* स्थानदानं.

Allot, *v. t.* परिक्लृप् *c.*, दा 3 U, विभज् 1 U. **-ment,** *s.* विभागः, विभजनं. 2 अंशः, भागः.

Allow, *v. t.* अनुज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A. 2 Give, q. v. 3 ग्रह् 9 P. *See* **Admit.** 4 उप-ईक्ष् 1 A, विषह् 1 A ; स कस्मादार्येणापक्रामन्नुपेक्षितः (Mu. 3); 'I a. my feet to be burnt' दह्यमानावपि

चरणावुपेक्षे. 5 (for) न्यूनीकृ 8 U. न गण् 10, **-able,** *a.* अनुज्ञेय, अनुमोद्य; 'a. mistake' क्षमार्होऽपराधः; 'not a.' प्रति-नि-षिद्ध. **-ance,** *s.* अनुज्ञा, अनुमति *f.*, अनुमोदनं. 2 वेतनं, निरूपितमूल्यं, वृत्ति *f.* 3 स्वीकारः; न्यूनीकरणं.

Alloy, *s.* मिश्रणं, दोषः, न्यूनता. 2 अपद्रव्यं, कुप्यं, मिश्रधातुः. **-ed,** *a.* मिश्रित, दूषित; 'un-a. pleasure' केवलं-दुःखासंभिन्नं-सुखं.

Allude, *v. t.* उद्दिश्य-अधिकृत्य वद् 1 P or वच् 2 P or अभिधा 3 U; उद्दिश् 6 P, सूच् 10, लक्षीकृ; अनुसंधा; 'this story a.s to myself' इयं कथा मामेव लक्षीकरोति (S. 7). **-Allusion,** *s.* उद्देशः, उदाहरणं, कीर्तनं; इंगितं, सूचनं; 'in a. to' अधिकृत्य, समुद्दिश्य.

Allure, *v. t.* हृ 1 P. आकृष् 1 P, वि-प्र-लुभ् c. **-ing,** *a.* प्रलोभक, हारिन्, आकर्षक; 'a. things' प्रलोभनवस्तूनि. **-ment,** *s.* प्र-वि-लोभनं; वंचनं, विकारहेतुः, आकर्षणं.

Alluvium, *s.* पुलिनं, नदीरयसमाहृता मृत्तिका. **-Alluvial,** *a.* पुलिनमय (यी *f.*).

Ally, *s.* मित्रं, सहायः, पक्ष्यः, सहकारिन् *m.* **-***v. t.* संबंध् 9 P. 2 संधा 3 U; संयुज् 10, संश्लिष् c. **-Alliance,** *s.* संधिः 'friendly a.' सख्यं, मैत्री. 2 संबंधः, संपर्कः; 'matrimonial a.' विवाहसंबंधः.

Almanac, *s.* पंजिका, पंचांगं.

Almighty, *a.* सर्वशक्तिमत्, अमितौजस्; सर्वशक्त, सर्वसमर्थ.

Almond, *s.* वातामफलं.

Almonry, *s.* भिक्षादानगृहं, भैक्ष्यशाला. **-Almoner,** *s.* भिक्षादाने अधिकृतः.

Almost, *adv.* प्राय, भूयिष्ठ, कल्प, affixed to adj.; 'a. dead' मृतकल्प, मृतप्राय; 'when the night had a. worn away' क्षीणभूयिष्ठायां क्षपायां; 'it is a. dawn now' अधुना प्रभात-प्राया-कल्पा शर्वरी. 2 प्रायः, प्रायशः, 'a. all' प्रायः सर्वे. 3 (With num.) ex. by आसन्न, उप, in comp.; उप-आसन्न-दशाः &c.

Alms, *s.* भैक्ष्य, भिक्षा, भिक्षादानं; 'beg a.' भिक्षाटनं कृ 8 U, भिक्ष्-याच् 1 A; 'a.-giving' भिक्षादानं, त्यागः; 'a. house' अनाथगृहं, भिक्षागेहं; 'a. man' भिक्षुकः, भिक्षाशिन् *m.*

Aloe, *s.* सहा; कुमारीरसोद्भवो बोलः.

Aloft, *adv.* ऊर्ध्वं, उपरि; 'a. in the air' विहायसा, व्योमवर्त्मना.

Alone, *a.* एक, अद्वितीय, एकाकिन्. 2 एव, केवलं, मात्र in comp.

Along, *prep.* अनु in comp. or with acc.; or by instr.; 'a. the way' अनुमार्गं, 'a. the city of Ayodhyâ' अयोध्यानगरीमनु; 'a. a road' मार्गेण. 2 पुरः, अग्रे, पुरस्तात्; 'a. with' सह, सार्धं, *See* **With**; 'all a.' आप्रथमं, प्रथमावधि; 'a. side' पार्श्वतः; समीपं-पे.

Aloof, *adv.* दूरे, अंतरे, पृथक्; 'standing a.' दूरस्थः 'keep a.' पृथक् निधा 3 U, न गण् 10.

Alopecia, *s.* अकेशता, केशहीनत्वं.

Aloud, *adv.* उच्चैः, उच्च-तार-स्वरेण. 2 प्रकाशं, प्र-उन्-मुक्तकंठं (weep a.), 'call a.' शब्दायते (D.).

Alphabet, *s.* वर्णमाला. **-ical,** *a.* वर्णक्रमानुसारिन्. **-ically,** *adv.* वर्णक्रमेण, वर्णानुसारेण.

Already, *adv.* पूर्वं, पुरा, प्राक्, with एव; sometimes by एव alone; 'the moon has a. risen' उदित एव हिमरश्मिः.

Also, *adv.* अपि, च. 2 अपरंच, पुनश्च, अपिच 3 तद्वत्.

Altar, *s.* वेदि-दी *f.*, चैत्यं, स्थंडिलं.

Alter, *v. t.* अन्यथा कृ 8 U, विपर्यस् 4 P, विपर्यासं नी 1 P, परिवृत् c. 2 विकृ, विरूप् 10, 'a.ed in appearance' भिन्नाकार इव लक्ष्यमाणः. **-***v. i.* परिवृत् 1 A, अन्यथा-अन्यरूप *a.* भू; विपर्यासं या 2 P; **-ation,** *s.* परि(री)वर्तः, विकारः, विकृति *f.*, विपर्यासः.

Altercate, *v. i.* विवद् 1 A, कलहायते (D.) **-ion,** *s.* विवादः, कलहः, वाग्युद्धं.

Alter-ego, *s.* लिंगदेहः, सूक्ष्मशरीरं.

Alternate, *a.* Ex. by पर्याय in comp.; 'a. service' पर्यायसेवा. **-***v. t.* परिवृत् c.; ex. by a verb with पर्यायेण. **-ion,** *s.* विपर्ययः, परिवृत्ति *f.*, पर्यायः. **-ive,** *s.* विकल्पः, पक्षः, पक्षांतरं; gen. ex. by words like गतिः, शरणं &c.; 'there is no other a.' अन्या गतिर्नास्ति, अन्यच्छरणं नालोक्यते (Ka. 152) 2 विकल्पः, विभाषा (in grammar). **-ly,** *adv.* पर्यायेण, यथाक्रमं.

Although, *conj.* यद्यपि, अपि.

Altimeter, *s.* उच्चत्वमापकं यंत्रं.

Altitude, *s.* उच्चत्वं, उच्छ्रायः, उत्सेधः.

Altogether, *adv.* सर्वथा, सर्वतः, अशेषतः, साकल्येन. 2 सहित-संहत-एकीकृत-*a.*; समं, एकीकृत्य.

Alum, *s.* स्फटी, तुवरी, सौराष्ट्री, स्फाटिकी.

Alveary, *s.* मधुकोषः; 2 कर्णशष्कुलि *f.*

Always, *adv.* सदा, सर्वदा, अनिशं, सततं, सर्वकालं, निरंतरं, अनवरतं.

Amain, *adv.* प्रसभं, प्रसह्य, बलात्; सवेगं, जवेन.

Amalgam, *s.* कांस्यं, मिश्रधातुः, पारदसंसृष्टधातुः. **-ate,** *v. t.* संमिश्र् 10. 2 संयुज् 10, एकीकृ 8 U, संश्लिष् c. **-ation,** *s.* धातुसंमिश्रणं. 2 संयोजनं, संयोगः, संमेलनं.

Amanuensis, *s.* लेखकः, लिपिकारः.

Amaranth, *s.* अम्लानपुष्पं. 2 अम्लानः, महासहा.

Amass, *v. t.* संचि 5 U, संग्रह् 9 P, संभृ 3 U, राशी-एकी-कृ 8 U. **-ment,** *s.* संचयः, संग्रहः, &c.

Amatory, *a.* कामिन्, प्रेमशील, शृंगारप्रिय.

Amaze, *v. t.* विस्मि c. (विस्मापयति, विस्मापयते), विस्मयाकुल-साश्चर्य-*a.* कृ 8 U. **-ed,** *a.* विस्मापित, विस्मित, विस्मयाकुल, साश्चर्य. **-ment,** *s.* विस्मयः, आश्चर्य, विस्मयाकुलत्वं. **-edly,** *adv.* सविस्मयं; साश्चर्य. **-ing,** *a.* विस्मयकारिन्, विचित्र, अद्भुत. 2 अतिरिक्त; अति pr.

Ambages, *s.* वक्रोक्ति *f.*

Ambassador, *s.* दूतः, राजदूतः, प्रणिधिः, संदेशहरः. **-ship, -Ambassage,** *s.* दौत्यं, प्रणिधिकार्यं.

Amber, *s.* तृणमणिः.

Ambidextrous, *a.* उभयहस्तकुशल. 2 असरल, उभयपक्षपातिन्.

Ambient, *a.* व्यापक; निपातिन्, गामिन् in comp. 2 वेष्टक, परिवेष्टक.

Ambiguous, *a.* द्व्यर्थ, संदिग्धार्थ, अव्यक्त, अस्पष्ट, संदिग्ध. **-ly,** *adv.* अस्पष्टं, वक्रोक्त्या, द्व्यर्थतः. **-ness, -Ambiguity,** *s.* वक्रोक्ति *f.*, संदिग्धार्थता, संदेहार्थः.

Ambit, *s.* मंडलं, चक्रवालं, वर्तुलं.

Ambition, *s.* स्पृहा, आकांक्षा. 2 कीर्तिस्पृहा, ऐश्वर्याकांक्षा, उच्चपदवांछा; 'a. o get a throne,' राज्यलोभः-तृष्णा. **-Ambitious,** *a.* सस्पृह, साकांक्ष, ऐश्वर्यप्रेप्सु, यशस्काम; 'who, a. of your throne, has roused your envy' केनाभ्यसूया पदकांक्षिणा ते जनिता (K. III. 4). 2 (Of hopes) दूराधिरोहिन्, उत्सर्पिन्. **-ly,** *adv.* ऐश्वर्याकांक्षया &c.

Amble, *v. i.* ललितं वल्ग् 1 P, प्लु 1 A; धोर् 1 P. **-s.** धोरितं. **-er,** *s.* धोरितगामिन् *m.*

Ambrosia, *s.* अमृतं, सुधा, पीयूषं. **-al,** *a.* अमृतमय (यी *f.*), अमृततुल्य, (*s.*) in comp.

Ambulate, *v. i.* विचर् 1 P, परिक्रम् 1 U, 4 P, इतस्ततश्चर्. **-ion,** *s.* परिक्रमः, पर्यटनं.

Ambush, Ambuscade, *s.* (परावस्कंदनार्थं) निभृते स्थानं; निभृतावस्थिति *f.*; 'they all lay in a.' सर्वे एव ते निभृतं तस्थुः.

Ameliorate, *v. t.* वृध् c., श्रेयस्-साधीयस् कृ 8 U, समुन्नतिं नी 1 P, *See* **Improve.** **-ion,** *s.* वर्धनं, समुन्नति *f.*, श्रेयस्त्वं.

Amen, *adv.* ओम्, भवतु, एवमस्तु, तथास्तु.

Amenable, *a.* परानुयोगाधीन, अनुविधायिन्, आज्ञाकर (री *f.*), आयत, वशं यात; 'a. to another's power' पराधिकारवशः.

Amend, *v. t.* सं-वि-परि-शुध् c., समा-प्रति-समा-धा 3 U; 'a. one's life' पापान्निवृत् 1 A, पापं त्यक्त्वा धर्ममाचर् 1 P. **-*v. i.*** शुध् 4 P; समाधा pass., भद्रतर *a.* भू. **-ment,** *s.* संशोधनं; प्रतिसमाधानं. 2 दोषशोधनं &c. **-Amends,** *s.* प्रमार्जनं, निस्तारः, निष्कृति *f.*; शोधनं; 'to make a. for' प्रमृज् 2 P, शुध् c.; *See* **Atone.**

Amenity, *s.* रम्यता, मनोज्ञता.

Amerce, *v. t.* *See* **Punish.**

Amiable, *a.* सुशील, सुप्रिय, सुजन. 2 प्रियदर्शन, रमणीय. **-ness,** *s.* सौजन्यं, सद्भावः, सुशीलत्वं. **-Amiably,** *adv.* सुशीलतया, प्रत्या, स्नेहभावेन.

Amicable, *a.* मैत्र (त्री *f.*), हित, स्नेहशील; मित्रभावेन; 'a. settlement' मित्रभावेन निर्णयः. **-ness,** *s.* मित्रत्वं, सख्यं, सौहार्द. **-Amicably,** *adv.* मित्रवत्, मित्रभावेन सौहार्देन.

Amid,-st, *prep.* मध्ये, अंतरे, अभ्यंतरे, (with gen.); मध्यगत-स्थित *a.* 'a. these thoughts he was pierced by an arrow' एवं विचारयन्-एवं विचारनिमग्नः सन्-बाणेन हतः.

Amiss, *a.* दोषिन्, अपराधिन्. 2 अनुचित, अयोग्य. **-*adv.*** अनुचितं, अयुक्तं; 'take a. *See* **Misunderstand.**

Amity, *s.* मैत्री, स्नेहभावः, सख्यं, संधिः.

Ammunition, *s.* युद्धसामग्री, युद्धोपकरणानि

Amnesia, *s.* स्मृति-भ्रंशः-नाशः.

Amnesty, *s.* (राजकृता) दोषक्षमा, दोषाद्विमोचनं.

Among,-st, *prep.* मध्ये, अभ्यंतरे, (with gen.); ex. by loc. or gen. of noun; 'a. cows the black one gives much milk' गवां गोषु वा कृष्णा बहुक्षीरा (S. K.) काव्येषु नाटकं रम्यं &c.

Amoretto, *s.* Lover, *q. v.*

Amorous, *a.* कामुक, प्रेमशील, रसिक, शृंगारप्रिय. 2 सविलास, सविभ्रम, ललित; 'a. sport' सविलासक्रीडा. **-ly,** *adv.* सकामं, सानुरागं; सविलासं, सविभ्रमं, ललितं.

Amount, *v. i.* उपचि-संख्या- pass.; संपद् 4 A; 'a. ing to' संख्याक in comp.; 'a. to 100' शतसंख्य-संख्याक; 'they a. in all to 24 men' एवं पिंडीकृत्य चतुर्विंशतिर्नराः संपद्यंते; 'thus the families a. to 14' एवमेतान्येकत्र चतुर्दश कुलानि (Ka. 136); 'your whole speech a. s to this' एतावता-एवंच; एष तव वचसो निष्कर्षः-पिंडितार्थः; 'your exertions do not a. to even a hundredth part of mine' तव व्यवसायो ममोद्योगस्य शततमीमपि कलां न

स्पृशति. *-s.* राशिः, परिमाणं, समुदायः, संख्या, समुच्चयः; 'by any a. of labour' महता श्रमेणापि ; 'to the a. of 100' शतसंख्यं.

Amphibious, *a.* स्थलजलचर. 2 द्विधागति.

Amphibiology, *s.* सदिग्धवचनं, श्लेषः.

Amphitheatre, *s.* रंगः, रंगभूमि *f.*, रंगांगणं.

Ample, *a.* विशाल, विपुल, बृहत्, विस्तीर्ण, विस्तृत. 2 प्रचुर, प्रभूत, बहुल, यथेष्ट. **-ness,** *s.* विशालता. 2 प्राचुर्य. **-Amply,** *adv.* सविस्तरं, प्रचुरं, यथेष्टं ; 'he was a. rewarded' तस्मै प्रभूतं पारितोषिकं दत्तं. **-Amplify,** *v. t.* सविस्तरं- विस्तरेण -वर्ण् 10. 2 तन् 8 U, वृध् c., विस्तृ 9 U. **-Amplification, -Amplitude,** *s.* विस्तारः, वृद्धि *f.* 2 महत्त्वं, प्राचुर्य.

Amputate, *v. t.* अंगं छिद् 7 P or निकृत् 6 P. **-ion** *s.* छेदः, कर्तनं.

Amulet, *s.* रक्षाकरंडः.

Amuse, *v. t.* विनुद् c., रम् c., नंद् c. ; 'a. oneself' विहृ 1 P, विलस् 1 P, क्रीड् 1 P. **-ment,** *s.* विनोदः, विनादनं, क्रीडा, केलि *f.*, विलासः, कौतुकं. **-ing,** *a.* विनोदिन्, विनोदनशील, हृदयंगम, रम्य.

Anachronism, *s.* कालगणनायां प्रमादः or भ्रमः. 2 कालनिर्देशप्रमादः.

Anæsthetic, *a.* संवेदनानाशक.

Anagogy, *s.* गूढार्थः.

Anagraph, *s.* वर्णनं. 2 परिगणनापत्रं.

Analogy, *s.* सादृश्यं, समानता, संबंधः. **-ical, -ous,** *a.* सदृश (शी *f.*), तुल्यरूप, समान, अनुरूप, संबंधिन्, आनुषंगिक (की *f*). **-ly,** *adv.* सादृश्येन, औपम्येन.

Analphabete, *s.* निरक्षर, अनक्षर.

Analyze, *v. t.* व्याकृ 8 U, विभज् 1 U, विच्छिद् 7 P, विभिन्न *a.* -खंडशः -पृथक् -कृ, विश्लिष् c. **-Analysis** *s.* विभागः, व्यवच्छेदः, विभेदः, व्याकरणं. 2 सारः.

Anaphrodisiac, *a.* कामशामक.

Anarchy, *s.* अशासनं, अनीश्वरता, राजाधिरूपः, अराजकता ; 'when the country is in a.' अराजके जनपदे. **Anarch, Anarchist,** *a.* अराजकताप्रतिपादक.

Anathema, *s.* अभिशापः, शापः, आक्रोशः. **-tize,** *v. t.* शप् 1 U, आक्रुश 1 P.

Anatomy, *s.* पृथक्करणं, विच्छेदः. 2 शरीरव्यवच्छेद-विद्या-शास्त्रं. **-ize,** *v. t.* (शरीरं) व्यवच्छिद् 7 P, पृथक् कृ. 2 चिञ् 5 U, व्याख्या 2 P. **-ist,** *s.* व्यवच्छेदकः.

Ancestor, *s.* पूर्वपुरुषः; a. s पूर्वजाः (pl.), पितरः (pl.), पितृलोकः. **-Ancestral,** *a.* पितृक, पैतृक (की *f.*) ; 'a. property' पित्र्यं रिक्थं. **-Ancestry,** *s.* पितरः, पितृ

Anchor, *s.* नौबंधनकीलः-लं, लांगलं. *-v. t.* कीलेन बंध् 9 P, स्थिरीकृ, गतिं निरुध् 7 U or प्रतिहन् 2 P.

Anchorite, *s.* यतिः, आरण्यकः, संन्यासिन् *m.*, वनवासिन् *m.*, वानप्रस्थः.

Ancient, *a.* पुराण, पुरातन (नी *f.*), पूर्व, प्राक्कालीन, प्राक्तन, प्राचीन. *-s.* (a. s) वृद्धाः- प्राचीनपुरुषाः (pl.). 2 ध्वजः, पताका. 3 पताकिन् *m.* **-ly,** *adv.* पुरा, पूर्वं, पूर्वकाले. **-ness,** *s.* प्राचीनता, पुरातनत्वं, &c.

Ancipital, *a.* द्विशीर्षक. 2 संदिग्ध.

And, *conj.* च repeated after each word joined, or after all. In the case of nouns, ex. by Dvandva comps. ; 'the Sun and the Moon' आदित्यचंद्रौ. 2 (With adjectives) gen. ex. by Karm. comps. ; अलसलुलितमुग्धानि अंगकानि ; (with numerals) by a comp. with अधिक, उत्तर ; '100 a. 8' अष्टाधिकं-अष्टोत्तरं शतं. 3 (In the case of verbs) ex. by the use of gerunds ; 'go a. tell him' गत्वा तस्मै कथय; sometimes by वा in questions ; जात अस्ति ते माता स्मरसि वा तातं (U. 4). 4 अपि च, अन्यच्च, किं च. 'A. then' अथ, तदनु, ततः ; 'a. yet,' तथापि, or ex. by च-च ; असुलभा सकलेंदुमुखी च सा किमपि चेदमनंगविचेष्टितं (V. 2).

Androgynous, *a.* द्विलिंगविशिष्ट.

Aneal, *v. t.* तैलेन अभ्यंज् 7 P.

Anear, *adv.* प्रायः, 2 *prep.* संनिधौ, सकाशं. 3 *v. t.* अभिगम् 1 P, अभ्युप-इ 2 P.

Anecdote, *s.* कथा, उपाख्यानं, आख्यायिका.

Anemograph, *s.* वायुवेगादिग्दर्शकं यंत्रं.

Anemometer, *s.* वायुवेगमापकं यंत्रं.

Anent, *prep.* उद्दिश्य, अधिकृत्य, विषये in comp.

Anew, *adv.* पुनः, पुनरपि. 2 अभिनवं.

Angel, *s.* देवदूतः, ईश्वरप्रेष्यः, स्वर्गदूतः, 'you are my a.' त्वं मे प्रियतमा, प्राणप्रेयसी. **-ic, -ical,** *a.* दिव्य, देवदूतोपम, अमानुष, (षी *f.*).

Anger, *s.* क्रोधः, कोपः, अमर्षः, रोषः, मन्युः. *-v. t.* प्रकुप् c., क्रुध् c. **-Angry,** *a.* जातामर्ष, रुष्ट, सामर्ष, सरोष, कोपिन्, कुपित, क्रुद्ध, समन्यु; 'to be a.' कुप्-क्रुध्-रुष्- 4 P, (with dat.). **-Angrily,** *adv.* सकोपं, सरोषं, कोपात् &c.

Angle, *s.* अस्रः, कोणः. *-v. i.* बडिशेन मत्स्यान् ग्रह् 9 P, उद्धृ-ह 1 P. **-er,** *s.* मत्स्यवेधकः. **-ing,** *s.* मत्स्यग्रहणं. **-Angular,** *a.* कोणविशिष्ट, अस्रोपेत.

Anguish, *s.* परितापः, पीडा, बाधा, वेदना, यातना, आतंकः ; 'a. of mind' मनस्तापः.

Anhelation, *s.* उच्छ्वसनं, हृदयकंपः, वेपथुः.

Animadvert, *v. t.* निंद् 1 P, उपालभ् 1 A; *See* **Censure.** 2 परीक्ष् 1 A, चर्चां कृ. **-Animadversion,** *s.* निंदा, उपालंभः. 2 परीक्षणं, चर्चा.

Animal, *s.* जंतुः, प्राणिन् *m.*, जीविन् *m.*, जीवः, जन्मवत् *m.* 2 पशुः, मृगः, तिर्यंच् *m.* **-***a.* प्राणिसंबंधिन् &c. 2 चेतन; 'a. food' मांसाहारः; 'a. pleasures' विषयाः, विषयसुखानि; 'a. passions' (carnal) षड्रिपवः-इंद्रियाणि; 'a. kingdom' प्राणिवर्गः. **-cule,** *s.* क्षुद्रजंतुः.

Animate, *v. t.* जीव् c., समा-आ-श्वस् c., प्राण् c. 2 प्रोत्सह् c., जीवं संचर् c., उत्तिज् c., उद्युज् 10, पराणुद् c. **-ed,** *a.* सजीव, चेतन, चर, प्राणिन्. 2 प्रोत्साहित, आश्वासित. 3 प्रफुल्ल, प्रोत्साहनाप्रेरित, सारवत्; 'a. by passion' मदोल्लासित, समद. **-ion,** *s.* जीवसंचारणं, जीवप्रदानं. 2 प्रोत्साहनं, प्रफुल्लता, उल्लासः. **-or,** *s.* प्राणदः, प्रोत्साहकः &c.

Animosity, *s.* द्वेषः, वैरं, विरोधः, मात्सर्यं.

Animus, *s.* चोदना, उद्देशः.

Anise, *s.* छत्रा, सालेयः.

Ankle, *s.* गुल्फः, घुटिका.

Anklet, *s.* नूपुरः-रं, मंजीरं.

Annals, *s.* वार्षिकवृत्तांतः, वार्षिकवृत्तेतिहासः. 2 पुरावृत्तकथा, चरित्राख्यानं. **-Annalist,** *s.* चरित्रलेखकः.

Annex, *v. t.* संयुज् 10, अनुबंध् 9 P, उपाधा 3 U; 'Oudh was a.ed to the British territory' अवधदेश आंग्लराज्यांगं कृतः,-राज्येन संयोजितः. 2 अंते निर्दिश् 6 P; 'a list of names is a. ed' नामावली लेखांते दत्ता, नामानि लेखांते निर्दिष्टानि. **-ation,** *s.* संयोजनं, अनुबंधनं; 'a thing annexed' अनुबंधः. **-ed,** *a.* संयोजित, उपाहित.

Annihilate, *v. t.* उत्-समुत्-छिद् 7 P, उन्मूल् 10, अव-उत्-साद् c., नश् c., विलुप् c. **-ion,** *s.* उच्छेदः, क्षयः, अवसादनं, विलोपः, विनाशः; प्रलयः (of the world).

Anniversary, *a.* सांवत्सरिक-वार्षिक (की *f.*). **-***s.* सांवत्सरिको विधिः; a. of birth' जन्मदिवसः; 'a. of death' मृततिथिः.

Annotate, *v. t.* टीकां-भाष्यं-लिख् 6 P (with gen.), व्याख्या 2 P, व्याचक्ष् 2 A. **-ion,** *s.* टीका, व्याख्यानं, भाष्यं, टिप्पनी. **-or,** *s.* टीकाकारः, टीका-भाष्य-कृत् *m.*

Announce, *v. t.* आख्या 2 P or c., निविद् c., विघुष् 10, प्रकाश् c. **-er,** *s.* आख्यायकः, संदेशहरः. **-ment,** *s.* ख्यापनं, निवेदनं, विघोषणा. 2 वार्ता, समाचारः, संदेशः.

Annoy, *v. t.* बाध् 1 A, पीड् 10, दु 5 P, *See* **Afflict.** **-ance,** *s.* पीडा, व्यथा, क्लेशः, बाधा, दुःखं; 'a source of a.' कंटकः. **-er,** *s.* पीडा-व्यथा-करः. **-ing,** *a.* बाधक, दुःखप्रद.

Annual, *a.* वार्षिक-सांवत्सरिक-आब्दिक (की *f.*); प्रति°. **-ly,** *adv.* प्रतिवर्षं, प्रतिसंवत्सरं, वर्षे वर्षे.

Annuity, *s.* वार्षिकं वेतनं.

Annul, *v. t.* वि-अव-लुप् c., निरस् 4 U, निरर्थक *a.* कृ. **-ment,** *s.* लोपः.

Annular, *a.* मंडलाकार, वलयाकार.

Annulet, *s.* क्षुद्रवलयः-यं.

Anodyne, *s.* शूलघ्नं.

Anoint, *v. t.* लिप् 6 P, दिह् 2 U, अंज् 7 P, समालभ् 1 A. 2 अभिषिच् 6 P; 'a. ed as king' राज्येभिषिक्तः. **-er,** अभिषेचकः, विलेपकः. **-ing,** *s.* विलेपनं, अभ्यंजनं, अभिषेकः-षेचनं, समालंभः.

Anomaly, *s.* विधि-नियम-विरोधः, अनियमः, व्यभिचारः. **-ous,** *a.* विधि-नियम-विरुद्ध, अविधि. **-ously,** *adv.* अनियमतः, विधिविरुद्धं.

Anon, *adv.* सपदि, शीघ्रं, झटिति; 'ever and a.' मुहुर्मुहुः.

Anonymous, *a.* अविदित-अनिर्दिष्ट-लेखकनामन्; नाम-संज्ञा-हीन. **-ly,** *adv.* नाम विना, नामनिर्देशं विना.

Another, *a.* अन्य-इतर-पर-अपर, *pron. a.*; or अंतरं in comp.; नगरांतरं 'a. city;' 'in a. place' अन्यत्र; 'in a. manner' अन्यथा; 'at a. time' अन्यदा; 'a. day' अन्येद्युः, परेद्युः; 'one after a.' अनुपूर्वशः, एकैकशः.

Answer, *v. i.* उत्तरं दा 3 U or प्रतिपद् 4 A, प्रतिवच् 2 P, प्रतिभाष् 1 A.; 'he a. ed in the affirmative' बाढं-तथा-इति स प्रत्युवाच. 2 संवद् 1 P, अनुरूप-तुल्य-भू. 3 प्रतिभूः स्था 1 P, प्रातिभाव्यं स्वीकृ 8 U, उत्तरं दा 3 U. **-***v. t.* (a question) कथ् 10, ब्रू 2 U, उत्तरं दा (with gen.); 'a. my letter' मम लेखस्योत्तरं प्रहिणु-प्रेषय. 2 Refute, q. v. 3 क्लृप् 1 A (dat.), उपयुक्त *a.* भू 1 P; 'this will a. my purpose' अनेन मे प्रयोजनं भवेत्, इदं मे इष्टसिद्धये कल्पते. **-***s.* उत्तरं, प्रतिवचनं, प्रत्युक्ति *f*, प्रतिवाच् *f.*, प्रत्युत्तरं. **-Able,** *a.* परानुयोगाधीन, प्रष्टव्य.

Ant, *s.* पिपीलिका. **-hill,** *s.* वल्मीकः-कं, वामलूरः, कूटकः.

Antagonist, *s.* प्रतिपक्षः, विपक्षः, शत्रुः, वैरिन् *m.*, *See* **Enemy.** **-ic,** *a.* विरुद्ध, विरोधिन्. **Antagonism,** *s.* विरोधः, वैरं.

Antarctic, *a.* दक्षिणकेंद्रीय. **-***s.* दक्षिणकेंद्रं.

Antecedent, *a.* पूर्वगामिन्, पूर्वगत. **-***s.* पूर्वचरितं-वृत्तं. 2 पूर्वगामी शब्दः-शब्दसमूहः.

Antechamber, *s. See* '**Antichamber.**'

Antedate, *v. t.* प्राक्तनदिने लिख् 1 P.

Antediluvian, *a.* विश्वप्रलयात् प्राग् वर्तमान, अतिपुराण.

Antelope, *s.* कृष्णसारः, हरिणः, एणः, मृगः, कुरंगः.

Anterior, *a.* प्राक्तन (नी *f.*), पूर्व.

Anthem, *s.* ईश्वरस्तुति *f.*, स्तुतिरूपं गीतं.

Anthropology, *s.* मानवजातिशास्त्रं.

Anthropophagi, *s.* क्रव्याशिनः (pl.) राक्षसाः.

Antic, *s.* भंडः, वैहासिकः. -*a.* भंडसदृश (शी *f.*), अयोग्य, असंगत.

Antichamber, *s.* उपशाला.

Anticipate, *v. t.* पूर्वं प्रगव-ज्ञा 9 U or निरूप् 10 or ग्रह् 9 P. 2 अग्रतः अनुभू 1 P or भुज् 7 A, पूर्वास्वादनं कृ. **-ion,** *s.* पूर्वमेव ज्ञानं, पूर्वभुक्ति *f.*, पूर्वास्वादनं.

Antidote, *s.* विषघ्नोऽगदः, प्रतिविषं; 'a. against anxiety' चिंताविषघ्नोऽगदः, 'dealer in a. s' विषवैद्यः. जांगुलिकः. 2 प्रतिकारः. **-al,** *a.* विषघ्न (घ्नी *f.*).

Antimony, *s.* स्रोतोंजनं, यामुनं, सौवीरं.

Antipathy, *s.* विरोधः, वैरं, द्वंद्वभावः, विद्वेषः; 'natural a.' शाश्वतिको विरोधः.

Antiphony, *s.* प्रतिध्वनिः, प्रतिगानं.

Antipodes, *s.* प्रतिलोमं; 'living in a.' प्रतिलोमाः.

Antipyrin (e), *s.* ज्वरघ्नं औषधं.

Antiquary, -rian, *s.* प्राक्कालीनविषयकोविदः-पंडितः. -*a.* प्राक्कालीन, प्राक्तन (नी *f.*)

Antiquated, Antique, *a.* प्राचीन, पुरातन-प्राक्तन (नी *f.*), पुराण; (style) अप्रचलित, लुप्तप्रयोग (भाषासरणिः).-**Antiquity,** *s.* Ancients, q. v. 2 प्राक्कालः, पूर्वकालः. 3 पुरातनत्वं, प्राक्कालीनत्वं.

Antiseptic, *a.* पूतिनाशक.

Antithesis, *s.* प्रतिपक्षता, विरोधः, अर्थवैपरीत्यं.

Antitype, *s.* मूलमूर्ति *f.*, आदर्शः.

Antler, *s.* हरिणशृंगं, मृगविषाणं. **-ed,** *a.* शृंगवत्, विषाणिन्.

Anus, *s.* गुदं, अपानं, पायुः

Anvil, *s.* शूर्मः-र्मी, स्थूणा.

Anxiety, *s.* चिंता, उत्कंठा, औत्सुक्यं, व्यग्रता, मनस्तापः, चित्तोद्वेगः; आकुलत्वं, उत्कलिका, रणरणकः. -**Anxious,** *a.* व्याकुलित, उद्विग्न, उत्कंठित, चिंतापर, व्यग्र. 2 उत्सुक, ईप्सु, सकाम; 'be thus passes a. nights' एवमुद्विग्नस्य यांति रजन्यः; 'to be a. (for)' उत्कंठ् 1 A, उत्सुकायते (D.), उत्तम् 4 P; 'he is a. to see you near' उत्कंठते युष्मत्संनिकर्षस्य (U. 6.). 3 चिंताप्रद, उद्वेगकर (री *f.*). **-ly,** *adv.* सोद्वेगं, सोत्कंठं, सचिंतं.

Any, *a.* Ex. by चित्, चन, or अपि with the forms of किम्; 'a. man' कोपि नरः; 'a. woman' काचित्स्त्री &c., 'at a. time' कदाचित्. 2 (Any whosoever) Ex. by forms of यत् with the above; यः कश्चनागच्छतु 'let a. come'; 'I may be a. one' यो वा को वा भवाम्यहं; 'a. how' कथंचित्, येन केन प्रकारेण, यथा कथंचित्; 'a. longer' पुनः, इतः-अतः-परं; 'a. where' कुत्रापि, क्वचिदपि; 'a. thing' ईषदपि, स्तोकमपि.

Apace, *adv.* सत्वरं, शीघ्रं, *See* **Quickly.**

Apart, *adv.* पृथक्; वि-प्र-गत *a.*; 'having knees a.' प्रज्ञुः. 2 निभृतं, रहसि, विजने, एकांते, विविक्ते. 3 दूरे. 4 स्वगतं, जनांतिकं. 'a. from this consideration', 'this consideration a.' इदं कारणं विहाय-त्यक्त्वा, एतदर्थभिन्न *a.*; 'excellence of virtues a., a woman must have modesty at least' गुणसंपत्स्त्रिया मा नाम भवतु, शालीनता पुनरवश्यं स्यादेव. **-ment,** *s.* कोष्ठः, शाला, कक्षा, आवासः, सौधं; 'inner a. s' अंतःपुरं, अंतर्वेश्मन् *n.*

Apathy, *s.* औदासीन्यं, उदासीनता, वैराग्यं. **-etic,** *a.* उदासीन. 2 वीतस्पृह-राग, निःस्पृह, निरीह, निरपेक्ष. 3 निरुत्साह.

Ape, *s.* वानरः, कपिः, प्लव(वं)गः. 2 अनुकारिन् *m.* -*v. t.* वानरवत् अनुकृ 8 U. (gen.). -**Apish,** *a.* कापेय (यी *f.*), वानरोपम.

Apepsy, *s.* अजीर्णं.

Aperient, *s.* रेचकं, रेचनं,

Aperture, *s.* छिद्रं, रंध्रं, सूक्ष्मं द्वारं.

Apetalous, *a.* दलहीन, निष्पत्र, निर्दल.

Apex, *s.* शिखा, चूडा, अग्रं; शिरस् *n.*, मस्तकं.

Aphorism, *s.* सूत्रं, वचनं.

Apiary, *s.* मधुमक्षिका-करंडः -आधारः-समुद्गकः.

Apiece, *adv.* एकैकशः, पृथक् पृथक्, एकैकं.

Apocryphal, *a.* संदिग्धप्रमाण.

Apologue, *s.* उपकथा, उपाख्यानं.

Apology, *s.* क्षमाप्रार्थना, क्षमायाचना, स्वदोषस्वीकारः. 2 व्यप-अप-देशः, छद्मन् *n.* **-ist,** *s.* स्वदोषस्वीकारिन् *m.*, व्यपदेष्टृ *m.* **-ize,** *v. i.* क्षमां याच् 1 A. or प्रार्थ् 10 A, स्वदोषं स्वीकृ-अंगीकृ 8 U. 2 व्यपदिश् 6 P, व्यपदेशं-छद्म-कृ. -**Apologetic,** *a.* व्यपदेशक.

Apophlegmatic, *a.* कफनाशन (नी *f.*).

Apophthegm, *s.* सूत्रं, वचनं, नीतिवचनं.

Apoplexy, *s.* अंगविकृति *f.*, संन्यासः.

Apostate. *s.* स्वधर्मत्यागिन् *m.*, स्वधर्मभ्रष्टः-च्युतः, पतितः. -**Apostacy,** *s.* स्वधर्मत्यागः, धर्मभ्रंशः, परधर्माश्रयः. -**Apostatize,** *v. i.* स्वधर्मात् भ्रंश् 1 A, 4 P or पत् 1 P, परधर्ममाश्रि 1 U.

Apostle, *s.* ईश्वरप्रेरितः, ईश्वरदूतः.

Apostrophe, *s.* संबोधनं. **-ize,** *v. t.* संबुध् c., आमंत्र् 10 A.

Apothecary, *s.* औषधानां विक्रेतृ *m.*, भेषजविक्रयिन् *m.*

Appall, *v. t.* सं-वि-त्रस् c., भी c., उद्विज् c., व्याकुलीकृ 8 U. 'he was a. ed with fear' भयेन विवर्णीभूतः; 'a. ing sight' महात्रासजनकं स्थानं or दर्शनं.

Apparatus, *s.* उपकरणं, सामग्री.

Apparel, *s.* वेशः-षः, वस्त्र, परिधानं, आभरणं. **-***v. t.* वस् c., प्रावृ 5 U. संव्ये 1 P.

Apparent, *a.* व्यक्त, अभिव्यक्त, स्फुट, स्पष्ट, प्रत्यक्ष, प्रकाश, आविर्भूत. **2** मिथ्या *ind.*, अवास्तव (वी *f.*); 'a. praise' व्याजस्तुति *f.* **3** बाह्य, बहिः in comp.; 'to make a.' आविष्कृ, स्पष्टी-प्रकटी-कृ. **-ly,** *adv.* व्यक्तं, स्पष्टं &c. **2** बहिः; 'a wise man acts a. agreeably' विद्वान् जनो बही रमणीयं व्यवहरति (Mal. 1).

Apparition, *s.* आभासः, छाया, आकारः. **2** वेतालः, पिशाचः.

Appeal, *v. i.* पुनर्विचारं प्रार्थ् 10 A. **2** प्रमाणीकृ 8 U, प्रमाणयति (D.); or by प्रमाणं; 'I a. to your lordship in this case' अत्र विषयेऽत्रभवंतं प्रमाणीकरोमि, अत्रभवान् प्रमाणं. **-***s.* पुनर्विचारप्रार्थना; प्रमाणीकरणं.

Appear, *v. i.* उदि 2 P, उद्गम् 1 P, प्रकाश् 1 A, प्रादुर्भू 1 P, आविर्भू. **2** उपस्था 1 U, संनिधा pass. **3** प्रतिभा 2 P, अवभास् 1 A, दृश् pass., लक्ष् pass.; 'so as to a. dead' मृतमिवात्मानं संदर्श्य; 'the witness did not a.' साक्षी नोपतस्थौ. **-ance,** *s.* उदयः, प्रादुर्भावः, आविर्भावः. **2** उपस्थिति *f.* **3** आकारः, आकृति *f.*, रूपं; 'good in a.' शोभनाकृति, सुदृश्य, प्रेक्षणीय. **4** आभासः, छाया, आभा; 'your story has an a. of truth' तव कथा सत्येव प्रतिभाति-अवभासते. **5** अनुमानं.

Appease, *v. t.* सां(शां)त्व् 10, प्र-उप-शम् c. (शमयति), तुष् c., प्रसद् c., अनुनी 1 P; 'to be a. ed' प्रसद् 1 P, प्रशम् 4 P. **-ing,** *s.* सांत्वनं, प्र-उप-शांति *f.*, प्रसादनं, अनुनयः.

Appellation, *s. See* **Name.-Appellative,** *a.* अभिधायिन्. **2** सामान्य.

Append, *v. t.* अनुबंध् 9 P, उपाधा 3 U, आसंज् c. **-age,** *s.* अनुबंधः; उपाहितभागः. **2** उपकरणं. **-ed,** *s.* संयोजित, उपाहित.**-ix,** *s.* परिशिष्टं, शेषसंग्रहः.

Appertain, *v. i. See* **Belong.-Appertenance,** *s.* अनुबंधः; उपकरणं, उपस्करः, सामग्री.

Appetite, *s.* कामः, रागः, अभिलाषः, इच्छा, रुचि *f.* **2** बुभुक्षा, क्षुधा-धू *f.*; 'sensual a.' विषयरुचिः, विषयोपरागः.

Applaud, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, अभिनंद् 1 P, स्तु 2 U. **2** उपगै 1 P. **-Applause,** *s.* प्रशंसा, श्लाघा, स्तुति *f.* **2** प्रशंसावाचः (pl.), धन्यवादः; 'he rose to speak amidst loud a.' उच्चैः प्रशंसावाच उदीरयत्सु श्रोतृषु स वक्तुमुदतिष्ठत्.**-Applausive,** *a.* श्लाघान्वित; स्तुतिमय (यी *f.*).

Apple, *s* आतावृक्षः,-फलं. **2** (Of the eye) तारा, कनीनिका; 'a. of discord' भेदकलह-बीजं.

Apply, *v. t.* संयुज् 10, न्यस् 4 P, ऋ c (अर्पयति), निविश् c., निधा 3 U, आरुह् c.: 'a. your shoulder to the wheel' चक्रमंसेन उत्तंभय; 'a. ing the hand to my shoulder' अंसे हस्तं निवेश्य &c. **2** विधा 3 U; प्रयुज् 7 A, 10; 'they do not a. the word विषय to happiness' सुखार्थे विषयशब्दं न प्रयुंजते, -शब्दस्य प्रयोगो न दृश्यते. **3** आश्रि 1 U; याच् 1 A, अर्थ् 10 A. **4** (Oneself to) अनुष्ठा 1 P, मनः-चित्तं-समाधा or बंध् 9 P, अभियुज् pass (एते वयं स्वकर्मण्यभियुज्यामहे Mu. 3). **-***v. i.* लग् 1 P, सं-अनु-बंध् 9 P. **2** प्रयुज् pass., उपपद् 4 A; oft. by गम् 1 P, इ 2 P; 'this our title does not a. to any one else' द्वितीयगामी न हि शब्द एष नः (R. III. 49): राम इत्ययं शब्द उच्चरित एव मामगात् (R. XI. 73.); विषय in comp.; 'the word ईश्वर not a. ing to anybody else' ईश्वर इत्यनन्यविषयः शब्दः (V. 1). **3** (to, for) याच् 1 A, प्र-अभि-अर्थ् 10 A; 'a. ed for further orders' कोपरो नियोगोनुष्ठीयतामिति प्रार्थयामास. **-Appliance,** *s.* उपायः, उपकरणं, सामग्री. **-Application,** *s.* योजनं, विधानं, प्रयोगः, संप्रयोगः, निवेशनं, न्यासः, अर्पणं. **2** मनोनियोगः, चित्तासक्ति *f.*, अभ्यसनं, अध्यवसायः, अभिनिवेशः, आसक्ति *f.*, अनुष्ठानं. **3** उपयोगः, प्रयोजनं. **4** संबंधः; 'a. of this speech to Râma' अस्य वचनस्य रामगामी संबंधः. **5** प्रार्थना. **-Applicable,** *a.* लगत् (न्ती *f.*), प्रयोज्य. **2** संगत, संबद्ध.**-Applicant,** *s.* प्रार्थयितृ *m.*, अर्थिन् *m.*, याचकः, प्रणयिन् *m.*

Appoint, *v. t.* युज् 7 U,10, स्था c.(स्थापयति), निधा 3 U. **2** अधिकृ, नियुज् 7 A (with loc.) य इमामाश्रमधर्मे नियुंक्ते (S. 1); व्यादिश् 6 P. **3** निर्दिश् 6 P, निरूप् 10; 'a. ed lesson' निर्दिष्टपाठः; 'a. ed time' कृतः कालावधिः, कृतसंकेतः, समयः. **-ment,** *s.* नियोगः, अधिकारः, पदं. **2** नियमः, विधिः, आज्ञा, शासनं. **3** उपकरणं. **4** निरूपणं, स्थापनं. **5** समयः, संकेतः; 'keep your a.' समयमनुरुध्यस्व-वर्तस्व; 'Queen, let us keep (to) our a.' देवि सामयिका भवामः (M. 1.).

Apportion, *See* **Divide.**

Apposite, *a.* युक्त, यथार्थ, संगत. **-ly,** *adv.* स्थाने, यथार्थतः.

Branch, *s.* शाखा, विटपः. 2 अंगं, शाखा, एकदेशः-भागः. 3 उपनदी, अल्पसरित् *f*. 4 अपत्यं, कुलसंतानं; वंशः. -*v. i.* शाखारूपेण विस्तृ pass., or भिद् pass.; 'the family b. ed into 8 parts' भिन्नोऽष्टधा विप्रससार वंशः. (R. xvi. 3) **-y, -ing,** *a.* शाखिन्, शाखामय (यी *f*), शाखासनाथ; विस्तीर्ण, विस्तारयुक्त.

Brand, *s.* अलातं, उल्का, दग्धकाष्ठं. 2 कलंकः, अंकः, लांछनं, अपकीर्तिचिह्नं. -*v. t.* तप्तलोहेन अंक् 10 or चिह्न् 10; 'b. ed with disgrace' अपयशोंकितः, उपक्रोशमलीमसः. **-ed,** *a.* तप्तलोहेन चिह्नित, दुष्कीर्तिचिह्नांकित. **-new,** (Bran new) *See* **Fresh** or **New.**

Brandish, *v. t.* परि-भ्रम् c (भ्रमयति), विधू 5, 9 U.

Brandy, *s.* सुरा, आसवं, वारुणी, सीधु *f*.

Brangle, *s.* कलहः, व्याक्रोशः.

Brass, *s.* पित्तलं, आरकूटः-टं, रीति-ती *f*. **-y,** *a.* पित्तलमय (यी *f*). **-Efflorescence,** *s.* रीतिपुष्पं, पुष्पकेतु, पुष्पकं, कुसुमांजनं.

Brat, *s.* शिशुः, बालः, बटुः.

Brave, *v. t.* भर्त्स् 10 A, तर्ज् 10 A. 2 धृष् 5 P; आ-समा-ह्वे 1 A. -*a.* वीर, शूर, विक्रांत, धीर, पराक्रमवत्, वीर्य-विक्रम-शालिन्, साहसिक (की *f*.); उदार, तेजस्विन् 'fortune favours the b.' साहसे श्रीः प्रतिवसति. -*s.* शूरंमन्यः. 2 समाह्वानं. **-ly,** *adv.* सधैर्यं, निर्भयं, सविक्रमं, शूर-वीर-वत्. **-ry,** *s.* वीर्यं, शौर्यं, धैर्यं, परा-वि-क्रमः, साहसं. 2 (**Bravado**) विकत्थनं, आत्मश्लाघा.

Bravo, *interj.* साधु, साधु साधु. -*s.* घातकः, आततायिन् *m*.

Brawl, *s.* कलिः, कलहः, विवादः, द्वंद्वं, विप्रतिपत्ति *f*. -*v. i.* विवद् 1 A, कलहं कृ 8 U, कलहायते (D).

Brawn, *s.* शूकरमांसं. 2 स्नायुः; बाहुः. **-y,** *a.* मांसल; दृढांग (गी *f*.); संनद्धशरीर.

Bray, *v. t.* चीत्कारशब्दं कृ 8 U, आरट् 1 P. -*v. t.* चूर्ण् 10, पिष् 7 P -*s.*, **-ing,** *s.* ची-(चि)त्कारः, खरनादः.

Braze, *v. t.* पित्तलेन संधा 3 U. **-en,** *a.* पित्तलमय (यी *f*.). 2 निर्लज्ज, धृष्ट, निस्त्रपावरण. *v. t.* धृष् 5 P. **-ier,** *s.* ताम्र-कास्यकारः, कामंधमिन् *m*. 3 अंगारपात्रं.

Breach, *s.* छिद्रं, रंध्रं. 2 भंगः, भेदनं; अतिक्रमः, लंघनं; 'b. of promise' प्रतिज्ञाभंगः; आज्ञाभंगः. 3 भेदः (सुहृद्भेदः); 'b. in a wall' संधिः, सुरंगा.

Bread, *s.* अपूपः, पिष्टकः, कांदवं. 2 अन्नं, आहारः.

Breadth, *s.* *See* under **Broad.**

Break, *v. t.* भंज् 7 P (fig. also), खंड् 10. 2 क्षुद्-पिष् 7 P, चूर्ण् 10, मृद् 9 P. 3 अतिक्रम् 1 U, 4 P, उल्लंघ् 1 A, 10, अतिचर् 1 P; विलुप् c. 4 भिद् 7 U, विघट् c. (घटयति); विद् 9 P, 10, स्फुट् c. (as heart); 'b. fast' पारणां निर्वृत् c., प्रातराशं-कल्यवर्तं सेव् 1 A; 'b. wind' गुदरवं कृ 8 U, पर्द् 1 A; 'b. the way for' अपसृ 1 P, अप-इ 2 P, अपक्रम्. 5 विनश् c., उच्छिद् 7 P. -*v. i.* भिद्-दृ-भंज्- pass., त्रुट् 6, 4 P, स्फुट् 6 P, (स्फुटति हृदयं), दल् 1 P. 2 प्रभा 2 P; 'the day broke' उषाः समायता, प्रभाता रजनी, वृत्तं दिनमुखं. 3 क्षि pass., अवसद् 1 P, विशॄ pass., ध्वंस् 1 A, जॄ 4, 9 P. -*s.* विच्छेदः, निवृत्ति *f*., विरामः, भंगः; 'b. of day' प्रभातं, उषःकालः, अरुणोदयः; 'the story has suffered a b.' विच्छेदमाप कथाप्रबंधः (Ks. 239). **-down,** चूर्ण् 10; (*v. i.*) *See* **Fail.** **-in upon,** प्रसह्य-सहसा-प्रविश् 6 P. **-into,** विनी 1 P, दम् c. (दमयति). **-into,** (a house) संधिं कृत्वा प्रविश्. **-loose,** प्रमुच्, विमुच् pass.; 'the elephant broke loose from the post' आलानस्तंभं भंक्त्वा निर्जगाम. **-off,** भंज्, भंगं कृ 8 U; (*v. i.*) अकस्मात् विरम् 1 P, त्यज् 1 P, निवृत् 1 A. **-open,** बलात्-सहसा-उद्घट् c. or अपवृ 5 U. **-out,** (*v. i.*) उद्भू 1 P, उत्पद् 4 A, प्रादुर्भू, उदि 2 P. 2 निर्गम् 1 P. **-through,** निर्भंज्, अपानुद् 6 P, निरस् 4 P; *See* **Dispel.** **-up,** (*v. t.*) *See* **Break** (*v. i.*) 'the party broke up' सभ्याः स्वं स्वं स्थानं प्रतिजग्मुः. **-upon,** आहन् 2 A; 'the dawn broke upon his eyes' तस्याक्ष्णोः प्रभातमासीत् (S. 2). **-with,** विवद् 1 A, कलहं कृ. **-er,** *s.* भंजकः, भेदकः. 2 प्रस्तर or तट-भग्ना ऊर्मि *f*., लहरि *f*. **-fast,** *s.* प्रातराशः, कल्यवर्तः. **-water,** *s.* सेतुः, धरणः.

Breast, *s.* उरस् *n*., क्रोडं, वक्षस् *n*. 2 स्तनः, पयोधरः, वक्षोजः, कुचः, (of human beings). 3 हृदयं, अंतःकरणं, चित्तं, मनस् *n*.; 'b. high' वक्षोदघ्न (घ्नी *f*.); 'b. plate' कवचं, उरस्त्राणं; 'b work' वक्षःप्रमाणः प्राकारः. 'Make a clean b. of,' *See* **Confess,**

Breathe, *v. i.* श्वस् 2 P; प्राण् 2 P. 2 अस् 2 P, जीव् 1 P, वृत् 1 A. 3 आ-प्रत्या-समाश्वस्; 'b. deep' दीर्घ-स्थूलंस्थूलं निश्वस्; 'b. freely' उच्छ्वस्; 'b. the last' *See* **Die,** -*v. t.* (out) उद्गॄ 6 P, अव-प्र-सं-कॄ 6 P. 2 प्रवा 2 P. **-Breath,** *s.* श्वासः, निश्वासः, उच्छ्वसितं. 2 प्राणाः (pl.); प्राणायामः 'holding the b.'; असवः (pl.). 3

विरामः उपशमः. 4 उद्गारः. 5 मंदानिलः, मृदुवातः; 'in the same b.' एकावसरे, समकालमेव. **-ing**, *s.* श्वासः, श्वसितं. 2 स्पृहा, इच्छा; 'b. through nose' नासिकंधमः; 'b. hole' वातायन, गवाक्षः. **-less**, *a.* प्राणहीन, निरुच्छ्वास, विचेतन. 2 मृत, उत्क्रांतवायु 3 यष्टिप्राण.

Breech, *s.* पश्चाद्भागः, नितंबः, कटिदेशः. **-es**, *s.* कटिवस्त्रं, शाटकः.

Breed, *v. t.* जन् c. (जनयति), उत्पद् c., प्रसू 2 A. 2 पुष् 1, 4, 9 P or c., सं c. 3 विनी 1 P. **-***v. i.* वृध् 1 A, प्रजन्-उत्पद् 4 A. 2 गर्भवती भू, *See* **Conceive**; 'b. ing season' गर्भधारणकालः, उत्पत्तिसमयः. **-***s.* वंशः, कुलं, जाति *f.* 2 अपत्यं, प्रजा. 3 समुत्पन्नः शावकगणः, शिशुजातं. **-bred**, *a.* जनित; संवर्द्धित; विनीत, 'well b.' सुविनीत, सदाचार; 'ill b.' दुर्विनीत, दुराचार. **-er**, *s.* जनकः, पोषकः, विनेतृ *m.* **-ing**, *s.* पोषणं, पालनं, संवर्द्धनं. 2 शिक्षणं, विनयः. 3 सभ्यता, सुशीलता; 'of good b.' सुविनीत, सुशील. 4 गर्भधारणं, गर्भाधानं.

Breeze, *s.* मृदुपवनः, मंदानिलः, 2 वातः, अनिलः, *See* **Wind.** 3 *See* '**Coke**,' 'Agreeable b.' सुखस्पर्शः- सुखः-वायुः. **-y**, *a.* वातवत्, वातैरुपजीवित.

Breviary, *s.* संहिता, संग्रहः. 2 स्तोत्रसंग्रहः.

Brevity, *s.* संक्षेपः, समासः, संहारः, संग्रहणं.

Brew, *v. t.* (यवसुरं) पच् 1 P or क्वथ् 1 P. 2 प्रचित् 10, प्रक्लृप् c. **-age**, *s.* निष्क्वाथः. **-ery**, *s.* यवसुरापचनस्थानं.

Bribe, *s.* उत्कोचः, उपायनं. **-***v. t.* उत्कोचं दा 3 U, उत्कोचदानेन वशीकृ .U. **-ry**, *s.* उत्कोचदानं-ग्रहणं. 2 उत्कोचदानादानापराधः.

Brick, *s.* इष्टका, सुधा; 'burnt b.' पक्वेष्टका; 'b. bit' इष्टकाशकलं; 'b. kiln' आपाकः, पचनस्थानं; 'b. layer' लेपकः, सुधाजीविन् *m.*; 'b. work' इष्टकानिर्मितं.

Bridal, *s.* विवाहोत्सवः, उद्वाहकर्मन् *n.* **-***a.* वैवाहिक (का *f.*), विवाहयोग्य.

Bride, *s.* वधूः, नववधूः; पाणिगृहीता, नवोढा. 2 कन्या, कुमारी. **-groom**, *s.* वरः, परिणेतृ *m.*, परिग्रहीतृ *m.*, पाणिग्राहकः; 'bride and b.' वधूवर-रौ. **-maid**, *s.* जन्या.

Bridge, *s.* सेतुः, धरणं, संवरः, 2 आलि-ली *f.* धरणः (small); 'make a b.' सेतुं निर्मा 3 A, or कृ 8 U, or बंध् 9 P; 'fort b.' संक्रमः; 'b. of the nose' नासावंशः. **-***v. t.* सेतुना बंध् 9 P, संवृ 5 U.

Bridle, *s.* वल्गा; रश्मिः; 'giving the b.' to the passions' रागाधीनः, रागवशः. 2 निग्रहः, संयमः **-***v. t.* वल्गासनाथ *a.* कृ, रश्मिभिः यम् 1 P. 2 निग्रह् 9 P, नि-सं-यम्; *See* **Control**, 'by un-b. ed tongue' निर्यंत्रणया वाचा.

Brief, *a.* स्वल्प, अचिर, अल्पकाल, क्षणिक (की *f.*), अचिरस्थायिन्, संक्षिप्त, परिमित, संवृत, अदीर्घ, संकुचित; 'to be b.' किं बहुना 2 संग्रहः, संक्षेपः. 3 सारपत्रं. **-ly**, *adv.* संक्षेपतः, संक्षेपेण, समासतः, समासेन. 2 अचिरेण, आशु, क्षिप्रं. **-ness**, *s.* संक्षेपः, समासः, संहारः, परिमितता.

Briar, Brier, *s.* गोक्षुरः, कंटकगुल्मः. **-y**, *a.* कंटकावृत.

Brig, *s.* कूपकद्वययुतः पोतः.

Brigade, *s.* चमूः, वाहिनी, सैन्यदलं, गुल्मः-ल्मं. **-ier**, *s.* वाहिनीपतिः, चमूपतिः.

Brigand, *s.* दस्युः, चौरः.

Bright, *a.* उज्ज्वल, प्रदीप्त, भासुर, रुचिर, तेजस्विन्, भास्वत्, भ्राजमान, प्रभावत्, दीप्तिमत्, देदीप्यमान. 2 विशद, निर्मल. शुचि. 3 विश्रुत. **-en**, *v. t.* प्र-उत्-द्युत् c., प्र-उत्-दीप् c., उद्भास् c., भ्राज् c., विराज् c. 2 विमलयति (D.), विशदीकृ 8 U. **-***v. i.* विमलीभू 1 P, प्रसद् 1 P, प्रसादं गम् 1 P, विशदीभू, (दिशः प्रसेदुः R. iii. 14). 2 शुभ्-द्युत् 1 A, *See* **Shine.** **-ly**, *adv.* उज्ज्वलं, विमलं, तेजसा, कांत्या. **-ness**, *s.* तेजस् *n.*, औज्ज्वल्यं; द्युतिः, रुचिः, कांतिः, प्रभा, दीप्तिः, शोभा, (all fem.); भासुरत्वं, तेजस्विता; 'b. of intellect' प्रदीप्ता प्रज्ञा.

Brilliance, Brilliant, *See* **Bright.**

Brim, *s.* कंठः, प्रांतः, मुखं, धारः, कर्णः; 'to the b.' आमुखं, आकंठं. 2 (of a river) तीरं, तटः-टं. 3 अंचलः, दशा (of a cloth). **-ful**, *a.* परिपूर्ण, आकर्णपूर्ण; ex. by मय (यी *f.*), निर्भर; 'b. of joy' हर्षनिर्भरः.

Brimstone, *s.* गंधकः. **-y**, *a.* गंधकपूर्ण-विशिष्ट.

Brindle, *s.* चित्रता, चित्रांगत्वं, शबलत्वं. **-ed**, *a.* शबल, चित्रित, कल्माषित.

Brine, *s.* लवणजलं. 2 बाष्पः, अश्रु *n.*, अस्रं.

Bring, *v. t.* आनी 1 P, आ-उपा-हृ 1 P, आवह् 1 P. 2 प्राप् c., आगम् c. (गमयति). 3 अनुनी 1 P, आकृष् 1 P. 4 जन् c. (जनयति), उत्पद् c.; ex. by प्रभू 1 P, जन् 4 A; 'poverty b. s one to shame' दारिद्र्याद् ह्रियमेति (Mr. 1); 'b. to end' समाप् c., निर्वृत् c., अवसो 4 P; 'b. to ruin' नश् c., नाशकारणं भू; 'b. word' निविद् c., वार्ता आख्या 2 P; 'b. action' अभियुज् 7 A. **-about**, (to pass) साध् 5 P, 10; घट् c., (घटयति), संपद् c., आवह् 1 P; क्लृप् 1 A, संपद् 4 A, (with dat.). **-down**, नि-अव-पत् c. अपकृष्, अभिभू **-forth**, *See* **Beget.** **-forward**, उपन्यस् 4 P, उद्वह् 1 P, उपक्षिप् 6 P, उपानी, पुरस्कृ

2 अग्रे-पुरः-आनी, प्रसू c., **—on,** आवह् 1 P, or with dat. ; ' disgrace b. s on despair ' परिभवः निर्वेदमावहति, निर्वेदाय (भवति); oft. by प्रभू, जन्; '*s.* avarice b. s on anger' लोभात् क्रोधः प्रभवति-जायते &c. **—out,** प्रकाश् c., प्रकटीकृ. **—together,** समा-नी, समुपाहृ ; *See* **Assemble.** **—under,** आनम् c. (नमयति); ' b. under one's power ' वशं नी, दम् c. (दमयति), अभिभू. **—up,** संवृध् c., पोषणं-पालनं-कृ 8 U (with gen.); पुष् 10.

Brink, *s.* तीरं, तटः-टं, कूलं. 2 प्रांतः, अंतः, पर्यंतः; धारा, उत्संगः, परिसरः, कंठः.

Brisk, *a.* चपल, त्वरित, क्षिप्र, अविलंब. 2 प्रबल, ससार, तीव्र; ' b. shower ' धारासंपातः. **-ly,** *adv.* सत्वरं, क्षिप्रं, आशु. **-ness,** *s.* तेजस् *n.*, सारः, सत्वं.

Bristle, *v. i.* पुलकित -रोमांचित-कंटकित *a.* भू 1 P; ' his body b. ing with joy ' हर्षरोमांचित-पुलकित-तनुः; हृष् 4 P (of hair). **—***s.* शूकः-कं, दृढलोमन् *n.*, 2 शूकरलोमन् *n.* **-ing,** *a.* हृषित, पुलकित, रोमांचित.

Brittle, *a.* भंगुर, भिदुर, सुखभेद्य, सुभंग.

Brize, *s.* दंशः; गोमक्षिका.

Broach, *s.* शूलः, शंकुः, कीलः-लं. **—***v. t.* अपावृ 5 U. 2 निविद् c., प्रकाश् c., कथ् 10. 3 छिद्र् 10.

Broad, *a.* विस्तीर्ण, पृथु, विपुल, विस्तृत, विशाल, परिणाहवत्, आयत ; '10 yojanas b.' दशयोजनमायता (नगरी). 2 असभ्य, अश्लील, गर्हित ; ' b. day-break ' सुप्रभातं ; स्पष्टे जाते प्रत्यूषसि (Ka. 26) ; ' b. day light ' प्रखरतेजसि सवितरि ; ' b. awake ' प्रबुद्ध, उन्निद्र ; 'b. breasted' व्यूढोरस्कः; विशालवक्षस्. **-ness, Breadth,** *s.* विस्तारः, परिणाहः, आयामः, विशालता, पृथुता ; ' five fingers in b. ' पंचांगुलं (दारु).

Brocade, *s.* कार्मिकवस्त्रं.

Brochure, *s.* लघुपुस्तकं.

Brogue, *s.* प्राकृतभाषा, अपभ्रंशः. 2 चर्मपादुका.

Broider, *v. t.* चित्र् 10, सूच्या वस्त्रे पुष्पादिकं सिव् 4 P. **-y,** *s.* सूचिकर्मन् *n.*

Broil, *v. i.* तप्-पच्-pass. **—***v. t.* भ्रस्ज् 6 P; (fig.) संक्षुभ् c., प्रकुप् c., उद्दीप् c. **—***s.* कलहः, द्वंद्वं, कलिः, तुमुलं.

Broker, *s.* निरूपितमूल्येन कार्यनिर्वाहकः. **-age,** *s.* कार्यनिर्वाहणार्थं दत्तं द्रव्यं.

Bronze, *s. See* **Brass.**

Brooch, *s.* वक्षोभूषणं, उरोमणिः.

Brood, *v. i.* (lit.) (अंडानां) उपरि-सद् 1 P. निविश् 6 P; (fig.) नि-ध्यै 1 P, पुनः पुनर् आलोच् 10; चिंताव्यग्र *a.* भू. **—***s.* प्रजा, संतति *f.*, अपत्यं. 2 सममुत्पन्नः शावकगणः, अपत्यजातं.

Brook, *s.* कुसरित् *f.*, स्रोतस् *n.*, क्षुद्रनदी, क्षुद्र-अल्प-सरित्. **—***v. t.* सह् 1 A, क्षम् 1 A, मृष् 4 P, 10.

Broom, *s.* संमार्जनी, शोधनी. 'b. stick-staff' मार्जनीदंडः; दीर्घ-कृश-यष्टिः.

Broth, *s.* सूपः, यू(जू)षं.

Brothel, *s.* वेशः, वेश्यालयः, गणिकागृहं.

Brother, *s.* भ्रातृ *m.*, सोदरः, सहोदरः, सोदर्यः. 2 बंधुः, सहकारिन् *m.*, संसर्गिन् *m.*; ' spiritual brethren ' एकगुरवः. **-hood,** *s.* भ्रातृभावः,-त्वं, सौभ्रात्रं. 2 साहचर्यं, बंधुता, संसर्गः, समाजः. **-ly,** *a.* भ्रात्रीय, भ्रातृसदृश (शी *f.*,); ' b. in law,' *s.* श्यालः, देवृ, *m.*, देवरः (husband's brother.).

Brow, *s.* कटकः, उत्संगः, *See* **Edge.** 2 भ्रूः, भ्रूलता ; 'knit the b. s.' भ्रूभंगं कृ 8 U, भ्रुकुटिं बंध् 9 P, भ्रुकुटिरचनां कृ. 3 ललाटं; वदनं, आननं. **-beat,** *v. t.* भ्रूभंगेण-कटाक्षेण-तर्ज् 10, or निरीक्ष् 1 A. **-Bound,** *a.* किरीटिन्.

Brown, *a.* कपिश, पिशंग (गी *f.*), पिंगल, कपिल, श्याव. **-ish,** *a.* ईषत्कापिश, आपिंगल. **-ness,** *s.* कपिशः, पिंगलवर्णः.

Browse, *v. t.* अद् 2 P, चर्व् 10, लंघ् 1 A, (पल्लवान् लंघितुमागच्छति M. 4), भक्ष् 10, संदंश् 1 P. **—***s.*, **-ing,** *s.* किसलयः-यं, नवपल्लवः-वं; नवतृणं, शाद्वलं.

Bruin, *s.* ऋक्षः, भल्लूकः,

Bruise, *v. t.* अपकृ 8 U, क्षण् 8 P, प्रहारेण हिंस् 7 P. 2 मृद् 9 P, पिष् 7 P. **—***s.* क्षतं, अपकारः, प्रहारः, आघातः. 2 पिच्चितव्रणः.

Bruit, *s.* ध्वनिः. 2 वार्ता, जनप्रवादः. **—***v. t.* ख्या c. (ख्यापयति), घुष् 10.

Brunette, *s.* श्यामा, श्यामवर्णा.

Brunt, *s.* भारः; ' b. of battle ' रणधुरा ; संघट्टः, प्रथमाक्रमः; प्रहारः, आघातः.

Brush, *s.* आघर्षणी; लोममयी मार्जनी or शोधनी. 2 तूलिका, शलाका, वर्तिका. 3 संघट्टः, समाघातः. **—***v. t.* मृज् 2 P, घृष् 1 P, घर्षणेन शुध् c. 2 मृदु तड् 10, लघुगत्या व्रज् 1 P. **—***v. i.* (by) लघु घृष्. 2 अपधाव् 1 P, विसृप् 1 P. **-wood,** *s.* गुल्मः, जंगलं. **-y,** *a.* लोमश.

Brusque, *a.* अविनीत. 2 असंबद्ध. 3 अनवहित.

Brute, *s.* पशुः, तिर्यंच् *m.* 2 नृपशुः, दुर्वृत्तः, क्रूराचारः. **—***a.* अ-वि-चेतन, अज्ञान. 2 क्रूरकर्मन्, असभ्य. **-al, -ish,** *a.* नृशंस, क्रूर, पशु in comp ; *See* **Cruel.** 2 पशुशील, पाशव (वी *f.*), पशुसदृश (शी *f.*), पशुतुल्य. **-ally,** *adv.* पशुवत् ; निर्दयं, अतिक्रौर्येण.

Bubble, *s.* बुद्बुदः, स्फोटिका. 2 (fig.) असारं वस्तु, माया, वंचकः, मोहः, मायाजालं. -*v. i.* बुद्बुदायते (D). -*v. t. See* **Cheat.**

Bubby, *s. See* **Breast.**

Bubo, *s.* ग्रंथि *f.*

Buck, *s.* हरिणः, मृगः. 2 वस्त्रधावनार्थं जलं. 3 सुभगंमन्यः. -*v. t.* वस्त्रं धाव् 1 P.

Bucket, *s.* अरघट्टः, उदंचनं, घटीयंत्रं. 2 पात्रं, द्रोणी, सेचनी-नं.

Buckle, *s.* कुडुपः, गंडकः. -*v. t.* कुडुपेन बंध् 9 P; 'to be b. ed to' परायण-आसक्त *a.* भू 1 P. -**er,** *s.* फलकः-कं, चर्मन् *n.*

Buckram, *s.* स्थूलपट्टं-पटः.

Bud, *s.* कलिका, कोरकः-कं, मुकुलः-लं, कुड्मलः; जालं, कोशः-षः, प्ररोहः, अंकुरः, पल्लवः-वं. -*v. t.*, -**ed,** *See* under **Blossom.**

Budge, *v. i.* प्रचल् 1 P, अपसृ 1 P, नि-परा-वृत् 1 A. त्यज् 1 P.

Budget, *s.* शाणपुटः, दृति *f.* 2 कोषः, संग्रहः, संचयः. 3 आयव्ययगणना, °पत्रं.

Buff, *s.* महिषचर्मन् *n.* 2 पांडुवर्णः.

Buffalo, *s.* महिषः; 'she-b.' महिषी; 'b. milk' माहिषं पयः.

Buffer, *s.* आघात-भंजकः or मोघीकारकः.

Buffet, *s.* मुष्टिप्रहारः, कराघातः, चपेटिका. 2 कुशूलः. -*v. t.* मुष्टिना तड् 10 or प्रहृ 1 P.

Buffoon, *s.* विदूषकः, वैहासिकः. भंडः. -**ery,** *s.* परिहासः, हास्यं, नर्मन् *n.*

Bug, *s.* मत्कुणः, उद्दंशः; 'b. bear' महाभयास्पदं, भयहेतुः.

Bugle, *s.* काहलः-ला, व्याधशृंगं-विषाणं. 2 शृंग, विषाणं.

Build, *v. t.* निर्मा 3 A or c. (मापयति), प्रक्लृप् c., विधा 3 U, विरच् 10; 'b. upon' समालंब् 1 A, आ-समा-श्रि 1 U. -**er,** *s.* निर्मातृ *m.*, विधायकः. 2 स्थपतिः, शिल्पिन् *m.*, दारुकर्मन् *m.* -**ing,** *s.* निर्माणं. विधानं. 2 भवनं, गृहं, हर्म्यं.

Bulb, *s.* कंदः-दं, गोलमूलं. -**ous,** *a.* कंदिन्, कंदविशिष्ट. 2 कंदाकृति.

Bulge, *v. i.* बहिर्लंब् 1 A, उदराकारेण प्रलंब्.

Bulk, *s.* प्रमाणं, परिमाणं, मात्रा. 2 स्थूलता, बृहत्त्वं. 3 प्रधान-अधिक-भागः, भूयस् *n.* -**y,** *a. See* **Big.**

Bull, Bullock, *s.* वृषः, वृषभः, बलीवर्दः, ऋषभः, अनडुह् *m.*, उक्षन् *m.*, ककुद्मत् *m.* 2 वाग्दोषः, महास्खलितं, सुस्पष्टो वचनविरोधः.

Bullet, *s.* सीसकगुलिका.

Bulletin, *s.* शरीरस्थितिज्ञापकं पत्रं.

Bullion, *s.* हिरण्यं; रूप्यं.

Bully, *s.* पिंडीशूरः, शूरंमन्य; दांभिकः, कलहकारिन् *m.* -*v. t.* तर्ज् 10, भर्त्स् 10 A; आह्वे 1 A.

Bulwark, *s.* वप्रः-प्रं, प्राकारः. 2 आश्रयः, शरणं, संश्रयस्थानं, आलंबः; रक्षणस्थानं.

Bum, *s.* नितंबः, कटिप्रोथः.

Bump, *s.* स्फोटः, गंडः, शोफः. -*v. i.* श्वि 1 P. 2 **Beat,** q. v.

Bumper, *s.* अतिपूर्णं पात्रं; चषकः; 'b. crops' अतिप्रचुरः शस्यागमः; 'b. house' जनाकीर्णं प्रेक्षागृहं.

Bumpkin, *s.* वृषलः, जानपदः, ग्राम्यजनः.

Bumptious, *a.* सावलेप, अवलिप्त.

Bunch, *s.* गुच्छः, स्तबकः. 2 पिंडः, गंडः. 3 ग्रंथिः, शेखरः-रं. 4 राशिः-शी, संघातः, संहतद्रव्य. -*v. i.* (out) पिंडीभू 1 P.

Bundle, *s.* भारः, कूर्चः, पोटलिका, गुच्छः. संघातः; 'b. of goods' भांडकं. -*v. t.* (up) गुच्छीकृ 8 U, एकत्र समाहृ 1 P.

Bung, *v. t.* छिद्रं निरुध् 7 U or पिधा 3 U. -**hole,** *s.* पात्रच्छिद्रं, पात्रधारा.

Bungalow, *s.* हर्म्यं.

Bungle, *v. i.* अदक्षतया कार्यं निर्वह् c., प्रमद् 1 P. स्खल् 1 P. -*s.* प्रमादः, स्खलितं, दोषः. -**er,** *s.* अदक्षः, प्रमादिन् *m.*, अनिपुणः. -**ingly,** *adv.* सप्रमादं, प्रमादतः, अदक्षतया.

Bunter, *s.* अकुलीना स्त्री.

Bunting, *s.* ध्वजपटः, केतुवसनं. -*s.* तरणः, प्लवः.

Buoy, (up) *v. t.* उत्तंभ् 9 P. उद्धृ 1 P, 10, आलंब् 1 A. 2 प्लु c. -*s.* तरणः, प्लवः. -**ancy,** *s.* लघुता, लाघवं, प्लवनशीलता.

Burden, *s.* भारः, भरः, धुर् *f.* (राज्यधुरा): 'beast of b.' धुर्यः, धुरीणः. 2 ध्रुवकं, अनुपद. 3 पीडाकर *a.* (री *f.*), पीडाहेतुः, भारभूत *a.* -*v. t.* भारं न्यस् 4 P or निविश् c. -**ed,** *a.* भाराक्रांत, आरोपितभार. -**some,** *a.* दुर्वह, दुर्भर, दुरुद्वह. 2 पीडाकर, दुःखावह.

Bureau, *s.* आधारः. 2 लेखनस्थानं, लेखनसाधनाधारः.

Bureaucratic, *a.* अनियंत्रितशासन.

Burgh, *s.* नगरं, पुरं. -**er, Burgess,** *s.* नगरजनः; पौरः. 2 नगरप्रतिनिधिः, पुरप्रतिनिधिः. -**ership,** *s.* नगरजनाधिकारः, पौराधिकारः.

Burglar, *s.* संधिचौरः, गृहभंगकृत् *m.*, कुड्यच्छेदिन् *m.*, संधिच्छेदकः. -**y,** *s.* भित्तिचौर्यं, गृहभंगः.

Burgomaster, *s.* नगराध्यक्षः

Burke, *v. t.* श्वासनिरोधेन हन् 2 P or व्यापद् c. or मृ. 2 त्वरितं संपद् c.

Burlesque, *a.* परिहासकर (री *f.*), हासजनन (नी *f.*), परिहास्य. -*s.* परिहासः, भांडं, नर्मन् *n.* -*v. t. See* **Laugh.**

Burly, *a. See* **Big.**

Burn, *v. t.* दह् 1 P, प्लुष् 1 P, ज्वल् c. (ज्वलयति), तप् 1 P or c., उष् 1 P, दीप् c. -*v. i.* ज्वल् 1 P, दह् pass., तप् 4 A, दीप् 4 A; 'b. after' उत्कंठ् 1 A, स्पृह्

10); 'b. out' शम् 4 P; 'b. up' निर्दह्. -s. दाहव्रणः,-अंकः. 2 *See* **'Brook'**, **-er,** *s.* दाहकः, तापकः दीपकः. **-ing,** *s.* दाहः, दहनं, प्लोषः, तापः, ज्वलनं; 'b. ground' श्मशानं. -*a.* दाहक, तापक. 2 चंड, प्रखर; 'b. glass' सूर्यकांतः, सूर्योपलः.

Burnish, *v. t.* प्रमृज् 2 P (प्रमृष्टं चामीकरं); तिज् c., परिष्कृ 8 U. **-er,** *s.* तेजकः, धावकः.

Burrow, *s.* बिलं, विवरं, गर्तः-र्ता. -*v. i.* बिले-गर्ते-वस् 1 P.

Bursar, *s.* धनाध्यक्षः, कोषाधिपतिः. 2 शिष्यवृत्त्युपजीविन् *m.* **-y,** *s.* कोषः, धनागारं. 2 शिष्यवृत्ति *f.*

Burst, *v. i.* स्फुट् 6 P, दल् 1 P, वि-दृ-शॄ pass., भिद्-भंज् pass.; 'b. in pieces' शकलीभू, खंडशो भिद् pass.; 'b. into tears' सहसा रोदितुमारेभे, सहसा प्रावर्तताश्रुधारा. -*v. t.* भिद्-भंज् 7 P, स्फुट् c., दॄ 9 P, 10, शकलीकृ 8 U, दल् c. (दलयति); 'she b. herself' हृदयस्फोटनेन मृता. -*s.* स्फोटनं, विदलनं, भंगः, भेदः, 'there was a b. of applause' संभूय प्रशंसागिरः उदतिष्ठन्; 'b. of laughter' अट्टहासः, उच्चैर्हासः.

Burthen, *s. See* **Burden.**

Bury, *v. t.* निखन् 1 P, निगुह् 1 U, (श्मशाने-भूमौ) निधा 3 U, स्था c. (स्थापयति), निक्षिप् 6 P; निर्-दह् 1 P; 'this buried the king into sorrow' एतेन (वचसा) राजा दुःखमग्नो-दुःखोदधिमग्न इव बभूव; 'b. the hatchet' कलहाद्विरम् 1 P. **-ing,** *s.* निखननं, श्मशाने स्थापनं; 'b. ground' श्मशानं, प्रेतावासः, परेतभूमि *f.*, पितृवनं, पितृसद्मन् *n.*

Bush, *s.* गुल्मः-ल्मं, क्षुपः, स्तंबः; 'why do you beat about the b.' अप्रस्तुतं किमिति अनुसंधीयते, (निरर्थकं किमिति वनमालोडयसि); 'a bird in the hand is worth two in the b.' ध्रुवाणि परित्यज्य अध्रुवनिषेवणं नेष्टं. अध्रुवाद् ध्रुवं वरं, वरं तत्कालोपनता तित्तिरिः न पुनर्दिवसांतरिता मयूरी or वरमद्य कपोतो न श्वो मयूरः. **-y,** *a.* गुल्मावृत, निबिड; गाढ, अविरल. 2 घन, स्थूल; लोमश.

Business, *s.* कार्यं, अर्थः, कृत्यं, कर्मन् *n.*, व्यवसायः, व्यवहारः; व्यापारः; नियोगः (duty). 2 अर्थः, प्रयोजनं; 'what b. had you to talk with him' तेन सहालापेन किं तव कार्यमासीत्. 3 वृत्ति *f.*, जीविका; 'a man of b.' कार्यकुशलः, दृष्टकर्मन् *m.*

Buss, *See* **Kiss.**

Bust, *s.* ऊर्ध्वकायप्रतिमा-प्रतिकृति *f.*

Bustle, *s.* संभ्रमः, आकुलत्वं, त्वरा, व्यग्रता. 2 कोलाहलः, तुमुलरवः. -*v. i.* कार्यव्यापृतत्वात् इतस्ततो धाव् 1 P or गम् 1 P or चेष्ट् 1 A, or व्यवसो 4 P. **-er, -ing,** *s., a.* चपलप्रकृतिः, व्यवसायिन् *m.*

Busy, *a.* व्यापृत (with loc.); कार्यसमाकुल, कार्यव्यग्र; 'with what work are you b.' कस्मिन्कार्ये व्यापृतोऽसि, किमारंभस्त्वं; कार्योद्युक्त, सोद्योग, अतंद्रित, अनलस, व्यग्र. -*v. t.* व्यापृ c., कार्ये नियुज् 10 or अधिकृ 8 U. **-Body,** *s.* पराधिकारचर्चकः. **-ly,** *adv.* अतंद्रितं, सोत्साहं, मनोभिनिवेशेन, औत्सुक्येन, व्यग्रतया.

But, *prep.* अन्य, इतर, ऋते with abl. विना, विहाय, मुक्त्वा (acc.). -*adv.* एव, केवलं, मात्रं. -*conj.* तु, पुनः, (not at beginning); in 'not only but' *अपि* takes the place of '*but*'; न केवलं रूपे शिल्पेऽप्यद्वितीया मालविका (M. 2); 'b. for' (=if it were not) यदि न; 'all b.' *See* **Almost;** 'next b. one' एकांतर *a.*

Butcher, शौ(सौ)निकः, आखेटकः, मांसिकः, विशसितृ *m.* -*v. t.* विशस् 1 P, निषूद् 10, हन् 2 P. **-y,** *s.* वधः, हननं, विशसनं. 2 शूना, वधस्थानं.

Butler, *s.* गृहकर्म-दासः-करः.

Butt, *s.* लक्ष्यं, शरव्यं. 2 उपहासास्पदं, परिहासभूमि *f.* 3 आशयः, अभिप्रायः. 4 पात्रं, (सुरा-) भाजनं-भांडं. -*v. t.* शिरसा-शृंगेण-आहन् 2 U. **-end,** *s.* घनाग्रं, स्थूलाग्रं.

Butter, *s.* नवनीतं, नवोद्धृतं; दधिजं, किलाटः, 'clarified b.' घृतं, सर्पिस् *n.*, आज्यं; 'b. man' नवनीतविक्रयिन् *m.*; 'b. milk' (*s.*) तक्रं, अरिष्टं, कालशेयं, दंडाहतं, गोरसः, 'b. of last day's milk' हैयंगवीनं. -*v. t.* नवनीतेन लिप् 6 P.; (fig.) चाटूक्तिभिः प्रसद् c. or अनुनी 1 P.

Butterfly, *s.* चित्रपतंगः.

Buttock, *s.* नितंबः, कटिप्रोथः, जघनं, श्रोणि-णी *f.*

Button, *s.* गंडः, कुडुपः, 'b. hole' गंडाधारः. -*v. t.* गंडेन बंध् 9 P.

Buttress, *s.* वप्रः-प्रं, आधारार्थं कृतः प्राकारः. 2 आश्रयः, आधारः.

Buxom, *a.* सानंद, प्रफुल्लवदन, हृष्ट. 2 सरस, सविलास, ललित. **-ly,** *adv.* सानंदं, सरसं, ललितं. **-ness,** *s.* लीला, लालित्यं, विलासः.

Buy, *v. t.* क्री 9 U; 'b. off' मूल्यप्रदानेन परिक्री. **-er,** *s.* क्रेतृ *m.*, क्रायकः, क्रयिन् *m.*

Buzz, *v. i.* गुंज् 1 P, विरु 2 P. -*s.*, **-ing,** गुंजितं, गुंजारवः, कलरवः.

Buzzard, *s.* श्येनकः. 2 स्थूल-मंद-धीः.

By, *prep.* Gen. ex. by instr. of noun; रामेण हतः, बाणेन हतः, &c. 2 (Near) उप in comp., or समीपे-निकटे-पार्श्वे with gen.; 'b. her father' उपजनकं, पितुः पार्श्वे-

समीपे; 'by this time' अनेन समयेन; 'day b. day' अनुदिवसं-दिनं, दिने दिने; 'b. god' ईश्वरं साक्षीकृत्य-ईश्वरसमक्षं; 'b. and b.' अचिरात् : अचिरेण, क्रमशः; शनैः शनैः; 'b. the b.' अपरंच; 'b. degrees' क्रमशः; 'b. hundreds' शतशः; 'one b. one' एकैकशः, आनुपूर्व्येण; 'b. end' स्वार्थः, स्वहितं; 2 गौणार्थः. 'b. oneself' रहसि, निभृतं, रहः. 'b.-gone' अतीत, अतिक्रांत, गत; 'b.-path' विमार्गः, विपथः, उपमार्गः, गूढपथः; 'b. law' उपव्यवस्था, उपविधिः; 'b.-name' उपाधिः; by-product,' s. गौण-फलं-उत्पन्नं-लाभः. 'b.-stander' पार्श्वस्थः, प्रेक्षकः, समीपस्थः; 'b. word' उपहासास्पदं. 2 जनोक्ति f. आभाणकः.

Byre, s. व्रजः, गोष्टं, गोशाला.

C.

Cab, s. एकाश्ववाहनं-शकटः; 'c. man,' *See* **Coachman.**

Cabal, s. गूढमंत्रणा, कुविचारणा.—v. i. निभृतं मन्त्र् 10 A, कूटार्थं संभिल् 6 P. **-ler,** s. कुमंत्रणकृत् m., गूढमंत्रिन् m., भेदकरः.

Cabala, s. गूढशास्त्रं, गुप्तविद्या. **—Cabalist,** s. गूढशास्त्रज्ञः. **-ic,** a. निगूढार्थ, गुप्तार्थ.

Cabbage, s. शाकं, हरितकं. 2 s. (सूचिकेन) मुषितं पटखंडं. —v. i. (सूचिकवत्) पटखंडं मुष् 9 P.

Cabin, s. कुटि-टी f., शाला, कोष्ठः. 2 नौकाभ्यंतरे कोष्ठः. 3 वेश्मन् n., कुटीरः. 4 Tent, q. v. **-et,** s. वेश्मन् n., कक्षांतरं, उपरोधकं. 2 शिष्टसभा, धीसचिवसभा; गूढमंत्रणं. 3 रत्नकोष्ठः. 4 समुद्गकः, संपुटः; *See* **Box.**

Cable, s. नौरज्जु f. 2 विद्युत्संदेशवाहकं तंत्रं. **-ed,** a. रज्जुबद्ध. **-gram,** विद्युत्संदेशः.

Cachexy, s. दोषत्रयं, त्रिदोषं, शरीरदोषः.

Cachination, s. अट्टहासः, प्रहासः.

Cackle, Cackling, s. कूजनं, हंसरुतं; अव्यक्तरवः. 2 जल्पितं, प्रलापः.—v.i. कूज् 1 P, अव्यक्तं रु 2 P. **-er,** s. कूजकः.

Cad, s. ग्राम्यजनः, असभ्यः.

Cadaverous, a. शवतुल्य, शवसवर्ण.

Caddie, s. संदेशहरः, दूतः.

Cadence, s. पातः, च्युति f. 2 स्वरः, विरावः, निनादः; स्वरसंक्रमः, स्वरावरोहः.

Cadet, s. अनुजः, अवरजः. 2 युद्धकर्माभ्यासिन् m.

Cadge, v. i. छद्मना जीविकां कृ 8 U. 2 घोषणपूर्वकं अल्पद्रव्यं विक्री 9 U. 3 *See* '**Beg.**'

-er, s. आपणिकः, विवधिकः, 2 छद्मजीविन् m.

Cafe', s. पानगृहं.

Cæsura, s. विच्छेदः, विरामः.

Cage, s. पंजरः-रं, पिंजरं, वीतंसः. 2 Prison, q. v. **-v. t.** पंजरे रुध् 7 U or बंध् 9 P.

Cairn, s. उपल-पाषाण-राशिः, शिलासमुच्चयः, प्रस्तरचिति f.

Caitiff, s. खलः, शठः, दुर्वृत्तः; *See* **Wicked.**

Cajole, v. t. लल् 10, उपच्छंद् 10. 2 **Cheat,** q. v. **-ry,** s. चाटूक्ति f. 2 वंचनं, छलं, &c.

Cake, s. पूपः, पिष्टकः, अपूपः. —v. i. पिंडीभू 1 P.

Calamity, s. विपद् f., आपद् f., व्यसनं, अनर्थः, उपप्लवः, दुःखं, संकटं, अत्याहितं. 2 उत्पातः, दैवी आपद्. **-ous,** a. विपद्ग्रस्त, व्यसनोपेत, विपदापन्न दुर्गत, विधुर.

Calamus, s. वेत्रः, वेणुः.

Calash, s. केलिरथः, क्रीडायानं.

Calcareous, a. शार्करीय. 2 चूर्णमय-गुण.

Calcine, v. t. भस्मीकृ 8 U.

Calculate, v. t. गण् 10, परि-सं-ख्या 2 P, संकल् 10. 2 निरूप् 10; चिंत् 10, प्रक्लृप् c. **-ed,** a. गणित, संख्येय. 2 युक्त, पर्याप्त, उचित, अलं with inf. **-ion,** s. गणनं-ना, संख्यानं. **-or,** s. गणकः.

Calculous, a. शिला-अश्म-मय (यी f.)

Calculus, s. अश्मरी, मूत्रकृच्छ्रं.

Caldron, s. पिठरः-रं, उखा, कुंडं, स्थाली.

Calefy, v. t. तप् 1 P

Calendar, s. पंजी, पंजिका.

Calends, s. प्रतिपद् f.; प्रथमदिवसः.

Calf, s. गोवत्सः, वत्सः, तर्णकः. 2 जंघापिंडः, पिंडिका.

Calibre, s. छिद्र; छिद्रव्यासः. 2 परिमाणं. 3 प्रकारः, जाति f. 4 मेधा.

Calico, s. चित्रितकार्पासपटः.

Caligation, *See* **Darkness.**

Caligraphy, s. शोभनलेखनकला-शिल्पं.

Calisthenics, s. व्यायामः.

Calix, s. पुष्पगर्भः, पुष्पकोशः.

Call, v. t. ह्वे 1 P, आह्वे, शब्दायति (D.), आकृ c. 2 अभिधा 3 U, आख्या 2 P, आह्वे चक्ष् 2 A, नाम कृ 8 U; कृत् 10; 'c. ed her by the name of Parvati' तां पार्वतीति नाम्ना जुहाव (बंधुजनः) (K. 1. 26), तस्याः पार्वतीति नाम चकार; वच् 2 P, उदाहृ 1 P, ब्रू 2 U. 3 नि-आ-मंत्र् 10 A; 'c. by name' नामग्राहमाह्वे, संबुध् c.; 'c. to mind' स्मृ 1 P, मनसि कृ 8 U; 'c. to account' किं किं कृतमिति प्रच्छ् 6 P or अनुयुज् 7 A or अनुसंधा 3 U; 'c. to witness' साक्षिणं कृ, तमेव (अग्निं) चाधाय विवाहसाक्ष्ये

(R. vii. 20). —*s.* आह्वानं; पृच्छा; निमंत्रणं; संबोधनं. 2 प्रयोजनं. 3 अभिगमः; नियोगः; 'I have many c. s upon me today' मयाद्य कर्तव्या बहवो नियोगाः संति. -**back**, प्रत्यादिश् 6 P, निवृत् c.; खंड् 10, निरस् 4 P. -**for**, अर्ह् 1 P; 'this matter c. s for consideration' अयमर्थो विचारणामर्हति; or अत्र विचारणया प्रयोजनं; अपेक्ष् 1 A. -**forth**, प्रोत्सह् c., उद्युज् 10; प्रकटीकृ, प्रकाश् c. -**out**, पट् 1 P; उत्क्रुश् 1 P. 2 तारस्वरेण. उच्चैः आह्वे, घुष् 10. -**upon, on**, अर्थ् 10 A, याच् 1 A. 2 द्रष्टुं गम् 1 P, अभिगम्. -**up**, (from sleep) प्रबुध् c. -**ed**, *a.*: आहूत; 2 अभिहित, उक्त, उदाहृत; gen. ex. by नाम *ind.*, नामन्, अभिधान, आख्या, अभिधा, संज्ञा, नामधेय, in comp.; 'a boy c. Rama,' रामो नाम, रामनामा, रामसंज्ञः, &c. बालः. -**ing**, *s.* *See* (*s.*). 2 वृत्ति *f.*, जीवनसाधनं,उपजीविका; व्यवसायः.

Calligraphy, *See* **Caligraphy.**

Callous, *a.* कठिन, घन. 2 कठोर, निर्दय, कर्कश;'c. to contempt' तिरस्कारमगणयन्, तिरस्कारानभिज्ञः. 3 निर्लज्ज, धृष्ट; अविनीत. -**ness**, *s.* काठिन्यं, निर्दयता, &c. -**Callosity**, *s.* किणः, त्वग्दृढता.

Callow, *a.* अजातपक्ष, पक्षहीन. 2 *See* **Inexperienced.**

Calm, *a.* प्र-उप-शांत, निश्चल, प्रसन्न, स्तिमित, अनुत्तरंग, अक्षुब्ध, निष्कंप, निर्वात, अव्याकुल;'to be c.' शम् 4 P, प्रसद् 1 P;'heart, be c.' हृदय प्रसीद, मा उत्ताम्य. —*s.* निर्वातः, शांति *f.*; प्रसादः, विश्रामः. 2 शांतता, स्तिमितता; ex. by (*a.*). —*v. t.* उप-प्र-शम् c. (शमयति), उप-परि-सांत्व् 10; तुष् c., प्रसद् c. 2 लघूकृ 8 U, अपनी 1 P. -**ly**, *adv.* निश्चलं, अक्षोभं, शांत्या, प्रशांतं.-**ness**, *s.* प्र-उप-शांति *f.*, निर्विकारता, प्रसादः, अव्याकुलता, असंभ्रमः. 2 निर्वातत्वं, अक्षोभः, स्तिमितता.

Caloric, *s.* उष्णता, तापः.

Calorific, *a.* तापकर (री *f.*); तापजनक.

Calve, *v. i.* वत्सं सू 2 A; प्रजन् 4 A.

Calumniate, *v. t.* परि-अप-वद् 1 U; निर्भर्त्स् 10 A, निंद् 1 P, अपभाष् 1 A मिथ्या अभियुज् 7 A, 10; आ-अधि-क्षिप् 6 P. -**or**, *s.* परिवादरतः, परिवादिन् *m.*, निंदकः, अभ्यसूयकः, अभिशापकः, पिशुनः, आक्षेपकः. -**Calumny**, *s.* परिवादः, पैशुन्यं, अभ्यसूया, अलीकप्रवादः, मिथ्याभिशापः, पिशुनवचनं, आक्षेपः,मिथ्याभियोगः.-**ous**, *a.* पिशुन, कलंकमय (यी *f.*). -**ously**, *adv.* सापवादं, परिवादेन, साभ्यसूयं.

Calx, *s.* चूर्णं, भस्मन् *n.* 2 रीतिपुष्पं.

Calyx, *s.* *See* **Calix.**

Cambric, *s.* अंशुकं, दुकूलं.

Camel, *s.* उष्ट्रः; क्रमेलकः, मयः, महांगः; 'young c.' करभः; 'she-c.' उष्ट्री.

Camisado, *s.* रात्रियुद्धं.

Camlet, *s.* ऊर्णावस्त्रं.

Camp, *s.* शिबिरं, निवेशनस्थानं, निवेशः. 2 सैन्यनिवासः. —*v. t.* सैन्यं निविश् c.

Campaign, *s.* समरभूमि *f.*,-स्थलं. 2 युद्धकालः, युद्धप्रवृत्ति *f.*

Camphor, *s.* कर्पूरः-रं, घनसारः, सिताभ्रः, हिमवालुका, चंद्रः, सोमः. -**ated**, *a.* कर्पूरसंमिश्र-संसृष्ट.

Camus, *a.* चिपिट.

Can, *v. i.* शक् 5 P, प्रभू 1 P, or समर्थ-क्षम-शक्त *a.* भू with inf. of verb; *See* **Able**, oft. by ईश् 2 A; पृ 10. **2** In pass. ex. by pot. pass. part.; 'c. be done' करणीय *a.*, कार्य, &c.; 'I cannot but go' मयावश्यं गंतव्यमेव. —*s.* कंसः, भाजनं, धातुपात्रं, चषकः.

Canal, *s.* कुल्या, प्रणाली.

Canard, *s.* अश्रद्धेया कथा.

Cancel, *v. t.* अव-वि-लुप् 6 P or c., व्या-अप-निर्-मृज् 2 P; निरस् 4 P, खंड् 10, निवृत् c.

Cancer, *s.* कर्कटः, कर्कः. 2 कुलीरः. 3 मांसार्बुदं; तनुव्रणः, विस्फोटः. -**ate**, *v. i.* व्रणीभू 1 P.

Candent, *a.* *See* **Ho**

Candid, *a.* निष्कपट, निर्व्याज, सरल, स्फुट-स्पष्ट-वादिन्, ऋजु, निर्मल, शुद्धात्मन्, निर्व्यलीक; शुचि. -**ly**, *adv.* निष्कपटं; स्फुटं, निर्व्याजं. -**ness**, -**Candour**, *s.* निष्कापट्यं निर्व्याजता; आर्जवं, सरलता, अमाया, दाक्षिण्यं निष्पलीकता, शौचं.

Candidate, *s.* अर्थिन् *m.*, याचकः, प्रार्थकः, पदान्वेषिन् *m.*

Candify, *v. t.* धवलीकृ 8 U, शुक्लीकृ.

Candle, *s.* दीपः, दीपिका, वर्ति-र्ती *f.* -**holder**, *s.* दीपहस्तः-वाहः. -**stick**, *s.* दीपपादपः, दीपशिखा-वृक्षः.

Candy, *v. t.* घनी-खंडी-सांद्री-कृ 8 U, श्यै c. —*v. i.* श्यै 1 A, घनीभू 1 P. —*s.* शर्करा सितोपला, खंडमोदकः.

Cane, *s.* वेतसः, वेत्रः, वेणुः, वंशः, वानीरः. 2 वेत्रयष्टि *f.* -दंडः; 'sugar-c.' इक्षुः; 'seat of c.' वेत्रासनं; 'made of c.' वैणव (वी *f.*), वैदल (ली *f.*). —*v. t.* वेत्रेण तड् 10 or हन् 2 P or प्रहृ 1 P.

Canine, *a.* कुक्कुरीय, श्वन् in comp.

Canker, *s.* विद्रधिः, व्रणः. 2 फलनाशी कीटः. 3 कलंकः, विष. 3 दूषणं, विलयनं, विनाशः. —*v. t.* विनश् c., विली c., दुष् c. (दूषयति). —*v. i.* विली 4 A, दुष् 4 P.

Cannibal, *s.* नृभुज् *m.*, पिशिताशः -शनः, पुरुषादः, क्रव्याशिन् *m.* **-ism,** *s.* क्रव्याशित्वं, &c.

Cannon, *s.* गुलिप्रक्षेपणी लोहनालि-ली *f.* **-Ball,** *s.* आग्नेयास्त्रं, रणगुलि *f.*

Canoe, *s.* लघुनौका, उडुपं, प्लवः, कोलः.

Canon, *s.* विधिः, नियमः ; शास्त्रं, व्यवस्था. 2 पौरोहितधर्मशास्त्रं. 3 धर्मपुस्तकसंहिता. 4 (a ravine) जलप्रवाहकृतदरी. **-ical,** *a.* वैधिक (की *f.*), नियमानुसारिन्. **-ically,** *adv.* विधिवत्, यथाविधि,-शास्त्रं. **-ize,** *v. t.* सिद्धजनमध्ये आरुह् *c.* (रोपयति) or गण् 10 or संख्या 2 P.

Canopy, *s.* वितानं, उल्लोचः, आच्छादनं, पिधानं. -*v. t.* वितानीकृ 8 U, वितानेन आच्छद् 10.

Canorous, *a.* सुस्वर, मधुरस्वन.

Cant, *s.* परिभाषा, कल्पितसंज्ञा. 2 अपभाषा. 3 वाक्छलं, दंभोक्ति *f.*, दांभिकवचनं. 4 प्रावण्यं. 5 उद्घोषणेन विक्रयः. -*v. i.* परिभाष् 1 A. 2 दांभिकतया वद् 1 P 3 अर्धवल्गितेन चल् 1 P. *v. t.* उद्घोषणेन विक्री 9 A. *a.* उत्साहिन्, तेजस्विन्. **-ation,** *s.* गानं, गीतं. **-er,** *s.* अर्धवल्गितं. 2 दांभिकः, धर्मध्वजिन् *m.* **-icle,** *s.* उपगानं.

Cantankerous, *a.* दुराग्रह, दुर्दम, आग्रहिन्.

Cantharides, *s.* विस्फोटकीटकः.

Canthus, *s.* अपांगः- गं, नेत्रपर्यंतः.

Cantillate, *v. t.* or *v. i.* गै 1 P.

Cantle, Cantlet, *s.* खंडः, भागः.

Canto, *s.* सर्गः, पर्वन् *n.*, परिच्छेदः; अध्यायः; स्कंधः, (of different compositions).

Canton, *s.* चक्रं ; भूभागः, प्रदेशः. -*v. t.* खंडशो विभज् 1 P. 2 आवासं क्लृप् *c.* **-ment,** *s.* सैन्यावासः, शिबिरं.

Canty, *a.* उत्साहिन्, तेजस्विन्.

Canvas, *s.* शणवस्त्रं, शाणं, स्थूलपटः. 2 वातवस्त्रं.

Canvass, *v. t.* Beg, q. v. 2 परि-ईक्ष् 1 A, विचर् *c.*, निरूप् 10 ; अनुसंधा 3 U. -*s.* स्थूलपटः, शाणं. 2 वातवस्त्रं. **-er,** *s.* प्रार्थकः.

Cap, *s.* शिरस्त्राणं, शिरस्कं, शिरोवस्त्रं, शिरोवेष्टनं. 2 अग्रं. -*v. t.* पिधा 3 U; *See* **Cover.** 2 अति-शी 2 A 3 अग्रं आच्छद्. 10 -*v. i.* अभिवादनार्थं शिरस्त्रमुन्मुच् 6 P or अवतॄ *c.* or अपनी 1 P.

Capable, *a.* समर्थ, शक्त, क्षम, योग्य, उचित ; gen. ex. by शक्य with inf., or pot. pass. part.; 'c. of being defeated' पराजेतुं शक्यः, पराजेतव्यः, 'Râma is not c. of such atrocity' नेदृशं नृशंसचरितं रामेण कर्तुं शक्यते, रामे संभाव्यते; 'c. person' पात्रं, गुणवत्, 'to be c.' शक् 5 P, उत्सह् 1 A, क्लृप् 1 A (with dat.). **-Capability,** *s.* सामर्थ्यं, शक्ति *f.*, पात्रता, योग्यता.

Capacious, *a.* विशाल, उरु, प्रसृत; *See* **Broad.** 2 विपुल, प्रचुर.

Capacitate, *v. t.* उपयुक्त-क्षम *a.* कृ 8 U.

Capacity, *s.* धारणशक्ति *f.*, ग्रहणसामर्थ्यं (lit. & fig.); 'c. for all knowledge' अशेषविद्याग्रहणसामर्थ्यं. 2 बलं, शक्ति *f.*, सामर्थ्यं, पात्रता, योग्यता. 3 परिणामः, विस्तारः. 4 (Relation) gen. ex. by इति or रूपेण; 'he served the king in the c. of a servant' सेवकरूपेण राजानं सिषेवे, अवस्था, भावः, वृत्ति *f.*, विषयः; विधेयविषये सभवान्नियुंक्ते (Mal. 1) 'employs me in the c. of a servant.'

Cap-a-pie, *adv.* नखशिखांतं, सर्वांगं.

Caparison, *s.* आस्तरणं; अश्वसज्जा-प्रसाधनं, अश्वालंकाराः (pl.). -*v. t.* विभूष् 10, अलंकारैर्भूष्.

Capcase, *s.* समुद्गकः, संपुटः.

Cape, *s.* भूशिरस् *n.*,अंतरीपः-पं. 2 स्कंधप्रावरणं, ग्रीवाप्रच्छदः.

Caper, *s.* *See* **Leap.**

Capillament, *s.* केशरः-रं, किंजल्कः.

Capillary, *a.* केशोपम; सूक्ष्म, केश in comp., 'c. attraction' केशाकर्षणं.

Capital, *a.* श्रेष्ठ, परम, मुख्य, प्रधान, विशिष्ट, वरिष्ठ, उत्तम, उत्कृष्ट; 'c. punishment' उत्तमसाहसं, देहदंडः, प्राणदंडः; 'c. crime' वधार्हं पातकं; वधदंडार्हं पापं. -*s.* राजधानी. 2 मूलं, मूलद्रव्यं; 'floating or circulating c.' *s.* परिवर्तिन् *a.* मूलद्रव्यं. 'fixed c.' स्थायिन् *a.* मूलद्रव्यं; 'make c out of,' हितं साध् *c.*, हितानुकूल *a.* कृ. 8U. 3 शीर्षं, अग्रं. **-ist,** *s.* द्रव्यवत् *m.*, कोटीश्वरः. **-ly,** *adv.* उत्तमसाहसेन; प्राणदंडेन. 2 परमं, श्लाघ्यप्रकारेण, विशिष्टतया.

Capitation, *s.* एकैकशः परिगणनं; मस्तकसंख्या.

Capitulate, *v. i.* शत्रुहस्ते आत्मानं ससमयं सम्-ऋ *c.* (अर्पयति), शत्रोरधीन *a.* भू, वशं गम् 1 P. 2 संक्षेपतः लिख् 6 P or कथ् 10. **-ion,** *s.* समयपूर्वकं समर्पणं; वशीभवनं, शत्रुकरार्पणं.

Caprice, *s.* कामचारः, चापल्यं, मनोलौल्यं; 'c. of fortune' दैवविलसित-विजृंभणं; दैवस्य कामचारः (Mu. 2). **-Capricious,** *a.* कामचारिन्, चपल, चंचलप्रकृति, लोलचल-चित्त, लोल, अस्थिर, स्वैरवृत्त, स्वैरिन्. **-ly,** *adv.* लोलचेतसा, चापल्येन; कामतः, स्वैरं, कामचारेण. **-ness,** *s.* चापल्यं, लोलता, कामचारिता, &c.

Capricorn, *s.* मकरराशिः, मकरः.

Capsize, *See* **Overturn.**

Capstan, *s.* चक्रयंत्रं.

Capsule, *s.* बीजकोषः. पुटः-टं. **-ar**, *a.* पुटाकार.

Captain, *s.* सेनानीः, गुल्मपतिः, दंडनायकः. 2 पोताध्यक्षः. 3 नायकः, नेतृ *m.*, मुखरः. अग्र-पुरो-गः.

Captation, *s.* लोकरंजनं, जनश्लाघासेवनं.

Caption, *s.* निरोधः, आसेधः.

Captious, *a.* दोषैकदृश्, छिद्रान्वेषिन्, विवादशील. 2 भ्रांतिकर (री *f.*). **-ly**, *adv.* विवादेच्छयैव, छिद्रान्वेषिवत्. **-ness**, *s.* छिद्रान्वेषिता; विवादशीलता.

Captivate, *v. t.* मुह् *c.*, ग्रह् 9 P; हृ 1 P; विलुभ् *c.* (eye, ear, &c.); 'c. s the eye' विलोभयति चक्षुः. 2 दासीकृ 8 U, बंदीकृ, वशीकृ, दम् *c.* (दमयति). **-ing**, *a.* मनोहर, चित्तहारिन्, मनोज्ञ, हृदयग्राहिन्, हारिन्, मोहिन्. **-ion**, *s.* बंदी-दासी-करणं &c.

Captive, *s.* बंदी, बंदि *f.*; कारागुप्तः; 'made c.' (taken prisoner) बंदीकृत, बंदीग्राहं गृहीत. 2 दासः. **-a.** बंदीकृत, दासीकृत, शत्रुवश, कारास्थ. **-ity**, *s.* बंधनं, बंदित्वं, कारावासः. 2 दासत्वं, दासभावः.

Captor, *s.* जेतृ *m.*, बंदीकर्तृ *m.*

Capture, *v. t.* ग्रह् 9 P, बंदी-दासी-कृ 8 U; (a fort) भंज् 7 P, लंघ् 10, आक्रम् 1 U, 4 P. **-s.** ग्रहः, ग्रहणं; लोप्त्रं, लोत्रं; 'c. of a fort' दुर्गलंघनं; 'c. of cattle' गोग्रहः, धेनुहरणं.

Car, *s.* रथः, वाहनं, चक्रयानं, प्रवहणं; 'heavenly c.' विमानं; 'war c.' स्यंदनः.

Caracole, *s.* तिर्यक्प्लुतं, वक्र-कुटिल-गति *f.* **-v. i.** तिर्यक् प्लु 1 A, or वल्ग् 1 U.

Caravan, *s.* सार्थः, संघः; 'leader of c.' सार्थवाहः. **-sary**, *s.* पथिकावासः; पांथनिवासस्थानं.

Carbuncle, *s.* विस्फोटः; वल्मीकं. 2 पद्मरागः.

Carcanet, *s.* मुक्तावलि *f.*, मणिमाला.

Carcass, *s.* शवः-वं, कुणपः, मृतं शरीरं.

Card, *s.* पत्रं; क्रीडापत्रं. 2 ऊर्णामार्जनी. **-v. t.** ऊर्णां संमृज् 2 P or घृष् 1 P. **-er**, *s.* ऊर्णामार्जकः.

Cardamom, *s.* एला, निष्कुटि-टी *f.* पृथ्वीका, चंद्रबाला, बहुला; 'small c.' उपकुंचिका, तुत्था, कोरंगी, त्रिपुटा, त्रुटि-टी *f.*

Cardiac, *a.* तेजस्कर, दीपक, अग्निद. **-s.** हृद्रोगः

Cardinal, *a.* प्रधान; *See* **Capital**, *a.*; 'c. point' दिग्भागः. **-s.** धर्माध्यक्षः.

Care, *s.* चिंता, औत्सुक्यं, उद्वेगः; *See* **Anxiety**. 2 यत्नः, प्रयत्नः, आदरः, मनोयोगः; 'brought up with c.' प्रयत्नसंवर्धितः, सादरं परिपालितः. 3 सूक्ष्मता, निपुणता; 'searching with c.' निपुणमन्विष्य; 'thinking with c.' सुनिपुणं विमृश्य. 4 रक्षा; अवेक्षा; 'leave under the c. of' *See* **Charge**. 5 अप्रमादः, सावधानता, अवधानं; 'have a c. what you do' यत्कर्तव्यं तद्विमृश्य-समीक्ष्य-कुरुत. **-v. i.** अव-अप-ईक्ष् 1 A, चिंत् 10, मनः धा 3 U, oft. ex. by the several nouns above; 'I do not c. now' अधुनाहं वीतचिंतः, 'I c. very much for your protection' तव रक्षणं बलवान्ममादरः. 2 गण् 10. (न तृणमपि गणयति शत्रुं), आदृ 6 A (न त्वामाद्रियते); ईक्ष् 1 A, (the sense being clear). न कामवृत्तिर्वचनीयमीक्षते (K. V. 82) 'a self-willed person c. s not for blame'. -'take c' रक्ष् 1 P. अव-ईक्ष् 1 A (श्लाघ्यां दुहितरमवेक्षस्व जानकीं U. 1), चिंत् 10 (ततस्त्वां चिंतयिष्यति). 2 लल् 10; संवृध् *c.*, पा *c.* (पालयति), विनी 1 P. 3 अप्रमत्त-सावधान *a.* भू 1 P. अवधा 3 U. 'let c. be taken of each character' प्रतिपात्रमाधीयतां यत्नः (S. 1), 'do not c. to think' सावधानेन चेतसा न विचारयंति, इति विचारं नाद्रियंते. **-ful**, *a.* Anxious, q. v. 2 अप्रमत्त, सावधान, अभियुक्त, अवहित, दक्ष. **-fully**, *adv.* सावधानं, प्रयत्नतः, अप्रमत्तं, सादरं, निपुणं. **-less**, *a.* प्रमत्त, अनवधान, निरपेक्ष, निरवधान, असमीक्ष्यकारिन्, 'to be c. in' प्रमद् 4 P (with abl.), स्वाधिकारात्प्रमत्तः (Me. 1.). **-lessly**, *adv.* सप्रमादं, अनवधानेन, &c.

Career, *s.* सर्या; धावनं. 2 गति *f.*, क्रमः, चलनं, चरितं; 'c. in life' जीव-लोक-यात्रा; 'during his c.' तस्मिन् (भुवं) शासति. **-v. i.** वेगेन धाव् 1 P.

Caress, *v. t.* परामृश् 6 P, आलिंग् 1 P, परिरभ् 1 A; *See* **Clasp**. 2 लल् 10. **-s.** परिरंभः-णं, लालनं, आलिंगनं, परिष्वंगः.

Caret, *s.* काकपदं, हंसपादाकृति चिह्नं.

Cargo, *s.* पोतभारः, पोतस्थं द्रव्य-भांडं.

Caricature, *s.* हासजनकं चित्रं, हास्यचित्रं. **-v. t.** चित्रेण हास्यास्पदं नी 1 P; हास्यप्रकारेण चित्र् 10. **-ist**, *s.* हास्यप्रतिमाकृत् *m.*

Cariole, Carriole, *s.* लघुशकटः, अनावृत *a.* यानं.

Carious, *a.* गलित, क्षीण, पूयपूर्ण. **-Caries, -Cariosity**, *s.* अस्थि क्षयः-शोषः.

Cark, *v. i.* चिंताकुल *a.* भू 1 P.

Carle, *s.* दुर्वृत्तः; ग्राम्यः अविनीतः; *See* **Wicked**.

Carminative, *a.* वायुनाशिन्, अग्निद, अग्निवर्धक.

Carmine, *s.* जतुजरंगः.

Carnage, *s.* वधः, विशसनं, संहारः, हत्या.

Carnal, *a.* कायिक-शारीरिक (की *f.*). 2 ऐहिक (की *f.*). 3 विषयिन्, विषयासक्त, विषयोपसेविन्, 'c. pleasure' विषयसुखं; 'c. desires' विषयवासनाः; 'c. union' संभोगः, अभिगमः. **-ity**, *s.* विषयासक्ति *f.*, विषयोपसेवा, कामुकता. **-ly**, *adv.* कामुकवत्.

Carnation, *s.* मांसवर्णः; लोहितवर्णः

Carnival, *s.* तुमुलोत्सवः.

Carnivorous, *a.* क्रव्याद्, मांसभुज्, पिशिताशन, क्रव्यभोजन.

Carnosity, *s.* गंडः; मांसग्रंथिः.

Caroche, *s.* क्रीडारथः, चातुरं.

Carol, *s.* हर्ष-आनंद-गीतं. 2 स्तोत्रं, भक्तिगीतं. **-v.** *t.* हर्षेण गै 1 P, उपगै, स्तु 2 U.

Carouse, *v. i.* अतिपानं कृ 8 U, पानोत्सवं कृ, अतिपानेन क्षीब *a.* भू 1 P. **-s.**, **-al**, *s.* अतिपानं, पानोत्सवः. **-ver**, *s.* पानरतः, अतिपायिन् *m.*

Carp, *s.* शफरी, प्रोष्ठः-ष्ठी. **-v.** *i.* (at) छिद्रं अन्विष् 4 P; दोषं दृश् 1 P or निरूप् 10, निंद् 1 P; *See* **Censure**. **-er**, *s.* छिद्रान्वेषिन् *m.*, दोषैकदृश् *m.* **-ing**, *s.* गर्हा, निंदा, छिद्रान्वेषः.

Carpenter, *s.* तक्षकः, सूत्रधारः, रथकारः, स्थपतिः, त्वष्टृ *m.*, तक्षन् *m.* **-Carpentry**, *s.* दारुकर्मन् *n.*, तक्षकक्रिया, तक्षशिल्पं.

Carpet, *s.* कुथः-था, आस्तरणं; 'brought on the c.' प्रस्तुत, उपक्षिप्त.

Carrion, *s.* पूतिमांसं, अखाद्यमांसं; कुणपः. **-eater**, *s.* कुणपभुज् *m.*

Carry, *v. t.* वह् 1 P, नी 1 P, भृ 3 U, हृ 1 P; 'c.ed a dog on his shoulder' स्कंधेन श्वानमुवाह. 2 साध् 5 P or c.; 'c. a fort' दुर्गं लंघ् 1 A. 10 or भंज् 7 P. or वशीकृ 8 U; 'the enemy c.ed the day' शत्रवो जयमापुः; 'c. one's point' अभीष्टं लभ् 1 A. प्रतिज्ञां पूर् 10, 'c. oneself' आचर् 1 P, *See* **Act**, 'c. arms' शस्त्राणि ग्रह् 9 P. सैनिकवृत्तिं आस्था 1 A. **-away**, **-off**. अपवह्, अपनी, अपहृ; अपऊह् 1 U. अपकृष् 1 P. **-on**, प्रवृत् c., प्रणी-विधा 3 U. 'c. on war' युद्धं-संग्रामं कृ. विग्रह् 9 P. **-out**, अनुष्ठा 1 P. कृ 8 U. साध् 5 P or c. **-through**, पारं नी. 'c.ing through all difficulties' आपदां पारं नयनं. **-Carriage**, *s.* वाहनं, यानं, रथः, प्रवहणं, शकटः-टं; 'closed c.' कर्णीरथः, प्रवहणं, डयनं; 'c. road' रथ्या; 'c. horse' रथ्यः. 2 आचरणं, व्यवहारः, गति *f.*, चरितं, चेष्टा. 3 निर्वाहः, प्रणयनं. **-Carrier**, *s.* वाहकः. हरः. in comp. 2 भांडवाहनजीविन् *m.*

Cart, *s.* शकटः-टं, शकटिका, वाहनं, प्रवहणं, यानं. **-v.** *t.* शकटेन वह् 1 P. 2 शकटे निधा 3 U. 'Carter,' 'c. man' शाकटिकः, शकटवाहः, 'c. horse' शकटवाहनः; धुर्यः धुरीणः; 'c. load' शाकटं, शलाटः, शकटो भरः; 'c. rut' शकटचिह्नं-पदवी-पद्धति *f.*; 'c. wright' शकटकारः. 'To put the c. before the horse,' विपर्यस् 4 P, विपर्यासं नी 1 P.

Carte, *s.* भोजनपत्रिका. 'c. blanche,' अनिर्दिष्टसमय *a.* पत्रं.

Cartel, *s.* युद्धाह्वानपत्रं.

Cartilage, *s.* कोमलास्थि *n.* **-Cartilaginous**, *a.* तरुणास्थिविशिष्ट.

Carto-graphy, *s.* भूम्यालेख्य-कला-वृत्तिः *f.*

Cartoon, *s.* चित्रितपटः, विचित्रमालेख्यं, हास्योत्पादकं चित्रं.

Caruncle, *s.* गंडः, मांसपिंडः.

Carus, *s.* निःसंज्ञता.

Carve, *v. t.* कृ 6 P, तक्ष् 1, 5 P, उत्कृ. (उत्कीर्णा इव वासयष्टिषु V. 3); उल्लिख् 6 P. 2 कृत् 6 P. छिद् 7 P. कृप् c., विभज् 1 U; 'c. out (a plan)' युज् 10; प्रक्लृप् c.; प्रतियुज् 10; चिंत् 10, निरूप् 10 **-er**, *s.* तक्षकः, कारुः, त्वष्टृ *m.*, तष्टृ *m.* 2 परिकल्पकः.

Cascade, *s.* प्रपातः, प्रस्रवणं, वारिप्रवाहः, निर्झरः, उत्सः.

Case, *s.* अवस्था, भावः, दशा, स्थिति *f.*, वृत्ति *f.*; 'what is the c. with him' किं तस्य वृत्तं. 2 पदं. 3 अर्थः. 4 कार्यं, पक्षः. 5 पुटः, पिधानं, कोषः, आवेष्टनं. 6 भांडं, आधारः. 7 स्थानं, स्थलं. 'In c.' यदि चेत्; 'this being the c.' एवं सति-गते; 'in this c.' अत्र, अत्र विषये; 'in the c. of' gen. ex. by gen., or विषये in comp.; 'in the c. before us,' 'in the present c.' प्रस्तुतविषये, प्रकृते 'if such be the c.' यद्येवं, तेन हि; 'in both c.s' उभयथा, उभयपक्षे. **-v.** *t.* भांडे निधा 3 U or निविश् c. 2 पिधा 3 U, आवृ 5 U

Casement, *s.* गवाक्षः, वातायनं, जालं.

Cash, *s.* टंकः, मुद्रा, नाणकं. **-keeper**, **-ier**, *s.* टंकाधीशः, रक्षकः. 'in c.' सधन *a.* 'Out of c,' निर्धन *a.*

Cashier, *v. t.* अधिकाराद् भ्रंश् c. or च्यु c. or निरा-कृ 8 U or अपास् 4 P.

Cask, *s.* भांडं, भाजनं, पात्रं.

Casket, *s.* समुद्गकः, भांडं, मंजूषा, करंडकः, संपुटः-टकः.

Casque, *s.* शिरस्त्राणं, शिरस्कं

Cast, *v. t.* क्षिप् 6 P. प्र-वि-°; अस् 4 P, मुच्-सृज् 6 P, पत् c. 2 (about) विगण् 10, आकल् 10, चिंत् 10 विचर् c. 3 विलाप्य संधा 3 U; 'c. glance' दृशं क्षिप्, दृष्टिं-चक्षुः &c. दा 3 P (कृष्णसारे ददच्चक्षुः S. 1) 'c. skin' कंचुकं विमुच्; 'c. lots'

गुटिकां पत् c.; 'why c. pearls before swine' किमिष्टमन्नं खरसूकराणां. -*s*. क्षेपः; पातः. 2 मूर्ति *f*.; घटनं-ना ; 'c. of characters' भूमिकासंविभागः. **-aside,** अपाकृ 8 U, निराकृ. **-away,** अपास्, परित्यज्, उत्क्षिप्. **-down,** अव-वि-सद् 1 P, म्लै 1 P; विषण्ण *a*. भू 1 P; 'with a face c.' खिन्न-विषण्ण-वदनः; 'c. look' अधोदृष्टि *f*. 2 निपत् c., अधः क्षिप्. **-forth,** उत्सृज्, उद्वम् 1 P, उद्गॄ 6 P. **-off,** विमुच्; अप-निर्-अस्. **-out,** अपाकृ, निःसृ c., निष्क्रम् c., प्रत्यादिश् 6 P. **-away,** *s*. त्याज्यः ; अपांक्तेयः. **-ling,** *s*. गर्भपतितः, गर्भच्युतः.

Caste, *s*. वर्णः, जाति *f*, कुलं ; 'of the same c.' सवर्णः; 'low c.' हीनवर्णः, नीचः, निकृष्टजातिः ; 'high c.' उत्तमवर्णः; 'mixture of c.s' वर्णसंकरः; 'low c. man' अंत्यजः; 'loss of c.' जातिभ्रंशः; 'out of c.' अपसदः, चांडालः, जातिहीनः, 'c. man' सजातीयः.

Castigate, *v. t*. दंड् 10 ; तड् 10. **-ion,** *s*. कशाघातः, तीव्रप्रहारः ; दंडः, निग्रहः.

Castle, *s*. दुर्गं, कोटः, 'c. in the air (in Spain), मनोराज्यं. **-Castellan,** *s*. दुर्गाधिपतिः. **-Castellated,** *a*. दुर्गाकार.

Castor-oil, *s*. एरंडतैलं.

Castrate, *v. t*. वृषणौ कृत् 6 P or उत्पट् 10 or छिद् 7 P. **-ed,** *a*. छिन्नमुष्क, निर्वृषण. **-ion,** *s*. मुष्क-वृषण-छेदः, पुंस्त्वहरणं.

Castrel, *s*. श्येनः.

Casual, *a*. अतर्कित, अचिंतित, आकस्मिक-आपातिक-आगंतुक-दैविक (की *f*.), दैवायत्त. **-ly,** *adv*. अचिंतितं, दैवात्, समापत्त्या, दैवयोगात्. **-ty,** *s*. दैवयोगः-घटना, संगति *f*. समापत्ति *f*. 2 अदृष्टं, आकस्मिकी आपद्. **-ties,** युद्धे हताः.

Casuist, *s*. धर्माधर्मविचारकः. **-ry,** *s*. धर्माधर्मविचारणा. 2 विवेचनविद्या 3 वितंडवादः.

Cat, *s*. मार्जारः, बिडालः, ओतुः, आखुभुज् *m*. 'c. a. (o)' mountain,' वनमार्जारः. 2 चित्रव्याघ्रः. 'c. eyed' तिमिरदर्शिन् *a*. **-ling,** *s*. मार्जारशावकः; 'c.'s paw मंदवातः; (fig.) सुखप्रतार्य; *a*. 'c. witted' *a*. साधुवद्दुष्ट; 'it rained c.s and dogs,' अतिवृष्टिर्बभूव. 'cat o' nine-tails' नवरज्जुयुक्ता चर्मयष्टि *f*., or कशा or ताडनी.

Cataclysm, *s*. पृथ्वीप्लावः, भूतसंप्लवः. 2 राज्यपरिवृत्ति *f*.

Catacomb, *s*. अंतर्भौमं, श्मशानं.

Catalepsis, }
Catalepsy, } *s*. अपस्मारः; ग्रहामयः.

Catalogue, *s*. परिसंख्या, परिगणना; 'c. of names' नामावलि-ली *f*.

Cataplasm, *s*. प्रलेपः, उपनाहः.

Catapult, *s*. गोफणा.

Cataract, *s*. निर्झरः, प्रपातः, प्रस्रवणं, उत्सः. 2 नेत्रपटलं, मंथः, शुक्रः; काचः.

Catarrh, *s*. अभिष्यंदः. 2 श्लेष्मन् *m*., कफः, (variety of c.). **-al, ous,** *a*. अभिष्यंदिन्-कफिन्, श्लेष्मल.

Catastrophe, *s*. परिणामः, निर्वाहः, निर्वहणं. 2 आपद् *f*.; *See* **Calamity.**

Catch, *v. t*. धृ 1 P, 10, ग्रह् 9 P, बंध् 9 P (in a net &c.). 2 परामृश् 6 P, अवलंब् 1 A. 3 प्रलुभ् c., आकृष्-हृ 1 P; 'the house caught fire' ज्वलनमुपगतं-अग्निदीप्तं-गेहं; 'caught cold' शीताकुलो बभूव, पीनसोपहतः, अभिष्यंदाकुलः; 'c. in the act' (red-handed) कर्मगृहीत, रूपाभिग्राहित, लोप्त्रेण गृहीतः; 'Sir, you are c.' भो निगृहीतोऽसि (U. 4); 'c. in his own words' स्ववचनेनैव गृहीतः-निरुत्तरीकृतः. **-at,** अवलंब् 1A, आश्रि 1 U. **-up,** अपहृ 1 P, अपनी 1 P. -*s*. तालकं. 2 लाभः, फलं. 3 पर्यायगीतं. **-er,** *s*. ग्राहकः, जालिकः. 2 वागुरा, जालं. **-ing,** *a*. संपर्कीय, संचारक 2 हारिन्.

Catchpole, *s*. दंड-यष्टि-धरः ; राजपुरुषः.

Catechism, *s*. प्रश्नोत्तरं, सप्रश्नोत्तरः पाठः. **-Catechize,** *v. t*. प्रश्नोत्तरद्वारेण-क्रमेण-अधि-इ c. (अध्यापयति) or उपदिश् 6 P or प्रच्छ् 6 P. **-Catechist, -Catechiser,** *s*. प्रश्नोत्तरविधिना अध्यापकः-पाठकः.

Catechu, *s*. खदिरसारः.

Catechumen, *s*. नवशिष्यः-छात्रः.

Category, *s*. पदार्थः. 2 समानवर्गः, अधिकरणं. **-ical,** *a*. सुव्यक्त, स्पष्टार्थ; नियत, व्यक्त. **-ically,** *adv*. स्पष्टं, सुव्यक्तं.

Catenation, *s*. संबंधः अन्वयः, परस्परान्वयः. 2 शृंखलात्वं, दामता; परंपरा.

Cater, *v. i*. भोजनादि परि-उप-क्लृप् c.

Caterpillar, *s*. कोषकारः-वासिन् *m*.

Cates, *s*. स्वाद्वन्नं, विशिष्टान्नं.

Catgut, *s*. पुरीतत् निर्मिता तंत्री, तंतु *m*.

Cathartic, *s*. रेचकं, रेचनं, उदरशोधनं.

Cathedral, *s*. महामंदिरं, महती पूजाशाला.

Catholic, *a* सर्वसामान्य, साधारण (णी *f*.), सार्वलौकिक (की *f*.). **-ism,** *s*. साधारण्यं, सार्वलौकिकता.

Cattle, *s*. गावः (pl.) ; गोकुलं, पशुसमूहः, गोव्रजः; 'c. for draught' धुर्यः, धुरीणः; 'keeper of c.' गोपालः, पशुपालः

Caudal, *s*. लांगुलीय.

Caul, *s*. शिरोवेष्टनं. 2 अंत्रावेष्टनं. 3 गर्भवेष्टनं

Cauldron, *s*. *See* **Caldron.**

Cause, *s*. कारणं, (oft. with loc. of effect, दैवं नृणां वृद्धौ कारणं), निदानं, बीजं, हेतुः, निमित्तं, मूलं, योनि *f*. 2 कार्यं, प्रयोजनं. 3 स्थानं, अवसरः, पदं. 4 उत्पादकः,

प्रवर्तकः. 5 अर्थः, पक्षः, कार्यं; 'material c.' समवायिकारणं; उपादानकारणं, प्रकृतिः; 'efficient (instrumental) c.' निमित्तकारणं; 'primary c.' बीजं, मूलकारणं. **-v.** *t.* Ex. by causal of verbs; 'c. to fall' पातयति; गमयति &c. 2 उत्पद् c., जन् c. (जनयति); कृ 8 U; oft. ex. by dat. of nouns with or without भू, अस्; यतस्तौ स्वल्पदुःखाय (भवतः) (P. I. 1); *See* **Tend** (to): also ex. by संभव, जन्य, ज. in comp.; स्मरजा पीडा 'torment c. ed by Cupid', &c. **-al,** *a.* हेतुक, हेतुमत्. **-s.** णिच् (of verbs). **-ation,** *s.* कारणत्वं, हेतुता. **-ative,** *a.* उत्पादक, जनयितृ. **-er,** *s* कारकः, उत्पादकः, प्रवर्तकः **-less,** *a.* अकारण, निष्कारण, निर्निमित्त. and sim comps. **-lessly,** *adv.* अकारणं, अहेतुकं, निर्निमित्तं, निष्प्रयोजनं.

Causerie, *s.* वार्ता जनप्रवादः.

Causeway, *s* सेतुः, धरणं.

Caustic, *a.* दाहक, तिग्म, प्रखर. 2 अरुंतुद, मर्म-स्पृश्-छिद्.

Cauterize, *v. t.* दह् c. **-Cautery,** *s.* दाहः तप्तलोहेन मांसदाहः.

Caution, *s* दक्षता, सावधानता, अप्रमादः, समीक्षा, अवेक्षा, अवधानं. 2 प्रातिभाव्यं, आधिः. 3 प्रत्यादेशनं, प्राक् सूचना or उपदेशः, प्राक् प्रबोधनं. **-v.** *t.* प्राक् सूच् 10; प्रत्यादिश् 6 P, प्राक् प्रबुध् c.; 'c. ed me against the approaching danger' उपस्थितापद्विषये सावधानो भव इति मामुपादिशत्. **-Cautious,** *a.* सावधान, दक्ष, अप्रमत्तः, समीक्ष्य-विमृश्य-कारिन्, अवहित. **-ly,** *adv.* सावधानं, अवेक्षया, &c. **-ness,** *s.* अप्रमादः, दक्षता.

Cavalcade, *s.* सादियात्रा, अश्वारोहश्रेणी.

Cavalier, *s.* अश्वारोहः, सादिन् *m.*, तुरगिन् *m.*; 'to treat c. ly' अवमन् 4 A, सावलेपं अवज्ञा 9 U. **-C. s, -Cavalry,** *s.* तुरगबलं; अश्वारोहवर्गः, आश्विकं, सादिगणः.

Cave, Cavern, *s.* गुहा, दरी, गह्वरं. कंदरः-रा, विवरः-रं.

Caveat, *s.* प्राक्सूचनं; निषेधः

Cavil, *v. i.* मिथ्या निंद् 1 P; दोषं ग्रह् 9 P; छिद्रं अन्विष् 4 P; मिथ्या विवद् 1 A, मिथ्या अभियुज् 7 A, 10. **-s.** विवादः, वाग्युद्धं, मिथ्याविवादः, विप्रतिपत्ति *f*; मिथ्याभियोगः. **-ler,** *s.* विवादशीलः. **-ling,** *a.* अपवादक, दोषग्राहिन्, छिद्रान्वेषिन्.

Cavity, *s.* रंध्रं, छिद्रं, विवरं, बिलं, खातं. 2 पुटः-टं; खं; 'c. of hands' अंजलिपुटः.

Cease, *v. i.* विरम् 1 P, निवृत् 1 A, विश्रम् 4 P, (with abl.); शम् 4 P, प्र-उप°; 'this said, he c. ed' इत्युक्त्वोपशशाम; 'c. ed to be opulent' निर्धनीभूत; 'c. to exist' लयं-क्षयं-गम् 1 P, नश् 4 P. 3 गम्, वि-अप-निर्-°, अपया 2 P. **-v.** *t.* (c.) of roots above. **-ing, -Cessation,** *s.* विरामः, उप-प्र-शमः, निवृत्ति *f.*, विरति *f.*, विच्छेदः. **-less,** *a* अनवरत, निरंतर, सतत, नित्य; अविच्छिन्न. **-lessly,** *adv.* निरंतरं, अनवरतं, नित्यं, &c.

Cecity, *s.* अंधता, तिमिरं.

Cedar, *s.* देवदारुः.

Cede, *v. t.* उत्सृज् 6 P, दा 3 U, वितृ 1 P, परित्यज् 1 P. 2 अभ्युपगम् 1 P वशं या 2 P. **-Cession,** *s.* प्रदानं, वितरणं, विसर्जनं.

Cedrate, *s.* *See* **Citron.**

Ceiling, *s.* वितानं, अंतःपटलं, पटलं. अंतच्छादनं.

Collate, *v. t.* समवलोक् 10, परीक्ष् 1 A; उपमा 3 A, संशुध् c. 2 वृत्तिं प्रदा 3 U. **-ion,** *s.* संपरीक्षणं, संशोधनं, उपमानं. 2 कल्यवर्तः, प्रातर्भक्ष्यः फलादिसंभारः, प्रातराशः. 3 वृत्तिप्रतिपादनं.

Collateral, *a.* आनुषांगिक-प्रासंगिक (की *f.*) असरल. 2 भिन्नशाख, उपलोम. 3 समानोदकं, सपिंड. 4 पार्श्वापार्श्वि . -*s.* समकालीनः. 2 सपिंडः **-ly,** *adv.* पार्श्वापार्श्वि ; असरलं, वक्रं, प्रसंगतः.

Colleague, *s.* सहायः, सहकारिन् *m.*, समानव्यापारः, एकविषयिन् *m.*

Collect, *v. t.* चि 5 U. अव-वि-सं-नि-°, समानी 1 P, संग्रह् 9 P, समाहृ 1 P, संभृ 3 U, समाक्षिप् 6 P, पिंडीकृ 8 U, राशीकृ, एकत्र कृ. 2 अनुमा 3 A, ऊह् 1 A, अवगम् 1 P; 'c. ed his mind into itself' चित्तं समादधौ; 'c. oneself' संज्ञां-चेतनां-लभ् 1 A or आ-प्रति-पद् 4 P, चेतः-मनः-समाधा 3 U. -*v. i.* संमिल् 6 P, समागम् 1 P; *See* **Assemble, -ion,** *s.* गणः, संघः, समवायः, निवहः. चयः, समूहः, ओघः, समुच्चयः, समाहारः. समुदायः, वृंदं. **-ive,** *a* समवेत, संहत. समाहृत, गणीभूत, समवायिन्, एकीकृत. **-ively,** *adv.* एकीभूय, संभूय; संघशः, साकल्येन. **-or,** *s.* संग्राहकः, संचेतृ *m.* 2 करग्राहकः.

College, *s.* विद्यालयः-यं, पाठशाला. 2 मठः, विहारः. 3 गणः, समाजः, जनसमूहः. **-Collegian,** *s.* विद्यार्थिन् *m.*, छात्रः ; विद्यालयप्रविष्टः.

Collet, *See* **Collar.**

Collide, *v. i.* सं-समा-हन् 2 U, संघट्ट् 1 A or c.; संमृद् 9 P. **-Collision,** *s.* संघट्टः, समाघातः, प्रतिघातः, संमर्दः, संघर्षणं.

Colligation, *s.* संबंधः.

Collimation, *s.* संधानं.

Collinear, *a.* समरेखास्थित.

Collocate, *v. t.* सं-प्रति-स्था c. (स्थापयति), निधा 3 U, न्यस् 4 P, निविश् c. 2 नियुज् 7 A, 10. **-ion,** *s.* स्थापनं, निवेशनं.

Collocution, *s.* संभाषणं, कथाप्रसंगः, कथायोगः, संवादः, संकथा.

Collogue, *See* **Flatter.**

Colonnade, *s* समानांतरस्तंभपंक्ति *f.*

Collop, *s.* मांसखंडः-लवः.

Colloquy, *s.* संलापः, संकथा, संभाषणं, संवादः. **-al,** *a.* आलापविषय, भाषणप्रयुक्त ; 'c. style' संलापोचिता भाषासरणिः.

Collude, *v. i.* पक्षपात-कूटं कृ 8 U ; वच् 10-कूट-योगं कृ. **-Collusion,** *s.* पक्षपातः, कूटसंविद् *f.*; प्रतारणा, शाठ्यं, कपटं.

Colly, *s.* अंगारमलं-किट्टं. -*v. t.* अंगारेण कृष्णीकृ 8 U. **-ed,** *a.* अंगारमलिन, मलीमस, कृष्ण. **-er,** *s.* अंगारखनकः-विक्रेतृ *m.* **-y,** *s.* अंगारोत्पत्तिस्थानं.

Collyrium, *s.* अंजनं, कज्जलं, नेत्ररंजनं.

Colon, *s.* द्विबिंदुः. 2 महदंत्रं.

Colonel, *s.* गुल्मपतिः, सैन्यदलाध्यक्षः, वाहिनीपतिः.

Colony, *s.* अधिनिवेशः ; वासितः प्रदेशः. 2 गणः, संघः ; *See* **Collection. -ist,** *s.* अधिवासिन् *m.*, अधिनिवेशिन् *m.* **-ize,** *v. t.* अधिवस् 1 P, अधिनिविश् 6 P, अध्यास् 2 A, (with acc.).

Colossus, *s.* बृहत्प्रतिमा, भीमविग्रहा मूर्तिः. **-Colossal,** *a.* बृहत्काय, अतिमानुषाकार, भीमविग्रह.

Colour, *s.* वर्णः, रागः, रंगः, 2 वर्णकः-का, लेपः; 'change c. विवर्णीभू ; 'ruddy c. ed face' लोहिताननं; 'without c.' पांडु, विवर्ण. 3 अप-व्यप-देशः, छद्मन् *n.*, छलं, व्याजः. 4 पताका, ध्वजः, केतुः. 'C. blind,' *a.* वर्णविवेकाक्षम, 'to come off with flying c. s.' विजयिन् *a.* भू 1 P, पताकां उद्धुन्वत् *a.* आगम् 1 P कार्यसिद्धिं प्रकट् 10, 'to come out in one's true c. s.' स्वभावं प्रकट् 10; 'fast c.' स्थायिन् *a.* वर्णः; to fight under false c. s.' स्वहेतुगोपनाय व्याजं पुरस्कृ 8U; 'to give c.' उचितत्वं आरुह् c.; 'high c.' ताम्रवर्णः; 'to lose c.' विवर्ण *a.* भू 1 P, नष्टसौंदर्य *a.* भू 1 P. ; 'off c.' नष्टप्रकर्षः; 'to paint in bright c. s. भूष् 10, अतिशयोक्त्या वर्ण् 1 P, 'to show one's c. s,' स्वरूपं-स्वभावं-आस्था 1 P; 'to stick to one's c.'

s. स्वपक्षं-स्वमतं-पूर्वं अवलंब् 1 A: 'under c. of' (in comp.) ex. by 'व्याजेन or छद्मना' 'without c.' निर्व्याजं. -*v. t.* रंज् c., वर्ण् 10, चित्र् 10. **2** व्यप-अप-दिश् 6 P, आच्छद् 10, शम् c. (शमयति). **3** सत्यवदाभास् c., सत्याभास *a.* कृ 8 U, सत्यसन्निभ *a.* कृ. -*v. i.* रंज् pass. **2** लज्जाया अरुणवदन *a.* भू, व्रीडित *a.* भू, लज्ज् 6 A. **-ing,** *s.* रंजनं; 'art of c.' चित्रकर्मन् *n.*, आलेख्यकरणं, आलेख्यविद्या. **2** वर्णनं; अलंकारः. **-ist,** *s.* वर्णिन् *m.*, रंजकः. **-less,** *a.* अवर्ण, विवर्ण, वर्णहीन. **-Colorate,** *a.* सराग, रागयुक्त. **-Colorific,** *a.* वर्णद.

Colt, *s.* अश्वशावः, किशोरः. **2** चपलः, प्रमत्तः. **-ish,** *a.* चपल, तरल, चंचल, लोल.

Colter, *s.* हलदंतः, फालदंतः.

Columbarium, Columbary, *s.* कपोतागारं, विटंकः. **-Columbine,** *a.* कपोतसदृश, कपोतीय.

Column, *s.* स्तंभः, यूपः, स्थाणुः, स्थूणा. **2** सूचिव्यूहः; सैन्यभागः. **3** पत्रभागः, धारा; 'c. of smoke' धूमराशिः, धूमोत्पीडः.

Coma, *s.* अतिनिद्रा. **-tose,** *a.* अतिनिद्रातुर.

Comate, *s.* सहायः, सहवासिन् *m.*

Comb, *s.* प्रसाधनी, कंकतः-तिका, केशमार्जनी. **2** कुक्कुटचूडा-शिखा. **3** दरी. -*v. t.* प्रसाध् c., मृज् 2 P, विजटीकृ 8 U. **-maker,** *s.* कंकतकृत् *m.*

Combat, *s* युद्धं, संग्रामः, समरं; *See* **Battle;** 'single c.' द्वंद्वयुद्धं; 'hand-to-hand-c.' बाहूबाहवि, बाहुयुद्धं; 'mingled c.' (melee) तुमुलं, रणसंकुलं. -*v. t.* युध् 4 A, विग्रह् 9 P, विवद् 1 A. -*v. t.* प्रतियुध्, प्रतिरुध् 7 U, प्रतिबंध् 9 P. **2** खंड् 10, निरस् 4 P, निराकृ 8 U; 'c. one's passions' संयम् 1 P, निग्रह् 9 P. **-ant,** *s.* योधः, योद्धृ *m.*, भटः; वीरः. **-ive,** *a.* कलहप्रिय.

Combine, *v. t.* संयुज् 7 U, 10, संश्लिष् c., संधा 3 U, संमिश्र् 10, एकीकृ 8 U. -*v. i.* मिल् 6 P, संभू 1 P, संगम् 1 A; संहत-समवेत *a.* भू, एकीभू; संयुज्-संधा-संहन्-संसृज् pass.; 'all things c. ed to ruin him' सर्वमेव तस्य नाशायाकल्पत; 'having c. ed' संभूय, मिलित्वा. **-ation,** *s.* संहति *f.*, संयोगः, संसर्गः, संधिः, संघातः, संगः, सहायता, संश्लेषः, व्यतिकरः, समवायः; (of letters) संधिः; 'working by c.' संभूय समुत्थानं; 'in c. with his brothers' भ्रातृसंघातवान् (राजा)

Combustible, *a.* दाह्य, दाहग्राहक; ज्वलनार्ह, दहनशील. **2** (fig.) शीघ्रकोपिन्, क्रोधिल. -*s.* दाह्यः पदार्थः.

Combustion, *s.* दाहः, दहनं, ज्वलनं, प्लोषः.

Come, *v. i.* आगम् 1 P, आया 2 P, आ-इ 2 P; उपस्था 1 U, आव्रज् 1 P, आ-अभि-पद् 4 A: 'c. what may' यद्भावि तद्भवतु, 'c. harm, c. good' यद्भावि तद्भवतु शुभमशुभं वा. **-about,** संवृत् 1 A, संभू, आपत् 1 P; 'c. across,' *See* **Meet. -back,** निवृत्, प्रत्यागम्. **-at,** or by, *See* **Get. -down,** अवतृ 1 P, अवरुह् 1 P, अवपत् 1 P. **-down upon,** (सहसा-रभसा) अवस्कंद् 1 P, आपत् 1 P, अभिद्रु 1 P, आक्रम् 1 U, 4 P. 'c. down with' देयं दा 3 U. **-forth,** निर्गम्, निःसृ 1 P, 'c. in' वशी भू 1 P; वशं गम् 1 P. **-into,** प्रविश् 6 P; 'c. into trouble' विपदाभिभू, आपद्ग्रस्त *a.* भू. **-near,** *See* **Approach. -of,** *See* **Arise. -off, out,** निष्क्रम्; निर्गम्, उदि 2 P; 'came out successful' जयी बभूव. **2** प्रवृत्, संपद्, निवृत्, अवसो pass. 'c. out' प्रसिद्धिं गम्. **-over,** आश्रि 1 U. 'c. round,' प्रकृतिं आपद्. **-short,** न्यूनीभू. **-to,** सकाशं आगम्-या-इ, प्राप् 5 P, प्रकृतिमापद् 4 A, *See* **Amount;** 'c. to a head' पाकं व्रज् 1 P; सपूय *a.* भू; 'c. to blows अन्योन्यं प्रहर्तुं आरभ् 1 A. 'c. to life' उज्जीव् 1 P; 'came to nothing' तस्य कोऽपि परिणामो नासीत्, निष्फलं-निर्गुणं बभूव; 'c. to pass,' आपत्, समापद्, संवृत्; 'c. to oneself' प्रकृतिमापद् 4 A, संज्ञां-चेतनां-लभ् 1 A or प्रतिपद्, प्रकृतौ स्था; 'c. to terms,' संधिं कृ 8 U. 'c. under' समाविश् 6 P. **-up to,** समुपागम्, समाया, समुपसृ-सृप्. **-up with,** आसद् c., प्राप्. **-upon,** आ-समा-पत्, उपस्था, आक्रम्. **-ing,** *s.* आगमनं. -*a.* (to come) आगामिन्; 'on the c. Monday' आगामिनि सोमवासरे; भाविन्. उत्तर; 'time to c.' उत्तरकालः; 'c. generations' *s.* पुत्रपौत्राः; उत्तरकालीना जनाः.

Comedy, *s.* भाणः, प्रहसनं, हर्षप्रधानं नाटकं. **-ian,** *s.* नटः, कुशीलवः, नर्तकः, वैहासिकः. **2** प्रहसनकृत् *m.*

Comely, *a.* चारु, सुंदर (री *f.*), सुरूप; *See* **Beautiful. -ness,** *s.* सौंदर्यं; *See* **Beauty.**

Comestible, *s. See* '**Eatable**'.

Comet, *s.* धूमकेतुः, केतुः, उत्पातः, उल्का.

Comfit, Comfiture, *s.* मिष्टान्नं, मोदकः.

Comfort, *v. t.* समा-आ-श्वस् c., सांत्व् 10. **2** संतुष् c., आनंद् c., हृष् c., सुखं दा 3 U, सुखिन्-*a.* कृ 8 U; 'c. yourself समाश्वसिहि. -*s.* आश्वासनं, सांत्वनं; संतोषणं. **2** सुखं, सुस्थता, सौख्यं, स्वास्थ्यं, निर्वृति *f.* **-able,** *a.* सुखकर (री *f.*), सुखद; सुखशयितं प्रष्टुं (S. 4) 'to ask whether she had a c. sleep.' **2** आश्वासक, शांतिद, क्लेशापह, श्रमविनोदक. **-ably,** *adv.*

सुखं, यथासुखं; निकामं; 'I can't sleep c. even at night' रात्रावपि निकामं शयितव्यं नास्ति (S. 2). **-er,** *s.* आश्वासकः, संतोषदः, शोकापहर्तृ *m.*, सांत्ववादः. **2** ऊर्णा कंठावगुंठनं. **-less,** *a.* निरानंद, सुखरहित, संतोषहीन.

Comic, Comical, *a.* हास्यजनक, हास्यकर (री *f.*), हास्योत्पादक. **2** अपरूप, असंगत, **-ity, -alness,** *s.* हास्यता, कौतुकं; अपरूपता.

Comity, *s. See* **Civility.**

Comma, *s.* स्वल्पविरामः.

Command, *v. t.* आज्ञा *c.* (आज्ञापयति) आदिश् 6 P, समा-नि-प्रमा-दिश्, विधा 3 U, शास् 2 P, नियुज् 7 A, 10. **2** अधिष्ठा 1 P, अध्यास् 2 A; ईश् 2 A, प्रभू (with gen.): 'Rākshasas c. ed by 2 chieftains' नायकाभ्यामधिष्ठिता राक्षसाः. **3** नियम् 1 P, निग्रह् 9 P; *See* **Control.** **4** आत्मवशं नी 1 P, स्वायत्तीकृ 8 U. **5** अवलोक् 10: 'sitting at a window c. ing (the view of) a well' कूपावलोकनगवाक्षगता (M. 1). 'good forms c. respect' आकृतिविशेषेष्वादरः पदं करोति (M. 1). पदं हि सर्वत्र गुणैर्निधीयते (R. iii. 62) 'c. notice or attention.' **-s.** आदेशः, निदेशः, शासनं, नियोगः. **2** अधिकारः, प्रभुत्वं, आधिपत्यं, अधिष्ठातृत्वं; 'has Rākshasas under his c.' तस्यादेशानुवर्तमानाः राक्षसाः, or स राक्षसानामधिपतिः-नायकः-अधिष्ठाता; 'at c.' वशस्थित, *a.*; 'under one's c.' वशीकृत, स्वाधीन; 'to the c. of the army' सैनापत्ये; 'bring under one's c.' आत्मवशं नी, स्वाधीनं कृ; 'though I have no c. over language' तनुवाग्विभवोऽपि सन् (R. i. 9): 'who has perfect c. over language' यं वागवश्येवानुवर्तते (U. 1). **-ant, -er,** *s.* आज्ञापकः, आदेष्टृ *m.* **2** पतिः, अध्यक्षः, नायकः, नीः in comp.; 'c. of an army' चमूपतिः, सेनानीः, सेनाध्यक्षः. **er-in-chief,** सेनापतिः, सेनाध्यक्षः. **-ment,** *s.* आज्ञा, विधिः, सूत्रं. **2** चोदना, शास्त्र-धर्म-आज्ञा.

Commemorate, *v. t.* स्मरणार्थं उत्सवं कृ 8 U. or आचर् 1 P; संकृत् 10, संस्मृ *c.*, वर्ण् 10. **-ion,** *s.* उत्सवकरणं, स्मरणोत्सवः; 'in c. of' स्मरणार्थं, समुद्दिश्य. **-ive,** *a.* स्मारक, स्मरणकृत्.

Commence, *v.* आ-प्रा-रभ् 1 A, प्र-उप-क्रम् 1 A, प्रवृत् 1 A, व्यवसो 4 P. **2** अनुष्ठा 1 P, प्रस्तु 2 U. **-ment,** *s.* आरंभः, उपक्रमः, प्रस्तावः, मुखं, आदि *m.* **2** आमुखं, प्रस्तावना (in dramas). **3** अनुष्ठानं, प्रवृत्ति *f.*, प्रवर्तनं; 'from the c.' आमूलात्, आदितः.

Commend, *v. t.* प्रशंस् 1 P, स्तु 2 U, श्लाघ् 1 A, कृत् 10, वर्ण् 10. **2** सम्-ऋ *c.* (अर्पयति), हस्ते निक्षिप् 6 P अधीन *a.* कृ 8 U: 'thy speech does not c. itself to me' त्वद्वचो नाभिनंदामि (S. 2). **-able,** *a.* प्रशस्य, श्लाघ्य, स्तुत्य **-ation,** *s.* श्लाघा, प्रशंसा, स्तुति *f.* **-atory,** *a.* श्लाघासूचक, प्रशंसाकर (री *f.*), स्तुतिद्योतक. **-er,** *s.* प्रशंसकः, स्तावकः.

Commensurate, *v. t.* अनुरूप-अनुगुण-*a.* कृ 8 U. **2** अपवृत *c.* -*a.* **-Commensurable.** *a.* अनुरूप, अनुगुण, सदृश (शी *f.*), सम, तुल्य. **2** सापवर्त.

Comment, *v. i.* व्याकृ 8 U, व्याचक्ष् 2 A, विवृ 5 U, भाष्यं लिख् 6 P. **2** निरूप् 10, चर्चां कृ, परीक्ष् 1 A. अनुसंधा 3 U. **-ary,** *s.* टीका, व्याख्या, वृत्ति *f.*, भाष्यं. **2** निरूपणं, परीक्षणं, चर्चा. **-ator, -er,** *s.* भाष्य-कृत्-कारः, व्याख्यातृ *m.*, टीकाकारः-कृत्.

Commentitious, *a.* कृत्रिम, कल्पित.

Commerce, *s.* वाणिज्यं, क्रयविक्रयः, निगमः. **2** व्यवहारः, संगमः-ति *f.*, संसर्गः. **-*v. i.*** वाणिज्यं कृ 8 U, पण् 1 A, व्यवहृ 1 P. **-ial,** *a.* वाणिज्य-विषयक-संबंधिन्; 'c. people' वाणिज्यपरायणा नराः.

Commination, *s. See* **Curse, Threat.**

Commingle, *v. t.* संयुज् 7 U, 10, संमिश्र् 10, एकीकृ 8 U, संकृ 6 P; *See* **Unite.**

Comminute, *v. t.* चूर्ण् 10, पिष् 7 P, क्षुद् 7 U. **-ion,** *s.* चूर्णनं, पेषणं, क्षोदः.

Commiserate, *v. t.* दय् 1 A, (with gen.), अनुकंप् 1 A. **-ion,** *s.* दया, अनुकंपा, करुणा. **-ive, Commiserable,** *a.* करुणात्मक, अनुकंपाशील, सदय, दयार्द्र.

Commissary, *s.* सैन्यानां भोजनादेः परिकल्पकः **2** *See* **Deputy. -Commissariat,** *s.* सैन्यानां भोजनाद्यधिकारः. **2** सैन्यानां भोजनाद्यधिकृतः.

Commit, *v. t.* कृ 8 U. आचर् 1 P, अनुष्ठा 1 P, विधा 3 U. **2** (Entrust) ऋ *c.* (अर्पयति), न्यस् 4 P. निक्षिप् 6 P. **3** नियुज् 7 A, 10, समादिश् 6 P, प्रतिपद् *c.*: 'c. to memory' कंठस्थ *a.* कृ; अभ्यस् 4 U: 'c. to prison' कारागारं प्रविश् *c.*, आसिध् 1 P; 'c. to writing' अभिलिख् 6 P, लेख्य-पत्रं आरुह् *c.* (पत्रमारोप्य दीयतां प्रत्यवेक्षितं कर्म S. 6), पत्रे निविश् *c.* (पत्रे निवेशितमुदाहरणं प्रियायाः V. 2), पत्रे कृ *c.* **-tal,** *s.* आचरणं, करणं, अनुष्ठानं. **-tee,** *s.* कार्यसंपादिका सभा, नियुक्तजनाः. **-ment,** *s.* आसेधः, निरोधः, काराप्रवेशनं. **-Commission,** *s.* आचरणं, करणं. **2** समर्पणं, निक्षेपः, न्यासः. **3** नियोगः, व्यापारः, अधिकारः. **4** आज्ञा-शासन-पत्रं, आदेशः. **5** परार्थ-विक्रयः. **6** नियुक्तजनाः; 'c. in the army' सेनायां पदं. –*v. t.* नियुज् 7 A, 10, आदिश् 6 P, अधिकृ 8 U. **–er,** *s.* नियोगिन् *m.*, अधिकारिन् *m.*

Commix,-ture, *See* **Mix,-ture.**

Commode, *s.* स्त्रीमस्तकाभरणं.

Commodious, *a.* उचित, उपयुक्त, योग्य. 2 सोपकरण, यथायुक्त-योग्य. **–ly,** *adv.* युक्तं, योग्यं. **–ness,** *s.* योग्यता, औचित्यं, &c.

Commodity, *s.* पण्यं, द्रव्यं, क्रयवस्तु *n.*, भांडं.

Common, *a.* साधारण (णी *f.*), सामान्य, सर्वीय, सार्वलौकिक (की *f.*). 2 प्राकृत, ग्राम्य; 'c. man' प्राकृतः, पृथग्जनः, वृषलः. 3 प्रसिद्ध, व्यावहारिक (की *f.*), बहुशः कृत-दृष्ट. 4 बहुस्वामिक. 5 सुलभ; 'c. report' जनप्रवादः; 'c. food' गणान्नं, सहभोजनं; 'c. road' प्रचारः; 'in c.' सामान्येन; 'who have made c. cause with us' अस्माभिः सहैककार्याणां (Mu. 2). **–s.** प्रचारः, सर्वसाधारणं क्षेत्रं. **–alty,** *s.* प्रजा, लोकाः, अवरवर्गाः. **–law,** *s.* देशाचारः, देशव्यवहारः-विधिः. **–ly,** *adv.* सामान्यतः, प्रायः, साधारण्येन, बहुशः. **–place,** *a.* प्रसिद्ध, प्राकृत. **–wealth,** *s.* प्रजाधीनं राज्यतंत्रं, प्रजाप्रभुत्वं; 'c. (of ants)' समूहः, स्वतंत्रो गणः.

Commorancy, *s.* वासः, वसति *f.*

Commotion, *s.* क्षोभः, विप्लवः; प्रकोपः, कलहः.

Commune, *v. i.* संभाष् 1 A, संमंत्र् 10 A, संवद् 1 P; व्यवहृ 1 P; व्यासादयो देवादिभिः प्रत्यक्षं व्यवहरंति (S. B. 313) 'c. directly with Gods.' **–s., –ion,** *s.* संभाषणं; संवादः. 2 व्यवहारः. 3 संसर्गः, संगः, संगमः. **–ity,** *s.* समाजः, जनसमूहः, प्रजाजनः, जनता, गणः. 2 सामान्यं, साधारण्यं; ऐक्यं, साम्यं.

Communicate, *v. t.* कथ् 10, निविद् c., आख्या 2 P, आचक्ष् 2 A. (with dat. of person), विवृ 5 U, प्रकाश् c., वद् 1 P, विज्ञा c (ज्ञापयति), संदिश् 6 P. 2 वितॄ 1 P (with loc.), दा 3 U, प्रतिपद् c. (with dat.). –*v. i.* संगम् 1 A, समागम्, संयुज् pass.; 'c. ing with Sindhu' सिंधुनदेन संगत-संगच्छमान. 2 संलप् 1 P. संवद् 1 P, संभाष् 1 A; व्यवहृ 1 P. 3 संचर् 1 P. **–ion,** *s.* कथनं, निवेदनं, विज्ञापनं, संदेशः, लेखः, लेख्यं. 2 दानं, वितरणं. 3 योगः, संसर्गः, संव्यवहारः. 4 संकथा, संलापः, संवादः. 5 सामान्यपथः. 6 संचारः. **–ive,** *a.* संप्रदान-संवादि-शील; 'not c.' मितवाक्, वाग्यत.

Commute, *v. i.* परिवृत् c., विनिमे 1 A, विपर्यस् 4 P, or c., प्रतिदा 3 U. **–ation,** *s.* परिवर्तनं, विनिमयः. 2 विक्रिया, विपरिणामः, विपर्ययः; 'c. of a curse' उच्छापः.

Compact, *a.* सुसंहत, निबिड, घन, सांद्र, दृढ, अनंतर, अविरल. **–s.** नियमः, समयः, संविद् *f.*, अभ्युपगमः, प्रतिश्रवः; 'a written c.' नियमपत्रं; 'make a c.' संविदमभ्युपगम् 1 P. प्रतिश्रु 5 P. –*v. t.* संहन् 2 P, संधा 3 U, संश्लिष् c., घनीकृ 8U. **–ly,** *adv.* दृढं, निबिडं, घनं. **–ness,** *s.* संहति *f.* निबिडता, &c.

Companion, *s.* सखि *m.*, सहचरः, मित्रं, वयस्यः, सहायः, सजुस् *m.*; 'with Madhu for a c.' मधुसहायः, मधुद्वितीयः; 'c. of the king' (in love matters) नर्मसुहृद्-सचिवः; 'c. of youth' बालसहचरः; 'c. at school' सहाध्यायिन् *m.*, 'c. in arms' सहयोद्धृ *m.* 'c. in joy and sorrow' समदुःखसुखः; **–ship,** *s.* साहचर्यं, साहाय्यं, संसर्गः, संगति *f.*

Company, *s* साहचर्यं, संगति *f.*, समागमः, संसर्गः, संवासः, सहवसति *f.* 2 जनसमूहः, परिषद् *f.*, समाजः; दलं, वृंदं, गणः, पंक्ति *f.*, वर्गः; 'c. of soldiers' सैन्यदलं-गुल्मः 'c. of traders' श्रेणी, नैगमाः; 'not admissible into c.' अपांक्तेयः; 'keep or bear c. with' सह वस्-चर्-1 P, संगमनुव्रज् 1 P, *See* **Associate.**

Compare, *v. t.* तुल् 10 (तुलयति), उपमा 3 A; 'c. ed with the moon' शशांकेन तुलितं; समीकृ 8 U, सदृशीकृ. 2 एकत्र परीक्ष् 1 A, संप्रधृ 10. **–Comparative,** *a.* आनुषंगिक (की *f.*), तुलनया निर्णीत, उपमाजन्य; oft. by अपेक्षया in comp. **–ly,** *adv.* 'as c. ed with' तुलनया, औपम्येन, उपमानेन, अपेक्षया; 'I like mango as c. ed with a Jambu fruit' जंबुफलाद्-जंबुफलापेक्षया आम्रं मेऽधिकतरं रोचते; 'the merits of Rāma c.' अन्यापेक्षया रामस्य गुणाः. **–Comparison,** *s.* तुला, तुलना, उपमा-मानं, सादृश्यं, औपम्यं; 'without c.' अतुल. अनुपम; 'standard of c.' उपमानं; 'subject of c.' उपमेयं.

Compartment, *s.* शाला, कोष्ठः, कक्षः-क्षा. 2 छेदः, भागः, अंशः.

Compass, *s.* विषयः, गोचरं; 'within the c. of the eye' नयनगोचरस्थ. 2 मंडलं, परिधिः, परिणाहः, विस्तारः, परिमाणं, पर्यंतः. 3 परिमितता, अनतिक्रमः. 4 दिङ्निर्णययंत्रं. –*v. t.* परिगम् 1 P, परि-इ 2 P, परिवेष्ट् 1 A, or c., परिवृ 5 U. 2 अधिगम् 1 P, लभ् 1 A, *See* **Get.** 3 घट् c. (घटयति), साध् 5 P or c., संपद् c., निष्पद् c.

Compassion, *s.* दया, अनुकंपा, कृपा, घृणा, करुणा, अनुक्रोशः; 'feel or have c. for' अनुकंप् 1 A, अभ्युपपद् 4 A, दयां कृ

or दृश् c. (loc.), वृष् 1 A, (gen.). **-ate,** *a.* सदय, करुणार्द्र, सानुकंप, सानुक्रोश, कृपालु, दयालु, सकरुण, दयाशील. **-ately,** *adv.* सदयं, सानुकंपं, कृपया.

Compaternity, *s.* धर्मपितृत्वं.

Compatible, *a.* अनुगुण, अनुरूप, अविरुद्ध, उपयुक्त; *See* Consistent. **-Compatibility,** *s.* अविरोधः, योग्यता, अनुरूपता, अविसंवादः.

Compatriot, *s.* स्वदेशजः, एकदेशनिवासिन् *m.*

Compeer, *s.* वयस्यः, समानपदस्थः.

Compel, *v. t.* Ex. by causal, of verbs with बलात्, बलेन, or एव; 'I shall c. you to go' त्वां गमयिष्याम्येव or बलाद् गमयिष्यामि; 'c.s payment' बलाद् दापयति &c.; 'c.s me to ask' बलादनिच्छंतमपि मां प्रश्नकर्मणि नियोजयति (Ka. 134); sometimes ex. by अवश्यं, with pot. pass. part; 'you will be c.ed to stay here' त्वयात्रावश्यं स्थातव्यं; or by प्रेर् c., प्रवृत् c. **-Compulsory,** *a.* अवश्य-क, 'it is not c. on you to go' गमनं न तेऽवश्यकं. 2 बलवत्, बलिन्. **-ly,** *adv.* बलात्, अवश्यं, बलेन, अनिच्छत् *a.* (ती-न्ती *f.*) **-Compulsion,** *s.* बलात्कारः, प्रसभं, साहसं, बलं; 'by c.' बलात्, बलेन, प्रसभं, प्रसह्य, हठात्.

Compend, Compendium, *s.* संक्षेपः, संग्रहः, संहारः, सारः. **-Compendious,** *a.* संक्षिप्त, संगृहीत, अविस्तीर्ण, परिमित, सारभूत. **-ly,** *adv.* संक्षेपेण, संक्षेपतः, समासतः, अविस्तरेण. **-ness,** *s.* संक्षेपः, अविस्तरः.

Compensate, *v. t.* परिहृ c., निष्कृतिं दा 3 U, प्रत्युपकृ 8 U, (of persons); अपाकृ, क्षुध् c., निस्तॄ c. **-ion,** *s.* प्रतिफलं, निष्कृति *f.*, निस्तारः, पारितोषिकं. **-ive,** *a.* क्षतिहानि-पूरक.

Compete, *v. i.* स्पर्ध् 1 A, संघृष् 1 P, विजि desid. (जिगीषते); oft. ex. by अहमहमिका, अहमहमिकया प्रणामलालसाः (Ka. 81) 'c.-ing with one another to salute first.' **-ence, -ency,** *s.* योग्यता, सामर्थ्यं, शक्ति *f.*, औचित्यं, कार्यक्षमता. 2 वृत्त्युचितं द्रव्यं; 'bare c.' ग्रासाच्छादनमात्रं. **-ent,** *a.* योग्य, उचित, समर्थ, शक्त, क्षम, पर्याप्त, कार्यक्षम, कार्यनिर्वाहक्षम. 2 परिमित, अनधिक. **-ition,** *s.* स्पर्धा, अहमहमिका, संघर्षः, विजिगीषा. **-itor,** *s.* प्रतिस्पर्धिन् *m.*, स्पर्धिन् *m.*, प्रतिपक्षः, प्रतियोगिन् *m.*

Compile, *v. t.* संकल् 1 P, 10 (कलयति), सं-समा-हृ 1 P, आलोड् 10, संग्रह् 6 P. उद्धृत्य समाहृ. **-ation,** *s.* संकलनं, संग्रहः, सारः. **-er,** *s.* समाहर्तृ *m.*, संग्रहीतृ *m.*, व्यासः, संकलयितृ *m.*

Complacence, -cy, *s.* प्रसादः, संतोषः, प्रीति *f.* 2 सौजन्यं, अनुवृत्ति *f.*, दाक्षिण्यं. **-Complacent,** *a.* प्रसन्न, सुसंतुष्ट, सुप्रीत. 2 सुशील, दक्षिण. **-ly,** *adv.* प्रसादेन, प्रीत्या, सानंदं.

Complain, *v. i.* Ex. by verbs of 'telling' gen. with सशोकं, सविलापं; आ-अधि-क्षिप् 6 P; 'c.ed of her brother's rudeness to her father' भ्रातुरविनयमधिकृत्य पित्रे कथयत्, or भ्रातुरविनयाचरणं पित्रे न्यवेदयत्; 'c.ed to me of partiality' पक्षपातमधिकृत्य मां सविलापं विज्ञापयामास; 'how can I do what you c. of' यत्त्वं मय्यारोपयसि तत्कथमहं कुर्यां. 2 विलप् 1 P, क्रुश् 1 P, परिदेव् 1 A, आक्रंद् 1 P, आक्रुश् 1 P. 3 अभियुज् 7 A; 10, राजकुले निविद् c. (in law). 4 पीड् pass., अनुभू 1 P; 'has been c.ing of ill-health' आमयपीडितः. **-ant,** *s.* अभियोक्तृ *m.*, अर्थिन् *m.*, अभियोगिन् *m.*, वादिन् *m.*, पिशुनः. **-er,** *s.* परिदेवकः, विलापिन् *m.* **-Complaint,** *s.* अभियोगः. 2 विज्ञापना (सविलापा); दुःखनिवेदनं, विलपनं, परिदेवनं; 'breathed out this doleful c.' इमानि परिदेवितान्यक्षराणि सकरुणमुदीरयामास. 3 व्याधिः, पीडा, रोगः, आमयः. 4 विलपनविषयः.

Complaisance, *s.* दाक्षिण्यं, अनुवृत्ति *f.*, अनुनयः, प्रश्रयः, अनुरोधः. **-Complaisant,** *a.* दक्षिण, अनुनयिन्, अनुरोधिन्, अनुकूल, सप्रश्रय. **-ly,** *adv.* सानुनयं, सानुरोधं.

Complement, *s.* पूरणं, परिपूरकं. 2 कोटि *f.* 3 पूर्णता, साकल्यं.

Complete, *v. i.* समाप् c., संपद् c., साध् c.; अवसो c. (साधयति), निर्वह् c., संपॄ c. (पूरयति) or संपूर् 10, निर्वृत् c. **-a.** संपूर्ण, समाप्त, अवसित, सिद्ध, संपन्न, निर्वृत्त. 2 संपूर्ण, निखिल, अखिल, समस्त, समग्र, अशेष, अन्यून. 3 पक्व, परिणत; 'c. army' सांगबलं. **-ion,** *s.* समापनं, निर्वर्तनं, संपादनं. 2 सिद्धि *f.*, समाप्ति *f.*, निर्वृत्ति *f.* 3 परिणामः, परिपाकः. 4 पूरणं, परिपूरकं. **-ly,** *adv.* संपूर्णं; निःशेषं, पर्याप्तं, निरवशेषं, अशेषतः, सर्वथा. 2 आमूलं, कार्त्स्न्येन. **-ness,** *s.* संपूर्णता, निःशेषता.

Complex, *a.* संकीर्ण, मिश्रित, विषम, संमिश्र, मिश्र, संकुल. 2 नानार्थक, असरल, बह्वर्थ. **-ity,** *s.* संकरः, मिश्रता, संकुलता.

Complexion, *s.* वर्णः, मुखरागः; 'of a pale c.' विवर्ण *a.*, पांडुवदन *a.* 2 आकारः, स्वरूपं. 3 प्रकृति *f.*, शरीरभावः. **-al,** *a.* प्रकृतिसंबंधिन्.

Complicate, *v. t.* संमिश्र् 10, संकीर्ण-संकुल -*a.* कृ 8 U, प्र-सं-कॄ 6 P, संकरी-संकुली-

कृ. -ion, *s.* संकुलीकरणं, संकीर्णता, संमिश्रता.

Complice, *s.* पापसहायः. **-ity,** *s.* पापसहायता, सहकारिता.

Compliment, *s.* अभिनंदनवचस् *n.*, नमस्कारः; ' presents c. s ' अभिनंद्य ब्रवीति, ' give my c. s to Chyavana ' च्यवनाय मां प्रणिपातय (V. 5), मदीयो नमस्कारो वाच्यः; श्वश्रूजनं सर्वं विज्ञापय प्रापितमत्प्रणामः (R. xiv 60). **2** प्रश्रयवाच् *f.*, चाटूक्ति *f.*, प्रशंसा, श्लाघा, प्रशंसोक्ति *f.*; ' high c. ' उच्चैर्वादः; स्तुति *f.* —*v. t. See* **Praise 2** मधुरगिरा-चाटूक्त्या सांत्व् 10. **-ary,** *a.* उपचार in comp., ' c. saying ' उपचारपदं; प्रियवादिन्, स्तुतिमय (यी *f.*); ' c. present ' उपायनं. **-er,** *s.* प्रियवादिन् *m.*, चाटुकारः.

Complot, *v. i.* गूढं मंत्र् 10 A, कूटसंविदं कृ 8 U. —*s.* गूढ-कु-मंत्रणा, कूटसाहित्यं. **-ter,** *s.* कूटसहाय.

Comply, *v. i.* अनुविधा 3 U, अनुरुध् 4 A, अनुवृत् 1 A. **2** अनु-सं-मन् 4 A, अनुज्ञा 9 U, स्वीकृ 8 U, प्रति-परि-ग्रह् 9 P, प्रतीष् 6 P, अभ्युपगम् 1 P; क्रियतामस्याः प्रणयपरिग्रहः (Ka. 145) ' *c.* with her request.' **-ance,** *s.* अनुवृत्ति *f.*, अनुविधायित्वं, अनुरोधः, अनुसारः. **2** स्वीकारः, संमति *f.*, अभ्युपगमः, परिग्रहः; ' in c. with your orders ' त्वच्छासनानुरोधात्-नुसारेण. **-ant,** *a.* अनुविधायिन्, अनुवृत्ति-कुशल-शील, अनुरोधिन्, वचने स्थित. **-er,** *s.* अनुरोधिन् *m.*, परिग्रहिन् *m.*

Component, *a.* or *s.* घटक, साधक, रचक; ' c. part ' घटकावयवः, अंगं, भागः, साधनं.

Comport, *v. i.* **Behave,** q. v. **2** युज्-उपपद्-pass. **-able,** *a.* योग्य, उचित. **-ment,** *s.* आचारः, व्यवहारः, चेष्टितं.

Compose, *v. t.* (of books &c.) प्रणी 1 P, विरच् 10, बंध् 9 P, निर्बंध्, संग्रंथ् 9 P. **2** विन्यस् 4 P, संधा 3 U, संक्लृप् c., संविधा, निर्मा 3 A. **3** घट् c. (घटयति), निर्मा, क्लृप् c.; or gen. ex. by आत्मक, रूप, मय (यी *f.*) in comp.; ' the body c. ed of 5 elements ' पंचभिर्निर्मितो देहः, पंचभूतात्मको देहः. **4** (Calm) स्थिरीकृ 8 U, शम् c. (शमयति), प्रसद् c., संस्तंभ् c., पर्यवस्था c. (स्थापयति); 'does not yet c. (collect) himself' नाद्यापि पर्यवस्थापयत्यात्मानं (U. 3). **5** (a dispute &c.) संधा 3 U, प्रशम् c. (प्रशमयसि विवादं S. 5). **-ed,** *a.* शांत, प्रसन्न, अव्याकुल, अनुद्विग्न, स्थिरीकृत, समाहित. **2** विरचित, निर्मित, निबद्ध; 'c. in verse, or music ' श्लोक-स्वर-बद्ध; 'c. of' घटित, आत्मक-(त्मिका *f.*), रूप in comp. **-edly,** *adv.* असंभ्रमं, प्रशांतचेतसा, निरुद्वेगं. **-er,** *s.* रचकः, प्रणेतृ *m.*, निबंद्धृ *m.* **-ition,** *s.* रचना, प्रणयनं, निर्माणं, निबंधनं. **2** विन्यासः, संधानं, प्रशमनं. **3** समसनं, मिश्रणं, संयोगः, संधिः, संघातः. **4** ग्रंथः, प्र-निबंधः. **-ure,** *s.* स्थैर्यं, शमः, प्रसादः, असंभ्रमः, अक्षोभः. **2** संधानं, संयोगः, मिश्रणं, निर्माणं.

Compotation, *s.* सहपानं, संपीति *f.*

Compound, *v. t.* संयुज् 10, संमिश्र् 10, संधा 3 U, समस् 4 P, संश्लिष् c. **2** (a dispute) संधा, समाधा c., प्रशम् c.(शमयति). —*v. i.* अल्पशोधनेन आनृण्यं गम् 1 P; 'was glad to c. for his escape with the loss of it' तन्नाशेनापि मुक्तिरभवदिति हृष्टो बभूव. —*a.*, **-ed,** *a.* संयुक्त, यौगिक (की *f.*), संसृष्ट, संमिश्र, सामासिक, साधित; ' c. word ' समासः. —*s.* मिश्रणं, संकरः; मिश्रितद्रव्यं, योगः. **2** परिसरभूमि *f.*, प्रांगणं (नं). **-er,** *s.* मिश्रणकृत्-समाधातृ *m.*; ' c. of medicines ' औषधयोगविद् *m.*

Comprehend, *v. t.* बुध् 1 P, विद् 2 P, ज्ञा 9 U, ग्रह् 9 P, परिग्रह्, उपलभ् 1 A, अवगम् 1 P, ऊह् 1 A; विभू c., अवधृ 10. **2** व्याप् 5 P, अंतर्गण् 10, अंतर्भू c., परिग्रह् 9 P, आकल् 10, समाविश् c. **-Comprehensible,** *a.* ग्राह्य, बोध्य, अवधारणीय, विभाव्य, धीगम्य; 'easily c.' सुबोध; 'not c.' दुर्बोध, दुर्ग्रह, दुर्गम, दुर्ज्ञेय. **-Comprehension,** *s.* ग्रहणं, बोधः. **2** धी *f.*, मति *f.*, बुद्धि *f.*, अवधारणा, मेधा; ' power of c. ग्रहणसामर्थ्यं, आकलनशक्ति *f.* **3** प्रतिसंहारः, व्याप्ति *f.*, समावेशः, अंतर्भाव. **-Comprehensive,** *a.* व्यापक, बहुविस्तीर्ण, व्यापिन्, बहुग्रह. **2** सांक्षेपिक (की *f.*). **-ly,** *adv.* समासतः, संक्षेपेण. **2** व्यापकत्वेन. **-ness,** *s.* व्यापकत्वं. **2** संक्षेपः, समस्तता.

Compress, *v. t.* संवृ 5 U, संकुच् 1 P, संहन् 2 P, संपीड् 10, संहृ 1 P. **-ible,** *a.* संकोचनीय. **-ibility,** *s.* संकोचक्षमता, संहरणीयता. **-ion,** *s.* संकोचः-चनं, संहति *f.*, संपीडनं; संवरणं

Comprise, *v. t.* व्याप् 5 P, अंतर्गण् 10, परिग्रह् 9 P, समाविश् c., अंतर्भू c.; 'to be c. ed in ' अंतर्गम् 1 P, अंतर्भू 1 P, or by आत्मक, गर्भ, in comp.

Comprobation, *s.* प्रमाणं, साक्ष्यं, संमति *f.*

Compromise, *v. t.* आपुष् 10. **2** संशये पत् c., संशयस्थ *a.* कृ 8 U. —*s.* आपोषः-षणं. **2** मध्यस्थावलंबननियमः.

Comprovincial, *a.* एकदेशीय, एकदेशज.

Comptrol, *v. t.* अधिष्ठा 1 P, पर्यव-ईक्ष् 1 A. **-ler,** *s.* कार्याधिकृतः, पर्यवेक्षकः, कार्यद्रष्टृ *m.*

Compulsion, **-sory,** *See* under **Compel.**

Compunction, *s.* अनुशयः, अनुतापः, पश्चात्तापः. **-Compunctious,** *a.* अनुशयार्त, अनुतापिन्.

Compute, *v. t.* गण् 10, सं-परिसं-ख्या 2 P, संकल् 10. **-ation,** *s.* गणनं-ना, संख्यानं. **-er,** *s.* गणकः.

Comrade, *See* **Companion.**

Con, *v. t.* अधी 2 A, अभ्यस् 4 U.

Concatenate, *v. t.* (अविच्छेदं) संयुज् 10, संश्लिष् c., अनुबंध् 9 P, संधा 3 U. **-ion,** *s.* अविच्छेदसंयोगः, निरंतरः संश्लेषः, अनुबंधः. 3 माला, परंपरा, श्रेणी, पंक्ति *f.*

Concave, *a.* पुटाकार, उत्तान, उदराकार. **-ity,** *s.* उत्तानता, पुटः, गर्भः.

Conceal, *v. t.* गुह् 1 U, प्रच्छद् 10, अपवृ 5 U or c., अंतर्धा 3 U; पिधा 3 U, संवृ, नि-अप-ह्नु 2 A (feelings &c.); गुप् 1 P or 10; 'c. oneself' 'to be c. ed' अंतर्-इ 2 P; 'c. ing the body (oneself) behind a bush' विटपांतरितविग्रहः (Ka. 152); ली 4 A (मातुर्निलीयते कृष्णः S. K.). **-ed,** *a.* गूढ, प्रच्छन्न, निभृत, गुप्त, निलीन. **-ment,** *s.* गूहनं, प्रच्छादनं, नि-अप-ह्नवः, गोपनं, संवरणं; 'in c.' निभृतं, रहः, गुप्तं, छन्नं.

Concede, *v. t.* अनुमन् 4 A, प्रदा 3 U, अनुज्ञा 9 U, वितॄ 1 P; 'c. ed the point to him' तस्याभिमेतमन्वमन्यत. 2 अंगीकृ 8 U, अभ्युपगम् 1 P, प्रतिपद् 4 A. **-Concession,** *s.* प्रदानं, वितरणं; त्यागः. 2 क्षमा. 3 अंगीकारः, प्रतिपत्ति *f.*, अभ्युपगमः.

Conceive, *v. i.* गर्भं धृ 1 P, 10 or आधा 3 U, गर्भवती-आपन्नसत्वा-ससत्वा-अंतर्वत्नी भू 1 P. **-v. t.** विभू c., बुध् 1 P, अवधृ 10, अवगम् 1 P, ग्रह् 9 P, आलोच् 10, ज्ञा 9 U. 2 मन् 4 A, चिंत् 10, ध्यै 1 A. 3 संभू c., क्लृप् c. (नरपतौ भूवगाविक्रयं को नाम संभावयेत् Mu. 5). 4 धृ, वह् 1 P; *See* **Bear**; 'I c. no hatred against you' त्वयि मे द्वेषबुद्धिर्नास्ति, न त्वभ्यसूयामि. **-Conception,** *s.* गर्भाधानं, गर्भधारणं. 2 विभावना, बोधः, ग्रहणं, अवधारणं. 3 विचारः, कल्पना, भावना, बुद्धि *f.*, मति *f.*, संकल्पः. **-Conceit,** *s.* अभिमानः, अवलेपः, दर्पः, अहंकारः, गर्वः; 'self-c.' स्वाभिमानः. 2 कल्पना, भावना, चिंता, विचारः. 3 मति *f.*, बुद्धि *f.*, मतं. **-ed,** *a.* दृप्त, अवलिप्त, अभिमानिन्, उद्धत, आत्ममानिन्, सगर्व; 'c. of learning' पंडितंमन्यः. **-edly,** *adv.* साभिमानं, सगर्वं. **-edness,** *s.* मानिता, अहंकारः, सगर्वता.

Concentre, *v. t.* एकीकृ 8 U, *See* below; 'c. ed all in self' आत्मपरायणः, आत्मन्येव निविष्टचेतोवृत्तिः.

Concentrate, *v. t.* समाहृ 1 P, समुपाचि 5 U, एकीकृ 8 U. 2 समाधा 3 U (as mind); अनन्यमनस्क-एकाग्र-*a.* भू; 'my affections are c. ed in her' सा मे स्नेहस्यैकायनीभूता (M. 2). **-ed,** *a.* एकतान, अनन्यवृत्ति, एकाग्र, एकायन, एकसर्ग, एकाग्र्य, एकायनगत. **-ion,** *s.* एकीकरणं, एकत्रसमाहरणं. 2 एकाग्रता, समाधिः, अनन्यमनस्कता.

Concentric,-cal, *a.* एक-समान-केंद्र.

Concern,-ment, *s.* अर्थः, व्यापारः, विषयः, कार्यं, संबंधः. 2 चिंता, उद्वेगः, औत्सुक्यं. 3 गौरवं, गुरुता, माहात्म्यं. 4 अवेक्षा, प्रणयः, अनुरागः, मनोयोगः, मनोभिनिवेशः. 5 चर्चा, व्यापारः, विचारः. **-v. t.** संबंध् 9 P, उद्दिश् 6 P, आश्रि 1 U; 'this does not c. you' नायं तव व्यापारः. 2 अवेक्ष् 1 A. 3 Afflict, q. v. 4 (Oneself about) व्यापृ 6 A, आत्मानं व्यापृ c., व्यापृत *a.* भू, चर्चां कृ; 'I am not c. ed in the least in this business' अनेन कर्मणा न मे कोपि संबंधः. **-ing,** *prep.* संबंधिन् -विषय in comp.; उद्दिश्य, अधिकृत्य, आश्रित्य.

Concert, *s.* एकतानः-लः, संगीतं; 'c. hall' संगीतशाला. 2 संप्रधारणा, समंत्रणं, कार्यविमर्शः, संवादः. 3 सहकारिता, संभूयकारित्वं, चित्तैक्यं, एकभावः. **-v. t.** संमंत्र् 10 A, संप्रधृ 10, कार्याणि चिंत् 10 or विमृश् 6 P, संवद् 1 P. 2 संभूय-एकत्र-कृ 8 U. 3 घट् c. (घटयति), क्लृप् c., चिंत् 10; 'well c. ed plan' सुघटितः-सुचिंतितः-प्रयोगः.

Conch, *s.* शंखः, कंबुः, दरं.

Conciliate, *v. t.* अनुरंज् c., आराध् 10, प्रसद् c., तुष् c., लल् 10, सांत्व् 10. 2 संधा 3 U, अनुनी 1 P. **-ion,** *s.* अनुरंजनं, सांत्वनं, प्रसादनं. 2 सामन् *n.*, संधानं. **-or,** *s.* अनुरंजकः. 2 संधानकर्तृ *m.*, मध्यस्थः. **-ory,** *a.* आराधक, सामन् in comp.: सामोपचार 'c. means'.

Concise, *a.* संक्षिप्त, संहृत, सामासिक (की *f.*). **-ly,** *adv.* संक्षेपेण, संक्षेपतः, अविस्तरेण, समासतः; 'a c. worded message' लघुसंदेशपदा सरस्वती (R. viii. 77). **-ness,** *s.* संक्षिप्तता, संहारः, अविस्तरः. **-Concision,** *s.* कर्तनं, छेदनं, उच्छेदः.

Concitation, *s.* उत्तेजनं, प्रोत्साहनं, उत्थापनं.

Conclave, *s.* समाजः, सभा, परिषद् *f.* 2 गूढसभा-समाजः. 3 कक्षांतरं.

Conclude, *v. t.* समाप् c., निर्वृत् c., अवसो 4 P, निर्वह् c., संवह् c., साध् c., संपृ 10. 2 अनुमा 3 A, विभू c., ऊह् 1 A, तर्क् 10. 3 निर्णी 1 P, निश्चि 5 U, अवधृ 10, व्यवसो 4 P; 'c. a treaty' संधिं कृ 8 U or विधा 3 U. **-v. i.** विरम् 1 P, निवृत् 1 A; प्र-उपशम् 4 P; 'when he had c. ed' वचस्यवसिते तस्य. **-Conclusion,** *s.* समाप्ति *f.*, निष्पादनं, सिद्धि *f.*, निष्पत्ति *f.*, निवृत्ति *f.* 2 अवसानं, अंतः, परिणामः, उपसंहारः. 3 अनुमानं, ऊहनं, अनुमिति *f.* 4 निर्णयः, अवधारणं, फलं, उत्तरं. 5 सिद्धांतः, राद्धांतः, उत्तर-

पक्षः, निगमनं (in logic). -**Conclusive,** *a.* अखंड्य, अनिरस्य, निरुत्तर, समर्थ. 2 निर्णायक, संशयच्छेदिन्, निश्चायक. -**ly,** *adv.* सनिश्चयं-निश्चितं, संशयच्छेदितया.

Concoct, *v. t.* पच् क्वथ् 1 P, तप् c. 2 चिंत् 10, घट् c. (घटयति), प्रकॢप् c., निरूप् 10. -**ion,** *s.* क्वाथः. 2 पाकः. पाचनं. -**ive,** *a.* पाचक.

Concomitant, *a.* आनुषंगिक (की *f.*), समवायिन्, संगत, समन्वित; सहवर्तिन्, सहकारिन्. -*s.* सहचारिन् *m.*, सहवर्तिन् *m.*, संगिन् *m.* -**ly,** *adv.* समवेतं, सहितं, सह, संभूय. -**Concomitance,** *s.* संयोगः, समन्वयः, अनुषंगः, समवायः.

Concord, *s.* ऐक्यं, एकता; चित्तैक्यं, अविसंवादः, अविप्रतिपत्ति *f.*, अविरोधः; 'c. of hearts' ऐक्यं हृदययोः, एकचित्तता. 2 प्रीति *f.*, प्रणयः, संधिः. 3 समयः, संविद् *f.*, नियमः. 4 अनुषंगः. अन्वयः, समन्वयः. 5 तालैक्यं, स्वरैकता. -**ance,** *s.* एकता, सादृश्यं, ऐक्यं. -**ant,** *a.* अनुरूप, अनुगुण, सदृश (शी *f.*), अविरुद्ध, संवादिन्.

Concourse, *s.* संधिः, संगमः. 2 (of people) (जन-) समूहः, संघातः, निवहः, ओघः, गणः.

Concrement, *s.* पिंडः, राशिः, घनता, संहति *f.*, संघातः.

Concrete, *v. t.* राशीकृ 8 U, पिंडीकृ, एकीकृ, घनीकृ, संहन् 2 P. -*v. i.* राशीभू 1 P, पिंडीभू, घनीभू, संहन् pass. -*s.* पिंडः, ओघः, घनचयः. 2 घनद्रव्यं, श्यानद्रव्यं. -*a.* घन, राशिभूत, संहत, श्यान, पिंडीभूत. 2 अविविक्त, अकेवल, समवेत, अन्वित. -**ion,** *s.* घनीकरणं; संहति *f.*, संघातः, 2 पिंडः, लोष्टः, संहतद्रव्यं.

Concubine, *s.* उपपत्नी, उपस्त्री, गणिका, वारस्त्री, वेश्या; 'c. shut up' अवरोधस्त्री. -**age,** *s.* उपस्त्रीगमनं, वेश्यासेवा.

Concupiscence, *s.* कामः, अभिलाषः, रताभिरुचि *f.* -**Concupiscient,** *a.* कामुक, कामिन्, रतार्थिन्.

Concur, *v. i.* एकत्र मिल् 6 P, संगम् 1 A. संभू 1 P, संपत् 1 P. समागम् 1 P. 2 संभूय-एकीभूय-कृ 8 U, 3 संमन् 4 A, तथा मन्; अभ्युपगम्, एकचित्तीभू; *See* Agree. -**rence,** *s.* सं-अनु-मति *f.*, संमतं, इच्छा. 2 मतैक्यं, एकचित्तता. -**rent,** *a.* एकचित्त, संप्रतिपन्न, संवादिन्. 2 अनुषंगिन्, संभूय-सह-कारिन्. -**rently,** *adv.* संमतिपूर्वं, अनुमत्या. 2 सममेव, युगपत्.

Concussion, *s.* संघट्टः, विकंपः, निधुवनं, संक्षोभः.

Condemn, *v. t.* Censure, q. v. 2 दंड् 10, दंडं आदिश् 6 P or कृ 8 U; 'c. to death' वधदंडमादिश्; 'he was c.-ed to be hanged' शूलमारोप्यतामसाविति दंड आदिष्टः. 3 अपराधिन् *a.* स्था c. (स्थापयति), अपराधं निर्णी 1 P; 'c. to pay' दा c. (दापयति). -**ation,** *s.* दंडनं, दंडाज्ञा. 2 अपराधनिर्णयः. 3 निंदा, गर्हा, दूषणं. -**atory,** *a.* निंदक, अपवादक. -**er,** *s.* दंडप्रणेतृ *m.* निंदकः.

Condense, *v. t.* संहन् 2 P, घनीकृ 8 U, सांद्रीकृ, श्यै c. 2 संक्षिप् 6 P. -*v. i.* सांद्री-घनी-भू, संहन् pass., श्यै 1 A. -*a.* -**ed,** *a.* घन, सांद्र, निबिड, श्यान; संक्षिप्त. 2 स्थूल, अविरल. -**ation,** *s.* घनीकरणं. -**ity,** *s.* घनता, निबिडता, &c.

Condescend, *v. i.* प्रसद् 1 P, अर्ह् 1 P (followed by inf.); *See* **Please**; 'the king c.-ed to speak with his servant' प्रसन्नो भूत्वा, दाक्षिण्यतया, गौरवं-अभिमानं-अपास्य, भृत्येन सहाभाषत; 'c. to look at me' मयि दृष्टिप्रसादं कुरु. 2 अनुवृत् 1 A, अनुमन् 4 A, अनुज्ञा 9 U. -**ing,** *a.* प्रसादाभिमुख (खी *f.*), प्रसन्न, अस्तगर्व, त्यक्तगौरव. -**ingly,** *adv.* अगर्वं, प्रसन्नतया, नम्रतया. -**Condescension,** *s.* प्रसादः, दाक्षिण्यं, दर्पत्यागः, गौरवत्यागः, नम्रता.

Condign, *a.* यथार्ह, अनुरूप, समुचित, योग्य. -**ly,** *adv.* यथार्हं, यथोचितं. -**ness,** *s.* योग्यता, औचित्यं.

Condiment, *s.* व्यंजनं, उपस्करः.

Condisciple, *s.* सतीर्थः (-र्थ्यः), एकगुरुः.

Condition, *s.* दशा, अवस्था, भावः, स्थिति *f.*, वृत्ति *f.*, गति *f.*; 'in this c.' एवंविध *a.*, एवंभूत *a.*; oft. ex. by त्व & ता affixed: दरिद्रता, दुर्गतत्वं, &c. 2 समयः, नियमः, प्रतिज्ञा, अभिसंधिः, संकेतः; 'on this c.' अनेन समयेन. 3 अंशः, आस्पदं, पदं, अधिकारः, भावः. 4 गुणः, उपाधिः, विशेषणं, प्रकृति *f.* -**al,** *a.* समययुक्त, सोपाधिक (की *f.*), सनियम, नियत; सांकेतिक. -**ally,** *adv.* समयपूर्वकं, सप्रतिज्ञं, समयपुरःसरं. -**ed,** *a.* स्थित, वर्तिन्, स्थ in comp.; 'well c.' सुस्थित, सुस्थ.

Condole, *v. i.* समदुःख *a.* भू 1 P, (अन्यं) अनुशुच् 1 P, शोकार्तं समदुःखेन सांत्व् 10. -**ence,** *s.* समदुःखता, अनुशोचनं; शोकः, संपरिदेवनं. -**er,** *s.* समदुःखभागिन् *m.*

Condone, *v. t.* क्षम् 1 A. प्रशुध् c., प्रमृज् 2 P. -**ation,** *s.* क्षमा, अपराधक्षमा, प्रमार्जनं.

Conduce, *v. i.* (to) आवह् 1 P: (मन्दापि राज्यं न मे सौख्यमावहति P. I. 1), भू with dat., कॢप् 1 A. संपद् 4 A. (dat.). 2 वृध् c., संवृध् c., उत्पद् c., प्रवृत् c. -**ive,** *a.* आवह, कर (री *f.*), जनक, in comp.; 'c. to happiness' सुखावह, हितकर, &c.

Conduct, *v. t.* नी 1 P, प्राप् c. (ननु मां प्रापय पत्युरंतिकं K. iv. 32), गम् c. (गमयति), वह् 1 P. 2 विधा 3 U, निर्वह् c., प्रवृत् c., प्रणी. 3 (oneself) वृत् 1 A.

व्यवहृ 1 P, आचर् 1 P. *See* **Act**; 'c. oneself properly' सदाचारेण वृत्, सदाचारं प्रतिपद् 4 A; 'well c. ed' साधुवृत्त, सदाचार. 4 परि-अनु-चर् 1 P, अनुया 2 P, मार्गं दृश् c. or आदिश् 6 P. -*s.* निर्वाहणं, निर्वाहः, प्रणयनं. 2 वृत्ति *f.*, वृत्तं, आचारः, व्यवहारः, कर्मन् *n.*, चरितं, चेष्टितं, आचरणं. 3 परिचरः, मार्गदर्शकः. **-or,** *s.* नायकः, अग्रगः, नेतृ *m.*, अग्रणीः, (of boat &c.) प्रवाहकः. 2 निर्वाहकः, प्रणेतृ *m.*

Conduit, *s.* प्रणाली, जलनिर्गमः. 2 कुल्या.

Cone, *s.* सूचि-ची *f.*, शिखा. 2 शंकुः. **-Conic, -Conical,** *a.* सूच्याकार, शंक्वाकृति.

Confabulate, *See* **Converse.**

Confect, *v. t.* उपस्कृ 8 U, स्वादु *a.* कृ. **-ion,** *s.* उपस्करः, मिष्टान्नं, मोदकः. **-ionery,** *s.* मोदकविक्रयस्थानं, मोदकक्रियास्थानं **-ioner,** *s.* आपूपिकः, भक्ष्यंकारः,

Confederate, *v. t.* संधा 3 U, संयुज् 7 U, 10, एकत्र कृ 8 U. -*v. i.* संघट् 1 A, संयुज् pass., संधिं कृ. -*a.* संधिबद्ध, सुश्लिष्ट, कृतसंधि, संयुक्त, संघातवत्. -*s.* सहायः, सहकारिन् *m.*, सहयोगिन् *m.* **-ion,** *s.* संधानं; संयोजनं. **-Confederacy,** *s.* संधिः, साहित्यं, संघातः, संयोगः.

Confer, *v. t.* (upon) वितॄ 1 P (with loc.), प्रतिपद् c., दा 3 U, 1 P (with dat.); 'I shall c. upon you 100 grants of land' त्वां शासनशतेन योजयिष्यामि (P. I. 1). 2 आवह् 1 P, दा, उत्पद् c. 3 Compare, q. v.; 'c. a favour' प्रसादं कृ 8 U, अनुग्रह् 9 P; 'c.-ing pleasure' सुखद, सुखावह. -*v. i.* संभाष् 1 A, संलप् 1 P, संवद् 1 P. 2 संमंत्र् 10 A, संचिंत् 10, विचर् c. **-ence,** *s.* संवादः; संकथा, संभाषणं. 2 मंत्रणं. 3 उपमानं. 4 मेलकः, समाजः. **-rer,** *s.* दातृ *m.*, द or प्रद in comp.

Confess, *v. t.* स्वीकृ 8 U, अंगीकृ, प्रतिपद् 4 A, अभ्युपगम् 1 P, अभ्युप-इ 2 P. 2 विवृ 5 U, सूच् 10, प्रकाश् c., ख्या c. (ख्यापयति). 3 (आचार्याय-गुरवे) पापानि निविद् c. or कथ् 10. **-edly,** *adv.* असंशयं, व्यक्तं, प्रतिपत्तिपूर्वकं. **-ion,** *s.* अंगीकारः, संप्रतिपत्ति *f.*, अभ्युपगमः, ग्रहणं. 2 ख्यापनं, प्रकाशनं. 3 पापनिवेदनं. **-or,** *s.* स्वीकर्तृ *m.*; ख्यापकः.

Confide, *v. i.* विश्वस् 2 P, प्रति-इ 2 P, श्रद्धा 3 U; 'she was made to c. in a false man' असत्यसंधे जने पदं कारिता (S. 4). -*v. t.* निक्षिप् 6 P, न्यस् 4 P (with loc.), सम्-ऋ c. (अर्पयति); 'have you kept the secret c. ed to you' अपि रक्ष्यते रहस्यनिक्षेपः (V. 2). **-ant,** *s.* विश्वास-विश्रंभ-भूमि *f.*, सखि *m.*, वयस्यः. 2 (of a woman) सखी, वयस्या, आलि-ली *f.* **-ence,** *s.* विश्वासः, विश्रंभः, प्रत्ययः; श्रद्धा. 2 निश्चयः, दृढप्रत्ययः, दृढज्ञानं, असंशयः; 'enter into c.' विश्वासं गम् 1 P or व्रज् 1 P; 'raising of c.' विश्वासोपगमः; 'inspire with c.' विश्वासं नी 1 P; विश्वस् c.; 'take into c.' विश्रंभस्थाने मन् 4 A; 'self-c.' प्रगल्भता, प्रागल्भ्यं, धृष्टता, 'an object of c.' विश्वासभूमिः, विश्रंभस्थानं, -भाजनं. **-ent,** *a.* विश्वासिन्, विश्वासप्रतिपन्न-विश्वस्त, जातप्रत्यय, विश्रब्ध. 2 निश्चित, असंदेह, छिन्नसंशय; 'he is c. of success' जयं निश्चितं (ध्रुवं) मन्यते. 3 प्रगल्भ, धृष्ट, निर्विशंक, साहसिन्. **-ential,** *a.* विश्वस्त, विश्रब्ध; आप्त (आप्तजनः); 'c. talk' विश्रंभालापः; 'c. matter' विश्वासकार्यं. 2 गुप्त, अप्रकाश्य, संवरणीय. **-entially,** *adv.* विश्रब्धं; गुप्तं. **-ing,** *a.* विश्वासापन्न, विश्वासभाज्, विश्वस्त, जातप्रत्यय, विश्रब्ध, अविशंकमान, निःशंक. **-ingly,** *adv.* विश्रब्धं, सप्रत्ययं, निर्विशंकं, निःसंदेहं.

Configuration, *s.* आकारः, रूपं, मूर्ति *f.*, विग्रहः, आकृति *f.*

Confine, *s.* सीमा, पर्यंतः, प्रांतः, समंतः, परिसरभूमि *f.* -*v. i.* पर्यंते-निकटे-स्था 1 P or वृत् 1 A. -*v. t.* नि-अव-रुध् 7 U, आसिध् 1 P, नि-सं-यम् 1 P, निग्रह् 9 P, बंध् 9 P, निबंध्. 2 (oneself to) न व्यति-इ 2 P or उल्लंघ् 1 A, 10, नातिचर् 1 P. 3 संहृ 1 P, संकुच् 1 P. **-ed,** *a.* संयत, निरुद्ध, निबद्ध. 2 संकट, संकुचित; 'c. in the bowels' बद्धकोष्ठः; 'c. to bed' शयनग्रस्त; (of a woman) प्राप्तप्रसवकाला. **-ment,** *s.* संयमः, निरोधः, निग्रहः, बंधनं, कारागृहं; 'c. of bowels' विड्ग्रहः, आनाहः, मलावरोधः; 'c. of a woman' प्रसवकालः, प्रसवावस्था.

Confirm, *v. t.* दृढीकृ 8 U, द्रढयति (D.), संस्तंभ् c. 2 स्थिरीकृ, दृढप्रमाणं दा 3 U, प्रमाणीकृ, सुस्थिर-दृढ- *a.* कृ. **-ation,** *s.* दृढीकरणं, संस्तंभनं, सत्यापनं, प्रमाणीकरणं. **-ed,** *a.* दृढीकृत, प्रमाणीकृत, स्थिरीकृत. 2 दृढ, स्थिर, रूढ, प्ररूढ; 'a c. fool' प्रतिनिविष्टमूर्खः, 'c. friendship' प्ररूढः संसर्गः, रूढसौहृदं.

Confiscate, *v. t.* सर्वस्वं अपहृ 1 P or आच्छिद् 7 P or दंड् 10, निःस्व *a.* कृ 8 U; 'let his property be c. ed' अस्य सर्वस्वहरणमादिश्यतां. **-ed,** *a.* राजापहृत; हृतसर्वस्व, निःस्वीकृत. **-ion,** *s.* सर्वस्वहरणं, सर्वस्वदंडः, सर्वस्वापहारः.

Conflagration, *s.* दाहः, ज्वलनं, दीपनं; 'forest c.' दावानलः, दवः, दावः, अरण्यवह्नि *m.*

Conflict, *s.* विरोधः, (स्मृत्योर्विरोधः); द्वंद्वं, कलहः, वैरं; विप्रतिपत्ति *f.*, विसंवादः. 2 युद्धं, संग्रामः, विग्रहः. 3 संघट्टः, समाघातः, अभिसंपातः. -*v. i.* युध् 4 A, विवद् 1 A, विग्रह् 9 P; 'mutually c. ing S'âstras

परस्परं विवदमानानां शारणां (H. 1): वि-प्रतिपद् 4 A, परस्परं विरुध् pass., विसंवद् 1 P. **-ing,** *a.* विप्रतिपन्न, विरुद्ध, परस्पर-विरोधिन्, विसंवादिन्.

Confluence, Conflux, *s.* संगमः, संभेदः, तोयव्यतिकरः. वेणि *f.* 2 संयोगः, समागमः, संमिलनं. 3 **Concourse,** q.v. **-Confluent,** *a.* संमेलक, संप्रवाहक.

Conform, *v. i.* (to) अनुवृत् 1 A, अनुसृ 1 P, अनुरुध् 4 A, प्रमाणीकृ 8 U, (इति सुजनचरितं प्रमाणीकुरु M. 3), अनुविधा 3 U. 2 युज् pass., सदृश-तुल्य*a.* भू, उपपद् 4 A, संवद् 1 P. *-v. t.* अनुरूप-सदृश *a.* (शी *f.*) कृ, समीकृ. **-able,** *a.* अनुरूप, सदृश, तुल्य, अनुगुण, समान, संवादिन्. 2 अनुविधायिन्, अनुरोधिन्, अनुकूल. 3 योग्य, उपपन्न. **-ably,** *adv.* अनुसारेण-सारतः, अनुरोधात्, अनुरूपं, यथा in comp. **-ity,** *s.* अनुरोधः, अनुवृत्ति *f.* 2 अनुरूपता, आनुगुण्यं, सादृश्यं, अनुसारः; ' in c. with ' अनुसारेण, अनुरूपं, &c. 3 योग्यता, युक्तता. **-ist,** *s.* धर्मानुसारिन् *m.*, प्रवृत्तधर्मानुवर्तिन् *m.*

Confound, *v. t.* भ्रांत्या मन् 4 A ; 'c. a falsehood with truth ' सत्यमनृतमिति भ्रांत्या मन्यते; oft. by संदिह् 2 U ; धूपैर्जालाविनिःसृतैर्वडभयः संदिग्धपारावताः (V. 3) 'the pigeons c. ed with volumes of incense ' &c. ; *See* **Mistake.** 2 आकुलीकृ 8 U, मुह् c., वि-सं-क्षुभ् c., संभ्रम् c. (भ्रमयति). 3 संकॄ 6 P, विक्षिप् 6 P, संमिश्र् 10, संकुलीकृ. 4 विलुप् c., विनश् c.; 'c. by argument ' निरुत्तरीकृ. **-ed,** *a.* मोहित, आकुल, संभ्रांत, विहस्त, व्यग्र, विक्षिप्त. 2 संकीर्ण, संमिश्रित, संकुल. 3 दैवोपहत; लुप्तज्ञान. **-er,** *s.* मोहकः, मोहनः. **-ing,** *a.* भ्रांतिजनक, संदेहोत्पादक, मोहिन्.

Confraternity, *s.* सौभ्रात्रं; भ्रातृत्वं, साहित्यं.

Confrere, *s. See* **Colleague.**

Confront, *v. t.* अभिमुखी-संमुखीकृ 8 U, अभिमुखयति (D.), समक्षं उपानी 1 P. 2 संमुखीभू 1 P, सं-अभि-मुखं स्था 1 P or गम् 1 P or वृत् 1 A. 3 **Compare,** q. v. **-ation,** *s.* संमुखस्थापनं; संमुखागमनं.

Confuse, *v. t.* वि-सं-भ्रम् c., आकुलीकृ 8 U, मुह् c. *See* **Confound;** ' to be c. ed ' मुह् 4 P, आकुलीभू. **-ed,** *a.* मोहित, संभ्रांत, आकुल. 2 अस्पष्ट, अव्यक्त, क्रमहीन. **-edly,** *adv.* संकुलं, अक्रमेण, ससंभ्रमं. संकीर्णतया, अस्तव्यस्तं. 2 अस्पष्टं, संदिग्धतया. **-Confusion,** *s.* संभ्रमः, वैक्लव्यं, व्याकुलत्व, व्यग्रता, विप्लवः, मोहः. 2 वैलक्ष्यं, व्रीडा, लज्जा. 3 संकरः, संक्षोभः, व्यतिकरः, संकुलं. 4 अक्रमः, अस्पष्टता, क्रमभंगः, अस्तव्यस्तता. 5 विनाशः, निग्रहः, लोपः.

Confute, *v. t.* खंड् 10, प्रत्याक्षिप् 6 P, निरस् 4 U, प्रत्याख्या 2 P, निरा-अपा-कृ 8 U; निरुत्तरीकृ (of persons). **-ation,** *s.* खंडनं, निराकरणं, निरसनं, प्रत्याख्यानं.

Conge, *s.* प्रणामः, नमस्कारः. 2 आमंत्रणं, अनुज्ञाग्रहणं, आपृच्छनं.

Congeal, *v. t.* घनीकृ 8 U, संहन् 2 P, श्यै c., पिंडीकृ; संचि 5 U. *-v. i.* घनीभू 1 P, श्यै 1 A, पिंडीभू, संहन् pass., शीतीभू. **-Congelation,** *s.* शीतीभावः, संहति *f.*, घनीभावः, घनीकरणं.

Congener, *s.* सजाति *m.*, सजातीयः.

Congenial, *a.* एकजातीय, सजाति. 2 समानशील, एकस्वभाव, सधर्मन्. 3 सुखावह, हितकर (री *f.*), अनुरूप, अनुगुण, अनुकूल, सदृश (शी *f.*); ' c. to health ' आरोग्यावह, स्वास्थ्यकर. **-ity,** *s.* समानशीलता, सधर्मता, सजातित्वं. 2 आनुरूप्यं, आनुगुण्यं.

Congenital, *a.* सहज, सहजात.

Congenite, *a.* सहज, एककालोत्पन्न.

Conger, *s.* जलव्यालः.

Congeries, *s.* राशिः, संचयः, ओघः, पुंजः, स्तोमः.

Congest, *v. t.* राशीकृ 8 U, संचि 5 U, पिंडीकृ, घनीकृ. **-ion,** *s.* (of blood) रक्तावष्टंभः, असृक्संचयः, रक्तसंचयः. 2 अतिबाहुल्यं-उपचयः.

Conglobate, *a.* एकपिंडीभूत. *-v. t.* गोलीकृ 8 U, एकपिंडीकृ.

Conglomerate, *v. t.* राशीकृ 8 U, संचि 5 U, संभृ 3 U, एकपिंडीकृ, समाक्षिप् 6 P. **-ion,** *s.* समुपचयनं, एकीकरणं. 2 एकराशिः, एकपिंडः.

Conglutinate, *v. t.* संयुज् 10, संश्लिष् c., संधा 3 U; संरुह् c. (रोपयति) (of wounds). *-v. i.* pass. of roots above. **-ion,** *s.* संयोगः, संधिः, संधानं. 2 संरोपणं.

Congratulate, *v. t.* अभिनंद् 1 P or c., (तापसीभिरभिनंद्यमाना S. 4); gen. ex. by दिष्ट्या with वृध् 1 A or c., (चित्ररथहंसौ दिष्ट्या वर्धयितुं Ka. 365) ; दिष्ट्या सुतमुखदर्शनेन आयुष्मान्वर्धते (S. 7) ' you are to be c. ed upon seeing your son's face ', or ' I c. you upon seeing ' &c. **-ion,** *s.* धन्यवादः, अभिनंदनं, दिष्ट्या वर्धनं **-ory,** *a.* अभिनंदक, धन्यवादसूचक.

Congregate, *v. t.* समाचि 5 U, समाह् 1 P; *See* **Collect.** *-v. i.* संमिल् 6 P, सं-इ 2 P; *See* **Assemble. -ion,** *s.* सभा, परिषद् *f.*, संसद् *f.*, समाजः. 2 समवायः, निवहः, गणः, समाहारः, समुदायः. **-ional,** *a.* सामाजिक (की *f.*), सभ्य

Congress, *s.* सभा, परिषद् *f.*, संसद् *f.*, मेलकः, समाजः, सदस् *f. n.* 2 संघट्टः, समाघातः

Congruous, *a.* योग्य, उचित, संगत, अविरुद्ध, अनुगुण, अनुरूप, सदृश (शी *f.*), संबद्ध. **-ly**, *adv.* युक्तं, अनुरूपं, संगतं. **-Congruity, Congruence**, *s.* संगतता, अनुरूपता, युक्तता, सादृश्यं; oft. ex. by क-क; 'what c. is there between this youthful age and this restraint of passions' क्वेदं वयः क्वेयमिंद्रियाणामुपशांतिः (K[illegible] 13[illegible])

Conjecture, *v. t.* तर्क् 10, अनुमा 3 A, 2 P, ऊह् 1 A, उत्प्रेक्ष् 1 A. (किमुत्प्रेक्षसे कुतस्त्योयमिति U. 4). -*s.* तर्कः, वितर्कः, ऊहः, ऊहनं, अनुमानं; 'your c. is clear (you have rightly c.-ed)' समस्तः-उपपन्नः-ते तर्कः. **-al**, *a.* आनुमानिक (की *f.*). **-ally**, *adv.* अनुमानेन, सवितर्कं, अनुमानपूर्वकं.

Conjoin, *v. t.* संयुज् 7 U, 10, संश्लिष् c., संधा 3 U; 'c.-ed in bonds of friendship' मित्रभावेन वर्तमानाः, परस्परानुरक्ताः. -*v. i.* संयुज्-संश्लिष्-संधा- pass. **-ed, Conjoint**, *a.* संहत, संयुक्त, संश्लिष्ट, संबद्ध. **-ly**, *adv.* समं, सहितं, संहतं, *&c.*, संभूय.

Conjugal, *a.* वैवाहिक (की *f.*); oft. ex. by दंपती; 'c. love' दंपत्योः प्रेम; 'c. fidelity' अव्यभिचारः, सतीत्वं, पातिव्रत्यं.

Conjugate, *v. t.* रूपाणि आख्या 2 P. -*a.* संयुक्त. **-ion**, *s.* गणः; '1st c.' भ्वादिगणः. 2 संयोगः.

Conjunct, *a.* संयुक्त, संश्लिष्ट; 'a c. consonant' संयोगः, योगः. **-ion**, *s.* संयोगः, योगः, संश्लेषः, समवायः, समागमः, संगमः, संगः. 2 समुच्चयः; 'c. of planets' संगमः; 'lunar c.' अमावास्या, अमा. **-ive**, *a.* संयुक्त, संश्लिष्ट, यौगिक (की *f.*). **-ure**, *s.* योगः, संयोगः, संधिः. 2 अवसरः, समयः, प्रस्तावः.

Conjure, *v. t.* कृष् c., मंत्रैर्वशं नी 1 P, मायां कृ 8 U, अभिचर् 1 P. 2 सशपथं आदिश् 6 P, शप् c.; 'I c. thee by my life (soul)' शापितोऽसि मम जीवितेन (Mal. 8); अभ्यर्थ् 10 A, सशपथं संचुद् c. 3 (in mind) अनु-सं-स्मृ 1 P, चिंत् 10. -*v. i.* सशपथं [illegible]-कूटं-कृ 8 U, संशप् 1 U. **-ation**, *s.* माया, इंद्रजालं, कुहकः, मंत्रः. 2 शापनं. 3 सशपथः संकल्पः, संशपनं. **-er**, *s.* इंद्र-ऐंद्र-जालिकः, मायिन् *m.*, आहितुंडिकः, कुहककृत् *m.*, कुहकाजीवः.

Connate, *a.* सहज, एककालोत्पन्न, सहजात.

Connatural, *a.* सहज, एकस्वभाव.

Connect, *v. t.* सं-अनु-बंध् 9 P, संयुज् 7 U, 10, संश्लिष् c., संधा 3 U, व्यतिषंज् 1 P, संनह् 4 P, संयु 2 P. **-ed**, *a.* संयुक्त, संबद्ध, अन्वित, सान्वय. 2 अविच्छेद, अविरत, अविच्छिन्न; 'a c. narrative' कथाप्रबंधः. **-ion**, *s.* संयोगः, अनुषंगः, संसर्गः, संगः; 'in c. with' अनुबध्य, उद्दिश्य, अधिकृत्य. 2 संबंधः, संपर्कः, अन्वयः, संदर्भः, समन्वयः. 3 बंधुः, बांधवः, ज्ञातिः; 'to have c. with' संगम् 1 A, अभिगम् 1 P.

Connive, *v. i.* (at) कामतः उपेक्ष् 1 A, ज्ञानं निह्नु 2 A. 2 क्षम् 1 A, सह् 1 A. 3 अक्षि संकुच् 1 P. **-ance**, *s.* उपेक्षा, ज्ञानापह्नवः, कामतः उपेक्षा. 2 क्षमा. 3 अक्षिसंकोचनं.

Connoisseur, *s.* गुणज्ञः, परीक्षकः, अभिज्ञः.

Connubial, *a.* वैवाहिक (की *f.*); दंपती in comp.; 'c. love' दंपतीस्नेहः.

Conquer, *v. t.* जि 1 P, वि-परा-जि 1 A, अभि-परा-भू 1 P. 2 निग्रह् 9 P, नि-सं-यम् 1 P, दम् c. (दमयति), वशीकृ 8 U, स्वायत्तीकृ; 'one who has c.-ed his passions' जितेंद्रियः, संयतेंद्रियः, वशी, दांतः, संयमी. **-able**, *a.* जेय, अभिभवनीय. **-or**, *s.* जेतृ *m.*, विजेतृ, जयिन् *m.*, जित् in comp.; विश्वजित् 'c. of the world'. **-Conquest**, *s.* जयः, विजयः, वशीकरणं, अभिभवः, जयनं, स्वायत्तीकरणं. 2 जितप्रदेशः.

Consanguineous, *a.* एकशरीर, एकपिंड, सपिंड, सगोत्र. **-Consanguinity**, *s.* सगोत्रत्वं, सपिंडता; एकशरीरान्वयः, संबंधित्वं.

Conscience, *s.* सदसद्विचारशक्ति *f.*, संज्ञानं; oft. ex. by मनस् *n.*, अंतःकरणं; 'biting of c.' पश्चात्तापः, मनस्तापः. **-Conscientious**, *a.* निर्व्याज, अमाय, शुद्धमति, न्यायपरायण, ऋजुप्रकृति. 2 पुण्यात्मन्, पुण्यशील, न्यायवर्तिन्. **-ly**, *adv.* शुद्धमनसा, निर्व्याजं, शुद्धभावेन. **-ness**, *s.* मतिशुद्धि *f.*, शुचिता, पुण्यशीलत्वं.

Conscionable, *a.* न्याय्य, योग्य, यथार्थ. **-Conscionably**, *adv.* यथार्थं, धर्मतः, न्यायेन.

Conscious, *a.* Ex. by ज्ञ, विद् or अभिज्ञ in comp. or by verbs for 'know'; e. g. 'not c. of pain' वेदनानभिज्ञ; 'I am perfectly c. of my defects' स्वदोषान् दृढं खलु जाने. 2 सचेतन, सतर्क, ज्ञानिन्, प्रतिबुद्धवत्; 'to be c. of' ज्ञा 9 P; विभू c. (नात्मानमपि विभावयति S. 4); चित् 10 A; See **Know**. **-ly**, *adv.* ज्ञानात्, बुद्धिपूर्वं, ज्ञानतः, कामतः. **-ness**, *s.* ज्ञानं, उपलब्धि *f.*, चेतना, चैतन्यं, संज्ञा, वेदनं, अनुभवः, बोधः, प्रतिबोधः.

Conscript, *s.* नवयोद्धृ *m.* -*a.* लिखितनामन्.

Consecrate, *v. t.* (an idol) प्रतिष्ठा c. (प्रतिष्ठापयति); पवित्रीकृ 8 U, संस्कृ, अभि-अनु-मंत्र् 10 A. (वामदेवानुमंत्रितोऽश्वः U. 2). 2 अभिषिच् 6 P, संरक्ष् 1 P. 3 उप-प्र-वि-नि-युज् 7 A, 10, निक्षिप् 6 P, वि-उत्-सृज् 6 P, उपकल्प् c. -*a.*, **-ed**, संस्कृत, प्रतिष्ठापित, विनियोजित, उपकल्पित. **-er**, *s.* संस्कर्तृ *m.*, प्रतिष्ठापकः. **-ion**, *s.* संस्कारः, प्रतिष्ठापनं. 2 उत्सर्गः, विनियोगः, उपयोगः.

Consecution, *s.* क्रमः, अनुक्रमः, प्रबंधः, अन्वयः, परंपरा, श्रेणी, माला. **-Consecutive,** *a.* क्रमागत, अनुपूर्व; अविरत, निरंतर, सप्रबंध, संतत. **-ly,** *adv.* क्रमशः, यथाक्रमं, यथापूर्वं; अविरतं, अविच्छेदं. **-ness,** *s.* आनुपूर्व्यं, अविच्छेदः, प्रबंधः, संततता.

Consensus, *s.* बहुजनसंमति *f.*

Consent, *v. i.* सं-अनु-मन् 4 A, अनुमुद् 1 A, अनुज्ञा 9 U; ग्रह् 9 P, स्वीकृ 8 U; *See* **Agree.** *-s.* संमति *f.*, -तं, अनुज्ञा, अनुमोदनं. 2 मतैक्यं, एकचित्तता, ऐक्यं. 3 इच्छा, कामः; 'against one's c.' अनिच्छया, संमतिव्यतिरेकेण, बलात्, बलेन; 'c. in writing' संमतिपत्रं; 'take the c. of' अनुमन् *c.* (भूयोपि सर्वाञ्जनमनुमानयिष्यामि S. 3). **-ient,** *a.* एकमत, एकचित्त, संमत. **-ingly,** *adv.* संमत्या, कामतः, संमतिपूर्वं.

Consentaneous, *a. See* **Fit.**

Consequence, *s.* फलं, परिणामः, उदर्कः, उत्तरं, उत्तरफलं. 2 गौरवं, महिमन् *m.*, गुरुता, प्रतिष्ठा, प्रभावः; 'of no c.' निरर्थक, यत्किंचन. 3 सिद्धि *f.*, कार्यं, प्रयोजनं, निमित्तं. 4 अनुमानं, ऊहनं, अभ्यूहः; 'in c. of this' अतः, अस्मात्कारणात्, अस्माद्धेतोः, अनेन हेतुना; 'as a c. of thy efforts' तव यत्नसामर्थ्यात्; 'immediate c.' सांदृष्टिकं; 'necessary c.' कार्यवशः; 'visible c.' दृष्टार्थः. **-Consequent,** *a.* आनुषंगिक (की *f.*), अनुवर्तिन्; oft. ex. by फलं; 'c. upon his coming' तदागमनफलं. *-s.* अनुषंगः, फलं, परिणामः. **-ial,** *a.* आनुषंगिक, अनुवर्तिन्. 2 मानिन्, सगर्व; *See* **Arrogant.** **-ly,** *adv.* इति हेतोः, अतः, तन्निमित्तेन, तदनुसारेण, तदर्थं, इति, अनेन हेतुना, अस्मात्कारणात्.

Conserve, *v. t.* संरक्ष् 1 P, पा *c.* (पालयति), संधृ 10, गुप् 1 P. 2 संधा 3 U, उपस्कृ 8 U. *-s.* मिष्टं, मोदकः, संधितं, उपस्करः, व्यंजनं. **-ation,** *s.* रक्षा, संरक्षणं, पालनं, गुप्ति *f.*, क्षेमः. **-ative,** *a.* संरक्षक, पालक. 2 नवविद्वेषिन्, स्थितिपालक. **-ator,** *s.* रक्षकः, पालकः. **-atory,** *s.* रक्षास्थानं, आधारः, रक्षणस्थानं-शाला.

Consider, *v. t.* विचर् *c.*, विमृश् 6 P, आ-समा-पर्या-लोच् 10, वि-सं-चिंत् 10, समीक्ष् 1 A. (न धर्मवृद्धेषु वयः समीक्ष्यते K. v. 16); ध्यै 1 P, संदृश् 1 A, अवधृ 10, अवेक्ष्. 2 मन् 4 A, संभू *c.*, तर्क् 10, समर्थ् 10, विगण् 10, आकल् 10, (स्पर्शमपि पावनमाकलयंति Ka. 108). 3 परीक्ष्, निरूप् 10, अवेक्ष्, अनुसंधा 3 U, वि-विच् 3, 7 U. 4 पूज् 10, अर्च् 10, मन् *c.*, सत्पुरस्कृ; सं-परि-तुष् *c.* **-able,** *a.* अस्तोक, गुरु, अनल्प, प्रचुर, भूरि, महत्. 2 मान्य, आर्य, पूज्य. **-ably,** *adv.* अतीव, भूरि, अति-सु-*pr.*, भृशं, अनल्पं, अत्यंतं. **-ate,** *a.* समीक्ष्य-विमृश्य-कारिन्. 2 कृतावधान; आदृत, दत्तादर, अप्रमत्त, अवहित. **-ately,** *adv.* समीक्ष्य, विमृश्य, अवेक्षया, अप्रमत्तं, अवधानतः, सावधानं. **-ation,** *s.* विचारः, विचारणा, आलोचना, विमर्शः, समीक्षा, चिंता. 2 विवेचनं, निरूपणं, चर्चा, परीक्षणं. 3 आदरः, अपेक्षा, अवेक्षा. 4 कारणं, निमित्तं, हेतुः. 5 गौरवं, गुरुता, प्रतिष्ठा. 6 पूजा, संभावना, आदरः. 7 प्रतिफलं, पारितोषिकं; 'in c. of' अपेक्षया in comp., समीक्ष्य, आलोच्य, विचार्य, प्रथममिति प्रेक्ष्य भगवतैकोपराधो मर्षयितव्यः (S. 4) 'in c. of its being the first' &c.

Consign, *v. t.* निक्षिप् 6 P, न्यस् 4 U, दा 3 U, 1 P, ऋ *c.* (अर्पयति), प्रतिपद् *c.*; 'c. to the flames' अग्निसात्कृ 8 U. 2 उप-प्र-विनियुज् 7 A, 10. **-ment,** *s.* अर्पणं, न्यसनं, प्रतिपादनं.

Consist, *v. i.* (of, in) Ex. by रूप, आत्मक, मय (यी *f.*) in comp.; 'Ojas c. s in abundance of compounds' समासभूयस्त्वरूपं-स्त्वं नाम ओजः; 'body's ornament c. s in true knowledge' सत्यज्ञानात्मकं शरीरभूषणं; *See* **Compose.** 2 संवृत् 1 A, संस्था-संभू 1 P. **-ence,** *s.* घनता, सांद्रता, श्यानता. 2 स्थिरता, दृढता. 3 अविरोधः, आनुरूप्यं. **-ency,** *s.* संगतता, संवादः, अविरोधः, आनुरूप्यं. 2 स्थिरता, अचापल्यं. **-ent,** *a.* अविरुद्ध, सदृश (शी *f.*), योग्य, अनुरूप, संवादिन्; 'his conduct is c. with his words' तस्याचरणं (कर्म) वचसा न विवदते, वचसा न विरुद्धं, वचसा न विसंवदति; 'in-c.' विसंवादिन्, विरुद्ध; (परार्थमुद्यमभृतः) स्वार्थाविरोधेन (Bh. 74) 'c.-ly with their own interests'. 2 स्थिर, अचपल, अलोल. 3 दृढ, घन, सांद्र, श्यान. **-ently,** *adv.* अविरुद्धं, अविरोधेन, अनुसारतः. **-ing,** *a.* Ex. by मय (यी *f.*), आत्मक (आत्मिका *f.*) in comp.; 'c. for the most part' ex. by भूयिष्ठ affixed; 'assembly c. of learned men' अभिरूपभूयिष्ठा परिषद् (S. 1).

Consistory, *s.* पुरोहितसभा.

Consociate, *See* **Associate.**

Console, *v. t.* आ-सम-आ-श्वस् *c.*, सांत्व् 10, विनुद् *c.*, अभ्युपपद् 4 A. (रतिमभ्युपपत्तुमातुरां K. iv. 25). 2 शोकमपहृ 1 P, सुस्थ-स्वकृतिस्थ-*a.* कृ 8 U. **-ation,** *s.* आश्वासः-सनं, सांत्वनं, विनोदनं, समाश्वासनं. **-atory,** *a.* सांत्वनशील, आश्वासिन्, शोकापहारक, शांतिद, सुखावह. **-er,** *s.* आश्वासकः, विनोदकः.

Consolidate, *v. t.* संहन् 2 P, एकीकृ 8 U, घनीकृ, संस्था *c.* (स्थापयति). *-v. i.* घनीभू, स्थिरीभू, संहन् pass. **-ion,** *s.* घनीकरणं-

भवनं, संहति *f.*, संस्थापनं, समाहरणं, एकीकरणं.

Consonant, *s.* व्यंजनं ; 'conjunct c.' संयोगः, योगः. **-a.** अविरुद्ध, अनुसारिन्, अनुरूप, योग्य, अनुगुण. **-ly,** *adv.* अनुसारेण, अनुरूपं. **-Consonance,** *s.* अविरोधः, अनुसारः, अनुरोधः, आनुरूप्यं.

Consonous, *a.* एकताल, एकस्वर.

Consort, *s.* Husband or wife, q. v. 2 सहवासिन् *m.*, संगिन् *m.* **-v.** *i.* सह वस् or चर् 1 *P*; संगम् 1 A, संयुज् pass. ; 'well c. ed' सुसंगत. **-ion,** *s.* साहित्यं, साहचर्यं, संसर्गः.

Conspectus, *s.* सारपत्रं, संक्षिप्तलेखः.

Conspicuous, *a.* व्यक्त, सुप्रकाश, सुस्पष्ट, पुरःस्फुरत् (ती-न्ती *f.*), प्रत्यक्ष. 2 उत्कृष्ट, निरतिशय, प्रमुख, विशिष्ट. **-ly,** *adv.* स्पष्टं, व्यक्तं; विशिष्टतया. **-ness,** *s.* व्यक्तता, स्पष्टता, विशिष्टता, उत्कृष्टता.

Conspire, *v. i.* उपजप् 1 P, कूटं रच् 10, कुसाहित्यं कृ 8 U, कूटार्थं संशप् 1 U. 2 संमिल् 6 P, अनुकूल *a.* भू; "all things c.-ed to make him happy' सर्वं तस्य सुखायाकल्पत-अभवत्. **-acy,** *s.* उपजापः, कपटप्रबंधः, कुसाहित्यं, कुमंत्रणा; 'c. against the king' राजद्रोहः, द्रोहः. **-ator,** *s.* उपजापकः, कुसंसर्गिन् *m.*: संशप्तकः, शपथबद्धः. 2 राजद्रोहिन् *m.* 3 विश्वासघातकः.

Constable, *s.* दंड-यष्टि-धरः; राजपुरुषः.

Constant, *a.* स्थिर, दृढ, अचल, निश्चल. 2 शाश्वत (ती *f.*), सतत, प्रसक्त, अविरत, अनवरत, नित्य, सनातन (नी *f.*), निरंतर ; 'c. wife' सती, पतिव्रता. **-ly,** *adv.* सततं, अनवरतं, अविरतं, अभीक्ष्णं, नित्यं, अनिशं, अजस्रं, सर्वदा, सर्वकालं. **-Constancy,** *s.* स्थैर्यं, स्थिरता, निश्चलता, दृढता. 2 अभिनिवेशः, निर्बंधः. 3 सातत्यं, अविरामः, नैरंतर्यं. 4 दृढा भक्तिः, दृढसौहृदं.

Constellation, *s.* राशिः, राशिनक्षत्रं ; तारासमूहः, भगणः.

Consternation, *s.* संत्रासः, भीति *f.*, व्याकुलत्वं, साध्वसं, उद्वेगः, संभ्रमः.

Constipate, *v. t.* अवरुध् 7 U, अवष्टंभ् 9 P, बंध् 9 P, पिनह् 4 P 2 निबिडीकृ 8 U. **-ion,** *s.* मलावरोधः, मलावष्टंभः, विड्ग्रहः, गुदग्रहः, बद्धकोष्ठः.

Constitute, *v. t.* रच् 10, निर्मा 3 A, विधा 3 U; gen. ex. by आत्मक, रूप, मय (यी *f.*) in comp., or by भू 1 P, अस् 2 P; 'we c. thy army' तव सैन्यं वयं स्मः ; 'what c. s greatness' महिमा केन जायते; *See* Compose. 2 संस्था c. (स्थापयति), प्रतिष्ठा c.: नियुज् 7 A. 10, समादिश् 6 P. **-ion,** *s.* रचना, घटना, निर्माणं. 2 अवस्था, दशा, रूपं, वृत्ति *f.*; भावः. 3 व्यवस्था; विधियंत्रणं, नियमः. 4 राजनीति *f.* राज्यव्यवस्था. 5 प्रकृति *f.*, स्वभावः, शरीरावस्था; जन्मप्रकृति-स्वभावः ; 'of a sickly c.' जन्मरोगिन्, अशक्त, प्रकृतिदुर्बल. **-ional,** *a.* विध्यनुसारिन्, व्यवस्थानुरूप. 2 प्रकृति in comp. **-ionally,** *adv.* विध्यनुसारेण, व्यवस्थानुपूर्वं. **-Constituent,** *a.* घटक, रचक; 'c. parts' घटकावयवाः, घटकाः, अंगानि. 2 वास्तव (वी *f.*), सारभूत; 'c. members of a state' राज्यांगानि. **-s.** Ex. by *a.* 2 नियोजकः.

Constrain, *v. t.* बलात्कृ c., प्रवृत् c., प्रेर् c.; gen. ex. by causal of verbs ; *See* Compel. 2 नि-अव-रुध् 7 U, नियंत्र् 10, नि-सं-यम् 1 P ; 'c. ed silence' बलाद्धृतं मौनं ; 'c. ed to be silent' नियंत्रितवाक्, यंत्रितकथ. **-Constraint,** *s.* बलं, बलात्कारः ; 'by c.' बलात्, बलेन, अनिच्छत् *a.*, प्रसह्य. 2 अवश्यकता. 3 यंत्रणा, निरोधः, अवरोधः ; 'c. of modesty' ह्रीयंत्रणा.

Constrict, *v. t.* संकुच् 1 P, आकुंच् c., संहृ 1 P. **-ion,** *s.* संकोचः. आकुंचनं, संहरणं.

Constringe, *v. t.* *See* Constrict.

Construct, *v. t.* निर्मा 3 A, 2 P, or c. (मापयति), रच् 10, विधा 3 U, घट् c. (घटयति), प्रक्लृप् c. कृ 8 U. **-ion,** *s.* रचना, निर्माणं, विधानं, &c. 2 अन्वयः, संबंधः, पदयोजना-नं. 3 अर्थः, आशयः ; 'do not put a bad c. upon his words' तस्य वचसि दुराशयं मा कल्पय-आरोपय. **-ive,** *a.* निर्मातृ, प्रकल्पक, निर्माण or विधान in comp.; निर्माणचातुर्यं 'c. skill' &c.

Construe, *v. t.* अन्वयं कथ् 10, अर्थं व्याख्या 2 P, युज् 10; तत्परतयैव वेदांतवाक्यानि योजयंति (S. B. 91) 'c. as referring to it' ; 'to be c. ed' संबंध् pass., (इदं पदमेवं न संबध्यते).

Constupration, *s.* कन्यादूषणं, धर्षणं, बलात्काराभिगमः.

Consubstantial, *a.* एकशरीर. एकमूर्ति.

Consult, *v.* संमंत्र् 10 A, संवद् 1 P or c., संभाष् 1 A 2 विमृश् 6 P, चिंत् 10, विचार् c.; 'you must c. public good also' जनहितमपि तावत् त्वया मनसि कार्यमेव-अवेक्षणीयं ; 'do not c. your private good' स्वहितपरायणो मा भूः; 'let astrologers be c. ed' सांवत्सरिकैः संवाद्यताम्; 'you have given this order, having c. ed (with) my very heart' मम हृदयेन सह संमंत्र्यादिष्टवानसि (Mu. 1); 'c. with oneself' मनसा विचार् c., आत्मगतं चिंत्. 3 निरूप् 10, समीक्ष् 1 A, आ-पर्या-लोच् 10; 'in c.-

ing a horoscope' जन्मपत्रिकां विमृशन्, पत्रिकावलोकनेन शुभाशुभं पर्यालोचयन्. **-ation,** *s.* मंत्रणा-णं, विचारणं, विमर्शः, विचारः; आलोचनं, संवादः; 'private c.' गुह्यमंत्रणं. **-ative,** *a.* संमंत्र्य; मंत्रणयोग्य.

Consume, *v. t.* क्षै c. (क्षपयति), विनश् c.: 'c. by fire' निर्दह् 1 P. **2** उपयुज् 7 A; 10, उपयुज्य-उपभुज्य-निरवशेषीकृ 8 U. **-***v. i.* क्षि pass., नश् 4 P, अवसद् 1 P, परिहा pass. **-er,** *s.* नाशकः; विनियोजकः. **-Consumption,** *s.* क्षयः, शोषः, यक्ष्मन् *m.* **2** नाशः, क्षयः, अवसादः. **3** उपयोगः, उपभोगः, व्ययः, विनियोगः. **-Consumptive,** *a.* क्षयिन्-क्षयरोगिन्.

Consummate, *v. t.* समाप् c.; *See* **Complete.** **-***a.* संपूर्ण, निखिल, अन्यून. **2** परम, उत्कृष्ट, अग्रणीः; 'a c. rogue' शठाग्रणीः. **-ion,** *s.* समापनं, निष्पत्ति *f.*, सिद्धि *f.* **2** उत्कर्षः, परमा गतिः.

Contact, *s.* सं-,स्पर्शः, संपर्कः, संसर्गः, संयोगः, आसंगः, व्यतिकरः, परामर्शः; 'in close bodily c.' अंगांगि *ind.*

Contagion, *s.* स्पर्शः, स्पर्शसंचारः. **-Contagious,** *a.* स्पर्शजन्य, स्पर्शसंचारिन्, संस्पर्शज, संपर्कीय; 'a c. disease' मारि.

Contain, *v. t.* धृ 1 P, 10, आदा 3 A, परिग्रह् 9 P, धा 3 U, भृ 3 U; 'c. ing' ex. by धर-धारिन्-भृत् in comp.; 'c. ing water' तोयभृत्; oft. ex. by गर्भ, पूर्ण, आत्मक in comp.; अंबुगर्भः मेघः, शुकगर्भकोटरं; अमृतपूर्णं पात्रं, &c. **2** निवार् 10, संयम् 1 P, निग्रह् 9 P; 'he could not c. his great joy' गुरुः प्रहर्षः प्रबभूव नात्मनि (R. III. 17). **-ed,** *a.* धृत, अंतर्गत, अंतर्भूत, अंतर्गणित; वर्तिन्, स्थ in comp. **-er,** *s.* आधारः, धारिन्-भृत् in comp.; 'the relation between c. and contained' आधाराधेयभावः.

Contaminate, *v. t.* दुष् c. (दूषयति), लिप् 6 P, कलंकयति-मलिनयति (D.). **-ed,** *a.* भ्रष्ट, दूषित, कलंकित, अपवित्र. **-ion,** *s.* दूषणं, कलंकः; अशौचं, भ्रष्टता, भ्रंशकारणं.

Contemn, *v. t.* अवमन् 4 A, अवज्ञा 9 U, अवधीर् 10 A, तिरस्कृ 8 U, अवगण् 10, न आदृ 6 A, उपेक्ष् 1 A, लघूकृ, तृणाय मन्, परिभू 1 P. **-er,** *s.* अवमंतृ *m.*, तिरस्कर्तृ *m.* **-Contempt,** *s.* अवज्ञा, अवमानः-मानना, अवधीरणा, तिरस्कारः, अवगणना, अनादरः, परिभवः, उपेक्षा, अवहेलनं-ना. **-ible,** *a.* अवमंतव्य, तिरस्कार्य. **2** क्षुद्र, निकृष्ट, नीच; 'to make oneself c.' आत्मानं तिरस्कारास्पदं कृ, अवज्ञाभाजनं भू. **-uous,** *a.* अवमानिन्, उपेक्षक, परिभाविन्, परिभावुक (की *f.*); सावज्ञ, सावमान. **-uously,** *adv.* सावज्ञं, सावमानं, उपेक्षया, सतिरस्कारं.

Contemplate, *v.* चिंत् 10; ध्यै 1 P; मनसा विचर् c., विमृश् 6 P. **2** निरूप् 10, निर्वर्ण् 10, अवेक्ष् 1 A, संदृश् 1 A, आलोच् 10, आलोक् 1 A, 10. **3** संकल्प् c., भू c. **-ion,** *s.* ध्यानं, चिंता, भावना, आलोचनं, विचारणा, विमर्शः; 'to be or have in c.' अभिप्र-इ 2 P, उद्दिश् 6 P. **-ive,** *a.* ध्यानपर, चिंताशील, & sim. comp.; भावितात्मन्, चिंताविष्ट, समाधिस्थ. **-or,** *s.* ध्यातृ *m.*

Contemporary, *a.* or *s.* समकालीन, एककालीन, समानकालः.

Contend, *v. i.* संयत् 1 A, विग्रह् 9 P, कलहायते (D.), विरुध् 7 U, प्रतिकृ 8 U, विवद् 1 A, युध् 4 A, स्पर्ध् 1 A. **2** वाग्युद्धं कृ, प्रत्यवस्था 1 A, (अत्रापरे प्रत्यवतिष्ठंते S. B. 57). **3** यत्-चेष्ट् 1 A. **-er,** *s.* विपक्षः, प्रतियोद्धृ *m.*, विवादिन् *m.*, प्रतियोगिन् *m.*, प्रतिपक्षः. **-ing,** *a.* विरोधिन्; विवदमान, कलहशील. **-Contention,** *s.* विवादः, विग्रहः, कलहः, कलिः. विप्रतिपत्ति *f.*, वाग्युद्ध-विप्रलापः; 'point (bone) of c.' विवादविषयः-वस्तु *n.* **2** संघर्षः, स्पर्धा. **-Contentious,** *a.* कलहप्रिय, विवादिन्, विरोधिन्, कलह-विवादशील.

Content, *a.* सं-,परि-,तुष्ट, तृप्त, निःस्पृह, वितृष्ण, प्रीत, प्रशांत, हृष्ट; 'to be c.' तुष् 4 P, तृप् 4 P, संपरि-°; 'is c. with even little' स्वल्पकेनापि तुष्यति; 'poor and c. is rich and rich enough' संतोष एव पुरुषस्य परं निधानं. **-***v. t.* तुष् c., तृप् c., सं-परि-°, नंद् c., प्री 9 P: 'c. s the eyes' कृतार्थयति चक्षुः. **-***s.*, **-ment,** *s.* सं,-परि,-तोषः, तृप्ति *f.*, प्रीति *f.*, अस्पृहा, वितृष्णा, धृति *f.*, कामनिवृत्ति *f.*; 'water to the heart's c.' प्रकामजलं. **2** (c. s) घनफलं (गोलस्य); पूरकं, अंतर्वर्तं; 'c. s of a letter' लेखार्थः; 'if so, I shall know its c. s' तेन ह्यस्य गृहीतार्था भवामि (V. 2); 'table of c. s' सूचीपत्रं, अनुक्रमणिका. **-ed,** *a.* तुष्ट, तृप्त, प्रीत, &c.; 'keep c.' अनुरंज् c., प्री 9 P. **-edly,** *adv.* प्रीत्या, संतोषेण, तुष्ट्या.

Conterminous, *a.* सीमावासिन्, समीप-निकट-वर्तिन्, पर्यंतस्थ.

Conterraneous, *a.* एकदेशज, सदेशज.

Contest, *v. i.* युध् 4 A, विवद् 1 A. **-***v. t.* प्रतिकूलयति (D.), प्रति-वि-रुध् 7 U; *See* **Contend.** **-***s.* कलहः, कलिः, विवादः, वाग्युद्धं, विप्रलापः, विप्रतिपत्ति *f.*, 'subject of c.' वादबीजं, विवादास्पदं, वादविषयः. **-ed,** *a.* वादग्रस्त, वादविषयीभूत; 'un-c. possession' अपरवोज्झितो भोगः (V. M. 11).

Context, *s.* अन्वयः संदर्भः, संबंधः, प्रकरणं (S. B.); प्राज्ञस्यापि प्रकरणे पतति &c. **-***a*

संश्लिष्ट, संधित, संयुक्त. **-ure,** *s.* संस्थिति, *f.*, विन्यासः.

Contiguity, *s.* संनिकर्षः, सन्निधिः, सन्निधानं, समीपता, नैकट्यं. **-Contiguous,** *a.* सन्निकृष्ट, समीप, सन्निहित, संलग्न, आसन्न, समीपस्थ, समीप-निकट-वर्तिन्; 'c. ground' पर्यंतभूमि *f.*, परिसरः. **-ly,** *adv.* समीपं-पे, संनिकृष्टं, परिसरे.

Continent, *a.* जितेंद्रिय, संयत, संयमिन्, यतमैथुन, ऊर्ध्वरेतस्, निवृत्तकाम, वशिन्, दांत. 2 परिमित. *-s.* वर्षः-र्षं; 'c. of India' भारतवर्षः; महाद्वीपः-पं. **-al,** *a.* महाद्वीपीय, वर्षीय. **-Continence,** *s.* संयमः, इंद्रियनिग्रहः, दमः, जितेंद्रियत्वं, वशित्वं.

Contingency, *s.* दैवयोगः-घटनं, दैवं, यदृच्छा. 2 अतर्कितोपनतः वृत्तांतः; oft. ex. by words for 'doubtful' q. v. **-Contingent,** *a.* अनिश्चित, संदिग्ध, दैवायत्त, दैववश, आगंतुक-आपातिक (की *f.*); अतर्कितोपनत, असमर्थितोपनत. *-s.* भागः, अंशः. 2 सैन्यदलं. **-ly,** *adv.* दैवात्, दैववशात्, यदृच्छया, अतर्कितं.

Continue, *v. t.* प्रवृत् c., प्रसंज् c., प्रस्तु 2 U or c., निर्वह् c. 2 प्रतन् 8 U, दीर्घीकृ 8 U. *-v. i.* प्रवृत् 1 A; gen. ex. by आस् 2 A, स्था 1 P, with present part. or not 'cease' q. v.: 'he c. ed to quarrel' कलहं कुर्वन्नास्ते, कलहं कुर्वन्न व्यरमत. **-al, -ous,** *a.* प्रसक्त, निरंतर, अविरत, अविच्छिन्न, संतत, सतत, नित्य, सनातन, अश्रांत; 'a c. story' कथाप्रबंधः. **-ally, -ously,** *adv.* नित्यं, सर्वदा, सततं, अनवरतं, अविश्रांतं, &c. **-ance, -ation, -ity,** *s.* प्रबंधः, प्रसक्ति *f.*, अविरामः, अविच्छेदः, सातत्यं, संतानं, अनुबंधः; 'c. of sorrow' शोकानुबंधः; 'c. in life' स्थिति *f.*, अवस्थानं, जीवितं; 'continuation (of a story)' शेषः, उत्तरभागः-खंडः, परिशेषः; श्रेणि *f.*, अनुक्रमः. **-ator,** *s.* प्रवर्तकः, निर्वाहकः, उत्तरसाधकः.

Contort, *v. t.* आकुंच् c., वक्रीकृ 8 U, कुटिलीकृ; 'having the features c. ed' विकृताकारः. **-ion,** *s.* आकुंचनं, वक्रता, वैरूप्यं, विकृति *f.*

Contour, *s.* आकारः, रूपं. 2 परि(री)णाहः, परिधिः; 'covering the c. s of the breasts' स्तनयुगपरिणाहाच्छादिन् (S I).

Contraband, *a.* नि-प्रति-षिद्ध; धर्मविरुद्ध.

Contract, *v. t.* संकुच् 1 P, संकोचनी 1 P, आकुंच् c.; संहृ 1 P, समाकृष् 1 P, संक्षिप् 6 P, संपीड् 10 ह्रस्; 'the body being c. ed through fear' भयसंपिंडितांगत्वात् (Ka. 34); 'c. ing the eye' अक्षिसंकोचेन. 2 अधिगम् 1 P, उपगम्; 'I c. ed friendship with him' तेन सह मित्रत्वं उपगतः, सख्यमभजं; 'c. acquaintance' परिचयं कृ; 'c. debt' ऋणं कृ, ऋणग्रस्त *a.* भू; 'c. a disease' व्याधिना अभिभू pass.; 'c. marriage' विवाहं कृ, दारान्परिग्रह् 9 P. *-v. i.* आ-सं-कुच् pass., संकोचं, या-इ-गम्, संहृ-संपीड्-संक्षिप् pass. 2 समयं कृ 8 U, पणं-संविदं कृ, प्रतिपद् 4 A, संविद् 2 P. *-s.* समयः, संविद् *f.*, नियमः, पणः, अभ्युपगमः; 'written c.' नियमपत्रं; 'a sale c.' क्रयपत्रं; 'marriage c.' वाग्दानं, वाग्निश्चयः. **-ed,** *a.* आकुंचित, संक्षिप्त, संहृत, संपिंडित. 2 संकट, निरायत, संबाध. **-ion,** *s.* संकोचः-चनं, आकुंचनं, समाकर्षः, संपीडनं, संवृत्ति *f.* 2 संक्षेपः-पणं. **-or,** *s.* कृतसंविद् *m.*, नियमकृत् *m.*, पणकर्तृ *m.*

Contradict, *v. t.* विरुध् 7 U, प्रति-नि-षिध्, 1 P, प्रत्याख्या 2 P, पराहन् 2 P, प्रतीपायते (D.); 'c. oneself' विप्रवद् 1 U, विसंवद् 1 P. **-ion,** *s.* विरोधः, प्रतिषेधः, प्रत्याख्यानं, विपक्षता, प्रतिबंधः, प्रतिकूलता. 2 प्रतिवादः, वचनविरोधः. 3 विप्रलापः, विरोधोक्ति *f.* 4 असंगति *f.*, विसंवादः, विरुद्धता. **-ory,** *a.* विरुद्ध, विरोधिन्, विपरीत, विरुद्धार्थ, प्रतीप, विसंवादिन्; परस्परविरुद्ध-विरोधिन्. 2 परस्परपराहत, संकुल, क्लिष्ट.

Contradistinguish, *v. t.* विरुद्धगुणैः विशिष् 7 P, or c. **-Contradistinction,** *s.* विपरीतता, व्यतिरेकः, विपक्षता.

Contraposition, *s.* संमुखस्थिति *f.*; प्रतिष्ठापनं.

Contrary, *a.* (in direction) संमुखागत, प्रतीप; gen. ex. by प्रति pr.; 'c. wind' प्रतिवातः, प्रतीपपवनः. 2 प्रतिकूल, विरोधिन्, प्रति-वि-लोम, प्रतीप, विपरीत, विरुद्ध, विपक्ष, वैरिन्; oft. by इतर in comp.; 'the c. of true' सत्येतर. *-s.* विपर्ययः, विपरीतं, विपर्यासः, व्यतिक्रमः. 2 प्रतिपक्षः, 'c.-wise,' 'on the c.' प्रत्युत, पुनः, परंतु; 'to the c.' विपरीततया. *-adv.* **-ly,** *-adv.* विपरीतं, विरुद्धं, प्रतिकूलं; 'c. to usage' आचारविरुद्धं, &c. **-Contrariety,** *s.* वैपरीत्यं, विरोधः, विपर्ययः, प्रतिकूलता, विपक्षता, व्यत्ययः, व्यतिक्रमः.

Contrast, *v. t.* अंतरं-भेदं-दृश् c. or वर्ण् 10, परस्परविपर्ययेण उपमा 3 A. *-v. i.* विपर्यस् 4 P; विरुध् pass., विरुद्ध *a.* भू 1 P. *-s.* अंतरं, भेदः, विशेषः; oft. by क्व-क्व; क्व कंदमूलफलाशी शांतो मुनिजनः क्वायं रागप्रायः प्रपंचः (Ka. 151). 2 विरोधः, प्रतिपक्षता, व्यतिरेकः, व्यत्ययः, वैलक्षण्यं

Contravallation, *s.* परिखा, प्रतिकूपः.

Contravene, *v. t.* प्रति-वि-रुध् 7 U, व्याहन् 2 P, निषिध् 1 P; *See* **Oppose,** **-Contravention,** *s.* व्याघातः, निषेधः; वि-प्रति-रोधः, प्रतिबंधः.

Contretemps, *s.* उपप्लवः, व्यसनं, अंतरायः, प्रत्यूहः.

Contribute, *v. t.* स्वं स्वं अंशं दा 3 U. 2 (to) उपकृ 8 U, प्रवृत् *c.*, क्लृप् 1 A, (with dat.); *See* **Conduce**. **-ary**, *a.* एकराजाधीन. 2 प्रवर्धकः, पोषकः. **-ion**, *s.* अंशभाग-दानं. 2 अंशः, भागः, दत्तांशः, उद्धारः. **-or**, *s.* अंशदातृ *m.* 2 साहाय्यकारिन् *m.*, उपकर्तृ *m.*, प्रवर्धकः.

Contrite, *a.* अनुशोकार्त, अनुशयपीडित, जातानुताप. **-ion**, *s.* पश्चात्तापः, अनुशयः, अनुतापः. **-ly**, *adv.* सानुशयं.

Contrive, *v. t.* चिंत् 10, निश्चि 5 U, निर्णी 1 P, उह् *c.*, क्लृप् *c.*, युज् 7 U, 10, निरूप् 10, घट् *c.* (घटयति), संप्रधृ 10, विधा 3 U. **-***v. i.* उपायं चिंत्, उपायं युज्. **-ance**, *s.* उपायः, प्रयुक्ति *f.*, साधनं, कल्पना, योजना, अप-व्यप-देशः, उपायचिंतनं, क्लृप्ति *f.* **-er**, *s.* उपायज्ञः, उपायचिंतकः.

Control, *v. t.* यम् 1 P, सं-नि-°, दम् *c.* (दमयति), वशं नी 1 P, जि 1 P, आवृ 5 U, वशीकृ 8 U, नि-विनि-ग्रह् 9 P, (passions &c.); निरुध् 7 U. 2 शास् 2 P, ईश् 2 A, (gen.); कथंचिदीशा मनसां बभूवुः (K. III. 34); 'could hardly c. their mind'; नियंत्र् 10 ; 'un-c. ed speech' अनियंत्रिता वाणी; 'un-c. ed weeping' निरर्गलाः प्रलापाः; 'with passions c. ed' जितेंद्रियः, संयमी, वशी. **-***s.* संयमः, निग्रहः, निरोधः, नियंत्रणा, दमनं, 'self-c.' आत्मसंयमः, निग्रहः, इंद्रियजयः, वशित्वं. 2 अधिकारः, वशः, प्रभुत्वं; 'under the king's c.' राजाधीन, नृपायत्त; 'mental c.' अंतर्यमनं, मनोदंडः. **-ler**, *s.* शास्तृ *m.*, अध्यक्षः, अधिकारिन् *m.*, अधिष्ठातृ *m.*, ईशः, प्रभुः.

Controversy, *s.* वादः, विचारः, विवादः, वादानुवादः, विप्रतिपत्ति *f.*, वितर्कः, वादयुद्धं, हेतुवादः. **-al**, *a.* विवादसंबंधिन्, वितर्किन्, (*s.*) in comp. **-alist**, *s.* वादिन् *m.*, तर्किन् *m.*, तार्किकः.

Controvert, *v. i.* प्रत्याख्या 2 P, अधरीकृ 8 U, निरस् 4 U, निराकृ, खंड् 10. 2 विवद् 1 A, विचर् *c.* **-ed**, *a.* वादग्रस्त, विवादविषयीभूत. **-ist**, *s.* वादिन् *m.*, नैयायिकः, विवादकृत् *m.*, तार्किकः.

Contumacious, *a.* धृष्ट, दुर्विनीत; दृप्त, सगर्व. 2 प्रतीप, प्रतिकूल, दुःशील. **-ly**, *adv.* सदर्पं, धृष्टतया. **-Contumacy**, *s.* धृष्टता, दुर्विनीतता, प्रतीपता, दुःशीलता.

Contumely, *s.* अवज्ञा, निष्ठुर-परुष-वचनं, निष्ठुरता, निंदा, तिरस्कारः, अवमानना. **-ous**, *a.* परुष, निष्ठुर, निंदक, अवमानिन्. 2 सावज्ञ.

Contuse, *v. t.* मृद् 9 P, क्षुद् 7 U, पिष् 7 P, क्षण् 8 P, चूर्ण् 10. **-ion**, *s.* मर्दनं, निष्पेषः, क्षतं.

Conundrum, *s.* प्रहेलिका, प्रवह्लिका.

Convalescence, *s.* स्वास्थ्यं, निरामयः, रोगोपशमः, प्रकृतिलाभः. **-Convalescent**, *a.* निरामय, वीतरोग, प्रकृतिस्थ, नीरुज.

Convene, *v. t.* समाह्वे 1 P, आह्वानं एकत्र कृ 8 U, समानी 1 P; *See* **Assemble**. **-***v. i.* संमिल् 6 P, सं-इ 2 P, एकत्र भू.

Convenience, *s.* सुखं, सोपकारत्वं, सुस्थता. 2 योग्यता, पात्रता; उचितसाधनं. 3 अवसरः, अवकाशः; 'in c. ed by the shutting of the lotus' अंभोजनिनिमीलनदुःस्थितः (Rat. 2); 'when it suits your c.' यथावसरं, अवसरं प्राप्य, कार्यांतरांतरायमंतरेण. **-Convenient**, *a.* सुखकारक; उचित, अनुकूल, उपयुक्त; 'c. building' उचितसाधनयुक्तं भवनं; उपपन्न, यथाकाम, यथारुचि यथोचित. **-ly**, *adv.* युक्तं, यथासुखं, यथावकाशं, यथावसरं; 'when may I c. ly see you' अन्यकार्यविघातमंतरेण-कार्यांतराविरोधेन-भवान् कदा मया द्रष्टव्यः.

Convent, *s.* मठः, विहारः.

Conventicle, *s.* सभा, समाजः, मेलकः. 2 गूढसभा.

Convention, *s.* समयः, संविद् *f.*, नियमः, संकेतः. 2 सभा, संसद् *f.* 3 रूढि *f.*, लोकसंमति *f.*, आचारः. **-al**, *a.* लौकिक (की *f.*), लोकसंमत, निरूढ, रूढ, सांकेतिक (की *f.*); 'c. usage' जनरूढिः, लोकाचारः. **-alism**, *s.* रूढि *f.*, आचारविधि, *m.*

Converge, *v. i.* सं-नि-पत् 1 P, एकस्थानं-एककेंद्रं-प्रतिया 2 P, (with loc.), पंथानः सिद्धिहेतवस्त्वय्येव निपतंति (R. x. 26); 'c. to thee alone.' **-ence**, *s.* समवायः, संनिपातः. **-ent**, *a.* एककेंद्राभिमुख (खी *f.*), संनिपातिन्.

Converse, *v. i.* सं-आ-लप् 1 P, संभाष् 1 A, संवद् 1 P, संवच् 2 P. 2 संसर्गं कृ 8 U, संवस् 1 P, संगम् 1 A, संव्यवहृ 1 P. **-***s.* संलापः, संकथा, संभाषणं, संवादः. 2 संसर्गः, व्यवहारः, संगमः. 3 विपर्ययः, विपरीतं, व्यत्यासः, व्यतिक्रमः. **-ant**, *a.* निपुण, चतुर, कुशल, विचक्षण, अभिज्ञ; कोविद, ज्ञ, विद् in comp.; पटु, विशारद; 'c. with law' स्मृतिज्ञः; 'not c. with love matters' अनभ्यंतरे आवां मदनगतस्य वृत्तांतस्य, (S. 3). **-ance**, **-ancy**, *s.* नैपुण्यं, पाटवं, चातुर्यं, विदग्धता, &c. **-ation**, *s.* आ-सं-लापः; संभाषणं, संकथा, संवादः; कथायोगः, विश्रंभालापः. 2 आचारः, व्यवहारः, वृत्ति *f.* **-ly**, *adv.* विपर्ययेण, व्यतिक्रमेण, व्यत्ययेन, प्रतीपं.

Convert, *v. t.* विकृ 8 U, अन्यथा कृ, परिवृत् c.; oft. ex. by सात्; 'c. to ashes' भस्मसात्कृ; *See* **Reduce**. 2 स्वधर्म-पक्षं-मतं त्यज् c. 'to be c. ed' परधर्म-

पक्षं-मतं-ग्रह् 9 P, स्वधर्मं &c. त्यज् 1 P. 3 प्र-उप-विनि-युज् 7 A, 10. 4 पापाद् विरम् c. (रमयति) or निवृत् c., कुमार्गं त्यज् c. **-**v. i. अन्यथा भू 1 P, भावांतरं या 2 P or प्राप् 5 P. 2 स्वधर्म-पक्षं-मतं-त्यज् 1 P, परधर्मं &c. ग्रह् 9 P, or आश्रि 1 U or अवलंब् 1 A or स्वीकृ. 3 पापाद्विरम् 1 P or निवृत् 1 A **-**s. परधर्माश्रितः, परपक्ष-मत-अवलंबिन् m., स्वधर्म-पक्ष-मत-त्यागिन् m. **-Conversion**, s. विकारः; विक्रिया, विकृति, f., परिवर्तः, विपर्ययः, भावांतरप्रापणं; 'c. to ashes' भस्मसात्करणं, भस्मीभवनं. 2 परधर्माश्रयः, परधर्म-पक्ष-मत-अवलंबनं, स्वधर्म- &c. त्यागः. 3 पापान्निवृत्ति f., कुमार्गत्यागः.

Convex, a. न्युब्ज, कूर्मपृष्ठाकार, आभोगवत्. **-ity**, s. न्युब्जता, आभोगः.

Convey, v. t. वह्-नी-हृ- 1 P, गम् c. (गमयति), प्राप् c. संचर् c. 2 ऋ c. (अर्पयति), दा 3 U. 3 (sense) गम् c., प्रतिपद् c., श्रुत् c. **-ance**, s. यानं, प्रवहणं, वाहनं, रथः. 2 नयनं, प्रापणं, समर्पणं; 'deed of c.' समर्पणपत्रं, क्रयलेख्यं. **-er**, s. वाहकः, वाहिन् in comp.

Convict, v. t. अपराधे निर्णी 1 P, अपराधिन् a. स्था c. (स्थापयति), आधृष् c. **-**s., **-**a., **-ed**, a. निर्णीतापराधः, निश्चितदोषः, आधर्षितः, दृष्टदोषः. **-ion**, s. अपराधस्थापनं, अपराधनिर्णयः, दोषनिश्चयः, आधर्षणं.

Convince, v. t. प्रति-इ c., प्रतीतिं कृ 8 U, उरीकर्तुं आनी 1 P, अभिज्ञा c. (ज्ञापयति); 'he was c. ed of his mistake' स्वभ्रममुद्दिश्य तस्य प्रतीतिः समजनि or अयं भ्रम एवासीदिति तस्य निश्चयो जातः; ताः स्वचारित्र्यमुद्दिश्य प्रत्याययतु मैथिली (R. xv. 73) 'c. them of her purity.' 2 संदेहं निराकृ or निरस् 4 U or अपनुद् 6 P. **-ed**, a. जातनिश्चय-प्रत्यय, छिन्न-संशय; 'I am c. that' &c. इति मे निश्चयः, इत्यसंदेहपदं. **-ing**, a. निर्णायक, प्रत्ययजनक, संशयच्छेदिन्, निश्चायक. **-Conviction**, s. विश्वासः, प्रत्ययः, निश्चयः, निर्णयः, दृढप्रत्ययः, दृढं मतं.

Convivial, a उत्सवसंबंधिन्, औत्सविक (की f.); 'a c. party' तुल्यभोजनं, स(सं)पीति f.

Convoke, v. t. समाह्वे 1 P, समाहृ 1 P, आह्वानेन एकत्र कृ 8 U. **-Convocation**, s समाह्वानं, समाह्वानविधिः. 2 सभा, समाजः, संसद् f.

Convolve, v. t आ-समा-वृत् c.

Convoy, v. t. रक्षणार्थं अनुव्रज्, अनुगम् 1 P, अनु-परि सं-सह-चर् 1 P. **-**s. पथि रक्षकः, सहचरः, परि-अनु-चरः

Convulse, v. t. सं-वि-क्षुभ् c., कंप् c. 2 आकृष् 1 P, आकुंच् c., अप-तन् c., वि-आक्षिप् 6 P. **-ion**, s. सं-वि-क्षोभः, कंपः. 2 आक्षेपः, अपतानकः, आकर्षः. **-ive**, a. आकर्षक, आक्षेपकर (री f.), विक्षेपिन्; 'c. speech' गद्गदवाच् f., गद्गदः; 'in a c. fit' आक्षेपाभिभूत.

Cony, s. शशः, शशकः.

Coo, v. t. कूज् 1 P, कु 2 P, 1 A, वि , रु 2 P.

Cook, v. t. पच् 1 P, श्रा 2 P, or c. (श्रापयति), श्री 9 P; 'c. food' अन्नं संस्कृ 8 U, सिध् c (साधयति), सिद्ध a. कृ; 'c. ing pot' पाकपात्रं, स्थाली; 'c. ed food' ओदनः-नं, सिद्धौदनः, सिद्धभक्तं. **-**s. पाचकः, सूपकारः, बल्लवः, सूदः. **-ed**, a. पक्व, सिद्ध, शृत, श्राण. **-ery**, पाककलाविद्या; पाकसिद्धि-निष्पत्ति f. 2 पचनं, पाकः. **-room**, s. पाकशाला, महानसः-सं.

Cool, a. शीतल, शीत, शिशिर, शीतस्पर्श, आर्द्र (fig.) सुख, मृदु, सुखस्पर्श, कोमल; अनुष्ण' अतिग्म, (rays). 2 प्रशांत, अनुद्वेग, धीर, अव्यग्र, असंभ्रांत, अव्याकुल. 3 वीतराग; See Cold. **-**s. शीतं, शीतलता; 'in the c. of evening' प्रशांते-अनुष्णे संध्यासमये. **-**v. i. शीतलीकृ 8 U, आर्द्रयति (D.), निर्वा c. (वापयति), आर्द्रीकृ, तापं हृ 1 P; अन्यादृश एव तेषु निर्वापयति शरीरस्पर्शः (Mal. 6); शरीरनिर्वापणाय (S. 3). 2 (down) प्र-उप-शम् c. (शमयति), जिम् c. 3 शिथिलीकृ, शिथिलयति (D.). **-**v. i. शीतलीभू 1 P, शीतीभू, शीतलायते (D.); 2 शिथिलीभू, शिथिलायते (D.). 'she will not let her love for you c. down' न सैतोगतमनुरागं शिथिलयति (V. 2). 3 प्र-उप-शम् 4 P, विरम् 1 P **-ing**, a. तापहर, निर्वापक, शांतिद, शीतल, सुखद. **-ly**, adv. असंभ्रमं, शांतचेतसा, अव्यग्रं, शांतं, निरुद्वेगं. 2 प्रकोपनं विना, बुद्धिपुरःसरं. **-ness**, s. शीतलता, आर्द्रता; c. of affection' विरागः, विरक्ति f., अनुरागशिथिलता.

Coop, s. भाजनं, काष्ठभांडं. 2 वीतंसः, पंजरः-रं. **-**v. t. (up) (पंजरे) निरुध् 7 U, बंध् 9 P, संयम् 1 P, नियंत्र् 10.

Co-operate, v. i. संभूय कृ 8 U, साहाय्यं दा 3 U, अन्येन सार्धं प्रयत् 1 A or व्यवसो 4 P, or चेष्ट् 1 A **-ion**, s. सहकारिता, सहोद्योगः, साहाय्यं, संभूय व्यवसायः. **-ive**, a. सहकारिन्, सहोद्योगिन्. **-or**, s. सहकारिन् m., संभूयकारिन् m., सहोद्योगिन् m.

Co-ordinate, v. i. संघट् 1 P. **-**v. t. क्रमशः संनिधा 3 U, **-**a. सजातीय.

Coparcener, s. समांशिन् m., संसृष्टः-ष्टिन् m., अंशहरः, रिक्थाधिकारिन् m., दायाद

–Coparcenary, *s.* संसृष्टि *f.*, संसृष्टिता, समांशिता.

Copartner, *s.* समांशिन् *m.* अंशभाज् *m.*, संभूयकारिन् *m.* **–ship**, *s.* समांशिता; संभूय समुत्थानं.

Cope, *v. i.* (with) युध् 4 A, विग्रह् 9 P, विरुध् 7 U, अभिपत् 1 P (with acc.); यंता गजस्याभ्यपतद्गजस्थं (R. vii. 37). 2 स्पर्ध् 1 A, संघृष् 1 P, अभिभू 1 P; *See* **Compete.** –*s.* शिरस्त्राणं, मस्तकाच्छादन.

Coping, *s.* प्राकारशीर्ष-शृंगं.

Copious, *a.* प्रचुर, भूयिष्ठ, बहु, विपुल, प्रभूत, पुष्कल, भूरि, बहुल. **–ly**, *adv.* बहु, भूरि, बहुशः, प्रचुरं, अति-सु-pr. **–ness**, *s.* बाहुल्यं, प्राचुर्यं, विपुलता, &c.

Copper, *s.* ताम्रं, ताम्रकं, शुल्बं, म्लेच्छं, वरिष्टं, उदुंबरं; ' c. coin ' पणः ; ' c. plate ' ताम्रपत्रं-पट्टं-पटः; ' c. smith ' ताम्रकारः, ताम्रिकः, ताम्रकुट्टकः, शौल्बिकः. **–y**, *a.* ताम्र (म्री *f.*), ताम्रमय (यी *f.*).

Copperas, *s.* तुत्थं, मलीमसं.

Coppice, Copse, *s.* गुल्मावृतं स्थानं, जंगलं, तरुगहनं.

Copulate, *v. i.* मैथुनं-संगं-कृ 8 U, अभिगम् 1 P, संगम् 1 A. –*v. t.* संयुज् 7 P, 10, संधा 3 U. **–ion**, *s.* मैथुनं, सुरतं, संभोगः, व्यवायः, रतिक्रिया. 2 संसर्गः, संपर्कः, संयोगः. **–ive**, *a.* संयोग-संसर्ग-कारिन्. 2 उभयान्वयिन्.

Copy, *s.* प्रतिलेखः, प्रतिलिपि *f.*, हस्तलेखः, लिपि *f.* 2 मूलं. 3 एकग्रंथः, एकपुस्तकं. 4 अनुकरणं; ' c. right ' मुद्रणस्वामित्वं-स्वत्वं, मुद्रणाधिकार. –*v. t.* प्रतिलिपिं कृ 8 U, लिख् 6 P. 2 अनुकृ (with gen.). **–er, –ist**, *s.* लिपिक(का)रः, लेखकः, अक्षरचणः, अक्षरचंचुः. 2 अनुकारिन् *m.* 3 शब्दचोरः.

Coquet, *v. i.* विलस् 1 P, विभ्रम् 1, 4 P, हावं-विलासं-कृ 8 U, ललिताभिनयं कृ. **–ry**, *s.* विलासः, विभ्रमः, हावः, लीला, ललिताभिनयः. **–Coquette**, *s.* विलासिनी, विलासवती, कामिनी, लीलावती.

Coral, *s.* विद्रुमः, प्रवालः.

Corban, *s.* ईश्वरार्पणं, उत्सर्गः.

Cord, *s.* रज्जु *f.*, दामन् *n.*, पाशः, शुल्बं, गुणः, सूत्रं, वटी. –*v. t.* रज्ज्वा बंध् 9 P, or यंत्र् 10. **–age**, *s.* रज्ज्वादिसामग्री. **–ed**, *a.* पाश-रज्जु-बद्ध.

Cordial, *a.* दीपक, अग्निवर्द्धक; धातुपोषक. 2 दृढसौहृद, गाढपरिचय, सुशील (of persons) दृढ, गाढ, घन. –*s.* अग्निवर्धनं; रुचकं, दीपकं. **–ity**, *s.* सौहार्दं, सुशीलता, सौजन्यं, मित्रभावः, मैत्र्यं, सख्यं. **–ly**, *adv.* सौहार्देन, सुशीलवत्.

Cordon, *s.* आगमनिर्गमप्रतिषेधः.

Core, *s.* अंतरं, गर्भः, अंतर्भागः, हृदयं.

Coriander, *s.* धानी, धानेयः. 2 (seed) छत्रा, धान्यकं, वितुन्नकं, कुस्तुंबरु *n.*

Cork, *s.* पिधानं, कूपीछिद्रपिधानं.

Cormorant, *s.* घस्मरः, औदरिकः, कुक्षिंभरिः, गृध्नुः.

Corn, *s.* धान्यं; ' growing c. ' शस्यं. 2 किणः, कदरः. 3 अन्नं, आहारः, जीवनसाधनं; ' c. mill ' धान्यपेषणी. **–y**, *a.* शृंगवत्.

Cornea, *s.* शुक्लमंडलं.

Corner, *s.* कोणः; अस्रः; ' c. of the eye ' अपांगः-गं, नयनोपांतः; ' c. of the mouth ' सृक्कन् *n.* 2 विविक्तस्थानं, निर्जनदेशः; ' c. stone ' प्रधान-कोण-प्रस्तरः; ' c. wise ' कोणाकोणि, अस्रास्रि.

Cornet, *s.* आश्विकनायकः. 2 आवेष्टनं, कोशः-षः.

Cornice, *s.* प्राकारशीर्ष-शृंगं.

Cornuted, *a.* (man) बंधकीभार्यः.

Corollary, *s.* अनुमानं; अपवाहः, उपसिद्धांतः, उपलक्ष्यः.

Corona, *s.* रविमभितः-तेजोमंडलं-मुकुटाकारं.

Coronal, *s.* मुकुटं, किरीटः.

Coronation, *s.* अभिषेकः. राज्याभिषेकः.

Coroner, *s.* अपमृत्युकारणनिरूपकः.

Coronet, *s.* मुकुटं, किरीटः.

Corporal, *a.* कायिक-शारीरिक-दैहिक (की *f.*), शारीर (री *f.*); ' c. punishment ' देह-शरीर-दंडः. –*s.* सेनाधिकृतः पुरुषः. **–ity**, *s.* देहवत्त्वं, शरीरवत्ता. **–ly**, *adv.* शरीरेण, देहतः.

Corporate, *a.* कृतसंसर्ग, संभूयकारिन्, संघातवत्, संसृष्ट. **–ion**, *s.* ' a c. body ' श्रेणिणी *f.*, समाजः.

Corporeal, *a.* देहिन्, शरीरिन्, वपुष्मत्, सदेह, सशरीर.

Corps, *s.* अनीकं, सैन्यदलं-गुल्मः, दंडः.

Corpse, *s.* शवः-वं, कुणपः, प्रेतं, मृतशरीरं.

Corpulent, *a.* स्थूल, स्थूलकाय, पीन, पीवर, मेदस्विन्, मांसल; ' having a c. belly ' तुंदिन्, तुंदवत्, तुंदिल, बृहत्कुक्षि, पिचंडिल. **–Corpulence**, *s.* पीनता, स्थूलता, मेदस्विता, पृथूदरता.

Corpuscle, *s.* अणुः, कणः, लवः, लेशः.

Correct, *v. t.* वि-परि-सं-शुध् *c.*, निर्दोष *a.* कृ 8 U, प्रतिसमा-समा-धा 3 U; ' instantly c. ing himself ' सपदि स्ववचः समादधत् ; प्रमृज् 2 P; ' c. one's bad conduct ' पापान्निवृत् 1 A, कुमार्गं त्यज् 1 P. 2 अनुशास् 2 P, दंड् 10. 3 प्रतिकृ, अपा-निरा-कृ. –*a.* शुद्ध, निर्दोष, अभ्रांत. 2 सत्य, तथ्य, यथार्थ, अवितथ, यथातथ; ' c. in conduct ' साधुवृत्त, निर्दोषाचरण. **–ion**, *s.* शोधनं, शुद्धि *f.*; समाधानं. 2 शासनं, दंडः-डनं, निग्रहः. **–ive**, *a.* शोधक. 2 प्रतिकारक, अपह-हर-in comp. –*s.* प्रतिकारः, समाधानं. **–ly**, *adv.*

शुद्ध, निर्दोष. 2 सत्य, यथातथ, यथावत्, साधु. **-ness,** *s.* शुद्धि *f.*, शुद्धत्वं-ता, निर्दोषता; सत्यता, तथ्यता, यथार्थता. **-or,** *s.* शोधकः, प्रतिकर्तृ *m.* 2 शास्तृ-शासितृ *m.*; दंडप्रणेतृ *m.* **-Corrigible,** *a.* शोधनीय; दंडनीय; समाधेय.

Correlation, *s.* परस्परसंबंधः, अन्योन्यान्वयः, व्यतिकरः. **-Correlative,** *a.* परस्परसंबद्ध, इतरेतरसंबंधिन्.

Correspond, *v. i.* (with) पत्रेण संवादं कृ 8 U, पत्रलेखनेन संवद् 1 P or व्यवहृ 1 P. **2** (to) संवद् 1 P, अनुरूप- सदृश (शी *f.*) *a.* भू 1 P; युज्-उपपद्-pass.: *See* **Resemble**; ' his face c. s to that of Sitâ ' अस्य मुखं सीताया मुखेन संवदति (U. 4). **-ence,** *s.* पत्रसंवादः, पत्रविनिमयः. 2 संवादः, अनुरूपता, सादृश्यं. 3 संबंधः, संसर्गः, संपर्कः. **-ent,** *a.* अनुरूप, युक्त, सदृश, तुल्य, संगत, संवादिन्. **-***s.* पत्रेण संवादिन् *m.* 2 नियोगिन् *m.*, प्रतिपुरुषः. **-ing,** *a.* अनुरूप, युक्त, सदृश.

Corridor, *s.* गूढ-छन्न-पथः.

Corrigendum, *s.* शुद्धिपत्रं.

Corrival, *s.* प्रतिपक्षः, प्रतिस्पर्धिन् *m.*, प्रतियोगिन् *m.* **-ry,** *s.* प्रतिस्पर्धा, संघर्षः, प्रतियोगिता.

Corroborate, *v. t.* दृढीकृ 8 U, समर्थ् 10, द्रढयति (D.), प्रमाणीकृ, प्रमाणं दा 3 U, उपोद्वल् 10. **-ion,** *s.* दृढीकरणं, प्रमाणीकरणं, समर्थनं, उपोद्वलनं, प्रमाणं.

Corrode, *v. t.* क्षि 5 P or c., क्रमशः-लवशः-खाद् 1 P or नश् c. or विली c. **-ent,** *a.* नाशक, क्षयकर (री *f.*). **-Corrosion,** *s.* क्रमशो विलयनं or नाशनं, क्षयः. **-Corrosive,** *a.* विलयन, नाशक. 2 तीव्र, तिग्म, प्रखर, अरुंतुद, मर्मस्पृश्.

Corrugate, *v. t.* (त्वचं-चर्म) सकुच् 1 P; आकुंच् c., संहृ 1 P **-ion,** *s.* त्वगाकुंचनं, चर्मसंकोचः ; संकोचनं.

Corrupt, *v. t.* दूष् c. (दूषयति), भ्रंश् c., नश् c., विकृ 8 U or c., मलिनयति (D.), कलुषयति (D.), अवपत् c.; ' the mind is c. ed in youth ' यौवनारंभे कालुष्यमुपयाति बुद्धिः (Ka. 103); ' c. a woman ' दुष् c., चारित्र्यं नश् c., सतीत्वात् भ्रंश् c., धृष् 10. 2 पूतीकृ. 3 उत्कोचं दा 3 U, उत्कोचदानेन वशी-अनुकूली-कृ. **-***v. i.* दुष् 4 P, पूतीभू 1 P. **-***a.* दूषित, कलुष, पतित, दुष्ट, भ्रष्ट, कलुषित. 2 दुष्टमति, दुराचार, पापचेतस्, अंतर्दुष्ट, दुरात्मन्, दुराशय, पापबुद्धि. 3 पूति, पूतिगंधि, दुर्गंध. **-ion,** *s.* दूषणं, पातनं, शीलभ्रंशनं. 2 उत्कोचग्राहित्वं, धनभेद्यत्वं. 3 दुष्टता, दौरात्म्यं, भ्रष्टता, अंतर्दुष्टता, दौर्जन्यं. 4 अपभ्रंशः, अपशब्दः, अपभ्रष्टशब्दः. 5 पूति *f.*, पूतता, दुर्गंधः. **-er, -ive,** *a.* दूषक नाशक. **-ly,** *adv.* दुष्टं, दुष्टतया; सदोषं.

Corsair, *s.* समुद्रपिदस्युः

Corse, *s. See* **Corpse.**

Corset, *s.* चोलः-ली, कूर्पासकः, कंचुकः.

Corslet, *s.* उरस्त्राणं, कवचः-चं.

Cortege, *s.* परिवारः.

Cortical, *a.* त्वङ्मय (यी *f.*), त्वाच (ची *f.*).

Coruscate, *v. i.* स्फुर् 6 P, द्युत् 1 A; *See* **Shine.** **-ion,** *s.* स्फुरणं, स्फुरितं. **-Coruscant,** *a.* उज्ज्वल, भासुर.

Cosine, *s.* ज्या.

Cosmetic, *a.* कांतिवर्धक, शोभाजनन (नी *f.*), शोभाप्रद. **-***s.* अंगरागः.

Cosmical, *a.* जगत्संबंधिन्.

Cosmogony, *s.* विश्वोत्पत्ति *f.*, जगत्सृष्टि *f.*

Cosmography, *s.* जगद्विवरणं-वर्णनं.

Cosmopolite,-politan, *s.* विश्वस्थायिन् *m.*, सर्वत्रवासिन् *m.*, जगन्मित्रं.

Cosmos, *s.* जगत् *n.*, विश्वं.

Cost, *s.* मूल्यं, अर्घः, अर्हा. 2 व्ययः ; ' even at the c. of one's life ' प्राणव्ययेनापि ; ' high c. ' बहुमूल्यं; oft. by instr. of noun, (आत्मानं सततं रक्षेद्दारैरपि धनैरपि). 3 धनव्ययः. **-***v. t.* मूल्येन ग्रह् 9 U or क्री 9 U; ' what does it c. ' कियता मूल्येन विक्रीयते तत्; ' the house c. me 1000 Rs. ' सहस्ररूपकेण मया गृहं क्रीतं; ' the marriage ceremony c. me much ' बहुधनव्ययेन निष्पादितो विवाहविधिः ; ' his obstinacy c. him dear ' दुराग्रहात्तस्य अत्यहितमभवत् ; व्ययेन खाद् 10; ' will c. the lives of ' प्राणनाशं-व्ययं-आवहेत्. **-ly,** *a.* महार्घ, महार्ह, बहुमूल्य.

Costermonger, *s.* फलविक्रेतृ *m.*

Costive, *a.* आनद्ध, बद्धकोष्ठ, अवरुद्धमल, विड्ग्राहिन्. **-ness,** *s.* मलावरोधः, मलावष्टंभः, आनाहः, विड्-गुद-ग्रहः.

Costume, *s.* वेशः नेपथ्यं; *See* **Dress.**

Cosufferer, *s.* समदुःखः, समदुःखभाज् *m.*

Cosy, *a.* सुखावह, हितकर, सुस्थित.

Cot, *s.* खट्वा, मंचः, पर्यंकः. 2 दोला, प्रेंखा. 3 **Cottage,** q. v.

Cote, *s.* व्रजः, शाला.

Coterie, *s.* एकविषयजनसंसर्गः- गणः

Cotquean, *s.* स्त्रीकर्मव्यापृतः.

Cottage, *s.* उटजः-जं, पर्णकुटि-टी *f.*, पर्णशाला, कायमानं, कुटीरः; ' c. girl ' उटजनिवासिनी बालिका. **-er, Cotter, Cottier,** *s.* कुटीरस्थः, उटजवासिन् *m.*; ग्रामीणः.

Cotton, *s.* कार्पासः, तूलः, पिचुः, पिचुलः. ' made of c. ' कार्पास *a.*; ' c. cloth ' तलांबरं, फालं, कार्पासं, बादरं; ' c. plant

कार्पासी. -**y,** *a.* तूलसंबंधिन्, कार्पासिक (की *f.*), (*s.*) in comp.

Couch, *s.* शयनं, शय्या, पर्यंकः, खट्वा, मंचः; *See* **Bed.** -*v. i.* शी 2 A, संविश् 6 P. 2 अधःपत् 1 P, नि-पत्. -*v. t.* शी c., संनिविश् c. 2 परिग्रह् 9 P, समाविश् c. 3 आच्छद् 10, ग्रंथ् 9 P; 'c. ed in sweet words' मधुरवाग्ग्रथितः (लेखः); 'c. fellow' सहशायिन्. -**ant,** *a.* शय, शायिन्.

Cough, *s.* कासः, काशः, उत्कासः, क्षवथुः; 'suffering from c.' कासिन्. -*v. i.* कास् 1 A, क्षु 2 P. -**er,** *s.* उत्कासि(शि)न् *m.*

Coulter, *s.* फालदंतः, कृंतत्रं.

Council, *s.* सभा, संसद् *f.*, सदस् *f.*, *n.*; 'c. room' (chamber of c.) मंत्रणसभा, मंत्रगृहं. -**lor,** *s.* सभासद् *m.*, सदस्यः, &c.

Counsel, *s.* मंत्रणा, विचारः-रणा, विवेचनं, विमर्शः, चिंतनं. 2 उपदेशः, मंत्रः, मंत्रितं, अनुशासनं. 3 उपायः. 4 **Barrister,** q. v. -*v. t.* उपदिश् 6 P, मंत्र् 10, अनुशास् 2 P. -**lor,** *s.* मंत्रिन् *m.*, सचिवः, अमात्यः, धीसचिवः. 2 उपदेशकः, उपदेष्टृ *m.*, बुद्धिसहायः. -**lorship,** *s.* साचिव्यं, मंत्रिपदं.

Count, *v. t.* गण् 10 (lit. and fig.); संकल् 10, संख्या 2 P. 2 मन् 4 A. -*v. i.* मन्-गण्-pass.; 'c. on, upon' अवलंब् 1 A, आश्रि 1 U, विश्वस् 2 P, प्रति-इ 2 P; 'I do c. upon your help' त्वं साहाय्यं करिष्यसीति गणयाम्येव; 'c. ing upon your promise' तव वचनमवलंब्य, त्वद्वचनप्रत्ययात्. -*s.* गणनं, गणना, संख्या-ख्यानं. 2 अभियोगविषयः, भाषापादः. -**less,** *a.* असंख्य, अगण्य, संख्यातीत, अनंत, गणनातीत.

Countenance, *s.* मुखं, आननं, वदनं; आस्यं, वक्त्रं. 2 आकारः, आकृति *f.*, रूपं. 3 आश्रयः, अनुग्रहः, साहाय्यं, उपकारः. 4 आनुकूल्यं, अनुमोदनं. -*v. t.* अनुग्रह् 9 P, उपकृ 8 U, साहाय्यं दा 3 U, आनुकूल्यं दृश् c.; अनुमन् 4 A, अनुमुद् 1 A; *See* **Encourage** also. -**er,** *s.* उपकारकः, सहायः, अनुग्रहीतृ *m.*, अनुमोदकः.

Counter, *s.* गणनाफलकः. 2 (गणनार्थं) मुद्रा, काकिणी, कपर्दः-र्दिका. -*adv.* प्रतिकूलं, विरुद्धं, विपरीतं, प्रतिलोमं; gen. by प्रति pr.; 'c. design' प्रत्युपायः; 'c. poison' प्रतिविषं.

Counteract, *v. t.* मोघी-निष्फली-कृ 8 U, निवारय् 10, प्रतिकृ, प्रतिहन् 2 P, प्रति-वि-रुध् 7 U. -**ion,** *s.* प्रतिक्रिया, प्रति(ती)कारः, प्रतियोगः, प्रति-व्या-घातः.

Counterbalance, *v. t.* तुलया धृ 1 P, तुल्यभार *a.* कृ 8 U, समीकृ, प्रतितुल् 10.

Counterblast, *s.* विरोधः, प्रतिरोधः.

Counterbuff, *v. t.* प्रति-अभि-हन् 2 P. -*s.* प्रतिघातः.

Counterchange, *v. t.* परस्परं परिवृत् c., विनि-मे 1 A. -*s.* परिवर्तः, विनिमयः, व्यतिकरः.

Countercheck, *s.* प्रतिबंधः, प्रतिरोधः.

Countercurrent, *s.* प्रतिप्रवाहः-स्रोतस् *n.*

Counterevidence, *s.* विरुद्धसाक्ष्यं; प्रतिकूलप्रमाणं.

Counterfeit, *a.* कृत्रिम, कृतक, कपटिन्, छाद्मिक (की *f.*); gen. ex. by कपट, छद्म, कूट in comp.; 'c. seal' कपटमुद्रा; कूटशासनं, छद्मवेशः, &c. -*v. t.* छद्म-कपटं-कृ 8 U, अनुकृ; कृ with कपट-कूट in comp.; 'c. a seal' कपटमुद्रां कृ; 'c. a document' कूटलेख्यं कृ; 'c. -ing sleep' प्रसुप्तलक्षणः, लक्षसुप्तः, मिथ्यासुप्तः; *See* **Feign.** 2 विप्रलभ् 1 A; *See* **Cheat.** -*s.* कूटं, कपटं, छद्मन् *n.*, व्याजः. 2 कूटलेखः. -**er,** *s.* कूटकृत् *m.*, कूटलेख्यकारः. 2 वंचकः, प्रतारकः. -**ly,** *adv.* सकपटं, सकूटं, मिथ्या, छद्मना.

Countermand, *v. t.* प्रत्यादिश् 6 P, विपरीताज्ञां दा 3 U. -*s.* प्रत्यादेशः, विपरीताज्ञा.

Countermarch, *v. i.* प्रतिगा 2 P, प्रतीपं या. -*s.* प्रतियानं, प्रतीपयात्रा.

Countermark, *s.* प्रतिलक्षणं, प्रतिचिह्नं.

Countermine, *s.* प्रतिसुरंगा. -*v. t.* प्रतिसुरंगां कृ 8 U.

Counterpane, *s.* शयनास्तरणं, शय्याप्रच्छदः.

Counterpart, *s.* प्रतिरूपं, प्रतिमा, प्रतिबिंबं, प्रतिमूर्ति *f.*; (अहो चेष्टाप्रतिरूपिका कामिनो मनोवृत्तिः S. 1).

Counterplea, *s.* प्रत्युत्तरं; प्रत्यभियोगः.

Counterpoise, Countervail, *v. t.* *See* **Counterbalance.** -*s.* तुल्यभारता, समतोलनं.

Country, *s.* प्र-, देशः, विषयः, राष्ट्रं; दिश् *f.*, आशा. 2 ग्रामः, जनपदः, (opposed to नगरं, पुरं); 'c. folk' जानपदाः, ग्राम्याः; 'c. life' जानपदवृत्तिः, ग्रामवसतिः; 'native c.' जन्मभूमि *f.*, स्वदेशः; 'c. man' स्वदेशीयः, एकदेशस्थः, देशबंधुः; जानपदः, ग्राम्यजनः, ग्रामीणः; 'c. parson' जानपदाचार्यः, ग्रामगुरुः.

County, *s.* देशभागः, मंडलं, चक्रं.

Couple, *s.* युग्मं, युगलं, यमकं, युगं, द्वयं, द्वितयं; 'c. of animals' मिथुनं, द्वंद्वं; 'a married c.' वधूवरौ, दंपती, जायापती. -*v. t.* संयुज् 7 U, 10, संश्लिष् c., संगम् c. (गमयति) योक्त्रयति, (D.). -*v. i.* मैथुनं कृ 8 U, स्त्रीपुरुषवत् संगम् 1 A or संमिल् 6 P.

Couplet, *s.* श्लोकः; पंक्तिद्वयं; 'a c. formed by two verses' युग्मकं.

Courage, *s.* धैर्यं, शौर्यं, विक्रमः, पराक्रमः, वीर्यं, उत्साहः, पौरुषं, तेजस् *n.*, धामन् *n.*, प्रतापः. 2 निर्भीकता, धृष्टता, साहसं,

'lose c.' धैर्यहीन *a.* भू 1 P, सत्त्वात्परिभ्रंश् 1 A, 4 P; 'do not lose c.' धैर्यं निधेहि हृदये (Mal. 5); 'take c.' आ-समा-श्वस् 2 P; 'summon c.' धैर्यं आस्था 1 A, धैर्यं अवलंब 1 A or अवष्टंभ् 9 P, धैर्यावष्टंभं कृ 8 U; 'inspire c.' आ-समा-श्वस् c. **–ous,** *a.* शूर, वीर, विक्रांत, धीर. 2 अभीत, धृष्ट, साहसिक (की *f.*). **–ously,** *adv.* सवीर्यं, सविक्रमं, वीर-शूर-वत्. **–ousness,** *See* (*s.*).

Courier, *s.* वार्ताहरः; दूतः, वैवधिकः.

Course, *s.* गति *f.*, प्रसरः, प्र-, क्रमः. 2 रयः, प्रवाहः (of water &c.). 3 मार्गः, पथिन् *m.*, पद्धति (ती) *f.* 4 व्यवहारः, वृत्ति *f.*, आचरणं, चरित्रं. 5 क्रमः, अनुक्रमः, आनुपूर्व्यं, परंपरा. 6 रजस् *n.*, पुष्पं, आर्तवं (of women). 7 विधिः, प्रकारः, रीति *f.*; 'the law must have its c.' यथाशास्त्रमस्य निर्णयेन भवितव्यमेव; 'in c. of conversation' कथाप्रसंगेन, कथायोगेन; 'in c. of time' कालक्रमेण, गच्छता कालेन, दिनेषु गच्छत्सु, गच्छति काले; 'a woman in c.' रजस्वला, ऋतुमती, मलिनी, पुष्पवती; 'of c.' अवश्यमेव, नियतं, नूनं, खलु, नाम with एव; 'c. of an arrow' बाणगोचरः, शरपथः; 'c. of study' अध्ययनक्रमः-मार्गः; 'mathematical c.' गणिताध्ययनक्रमः; 'c. of acting' क्रियाविधिः, अनुष्ठानं; 'proper c. of conduct' सुमार्गः; 'there being no other c.' गत्यंतराभावात्; 'having no other c. open,' अनन्यगतिक *a.*; 'race c.' चर्याभूमिः; 'in the c. of' मध्ये, अंतरे; 'a house in the c. of erection' निर्मीयमाणं भवनं; 'the c. of nature' सृष्टिक्रमः. **–er,** *s.* जवनः, जविन् *m.*, वारकीरः.

Court, *s.* चत्वरः-रं, अंगनं-णं, प्रांगणं, अजिरं. 2 राजकुलं, राजसभा, आस्थानी-नं (assembly room); राजगृहं-मंदिरं. 3 अनुनयः, अनुवृत्ति *f.*, आराधनं; भजनं, दाक्षिण्यं. 4 (Judge) अधिकरणिकः, अक्षदर्शकः, धर्माधिकारिन् *m.*; (Judges) धर्माध्यक्षाः, प्राड्विवाकाः (pl.); 'c. of justice' अधिकरणं, व्यवहारमंडपः, न्याय-धर्म-सभा. 5 राजपरिजनः-परिग्रहः-परिवारः; 'c. favour' राजप्रसादः, राजानुग्रहः; 'c. minion' राजवल्लभः-प्रियः; 'c.-yard' अंगनं, चत्वरं, अजिरं, प्रकोष्ठः, प्रांगणं, गृहांगणं. **–c.** *t.* आराध् 10 अनुनी 1 P, अनुरंज् c., भज् 1 A. 2 याच् 1 A, प्र-अभि-अर्थ् 10 A. 3 विवाहार्थं प्रार्थ् or सेव् 1 A. **–eous,** *a.* दक्षिण, विनीत, सविनय, सुजन, सप्रश्रय, सानुनय, सभ्य, प्रियंवद; 'c. words' सूनृता वाणी. **–eously,** *adv.* सप्रश्रयं, दक्षिणतया, सानुनयं, विनयेन. **–esy,** *s.* दाक्षिण्यं, विनयः, प्रश्रयः, सौजन्यं, अनुरोधः, अनुवर्तनं; 'a title of c.' उपचारपदं. 2 प्रणामः, आमंत्रणं, आपृच्छनं. **–ier,** *s.* राजभृत्यः, राजवल्लभः, राजसभासद् *m.*, सभिकः, सभ्यः. **–like,** *a.* शिष्ट, शिष्टाचार, सभ्य. **–ly,** *a.* सुजन, शिष्ट, सभ्य, दक्षिण, सुशील. **–ship,** *s.* आराधनं, अनुरंजनं, अनुनयः, प्रसादनं. 2 स्त्र्युपासना, विवाहार्थं प्रार्थना.

Courtezan, *s.* गणिका, वेश्या, पण्यस्त्री, पण्यांगना, वारस्त्री-योषित्; बंधकी, पुंश्चली.

Cousin, *s.* पितृव्यपुत्रः (त्री *f.*), मातुलपुत्रः (त्री *f.*), पितृष्वस्रेयः (यी *f.*), मातृष्वस्रेयः (यी *f.*), according to different relations. 2 ज्ञातिः, बांधवः.

Cove, *s.* वंकः, खातं.

Covenant, *s.* समयः, नियमः, संविद् *f.*, पणः. **–v.** *i.* *See* **Contract.** **–or,** *s.* नियमबद्धः, सामयिकः.

Cover, *v. t.* प्र-समा-आ-च्छद् 10, प्रा-सं-आ-वृ 5 U, स्थग् 10, पिधा 3 U, निगुह् 1 U, व्यवधा 3 U, अवगुंठ् 10. 2 आ-,स्तृ 5 U, स्तॄ 9 U, व्याप् 5 P, आवेष्ट् 1 A or c., नि-आ-चि 5 U; 'a c.-ed path' छन्न-गूढ-पथः. **–s.** आवरणं, आच्छादनं, पुटं, व्यवधानं, वेष्टनं, अवगुंठनं, पिधानं. 2 कोशः-षः, वेष्टनं. 3 प्रावारः, प्रच्छदपटः, आच्छादनवस्त्रं. 4 अप-व्यपदेशः, छद्मन् *n.*, व्याजः, छलं, माया, कपटं; 'c. of a well' वि(वी)नाहः; 'c. of a carriage,' रथगोपनं-आवरणं. **–ing,** *s.* आच्छादनं, आवरणं, &c. 2 तिरस्करिणी, व्यवधानं. 3 परिधानं, प्रावारः, वासस् *n.*, आच्छादनवस्त्रं. 4 अंतर्धा, व्यवधा, अंतर्धिः, अपवारणं, तिरोधानं. **–let,** *s.* उत्तरच्छदः, शय्याप्रच्छदपटः.

Covert, *a.* गूढ, प्रच्छन्न, गुप्त; 'a c. expression' व्यंग्योक्ति *f.* 2 निर्वात. **–s.** गहनं, गह्वरं. 2 संश्रयः, आश्रयस्थानं.

Covet, *v. t.* लुभ् 4 U, गृध् 4 P, स्पृह् 10 (with dat.); कम् 10 A, अभिलष् 1, 4 P, अतिमात्रं इष् 6 P. **–ous,** *a.* लुब्ध, लोलुप, गृध्नु, अभिलाषिन्, ईप्सु, अतृप्त, सतृष्ण. 2 (Of wealth) धनलुब्ध, धनार्थिन्, अर्थपर, धनपरायण. **–ously,** *adv.* सलोभं, लोभेन. **–ousness,** *s.* लोभः, लिप्सा, तृष्णा, लालसा, स्पृहा, अभिलाषः, अतिस्पृहा, लौल्यं. 2 धनलोभः, अर्थतृष्णा.

Covey, *s.* पक्षिगणः; शावकसमूहः.

Covin, *s.* कूटसमयः-संविद् *f.*

Cow, *s.* गो *f.*, धेनु *f.*; माहेयी, सौरभेयी, उस्रा; शृंगिणी, अर्जुनी, रोहिणी; एकहायनी, द्विहायनी, त्रिहायणी, चतुर्हायणी 'a c. one year old, 2 years old, and so on'; 'barren c.' वशा, वंध्या; 'mild one' अचंडी, सुकरा; 'bringing forth many

calves ' बहुसूतिः; परेष्टुका, ' producing calves every year ' समांसमीना ; ' an excellent c. ' गोमतल्लिका, गोतल्लजः ; ' c. dung ' गोमयः-यं, शकृत् *n.*; ' c. herd ' गोपः, आभीरः, गोपालः ; ' c. house or pen ' व्रजः, गोष्ठं, गोशाला. -*v. t.* भी c., त्रस् c.

Coward, *s.* कापुरुषः, भीरुः, अशूरः, कातरः, क्लीबः, भीतः, शौर्यहीनः ; ' a boasting c. ' गेहेशूरः, गेहेनर्दिन् *m.* **-ice,** *s.* भीरुता, कातर्यं, अपौरुषं, कापुरुषत्वं, अवीर्यं, अविक्रमः क्लीबता. **-ly,** *a.* भीरु, निर्वीर्य, कातर; *See* (*s.*). -*adv.* सकातर्यं, भीरुवत्, कापुरुषवत्.

Cower, *v. i.* अवनतकाय-प्रणतशरीर -*a.* भू 1 P, प्रह्वीभू , निभृतं-अलक्षितं या 2 P or गम् 1 P, कायमवनमय्य गम्.

Cowl, *s.* फणाकृति शिरोवेष्टनं.

Cowrie, *s.* काकिनी-णी, कपर्दिका, वराटकः.

Coxcomb, *s.* दंभिन् *m.*, दांभिकः, आत्माभिमानिन् *m.*, आत्मविकत्थनः, दृप्तः. 2 चूडा, शिखा. **-ry,** *s.* दंभः, आत्माभिमानः, दर्पः, गर्वः.

Coy, *a.* अप्रगल्भ, सलज्ज, लज्जावत्, विनीत, सव्रीड, शालीन. 2 अल्पभाषिन्, मितवाच्. -*v. i.* लज्ज् 6 A, त्रप् 1 A, ह्री 3 P. **-ly,** *adv.* लज्जया, सव्रीडं, सत्रपं, सलज्जं. **-ness,** *s.* लज्जा, व्रीडा, त्रपा; अप्रागल्भ्यं.

Cozen, *v. t.* वंच् 10; *See* **Cheat. -age,** *s.* प्रतारणा, वंचनं ; माया, भ्रमः, मोहः. **-er,** *s.* वंचकः, कितवः, मायिन् *m.*

Crab, *s.* कुलीरः, कर्कटः-टकः.

Crabbed, *a.* कर्कश, परुष, निष्ठुर. 2 वामशील, प्रतीप, दुःशील. 3 विषम, दुर्ज्ञेय, गूढ, निगूढार्थ. **-ness,** *s.* निष्ठुरता, प्रतीपता, वैषम्यं, दुःशीलं.

Crack, *v. t.* भंज् 7 P. खंड् 10, विदृ 9 P, 10. स्फुट् c., भिद् 7 P; ' c. a joke ' परिहासं कृ. 2 (अकस्मात्) ध्वन् c., आस्फल् 10, स्वन् c. -*v. i.* स्फुट् 6 P, विदल् 1 P, भंज्-भिद्-दृ pass ; ' a c. ed sound ' अपस्वरः, विस्वरः. 2 विकत्थ् 1 A. 3 महारवेण स्वन्-क्वण्-ध्वन् 1 P, सहसा महारवं कृ 8 U. -*s.* छिद्रं, रंध्रं, संधिः, भंगः. 2 स्फोटनं, भेदनं. 3 विरावः, ध्वनिः, क्वणितं; ' c. brained ' वातुल, उन्मत्त. भ्रांतचित्त.

Crackle, *v. i.* स्वन्-रट् 1 P, पटपटायते (D.). -*s.* स्वनितं, रटितं, पटपटशब्दः.

Cradle, *s.* दोला, प्रेंखा, प्रेंखोलनं ; (शिशु) खट्वा ; ' from the c. ' आशैशवात् ; ' a child in the c. ' स्तनंधयः, शिशुः. 2 (fig.) निवासभूमि *f.*, आवासः. -*v. t.* दोलायां शी c., दोलामारोप्य चल् c.

Craft, *s.* कला, शिल्पं; कौशलं. 2 व्यापारः, वृत्ति *f.*, व्यवसायः. 3 चातुर्यं, कौशलं, वैदग्ध्यं ; हस्तकौशलं, नैपुण्यं. 4 शाठ्यता, धूर्तता, कौटिल्यं, कपटं. 5 नौः, तरीः ; ' c. s man ' शिल्पिन् *m.*, कारुः, कर्मकारः. **-y,** *a.* धूर्त. शठ, कुटिल, विजिह्म, कितव, कपटिन्. 2 चतुर, विदग्ध. **-ily,** *adv.* छलेन, सकैतवं, धूर्ततया ; चतुरं, विदग्धतया.

Crag, *s.* शृंगं, कूटः-टं, शिखरः-रं. **-ged, -gy.** *a.* विषम, अत्यसम, शृंगिन्.

Cram, *v. t.* प्राक्षिप् 6 P, बलाद् निविश् c. 2 अतिभोजनेन तृप् c. or संतुष् c. 3 अतिभृशं पृ c. or पूर् 10; स्वस्तिवाचनमोदकैः कुक्षिं पूरयित्वा (M. 4) ' having c. ed the belly ' &c.; 'c. ed with food ' अतितृप्तः. 4 आकॄ 6 P, निरुध् 7 U, संबाध् 1 A; ' c.-ed with people ' जनाकीर्ण, जनसंकुल-संबाध. 5 (fig.) अर्थहीनं पठ् 1 P.

Cramp, *v. t.* संकुच् 1 P, स्तंभ् 9 P or c, नि-प्रति-रुध् 7 U, संबाध् 1 A. 2 (अंगं) आकृष् 1 P, उद्वेष्ट् c., उपहन् 2 P. 3 कील् 10 : ' we are much c. ed in this place अतीव दुःस्थिता वयमत्र. -*s.* स्तंभः, संकोचः-चनं, निरोधः, संक्षेपः. 2 उद्वेष्टनं, व्यासः, आक्षेपः, गात्रोपघातः ; ' a c. in the calf of the leg ' पिंडिकोद्वेष्टनं. 3 कीलः, लोहग्रहणी, बंधनकीलः (c. iron).

Crane, *s.* बकः, कङ्कः, सारसः ; बलाका, बिसकंठिका (female c.). 2 भारोत्तोलनयंत्रं.

Cranium, *See* **Skull.**

Crank *s.* वक्रमार्गः. 2 वक्रोक्ति *f.*, वक्रभाषितं.

Cranny, *s.* छिद्रं, रंध्रं, संधिः.

Crash, *s.* महाशब्दः, महानिनादः, कोलाहलः, महारवः. -*v. t.* भंज् 7 P, भिद् 7 P, मृद् 9 P, पिष् 7 P. -*v. i.* (परुषरवेण) ध्वन्-स्वन् 1 P, परुषं रु 2 P.

Crass, *a.* स्थूल, घन, असूक्ष्म.

Cratch, *s.* गवादनी, द्रोणि-णी *f.*

Crater, *s.* आग्नेयगिरिमुखं.

Craunch, *v. t.* चर्व् 1 P, संदंश् 1 P.

Cravat, *s.* ग्रैवेयकं, ग्रीवावेष्टनं.

Crave, *v. t.* (सविनयं) याच् 1 A, प्र-अभि-अर्थ् 10 A; ' c. favour ' प्रसद् c., अनुनी. 2 वांछ् 1 P, इष् 6 P, अभिलष् 1, 4 P, लभ् desid. (लिप्सते); *See* **Wish. -ing,** *s.* लालसा, स्पृहा, अभिलाषः, अतिकांक्षा, औत्सुक्यं, उत्कंठा, तृष्णा; ' c. for food ' बुभुक्षा; ' c. for drink ' पिपासा, तृष्णा.

Craven, *s.* (c. hearted) कापुरुषः, भीरुः; *See* **Coward.**

Craw, *s.* पक्षिजठरः, पक्वाशयः.

Crawl, *v. i.* सृप् 1 P, वि-प्र-सं°, उरसा गम् 1 P, मंदगत्या चल् 1 P. -*s.* गुप्ति *f.*; पोतोद्वरं.

Crayon, *s.* वर्तिका, तुलिका.

Craze, *v. t.* भंज् 7 P, खंड् 10; *See* **Break.** 2 चूर्ण् 10, निष्पिष् 7 P. 3 ज्ञानं ह्न 2 P,

वातुलीकृ 8 U, मुह् c., संभ्रम c. (भ्रमयति). **–ed, –Crazy,** *a.* वातुल, बुद्धिविकल, हतज्ञान, उन्मत्त, भ्रांतचित्त. 2 जीर्ण, जर्जर, जर्जरीभूत. **–edness,** *s.* बुद्धिवैकल्यं, वातुलता, उन्मादः, चित्तभ्रमः. 2 जीर्णता.

Creak, *v. i.* कर्कशशब्दं कृ 8 U, परुषं विरु 2 P or स्वन् 1 P. **–s.** कर्कशशब्दः-ध्वनिः.

Cream, *s.* शरः, क्षीरजं, शार्करः-रकः, क्षीरमंडं. 2 उत्तमांशः, सारः-रं, सारांशः. **–v. i.** शरं बंध् 9 P, फेनायते (D.). **–v. t.** शरं अपनी 1 P. **–y,** *a.* शरमय (यी *f.*), शरोपम.

Crease, *s.* वलि *f.*, वस्त्रभंगः पुटचिह्नं.

Create, *v. t.* सृज् 6 P, निर्मा 3 A, जन् c., (जनयति), उत्पद् c., कृ 8 U, विधा 3 U, प्र-सं-क्लृप् c. 2 पदे-अधिकारे-नियुज् 7 A, 10 or अभिषिच् 6 P; 'a thing c. ed' भूतं. **–ion,** *s.* सर्गः, जननं, सृष्टि *f.*, निर्माणं, विधानं, प्रकल्पनं, भावना; 'a c. of the mind' मानसी सृष्टिः, मनःकल्पितं. 2 उत्पन्नं, भूतं. 3 विश्वं, निखिलजगत् *n.*, सृष्टि *f.*, सर्वभूतानि. **–ive,** *a.* जनक, कल्पक, उत्पादक, निर्माण-रचना in comp.; 'c. genius' निर्माणशक्तिः. **–or,** *s.* स्रष्टृ *m.*, निर्मातृ *m.*, उत्पादकः, जनकः. 2 ब्रह्मन् *m.*, आत्मभूः. परमेष्ठिन् *m.*, पितामहः, विधातृ *m.*, विश्वसृज्, *m.*, धातृ *m.*, प्रजापति *m.*, जगत्कर्तृ *m.*, स्रष्टृ *m.*, विधि *m.*, वेधस् *m.*, स्वयंभूः, चतुराननः, विरिंचि *m.*, कमलयोनि *m.*, अब्जभूः. **–ure,** *s.* भूतं, जंतुः, जीविन्-प्राणिन् *m.*, देहिन् *m.* 2 प्रियः, वत्सः, जातः. 3 आश्रितः, उपजीविन् *m.*, लब्धोदयः; 'he is your c.' स त्वत्तो लब्धोदयः, त्वदुपजीवी.

Credence, *s.* विश्वासः, प्रत्ययः, प्रमाणं; 'worthy of c.' विश्वास्य, प्रमाणं; 'to give c.' विश्वस्-प्रती 2 P.

Credentials, *s.* विश्वासपत्रं, प्रत्ययपत्रं.

Credible, *a.* विश्वसनीय, श्रद्धेय, विश्वास्य, प्रामाणिक (की *f.*). **–Credibility,** *s.* विश्वास्यता, विश्वासपात्रता, प्रामाण्यं. **–Credibly,** *adv.* सप्रमाणं, श्रद्धेयतया, विश्वसनीयतया.

Credit, *s.* विश्वासः, प्रत्ययः, विश्रंभः; 'worthy of c.' विश्रंभभाजनं, विश्वासपात्रं. 2 प्रशंसा, श्लाघा, कीर्ति-ख्याति *f.*, प्रतिष्ठा, यशस् *n.*, स्तुति *f.*, स्तवः. 3 (in commerce) विश्वासः; कालिका; 'buying on c.' उद्धारः. 4 प्रामाण्यं, विश्वास्यता. **–v. t** विश्वस्-प्रती 2 P, सत्य *a.* मन् 4 A. 2 प्रमाणीकृ 8 U. **–able,** *a.* श्लाघ्य, प्रशस्य, कीर्ति-गौरवकर (री *f.*), स्तुत्य. **–ably,** *adv.* श्लाघ्यप्रकारेण, स्तुत्यर्हं; सगौरवं. **–or,** *s.* उत्तमर्णः, ऋणदातृ *m.*, धनिकः.

Credulous, *a.* श्रद्धालु, विश्वासशील, विश्वासिन्, विश्रंभप्रवण, अशंकिन्. **–ness, -Credulity,** *s.* विश्वासशीलता; अशंका, श्रद्धालुता.

Creed, *s.* धर्मः. 2 स्वीकृतमतं-पक्षः.

Creek, *s.* वंकः, वक्रं, खातं. **–y,** *a.* वंकवत्, वक्र.

Creep, *v. i.* सृप् 1 P, वि-सं प्र°, मंदगत्या चल्-मंदं प्रसृ 1 P. 2 अलक्षितं प्रविश् 6 P. 3 शनैः प्रवृत् 1 A. **–er,** *s.* लता, वल्ली, वल्लरी, व्रतति-ती *f.*; 'a branching c.' वीरुध् *f.*, गुल्मिनी, उलपः, प्रतानिनी. 2 सर्पिन्-उरोगामिन् *m.* **–ing,** *s.* विसर्पः-र्पणं, विसरः. **–ingly,** *adv.* सर्पवत्, मंदगत्या; शनैःशनैः.

Cremate, *v. t. See* **Burn.** **–tion,** *s.* दाहः, दहनं.

Crepitate, *See* **Crack.**

Crepuscle, -scular, *See* **Evening.**

Delete, *v. t.* अप-व्या-मृज् 2 P, विलुप् c., विनश् c., उच्छिद् 7 P. –**ion**, *s.* व्यामर्शः, लोपः, उच्छेदः. –**Deleterious**, *a.* विनाशक, घातिन्, हिंस्र, घातुक.

Delf, *s.* मृद्भांडं, मृण्मयद्रव्यं, कौलालकं.

Deliberate, *v. i.* विचार् c., चिंत् 10, विमृश् 6 P, संमंत्र् 10 A, विकल्प् c.; *See* Consider. –*a.* कामतः-विचारपूर्वकं-कृत, विमृश्यकृत. 2 विमृश्यकारिन्, स्ववहित, असाहसिक, अप्रमत्त. –**ion**, *s.* विचारः-रणं-रणा, चिंता, मंत्रणं-णा, विमर्शः, समीक्षा, वितर्कः, विवेचनं, चर्चा. –**ive**, *a.* विचारशील, विचारिन्, विमर्शिन्. –**ly**, *adv.* जानत् with अपि or एव, बुद्धिपुरःसर कामतः, विचारपूर्वकं 2 विमृश्य, समीक्ष्य, अवधानेन, असहसा, अप्रमत्तं. –**ness**, *s.* समीक्ष्य-विमृश्य-कारित्वं, अप्रमादः, सावधानता, अवेक्षा.

Delicate, *a.* मधुर, स्वादु, मिष्ट. 2 ललित, चारु, शोभन. 3 (Soft) मृदु, कोमल, सुकुमार, तनु, श्लक्ष्ण, लघु, प्रतनु, विरल, परि-पेलव; 'd. of person' कोमलांग (गी *f.*), मृदुशरीर; 'a d. woman' तन्वी, तन्वंगी, पेलवांगी. 4 विशिष्ट, उत्कृष्ट, उत्तम. 5 सभ्य, विनीत, शिष्ट, 'of a d. constitution' प्रकृतिकोमल, जन्मरोगिन्. –**ly**, *adv.* ललितं, सुकुमारं; मृदुतया. –**Delicacy**, *s.* माधुर्यं, स्वादुता, सौरस्यं. 2 लालित्यं, लावण्यं. 3 सौकुमार्यं, मार्दवं, पेलवता, तनुता. 4 आदरः, विनयः, शिष्टाचारः, सुशीलता, सौजन्यं. 5 प्रकृतिदुर्बलता. 6 स्वादन्नं, भोजनविशेषः, विशिष्टान्नं

Delicious, *s.* स्वादु, मिष्ट, रुचिकर (री *f.*), मधुर, सुरस, आस्वादवत्. 2 (of beauty &c.) मनोरम-हर, मधुर, कमनीय, रमणीय, हारिन्, चित्ताकर्षिन्. –**ly**, *adv.* स्वादु, मधुरं, मनोरमं. –**ness**, *s.* स्वादुता, माधुर्यं, रम्यता, &c.

Delight, *s.* आह्लादः, आ-प्र-मोदः, सुखं, हर्षः, प्रीति *f.*, प्र-सं-मदः, उल्लासः, शर्मन्, आनंदः, संतोषः, तृप्ति *f.*, मुद्-दा *f.*; 'takes no d. in sports' नाभिनंदति केलिकलाः (Mal. 3); 'thrill of d.' पुलकः, रोमांचः; 'thrilling with d.' आनंदपुलकिततनुः. 2 आनंदनं, आनंददः, हर्षकरः, आनंदहेतुः. –*v. i.* 'to be d.ed' मुद् 1 A, हृष् 4 P, आनंद् 1 P, ह्लाद् 1 A, रम् 1 A, प्री 4 A, सं-परि-तुष् 4 P, उल्लस् 1 P. –*v. t.* सुखयति (D.) causal of roots above. –**ed**, *a.* सानंद, प्रीत, सहर्ष, मुदान्वित, हृष्ट, आह्लन्न, आनंदित, प्रमुदित, सोल्लास, आह्लादित, उल्लसित, साह्लाद. –**ful**, *a.* प्रमोदिन्, प्रामोदिक (की *f.*), आनंदप्रद, हर्षजनन (नी *f.*), आह्लादक, आनंदक, सुखदः रुचिर, कांत, रम्य, रमणीय, मनोहर-रम. –**fully**, *adv.* सानंदं, सहर्षं, साह्लादं; रम्यं, कांतं.

Delimit, *v. t.* मर्यादां कृ 8 U.

Delineate, *v. t.* वर्ण् 10; *See* Describe. 2 आलिख् 6 P, चित्र् 10, चित्रे निविश् c. –**ed**, *a.* चित्रलिखित, चित्रगत, आलिखित, वर्णित. –**ion**, *s.* आलेखनं, वर्णनं. 2 आलेख्यं, चित्रं, चित्रारंभः.

Delinquency, *s.* दोषः-अपराधः, पापं, दुष्कर्मन् *n.*, पापचरितं, अपक्रिया, दुष्कृति *f.* –**Delinquent**, *s.* पापिन्-पापकृत्-अपराधिन् *m.*, सदोषः, कृतापराधः.

Deliquesce, *v. i.* द्रवीभू 1 P, विली 9 P.

Deliquium, *s.* विलयनं, द्रवः.

Delirium, *s.* चित्तभ्रमः, चैतन्यनाशः, ज्ञानभ्रांति *f.* –**Delirious**, *a.* भ्रांतचित्त, नष्टचेतन, चैतन्यरहित.

Deliver, *v. t.* मुच् c., वि-प्र-मोक्ष् 10, उद्-हृ-धृ 1 P, निस्तॄ c., रक्ष् 1 P, परि-त्रै 1 A. 2 समृ c (अर्पयति), न्यस् 4 P, प्रतिपद् c., प्र-दा 3 U, 1 P, संक्रम् c., आरुह् c. (रोपयति), हस्ते निक्षिप् 6 P, हस्तं प्राप् c., हस्तगत-गामिन् *a.* कृ 8 U. (तस्य वसुधामपि हस्तगामिनीमकरोत् R. viii 1); 'shall d. it into his hand (to him)' इमं अस्य हस्तं, प्रापयिष्यामि (S. 3); 'd. ed charge of office' स्वाधिकारं अन्यहस्ते न्यक्षिपत्. 3 उद्-ईर् c., उच्चर् c., उदाहृ 1 P, व्याहृ, वद् 1 P. 4 (Of a message) निविद् c., कथ् 10, आख्या 2 P, आचक्ष् 2 A, शंस् 1 P. 5 (Give back) उत्सृज् 6 P, प्रतिदा, निर्यत् c., (हस्तन्यासं निर्यातय V. 5).

'd. a woman' प्रसवं कृ c., सू c.; 'to be d.ed of' प्रसू 2 A, जन् c. (जनयति), उत्पद् c.; 'was d.ed of a son' सा पुत्रं प्रासूत. **-ance**, *s.* मोचनं, मोक्षः, मुक्ति *f.*, उद्धारः, परित्राणं, रक्षणं, निस्तारणं, मोक्षणं, विमुक्तिः-मोचन. **-er**, *s.* मोचकः, रक्षकः, त्रातृ *m.*, मुक्तिदातृ *m.*, तारकः, उद्धर्तृ *m.* 2 निवेदकः, आख्यायकः. **-y**, *s.* मुक्ति *f.*; *See* **Deliverance**, above. 2 अर्पणं, निक्षेपणं, प्रतिपादनं, संक्रामणं, न्यसनं, प्रदानं. 3 उच्चारणं, उदीरणं, व्याहारः-हरणं; 'a fluent d.' अस्खलितभाषणं, अप्रतिहतभाषणौघः-वाक्सरणिः. 4 निवेदनं, विज्ञापनं, विज्ञप्ति *f.*, कथनं. 5 उत्सर्गः, निर्यातनं, वितरणं. 6 प्रसवः, प्रसूति *f.*, गर्भमोचनं; 'd. bed' अरिष्टशय्या, 'a woman near her d.' आसन्न-प्राप्त-प्रसवा; 'place of d.' अरिष्टं, सूतिकागृहं.

Dell, *s.* दरी, गुहा, कंदरः.

Delude, *v. t.* मुह् c., वंच् 10, प्रलुभ् c., आकृष् 1 P, वि-सं-भ्रम् c. (भ्रमयति); *See* **Cheat** also. **-er**, *s.* मोहकः, वंचकः, प्रतारकः, मायिन् *m.* **-Delusion**, *s.* मोहः, भ्रमः, आभासः, माया, मतिभ्रमः, इंद्रजालं, विवर्तः; 'the world is all a d.' विश्वमिदं मायामयं, असारं, विवर्त एव. 2 वंचनं, प्रतारणा, प्रलोभनं, कपटं. **-Delusive,-Delusory**, *a.* मायामय (यी *f.*), असार, मायिन्, मोहक, ऐंद्रजालिक (की *f.*), मोहिन्, मोह-भ्रांति-जनक.

Deluge, *s.* आप्लावः, संप्लवः, जलप्रलयः, भूतसंप्लवः, तोयविप्लवः; 'universal d.' प्रलयः, महासंप्लवः, संवर्तः, क्षयः, कल्पांतः. 2 धारासंपातः, वारिपूरः, अविरलधारासारः, अतिवृष्टिः *f.* 3 उत्पातः, आकस्मिकी आपद्. *-v. t.* प्लु c., आ-सं°, निमस्ज् c. (मज्जयति).

Delve, *v. t.* खन् 1 P, नि-अव°; उर्वीं भिद् 7 P. *-s.* खातं, विवरं, बिलं, गर्ता-र्तः. **-er**, *s.* खनकः, खनितृ *m.*

Demagogue, *s.* प्राकृतजननायकः, प्रजानायकः.

Demain, Demesne, *s.* स्वाधीना भूमिः.

Demand, *v. t.* प्रच्छ् 6 P, अनुयुज् 7 A, ज्ञा desid. (जिज्ञासते); 'd. of his name' किं तव नामेति पप्रच्छ; 'd. a boon' वरं वृ-5, 9 U. 2 **Claim**, q. v. 3 अर्ह् 1 P; oft. by pot. pass. part.; 'Oh Goddess, Godâvari the matter d.s thy care (attention)' भगवति गोदावरि तत्र त्वया सावधानया भवितव्यं (U. 3); अयमर्थोविक्षामर्हति 'd.s consideration'; 'this offence d.s an atonement of serious expense' भूरिद्रव्यव्ययेनायं दोषः प्रमार्ष्टुं शक्यः, भूरिधनव्ययसाध्यप्रायश्चित्तः दोषः. *-s.* प्रश्नः, अनुयोगः, पृच्छा, जिज्ञासा. 2 अभियोगः, प्रार्थना, याचना; 'on d.' दातुं पृष्टः सन्. **-ant,-er**, *s.* प्रार्थयितृ *m.*, याचितृ *m.*, अभियोक्तृ *m.*, अर्थिन् *m.*

Demarkation, *s.* सीमा-मर्यादा-परिच्छेदः.

Demean (oneself), *v. i.* वृत्ति अनुष्ठा 1 P, चेष्ट् 1 A, वृत् 1 A, व्यवहृ 1 P; *See* **Act. -our**, *s.* वृत्ति *f.*, आचरणं, आचारः, चेष्टितं, व्यवहारः.

Dementate, *v. t.* उन्मद् c. संज्ञां अपहृ 1 P. *-a.* उन्मत्त, नष्टसंज्ञ, मूढचित्त.

Demerit, *s.* अगुणः, दोषः, न्यूनता.

Demi, अर्ध, सामि *ind.* in comp.

Demi-god, *s.* नरदेवः, विद्याधरः, यक्षः, गंधर्वः, उपदेवता, देवयोनिः

Demi-man, *s.* अर्धपुरुषः-नरः, किन्नरः.

Demise, *s.* मृत्युः, मरणं, उपरति *f.* 2 समर्पणं, विधिवत् प्रदानं. *-v. t.* मृत्युपत्रेण प्रदा 3 U.

Demission, *s.* अवपातः, अवसादनं, अपकर्षणं.

Demobilize, *v. t.* *See* **'Disband.'**

Democracy, *s.* प्रजाप्रभुत्वं, प्रजासत्तात्मक राज्यं, प्रजातंत्रं. **-Democrat**, *s.* प्रजातंत्रवादिन् *m.*, प्रजापक्षानुकूलः, प्रजाप्रभुत्वानुग्राहकः, प्रजापक्षावलंबिन् *m.* **-tical**, *a.* सार्वलौकिक (की *f.*), प्रजातंत्रीय.

Demolish, *v. t.* विनश् c., उच्छिद् 7 P, अवसद् c., ध्वंस् c., प्र-वि-°; उन्मूल् 10, उत्पट् 10. **-er**, *s.* विनाशकः, उच्छेदकः. **-Demolition**, *s.* विनाशः, उच्छेदः, प्र-वि-ध्वंसः, उन्मूलनं, उत्पाटनं, अवसादनं.

Demon, *s.* दानवः, असुरः, रक्षस् *n.*, राक्षसः, दैत्यः, दनुजः, दैतेयः, सुरद्विष्; भूतः, पिशाचः, रात्रि(त्रिं)चरः, निशाचरः, यातुधानः. **-iac**, *s.* भूताविष्टः, वेतालोपहतः. *-a.*, **-iacal**, *a.* राक्षस (सी *f.*), पैशाच (ची *f.*), आसुर (री *f.*), (*s.*) in comp. **-ology**, *s.* भूतपिशाच-विद्या.

Demonstrate, *v. t.* साध् c., सिध् c. (साधयति), प्रदृश् c., प्रतिपद् c., उपपद् c., प्रमाणयति (D.); निर्णी 1 P, निर्दिश् 6 P **-ion**, *s.* साधनं, सिद्धि *f.*, उपपत्ति *f.*, प्रतिपादनं. 2 निर्णयः; प्रामाण्यं, सिद्धांतः; 'ocular d.' प्रत्यक्षप्रमाणं-चाक्षुषज्ञानं-प्रमाणं. **-ive**, *a.* दर्शक, निर्देशक, निर्णायक, प्रतिपादक, सिद्धांतकरण. **-ively**, *adv.* सिद्धिपूर्वं, सप्रमाणं, सुव्यक्तं, सोपपत्तिकं. **-or**, *s.* निदर्शकः, प्रतिपादकः, प्रदर्शकः.

Demoralize, *v. t.* धर्माद्-आचाराद्-भ्रंश् c. or च्यु c., आचारं दुष् c. (दूषयति), भ्रष्टीकृ 8 U, दुर्वृत्त *a.* कृ **-ation**, *s.* आचारभ्रष्टता धर्मच्युति *f.*, धर्म-आचार-विप्लवः, अपकर्षः.

Demulcent, *a.* शामक, शांतिद. 2 स्निग्ध, चिक्कण.

Demur, *v. i.* शंक् 1 A, वि-आ°; विचर् c., विकॢप् c., विलंब् 1 A, मनसा दोलायते (D.); सवितर्कं व्याक्षिप् c. *-s.* आशंका-

संदेहः, वितर्कः. विचारणं, विकल्पः; 'without d.' अविचारितं, अविलंबं.

Demure, *a.* विनीत, अतिनम्र, गंभीर, धीर, शांत, सलज्ज, सव्रीड, अवनत; 'with d. looks' सव्रीडवदन. **-ly**, *adv.* सलज्जं, सव्रीडं, धीरं, सविनयं. **-ness**, *s.* विनयः, नम्रता, गांभीर्यं, त्रपा, लज्जा, व्रीडा, ह्रीः.

Den, *s.* विलं, विवरं, गुहा, गह्वरं, कंदरः, कुहरं.

Dengue, *s.* संधिकसंनिपात,

Denizen, *s.* नि-वासिन् *m.*, ओकस् in comp.; 'd.s of heaven' दिवौकसः, &c. 2 पौरः, नागरः, नगरजनः, स्वतंत्रजनः.

Denominate, *v. t.* वद्-भण्-गद् आह्वे 1 P, व्यपदिश् 6 P, अभिधा 3 U, वच् 2 P, ख्या 2 P; *See* **Call** also. **-ion**, *s.* नामन् *n.*, अभिधानं, संज्ञा, आख्या. **-ive**, *a.* अभिधायिन्, आख्यापक. (in grammar) नामधातुः. **-or**, *s.* नामकृत्-नामदातृ *m.* 2 हरः, हारः, छेदः; 'of the same d.' समच्छेद; 'reduced to the same d.' सवर्णित.

Denote, *v. t.* निर्दिश् 6 P, सूच् 10, उपलक्ष् 10, वच् 2 P, अभिधा 3 U, द्युत् c., गम् c. (गमयति); oft. ex. by अर्थ in comp.; *See* **Mean**; 'the word क्षेत्र here d.s body' अत्र क्षेत्रशब्दः शरीरार्थे-र्थः. **-ation**, *s.* निर्देशः; सूचनं; अभिधा-धानं, उपलक्षणं-णा. **-ing**, **-ative**, *a.* सूचक, दर्शक, वाचक, अभिधायक, गमक.

Denouement, *s.* कार्यं, निर्वहणं, निष्ठा.

Denounce, *v. t.* (अमंगलं or अनिष्टं) प्रकाश् c. ख्या c., (ख्यापयति), आ-नि-विद् c., कथ् 10. 2 प्रकाशं तर्ज् 10 A, भर्त्स् 10 A, अभिशप् 1 U, अभिशंस् 1 P, निंद् 1 P, गर्ह् 1, 10 A, आक्रुश् 1 P. **-er**, *s.* अनिष्टावेदकः. 2 अधिक्षेपकः, निंदकः. **-ment**, **Denunciation**, *s.* अनिष्टख्यापनं-प्रकाशनं. 2 निर्भर्त्सना-नं, आक्रोशः, अभिशंसन, निंदा, गर्हा.

Denovean }
Denovo } *adv.* पुनर्, भूयः.

Dense, *a.* घन, निबिड, सांद्र, अविरल, निरंतर, अनंतर, गाढ, गहन. 2 सुसंहत, दृढ, पीवर. **-ity**, *s.* घनता, सांद्रता, आनंतर्यं; पीवरता.

Dent, *s.* प्रहार-आघात-चिह्नं.

Dental, *a.* दंत्य; 'a d. letter' दंत्यं.

Dented, **Dentated**, *a.* दंतुर, भंगुर, अनुक्रकच.

Dentifrice, *s.* दंतशोधनं-धावनं.

Dentist, *s.* दंतवैद्यः-चिकित्सकः.

Dentition, *s.* दंतोद्भेदः, दंतवृद्धि *f.*

Denude, **Denudate**, *v. t.* नग्नीकृ 8 U, विवस्त्रीकृ विवस्त्रयति (D.), वस्त्रं अपहृ 1 P, शून्यीकृ; निर् in comp.; 'a tree d.ed of leaves' निष्पत्रो or निष्पत्रीकृतो वृक्षः.

Deny, *v. t.* अपलप् 1 P, अपवद् 1 P, न स्वीकृ-अंगीकृ 8 U, निषिध् 1 P, प्रत्याख्या 2 P, नि-अप-ह्नु 2 A, प्रत्यादिश् 6 P. **-al**, *s.* अप-नि-ह्नवः, प्रत्यादेशः, निषेधः, अस्वीकारः, प्रत्याख्यानं, अपलापः; 'self d.' आत्मसंयमः, आत्मनिग्रहः. **-er**, *s.* नि-ह्नोतृ *m.*, अपलापिन् *m.*, प्रत्यादेशकः.

Deobstruct, *v. t.* निर्विघ्नीकृ 8 U, विघ्नान् हृ or अपनी 1 P.

Deodand, *s.* देवोपहारः.

Deodorize, *v. t.* दुर्गंधं हृ or अपनी 1 P.

Depaint, *See* **Paint**.

Depart, *v. i.* प्रस्था 1 A, प्रया 2 P, वि-निर्-गम् 1 P. अपक्रम् 1 U, 4 P, अपया, अप-इ 2 P, अपगम् अपसृ-सृप् 1 P; 'whose life has d.ed' वि-गत-जीवितः. 2 प्रे-इ, देहं उत्सृज् 6 P, विपद् 4 A, मृ 6 A, संस्था 1 A; *See* **Die**. **-***v. t.* त्यज् 1 P, हा 3 P, उत्सृज्. **-ed**, *a.* अपगत, व्यपेत 'not d. from the meaning' अर्थादनपेत, अर्थ्य. 2 प्रेत, मृत, दिवंगत, संस्थित, विपन्न. **-ment**, *s.* भागः, विच्छेदः, प्र-वि-भागः. 2 विषयः, प्रकरणं, अंगं. 3 अधिकारः, नियोगः, कर्मन् *n.*, व्यापारः. 4 देशः, विषयः. मंडलं. **-ure**, *s.* अपगमः, अपयानं, प्रस्थानं, प्रयाणं, अपसरणं, अपसृति *f.*, निर्गमः, अपक्रमः. 2 देहत्यागः, संस्थिति *f.*, मरणं, उपरति *f.*

Depend, *v. i.* अवलंब् 1 A, प्रलंब्. 2 अव-आलंब्, आश्रि 1 U, संश्रि; निबंधन, तंत्र, अधीन, आयत्त, वश, in comp.; 'every thing d.s on fate' सर्वं दैवाधीनं-यत्तं; मम प्राणास्त्वदाशानिबंधना (M. 4); oft. by अपेक्ष् 1 A. व्यपेक्ष्; *See* below. 3 अनु-उप-जीव् 1 P. 4 (rely) विश्वस् 2 P (with loc.); सम्-ऋ c. (अर्पयति.); 'I d. upon you alone' त्वय्येव मे विश्वासः; 'd. upon it, I shall starve myself to death' मया प्रायोपवेशनं कृतं विद्धि (P. iv. 1); 'd. upon it' असंशयं, नियतं, नूनं, खलु. 5 संबंध्-, प्र-अनु-संबंध् pass., समनु-इ 2 P. **-ance**, **-ence**, *s.* अवलंबनं, आश्रयः, संश्रयः, निष्ठा, तंत्रता, निबंधनं, अधीनता; 'mutual d.' परस्परनिबंधनं, अन्योन्याश्रयः. 2 पराधीनता, परवशता, परवत्ता, पारतंत्र्यं. परायत्तत्वं. 3 विश्वासः, प्रत्ययः. 4 संबंधः, अनुषंगः, समन्वयः, संपर्कः. **-ency**, *s.* आयत्तता, अधीनता, &c. 2 अधीनः प्रदेशः, अन्यतंत्रं राज्यं. **-ant**, **-ent**, *a.* प्रलंब. 2 अधीन, आयत्त, आश्रित, अवलंबिन्, वश, संबद्ध, निघ्न-तंत्र in comp. 3 (d. on another) पराश्रित, पराधीन, परतंत्र. परायत्त, परवश, परवत्; 'd. on a cause' निमित्तसव्यपेक्षः (Mal.

-s. उप-अनु-जीविन् *m.*, आश्रितः, परायत्तो जनः, भृत्यः, परिवारः.

Depict, *v. t.* आलिख् 6 P, वर्ण् 10, निर्दिश् 6 P.

Depilation, *s.* लो(रो)महरणं, उल्लुंचनं. **-Depilatory,** *a.* केशनाशक, लोमहारिन्.

Depilous, *a.* अकेश, रो(लो)महीन

Deplete, *v. t.* शून्यीकृ 8 U, रिच् c. निःशिष् c. **-ion,** *s.* अवक्षयः, निःशेषता, रिक्तता, शून्यत्वं, शून्यीकरणं.

Deplore, *v. t.* शुच् 1 P, विलप् 1 P, परिदेव् 1 A, परिदिव् 10 A; *See* **Lament.** **-ably,** *adv.* शोच्यप्रकारेण, शोचनीयं. **-er,** *s.* परिदेवकः, अनुशोचकः.

Deploy, *v. t.* विस्तृ 9 U (सैन्यव्यूहान्).

Deplume, *v. t.* पक्षान् उत्पट् 10 or उद्हृ 1 P, निष्पक्षीकृ 8 U. **-ation,** *s.* पक्षोत्पाटनं.

Depone, *v. i.* सशपथं वद् 1 P or कथ् 10, शपथपूर्वं उपक्षिप् 6 P or उपन्यस् 4 U. **-ent,** *s.* साक्षिन् *m.* 2 अकर्तरि क्रिया.

Depopulate, *v. t.* निर्जनीकृ 8 U, विजनीकृ, नरशून्य *a.* कृ; उपपीड् 10, बाध् 1 A, समुच्छिद् 7 P. **-ion,** *s.* निर्जनीकरणं. 2 उपप्लवः, उच्छेदः, उपपीडनं, बाधा. **-or,** *s.* उच्छेदकः, उपपीडकः, विप्लवकारिन् *m.*

Deport, *v. t.* प्रव्रज् c., निः-प्र-वि-वस् c., देशांतरं गम् c. (गमयति). *-v. i.* (oneself) आचर्-व्यवहृ 1 P, वृत् 1 A; *See* **Act.** **-ation,** *s.* प्र-वि-वासनं, प्रव्राजनं. **-ment,** *s.* वृत्ति *f.*, आचरणं, चेष्टितं, व्यवहारः, वृत्तं.

Depose, *v. t.* (राज्यात् or अधिकारात्) अवरुह् c. (रोपयति), भ्रंश् c., पत् c., च्यु c. *-v. i.* साक्ष्यं दा 3 U, वद् 1 P, वच् 2 P, कथ् 10. **-ition,** *s.* साक्ष्यं, साक्ष्यदानं. 2 (Deposal) राज्यभ्रंशः-च्युति *f.*, राज्यावरोपणं, अधिकारच्युतिः-भ्रंशः.

Deposit, *v. t.* निक्षिप् 6 P, न्यस् 4 P, निधा 3 U, आधा, ऋ c. (अर्पयति), आधीकृ 8 U. *-s.* न्यासः, निक्षेपः, आधिः, उपनिधिः. 2 किट्टं, शेषः, खलं, कालुष्यं, मलः-लं. **-ary,** *s.* निक्षेपग्राहकः, न्यासधारिन् *m.* 2 विश्वासस्थानं-पात्रं-भूमि *f.* **-or,** *s.* निक्षेपिन् *m.*, न्यासकर्तृ *m.* **-ory,** *s.* आधारः, आशयः, निधानं, निधिः, भाजनं, आगारं, संग्रहस्थानं.

Depot, *s.* अगारं, शाला, स्थानं, आलयः, 'book d.' पुस्तकालयः, ग्रंथशाला; 'military d.' युद्धसामग्र्यागारं.

Deprave, *v. t.* दुष् c. (दूषयति) भ्रंश् c. मलिनीकृ 8 U, कलुषयति (D.). **-ed,** *a.* दुराचार, भ्रष्ट, दुष्ट, खंडितवृत्त, दुरात्मन्, पापचेतस् दुर्वृत्त, भ्रष्टशील, कलुषाचार. **-edness,-ity,** *s.* दुष्टता, भ्रष्टता, दुष्टभावता, दौरात्म्यं, दुराचारता, दौर्जन्यं, कालुष्यं, दुर्वृत्तता.

Deprecate, *v. t.* (प्रार्थनापूर्वकं) निवार् 10, व्यावृत् c., मा भूदिति याच् 1 A. 2 अनुशुच् 1 P. **-ion,** *s.* निवारणार्थं प्रार्थनास्तवः. **-ive,-atory,** *a.* अनिष्टनिवारक.

Depreciate, *v. t.* अर्घतः पत् c., अवमन् 4 A, लघूकृ 8 U, लघु मन्, मूल्यं न्यूनीकृ, अवक्षिप् 6 P, अपलप् 1 P, अपकृष् 1 P. **-ion,** *s.* लघूकरणं, अवमानना, अपकर्षः, अपलापः.

Depredate, *v. t.* अपहृ 1 P, लुंट्-ठ् 1 P, 10, उपप्लु 1 A, उपद्रुत्य ग्रह् 9 P. **-ion,** *s.* उपप्लवः, अपहरणं, लुंठनं, लोप्त्रग्रहणं. **-or,** *s.* विप्लवकारिन् *m.*, अपहारकः.

Deprehend, *See* **Apprehend.**

Depress, *v. t.* अवनम् c. (नमयति), पत् c., अपकृष् 1 P, अवपीड् 10, निम्नीकृ 8 U, अवसद् c., भ्रंश् c., अवगाह् 1 A. 2 विषादं नी 1 P, विषद् c., विषण्णीकृ; 'd.ed behind' पश्चादवगाढां (S. 3): 'd.ed in spirits' विषण्ण, म्लान, मुक्तावयव, खिन्नचित्त; *See* **Dejected.** **-ion,** *s.* पातः, अवनमनं, अपकर्षः-र्षणं. 2 विषादः, खिन्नता, अवसादः, उद्वेगः, दौर्मनस्यं, म्लानि *f.*, 'd. of spirits' सत्त्वभ्रंशः.

Deprive, *v. t.* अपनी 1 P, अपहृ 1 P, (with gen. of person); भ्रंश् c., च्यु c. (with abl.); वियुज् 7 A, 10, विनाकृ 8 U, (with instr. of the object deprived). **-ation,** *s.* हरणं, अपचयः, क्षयः, लोपः, हानि *f.*, नाशः. **-ed,** *a.* हृत, अपहृत, हीन, वियुक्त, भ्रष्ट, विरहित, विनाकृत (gen. in comp.); वीत-लुप्त निर् in comp.; 'd. of wealth' निर्धन, लुप्तवित्त; 'd. of authority' भ्रष्टाधिकार, पदभ्रष्ट; 'to be d.' हा pass.; परिहा, वियुज् pass.

Depure, Dupurate, *See* **Purify.**

Depute, *v. t.* नियुज् 7 A, 10, प्रेर् c., प्रेष् c., प्रहि 5 P, समादिश् 6 P (of a person); निक्षिप् 6 P, न्यस् 4 P, (of business). **-ation,** *s.* नियोजनं, प्रेरणं, प्रेषणं. 2 नियुक्ताः-समादिष्टाः (pl.), नियोगिगणः, नियुक्तजनाः. **-y,** *s.* प्रतिनिधिः, प्रतिहस्तः-स्तकः, नियोगिन् *m.*; नियुक्तः, प्रतिपुरुषः.

Deracinate, *See* **Eradicate.**

Derail, *v.* लोहमार्गात् निःसृ 1 P, or c.

Derange, *v. t.* विपर्यस् 4 U, विक्षिप् 6 P, क्रमं-व्यवस्थां-भंज् 7 P, or उपहन् 2 P. विक्षुभ् c., संकृ 6 P, आकुलीकृ 8 U. **-ed,** *a.* व्यस्त, अनवस्थित, भग्नक्रम, अव्यवस्थित, विक्षिप्त, संकीर्ण; 'd. in mind' उन्मत्त, भ्रांतचित्त. **-ment,** *s.* व्युत्क्रमः, प्रक्रमभंगः, अव्यवस्था, व्यस्तता, अक्रमः. विसूत्रता, वैलक्षण्यं; 'd. of mind' मतिभ्रमः चित्तविप्लवः, मतिविपर्यासः.

Derelict, *a.* त्यक्त, उत्सृष्ट, परित्यक्त. **-ion,** *s.* त्यागः, उत्सर्गः, उपेक्षा.

Deride, *v. t.* वि-उप-अव-हस् 1 P, उपहासास्पदी कृ 8 U, अवज्ञा 9 U, भर्त्स् 10 A, गर्ह् 1, 10 A; 'to be d. ed' उपहास्यतां गम् 1 P, उपहासास्पदं भू 1 P; 'are d. ed by all' सर्वजनस्योपहास्यतामुपयांति (Ka. 108). **-er,** *s.* उपहासकः, अवक्षेपकः. **-ingly,** *adv.* अवहासेन, उपहासपूर्वं, सोपहासं. **-Derision,** *s.* उप-अव-हासः, अवमानना, धिक्कारः, अवज्ञा, गर्हणं, निर्भर्त्सनं. **-Derisive,** *a.* सोपहास, अवहासगर्भ, अवहासिन्; उपहास्य; गर्ह्य.

Derive, *v. t.* निष्कृष् 1 P, उद्-भू c., जन् c. (जनयति). उत्पद् c., 2 प्राप् 5 P, लभ् 1 A, Ge , q. v.) 3 व्युत्पद् c. निर्वच् 2 P, 10, व्युत्पत्तिं वद् 1 P. **-ed,** *a.* उत्पन्न, उद्भूत; oft. ex. by प्र-, भव-मूल-उद्भव-ज in comp.; 'the race d. ed from the Sun' सूर्यप्रभवो वंशः; 'to be d. ed' उत्पद् 4 A, प्रभू 1 P, जन् 4 A, उद्-भू, निर्गम् 1 P. **-ation,** *s.* व्युत्पत्ति *f.*, निर्वचनं, शब्दोत्पत्ति *f.*, शब्दयोनि *f.* **2** प्रभवः, उद्भवः, योनि *f.*, मूलं, निर्गमः. **-ative,** *a.* व्युत्पन्न; यौगिक (की *f.*); 'd. suffixes' तद्धितप्रत्ययाः. **-s.** साधितः शब्दः, व्युत्पन्नः शब्दः.

Dermis, *s. See* **Skin.**

Derogate, *v. t.* अल्पीकृ 8 U, न्यूनीकृ, लघयति (D.); *See* **Depreciate.** **-ion,** *s.* लघूकरणं, अपमानः, गौरवन्यूनता अवमानना, लाघवं. **-ory,** *a.* अननुरूप, अकीर्तिकर, लाघवकारिन्, असदृश शी *f.*), अयशस्कर (री *f.*).

Dervise, *s.* संन्यासिन् *m.* (महंमदीयः).

Descant, *v. i.* सविस्तरं व्याख्या 2 P, वि-वृ 5 U, विस्तरेण वर्ण् 10. **2** गै 1 P, वर्ण् 10. **-s.** वचनं, वादः, प्रवादः, भाषितं. **2** गीतं.

Descend, *v. i.* अवतॄ-अवरुह्-अवपत् 1 P, निपत्, च्यु 1 A, भ्रंश् 1 A, 4 P. **2** आ-अभि-गम् 1 P, प्रविश् 6 P. **3** (upon) अभिद्रु 1 P, अभियात् 1 P, आक्रम् 1 U, 4 P; *See* **Attack.** **4** (from) उत्पद् 4 A, प्र-उद्-भू 1 P, जन् 4 A; *See* **Derive.** वंश-कुल क्रमेण आगम् 1 P, or या 2 P, परंपरया प्राप् pass.; 'd. into details' सविस्तरं वर्ण् 10, विस्तरशः वद् 1 P, प्रपंच मि (D.). **-v. t.** Causal of roots (1) above. **-ant,** *s.* वंश्यः, वंशजः, अपत्यं, संतति *f.* प्रसूति *f.*, संतानः; 'd. s.' पुत्रपौत्राः, कुलसंततिः, वंशः, अन्वयः, कुलं; 'male d.' पुत्रसंतानः. **-ed,** *a.* अवतीर्ण, अधोगत; 'lineally d.' कुलक्रमागत, वंशपरंपराप्राप्त, क्रमायात, पितृप्राप्त; 'to be d.' उत्पद्, जन्, gen. by derivative affixes; 'd. from Puru' पौरवः. **-ent,** *a.* अवरोहिन्, अधोगामिन्. **-Descent,** *s.* अवतरणं, अवपातः, अवरोहः-हणं, अवतारः. **2** आक्रमः, अवस्कंदः, अभिद्रवणं. **3** जन्मन् *n.*, उत्पत्ति *f.*, वंशः, उद्भवः, कुलं; 'of noble d.' कुलीन, कुलोत्पन्न, महाकुलप्रसूत, अभिजात, अभिजनवत्. **4** संतति *f.*, अन्वयः, आवलि-ली *f.*, संतानः-नं. **5** वंशक्रमागमः, अन्वयागमः. **6** अवसर्पिणी भूमिः, प्रवणस्थानं.

Descension, *s.* अवपातः, अधोगमनं, अधःपतनं.

Describe, *v. t.* वर्ण् 10, निर्दिश् 6 P, वि-वृ 5 U, कृत् 10, कथ् 10, निरूप् 10, वच् 2 P, व्याख्या 2 P; 'her splendour can't be d. ed' तस्याः श्रीर्वचनानामविषया. **2** (Draw) लिख् 6 P. **-Description,** *s.* वर्णनं-ना, निर्देशः, व्याख्यानं, कथनं, निरूपणं, विवरणं. **-Descriptive,** *a.* निर्देशक, वाचक, अभिधायिन्, निर्देशिन्. **2** वर्णनपर.

Descry, *v. t.* दूराद् आलोक् 1 A, 10 or दृश् 1 P, or ईक्ष् 1 A, निवर्ण् 10, आलक्ष् 10. **2** ज्ञा 9 U, अवगम् 1 P; *See* **Know.**

Desecrate, *v. t.* दुष् c. (दूषयति), अपवित्रीकृ 8 U, पुण्यत्वं लुप् c., संस्कारहीन *a.* कृ. **-ion,** *s.* दूषणं, संस्कारदूषणं, अपवित्रीकरणं.

Desert, *s.* मरुः, मरुस्थलं-ली, वालुकाप्रदेशः, धन्वन् *m.* **2** गुणः, पुण्यं, योग्यता, पात्रत्वं, पुण्यापुण्यं, अर्हत्वं. **-a.** निर्जन, निर्मानुष (षी *f.*), वन्य, खिल, निर्जल, शून्य, आरण्यक. **-v. t.** त्यज् 1 P, हा 3 P, उत्-वि-सृज् 6 P, रह् 10, (रहयति), अपव्यध् 4 P, **-v. i.** सेनां त्यक्त्वा पलाय् 1 A. **-er,** *s.* त्यागिन् सेनात्यागिन् *m.*, परावर्तकः रणपराङ्मुखः, पलायिन् *m.* **-ion,** *s.* त्यागः, उत्सर्गः; सेनात्यागः, निर्गमनं, अपक्रमणं. **-less,** *a.* निर्गुण, अनर्ह, अयुक्त, अपात्र.

Deserve, *v. t.* अर्ह् 1 P, अर्ह-उचित-योग्य *a.* in comp.; oft. by pot. pass. part. **-ed,** *a.* योग्य, उचित, अर्ह. **-edly,** *adv.* उचितं, योग्यं, न्यायतः. **-er, -ing,** *a.* अर्हत् गुणवत्, अर्ह, उचित, योग्य, पात्र; 'd. of' ex. by pot. pass. part. 'd. of pity' अनुकंप्य, &c. **-s** गुणः, पात्रता, योग्यता, अर्हत्वं.

Deshabille, *See* **Dishabille.**

Desiccate. *v. t.* शुष् c., आचम् 1 P, **-v. i.** शुष् 4 P, **-ion,** *s.* शोषणं, परिशोषः. **-ive,** *a.* शोषक. **-Dessicants,** *s.* व्रणशोषकाः.

Desiderate, *See* **Desire.** **-ive,** *a.* इच्छार्थक, सन्नंत. **-Desideratum,** *s.* अभीष्टवस्त्वभावः.

Design, *v. t.* परि-सं-कल्प् c., अनुसंधा 3 U, व्यवसो 4 P, अभि-प्र-इ 2 P. उद्दिश् 6 P; चिंत् 10, घट् c. (घटयति), मनः-मतिं कृ.

8 U. 2 प्र-वि-नि-युज् 7 A, 10. 3 आलिख् 6 P, सूत्रपातं कृ. —s. अभिप्रायः, अर्थः, आकांक्षा, उद्देशः, संकल्पः, आशयः, हेतुः, चिकीर्षितं, प्रयोजनं, कार्यं. 2 उपायः, चिंता, कल्पना, घटना, विधानं, व्यवसायः. 3 आलिखनं, सूत्रपातः, संस्कारः. **-edly,** *adv.* कामतः, यथाकामं, इच्छातः, बुद्धिपुरःसरं. **-er,** *s.* चिंतकः परिकल्पकः. 2 आलेखकः, सूत्रपातकः. **-ing,** *a.* उपजापिन्, मायिन्, छलिन्, वंचनशील, प्रतारक, विदग्ध, कपटपटु, धूर्त. **-less,** *a.* निरर्थक, निष्प्रयोजन.

Designate, *v. t.* उप-लक्ष् 1 U, अप-व्यप-दिश् 6 P, निर्दिश्, सूच् 10, सुत c., अभिधा, 3 U, निर्वच् 2 P. गम् c. (गमयति). 2 नियुज् 7 A, 10, परि-सं-कॢप् c. **-ing,** *s.* लक्षणं, उपलक्षणं, चिह्नं निदर्शनं, अभिधानं, संज्ञा, आख्या, नामन् *n.*

Desire, *v. t.* इष् 6 P, वांछ् 1 P, कम् 10 A, स्पृह् 10 (with dat.), ईह् 1 A. आकांक्ष् 1 U, अभिलष् 1. 4 P oft. ex. by desid. of roots. 2 अर्थ् 10 A, याच् 1 A, वृ 5 U. —*s.* इच्छा, अभिलाषः, कामः, ईहा, आकांक्षा, समीहितं, आशा, इष्टं, ईप्सितं, मनोरथः, स्पृहा, अभीष्टं; 'according to one's d.' यथाकामं, यथेष्टं, स्वेच्छातः, स्वच्छंदं, स्वरुच्या; 'ardent d.' लालसा, औत्सुक्यं, उत्कंठा, लोभः, तृष्णा. **-able,** *a.* स्पृहणीय, काम्य. 2 इष्ट, प्रशस्त, श्रेयस्. **-ous,** *a.* सस्पृह, वांछिन्, इच्छु, ईप्सु; oft. by desid. forms; 'd. to speak.' विवक्षुः; 'd. to take' जिघृक्षुः or by काम or मनस् in comp. with i f.; 'd. to take' आदातुकामः मनाः.

Desist, *v. i.* विरम् 1 P. निवृत् 1 A. विश्रम् 4 P. (with abl.) *See* **Cease.** **-ance,** *s.* विरामः, निवृत्ति *f.*, विश्रमः.

Desk, *s.* लिखनफलकः, लेखनाधारः.

Desolate, *a.* निर्मानुष (षी *f.*), निर्जन, शून्य, विविक्त, वसतिहीन, विजन. 2 उच्छिन्न, जीर्ण, उद्ध्वस्त, उत्सन्न. 3 असहाय, निराश्रय, अगतिक, अनाथ —*v. t.* उच्छिद् 7 P, अवसद् c., निर्जनीकृ 8 U; उपपीड् 10, शून्यीकृ, प्रबाध् 1 A. **-ion,** *s.* उच्छेदः, अवसादनं, वसतिनाशः, निर्जनीकरणं. 2 शून्यता, निर्जनत्वं, विविक्तता.

Despair, *v. i.* निराश *a.* भू 1 P, आशां हा 3 P, नैराश्यं गम्-व्रज् 1 P, विषद् 1 P, भग्नाश *a.* भू; 'd. of success' जयविषये निराशीभू. —*s.* नैराश्यं, निराशता, आशाहीनता, वैक्लव्यं, विषादः; 'being in d.' त्यक्ताश, गताश. **-Desperate,** *a.* निराश, आशातीत, त्यक्ताश, आशाहीन. 2 जीवितनिरपेक्ष, आततायिन्, निर्भय, साहसिक (की *f.*) 3 निष्प्रतीकार, उग्र, संरब्ध, साहसद्योतक, अत्यंत; 'a d. act' साहसं, आततायिता. **-ly,** *adv.* जीवितनिरपेक्षं, प्रसह्य, उग्रं, उन्मत्तवत्. 2 अति-सु pr.; अत्यंतं, भृशं. **-ness,** साहसिकता, उन्मादः, संरंभः जीवितनिरपेक्षता.

Despatch, *v. t.* (सत्वरं) प्रेष् c., प्रहि 5 P. प्रस्था c. (प्रस्थापयति), विसृज् 6 P. 2 शीघ्रं, झटिति संपद् c. त्वर् c. (त्वरयति), आशु संविधा 3 U. 3 हन् 2 U. व्यापद् c.; *See* **Kill.** —*s.* त्वरा, शीघ्रता, शीघ्रकारित्वं, अदीर्घसूत्रता. 2 पत्रं, राजलेखः-लेख्यं, वाचिकपत्रं. 3 धावकः, प्रजविन् *m.*, वार्ताहरः, दूतः. **-ful,** *a.* त्वराशील, शीघ्रकारिन्, अविलंबिन्, अदीर्घसूत्र.

Desperado, *s.* साहसिकः, प्रसह्यचोरः, साहसिन् *m.*, आततायिन् *m.*, वधोद्यतः.

Despise, *v. t.* अवज्ञा 9 U, तिरस्कृ 8 U, अवमन् 4 A, परिभू 1 P. अवधीर् 10; *See* **Contemn.** **-er,** *s.* अवमंतृ *m.*, अवज्ञातृ *m.*, निंदकः. **-ingly,** *adv.* सावज्ञं, सावमानं. **-Despicable,** *a.* अवमान्य, अवज्ञेय, गर्ह्य, निंद्य, नीच, निकृष्ट, अधम, तुच्छ, कुत्सित, क्षुद्र.

Despite, *s.* द्वेषः, जुगुप्सा, मात्सर्यं, ईर्ष्या, अभ्यसूया, असूया. 2 प्रतिरोधः, प्रतिकारः; 'in d. of' (prep.) अनादृत्य, अवगणय्य, or gen. abs.; 'd. the (presence of the) teacher' पश्यतोपि गुरोः; *See* 'in spite of' under **Spite.** **-ful,** *a.* द्वेषिन्, सासूय, अभ्यसूयक, मत्सरिन्, द्रोहबुद्धि. **-fully,** *adv.* सद्वेषं, सद्रोहं, ईर्ष्यया. **-fulness,** *s.* मात्सर्यं, असूया, दौर्जन्यं, द्रोहः, द्रोहबुद्धि *f.*

Despoil, *v. t.* हृ 1 P, अपहृ; *See* **Deprive;** 'd. ed of everything' हृतसर्वस्व. **-er,** *s.* अपहारकः. **-Despoliation,** *s.* अपहरणं.

Despond, *v. i.* निर्विद् 4 A, नैराश्यं-निर्वेदं-विषादं-गम् 1 P or आपद् 4 A, विषद् 1 P, आशां त्यज् 1 P, अंगानि मुच् 6 P. **-ency,** *s.* निर्वेदः, विषादः, नैराश्यं, उद्वेगः, अवसादः, विषण्णता. **-ent, -ing,** *a.* निर्विण्ण, विषण्ण, निराश, त्यक्ताश, म्लान, उद्विग्न; 'do not take a d. view' मा भवानंगानि मुंचतु (V. 2). **-ingly,** *adv.* सविषादं, सनिर्वेदं.

Despot, *s.* प्रजापीडकः, लोकोपप्लवकः, 2 अधीश्वरः, सम्राज् *m.*, सार्वभौमः, चक्रवर्तिन् *m.* **-ic, -ical,** *a.* स्वतंत्र, निष्प्रतिबंध, अनियंत्रण, अनियत, निर्यंत्रण. **-ically,** *adv.* स्वैरं, स्वेच्छातः, कामचारेण. **-ism,** *s.* प्रजापीडनं, निष्ठुरशासनं, प्रजोपप्लवः, स्वेच्छाचारित्वं, स्वेच्छाप्रभुत्वं; निर्यंत्रणाराज्यसरणिः *f.*

Despumate, *v. i.* उत्सिच् pass., फेनायते (D.)

Dessert. *v. t.* (भोजनांते) फलाहारः.

Destine, *v. t.* (**Destinate**) निरूप् 10, परि-प्र-कॢप् c., निर्दिश् 6 P, नियुज् 7 A, 10.

समुपस्था 1 U, (न जाने भोक्तारं कमिह समुपस्थास्यति विधिः S. 2); oft. ex. by pot. pass. part., with or without अवश्यं, नूनं; ‘ he is d. ed to be a king ’ अनेनावश्यं राज्ञा भवितव्यं; ‘man is d. ed to die’ मनुष्या नश्वराः ; ‘ who is able to avoid what is d. ed for him ’ लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ; तथा भवितव्यतया च तस्य तस्य वस्तुनः (Ka. 143) ‘ every thing being d. ed to occur ’ &c. **-ation,** *s.* ईप्सितं स्थानं, इष्टः प्रदेशः, निरूपित-निर्दिष्ट-स्थानं. 2 उपयोगः, प्रयोजनं, उद्देशः ; अर्थः, अभिप्रायः. **-y,** *s.* दैवं, भवितव्यता, नियति, *f.*, भाग्यं, भागधेयं; विधातृ *m.*, विधिः, दिष्टं, अदृष्टं, प्राक्तनं.

Destitute, *a.* निर्धन, अर्थहीन, निराश्रय, दुर्गत, अशरण, दीन, अकिंचन, दुःस्थित. 2 (of) हीन, रहित, वर्जित, शून्य, वियुक्त, हृत, विहीन, परिहीण, with instr. or in comp.; gen. by निर्-अ-वि- in comp.; ‘ d. of courage ’ धैर्यहीन-शून्य, &c.; निरुत्साह ‘ d. of energy ’; ‘ d. of hands and feet ’ अपाणिपाद. **-ion,** *s.* दैन्यं, धनाभावः, अकिंचनत्वं, दारिद्र्यं, निराश्रयता. 2 हीनत्वं, राहित्यं, शून्यत्वं, अभावः, विरहः, वियोगः.

Destroy, *v. t.* नश् c., प्र-वि°; अव-उत्-सद् c., ध्वंस् c., प्र-वि°; विलुप् c., क्षै c. (क्षपयति), क्षि 5 P or c., संहृ 1 P, उत्-निर्वल् c., उच्छिद् 7 P, प्रतिहन् 2 P. 2 (persons &c.) हन् 2 P, निषूद् 10, व्यापद् c., मृ c.; ‘ to be d. ed ’ वि-, नश्, 4 P, ध्वंस् 1 A, क्षयं या-इ 2 P, or गम् 1 P. प्र-वि-ली 4 A. **-er,** *s.* नाशकः, हंतृ *m.*, निषूदनः, घातिन् *m.*, अंतकः, ध्वंसकः, हन्-अपह in comp; ‘d. of Vritra’ वृत्रहा, वृत्रनिषूदनः; ‘ d. of every thing ’ कृतांतः. **-Destructible,** *a.* नश्वर, विध्वंसिन्, भंगुर, क्षयिन्. **-Destruction,** *s.* नाशः, विनाशः, प्रणाशः; प्र-, वि-, ध्वंसः, क्षयः, उच्छेदः, संहारः; उद्दलनं. उत्पाटनं. 2 निषूदनं, घातः, वधः; ‘ d. of the whole world ’ प्रलयः, प्रत्यवहारः, कल्पांतः, संवर्तः. **-Destructive,** *a.* विनाशिन्, क्षयकर (री *f.*), घातिन्, अंतकर, घातुक, अपह-घ्न (घ्नी *f.*) in comp.: ‘ d. to life ’ जीवितापह, प्राणहर, निधनकारिन्.

Desuetude, *s.* विरति *f.*, निवृत्ति *f.*, विच्छेदः, विरामः, प्रवृत्तिविच्छेदः.

Desultory, *a.* असतत, उच्छृंखल, अस्थिर, लोल, अनियत, चंचल, अनवस्थित, अव्यवस्थित.

Detach, *v. t.* विश्लिष् c., विभिद् 7 P, विच्छिद् 7 P, वियुज् 7 A, 10. पृथक् कृ 8 U; *See* **Separate. -ed,** *a.* वियुक्त, विभिन्न, विच्छिन्न; असंसक्त, असंलग्न, गतसंग, विश्लिष्ट, असंगत. **-ment,** *s.* विभागः, वियोगः, विच्छेदः, विश्लेषः, विभेदः. 2 सैन्यदलं, गुल्मः-ल्मं.

Detail, *s.* विस्तरः, विस्तारः; वाग्विस्तरः, प्रपंचः. 2 वृत्तांताख्यानं; ‘ in d. ’ or ‘ d. ed’ सविस्तर (*a.*), विस्तरेण, विस्तरतः-शः, सविस्तरं. **-***v. t.* सविस्तरं-विस्तरेण-वर्ण् 10 or आख्या 2 P. or कथ् 10, प्रपंचयति (D.).

Detain, *v. t.* धृ 1 P, निरुध् 7 U; जामातृयज्ञेन वयं निरुद्धाः (U. 1) ‘ d. ed by reason of ’ &c. 2 निवार् 10, निग्रह् 9 P. 3 (In custody) आसिध् 1 P, बंध् 9 P, निरुध्. **-Detention,** *s.* धरणं, निग्रहः, संरोधः, निरोधः. 2 आसेधः, प्रति-नि-रोधः, बंधनं, बलात्कारेण धरणं.

Detect, *v. t.* निरूप् 10, ज्ञा 9 U, अनुसंधा 3 U, अधि-अव-गम् 1 P; दृश् 1 P, उपलभ् 1 A, आसद् c. 2 धृ 1 P, प्रकाश् c., व्यंज् 7 P; ‘ d. ed in a crime ’ दृष्टदोष; निर्णीतापराध. **-ion,** *s.* ज्ञानं, निरूपणं, अनुसंधानं, उपलंभः, अवगमनं. **-ive,** *a.* (Officer) चरः, चारः, प्रणिधिः, अपसर्पः ; *See* **Spy**

Deter, *v. t.* (सभयं) निवृत् c., निवार् 10, विरम् c. (रमयति), भी c., निरुध् 7 U; *See* **Prevent. -ment,** *s.* निवर्तनं, निवारणं.

Deterge, *v. t.* शुध् c., मलं अपनी 1 P, परिमृज् 2 P. **-ent,** *a.* शोधन (नी *f.*), परिमार्जक.

Deteriorate, *v. i.* क्षि-हा pass., ह्रस् 1 P, क्षयं गम् 1 P; दुष् 4 P, भ्रंश् 4 P, 1 A, अपकृष् pass. **-***v. t.* अपकृष् 1 P, दुष् c. (दूषयति), विकृ 8 U, ह्रस् c. **-ion,** *s.* क्षयः, अपचयः, विकारः. विकृति *f.*, ह्रासः, भ्रष्टता. 2 अपकर्षः, दूषणं.

Determine, *v. t.* निश्चि 5 U, स्था c. (स्थापयति), संक्लृप् c., निरूप् 10, निर्णी 1 P, निर्-अव-धृ 10, निर्दिश् 6 P. लक्ष् 10, परिच्छिद् 7 P. 2 निरूप्, अनुसंधा 3 U, निर्णी (a dispute &c.). **-***v. i.* व्यव-अव-सो 4 P, निश्चयं कृ 8 U; ‘ d. ed to go ’ गमने कृतसंकल्प, गंतुं व्यवसित. **-ate,** *a.* स्थिर, दृढ, निर्धारित, निश्चित, निर्णीत, नियत, सिद्ध, व्यवास्थित. 2 निश्चायक, निर्णायक. 3 (of persons) कृतनिश्चय, दृढसंकल्प, व्यवासित. **-ately,** *adv.* सनिश्चयं, सनिर्णयं, नूनं. **-ation,** *s.* निश्चयः, निर्णयः, संकल्पः, निर्धारणं, व्यवसायः, विचारः, निरूपणं, परिच्छेदः, अवधारणं-णा. 2 अभिनिवेशः, अध्यवसायः, निर्बंधः. **-ative,** *a.* निर्णायक, निर्धारक. **-ed,** *a.* निश्चित. निर्णीत, सिद्ध, नियत, व्यवास्थित, परिच्छिन्न, अवधारित. 2 (of persons) स्थिरनिश्चय, दृढ-कृतसंकल्प, अभिनिविष्ट, कृतनिश्चय. **-edly,**

adv. स्थिरचेतसा, दृढं, दृढनिश्चयेन. **-or,** *s.* निर्णयकृत् *m.*, निर्णेतृ *m.*

Detest, *v. t.* विद्विष् 2 U, गर्ह् 1, 10 A, गुप् desid. (जुगुप्सते) (with abl.); *See* **Abhor.** **-able,** *a.* जुगुप्सित, गर्हित, निंद्य, गर्हणीय, विद्वेष्य. **-ation,** *s.* गर्हा, जुगुप्सा, घृणा, विद्वेषः. **-er,** *s.* द्वेषिन् *m.*, विद्वेष्टृ *m.*

Dethrone, *v. t.* राज्याद् भ्रंश् c. or च्यु c. or अवपत् c. or अवरुह् c. (रोपयति). **-ment,** *s.* राज्यभ्रंशः-च्युति *f.*

Detonate, *v. i.* सहसा स्तन् 1 P or ध्वन् 1 P. **-ion,** *s.* स्तनितं, आकास्मिकध्वनि *m.*

Detort, *See* **Pervert.**

Detract, *v.* अपकृष्-अपनी 1 P. 2 अपलप् 1 P, अपवद्-भाष् 1 A, अधिक्षिप् 6 P, निंद् 1 P, असूयति (D.) (with dat.); मूल्यं न्यूनीकृ 8 U; लघूकृ; *See* **Depreciate.** **-ion,** *s.* अपकर्षः, लघूकरणं, ह्रासः. 2 असूया, अप-परि-वादः, आक्षेपः, गुणनिंदा, पैशुन्यं, परदोषाविष्करणं, मात्सर्यं. **-or,** *s.* अपवादकः, अधिक्षेपकः, निंदकः, असूयकः, परिवादरतः. **-ory,** *a.* अपवादिन्, निंदक, अभ्यसूयक; पिशुन.

Detriment, *s.* हानि *f.*, अपकारः, क्षति *f.*, नाशः, अपायः, बाधा, विरोधः. **-al,** *a.* हानिकर (री *f.*), विरोधिन्, अपायकारक.

Detrude, *v. t.* अवपत् c, अधः क्षिप् 6 P, भ्रंश् c. **-Detrusion,** *s.* अवपातनं.

Detruncate, *v. t.* अवच्छिद् 7 P, निकृत् 6 P, वि-लू 9 U. **-ion,** *s.* अवच्छेदः, निकर्तनं.

Deuce, *s.* द्वयं, द्विकं. 2 पिशाचः, भूतः.

Devastate, *v. t.* उच्छिद् 7 P, उत्-अव-सद् c.; उपपीड् 10, वि-उप-प्लु 1 A, प्रबाध् 1 A, निर्जनीकृ 8 U. **-ion,** *s.* उच्छेदः, उपप्लवः, प्रबाधनं, विनाशः, निर्जनीकरणं.

Develop, *v. t.* पुष् 1, 4, 9 P, प्र-उप-चि 5 U, प्र-सं-वृध् c.; 'she d. ed her lovely limbs' पुपोष लावण्यमयान् विशेषान् (K. I. 25); also प्रचीयमानावयवा R. III. 7) उपचितांगी. 2 विकस् c., विस्तृ c., उद्भिद् c.: तस्य (कार्योत्क्षेपस्य) विस्तारमिच्छन् (Mu. 4) 'wishing to d. it.' **-***v. i.* प्र-उप-चि pass., उद्भिद् pass., क्रमशः विकस् 1 P, क्रमेण प्र-सं-वृध् 1 A. **-ment,** *s.* प्रचयः, उपचयः, संवर्धनं; विस्तारः, विकासः, उद्भेदः.

Devergence, *See* **Divergence.**

Deviate, *v. i.* अति-व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, अति-व्यभि-चर् 1 P; 'did not d. even an inch from the beaten path' क्षुण्णाद्वर्त्मनो रेखामात्रमपि न व्यतीयुः (R. I. 17); अप-या-इ 2 P, चल् 1 P, प्रवि-°; च्यु 1 A, भ्रंश् 4 P, 1 A, (with abl.). **-ion,** *s.* अतिक्रमः, विचलनं, च्युति *f.*, भ्रेषः, भ्रंशः, व्यभिचारः, त्यागः; 'd. from the right path' उत्पथयानं, विमार्गगमनं.

Device, *s.* उपायः, युक्ति *f.*, प्रयोगः, कल्पना, साधनं. 2 अप-व्यप-देशः, छलं, माया, छद्मन् *n.*, कैतवं, व्याजः. 3 लक्षणं, चिह्नं, अंकः. 4 निर्माणशक्ति *f.*, कल्पनाचातुर्यं.

Devil, *s.* भूतः, वेतालः, पिशाचः; 'I shall not raise a d. for my own destruction' नाहमात्मविनाशाय वेतालोत्थापनं करिष्यामि.

Devious, *a.* वक्र, कुटिल, जिह्म. 2 मर्यादातिक्रामिन्, व्यभिचारिन्.

Devise, *v.* चिंत् 10, उप-सं-क्लृप् c., निरूप् 10, युज् 7 U, 10, आ-पर्या-लोच् 10, घट् c. 2 इच्छापत्रेण प्रदा 3 U. **-***s.* इच्छापत्रेण रिक्थदानं. **-er,** *s.* धनाधिकारिन्, *m.* **-er,** *s.* उपायज्ञः, परिकल्पकः, प्रयोजकः.

Devoid, (of), *a. See* **Destitute** (of).

Devoir, *s.* स्वकर्तव्यं, कर्तव्यता, धर्मः. 2 सत्कारः, आदरः, पूजा, संमानः.

Devolve, *v. t.* निक्षिप् 6 P, न्यस् 4 P, संक्रम् c., सम्-ऋ c. (अर्पयति), आरुह् (रोपयति) 'having d. ed their property upon their sons' पुत्रसंक्रांतलक्ष्मीकाः (U. 1); गुणवत्सुतरोपितश्रियः (R. VIII. 11). 2 प्रपत् c., प्रसृ-प्रवह् c. **-***v. i.* आगम् 1 P, आया 2 P, पत् 1 P, संक्रम् 1 U, 4 P; न्यस्-निक्षिप्-समृ c. pass.; 'after his death the kingdom d. ed upon his eldest son' मृते तस्मिंस्तस्य ज्येष्ठपुत्रो राजपदभाग्बभूव. 2 अधः पत् 1 P, अवपत्. **-Devolution,** *s.* निक्षेपणं, समर्पणं, संक्रामणं.

Devote, *v. t.* प्र-विनि-युज् 7 A, 10, सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, उत्सृज् 6 P, सं-उप-क्लृप् c. 2 (Oneself to) आसंज्-अनुरंज्-pass., मनः युज् or बंध् 9 P or अभिनिविश् c., आसक्त-अभिनिविष्ट *a.* भू (all with loc.); भज् 1 U, आसेव् 1 A. 3 नाशाय क्लृप् c; *See* **Doom.** **-ed,** *a.* सक्त, आ-प्र-व्या-सक्त; नि-, रत, अभिनिविष्ट, समाहित, पर-तत्पर-परायण in comp. 2 भक्त, दृढभक्ति, अनुरक्त, अनुरागिन्; 'd. to the king' राजनिष्ठ, नृपासक्तचित्त; 'a d. wife' एकपत्नी, पतिव्रता, साध्वी, सती, 'a d. husband' भार्यानिरतः, पत्नीसेविन् *m.* 'a d. friend' स्थिरप्रेम मित्रं, रूढसख्यः सुहृद्. **-edly,** *adv* चित्तैकाग्रतया, भक्त्या, निष्ठया, अभिनिविष्टं, मनोभिनिवेशेन, मनोयोगेन, सुसमाहितं. **-edness,** *s* आसक्ति *f.*, भक्ति *f.*, अभिनिवेशः, परायणता. **-ee,** *s.* तापसः, यतिः, योगिन् *m.*, तपस्विन् *m.*, मुनिः, व्रतिन् *m.* 2 भक्तजनः, प्रणयिजनः, उपासकः, भक्तः. **-ion,** *s.* अभियोगः, अभिनिवेशः, अनुरागः

सेवा, उपासना, प्रसक्ति f., आसक्ति f., भक्तिः, निरति f., तत्परता. 2 नित्यः धर्मक्रिया, तपस् n. ईश्वराराधनं, सेवा. 'self-d.' आत्मोत्सर्गः परित्यागः; 'd. to a husband' पातिव्रत्यं, पतिभक्तिः; 'to perform d.s' तपश्चर् 1 P or तप् 4 A, तपस्यति (D.). -ional, a. धार्मिक, धर्मनिष्ठ, भजनशील. 2 धर्मक्रियाविषयक, तपोमय (यी f.).

Devour, v. t. भक्ष् 10, अद् 2 P, खाद् 1 P, ग्रस् 1 A, गृ 6 P. 2 उपयुज् 10, उपयोगेन विनश् c. **-er,** s. भक्षकः, खादकः.

Devout, a. धार्मिक, धर्मपरायणशील, धर्मनिष्ठ, धर्मात्मन्, भक्त, ईश्वरनिरत, पुण्यशील, प्रयतात्मन्, पुण्यात्मन्. **-ly,** adv. भक्त्या, भक्तिपूर्वकं, भक्तिपुरःसरं, श्रद्धान्वितं. **-ness,** s. धार्मिकता, धर्मात्मता, ईश्वरनिष्ठता, भक्ति f.

Dew, s. नीहारः, अवश्यायः, तुषारः, प्रालेयं, हिम-रात्रि-ख-जलं. -v. t. नीहारेण सिच् 6 P or प्रोक्ष् 1 P; 'd. drop' तुषारकणः-बिंदुः-शीकरः, and in comps. **-y,** a. तुषारमय (यी f.), अवश्यायावसिक्त: तुषारकणोपम.

Dexterous, a. कुशल, निपुण, पटु, दक्ष, लघुहस्त, करदक्ष. **-ly,** adv. निपुणं, दक्षतया, सपाटवं, हस्तलाघवेन. **-Dexterity,** s. दक्षता, पटुता, नैपुण्यं, हस्तकौशलं, हस्तलाघवं.

Dextral, a. दक्षिण, अपसव्य, दक्षिणपार्श्वस्थ.

Diabetes, s. मधुमेहः, प्रमेहः, बहुमूत्ररोगः.

Diabolical, a. पैशाच (ची f.), पिशाचोपम. 2 घोर, दारुण, पापिष्ठ, अतिघोर-पाप, अतिनिंद्य.

Diacoustics, s. ध्वनिविद्या.

Diadem, s. मुकुटं, किरीटः-टं, मौलिः, उष्णीषः-षं, शिरोवेष्टनं; 'd.-ed' किरीटिन्, किरीटधारिन्.

Diagnosis, s. रोगनिर्णयः निरूपणं, रोगनिदानं, मीमांसा, चिकित्सा.

Diagnostic, s. रोगलक्षणं-चिह्नं.

Diagonal, s. कर्णः, श्रुति f. **-ly,** adv. कोणाकोणि, कर्णाकर्णि.

Diagram, s. चित्रं.

Dial, s. शंकुयंत्रं, सूर्यघटी

Dialect, s. प्राकृतभाषा, भाषा (as opposed to संस्कृत). 2 भाषणं, वचनं, उक्ति f.

Dialectic, s. तर्कः, न्यायः, हेतुविद्या, आन्वीक्षिकी विद्या. **-al,** a. तार्किक (की f.), न्यायिन्. **-ian,** s. तार्किकः, नैयायिकः, न्यायविद् m.

Dialogue, s. संलापः, संवादः, संकथा, संभाषणं, प्रश्नोत्तरं, कथोपकथनं. **-Dialogist,** s. संवादकः, उत्तरप्रत्युत्तरदायकः.

Diameter, s. व्यासः, विष्कंभः. **-Diametrically,** adv. विपरीतं, प्रतिकूलं, अत्यंतं, एकांततः.

Diamond, s. वज्रः-ज्रं, हीरं, हीरकः; 'd. cutter' हीरकारः-मार्जकः.

Diapason, s. स्वरसप्तकं, स्वरग्रामः.

Diaper, s. चित्रितं क्षौमं. -v. t. क्षौमं चित्र् 10 or कर्बुरीकृ, &c.

Diaphanic, a. स्वच्छ, विशद; See **Clear.**

Diaphoretic, a. स्वेदन (नी f.), स्वेदजनक, घर्मोत्पादक; 'd. medicine' स्वेदनं.

Diaphragm, s. शरीरमध्यदेशः.

Diarrhoea, s. अतिसारः, प्रवाहिका; ग्रहणी-, रुज् f.

Diary, s. दिनपत्रिका, दैनिकवृत्तपुस्तकं.

Diatribe, s. अधिक्षेपः, कुत्सात्मको लेखः.

Dibble, s. लघुखनित्रं.

Dice, s. plural of **Die,** s. q. v.

Dictate, v. t. आज्ञापूर्वकं कथ् 10, आदिश् 6 P, आज्ञा c. (ज्ञापयति). 2 सूच् 10, प्रोत्सह् c., प्रचुद् 10, प्रेर् c.; 'd.-ed by good motives' सदाशयप्रेरित. -s. आज्ञा, आदेशः, शासनं. 2 चोदनं-ना, प्रेरणं-णा. **-ion,** प्रोत्साहनं. 2 आज्ञापनं, आज्ञापूर्वकं कथनं. **-or,** s. एकाधिपतिः, अनन्याधीनः शास्ता, अनियंत्रणः प्रभुः. 2 आदेशकः, शासितृ m. **-orial,** a. अवलिप्त; See **Arrogant.**

Diction, s. भाषा, वाणी, वाक्सरणि f., वचोविन्यासः.

Dictionary, s. कोशः-षः, शब्दसंग्रहः; अभिधानं.

Dictum, s. वचनं, आदेशः, विधिः, नियमः.

Didactic,-al, a. उपदेशपर, प्रबोधक.

Die, s. अक्षः, पाशकः, देवनः; 'a loaded d.' कूटाक्षः. **-Dice,** (pl.) अक्षाः, &c. -v. i. अक्षैः दिव् 4 P, ग्लह् 1 P. **-er,** s. अक्षधूर्तः, अक्षदेविन् m., धूर्तः, कितवः. **-ing,** s. द्यूतं, अक्षक्रीडा; 'd. board' अष्टापदं, शारिफलं; 'd. box' अक्षधारः; 'the die is cast' कृतं दैवाधीनं (अप्रतिविधेयं) कर्म, अधुना यद्भावि तद्भवतु.

Die, v. i. मृ 6 A, प्राणान्-असून्-जीवितं त्यज् 1 P or उत्सृज् 6 P or हा 3 P, पंचत्वं या 2 P or गम् 1 P, उपरम् 1 P; परासु-गतासु-a. भू 1 P, देहं-तनुं त्यज्, प्र-इ 2 P, विपद् 4 A, संस्था 1 A, प्रमी pass. 2 विनश् 4 P, प्रली 4 A, ध्वंस् 1 A, क्षि pass., अवसद् 1 P. 3 म्लै 1 P, विशृ pass. **-Dead,** a. मृत, उपरत, संस्थित, प्रेत, परेत, परासु, गतासु, विपन्न, गतप्राण, विचेतन, प्राणहीन, प्रमीत. 2 निश्चल, निश्चेष्ट, जड, विचेतस्, निःसत्व, असार, निष्फल. 3 सुप्त, स्तब्ध (as of limbs); 'd. body' शवं, मृतशरीरं; कुणपः. 'd. language' अप्रचलिता भाषा; 'd. sleep' घोर-गाढ-निद्रा; 'd. loss' परिपूर्णा-अफला हानिः; 'd. letter' लुप्तार्थं वचनं, 'd. soul' निरभिमानः आत्मा. -s. (Of night) मध्यरात्रः, निशीथः, अर्धरात्रः. 2 मध्यं; See **Depth.** **-en,** v. t. दुर्बलीकृ 8 U, शिथिलीकृ, तेजो हृ 1 P, नश् c.,

म्लानीकृ. -*v. i.* म्लै 1 P, शिथिलीभू. **-ly,** *a.* प्राणापहारक, जीवितापह, मारात्मक, निधनकारिन्, प्राणांतक, प्राणहारिन्, प्राणनाशक, जीवितघ्न (घ्नी *f.*). 2 अशाम्य; 'd. enmity' आमरणांतिकं वैरं, अशाम्यं वैरं; 'd. poison' हाला(ल)हलं विषं. -*adv.* मृतवत्; प्राणांतिकं; 'd. wounded' भिन्नमर्मन्; 'd. pale' प्रेतसवर्ण. **-ness,** *s.* दौर्बल्यं, निःसत्वता, जडत्वं, स्तंभः; वैकल्यं, विरक्ति, *f.*, शिथिलता. **-Death,** *s.* मरणं, मृत्युः, उपरमः, निधनः-नं, अंतः, पंचत्वं-त्ता, संस्थिति *f.*, कालधर्मः, दिष्टांतः, प्रलयः, अत्ययः, नाशः, प्राणनाशः, तनुत्यागः, &c. 2 यमः, कालः, कृतांतः. 3 वधः, घातः, व्यापादनं; 'he was pelted to d.' सलोष्टघातं हतः; 'he was sentenced to d.' तस्य प्राणदंड आदिष्टः; 'to put to d.' हन् 2 P, व्यापद् c., वधं आदिश् 6 P; 'a violent d.' अपमृत्युः; अपघातः; 'angel of d.' यमदूतः; 'd. by fasting' प्रायः, प्रायोपवेशनं; 'd. bed' मृत्युशय्या. **-less,** *a.* अमर, अनश्वर, अमर्त्य, चिरस्थायिन्.

Diet, *s.* आहारः, अन्नं, भोजनं, भक्ष्यं. 2 पथ्यं, पथ्यान्नं, पथ्याशित्वं. 3 राजसभा, शिष्टसभा. -*v. t.* पुष् c., भृ 3 U. 2 पथ्यं निर्दिश् 6 P.

Differ, *v. i.* भिद् pass., प्र-वि-˝; विशिष् pass., (न कारणात्स्वाद्बिभिदे कुमारः R. v. 35); gen. ex. by (*s.*); 'they two do not d.' न तयोर्भेदः, विशेषः, &c. 2 अन्यथा मन् 4 A, न संमन्, विवद् 1 A, भिन्नमत *a.* भू, विप्रतिपद् 4 A, (एवं हि विप्रतिपन्नाः प्राणोत्पत्तिं प्रति श्रुतयः S. B. 702); 'I d. from you' मम मतं त्वन्मताद्भिन्नं. 3 विप्रति-रुध् pass. **-ence,** *s.* भेदः, विशेषः, अंतरं, (with gen.). 2 पार्थक्यं, इतरत्वं, भिन्नत्वं, व्यतिरेकः; 'that makes no d.' तेन न कोपि विशेषो जायते. 3 विरोधः, वैपरीत्यं, विपर्ययः, वैलक्षण्यं. 4 विप्रतिपत्ति *f.*, मतिभेदः, विसंवादः, वैमत्यं; कलिः, कलहः, विवादः. 5 असाम्यं, असादृश्य; 'd. in quantity' वैषम्यं. **-ent,** *a.* भिन्न, वि-प्र-भिन्न, इतर-अन्य-पर-*pron. a.*, व्यतिरिक्त, विपरीत, पृथक्, विशिष्ट, (with abl.); अंतर in comp.: 'she is not d. from my body (myself)' अव्यतिरिक्तेयमस्मच्छरीरात् (Ka. 151); 'a d. sense' अर्थांतरं. 2 असदृश (शी *f.*), असमान, विषम, असम. 3 विविध, नानाप्रकार, नाना in comp.; तत्तत् *pron. a.*, 'd. S'âstras' तानि तानि शास्त्राणि; 'in a d. way' अन्यथा, भिन्नप्रकारेण. **-ential,** *a.* भेदकर (री *f.*), विशेषक. **-ently,** *adv.* अन्यथा, इतरथा, भिन्नरूपेण; अन्यप्रकारेण, पृथक्.

र, कठिन, दुष्कर, :साध्य, कष्ट. 2 गहन, विषम, दुर्बोध, असुगम, कष्टज्ञेय गूढार्थ, दुर्ज्ञेय. 3 (With inf.) ex. by दुर्, दुःख, कष्ट, in comp.; 'd. to get' दुष्प्राप, दुराप, कष्टसाध्य; दुरारोह, दुःखछेद्य, &c.; 'a d. case' सशल्योर्थः; 'a d. road' दुर्गसंचा(च)रः, संक्रमः; 'a d. place' विषमस्थानं, दुर्गं, दुर्गमस्थलं. **-ly,** *adv.* दुःखेन, कष्टेन, कृच्छ्रेण, कष्टं, आयासेन, दुर्, pr. **-y,** *s.* असौकर्यं, वैषम्यं, कठिनता, दुष्करत्वं, कष्टता, दुःसाध्यता. 2 आयासः, वैक्लव्यं, विरोधः. 3 कृच्छ्रं, संकटं, विघ्नः, आयासः, दुर्गं, दुःखं, विरोधः, क्लेशः, बाधा, कष्टः ष्टं. 4 विषमपदं, असुबोधं-दुर्बोधं पदं, असुगमं स्थानं; 'without d.' अनायासेन, सुखं; 'with d.' कथमपि, कथं कथमपि, कथंचित्, दुःखेन, कृच्छ्रेण; 'a commentary explaining the d. es' विषमपदविमर्शिनी टीका; 'beset with d. es' सशल्य, सकंटक; 'overcoming d. es' दुर्गलंघनं.

Diffidence, *s.* अविश्वासः, अप्रत्ययः, आ-, शंका. 2 (In oneself) अप्रगल्भता, विनयः, ह्रीः, लज्जा. **-Diffident,** *a.* अविश्वासिन्, शंकाशील, अप्रत्यय, साशंक; 'the mind feels d. of itself' आत्मन्यप्रत्ययं चेतः (S. 1). 2 अप्रगल्भ, अधृष्ट, विनीत, ह्रीमत्, लज्जावत्. **-ly,** *adv.* अप्रगल्भं, साशंकं, लज्जया, सविनयं.

Diffract, *v. t.* वियुज् 7 A, 10, विश्लिष् c.

Diffuse, *v. t.* प्रसृ c., वि-परि-स्तृ c., विसृप् c., प्रचर् c. विकॄ 6 P, तन् 8 U, अभि-प्र-वृध् c. 2 प्र-स्रु c., विद्रु c., प्रक्षिप् P. 3 (Itself) व्याप् 5 P, विसृ-विसृप् 1 P विस्तॄ pass., व्यश् 5 A, सर्वत्र गम् 1 P. or प्रविश् 6 P. -*a.* वितत, सविस्तर, विस्तृत, असंक्षिप्त, विस्तीर्ण, सप्रपंच. **-ly,** *adv.* सविस्तरं, विस्तरेण, विस्तरशः, प्रपंचेन, असंक्षेपतः, असमासेन. **-ion,** *s.* प्रसारः, प्र-वि-सरः, विस्तारः, अभिवृद्धि *f.*, वितति *f.*, प्रचारणं, प्रसरणं. **-ive,** *a.* वि-प्र-सारिन्, व्यापक, व्यापिन्, प्रसरणशील. **-iveness,** *s.* विस्तारः, विस्तृति *f.*, व्यापकत्वं. 2 वाग्विस्तारः, प्रपंचः, वाक्यविस्तरः.

Dig, *v. t.* खन् 1 P; 'd. down' (भूमिं) अवदॄ 10, भिद् 7 U; 'd. in' निखन्. 2 निर्भिद्, छिद् 10, व्यध् 4 P. **-ger,** *s.* खनकः, खनितृ *m.*

Digest, *v. t.* (जठरं) जॄ c. (जरयति), पच् 1 P, परिपाकं नी 1 P. परिणम् c. (णमयति), दह् 1 P. 2 क्रमेण-यथाक्रमं-विन्यस् 4 U or रच् 10 or ग्रंथ् 9 P or लिख् 6 P. 3 मनसा विचर् c. or चिंत् 10. 4 Suffer, q. v. -*v. i.* जॄ 4 P, पच् pass., परिणम् 1 P. **-er,** *s.* पाचकं, जारणं, अग्निवर्धनं, रोचनं, रेचकं. **-ion,** *s.* पाकः; वि-परि-पाकः, पचनं, परिणामः. 2 जठराग्निः, जठरानलः, अग्निः; 'slowness of d.' अग्निमांद्यं; 'having a good d. ' प्रदीप्ताग्निः. **-ive,** *a.* पाचन (नी *f.*), पाचक, अग्निवर्धक, परिपाकिन्.

Dight, *See* **Adorn.**

Digit, *s.* कला, लेखा, रेखा. **2** अंकः.

Dignity, *s.* महिमन् *m.*, माहात्म्यं, औदार्यं. **2** अनुभावः, प्रतापः, तेजस् *n.*, प्रौढि *f.*, प्रौढत्वं-ता. **3** प्रतिष्ठा, गौरवं, पदं, उत्कृष्ट-परमपदं, उत्कर्षः, उन्नति *f.*, आभिजात्यं, प्रतिपत्ति *f.*, ओजस्विता, उच्चत्वं, कुलीनता; ' d. of style ' ओजस् *n.* **4** मानः, अभिमानः, गर्वः, दर्पः; ' d. of expression ' प्रौढत्वं वचसां. **-Dignify,** *v. t.* संमन् c., सत्कृ 8 U, पूज् 10. **2** उत्कृष्टपदे नियुज् 7 A, 10, परमपदं प्राप् c., उत्कर्षं नी 1 P. **-ed,** *a.* महानुभाव, अनुभाववत्, ग(गं)भीर, ओजस्विन्, प्रौढ, महाप्रताप; ' d. in mien ' गंभीराकृति. **2** मानिन्, महाशय, महेच्छ. **3** उत्कृष्टपदनियुक्त, प्रतिपत्तिमत, परमपदारूढ. **-Dignitary,** *s.* मान्यजनः, शिष्टजनः, कुलीनपुरुषः.

Digress, *v. i.* प्रस्तुतं न अनुसंधा 3 U, अप्रस्तुतं वद्-भण् 1 P or वच् 2 P, प्रकृतं-कथायोगं त्यज् 1 P; ' you are d. ing ' न त्वया प्रस्तुतमनुसंधीयते. **2** उत्क्रम् 1 U, 4 P, विचल् 1 P, प्रच्यु 1 A, भ्रंश् 1 A. 4 P; *See* **Deviate. -ion,** *s.* प्रकृतत्यागः, अप्रस्तुतानुसंधानं; प्रसंगः, प्रासंगिकं वचनं; ' enough of d. ' अलं प्रासंगिकेन or प्रसंगेन, प्रकृतमेवानुसंधीयतां. **2** उत्क्रमः, विचलनं, भ्रंशः, च्युति *f.*, त्यागः. **-ive,** *a.* अनन्वित, अप्रस्तुत, अप्रकृत, असंगत, असंबद्ध.

Dike, *s.* सेतुः, सेतुबंधः, पिंडलः, धरणः, कूलकः-क. **2** कुल्या, परिखा, खातं, प्रणालः-ली.

Dilacerate, *See* **Tear.**

Dilapidate, *v. i.* जॄ 4 P, विनश् 4 P, क्षि-उच्छिद्-pass., अवसद् 1 P. **-v. t.** उच्छिद् 7 P, अवसद् c., प्रध्वंस् c. क्षि c., विनश् c ; *See* **Destroy. -ion,** *s.* क्षयः, ध्वंसः, नाशः, उच्छेदः, अवसादः.

Dilate, *v. t.* विस्तृ c., वितन् 8 U, प्र-वि-सृ c., दीर्घीकृ 8 U. **2** (upon) प्रपंचयति (D.), सविस्तरं विवृ 5 U, or व्याचक्ष् 2 A, अति-विवृ. **-v. i.** वितन्-विस्तृ-विवृ pass., आयतीभू, दीर्घीभू. **-ed,** *a.* वितत, व्यायत; उत्फुल्ल, विकसित. **-ion,** *s.* विस्तारः, वितति *f.*, विस्तरणं. विवृति *f.*: विकासः-सनं. उत्फुल्लता.

Dilatory, *a.* दीर्घसूत्रिन्, दीर्घसूत्र, विलंबिन्, मंद, मंथर, चिरक्रिय, अक्षिप्रकारिन्. **-ly,** *adv.* सविलंबं, मंदमंदं, कालक्षेपेण. **-ness,** *s.* दीर्घसूत्रता, विलंबः, कालक्षेपः, मांद्यं, कार्यजडता.

Dilemma, *s.* उभयसंभवः, विकल्पः.

Diligent, *a.* उद्योगिन्, व्यवसायिन्, उद्युक्त, सोद्योग, उद्यमिन्, अनलस, अभिनिविष्ट, उद्यम-व्यवसाय-पर, उद्योगतत्पर. **2** (of things), अनवरत, सतत, नित्यप्रवृत्त, प्र-आ-सक्त, अभ्यस्त, प्रसित, अविच्छिन्न. **-ly,** *adv.* प्रयत्नतः, सोद्योगं, सोद्यमं; अनवरतं, प्रसक्तं. **-Diligence,** *s.* उद्यमः, अध्यव-व्यवसायः, उद्योगः, अभियोगः, अभिनिवेशः, प्रयत्नः, अभ्यासः, प्रसक्ति *f.*, उत्साहः. **2** सातत्यं, अविच्छेदः, अविरामः, नैरंतर्यं.

Dill, *s.* सालेयः, मधुरिका.

Dilute, *v. t.* जलेन मिश्र् 10, or संसृज् 6 P, विली c., तनूकृ 8 U, क्षीणीकृ; मिश्रणेन शक्तिं तनूकृ. **-ion,** *s.* जलसंसर्गः, जलमिश्रणं; तनूकरणं. **-Diluent,** *s.* विलयनं, तनूकरणं.

Dim, *a.* मंदद्युति, मंदप्रभ, मलिनकांति, मलिन, निष्प्रभ, निस्तेजस्, सतिमिर. **2** अप्रकाश, अव्यक्त, अस्पष्ट, दुरालोक, दुर्दृष्ट; ' seeing d.-ly ' हतदृष्टि, अस्पष्टदृश्; ' of d. understanding ' मंदमति, जड-स्थूल-धी-बुद्धि, &c. **-v. t.** अंधीकृ 8 U, अस्पष्टीकृ, कलुषीकृ, निष्प्रभीकृ, मलिनयति (D.). **-ly,** *adv.* अस्पष्टं, अव्यक्तं, निष्प्रभं, मालिनं. **-ness,** *s.* तिमिरं, अस्पष्टता, तेजोहानि *f.*, दुरालोकता, मालिन्यं, अस्पष्टता. **2** स्थूलमतिता, बुद्धिमांद्यं.

Dimension, *s.* प्रमाणं, परिमाणं, मात्रा, मानं, विस्तारः.

Diminish, *v. t., v. i. See* **Decrease. -Diminution,** *s.* न्यूनीकरणं, ह्रासः, क्षयः, अपचयः, अवसादः, हानि *f.* **-Diminutive,** *a.* अल्पकाय, क्षुद्र, अल्प, स्तोक, सूक्ष्म, लघु. **2** अल्पार्थ (प्रत्ययः); 'कन् is a d. termination' अल्पार्थे कन्.

Dimity, *s.* दृढं कार्पासवस्त्रं.

Dimple, *s.* कपोलभंगः, गंडतरंगः; कपोलोर्मि *f.* ऊर्मि *f.*, भंगुरता, दंतुरता, भंगः, तरंगः. **-Dimply,** *a.* भंगुर, ऊर्मिमत्, दंतुर.

Din, *s.* कलकलः, निनादः, कोलाहलः, तुमुलरवः, निः-स्वनः, उच्चघोषः, तुमुलः. **-v. t.** (श्रवणपुटं) जर्जरीकृ 8 U, कर्णौ उपहन् 2 P or जर्जरयति (D.): *See* **Stun.**

Dine, *v. i.* भुज् 7 A, आहारं-भोजनं-सेव् 1 A, or निर्वृत् c., शरीरस्थितिं कृ 8 U or क्लृप् c. **-v. t.** भुज् c., अश् c. **-Dinner,** *s.* भोजनं, आहारः, अशनं; *See* **Food. 2** उत्सवः, जग्धि *f.*, भोजनोत्सवः.

Ding, *v. t.* शब्दायते (D.), नद्-स्वन्-कण् 1 P: 'ding dong' घंटानादः-शब्दः; किंकिणीरवः-शब्दः-नादः, सततनादः.

Dingle, *See* **Dale.**

Dingy, *See* **Black.**

Dint, *s.* प्रहारः, आघातः, अभिघातः. **2** बलं, प्रभावः, सामर्थ्यं; ' by d. of ' बलेन, प्रभावेण, सामर्थ्यात्, योगेन. **-v. t.** प्रहारेण अंक् 10 or चिह्न् 10.

Diocesan, *s.* प्रधानधर्माध्यक्षः.

Diorthesis, *s.* वक्रांगचिकित्सा.

Dip, *v. i.* नि-,मस्ज् 6 P (with loc.); अव-वि-गाह् 1 A, प्र-नि-विश् 6 P, आप्लु 1 A, (acc.). 2 व्यापृ 6 A, व्यापृत *a.* भू. —*v. t.* अवगाह् c., मस्ज् c. (मज्जयति), प्रविश् c. 2 सिच् 6 P, क्लिद् c., आर्द्रीकृ 8 U; 'd. in a business' ईषद् व्यापृ or प्रवृत् 1 A; 'd. into books' चुंब् 1 P; अल्पशः अधि-इ 2 A. —*s.* निमज्जनं, अवगाहः, प्रवेशः. 2 अवपातः, नम्रता, आनति *f.*

Diphtheria, *s.* मांससंतानिका.

Diphthong, *s.* स्वरद्वयं, संयुक्तस्वरः, संध्यक्षरं.

Diploma, *s.* पदवी अधिकार-दायकं पत्रं.

Diplomacy, *s.* सामन् *n.*, नीति *f.*, दौत्यकर्मन् *n.* 2 राजदूतमंडलं-समूहः. **-Diplomatical,** *a.* दूतकार्यविषय. **-Diplomatist,** *s.* सामप्रयोगज्ञः, राजनीतिकुशलः, दौत्यकार्यनिपुणः, सामकुशलः.

Dipsomania, *s.* मद्यासक्ति *f.*

Dire,-ful, *a.* दारुण, घोर, उग्र, तीव्र. 2 भीषण, क्रूर, भयानक, रौद्र. **-ness,** *s.* दारुणत्वं, घोरता, रौद्रता.

Direct, *v. t.* संधा 3 U, लक्ष्यीकृ 8 U, उद्दिश् 6 P, प्रेर् c., अधिकृत्य क्षिप् 6 P, (a missile &c.); 'd. attention or mind' मनो नियुज् 7 A, 10, मनः समाधा or बंध् 9 P or आसंज् c. or निक्षिप्. 2 शास् 2 P, विनियम् 1 P, प्रणी 1 P, निर्वह् c., अधिष्ठा 1 P, अवेक्ष् 1 A. 3 आ-निर्-उप-दिश्, प्रदृश् c. 4 नियुज्, आदिश्, आज्ञा c. (ज्ञापयति), प्रचुद् 10. 5 विधा 3 U, प्र-युज्. 6 (A letter &c.) *See* **Address.** —*a.* ऋजु, अवक्र, सरल, अकुटिल, अविलोम, अजिह्म, अनुलोम; 'd. descendants' अनुलोमाः, अनुलोमवंशजाः. 2 क्रमागत, अविप्रकृष्ट. 3 व्यक्त, स्पष्ट, सुस्पष्ट-व्यक्त, प्रत्यक्ष, साक्षात् *ind.* **-ion,** *s.* शासनं, नियोगः, निर्देशः, आज्ञा, आदेशः. 2 संधानं, उद्देशः, प्रेरणं. 3 प्रणयनं, प्रशासनं, विनियमनं, अधिष्ठातृत्वं, अधिष्ठानं, अवेक्षा-क्षणं. 4 दिश् *f.*, दिशा, आशा, काष्ठा, ककुभ् *f.*, हरित् *f.* 5 Address q. v. **-ive,** *a.* निर्देशक, सूचक. **-ly,** *adv.* सपद्येव, सद्यः, अचिरात्, तत्क्षणं-णात्, अविलंबितं, शीघ्रं, आशु. 2 स्पष्टं, प्रत्यक्षं, सुव्यक्तं, अगूढतया, भिन्नार्थं. 3 अनुलोमं, सरलतया. **-or,** *s.* शासितृ-अधिष्ठातृ *m.*, अनुशासकः, अध्यक्षः, अधिकारिन् *m.*, अवेक्षकः, निर्वाहकः. **-ory,** *s.* विधिसंहिता. 2 नामधामसूचकं पुस्तकं.

Direption, *s.* अपहरणं, अपहारः, लुंठनं.

Dirge, *s.* करुणगीतं, करुणरससंगीतं.

Dirigible, *a.* नियम्य.

Dirigle, *s. See* **Baloon.**

Dirk, *See* **Dagger.**

Dirt, *s.* मलः-लं, पंकः, कर्दमः, जंबालः-लं, कल्कं, किट्टं. **-y,** *a.* मलिन, समल, मलीमस, पंकिल, कलुष, आविल, मलदूषित, सकर्दम. 2 नीच, कुत्सित, खल, गर्ह्य. —*v. t.* मलेन-पंकेन-दुष् c. (दूषयति) or लिप् 6 P. मलिनीकृ 8 U, मलिनयति-आविलयति (D.).

Diruption, *See* **Eruption.**

Disable, *v. t.* अनुपयुक्त *a.* कृ 8 U, विहस्तीकृ, (रुजा विहस्तचरणां देवीं M. 4); अशक्त-असमर्थ *a.* कृ. 2 अवमृद् c., विकलीकृ, उपहन् 2 P, दुर्बलीकृ. **-Disability,** *s.* अशक्ति *f.*, असामर्थ्यं, अक्षमता, अयोग्यता; अनुपयोगः.

Disabuse, *v. t.* भ्रमं निरस् 4 U or उच्छिद् 7 P or अपनी 1 P, or हृ 1 P or अपाकृ 8 U, भ्रांतेर्मुच् 6 P.

Disaccustom, *v. t.* अभ्यासं लुप् c.

Disadvantage, *s.* अहितं, अलाभः, अपकारः, अनर्थः, अनिष्टं, अपायः, हानि *f.*, पीडा, बाधा; 'at a d.' विषमावस्थ *a.*, असमवस्थ *a.* **-ous,** *a.* अहितकर (री *f.*), प्रतिकूल, अहित, अनुपकारक, विरोधिन्, अपायावह, क्षतिकारक. **-ously,** *adv.* अहितं, अनिष्टं, सापकारं.

Disaffect, *v. t.* विरंज् c., अपरागं उत्पद् c., उपजप् 1 P. **-ed,** *a.* वि-अप-रक्त, विप्रिय, असंतुष्ट, अप्रीत, अननुरक्त. **-ion,** *s.* विरागः, असंतोषः, विरक्ति *f.*, अभक्ति *f.*

Disaffirmance, *s.* प्रत्याख्यानं, प्रत्यादेशः, प्रत्यावर्तनं.

Disagree, *v. i.* न संमन् 4 A, विवद् 1 A, भिद् pass., विरुध् pass., असदृशीभू; *See* **Differ. -able,** *a.* अनभिमत, अप्रिय, अनिष्ट, अहित, अप्रीतिकर (री *f.*), अरुचिर, अनाह्लादक. 2 विरुद्ध, प्रतिकूल. **-ment,** *s.* विसंवादः, विवादः, भेदः, विप्रतिपत्ति *f.*, विमति *f.*; *See* **Difference.**

Disallow, *v. t.* न अनुज्ञा 9 U. निषिध् 1 P, निंद् 1 P 2 प्रत्याख्या 2 P, प्रत्यादिश् 6 P; *See* **Deny, -ance,** *s.* प्रत्याख्यानं, निषेधः; निवारणं, निरसनं.

Disanimate, *See* **Discourage.**

Disannul, *See* **Abolish.**

Disappear, *v. i.* अंतर्-तिरः-धा pass., अंतर्-इ 2 P, तिरोभू 1 P, अदृश्य *a.* भू. 2 नश् 4 P, क्षयं-नाशं-या 2 P, प्र-वि-ली 4 A, प्र-वि-ध्वंस् 1 A; 'the pigeons having d. ed' चक्षुर्विषयातिक्रांतेषु-नयनपथातीतेषु-अदृष्टिगोचरेषु-कपोतेषु. **-ance,** *s.* अंतर्धानं, तिरोधान, अदर्शनं; नाशः, लयः, &c.; better ex. by (*v. i.*).

Disappoint, *v. i.* आशां भंज् 7 P or प्रति-वि-हन् 2 P or विफलीकृ or मोघीकृ 8 U or खंड् 10; विप्रलभ् 1 A; 'he was d. ed in his request' तस्य याच्ञा मोघी बभूव, स

भग्नाशो बभूव; 'd. ed in love' खंडितप्रणय, खंडित. **-ed,** *a.* भग्नाश, मोघाश, भग्नोद्यम, अकृतार्थ, प्रतिहत, मनोहत, प्रतिबद्ध. **-ment,** *s.* आशाभंगः, प्रणयवैफल्यं, विफलीकरणं, नैराश्यं, विप्रलंभः.

Disapprove, *v. t.* निंद् 1 P, गर्ह् 1, 10 A, न प्रशंस् 1 P; not **approve** q. v. **-Disapprobation,** *s.* निंदा, असमति *f.*, विरागः, अप्रीति *f.*, विमति *f.*, अनभिनंदनं.

Disarm, *v. t.* अस्त्राणि अपहृ 1 P or अपनी 1 P. निरायुधीकृ 8 U, निःशस्त्रीकृ **2** (fig.) शम् c. (शमयति), सांत्व् 10. **-ed,** *a.* निरायुध, निःशस्त्र; 'd. of anger' शांतरोष, क्षीणमन्यु.

Disarrange, *v. t.* क्रमं भंज् 7 P, व्यस् 4 U, संकॄ 6 P, संकुलीकृ 8 U. **-ment,** *s.* अक्रमः, क्रमभंगः, व्यस्तता.

Disarray, *v. t.* अपनह् 4 P, उच्छद् 10, विवस्त्रीकृ 8 U. **2** क्रमं भंज् 7 P. **-s.** व्यूहभंगः, पिंजलः, समुत्पिंजः.

Disaster, *s.* आपद्-विपद् *f.*, व्यसनं, उपप्लवः, विपत्ति *f.*, उपद्रवः, अत्याहितं, अनर्थः. **-v. t.** पीड् 10, बाध् 1 A, उपप्लु 1 A, उपद्रु 1 P. **-Disastrous,** *a.* विपद्युक्त, दुर्भाग्य, दुरंत; अनर्थावह, दारुण, घोर.

Disavow, -al, *See* **Deny, Denial.**

Disband, *v. t.* युद्धव्यापाराद् मुच् 6 P or c. सैन्यभंगं कृ 8 U. **2** मुच्, विमोक्ष् 10. **-v. i.** युद्धव्यापारात् मुच् 6 P.

Disbark, *v. t.* नौकायाः अवतॄ c.

Disbelieve, *v. t.* Not **believe** q. v. **-er,** *s.* नास्तिकः, अविश्वासिन् *m.* **-Disbelief,** *s.* अप्रत्ययः, अविश्वासः.

Disbend, *See* **Relax.**

Disbranch, *v. t.* निःशाखीकृ 8 U, शाखां लू 9 U.

Disburden, *v. t.* भारं अवतॄ c. or अपनी 1 P. निर्भार-रिक्तभार -*a.* कृ 8U; 'd one's mind' मनोगतं अन्यस्मै आख्या 2 P; 'the afflicted should d. their grief' कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि (U. 3).

Disburse, *v. t.* व्यय् 10 P (व्यययति), उत्सृज् 6 P, वि-नियुज् 7 A. 10, व्ययीकृ 8 U. **-ment,** *s.* व्ययः, उत्सर्गः, विनियोगः, त्यागः; 'receipt and d.' आयव्ययौ.

Disc, *See* **Disk.**

Discard, *v. t.* अपास् 4 U, अवधू 5, 9 U, अपक्षिप् 6 P, निराकृ 8 U, अवसृज् 6 P, अपहा 3 P. निःसृ c., अपनुद् 6 P.

Discern, *v. t.* वि-विच् 3, 7 P. विचर् c., परिच्छिद् 7 P, निर्णी 1 P, परीक्ष् 1 A. **2** निर्वर्ण् 10. दृश् 1 P, ईक्ष् 1 A, आलोक् 1 A, 10. आलक्ष् 10, विभू c. **-er,** *s.* विवेचकः, ईक्षितृ *m.* **-ible,** *a.* दृश्य, दृष्टिगोचर, विभाव्य, प्रत्यक्ष. **-ing,** *a.* सूक्ष्मदर्शिन्, दीर्घ-दूर-दृष्टि, विवेकिन्, परिणामदर्शिन्, विचारशील. **-ingly,** *adv.* सविवेकं, सविचारं, सपरिच्छेदं. **-ment,** *s.* विवेकः, विवेचनं, परिच्छेदः, विचारः-रणा, परीक्षा, दूरदृष्टि *f.*, अवबोधः, विज्ञानं.

Discerption, *s.* व्यवच्छेदः, विभेदनं, विदारणं

Discharge, *v. t.* (A load &c.) भारं अवतॄ c. or अपनी 1 P. **2** उद्-गॄ 6 P, उदीर् c., प्रमुच् 6 P, उच्चर् 10, उत्सृज् 6 P, प्रस्रु c., उद्वम् 1 P. **3** (Arrow &c.) मुच्, अस् 4 P, विसृज्, क्षिप् 6 P, प्रेर् c. निपत् c.; 'd. a gun' लोहनालस्थं आग्नेयं चूर्णं ज्वल् c. **4** (अधिकारात् or पदात्) निःसृ c, अपकृष् 1 P, अवरुह् c. (रोपयति), निष्कस् c., निराकृ 8 U. अपास् 4 U, च्यु c., भ्रंश् c. **5** (Duty) कृ, अनुष्ठा 1 P, विधा 3 U, निष्पद्-संपद् c., निर्वह् c., आचर् 1 P. **6** (Debt) (ऋणं) शुध् c., निर्यत् 10. निराकृ, निस्तॄ c., विनी, आनृण्यं गम् 1 P. **7** मुच्, मोक्ष् 10. विसृज् **8** (As a river) अवतॄ 1 P, द्रु 1 P; सागरं वर्जयित्वा कुत्र वा महानद्यवतरति (S. 3) 'will d. itself &c.' **-v. i.** मुच् pass.; स्रु 1 P. **-s.** भारावतरणं. **2** उद्गारः, प्रस्रावः, विसर्गः, उद्वमनं, उच्चारणं, उदीरणं. **3** क्षेपणं, मोक्षः. **4** अवरोपणं, अधिकारभ्रंशनं, पदच्युति *f.*-भ्रंशः. **5** अनुष्ठानं, निर्वाहः, विधानं, संपादनं. **6** आनृण्यं, ऋणशोधनं-निस्तारः. **7** मोक्षः, मुक्ति *f.*, मोचनं.

Disciple, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*, विद्यार्थिन् *m.*

Discipline, *v. t.* विनी 1 P. शिक्ष् c. शास् 2 P, अधि-इ c. (अध्यापयति). **2** नियम् 1 P, विनियम्, शास्, दंड् 10, दम् c. (दमयति). **3** व्यायम्; अभ्यस् 4 U. **-s.** विनयः, अनुशासनं, शिक्षा-क्षणं, अध्यापनं, अभ्यासः. **2** नियमः, व्यवस्था, विधिः, शासन, नीति *f.* **3** दंडः, निग्रहः, दमनं, शिष्टि *f.*, विनियमः-मनं; 'military d.' युद्धाभ्यासः, युद्ध-रणशिक्षा; 'd. in arms' शस्त्राभ्यासः.

Disclaim, -er, *See* **Deny, Denier.**

Disclose, *v. t.* विवृ 5 U. प्रकाश् c., व्यंज् 7 P, प्रकटं कृ 8 U, स्पष्टीकृ, भिद् 7 P or c., निविद् c., ख्या c, (ख्यापयति); 'd. ing secrets' रहस्यभेदः. **-ure,** *s.* विवृति *f.*, प्रकाशनं, निवेदनं, भेदः.

Discolour, *v. t.* वर्णांतरं ग्रह् c., कलुषी-मलिनीकृ 8 U, विवर्ण् 10, कृष्णीकृ. **-ation,** *s.* वैवर्ण्यं, कालुष्यं, मालिन्यं.

Discomfit, *v. t.* वि-प्र-ध्वंस् c., व्यूहं भंज् or भिद् 7 P (as an army): पराजि 1 A, विद्रु c.; *See* **Defeat, Baffle. -ure,** *s.* भंगः, व्यसन, पराजयः, पराभवः.

Discomfort, *v. t.* पीड् 10, व्यथ् c., बाध् 1 A; *See* **Afflict.** **-***s.* अस्वास्थ्यं, दुःखं, पीडा, व्यथा, क्लेशः, बाधा.

Discommend, *See* **Censure.**

Discompose, *v. t.* क्षुभ् c., व्यामुह् c., संभ्रम् c. (भ्रमयति), आकुलीकृ 8 U, बाध् 1 A. **-ed,** *a* आकुलित, क्षुब्ध, व्याकुल, कातर, व्याकुलचित्त, अनवस्थित, व्यग्र, भ्रांत, पारिप्लव, विक्लवचित्त. **-ure,** *s.* क्षोभः, आकुलत्वं, व्यग्रता, वैक्लव्यं, उद्वेगः, अस्वास्थ्यं, अस्थिरता.

Disconcert, *v. t.* खंड् 10, मोघीकृ 8 U, प्रति-व्या-हन् 2 P, *See* **Baffle.** **2** **Discompose,** q. v.

Disconformity, *s.* विरोधः, विरुद्धता, असादृश्यं, असंगति *f.*, विसंवादः, विप्रतिपत्ति *f.*

Disconnect, *See* **Separate.** **-ion,** *s.* विश्लेषः, असंगति *f.*, वियोगः.

Disconsolate, *a.* खिन्न, विषण्ण, दीन, उद्विग्न, म्लान; *See* **Dejected.** **-ly,** *adv.* सविषादं, सखेदं, सोद्वेगं.

Discontent, *a.* असंतुष्ट, अतृप्त. **-***s.* असंतोषः, अतृप्ति *f.*, अप-वि-रागः, विरक्ति *f.*, अप्रीति *f.* **-***v. t.* असंतोषं उत्पद् c. or जन् c.

Discontinue, *v. t.* त्यज् 1 P, विच्छिद् 7 P, विरम् c. (रमयति), निवृत् c., उज्झ् 6 P, विलुप् c. **-***v. i.* वि उप-रम् 1 P, निवृत् 1 A, (with abl.); *See* **Cease.** **-ance, -ation,** *s.* विच्छेदः, विरामः, निवृत्ति *f.*; उपशमः, भंगः, अंतरायः.

Discord, *v. i.* विसंवद् 1 P, विभिद्-न युज्-विरुध् pass. **-***s.*, **-ance,** *s.* भेदः; भिन्नता, विसंवादः, मतभेदः, विरोधः, विमति *f.*, वैमत्यं, वैपरीत्यं, वैलक्षण्यं; 'd. of sound' स्वरविरोधः, अपस्वरः. **-ant,** *a.* विषम, प्रतिकूल, विरुद्ध, विसंवादिन्, परस्परविरुद्ध, विभिन्न, असंगत, विपरीत; 'd. sound' विस्वरः, अपस्वरः, कर्कशध्वनिः.

Discount, *v. t.* भागं उद्-हृ 1 P. **-***s.* उद्धारः, उद्धृतभागः.

Discountenance, *v. t.* न अनुग्रह् 9 P, न उपकृ 8 U, न अनुमुद् 1 A.

Discourage, *v. t.* उत्साहभंगं कृ 8U, अव-विसद् c., विषादं जन् c., विषण्णीकृ, धैर्यं ध्वंस् c., मनः or आशाः भंज् 7 P. **2** **Deter,** q.v. **-ed,** *a.* भग्नोत्साह, हताश, भग्नोद्यम, विषण्ण, अवसन्न, खिन्न, निरुत्साह, मनोहत, प्रतिबद्ध, भग्नाश, धैर्यच्युत, स्खलितधैर्य. **-ing,** *a.* विषादजनक, धैर्यध्वंसिन्. **-ment,** *s.* धैर्यध्वंसः, उत्साहभंगः, आशा-उद्यम-भंगः; विषादः, अवसादः, खिन्नता, धैर्य-च्युति *f.* स्खलनं.

Discourse, *v. i.* संवद् 1 P, संभाष् 1 A, समालप् 1 P. **2** भाष् 1 A, वद्-गद् 1 P, अधिकृत्य वच् 2 P. **-***s.* संवादः, संभाषणं, संकथा, संलापः. **2** वचनं, भाषणं, उक्ति *f.*, वचस् *n.*; *See* **Converse.** **-ation.** **-er,** *s.* वादिन् *m.* वक्तृ *m.* **-ive,** *a.* तार्किक (की *f.*), ऊहिन्, तर्कविषय.

Discourteous, *a.* असभ्य, अशिष्ट, अविनीत, दुःशील, अनार्य. **--ness,-Discourtesy,** *s.* अविनयः, अनार्यता, असभ्यता, मर्यादातिक्रमः, अशिष्टाचारः.

Discover, *v. t.* विवृ 5 U, दृश् c., प्रकाश् c., आविष्कृ 8 U, स्पष्टीकृ, व्यक्तीकृ, प्रकटीकृ, व्यंज् 7 P, ज्ञा c. (ज्ञापयति), आ-नि-विद् c. **2** निरूप् 10, ज्ञा 9 U, उपलभ् 1 A, निर्णी 1 P. **3** समा-आ-सद् c., प्राप् 5 P, विद् 6 U, दृश् 1 P, अधिगम् 1 P, इ-या 2 P. **-er,** *s.* निर्गंतृ-अधिगंतृ *m.*, निरूपकः. **-y,** *s.* प्रकाशनं, विवरणं. **2** ज्ञानं, अवगमः, दर्शनं, निर्णयः, उपलब्धि *f.*, समासादनं, निरूपणं, प्राप्ति *f.*

Discredit, *v. t.* न विश्वस् 2 P, न प्रति-इ 2 P, अविश्वास्य *a.* मन् 4 A, प्रामाण्यं लघयति (D.). **2** कलंकयति (D.), अकीर्तिं आवह् 1 P. दुष् c. (दूषयति), मलिनीकृ 8 U, मलिनयति (D.). **-***s.* अपयशस् *n.*, अपकीर्ति *f.*; दूषणं, कलंकः, अप्रतिष्ठा, अकीर्ति *f.*; 'bring d. on' दुष् c. मलिनयति; (यदा मेधाविनी शिष्योपदेशं मलिनयति M. 1). **-able,** *a.* अकीर्तिकर-अयशस्कर (री *f.*), गर्हित, कलंककर, दूषणीय, गर्ह्य, निंद्य.

Discreet, *a.* समीक्ष्य-विमृश्य-कारिन्, विचक्षण, स्ववहित, विचारशील, सावधान, दीर्घ-दूर-दृष्टि. **2** (Of acts.) साधु, श्रेयस्. **-ly,** *adv.* विमृश्य, समीक्ष्य, विचार्य. **-Discretion,** *s.* विवेकः, विमृश्यकारित्वं, समीक्षणं, विचक्षणता, विचारः, विज्ञता. **2** स्वातंत्र्यं, स्वाधीनता. 'having reached the years of d.' प्राप्तव्यवहारदश. **3** विकल्पः, कामः, रुचि *f.*, छंदः; 'at d.' विना संयमन; 'this matter is left to your d.' यथा भवानुचितं मन्यते तथा क्रियतां ; स्वरुच्या-कामतः-वर्ततां भवान्; 'at one's own d.' स्वच्छंदं, स्वेच्छया, स्वरुच्या, कामत. **-ally,** *adv.* स्वेच्छानुसारेण, यथाकामं **-ary,** *a.* स्वाधीन, वैकल्पिक-यादृच्छिक (की *f.*), स्वेच्छानुवर्तिन्.

Discrepant, *a.* विभिन्न, विरुद्ध, विपरीत, अ-वि-संगत, विसंवादिन्, विरोधिन्, प्रतिकूल. **-Discrepance, -cy,** *s.* विभेदः, विरोधः, विप्रतिपत्ति *f.*, असंगति *f.*, विसंवादः, वैलक्षण्यं, वैपरीत्यं.

Discrete, *a.* विभिन्न, विविक्त. **2** अवधारणार्थक.

Discriminate, *v. t.* वि-विच् 3, 7 P, विशिष् 7 P or c., परिच्छिद् 7 P, विज्ञा 9 U, विज् 3 U, विचर् c. **2** लक्ष् 10, परीक्ष् 1 A, सं-अव-ईक्ष्. **-ion**

विवेकः, परिच्छेदः, विज्ञानं, विचारणं-णा; विशेषः, अवधारणा ; 'd. of proper and improper' पात्रापात्रविचारणा ; 'd. of right and wrong' सदसद्विवेकः. **-ing, -ive,** *a.* विशेषज्ञ, गुणदोषविद्, विवेकिन्, परिच्छेदक.

Discursive, *a.* नानाविषय, अनेकप्रसंग; अस्थिर, चंचल, अनवस्थित. **2** तार्किक (की *f.*), ऊहिन्.

Discus, *s.* चक्रं.

Discuss, *v. t.* विचर् c., पर्यालोच् 10, वितर्क् 10, विमृश् 6 P, परीक्ष् 1 A, निरूप् 10, अनुसंधा 3 U, 'd. in detail, at length, exhaustively' प्रपंचयति (D.). प्रपंचं कृ 8 U, सविस्तरं-विस्तरेण-वर्ण् 10. **-v. i.** विवद् 1 A, वादे व्यापृ 6 A. **-ion,** *s.* विचारः-रणा, वितर्कः, परीक्षा, निरूपणं, विमर्शः, वादविवादः, पर्यालोचनं ; 'to turn to the subject under d.' प्रकृतं-प्रस्तुतं-अनुसृ 1 P or अनुवृत् 1 A or अनुसंधा; 'subject under d.' प्रस्तावः, प्रस्तुत-प्रकृत-विषयः, प्रस्तुतं, प्रकृतं; 'result of d.' मथितार्थः.

Discussive, Discutient, *a.* शोथघ्न (घ्नी *f.*), शोथहृत्, दुष्टधातुनाशक.

Disdain, *v. t.* अवमन् 4 A, अवज्ञा 9 U, अवगण् 10, तिरस्कृ 8 U; *See* **Contemn.** **-s.** औद्धत्यं, सावज्ञावलेपः, अवमानः-नना, अवहेलना; *See* **Contempt.** **-ful,** *a.* सावज्ञ, सावलेप, अवमानिन्; उद्धत, अवलिप्त, सावमान.

Disease, *s.* रोगः, गदः, व्याधि *m.*, आमयः, उपतापः, रुजा, रुज् *f.*, विकारः, पीडा, क्लेशः, अस्वास्थ्यं. **-v. t.** रोगेण व्यथ् c. or पीड् 10 or क्लिश् 9 P. **-ed,** *a.* व्याधिग्रस्त, रोगोपसृष्ट, रोगार्त, सरोग, सरुज, सामय, आतुर, विकृत, अस्वस्थ.

Disembark, *v. i.* पोतात्-नौकायाः अवतॄ 1 P, or अव-रुह् 1 P. **-v. t.** अवतॄ-रुह् c. **-ation,** *s.* अवरोहणं, उत्तरणं.

Disedge, *See* **Blunt.**

Disembarrass, *See* **Clear.**

Disembitter, *v. t.* तिक्तत्वं-कटुत्वं-अपनी 1 P. मधुरीकृ 8 U, सुरस *a.* कृ.

Disembody, *v. t.* *See* **Disband.** **2** देहबंधान्मुच् c. **-ed,** *a.* अशरीर, देहहीन, कायहीन, and sim. comps.

Disembogue, *v. i.* निर्गम्-निःसृ 1 P, समुद्रं अवतॄ 1 P or प्रविश् 6 P or प्रस्रु-द्रु 1 P (of a river.). **-v. t.** सलिलं सागरे निर्गम् c., &c.

Disemploy, *See* **Discharge.**

Disenable, *See* **Disable.**

Disembroil, *v. t.* उद्वेगात्-संभ्रमात्-मुच् c. or उद्धृ 1 P.

Disenchant, *v. t.* प्रतिकृ 8 U, मंत्रवशात् उद्धृ 1 P.

Disencumber, *v. t.* प्रतिबंधान् अपनी 1 P or अपनुद् 6 P; निर्विघ्नीकृ 3 U, निष्प्रत्यूह *a.* कृ.

Disengage, *v. t.* वियुज् 7 A, 10, विश्लिष् c. **2** मुच् 6 P or c., मोक्ष् 10, उद्-हृ 1 P; 'd. the mind' मनो निवृत् c. **-v. i.** मुच् pass., निवृत् 1 A, विश्रम् 4 P आत्मानं निवृत् c. **-ed,** *a.* मुक्त, उद्धृत, उत्तीर्ण. **2** लब्धक्षण, प्राप्तावकाश, प्राप्तावसर, अव्यापृत, कार्यरहित-शून्य, कार्यविरत, निर्व्यापार. **-ment,** *s.* मोक्षणं, &c. **2** अवसरः, क्षणः; अवकाशः.

Disentangle, *v. t.* Disengage, q. v. **2** वियुज् 7 A, 10, विश्लिष् c.

Disenthral, *v. t.* दास्यात् मुच् 6 P, or c. or मोक्ष् 10.

Disentrance, *s.* मूर्च्छनात्प्रबुध् c.

Disesteem, *v. t.* अवमन् 4 A, अवज्ञा 9 U; *See* **Contemn.** **-s.** अनादरः, अवमानः, अवज्ञा, उपेक्षा.

Disfavour, *v. t.* न अनुग्रह् 9 P, न उपकृ 8 U, न अनुमुद् 1 A. **-s.** अकृपा, अननुग्रहः. अप्रसादः, अनुपकारः, पराङ्मुखता, विरक्ति *f.*, अप-वि-रागः, अप्रीति *f.*, असंतोषः.

Disfigure, *v. t.* विरूप् 10, विरूपीकृ 8 U, विकृ 8 U, व्यंगयति (D.), विकलीकृ, विप्रकृ c., (रूपं प्रसाधनैर्विप्रकार्यते S. 4). **-ed,** *a.* वि-कु-अप-रूप, विकृताकार, विकृत, व्यंग (गी *f.*). **-ment,** *s.* विरूपता, वैकल्यं, व्यंगता, विप्रकारः.

Disfranchise, *v. t.* पौरत्वं-पौराधिकारं-हृ 1 P or विलुप् c.

Disgorge, *v. t.* उद्-गॄ 6 P, उद्वम् 1 P, विच्छर्द् 10. **-ment,** *s.* उद्गारः, उद्वमनं, वमथुः, प्रच्छर्दिका.

Disgrace, *s.* अपमानः, अव-वि-मानना, परि-अभि-भवः, निकृति *f.*, अ-अप-कीर्ति *f.*, अ-अप यशस् *n.*, कलंकः, दूषणं. **2** कलंकास्पदं. अवमानहेतुः; 'a d. to the family' कुलांगारः, कुलपांसुलः. **-v. t.** अप-अव-मन् c., कलंकयति (D.), अकीर्ति-अयशः-कृ; परि-अभि-भू 1 P, दुष् c (दूषयति); गर्ह् 1, 10 A, सावज्ञं निर्भर्त्स् 10 A. **2** Degrade, q. v. **-ful,** *a.* अयशस्कर (री *f.*), कलंककर (री *f.*); गर्हित, अवमानहेतुक; लज्जाकर (री *f.*), अवमानजनक; निंद्य, दूषणीय. **-fully,** *adv.* गर्हितं; लज्जाकरं, सापमान. **-ious,** *a.* अप्रसन्न, अननुकूल.

Disguise, *v. t.* कपटवेशेन-वेशांतरेण-गुह् 1 U or आच्छद् 10, 'd. ed as' वेष-रूप-धारिन् in comp.; 'd. ed as ascetics' तपस्विव्यंजनोपेताः, तापसच्छद्मना, तापसरूपधारिणः, &c. **2** (Oneself) वेषांतरं-वेषपरिवर्तनं कृ 8 U

or विधा 3 U, अन्यवेषं परिधा 3 U, वेषं परिवृत् c.; 'd. ing himself differently' वेषांतरं विधाय, परिहितान्यवेषः; 'd. ed himself with a lion's skin सिंहचर्मपरिच्छन्नः बभूव. 2 अप-नि-ह्नु 2A, गुप् 1P,10, गुह् ; *See* **Conceal.** **-s.** कपट-छद्म-वेषः, वेषांतरं, आकारगोपनं; विडंबनं, अभिनयः. 2 छद्मन् *n.*, छलं, व्याजः, अप-व्यप-देशः,लक्षं. **-ed,** *a.* कपट-छद्म-वेषिन्, कपटवेष, कपटरूप; रूपवेष, &c., in comp.; 'd. praise' व्याजस्तुति *f.*

Disgust, *v. t.* उद्वेगं-निर्वेदं-उत्पद् c., अरुचिमुत्पद् c., उद्विज् c.; निर्विद् c. **-s.** जुगुप्सा, उद्वेगः, घृणा, निर्वेदः; अरुचि *f.*, विरक्ति *f.*, बीभत्सं; 'in d.' सनिर्वेदं **-ing, -ful,** *a.* बीभत्स, अरुचिर, कुत्सित, गर्ह्य, उद्वेगकर (री *f.*), जुगुप्सावह; 'to be d.ed with' उद्विज् 6 A (with abl.); निर्विद् pass., निर्विण्ण *a.* भू (with instr.), बध् desid. (बीभत्सते) (with abl.).

Dish, *s.* शरावः, पात्रं, भाजनं. 2 भोजनं; आहारविशेषः.

Dishabille, *a.* विवस्त्र, कुचेल, अकृताभरण. **-s.** लघुवासस् *n.*

Dishearten, *See* **Discourage.**

Dishevel, *v. t.* प्र-वि-कृ 6 P, स्रंस् 1 A. **-ed,** *a.* प्र-वि-कीर्ण,पर्याकुल, स्रस्त; 'having d. hair' मुक्त-स्रस्त-केश.

Dishonest, *a.* अशुचि, असरल, अनृजु, सव्याज, जिह्म, कुटिल, कापटिक (की *f.*), छाद्मिक (की *f.*), शठ, धूर्त, सव्यलीक; 'a d. woman' असती, भ्रष्टा, व्यभिचारिणी. **-ly,** *adv.* अन्यायेन, कपटेन, कुटिलं, धूर्ततया, सव्याजं, छलेन. **-y,** *s.* अशुचित्वं, कापट्यं, कौटिल्यं, माया, &c.

Dishonour, *v. t.* **Disgrace,** q. v. 2 अवमन् 4 A, अवज्ञा 9 U, अवधीर् 10, अनादृ 6 A; *See* **Contemn;** 'd. a maiden' दुष् c. (दूषयति), सतीत्वाद् भ्रंश् c. **-s.** अपमानः, अनादरः,अयशस् *n.*, अकीर्ति *f.*, कलंकः, अप्रतिष्ठा. **-able,** *a.* अनार्य, कलंककर (री *f.*), *See* **Disgraceful.**

Dishumour, *s.* स्वभाववक्रता, वक्रशीलता, प्रकृतिकर्कशत्वं, प्रतीपता.

Disillusion, *v. t.* मोहं or भ्रमं निरस् 4 P.

Disincline, *v. t.* विरंज् c. विरागं जन् c.; or उत्पद् c. **-ation,** *s.* अस्पृहा, निरीहत्वं, विरागः, विरक्ति *f.*, द्वेषः, अनीहा, विमुखता, अनिच्छा, अरुचि *f.* अप्रीति *f.* **-ed,** *a.* विरक्त, वि-पराङ्-मुख (खी *f.*), अनिच्छु, निरीह, निःस्पृह.

Disinfect, *v. t* शुध् 4 P, निर्दोषं कृ 8 U. **-ant,** *a.* विषघ्न.

Disingenuous, *a.* अनुदार, अदक्षिण, असरल ; *See* **Dishonest.**

Disinherit, Disherit, *v. t.* रिक्थाधिकाराद् भ्रंश् c., पैतृकं धनं लुप् c. **-ed,** *a.* अनधिकार,पैतृकधनहीन. **-ing,** *s.* पैतृकरिक्थच्छेदः-लोपः.

Disintegrate, *v. t.* वियुज् 10, संहतिं भिद् 7 P, विश्लिष् c.; *See* **Separate.** **-ion,** *s.* वियोगः, विश्लेषः, संहतिभेदः.

Disinter, *v. t.* (शवं) उत्खन् 1 P.

Disinterested, *a.* निःस्पृह, उदासीन, निर्मम, निष्काम, मुक्तसंग, निःसंग, अपक्षपातिन्, निरीह, आत्महितानिरपेक्ष, निष्कारण; 'a d. friend' निष्कारणो बंधुः. **-ly,** *adv.* निर्ममं, स्वार्थनिरपेक्षं, निःस्पृहं. **-ness,** *s.* निरीहता, निःसंगता.

Disjoin, Disjoint, *v.* *See* **Separate.** 2 (Disjoint) विसंधा 3 U, संधिं भंज् 7 P, or त्रुट् c. 3 व्यवच्छिद् 7 P, अवकृत् 6 P. **-ed,** *a.* असंश्लिष्ट, असंहत, असंगत, असंबद्ध, अनन्वित, असंलग्न.

Disjunct, *a.* वियुक्त, विश्लिष्ट, असंलग्न, विभिन्न. **-ion,** *s.* वियोगः; विश्लेषः, विभेदः, असंगतता, असंधानं. **-ive,** *a.* वियोगिन्.

Disk. *s.* बिंबं, मंडलं, परिवेषः,परिधिः. 2 चक्रं.

Dislike, *s.* अरुचि *f.*, विरागः, विरक्ति *f.*, विमुखता, द्वेषः; *See* **Disinclination.** **-v. t.** द्विष् 2 U, विरज् pass. (with loc.), न रुच् 1 A, न अभिनंद् 1 P, न हृष् 6 P. **-ed,** *a.* अप्रिय, अनिष्ट, विद्विष्ट, अनीप्सित.

Disliken, *v. t.* असमीकृ 8 U, अतुल्यीकृ.

Dislocate, *v. t.* संधेः चल् c. or च्यु c., संधिं त्रुट् c. or भंज् 7 P,विसंधा 3 U. **-ion,** *s.* संधित्रोटनं, संधिभंगः, विसंधानं, संधिच्युति *f.*

Dislodge, *v. t.* अप-निः-सृ c., निरस् 4 P, निष्कस् c.; *See* **Drive.** 2 वि-प्र-वस् c., निर्वस् c., गृहाद्बहिष्कृ 8 U. **-v. i.** अपसृ 1 P, स्थानांतरं गम् 1 P, स्थानांतरे निविश् 6 P.

Disloyal, *a.* भक्तिहीन,राजद्रोहिन्,राजापथ्यकारिन्, अराजनिष्ठ, अप-वि-रक्त, असंतुष्ट. **-ly,** *adv.* भक्तिहीनतया, राजद्रोहेण, अपरागेण. **-ty,** *s.* राजद्रोहः, अभक्ति *f.*, अप-वि-रागः, राजापथ्यकारिता, असंतोषः.

Dismal, *a.* उदासीन, अप्रसन्न, सशोक,सखेद, निरानंद, निरुल्लास. 2 उग्र, दारुण, घोर, रौद्र (द्री *f.*), भैरव (वी *f.*), भयप्रद, भयानक. **-ly,** *adv.* उग्रं, भयानकं. **-ness,** *s.* दारुणता, उग्रता, औदासीन्यं.

Dismantle, *v. t.* वस्त्रं अपहृ 1 P, विवस्त्रीकृ 8 U. 2 उपकरणादिकं हृ, उपस्करादि अपनी 1 P.

Dismask, *v. t.* कपटवेशं अपहृ c.

Dismast, *v. t.* कूपकं भंज् 7 P.

Dismay, *s.* सं-,त्रासः, साध्वसं,भयं, भीति *f.*, उद्वेगः, सविस्मयः त्रासः, आकुलत्वं; कातर्यं; 'filled with d.' पर्याकुल, संभ्रांतचित्त,

-*v. t.* संत्रस् c., विस्मयं-साध्वसं उत्पद् c., भयेन उपहन् 2 P, उद्विज् c.; *See* **Daunt.**

Dismember, *v. t.* अंगानि विघट् c.(घटयति) or पृथक् कृ 8 U, अवयवशः छिद् 7 P; विभज् 1 U, विश्लिष् c., वियुज् 7 A, 10. **-ment**, *s.* अंगव्यवच्छेदः, अवयवशः विभागः, विश्लेषः; भंगः.

Dismiss, *v. t.* विसृज् 6 P or c., प्रस्था c. (स्थापयति), संप्रेष् c., गंतुं अनुज्ञा 9 U or आदिश् 6 P. 2 (From office &c.) अधिकारात्-पदात् च्यु c. or भ्रंश् c. or अवरुह् c., *See* **Discharge**; 'd. ed from office' अधिकारच्युत-भ्रष्ट, भ्रष्टाधिकार. 3 अपास् 4 P, हा 3 P, उत्सृज्, अपनी 1 P, अपनुद् 6 P, त्यज् 1 P, दूरीकृ 8 U, निरा-अपा-कृ, मुच् 6 P; 'd. all anxiety' सर्वथा वीतचिंतो भव, औत्सुक्यमपाकुरु. 4 प्रत्याख्या 2 P, प्रत्यादिश् 6 P. **-ion, -al**, *s.* प्रस्थापनं. विसर्जनं. 2 पदाद् अवरोपणं; अधिकारभ्रंशः-च्युति *f.*, पदहानि *f.* 3 निराकरणं; प्रत्यादेशः, त्यागः, &c.

Dismount, *v. i.* (अश्वात्-अश्वपृष्ठात्) अवतॄ-अवरुह् 1 P. -*v. t.* Causal of roots above.

Disobey, *v. t.* (Orders) भंज् 7 P, उल्लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अतिचर् 1 P; प्रतीपं गम् 1 P, न अनुष्ठा 1 P, न अनुवृत् 1 A, न अनुरुध् 4 A; (persons) आज्ञां भंज्, &c.; 'he was never d. ed' तस्याज्ञा कदापि नोल्लंघिता, &c. **-Disobedience**, *s.* आज्ञाभंगः, आज्ञालंघनं, शासनव्यतिक्रमः, अननुष्ठानं, प्रतीपाचरणं, अननुरोधः. **-Disobedient**, *a.* प्रतीपाचार, निदेशलंघिन्, अविधायिन्, अननुवर्तिन्, अवश, प्रतीप; not 'obedient' q. v.

Disoblige, *v. t.* अप्रियं आचर् 1 P, अपराध् 4, 5 P (with gen. or loc.), असंतोषं उत्पद् c., प्रतिकूलं-विप्रियं आचर् or अनुष्ठा 1 P. **-ation**, अप्रियं, अपराधः, विप्रियं. **-ing**, *a.* अननुरोधिन्, अननुकूल, असंतोषकर (री *f.*).

Disorder, *s.* आकुलत्वं, तुमुलं, विप्लवः, वैक्लव्यं, संभ्रमः, पर्याकुलता. 2 अक्रमः, क्रमभंगः, अव्यवस्था, व्यस्तता, संकरः, संक्षोभः, व्यतिक्रमः. 3 रोगः, पीडा, व्याधिः, आमयः, अस्वास्थ्यं; 'd. of the stomach' जठरामयः, अन्नविकारः; 'd. in the army' समुत्पिंजः, पिंजलः, अत्यंतमाकुलं. -*v. t.* आकुलीकृ 8 U, व्यस् 4 U, व्यामुह् c., संभ्रम् c. (भ्रमयति). 2 पर्यस्, संक्षुभ् c., क्रमं भंज् 7 P, संकरीकृ 8 U, संकुलीकृ. 3 पीड् 10, व्यथ् c., अस्वस्थ *a.* कृ. **-ed**, *a.* विपर्यस्त, भग्नक्रम, व्यस्त, व्यत्यस्त, संकुल, संकीर्ण, अव्यवस्थित; 'd. in mind' आकुल, संभ्रांत, व्यग्र-मूढ-चित्त. 2 अस्वस्थ, पीडित, आतुर, व्याध्युपसृष्ट, रुग्ण, रुजार्त. **-ly**, *a.* अव्यवस्थित, *See* above. 2 अनवस्थित, नियमविरुद्ध, अवश, अनियत, उद्दाम, उच्छृंखल, अविधेय. -*adv.* अक्रमं, क्रमभंगेन; ससंभ्रमं. 2 अविधितः, विधि-नियम-विरुद्धं.

Disorganize, *See* **Disorder.**

Disown, *v. t.* प्रत्याख्या 2 P, प्रत्याचक्ष् 2 A; *See* **Deny.**

Disparage, *v. t.* परिभू 1P, उपेक्ष् 1 A, अपकृष् 1 P, अवज्ञा 9 U; *See* **Contemn.** 2 मूल्यं न्यूनीकृ 8 U, अवमन् 4 A, लघूकृ, अपलप् 1 P; *See* **Depreciate.** 3 अयोग्यविवाहे संबंध् 9 P. अयोग्यसंयोगेन अपकृष्. **-ment**, *s.* अवज्ञा, तिरस्कारः, अवमानना परिभवः, उपेक्षा; अभ्यसूया, परिवादः, गुणापकर्षः, गुणापलापः. 2 अयोग्यसंबंधः. **-er**, *s.* निंदकः, अवमानिन् *m.*

Disparity, *s.* असाम्यं, विषमता, वैषम्यं, भेदः, असमानता, असंगतता, असंगति *f.*

Dispart, *v. t.* विभज् 1 U, द्विधा भिद् 7 P, वियुज् 7 A, 10.

Dispassion, *s.* विरागः, प्रशांति *f.*, अक्रोधः; निरीहता, औदासीन्यं, निःसंगता. **-ate**, *a.* वीतराग, शांत, असंभ्रांत, उदासीन, अक्रोधन, निरीह, निःसंग, विरक्त, मुक्तसंग, समचित्त, अपक्षपातिन्. **-ately**, *adv.* शांतचेतसा, समबुद्ध्या, असंभ्रमं, अपक्षपातेन.

Dispatch, *See* **Despatch.**

Dispel, *v. t.* अप-परा-नुद् 6 P, निर्-अप-अस् 4 U, निराकृ 8 U, प्रति-अप-निः-सृ c., अपनी 1P, अप-ऊह् 1 U, अपाकृ, उच्छिद् 7 P, हृ 1 P, नश् c., विभिद् 7 P, वि-प्र-ध्वंस् c., अव-उत्-सद् c., हन् 2 P, (gen. in comps).

Dispensary, *s.* औषधशाला, रोगचिकित्सास्थानं.

Dispense, *v. t.* विधा 3 U, प्रणी 1 P, निर्वह् c., प्रवृत् c.; 'd. er of laws' राजशासनानां प्रवर्तयिता. 2 विभज् 1 U, पृथक् पृथग् विन्यस् 4 U, or विधा or वितॄ 1 P, परिक्लृप् c. 3 (with) Ex. by न कार्यं or न प्रयोजनं; 'I d. with your services' तव सेवया न मे किमपि कार्यं-प्रयोजनं; उपेक्ष् 1A, त्यज् 1 P, अवसृज् 6 P. **-ation**, *s.* विभजनं, विभागः, प्रणयनं, वितरणं, भागकल्पनं, परिकल्पनं. 2 व्यवस्थाभंगानुज्ञा, नियमलंघनानुमति *f.* 3 ईश्वरस्य नरेण संव्यवहारः. **-ator**, *s.* विभजकः, विभागकल्पकः. **-or**, *s.* प्रवर्तकः, प्रणेता, निर्वाहकः.

Dispeople, *v. t.* निर्जनीकृ 8 U.

Disperse, *v. t.* अप-वि-कॄ 6 P, विक्षिप् 6 P, इतस्ततः विद्रु c. or गम् c.; वि-प्र-सृ c., पर्यस् 4 U, दिशि दिशि गम् c.; *See* **Dispel.** -*v. i.* अप-सृ 1 U or विद्रु 1 P; *See* **Break up.** **-or**, *s.* विद्रावयितृ *m.*, उच्छेदकः, अपहः, नाशकः, हरः, in comp. **-ion**, *s.* विद्रावणं, विक्षेपः, विकिरणं.

Disspirit, *See* **Discourage.**

Displace, *v. t.* (स्वस्थानात्) विचल् c., अप-निः-सृ c., निरस् 4 U, भ्रंश् c., च्यु c., निराकृ 8 U, अपास्. **2 Discharge,** q. v. **-ment,** *s.* स्थाननाशः-भ्रंशः, स्वस्थानात्-चलनं-च्युति *f.*

Displant, *v. t.* उन्मूल् 10, उच्छिद् 7 P, उत्पट् 10. 2 निर्वस् c., स्थानाद् भ्रंश् c. or निरस् 4 U.

Display, *v. t.* दृश् c., प्रकाश् c., व्यंज् 7 P, विवृ 5 U, आविष्कृ 8 U, प्रकटीकृ, स्फुटीकृ. 2 वितन् 8 U, विस्तृ c., प्रसृ c., विकस् c., विलस् c.; 'd. itself' उद्-वि-जृंभ् 1 A. **-s.** उद्भासः, विकासः, प्रकाशनं, दर्शनं, व्यक्ति *f.*, विवरणं, आविष्करणं, विजृंभणं, विजृंभितं, विलासः, विलसितं; 'd. of genius' मतिविलासः; 'd. of ignorance' अज्ञानविजृंभित.

Displease, *v. t.* विप्रियं-अनिष्टं-कृ 8 U, असंतोषं-कोपं-जन् c., प्रतिकूलं आचर् 1 P, कुप् c., रुष् c., अपराध् 4, 5 P (with gen. or loc.), वि-अप-रंज् c. **-ed,** *a.* असंतुष्ट, जातामर्ष, कृतरोष, अप्रसन्न, रुष्ट, कुपित, अपवि-रक्त. **-ing,** *a.* अप्रिय, असंतोषजनक, कोपावह. **-ure,** *s.* असंतोषः, क्रोधः, अप्रसादः, अप-वि-रागः :*See* **Anger.**

Displode, *See* **Explode.**

Displume, *v. t.* पक्षान् उद्-हृ 1 P or उत्पट् 10.

Disport, *v. See* **Amuse, Play.** **-s.** विहारः, क्रीडा, केलि *f.*, विलासः.

Dispose, *v. t.* विन्यस् 4 U, रच् 10, संविधा 3 U, विनियुज् 7 A, 10, व्यूह् 1 U, क्रमेण स्था c. (स्थापयति). 2 विनि-प्र-युज्, निक्षिप् 6 P, दा 3 P, वितृ 1 P. 3 प्र-उप-क्लृप् c. 4 प्रवृत् c., प्रयुज् 10, प्रोत्सह् c. **-of,** विनि-उप-प्र-युज्; 'how have you d. ed of my money' मम द्रव्यस्य कथं त्वया विनियोगः कृतः; 'd. of goods' विक्री 9 A; 'd. of time' क्षै c. (क्षपयति), नी 1 P, या c.; 'd. of a girl' (विवाहे) दा, वितृ, प्रतिपद् c. 2 (Perform) समाप् c., अवसो 4 P. **-al,** *s.* विन्यासः, रचना, व्यवस्थापनं, परिपाटि-टी *f.* 2 विनियमः. 3 समर्पणं, वितरणं, विनियोगः, परिकल्पनं, प्रविभागः. 4 अधिकारः, वशः-शं, अधीनता, आयत्तता; 'I am at your d.' अहं त्वदधीनोस्मि; 'this matter is at your d.' अयमर्थस्त्वदायत्तः, अत्र भवान् प्रभवति; 'divine d.' परमेश्वरेच्छा, नियतिः. **-ed,** *a.* विन्यस्त, व्यवस्थित, रचित. 2 (Inclined) ex. by शील in comp., or काम with inf.; 'd. to quarrel' कलहशील, कलहकाम; 'd. to fall' पातुक, पतयालु; 'd. to go' गंतुकाम; 'well-d.' सुस्वभाव, स्निग्ध, सस्नेह. **-er,** *s.* प्रदातृ *m.*, विनियोगकृत् *m.* 2 विनियंतृ *m.*; अधिष्ठातृ *m.*, शासितृ *m.* **-ition,** *s.* **Disposal,** q. v. 2 भावः, स्वभावः, शीलः-लं, प्रकृति *f.*; 'good d.' सद्भावः, साधुशीलत्वं, सौजन्यं, सुशीलं. 3 प्रवृत्ति *f.*, प्रवणता, शीलता-आलुता in comp. **-ure,** *s.* अधिकारः, शक्ति *f.*, विनियोगसामर्थ्यं. 2 अवस्थानं.

Dispossess, *v. t.* अधिकारात्-स्वत्वाद्-भ्रंश् c. or निराकृ 8 U, स्वत्वं हृ 1 P; 'd. ed of one's right' हृताधिकार, अधिकारभ्रष्ट.

Dispraise, *See* **Censure.**

Dispread, *v. t.* नानादिक्षु विद्रु c., बहुधा वि-क्षिप् 6 P.

Disproportion, *s.* वैषम्यं, असमता, अननुरूपता, असंगतता, अयोग्यता. **-v. t.** अयुक्तं संबंध् 9 P or संयुज् 7 U, 10. **-ed, -ate,** *a.* विषम, अननुरूप, असम, अयोग्य, अतुल्यगुण, अतुल्य, अनुपयुक्त, असंगत, असंवादिन्, **-ately,** *adv.* अननुरूपं, असमं, अयुक्तं. **-ateness,** *s.* वैषम्यं; *See* (*s.*)

Disprove, *v. t.* प्रत्याख्या 2 P, निराकृ 8 U, निरस् 4 U, खंड् 10, बाध् 1 A; *See* **Confute.** **-Disproof,** *s.* खंडनं, निरसनं, बाधः-धा, निराकरणं, प्रत्याख्यानं. 2 अनिर्णयः, अनिश्चयः, अप्रमाणं.

Dispute, *v.* विवद् 1 A, कलहायते (D.), विप्रतिपद् 4 A, विप्रलप् 1 P, वितर्क् 10; 'what are you d. ing about' किमर्थं विवदध्वे, किं वः विवादवस्तु. 2 विचर् c.; गुरोराज्ञा अविचार्या 'not to be d. ed' विकॢप् c. **-s.** विवादः, कलहः, वादः; विप्रलापः, विप्रतिपत्ति *f.*, वितर्कः, वाग्युद्धं, वादयुद्धं, वितंडा; 'subject under d.' विवादवस्तु, विवादास्पदं; 'it is a d. ed point' वादग्रस्तोर्थः. **-ant, -er,** *s.* तर्किन् *m.*, विवादिन् *m.*, हेतुवादिन् *m.*, नैयायिकः; तार्किकः; 'a d. might ask' ex. by ननु (followed by अत्रोच्यते or उच्यते) or अत्र कश्चित् प्रत्यवतिष्ठेत. **-ation,** *s.* वादः, तर्कः; *See* (*s.*). **-atious,** *a.* कलहशील, वादप्रिय, विवादार्थिन्, कलहप्रिय-काम.

Disqualify, *v. t.* अक्षम-अयोग्य *a.* कृ 8 U, अपात्रीकृ. **-ication,** *s.* निर्गुणः, प्रत्यूहः, अपात्रता, अक्षमता.

Disquiet, *v. t.* आकुलीकृ 8 U, बाध् 1 A, संपीड् 10, क्षुभ् c., उद्विज् c., मुह् c. **-s.** **-ness, -ude,** *s.* चिंता, उद्वेगः, आकुलत्वं, व्यग्रता, संभ्रमः, बाधा, औत्सुक्यं, वैक्लव्यं, क्षोभः, व्यामोहः, अनिर्वृति *f.* **-ed,** *a.* उद्विग्न, अनिर्वृत, क्षुब्ध, आकुल, व्यग्र, मूढ, संभ्रांत.

Disquisition, *s.* विचारः, परीक्षा, विवेचनं, विमर्शः, निरूपणं.

Disregard, *v. t.* उपेक्ष् 1 A, अवधीर् 10, अवज्ञा 9 U, अवमन् 4 A, अवगण् 10, तिर-

स्कृ 8 U, धिक्कृ, न श्रु 5 P; न आदृ 6 A, न अपेक्ष् 1 A. -s. उपेक्षा, अनादरः, अवधीरणा, अवज्ञा, अनपेक्षा, अनवधानं, निरपेक्षता. **-ful,** *a.* निरपेक्ष, अनवधान, मंदादर, उपेक्षक, अवमानिन्. **-fully,** *adv.* निरपेक्षं, उपेक्षया, अनपेक्ष्य.

Disrelish, *s.* अरुचि *f.*, विरागः, विरक्ति *f.*, विमुखता, अप्रीति *f.*, विद्वेषः. -*v. t.* विद्विष् 2 U, न रुच् 1 A.

Disrepute, -ation, *s.* अ-अप-कीर्ति *f.*, अयशस् *n.*, अप्रतिष्ठा, वाच्यता, अपमानः. **-able,** *a.* अकीर्तिकर (री *f.*), [illegible], गर्हित, अयशस्कर, कलंककर, निंद्य, दूषणीय.

Disrespect, *v. t.* न आदृ 6 A, अवमन् 4 A, उपेक्ष् 1 A, अवज्ञा 9 U, अवगण् 10, न मन् c.; *See* **Contemn.** -*s.* अवज्ञा, अनादरः, अवमानः, अवधीरण-णा, उपेक्षा, परिभवः, तिरस्कारः. **-ful,** *a.* सावज्ञ, उपेक्षक, परिभाविन्, अवमानिन्

Disrobe, *v. t.* विवसनीकृ 8 U, वस्त्रं अपकृष् 1 P, विवस्त्रयति (D.).

Disrupt, *v. t.* भंज् 7 P, विद् 10, भिद् 7 P. **-ion,** *s.* भंगः, विदारणं, भेदः.

Dissatisfy, *v. t.* असंतोषं-अतृप्तिं-उत्पद् c. or जन् c. (जनयति) ; न संतुष् c., न तृप् c.; अप-वि-रंज् c. **-ed,** *a.* अतृप्त, विरक्त, वितुष्ट, असंतुष्ट, अपरक्त. **-Dissatisfaction,** *s.* अतृप्ति *f.*, असंतोषः, विरक्ति *f.*, अप-वि-रागः.

Dissect, *v. t.* (अंगानि) व्यवच्छिद् 7 P, निकृत् 6 P, पृथक् कृ 8 U. 2 सूक्ष्मं विचर् c. or परीक्ष् 1 A. **-ion,** *s.* व्यवच्छेदः, अंगच्छेदः, 2 सूक्ष्मपरीक्षणं. **-or,** *s.* व्यवच्छेदकः.

Dissemble, *v. t.* अप-व्यप-दिश् 6 P, नि-अप-ह्नु 2 A; *See* **Conceal.** **-er,** *s.* छाद्मिकः, दांभिकः, व्यपदेशकः, छद्म-कपट-वेशिन् *m.* **-ing,** *s.* अपह्नवः, प्रतारणा, गोपनं, अपलापः, छद्मन् *n.*, दंभः, कपटं.

Disseminate, *v. t.* वि-प्र-कॄ 6 P, प्रसृ c., विस्तॄ c., प्रचर् c., निवप् 1 P. **-ion,** *s.* प्रसारः, प्रसरणं, विस्तारः, प्रचारणं. **-or,** *s.* प्रचारकः, प्रसारकः.

Dissent, *v. i.* विवद् 1 A, विसंवद् 1 P, न संमन् 4 A, अन्यथा मन्, अन्यमत *a.* भू. -*s.* वैमत्यं *f.*, असंमति *f.*, मतिभेदः, विमतिः *f.*, विसंवादः विरोधः, विप्रतिपत्ति *f.* **-er,** *s.* भिन्नमतावलंबिन् *m.* 2 साधारणधर्मविरोधिन् *m.* **-ient,** *a.* विमत, भिन्नमत, असंवादिन्; 'without one d. voice', सर्वेषामैकमत्येन.

Dissension, *s.* भेदः, कलहः, कलिः, विरोधः, विप्रतिपत्ति *f.*, विवादः; 'seeds of d.' कलहबीजं; 'sowing d.' उपजापः, भेदः; 'a sower of d.' उपजापकः, भेदकः; 'family d.s' गृहच्छिद्रं-रंध्रं, अंतर्भेदः.

Dissertation, *s.* विवरणं, वचनं, प्रबंधः, निबंधः.

Disserve, *v. t.* अपकृ 8 U, न उपकृ, हिंस् 7 P. **-ice,** *s.* अपकारः, क्षति *f.*, अपायः, हानि *f.*

Dissever, *v. i.* वियुज् 7 A, 10, विच्छिद् 7 P, विश्लिष् c.

Dissident, *a.* विमत, भिन्नमत.

Dissimilar, *a.* भिन्न, असदृश (शी *f.*), विरुद्ध, असम, विजातीय, विषम. **-ity,** *s.* असादृश्यं, भेदः, वैषम्यं, अंतरं, विजातीयत्वं.

Dissimulation, *s.* छलं, कपटं, छद्मन् *n.*, माया; *See* **Pretext.**

Dissipate, *v. t.* वि-प्र-कॄ 6 P, विक्षिप् 6 P, अपास् 4 P; *See* **Dispel.** 2 व्यय् 10 P (व्यययति), अपचि 5 U, क्षि c (क्षपयति). **-ed,** *a.* प्रकीर्ण, निर्धूत, अपास्त. 2 दुराचार, व्यसनासक्त, नष्टचारित्र, भ्रष्टशील, दुर्वृत्त, खंडितवृत्त. **-ion,** *s.* विकिरणं. 2 धनव्ययः, द्रव्योत्सर्गः, अपव्ययः. 3 व्यसनिता. भ्रष्टशीलता, दुर्वृत्तता.

Dissociate, *See* **Separate.**

Dissolve, *v. t.* विली c., विद्रु c. 2 भिद् 7 P or c., वियुज् 7 A, 10, भंज् 7 P, विनश् c. विलुप् c., उच्छिद् 7 P; विघट् c.; 'd. a meeting' सभां विसृज् 6 P or c.; 'd. friendship' सौहृदं भिद् or त्रुट् c. or विघट् c.; 'd. a compound' समासं विग्रह् 9 P. -*v. i.* ली 4 A, वि-प्र°, (लवणं जले विलीयते); विद्रु 1 P, गल् 1 P, क्षर् 1 P. द्रवीभू 1 P. **-able, -Dissoluble,** *a.* विद्राव्य, क्षरणशील, विलयनशील. **-ent,** *a.* विलयन (नी *f.*), विद्रावक. **-Dissolute,** *a.* तरल, अनवस्थित, उद्दाम, उच्छृंखल, निर्यंत्रण. 2 दुराचार, भ्रष्टशील, भोगासक्त, व्यसनिन्, दुर्वृत्त, विषयिन्, कामुक, विषयनिरत, इंद्रियसुखनिरत-तत्पर. **-ly,** *adv.* कामुकवत्, विषयासक्त्या. **-ness,** *s.* विषयासक्ति *f.*, दुर्वृत्तता, भोगासक्ति *f.* **-Dissolution,** *s.* विलयनं. द्रवीकरणं-भवनं. 2 प्रलयः, नाशः, क्षयः, विध्वंसः, उच्छेदः. 3 भंगः, वियोगः. निवृत्ति *f.*, विग्रहः, विच्छेदः. विघटनं.

Dissonance, *See* **Discord.**

Dissuade, *v. t.* निवार् 10, निवृत् c., व्यावृत् c., (नेयमस्माद् व्यवसायाच्छक्यते व्यावर्तयितुं Ks. 172); नियम् 1 P, (सुतां शशाक मेना न नियंतुमुद्यमात् K. v. 5); नि-प्रति-षिध् 1 P, (उ मेति मात्रा तपसो निषिद्धा K. i. 26); प्रत्यादिश् 6 P. **-er,** *s.* निवारकः, निवर्तयितृ *m.*, निषेधकः, प्रत्यादेष्टृ *m.* **-Dissuasion,** *s.* निवर्तनं, नियमनं, प्रत्यादेशः, निषेधः-धनं, निवारणं. **-Dissuasive,** *a.* व्यावर्तक, निषेधक, प्रत्यादेशक. -*s.* निवृत्तिहेतुः.

Dissyllable, *s.* द्व्यक्षरं, द्व्यक्षरः शब्दः.

Distaff, *s.* तर्कु *m. f.*, तर्कुटी.

Distance, *s.* (Space) अध्वन् *m.*, भूमि *f.*; 'by what d. separated' कियताऽध्वना विच्छिन्न. 2 अंतरं, अंतरालं, व्यवधानं. 3 विप्रकर्षः, दूरता, असांनिध्यं, दूरं; 'from a d.' दूरात्, आरात्; 'at a d.' दूरे-रं, दूरतः; 'at the d. of a mile' अर्धक्रोशमात्रायां (Ka. 74). 4 दुरासदत्वं, अनालापः, दुर्धर्षता, संवृतशीलत्वं. -*v. t.* दूरीकृ 8 U, अपसृ c. 2 Excel, q. v. -**Distant**, *a.* दूरस्थ, अंतरवर्तिन्, दूर, विप्रकृष्ट, असंनिकृष्ट दवीयस्; 'a d. relation' विप्रकृष्टो बांधवः. 2 दुरासद, दुर्धर्ष; अगम्य; अनालापिन्.

Distaste, *s.* अरुचि *f.*, विरक्ति *f.*, विरागः, वितृष्णा, अप्रीति *f.*, अननुरागः, विद्वेषः. -*v. t.* न रुच् 1 A (with dat.). -**ful**, *a.* अस्वादु, अरुचिकर (री *f.*), अप्रिय. अनिष्ट.

Distemper, *s.* **Disease**, q. v. 2 व्यथा, क्लेशः, बाधा, तापः, अनिर्वृति *f.* 3 दुःशीलं, कुस्वभावः, असद्भावः; दुर्दशा. -*v. t.* पीड् 10, बाध् 1 A, क्लिश् 9 P, उपहन् 2 P. -**ed**, *a.* व्याधिग्रस्त. आतुर, रुग्ण, पीडित, आर्त, आकुल.

Distend, *v. t.* वितन् 8 U, विस्तृ c., श्वि c., आध्मा 1 P, स्फाय् c. (स्फावयति); 'd. ed with wind' वातपूरित, वातोच्छून, मारुताध्मात. -**Distension**, *s.* विस्तारः, स्फीति *f.*, आध्मानं, पूरणं.

Distich, *s.* श्लोकः, द्विचरणं ; द्विपदं.

Distil, *v. i.* क्षर् 1 P, स्रु 1 P, स्यंद् 1 A, च्युत्-श्च्युत् 1 P. -*v. t.* स्रु c., स्यंद् c., सृज्-मुच् 6 P, अवपत् c. 2 (Spirit) संधा 3 U, निष्कृष् 1 P, आ-अभि-सु 5 P. -**lation**, *s.* क्षरणं, द्रवणं, निस्यंदः, द्रवः, स्रवः. 2 अभिषवः. मद्यसंधानं, मद्यनिष्कर्षः. -**er**, *s.* शौंडिकः, सुराजीविन् *m.*, सुराकारः. -**lery**, *s.* संधानी, मद्यनिष्कर्षशाला, शुंडा.

Distinguish, *v. t.* वि-विच् 3, 7 P or c., परिच्छिद् 7 P, विभिद् 7 P, विशिष् 7 P or c., विभज् 1 U, विशेषं कथ् 10. 2 विभू c., लक्ष् 10. विज्ञा 9 U, अभि-ज्ञा. 3 (Oneself) उत्कर्ष-कीर्ति-प्रतिष्ठां-लभ् 1 A, विख्यात *a.* भू 1 P. -**ed**, *a.* विविक्त, परिच्छिन्न; विभिन्न. 2 लक्षित, चिह्नित, विज्ञात. 3 विशिष्ट, विश्रुत, प्रसिद्ध; विशेष in comp.; अतिथिविशेषः 'a d. guest'; 'men are d. from the lower animals by knowledge' नराणां तिरश्चां च प्रतिबोध एव विशेषः. -**Distinct**, *a.* भिन्न, विविक्त, विशिष्ट, व्यतिरिक्त, पृथग्विध, अन्य-इतर- (*pron. a.*), पृथक् *ind.* 2 स्पष्ट, परिस्फुट, व्यक्त, सुप्रकाश. -**ion**, *s.* विशेषः, भेदः, प्र-वि-भेदः, अंतरं, पृथक्त्वं, भिन्नता. 2 परिच्छेदः, विवेकः, विवेचनं, विचारः-रणा. 3 प्रतिष्ठा, गौरवं, वर्णः, ख्याति *f.*, विशिष्टता, उत्कर्षः, प्रमुखत्वं, परमपदं. -**ive**, *a.* विशेषक, सविशेष, परिच्छेदक; 'a d. mark' विशेषचिन्हं, विशिष्टलिंगं, -**ively**, *adv.* सविशेषं, विशेषेण, पृथक् पृथक्. -**ly**, *adv.* पृथक्, विभिन्नं. 2 व्यक्तं, सुस्पष्टं, स्पष्टार्थं, भिन्नार्थं, परिस्फुटं. -**ness**, *s.* भिन्नता. 2 व्यक्ति *f.*, स्पष्टता, भिन्नार्थत्वं.

Distort, *v. t.* आकुंच् c., साचीकृ 8 U, वक्रीकृ. 2 विरूप् 10, वि-कृ, व्यंगीकृ, कदाकारीकृ. 3 परिवृत् c., दुष् c. (दूषयति). -**ion**, *s.* साचीकरणं, वक्रता, परिवर्तनं. 2 विरूपकरणं, विकृति *f.*, आकुंचनं, वैरूप्यं, व्यंगता, कुरूपता.

Distract, *v. t.* आकुलीकृ 8 U, व्यामुह् c., संभ्रम् (भ्रमयति), उन्मद् c., विक्षिप् 6 P, अप-वि-कृष् 1 P, संक्षुभ् c. 2 विदृ 10, खंड् 10, विभिद् 7 P, विदल् c. (दलयति). -**ed**, *a.* विक्षिप्त, मोहित, व्यग्र, विधुर, आकुल, मूढ, विह्वल, संक्षुब्ध, भ्रांत, उन्मत्त; 'of a d. mind' भ्रांतचित्त, वातुल; 'to be d.' मुह् 4 P, उन्मद् 4 P. -**edly**, *adv.* मूढचेतसा, व्यग्रं, उन्मत्तवत्, ससंभ्रमं. -**ion**, *s.* भ्रमः, आकुलत्वं, विह्वलता, व्या-,मोहः, क्षोभः, व्यग्रता, उन्मादः. 2 विभेदः, विदारणं.

Distrain, *v. t.* ऋणहेतोः बंध् 9 P or निरुध् 7 U.

Distraught, *a.* *See* **Distracted**.

Distress, *s.* दुःखं, शोकः, क्लेशः, कष्टं, पीडा, दुर्गति *f.*, वैक्लव्यं, आर्ति *f.* 2 आपद् *f.*, विपद् *f.*, व्यसनं, वि-उप-प्लवः; 'cry of d.' आर्तरवः-क्रंदितं. -*v. t.* पीड् 10, व्यथ् c., क्लिश् 9 P, बाध् 1 A, दुःखयति (D.), संतप् c., खिद् c. -**ed**, *a.* व्यथित, आर्त, दुःखित, पीडित, कष्टापन्न, कृच्छ्रगत, दुर्गत, विपन्न, विधुर, दीन, क्लेशभाज्. -**ful**,-**ing**, *a.* शोकावह, कष्टप्राय, क्लेशद, पीडा-क्लेश-कर (री *f.*); दुःख-मय (यी *f.*), खेदक.

Distribute, *v. t.* विभज् 1 U, वंट् 10, वि-अंश् 10, विभागशः दा 3 P or परिकल्प् c., यथाभागं विसृज् 6 P or विन्यस् 4 U or निक्षिप् 6 P; 'd. food' अन्नं परिविष् 10, -**er**, *s.* विभागकल्पकः, विभक्तृ *m.*, अंशदः; 'd. of food' परिवेष्टृ *m.* -**ion**, *s.* विभागः, संविभागः, विभागकल्पना, व्यंशनं, वंटनं.

District, *s.* देशविभागः, प्रांतः, मंडलं, चक्रं. प्रदेशः.

Distrust, *v. t.* आ-परि-शंक् 1 A, न विश्वस् or प्रति-इ 2 P. -*s.* अविश्वासः, अप्रत्ययः, आशंका. -**ful**, *a.* साशंक, शंकाशील, अप्रत्ययिन्, अविश्वासिन्. -**fully**, *adv.* साशंकं, अविश्वासेन.

Disturb, *v. t.* आकुलीकृ 8 U, धू 5, 9 U उपरुध् 7 U, क्षुभ् c., बाध् 1 A; *See* **Agitate**. 2 भंज् 7 P, प्रतिबंध् 9 P, भिद् 7 P, विहन् 2 P, विच्छिद् 7 P; 'd. sleep' निद्राभंगं कृ ; 'd. studies' अध्ययनविघ्न-

माचर् 1 P; 'able to d. penance' तपो भेदापालं. 3 (Mind) व्यामुह् c., आकुलीकृ, आकुलयति (D.), संभ्रम् c., वि-कृ. -ance, s. क्षोभः, सं-वि-क्षोभः, विप्लवः, विमर्दः, पीडा. 2 प्रतिबंधः, प्रत्यूहः, अंतरायः, विघ्नः, विच्छेदः, भंगः, बाधा, भेदः; 'd. of concentration' समाधिभेदः; 'popular d.' प्रकृतिक्षोभः-कोपः; 'cause of d.' विकारहेतुः. 3 मोहः, आकुलता, व्यग्रता, वैक्लव्यं, संभ्रमः. -er, s. क्षोभकृत् m., विघ्नकरः.

Disunite, v. t. वियुज् 7 A, 10 विश्लिष् c.; *See* **Separate.** —v. i. वियुज्-विश्लिष्-विभिद् pass. **-Disunion,** s. वियोगः, विश्लेषः, विभेदः, विच्छेदः.

Disuse, Disusage, s. अव्यवहारः, विलोपः, विरामः; व्यवहारनिवृत्ति f., अप्रचारः, आचारलोपः; 'fallen into d.' विलुप्त, लुप्तव्यवहार. —v. t. व्यवहाराद् विरम् c. or निवृत् c.

Ditch, s. परिखा, खातं, गर्ता-र्तः, उपकुल्या, प्रणालः-ली, प्रतिकूपः. —v. t. परिखन् 1 P, गर्तां कृ 8 U. **-er,** s. खातकारः, आखनिकः.

Ditto, *adv.* तथा; 'says d.' तथैव ममाभिप्राय इति वदति. —a. पूर्वोक्त, प्राग् लिखित, प्रागुक्त.

Ditty, s. गीतं, गीति f., गीतिका, गानं, गानखंडः.

Diuretic, a. मूत्रवर्धक.

Diurnal, a. आह्निक दैनिक (की f.), दैनंदिन (नी f.); *See* **Daily.**

Diuturnal, a. चिरकालिक (की f.) चिरस्थायिन्.

Divagation, s. *See* **Digression,** उत्पथ-विमार्ग-गमनं.

Divan, s. शिष्टसभा. 2 इंद्रकं, मंचयुक्तः प्रकोष्ठः, आस्थानं-नी. 3 मंचः.

Divaricate, v. i. द्विधा भू 1 P, द्विखंडीभू, द्विधा विभिद् pass. —v. t. द्विधा कृ 8 U, द्विधा भिद् 7 P.

Dive, v. i. वि-अव-गाह् 1 A, निमस्ज् 6 P, विश् 6 P, प्लु 1 A; 'd. ing into books' ग्रंथपरायण, ग्रंथमग्न-निविष्ट. **-er,** s. विगाहकः, निमक्तृ m.; 'river d.' नदीष्णः, जलेवाहः.

Diverge, v. i. (एककेंद्राद्) विचल् 1 P, च्यु 1 A, व्युत्क्रम् 1 U, 4 P, भ्रंश् 1 A, 4 P; *See* **Deviate,** also. 2 **Differ,** q. v. **-ence,** s. विचलनं, च्युति f., केंद्रापसरणं, भ्रेषः, भ्रंशः. 2 भेदः, विरोधः. **-ent,** a. केंद्रविचल. 2 विभिन्न, विरुद्ध.

Diverse, (Divers), a. अनेक, विविध, नानारूप-प्रकार-विध, नाना *ind.* 2 भिन्न, इतर-अन्य- (*pron. a.*), असम, विपरीत, पृथक् *ind.*; 'd. coloured' नानावर्ण, चित्र, कर्बुर, कल्माषित. **-ity,** s. पृथक्त्वं, नानाविधत्वं, भिन्नता, नानात्वं, विभेदः, असादृश्यं, असाम्यं, वैषम्यं. 2 वैचित्र्यं, विचित्रता. **-ly,** *adv.* अनेकधा, नानाविधं, नानारूपेण, नाना. **-Diversify,** v. t. चित्र् 10, नानारूप a. कृ 8 U, शबलीकृ; *See* **Variegate. -ed,** a. कर्बुरित, नानाप्रकार, शबल, कल्माषित, चित्र, चित्रित. **-ication,** s. विचित्रता, विविधत्वं, विभेदः.

Divert, v. t. विनुद् c., रंज् c., नंद् c., रम् c. (रमयति); 'd. oneself' वि-हृ 1 P, क्रीड् 1 P. 2 व्या-वृत् c., आ-वि-कृष् 1 P, भ्रंश् c., संचर् c., संक्रम् c., आक्षिप् 6 P, प्र-वि-चल् c., च्यु c.; 'I shall d. his thoughts' एवं तावदाक्षिपामि (Mal. 9), अन्यतः संचारयामि (U. 1). **-ing,** a. विनोदक, हासजनक, नर्मप्राय, क्रीडापर. **-Diversion,** s. विनोदः-दनं, विहारः, क्रीडा, विलासः, केलि f., खेला, विभ्रमः. 2 मनोरंजनं, मनोविनोदनं. 3 विकर्षणं, भ्रंशनं, व्यावर्तनं, आक्षेपणं.

Divest, v. t. हृ 1 P, अपनी 1 P; *See* **Deprive.** 2 विवस्त्रीकृ 8 U, उच्छद् 10, वस्त्रं अपनी or उत्कृष् 1 P. **-ure,** s. अपहरणं; विवस्त्रीकरणं.

Divide, v. t. विभिद् 7 P, विच्छिद् 7 P; वि-युज् 7 A, 10, विश्लिष् c., पृथक् कृ 8 U, शकलीकृ. 2 प्र-,सं-,विभज् 1 U, परिक्लृप् c.; 'd. ed in half' अर्धे विच्छिन्नं (S. 1); 'd. into 2, 3, parts' &c. द्विधा-,त्रिधा-, कृ; द्रव्याणामवयवशो विभज्यमानानां (S. B. 533) 'when d. ed into parts' &c. 3 (In Math.) भज्, विभज्, हृ 1 P; 'd. ing by the remainder' शेषेण हृत्वा-विभज्य. —v. i. विश्लिष् 4 P, विभिद्-विच्छिद् pass., द्विधा भू 1 P. 2 दल् 1 P, स्फुट् 6 P; 'they were d. ed in opinion' ते भिन्नमता आसन्, द्वैधीभूताः; 'a house d. ed against itself' अंतर्भेदाकुलं गृहं. **-er,** s. विभेदकः, विच्छेदकः, विभागकल्पकः. **-Dividend,** s. भागः, अंशः, उद्धारः, लाभः. 2 भाज्यः. **-Divisor,** s. हरः, हारः, भाजकः, ह(हा)रकः. **-Division,** s. विच्छेदः, विभेदः, खंडनं, पृथक्करणं, वियोगः, विश्लेषः, दलनं. 2 भिन्नता, विभक्तता. 3 विभागः, अंशनं, विभाग-परिकल्पनं, उद्धारः. 4 भागः, खंडः, एकदेशः, विभागः. 5 भागहरः, हरणं, भाजनं; 'd. of an army' गुल्मं, दलं. **-Divisible,** a. विभाज्य, विच्छेद्य, विभेद्य.

Divine, a. दिव्य, दैव (वी f.), देव (वी f.), ऐश्वर (री f.), अमानुष (षी f.), अपार्थिव (वी f.), 2 ईश्वरतुल्य. —s. पुरोहितः, धर्मोपदेशकः, श्रोत्रियः. —v. t. लक्षणानि or शकुनानि परीक्ष् 1 A, शुभाशुभं आलोच् 10 or कथ् 10 or प्रदृश् c. 2 (Guess) ऊह्

1 A, अनुमा 3 A, 2 P, अवगम् 1 P, तर्क् 10. **-ation,** *s.* शकुनपरीक्षणं, लक्षणपरीक्षणं, भविष्यसूचनं. 2 अनुमानं, तर्कः. **-er,** *s.* दैवज्ञः, शकुनपरीक्षकः, निमित्तज्ञः. 2 अनुमातृ *m.* **-ity,** *s.* दैवत्वं, दिव्यता, देवतानुभावः. 2 देवता; *See* God. 3 परमार्थविद्या, श्रुतिविद्या ईश्वरविषयं शास्त्रं. **-ly,** *adv.* देववत्, दिव्यरूपेण.

Divorce, *v. t.* त्यज् 1 P, निराकृ 8 U, निरस् 4 U; विवाहं लुप् c. or भिद् 7 P. **-s.,** **-ment,** *s.* त्यागः, निराकरणं, विवाहलोपः, पत्न्यादेशः; विवाहोच्छेदः.

Divulge, *v. t.* प्रकाश् c., प्र-ख्या c. (ख्यापयति), वि-वृ 5 U, भिद् 7 P or c. **-er,** *s.* प्रकाशकः, भेदकः. **-ing,** *s.* प्रकाशनं, विवरणं, भेदः.

Divulsion, *s.* विदारणं, उत्पाटनं.

Dizzy, *a.* भ्रमिन्, घूर्णमान. 2 भ्रमकारक, भ्रमकर (री *f.*), भ्रमोत्पादक 3 चपल, प्रमत्त, अनवहित. **-ness,** *s.* घूर्णनं, घूर्णि *f.*, भ्र(भ्रा)मरं, भ्रमः, भ्रमि *f.*.

Do, *v. t.* कृ 8 U, विधा 3 U, संपद् c., अनुष्ठा 1 P, निर्वृत् c., आचर् 1 P, निर्वह् c., प्र-णी 1 P, प्रतिपद् 4 A, (किमधुना प्रतिपत्स्ये). 2 जन् c., (जनयति), उत्पद् c., साध् c.: 'd. one's best' यथाशक्ति कृ 3 (Standing for verb) ex. by the verb or by circum.; 'speak as you are accustomed to d.' यथाभ्यस्तमभिधीयतां (U. 1). 4 (As emphatic) ex. by एव, नूनं, खलु, किल; आजगाम किल, तिष्ठत्येव, &c. **-v. i.** आचर् 1 P, व्यवहृ 1 P, वृत् 1 A: 'd. unto others' अन्येषु व्यवहर, वर्तस्व. 2 भू 1 P, अस् 2 P, स्वस्थ-कुशलिन्-*a.* भू; 'how do you d.' अपि कुशलं भवतः, कस्ते वृत्तांतः; 'asks you how you d.' त्वां सुखं-कुशलं पृच्छति; 'd. well' सुस्थित *a.* भू; देवीं सुखं प्रष्टुमागता (M. 4) 'to ask if she was d. ing well &c.' 3 (At the end of a speech); 'I have done' अवसितवचनोऽस्मि; साधयामि; 'this carelessness will not d.' ईदृशं प्रमादित्वं न मया क्षंतव्यं or न ते हिताय कल्पस्यते; 'that will d. now' अलमलं, विरम, इत्यलं; 'this will d. as water for washing the feet' इदं पादोदकं भविष्यति (S. 1); 'it will d. just as well for you' एवमपि तव समीहितं सिद्धमेव. **-away,** विनश् c., लुप् c.; 'd. away with' अलं, कृतं (with instr.); 'have done with your importunity' अलं निर्बंधेन. 2 Kill, q. v.; अपहृ 1 P (life &c.). **-with,** Ex. by किं, किं कार्यं, or प्रयोजनं with instr.; 'what can you d. with such a servant' ईदृशेन भृत्येन किं तव कार्यं, 'what have we to d. with watching the movements of our master' किमस्माकं स्वामिचेष्टानिरूपणेन (H. 2). 2 प्र-उप-युज् 10, व्यापृ c. **-without,** Dispense with, q. v. **-er,** *s.* कर्तृ *m.*, कारकः-करः-कारः, कृत्--in comp.; संपादकः, निर्वर्तयितृ *m.*, निर्वाहकः. **-ing,** *s.* करणं, विधानं, संपादनं; 'of one's own d.' आत्मकृत, स्वयंकृत. 2 (D. s) चरितं, चेष्टितं, कार्यं, व्यापारः. 3 व्यवहारः, आचारः, प्रवृत्ति *f.*

Docile, *a.* विनेय, अनुविधायिन्, विधेय, वश्य, अधीन, आयत्त, शिक्ष्य. **-Docility,** *s.* विने-यता, वश्यता.

Dock, *s.* छिन्नपुच्छं. 2 नौकागारं, नावाशयः. **-v. t.** (पुच्छं) छिद् 7 P, लू 9 U, कृत् 6 P.

Docket, *s.* सूचिपत्रं, अर्थिनामावली. 2 अंकपटः, अंकपत्रं.

Doctor, *s.* भिषज् *m.*, वैद्यः, चिकित्सकः; अगदंकारः, जीवदः, रोगहारिन् *m.* 2 पंडितः, व्युत्पन्नः, शास्त्रज्ञः, ex. by आचार्य in comp. 3 शिक्षकः, आचार्यः, गुरुः. **-v. t.** Treat. q. v. **-ship,** *s.* आचार्यपदं, गुरुपदं.

Doctrine, *s.* मतं. 2 तत्त्वं, न्यायः. 3 पंथिन् *m.*, पथ in comp.; मार्गः. 4 (System) वादः; 'd. of evolution' परिणामवादः; प्रधानकारणवादः, अनीश्वरवादः, &c.; 'receive d. s' संप्रदायः, आम्नायः.

Document, *s.* लेख्यं, लेखः, पत्रं, पत्रकं, लेख्यपत्रं. **-ary,** *a.* (*s.*) in comp.; 'd. evidence' लेख्यप्रमाणं.

Dodecagon, *s.* द्वादशास्रं, द्वादशकोणः.

Dodge, *v. t.* वंच् 10, प्रेतृ c.; *See* Cheat **-v. i.** छलेन अपक्रम् 1 U. 4 P, विपरिवृत 1 A. **-s.** छलं, कपटोपायः, शाठ्यं, कपटं

Doe, *s.* मृगी, हरिणी, एणी, पृषती, कुररी.

Doff, *v. t.* (वस्त्रं) अपनी 1 P, अवतृ c., उन्मुच् 6 P.

Dog, *s.* श्वन् *m.* कुक्कुरः, सारमेयः, शुनकः; कौलेयकः, भषकः, मृगदंशकः; 'd. -cheap' अतिस्वल्पमूल्य; 'd. days' अत्युष्णकालः; 'mad d.' अलर्कः; 'go to the d. s' विनश् 4 P, परिक्षि pass.; 'hunting d.' विश्वकद्रुः. **-v. t.** (कुक्कुरवत्) अनुसृ 1 P पश्चात् धाव् 1 P. अन्विष् 4 P, अनुसृत्य पीड् 10. **-gish,** *a.* श्वशील, श्ववृत्ति, श्वभाव.

Dogged, *a.* कठिन, निष्ठुर, वक्रभाव. 2 प्रतिनिविष्ट, साग्रह. निर्बंधपर.

Doggerel, *a.* विषम; 'd. verses' कुकाव्यं

Dogma, *s.* मतं, तत्त्वं, नियमः, व्यवस्था, विधिः, आदेशः. **-tic, -tical,** *a.* स्वमताभिमानिन्, निर्देशक; वैधिक (की *f.*). **-ally,** *adv.* दृढनिश्चयपूर्वं, सधर्षं, साहसेन, सनिर्बंधं

-tism, s स्वमताभिमानः, सदर्पं, स्वमतावलंबनं, दृढोक्ति *f.* **-tize,** *v. t.* सदर्प-सगर्वं स्वमतं संस्था c. (स्थापयति) or वद् 1 P.

Dole, *s.* अंशः, भागः, विभागः, छेदः, उद्धारः. **2** पारितोषिकं. **-***v. t.* विभज् 1 U, विभागशः दा 3 U, वितॄ 1 P, उत्-सृज् 6 P. **-ful, -some,** *a.* सशोक, दुःखपूर्ण, सकरुण, शोकाकुल, उद्विग्न, विधुर, आकुल, विह्वल, आर्त. **-fully,** *adv.* सशोकं, सदुःखं, सविषादं. **-fulness,** *s.* शोकः, दुःखं, विषादः, खेदः, उद्वेगः, परिदेवनं.

Doll, *s.* शालभंजिका, पांचालिका, पांचाली, कुरुंटी, पुत्रिका ; 'ivory d.' दंतपांचालिका.

Dolour, *s.* शोकः, क्लेशः, खेदः, आर्ति *f.* **-ous,** *a.* सशोक, शोकार्त, उद्विग्न आकुल, विधुर. **-ific,** *a.* पीडा-व्यथा-कर (री *f.*).

Dolphin, *s.* स्थूलमीनः, मत्स्यभेदः.

Dolt, *s.* स्थूल-मंद-बुद्धिः, मूढः, मूर्खः, जडः. **-ish,** *a.* मूढ, स्थूल मति-धी. **-ishly,** *adv.* मूढवत्, स्थूलवत्.

Domain, *s.* राष्ट्रं, विषयः, प्रदेशः. **2** राज्यं, स्वामित्वं. **3** रिक्थं, स्वभूमि *f.*

Dome, *s.* अर्धगोलाकृति शृंग-शिखरं.

Domestic, *a.* ग्राम्य, ग्राम-गृह -in comp. ; ग्रामसिंहः 'd. lion' ; 'd. pigeon' गृहकपोतः. **2** गृहज, गृह्य, गृहजात, गृह in comp.; 'd. quarrels' गृहकलहाः, गृहच्छिद्राणि; 'd. duties' कुलाचारः; 'd. dissension' अंतर्भेदः. **3** गृहप्रिय, गृहवासासक्त. **4** देशीय, देश in comp. **-***s.* गृहदासः, किंकरः, प्रेष्यः, भृत्यः, सेवकः, परिचरः. **2** गृहवासिन् *m.* **-ate,** *v. t.* विनी 1 P, दम् c. (दमयति), गृहे पुष् c. or संवृध् c. **-ated,** *a.* गृहपुष्ट, दांत, ग्राम्य.

Domicile, *s.* गृहं, आ-नि-वासः, आलयः, वसति *f.* **-ed,** *a.* कृतावास, कृताधिष्ठान.

Dominant, *a.* प्रबल, प्रधान, प्रकृष्ट, श्रेष्ठ, प्रभविष्णु, सातिशय, वरीयस्.

Dominate, *v. i.* शास् 2 P; प्रभू 1 P, ईश् 2 A (with gen.), अधिष्ठा 1 P, अध्यास् 2 A. **2** अतिरिच् pass. ; प्रकृष्ट *a.* भू. **-ion,** शासनं, प्रभुत्वं, आधिपत्यं, राज्यं, अधिकार..

Domineer, *v. t.* सगर्वं शास् 2 P. or ईश् 2 A (with gen.), कदर्थ् 10, पीड् 10, उपहृ 1 A. **-ing 2** *a.* उद्धत, अवलिप्त, अतिदृप्त, उत्सिक्त, मदोद्धत.

Dominical, *a.*, *s.* भट्टारकवासरः.

Dominie, *s.* *See* **Tutor.**

Dominion, *s.* अधिकारः, ऐश्वर्यं, प्रभुत्वं, शासनं, आधिपत्यं **2** राज्यं, विषयः, देशः, राष्ट्रं.

Domino, *s.* दीर्घप्रावारः. **2** शलाका.

Don, *s.* सुजनः, आर्यः, शिष्टजनः.

Donary, *s.* धर्मार्थं दत्तं-दानं.

Donation, *s.* दानं, उपायनं, वितरणं, उपहारः, त्यागः, विश्राणनं ; *See* **Gift.**

Donor, *s.* दातृ *m.*, दायिन् *m.* ; त्यागशीलः. **-Donee,** *s.* प्रतिग्रहितृ *m.*

Donkey, *s.* खरः, रासभः, गर्दभः, चक्रीवत् *m.*, वालेयः.

Doodle, *s.* अल्पबुद्धिः, जडः, दुर्गतिः, मंदः.

Famish, *v. t.* (क्षुधया) पीड् 10, अवसद् c., क्षीणी-कृशी-कृ 8 U; 'f. ed with hunger' क्षुत्क्षाम, क्षुत्क्षामकंठ. –*v. i.* अनशनाद् अवसद् 1 P or क्षि pass., क्षाम-कृशांग -*a.* भू. **–ed**, *a.* क्षुत्क्षाम, क्षुधार्त, क्षुत्पीडित, बुभुक्षित. **–ment**, s. बुभुक्षा, अनाहारः, अन्नाभावः, क्षुत्पीडा, क्षुत्क्षामता.

Fan, s. तालवृंतः-वृंतकं, व्यजनं, वीजनं, व्यजः. –v. t. वीज् 10, उप-अनु-सं°; व्यजनेन विधू 5, 9 U; (fig.) उद्-दीप् c., संधुक्ष् 10.

Fanatic,–al, *a.*, s. धर्मोन्मत्त, अतिश्रद्धाव्यग्र; उन्मत्त, भ्रांतबुद्धि. **–ally**, *adv.* उन्मत्तवत्, अतिश्रद्धया. **–ism**, s. धर्मोन्मादः, भक्त्युत्कर्षः, अतिभक्तिव्यग्रता. 2 उन्मादः, उन्मत्तता.

Fancy, s. वासना, भावना, कल्पना, भावना-कल्पना-शक्ति *f.* 2 बुद्धि *f.*, मति *f.*, संकल्पः. 3 मनोलौल्यं, कामचारः, बुद्धिचापल्यं, चापलं, लहरी, तरंगः, छंदः. 4 रुचि *f.*; अभिरुचिः, कामः; 'to have or take a f. for' स्पृह् 10 (with dat.) or ex. by काममनः with inf.; स्पृहयामि खलु दुर्ललितायास्मै (S. 7); 'took a f. to hunt' मृगयां कर्तुमना बभूव. –*v. t.* मन् 4 A, तर्क् 10, सं-वि-भू c.; चिंत् 10, मनसा क्लृप् c.; चित्ते-मनसि-कृ, आलोच् 10. 2 रुच् 1 A, अभिनंद् 1 P; 'f. ing oneself to be learned' पंडितंमन्य, पंडितमानिन्; 'doing what one f. es' कामचारिन्. **–Fanciful**, *a.* मानस (सी *f.*), काल्पनिक-मानसिक (की *f.*), मनःकल्पित, भावित, मनोरथसृष्ट-कल्पित, भावनोत्पादित, वासनाकल्पित, संकल्पज, मायामय (यी *f.*) 2 (Of persons) चलचित्त, लोलमति, कामचारिन्, चपलबुद्धि, मनोलौल्यवत्, स्वैरिन्, स्वैरवृत्त. 3 अनर्थकवासनाकृत, असंभवकल्पक. **–ly**, *adv.* कामचारेण, मनोलौल्यात्, स्वैरं; चापल्येन. **–ness**, s. चलचित्तता, लोलमति *f.*, कामचारिता, मनोलौल्यं, बुद्धिचापल्यं, स्वैरिता.

Fane, *See* **Temple.**

Fang, s. दंष्ट्रा, दशनः-नं, रदः, रदनः, दंतः; 'f. of a serpent' विषदंतः, आशी. **–ed**, *a.* दंष्ट्रिन्, दंतिन्. **–less**, *a.* भग्नदंष्ट्र, निर्दशन, निर्दंत.

Fantasm, s. आभासः, माया, मनोरथसृष्टि *f.* **–Fantastic**, *a.* **Fanciful**, q. v. 2 विषम, असंगत, अपरूप, विलक्षण.

Fantasy, s. *See* **Fancy**.

Far, *a.* दूर (with abl. or gen.), विप्रकृष्ट, *See* **Distant**; 'f. from comfort' सुखादपेत. –*adv.* दूरं- रे, आरात् (with abl.), विदूरतः. अत्यंतं, भृशं, अतीव, सु-अति ' pr.; f. away' दूरे, सुदूरं; 'from f.' दूरात्, दूरतः (एव);

'how f.' कियद्दूरं, कियत्यध्वनि, कियत्प्रमाणं, किंपर्यंतं, कियतांशेन; 'f. off' दूर, दूरस्थ, दूरवर्तिन्, दूरस्थायिन्; 'as f. as' ex. by आ with abl. or in comp.; 'as f. as the sea' आसमुद्रात् or आसमुद्रं; oft. by यावत् (with acc.) or पर्यंत in comp; 'so far as' 'as f. as' इति; *See* under **As**; 'not f. from the tree' तस्य वृक्षस्य नातिदूरे; 'by f.' भूयसा; 'your statement is not f. from the truth' भूतार्थकल्पं तव वचः; 'f. gone in love' दूरगतमन्मथा (S. 3). In comp. ex. by अति, बहु, दूर; 'f.-extended' बहुविस्तीर्ण; 'f.-famed' प्रथितयशस्, उरुकीर्ति; 'f.-fetched' क्लिष्ट, यत्नकृत, असुगम, असुकर; 'f.-reaching' दूराधिरूढ, 'f.-seeing', 'f.-sighted' दूरदर्शिन्, दीर्घदृष्टि, दूरदृष्टि.

Farce, *s.* प्रहसनं, दुर्मल्लिका. **-Farcical,** *a.* उपहास्य, हासकर (री *f.*), हास्योत्पादक; असंगत, अपरूप, हासजनक.

Fardel, *s.* कूर्चः, गुच्छः-च्छकः, पोटलिका, भारः.

Fare, *s.* अन्नं, आहारः, भक्ष्यं, भोजनं. **2** तार्यं, आता(त)रः, तारिकं, तरपण्यं-मूल्यं. *-v. i.* भू 1 P, वृत् 1 A, अस् 2 P, स्था 1 P; को वृत्तांतस्तत्रभवत्याः (M. 4) 'how f.s it with her ladyship'; 'f. ing well' सुस्थ, सुस्थित; 'f. ing ill' दुःस्थित, दुर्गत. **-Farewell,** *interj.* स्वस्ति, भद्रं (भूयात्) with dat.; 'bid f.' आमंत्र् 10 A, आप्रच्छ् 6 A.

Farina, *s.* परागः, रजस् *n.*, पुष्परेणुः.

Farinaceous, *a.* धान्यमय, गोधूमचूर्णमय (यी *f.*).

Farm, *s.* क्षेत्रं, कृषिक्षेत्रं, क्षेत्रभूमि *f.*; 'f. house' क्षेत्रिकगृहं, क्षेत्रपतिगृहं; 'f. yard' क्षेत्रवाटः-टिका. **-er,** *s.* क्षेत्रपतिः, क्षेत्रपालः, क्षेत्रिकः, क्षेत्राजीवः, क्षेत्रिन् *m.*, कर्षकः, कृषीवलः, कृषिकः. **-ing,** *s.* कृषि *f.*, कृषिकर्मन् *n.*

Farrago, *s.* सन्निपातः, प्रकीर्णकं, संमिश्रणं. **-Farraginous,** *a.* संकीर्ण, संमिश्रित, सन्निपतित.

Farrier, *s.* अश्ववैद्यः-चिकित्सकः. **2** अश्वपादत्रकारः. **-y,** *s.* अश्वचिकित्सा.

Farrow, *s.* शूकरापत्यगणः.

Farther, *a.* दूरतर, दवीयस्. **2** अपर; 'the f. end' पारः, अपरप्रांतः. *-adv.* दूरतरं, अधिकदूरं. **2** अग्रे, अग्रतः, पुरः, पुरतः.

Farthest, *a.* दविष्ठ, दूरतम, सुदूर. *-adv.* सुदूरं, अतिदूरं-रे.

Farthing, *s.* ताम्रमुद्रा; 'not even a f.' न काकिणी अपि, न किमपि.

Fascia, *s.* बंधनं, वेष्टनं, पट्टः.

Fascinate, *v. t.* मुह् c., अभिमंत्र् 10 A, अभिचर् c., मंत्रद्वारेण वशीकृ 8 U. **2** हृ 1 P, आकृष् 1 P, प्र-वि-लुभ् c., ग्रह् 9 P, रम् c. (रमयति). **-ing,** *a.* मोहिन्, हारिन्, हृदयग्राहिन्, मनोहर, चित्ताकर्षिन्, हृदयंगम. **-ion,** *s.* मोहः-हनं, सं-परि-वि-मोहनं, अभिचारः, अभिमंत्रणं, माया, इंद्रजालं, वशक्रिया. **2** आकर्षः, चित्तापहारः, चित्तविलोभनं.

Fash, *v. t. See* **Annoy.**

Fashion, *s.* रीति *f.*, प्रकारः, विधिः, विधः, मार्गः; 'f. of dress' भूषाप्रकारः. **2** रूपं, आकारः, आकृति *f.*, मूर्ति *f.*, संस्थानं. **3** लोकाचारः, संप्रदायः, लोकमार्गः-रीतिः, लोकव्यवहारः, लौकिकव्यवहारः, लौकिकाचारः. *-v. t.* निर्मा 3 A, 2 P, वि-रच् 10, वि-धा 3 U, घट् c. (घटयति), सं-परि-क्लृप् c., तक्ष् 1, 5 P, त्वक्ष् 1 P. **2** युज् 7 U, 10, सं-समा-धा. **-able,** *a.* लौकिक-व्यावहारिक (की *f.*), लोकाचारानुरूप, लोकव्यवहारानुसारिन्, लोकमार्गानुयायिन्. **-Fashionably,** *adv.* लोकाचारानुरूपं, लोकरीतिवत्.

Fast, *a.* दृढ, गाढ, स्थिर, अचल, स्थावर, निश्चल, स्थायिन्, दृढबद्ध; 'f. friend' दृढसौहृदः; 'f. sleep' गाढनिद्रा, सुनिद्रा. **2** द्रुतगामिन्, त्वरितगति, शीघ्र, जविन्, जववत्, शीघ्रगति. *-adv.* दृढं, गाढं, स्थिरं; in comp. ex. by दृढ or सु; 'f. bound' सु-दृढबद्ध; 'f. roote' बद्धमूल, सुरूढ; 'f. asleep' सुखसुप्त, गाढनिद्रां गत. **2** शीघ्रं, आशु, सत्वरं, क्षिप्रं, त्वरितं 'not so f.' अलमलमीदृश्या त्वरया. **-ness,** *s.* दृढता, स्थिरता. **2** दुर्गं, कोटः. **-Fasten,** *v. t.* बंध् 9 P, सं-नि°, पिनह् 4 U, ग्रंथ् 9 P, (together); संयुज् 7 U, 10, सं-श्लिष् c., सं-धा 3 U, योक्त्रयति (D.). 2 पि-धा 3 U, सं-वृ 5 U, निरुध् 7 U, अर्गलेन बंध्. 3 दृढीकृ 8 U, स्थिरीकृ, संस्तंभ् 9 P or c. **-ing,** *s.* बंधनं-नी, ग्रंथिः. **2** संधिः, कुडुपः.

Fast, *-v. i.* उप-वस् 1 P, आहाराद् निवृत् 1 A; 'f. to death' प्रा-योपवेशनं कृ 8 U, अनशनेन मृ 6 A. *-s.*, **-ing,** *s.* उपवासः, अनशनं. अनाहारः, लं-घनं, उपोषणं, आक्षपणं, प्रायः; 'f. ing to death' प्रायोपवेशनं. **-er,** *s.* सोपवासः, कृतोपवासः.

Fastidious, *a.* दुस्तोषणीय, दुर्ललित, दुराराध्य. **2** सावज्ञ, अवमानिन्, उपेक्षक; 'a f. critic' दोषैकदृश्. **-ly,** *adv.* सावमानं, दुराराध्यतया.

Fat, *a.* पीन, पीवर, पुष्ट, मांसल, आप्यान, स्थूल, स्फीत; मेदस्विन्, पुष्टांग (गी *f.*), स्थूलदेह; 'f. land' उर्वरा. *-s.* मेदस् *n.*, वसा (शा), वपा, मांससारः-स्नेहः. *-v. t.*, **-ten,** *v. t.*, आ-प्यै c., स्फाय् c. (स्फावयति), संवृध् c., पीवरीकृ 8 U, परिपुष् c. *-v. i.* आप्यै 1 A, पीनीभू, संवृध् 1 A, स्फाय् 1 A, उपबृंह् 1 P. **-ness,** *s.* मेदस्विता, पीनता,

स्थूलता, मेदोवृद्धि *f.*, स्फीति *f.* **-ty,** *a.* मांसल, मेदस्विन्.

Fate, *s* दैवं, भाग्यं, भागधेयं, दिष्टं, अदृष्टं, कर्मन् *n.*, नियति *f.*, प्राक्तनं, भवितव्यता; 'personified f.' विधिः, विधातृ, कृतांतः, कालः; 'it is our f. to do wrong' पापाचरणं दैवायत्तं-दैवाधीनं. **2** मृत्युः, नाशः, क्षयः, अंतः; गति *f.*, परिणामः; 'he met with a sad f.' शोचनीयः-कष्टः तस्य अंतः समजायत; 'what was Sitâ's f.' सीतादेव्याः किं वृत्तं (U. 2); 'such has been the f. of your birth' ईदृशस्ते निर्माणभागः परिणतः (U. 4); 'ill-f.' दुर्दैवं, मंदभाग्यं, दैवदुर्विपाकः-विपर्ययः-विपर्यासः. **-ed,** *a.* नियत, दैवनियुक्त, निर्दिष्ट, भवितव्य; 'whose f. time has come' प्राप्तकालः; 'ill-f.' दैवोपहत, दुर्दैव, मंदभाग्य; 'well-f.' भाग्यवत्, धन्य, ससौभाग्य. **-Fatal,** *a.* प्राणहर, प्राणनाशक, जीवितापह, अंतकर, प्राणघातिन्, मृत्युजनक, दुर्विपाक, मर्मभेदिन्. **2** दैव (वी *f.*), नियत, दैवयुक्त, आवश्यक (की *f.*). **-ism,** *s.* दैवपरता, दैवाधीनता. **-ist,** *s.* दैवपरः, दैवायत्तः, दैवपरायणः, दैवाधीनः, यद्भविष्यः, दैवप्रमाणकः. **-ity,** *s.* प्राणहरत्वं; नियतिः, भवितव्यता, अवश्यकत्वं. **-ly,** *adv.* सनाशं, प्राणांतिकं; 'f. wounded' तथा क्षतो यथाऽसंदिग्धो मृत्युः.

Father, *s.* पितृ *m.*, जनकः, जनितृ-जनयितृ *m.*, जन्मदः, तातः; 'f. and mother' पितरौ, मातापितरौ, मातरपितरौ. **2** गुरुः, पूज्यः; 'f. in-law' श्वशुरः; 'f. land' जन्म-पैतृक-भूमि *f.* **-*v. t.*** स्वीकृ 8 U, परिग्रह् 9 P. **2** आ-रुह् c. (रोपयति), निविश् c., (with loc.). **-hood,** *s.* पितृभावः-धर्मः, पितृत्वं. **-less,** *a.* अपितृक, तात-पितृ-हीन, अनाथ. **-ly,** *a.* तात-पितृ-तुल्यं, पितृनिर्विशेष; gen. by comp.; 'f. affection' पितृवात्सल्यं. **-*adv.*** पितृवत्, तातरूपेण.

Fathom, *v. t.* (तलं or वेधं) परीक्ष् 1 A, निरूप् 10, मा 3 A or c. (मापयति), व्यध् 4 P; 'f. another's thoughts' मनः परीक्ष् or गाह् 1 A or निरूप्. **-*s.*** व्यामः, व्यायामः. **-less,** *a.* अगाध, अतलस्पर्श, अनवगाह्य, अगम्यतल.

Fatigue, *s.* आयासः, क्लमः, श्रमः, अवसादः, खेदः, परिश्रमः, क्लेशः, ग्लानि-क्लांति-श्रांति-*f.*, तंद्रा; 'inured to f.' श्रमसहिष्णु, जितश्रम. **-*v. t.*** खिद् c., आयस् c., अवसद् c., क्लम् c. or श्रम् c. (क्ल-श्र-मयति), क्लिश् 9 P, ग्लै c. (ग्ल-ग्ला-पयति). **-ed,** *a.* श्रांत, क्लांत, खिन्न, ग्लान, अवसन्न, श्रमार्त, सश्रम, जातखेद-श्रम; 'to be f.' श्रम् 4 P, क्लम् 1, 4 P, आयस् 1, 4 P, खिद् pass.

Fatuous, *See* **Foolish.**

Fault, *s.* दोषः, छिद्रं, अगुणः, अपराधः, पापं, प्रमादः, स्खलितं, वाच्यं, वाच्यता; 'find f. with' दोषं ग्रह् 9 U, निंद् 1 P, उपा-लभ् 1 A, दुष् c. (दूषयति), (नात्र कुलपतिर्दोषं ग्रहीष्यति S. 3); 'chase, though found f. with' दृष्टदोषापि मृगया (S. 2); 'f. finder' दोषदृश्, दोषैकदृश्, छिद्रान्वेषिन्, दोषग्राहिन्, निंदक, पुरोभागिन्. **-y,** *a.* सदोष, सापराध, दोषवत्, दोषिन्, निंद्य, वाच्य, अवद्य, निंदार्ह. **2** अशुद्ध, असत्य, अयथार्थ, वितथ, अनृत, मिथ्या-अप-pr.; 'f. conclusion' पक्षाभासः, अपसिद्धांतः. **-less,** *a.* अ-निर्-दोष, अनवद्य, निरपराध, दोषहीन, अपाप, अनघ, अकल्मष, निष्कलंक, विशुद्ध, निर्मल, पवित्र. **2** सत्य, यथार्थ, अवितथ.

Faun, *s.* वनदेवता.

Fauna, *s.* प्राणिजातं.

Favour, *v. t.* अनुग्रह् 9 P, उपकृ 8 U, प्रसादं-उपकारं-कृ 8 U, or दृश् c., साहाय्यं दा 3 P, अभ्युपपद् 4 A; often by (*s.*); 'not inclined to f.' प्रसादपराङ्मुख; 'I wish to be f. ed with the mention of it' कथनेनानुग्राह्यमात्मानमिच्छामि (Ka. 134). **2** अनु-पा c. (पालयति), अनु-मन् 4 A, अनु-मुद् 1 A, अनुकूलयति (D.). **3** आश्रि 1 U, आ-अव-लंब् 1 A, स्वीकृ, अंगीकृ. **-*s.*** अनुग्रहः, प्रसादः, आनुकूल्यं, कृपा, प्रीति *f.*, स्नेहः; 'he is in the king's f.' स नृपप्रसादपात्रं-भाजनं. **2** आ-सं-श्रयः, साहाय्यं, अनुपालनं, अभ्युपपत्ति *f.*, आधारः. **3** हितं, उपकृतं-कारः, प्रियं, सुकृतं. **4** अनुज्ञा, अनुमति *f.*; 'in f. of' पक्षे (with gen.) 'I am speaking in your f.' अहं त्वदनुकूलं ब्रवीमि, त्वत्पक्षे समर्थये; 'ask a f.' प्र-सद् c., उपकारं प्रार्थ् 10 A; 'seek the f. of' आराध् c., अनुरंज् c. **-able,** *a.* अनुकूल, प्रसन्न, हितकारिन्, हितकाम, अनुग्रहपर, हित, हितबुद्धि, उपकारक; 'f. to' आवह, उत्पादक in comp. **-ably,** *adv.* सानुग्रहं, सानुकूल्यं, प्रसन्नतया. **-ite,** *s.* प्रियः, प्रीति-स्नेह-पात्रं-भाजनं, वल्लभः. **-*a.*** प्रिय, दयित, अभीष्ट, इष्ट, दयिततम, हृद्य, वल्लभ. **-itism,** *s.* पक्षपातिता, पक्षानुग्रहः.

Fawn, *s.* मृगशावः-वकः, मृगपोतः-शिशुः, हरिणवत्सः, कुरंगकः. **-*v. i.*** (upon) चाटुवचनैः आराध् c. or तुष् c., साष्टांगपातं सांत्व् 10 or उप-लल् 10, उपच्छंद् 10, छंदं अनुवृत् 1 A or अनुरुध् 4 A. **-er,** *s.* चाटुकारः, सांत्ववादः. **-ing,** *s.* उपलालनं, चाटूक्तिभिः आराधनं, उपच्छंदनं, चाटुवचनं. **-ingly,** *adv.* चाटूक्त्या, स्तुतिपूर्वं.

Fay, *See* **Fairy.**

Fealty, *s.* अनुरागः, भक्ति *f.*, निष्ठा, प्रभुभक्तिः.

Fear, *v.* भी 3 P, उद्विज् 6 A, संवि-त्रस् 4 P, (with abl.). **2** वि-, -, शंक् 1 A, तर्क् 10. **3** भयार्त *a.* भू, त्रस्, भी; 'do not f.' मा भैषीः. –*s.* भयं, भीः. भीति *f.*, सं-,त्रासः, साध्वसं, आशंका, दरः-रं; 'put in f.' *See* **Frighten;** through f.' भयात्, भीत्या. **–ful,** *a.* भयंकर, भयावह, भयप्रद, भीषण, भयानक, दारुण, भीम, रौद्र (द्री *f.*), उग्र, भैरव (वी *f.*), घोर, भीष्म, प्रतिभय 2 (Afraid) भीत, सभय, ससाध्वस, भयार्त, भीरु, शंकित, साशंक, त्रस्त. **–fully,** *adv.* सभयं, सत्रासं, भयेन. 2 दारुणं, घोरं, उग्रं. **–less,** *a.* अभय, निर्भय, अभीत, निःशंक, निर्भीक, निर्विशंक, अभीरु, अकुतोभय ; साहसिक (की *f.*), प्रगल्भ, साहसिन्. **–lessly,** *adv.* निर्भयं, निःशंकं, साहसेन.

Feasible, *a.* साध्य, शक्य, करणीय, संभाव्य, सुकर, उपपाद्य.

Feast, *s.* उत्सवः (lit. & fig.), महः, पर्वन् *n.*, उद्धर्षः; 'f. to the eyes' नयनोत्सवः. **2** संभोजनं, विशिष्टान्नसंभारः, सहभोजनं. –*v. i.* प्रकामं भक्ष् 10; 'f. ing on grass' तृणं प्रकामं भक्षयन्. **2** उत्तमान्नेन तृप् 4 P or संतुष् 4 P. –*v. t.* भोजनविशेषैः संतृप् c. or संतुष् c. **2** (fig.) आनंद् c., प्रमुद् c.; नयनाभ्यां पा 1 P.

Feat, *s.* अवदातं or अद्भुतं कर्मन् *n*, आश्चर्यकर्मन् *n.*, चेष्टितं, कर्मन् *n.*, क्रिया.

Feather, *s.* पिच्छं, पक्षः, गरुत् *m.*, पत्रं, वाजः, पर्णं; 'peacock's f.' बर्हः-र्हं; 'f. of arrows' पुंखः, पत्रं, वाजः; 'f. bed' मृदुशय्या, कोमलशयनं; 'he thinks it a f. in his cap' स तदात्मनो विशिष्टगौरवपदं मन्यते. **–ed,** *a.* पक्षयुक्त, सपक्ष, पक्षिन्, गरुत्मत्, पत्रिन्, पतत्रिन्. **–y,** *a.* पक्षतुल्य-समान.

Feature, *s.* रूपं, आकृति *f.*, आकारः, लक्षणं; 'inauspicious f. s' अभद्रलक्षणानि, अमंगलाकारः. **2** वदनाकृतिः; मुखरेखा, वदनाकारः. 3 (Sign) चिह्नं, लक्षणं, लिंगं.

Febrifacient, *a.* ज्वरोत्पादक.

Febrifuge, *a.* ज्वरघ्न (घ्नी *f.*), ज्वरनाशकनिवारक. –*s.* ज्वरापहं औषधं.

Febrile, *a.* सज्वर, ज्वरित, ज्वरार्त.

February, *s.* माघः, फाल्गुनः, तपस्यः.

Feces, *s.* मलं, पुरीषं, विष् *f.*, उच्चारः, अप(व)स्करः, विष्ठा; *See* **Dung.** **2** खलं, उच्छिष्टं, शेषं. **–Fecal,** *a.* विण्मय-मलमय (यी *f.*), अशुद्ध, अमेध्य. **–Feculent,** *a.* समल, कलुष, अमेध्य, मलदूषित, खलिन्.

Fecund, *a.* बहुप्रज, बह्वपत्य. **2** अवंध्य, बहुफलप्रद, उर्वर (as soil). **–Fecundate,** *v. t.* सफलीकृ 8 U; रेतः सिच् 6 P. **–Fecundity,** *s.* सफलता, अवंध्यत्वं, प्रसवत्वं, फलवत्त्वं, स्फीति. *f.*

Federal, Federate, *a.* संहत, संघातवत्, सामयिक-सांघातिक (की *f.*), कृतसंधि, संयुक्त, संधिसंश्लिष्ट.

Fee, *s.* शुल्कः-ल्कं, वेतनं, प्रतिफलं, उपायनं, निस्तारः, पारितोषिकं; 'monthly f.' मासिकं; 'f. simple' स्वाधीना-स्वतंत्रा-भूमिः.

Feeble, *a.* दुर्बल, अशक्त, शक्तिहीन, निर्बल, क्षीणशक्ति, अल्पशक्ति, अल्पबल वीर्य-सत्त्व, क्षीण, अवसन्न, क्षाम, असमर्थ, शिथिलबल निःसत्त्व. **–ness,** *s.* दौर्बल्यं, क्षीणता, अल्पबलं, अल्पवीर्यं, तेजोहानि *f.*, वीर्यहानिः, असामर्थ्यं, अवसादः, अशक्ति *f.*, शक्तिक्षयः, सत्त्वनाशः, निःसत्त्वता. **–Feebly,** *adv.* दुर्बलतया, अल्पशक्त्या, मंदं.

Feed, *v. t.* भुज् c., अश् c., अन्नदानेन आप्यै c. or परि-पुष् c. **2** पुष् 1,9 P or c.; सं-भृ 3 U, पा c. (पालयति), अन्नेन संवृध् c., or संतृप् c, or संतुष् c. **3** चर् c. **4** उपक्लृप् c., उपस्था c. (स्थापयति). –*v. i.* (on) भक्ष् 10, अद् 2 P; *See* **Eat;** oft. by अशन, भुज् in comp ; पिशिताशनः, हुतभुक् &c. 2 (Grass) चर् 1 P. –*s.* भक्ष्यं, भोज्यं. **–er,** *s.* भोजयितृ *m.*, अन्नदातृ *m.* आशयितृ *m.* **2** पोषकः, उपकल्पकः. **3** भक्षकः, भोजिन् *m.*, अत्तृ *m.* भोक्तृ *m.*, आशिन् *m.*; अद्-भुज्-आशिन्-अशन in comp. **–ing,** *s.* अन्नदानं, पालनं, पोषणं, भरणं. **2** भक्षणं, खादनं, भोजनं, अशनं.

Feel, *v. t.* अनुभू 1 P, वि-भू c., (पादचारमपि न व्यभावयत् R. xi. 10), ज्ञा 9 U, उपलभ् 1 A, विद् 2 P, 10 A; ' 'f. certain' दृढं ज्ञा, प्रति-इ 1 P; 'I felt his remarks much' तस्य वचो मम हृदयमर्माणि अस्पृशत्-अभिनत्. **2** (Think) मन् 4 A, गण् 10, आकल् 10; *See* **Consider;** 'are felt by the mind as pleasant' मधुरतराण्यापतंति मनसः (K s. 103). **3** स्पृश् 6 P, परामृश् 6 P, आलभ् 1 A, स्पर्शेन परीक्ष् 1 A or निरूप् 10; 'f. ing the pulse' नाडीं स्पृष्ट्वा. –*v. i.* (आत्मानं) गण्, मन्. **2** (for) अनुकंप् 1 A, समदुःख *a.* भू; 'I f. sorry for you' अहं तव कृते दुःखाकुलोस्मि; 'felt proud of his company' तत्समागमेनारूढगौरवमिवात्मानं मेने; 'I f. easy now' लब्धं मयेदानीं स्वास्थ्यं (S. 4); 'I f. better' अस्ति मे विशेषः (S. 3). **–er,** *s.* स्पर्शशृंगः 'it was intended as a f.' साधारणलोकमतज्ञानाय इदं प्रयुक्तमासीत्. **–ing,** *s.* अनुभवः, अनुभूति *f.*, संवेदनं, बोधः, ज्ञानं, उपलंभः, उपलब्धि *f.*, उपागमः, चैतन्यं, चेतना; संज्ञा. **2** स्पर्शः, परामर्शः, संपर्कः, स्पर्शजं ज्ञानं. **3** वृत्ति *f.*, रसः भावः, रागः, विकारः, चित्त-मनो-वृत्तिः, मनोविकारः-धर्मः; 'f. of anger' कोपवृत्तिः. **4** कृपा, दया, अनुकंपा, करुणा, समदुःखिता; 'a man of f.' सहृदयः, सचेतस् *m.* 'what man of f.

in not affected at heart ' सचेतसः कस्य मनो न दूयते (K. v. 48). -*a*. चेतन, चेतनायुक्त, चैतन्य-बोध-विशिष्ट. 2 रसवत्, रागिन् भाविक, सरस. **-ingly**, *adv*. सरसं, सरागं, ज्ञानपूर्वं, स्वानुभूतिपूर्वं. 2 सदयं, सानुकंपं.

Feign, *v. t.* मनसा क्लृप् c. or सृज् 6 P. 2 कपटं-व्याजं-छद्म कृ 8 U; अप-दिश् 6 P; f. ing illness ' शरीरास्वास्थ्यमपदिश्य; oft. ex. by कृतक, कृत्रिम, or कपट-व्याज-छद्म-मिथ्या in comp. ; 'he f. ed himself to be dead' आत्मानं मृतवत्संदर्शयामास; 'f. ing anger ' कृतकं कोपं कृत्वा; ' f. ing sleep' प्रसुप्तलक्षण, व्याजसुप्त, लक्ष्यसुप्त. **-ed**, *a* व्याज-कपट-छद्म-मिथ्या in comp.: कूटार्थ, कल्पित, कृतक, कृत्रिम; 'f. quarrel' कृतककलहः. 'a f. dress ' कपटवेशः ; ' f. sleep ' व्याजनिद्रा; ' a f. ascetic ' छद्मतापसः. **-edly, -ingly**, *adv*. मिथ्या, सकपटं, सव्याजं, छद्मना. **-er**, *s*. कापटिकः, छद्मिन् *m*., प्रतारकः; ' f. of illness ' आतुरलिंगिन्.

Feint, *See* **Pretext.**

Felicity, *s*. सुखं, श्रेयस् *n*., परमसुखं, परमानंदः, धन्यता, सौभाग्यं, कल्याणं, प्रहर्षः; ' f. of expression' वचसां प्रौढत्वं (Mal 1). 2 (Eternal f.) अपवर्गः, मोक्षः, निःश्रेयसं, परमा गतिः, परमपदं, मुक्ति *f*., कैवल्यं, निर्वाणं, श्रेयस्, अमृतं. 3 सहजता, अकृत्रिमता, अनाहार्यत्वं. **-ous**, *a*. श्रेयस्कर (री *f*.), अतिकल्याण, परमसुखिन्, धन्य, सुभग. **-Felicitate**, *v. t.* अभिनंद् 1 P or c., दिष्ट्या वृध् c.; *See* **Congratulate.** **-ion**, *s*. अभिनंदनं, धन्यवादः, कल्याणवचनं.

Feline, *a*. मार्जारीय, बैडाल (ली *f*.).

Fell, *s*. चर्मन् *n*., अजिनं, दृति *f*., कृत्ति *f*. 2 औपलाद्रि *m*. -*a*. निष्ठुर, क्रूर, दारुण, उग्र. -*v. t.* नि-अव-पत् c., अवकृत् 6 P, अवच्छिद् 7 P, नि-अव-भंज् 7 P, प्रहृत्य पत् c., शद् c. (शातयति). **-er**, *s*. निपातकः, छेतृ *m*.

Fellow, *s*. सहायः, मित्रं, सहचरः, अनुषंगिन् *m*., सजुस् *m*., सहवर्तिन् *m*., वयस्यः. 2 समपदभाज् *m*., तुल्यपदस्थः, सवयस्कः. 3 जनः, पुरुषः, ' this f. is bold ' धृष्टोऽसौ जनः. 4 सजातीयः, सजातिः. 5 यमः, यमकः, एकतरः, युग्मकः. 6 कापुरुषः, माणवकः, जाल्मः; ' my good f. ' भद्र, सौम्य. In comp. words ex. by सम-सह; 'f.-being, -creature ' समानजातिः-जातीयः, सजातीयः, समभूतं ; 'f.-citizen ' एकनगरस्थः, एकग्रामीणः ; ' f.-citizenship ' पौरसख्यं, पौरसाहित्यं; ' f. countryman ' स्वदेशजः, स्व-एक-देशीयः; 'f.-feeling' सहानुभूति *f*., समदुःखत्वं, समभावः, भूतानुकंपा; ' f.-student,-scholar ' सहाध्यायः, सतीर्थः, सहाध्यायिन् *m*., सहपाठकः; ' f.-labourer, -worker ' सहकारिन् *m*., संभूयकारिन् *m*., सहकर्मिन् *m*. 'f.-servant' सहभृत्यः, एकप्रभुः; ' f.- soldier ' सहयोद्धा; ' f. sufferer' सम-सह-दुःखः-खिन्, समदुःखभाज्, सहभोगिन् ' f. traveller ' सहयायिन्, सहगामिन्; ' f. of a- body' पारिषद्यः, पांक्तेयः, श्रेण्यभ्यंतरः. **-ship**, *s*. साहाय्यं, साहित्यं, संसर्गः, संगः-गमः, संघातः, संयोगः, साहचर्यं, सख्यं, मैत्री, समागमः. 2 वृत्ति *f*. 3 पारिषद्यपदं.

Felly, *See* **Circumference.**

Felon, *s*. साहसिकः, घोरपातकः, आततायिन् *m*., महापापिन्-पातकिन् *m*., महापराधिन् *m*. **-ous**, *a*. आततायिन्, जिघांसु, वधोद्यत. 2 दुराचार, दुष्ट, पापिष्ठ, दुर्वृत्त, अतिनिंद्य. **-y**, *s*. महापापं-पातकं, महापराधः, साहसं; आततायिता, घोरपापं.

Felt, *s*. ऊर्णा, और्णकं, ऊर्णायुः, कंबलः.

Female, *s*. स्त्री, नारी; *See* **Woman.** -*a*. Ex. by the suffixes आ, ई, or वधू in comp.; 'f. sparrow' चटका; हरिणी, सिंही, चक्रवाकवधूः, &c.: ' f. friend ' वयस्या, सखी, सहचरी, आलि *f*. ' f. apartments ' अवरोधगृहं, शुद्धांतः, अंतःपुरं; ' a f. form ' स्त्रीरूपं, स्त्रीसंस्थानं ; ' a f. dress ' स्त्रीनेपथ्यं-वेषः.

Femesole, *s*. अनूढा स्त्री.

Feminine, *a*. स्त्रैण (णी *f*.), स्त्रीजातीय, स्त्रीधर्मन्. 2 कोमल, मृदु, पेलव, सुकुमार. 3 (In gram.) स्त्री ; ' this word is masculine or f.' अयं शब्दः पुंसि स्त्रियां वा.

Fen, *s*. अनूपः, अनूपभूः, कच्छभूः, पंकः, कर्दमः. **-Fenny**, *a*. जलाढ्य, सजल, पंकिल.

Fence, *s*. वृति *f*., आवरणं, प्राकारः, प्राचीरं, वेष्टनं, वरणः, शा(सा)लः. 2 रक्षा-क्षणं, गुप्ति *f*. -*v. t.* वृत्या रक्ष् 1 P or आ-परि-वृ 5 U or c. or परिवेष्ट् c. or अव-नि-रुध् 7 U. -*v. i.* दंडयुद्धं अभ्यस् 4 U or शिक्ष् 1 A. 2 मुष्टियुद्धं कृ 8 U, दंडादंडि युध् 4 A. **-er**, *s*. असि-गदा-योधः, दंडयोद्धृ *m*. **-ing**, *s*. यष्टि-दंड-युद्धं, आयुध-शस्त्र-विद्या. **-less**, *a*. अरक्षित, अनावृत.

Fend, *v. t.* वृ c. निवृ 10, प्रतिहन् 2 P.

Fender, *s*. अंगारगुप्ति *f*. 2 वरूथः, रथगुप्तिः.

Fennel, *s*. शा-सा-लेयः, छत्रा, मधुरिका.

Feracious, *See* **Fecund.**

Ferine, *See* **Beastly.**

Ferment,-ation, *s*. मंडः-डं, अभिषवः, फेणः-नः, किण्वः-ण्वं, सुरामंडः, कारोत्तरः, नग्नहुः (*m*.). 2 अंतः-क्षोभः-तापः-दाहः-उत्सेकः-वेगः, उत्तापः. -*v. t.* आकुलीकृ 8 U, अंतः क्षुभ् c., उत्सिच् 6 P or c., उत्तप् c., अंतर्वेगं उत्पद् c., अंतःतप् c. -*v. i.* फेनायते (D.), उत्सिच् pass., अंतः क्षुभ् 4 P or तप् 4 A, अंतस्तापं या 2 P. 2 क्षुभ्, उत्तप्.

Fern, *s*. बहुपत्रकः.

Ferocious, *a.* रौद्र (द्री *f.*), उग्र, क्रूर, अतिक्रूर, दारुण, क्रूरकर्मन्, मारात्मक, साहसिक (की *f.*); *See* **Grim, Dreadful,** also. **-ness, -Ferocity,** *s.* रौद्रता, क्रौर्य, उग्रता, &c.

Ferreous, *a.* लौह (ही *f.*), आयस (सी *f.*), लोहमय (यी *f.*), अयोधर्मन्.

Ferret, *s.* बभ्रुः, नकुलः.

Ferruginous, *a.* लोहमलयुक्त.

Ferrule, *s.* लोहवलयः-यं, लौहरक्षणी.

Ferry, *s.* तरः, तरणस्थानं, घट्टः; 'f. boat' तरनौः, त(ता)रणः-णि *f.*, तरी, तरालुः, उडुपः, वहित्रं; 'f.-man' तरनायकः, नाविकः, तारकः, तारणः. **-***v. t.* (over) नावा तॄ 1 P or पारं गम् 1 P.

Fertile, *a.* शस्यप्रद, उर्वर, बहुफलप्रद, बहुशस्यद, अवंध्य, स्फीत; 'f. in produce' समृद्धशस्य. 2 (Fig.) निर्माणकुशल, कल्पक, संविधायक. **-ity, -ness,** *s.* फलवत्ता, फलदता, सफलता, अवंध्यत्वं, स्फीति *f.* **-ize,** *v. t.* सफल- फलप्रद-*a.* कृ 8 U, फलवती-कृ, आप्यै c., स्फीतीकृ.

Ferule, Ferula, *s.* वेत्रं, दंडकाष्ठं.

Fervent, *a.* चंड, उत्सुक, तीक्ष्ण, सातिशय, उग्र, सोत्साह, आसक्त, व्यग्र, उत्कट, उत्तप्त, उद्युक्त, सोद्योग; 'f. in piety' भक्तिव्यग्र, अतिभक्त. **-ly,** *adv.* सोत्साहं, साशंसं, सोत्सुकं, व्यग्रतया, औत्सुक्येन, उत्कटतया. **-Fervency,** *s.* व्यग्रता, उत्साहः, औत्सुक्यं, उत्कटता, तीक्ष्णता, चंडता, आसक्ति *f.*, मनोनिर्बंधः.

Fervid, *a.* प्रचंड, तीव्र, तीक्ष्ण, उत्तप्त, सातिशय, प्रखर, तिग्म, उग्र. **-Fervour,** *s.* प्र-,चंडता, तीव्रता, तीक्ष्णता, उत्तापः, उत्कटता, व्यग्रता; ' religious f. अतिभक्ति *f.*, भक्तिव्यग्रता, श्रद्धोन्मादः.

Festal, *a.* औत्सविक (की *f.*).

Fester, *v. i.* पूय् 1 A, पूतीभू 1 P, पक्व *a.* भू, सपूय *a.* भू.

Festival, *s.* उत्सवः, महः, पर्वन् *n.*, क्षणः, उद्धर्षः, उद्धवः, यात्रा, अभ्युदयः; 'public or general f.' यात्रोत्सवः.

Festive, *a.* आनंदप्रद, सोत्सव, हर्षण, सानंद, उत्सव in comp.; 'f. day' उत्सवदिनं. **-ity,** *s.* उत्सवः, समुत्सवः. उत्सवकालः. 2 प्रमोदः, हर्षः, आनंदः, आल्हादः.

Festoon, *s.* माला, हारः, स्रज् *f.*

Fetch, *v. t.* आहृ 1 P, उपा-आ-नी 1 P, उपा-दा 3 A, 2 निष्कृष् 1 P, उत्पद् c., सृ c.; 'f. a deep sigh' दीर्घं निश्वस् 2 P; what price does the book f.' कियता मूल्येन तत्पुस्तकं विक्रीयते ; 'f. up' उद्-धृ 1 P, 10; आ-सद् c.; *See* **Overtake.** **-***s.* कपटं, व्याजः, अपदेशः, उपायः.

Fete, *v. t.* तृप् c., तुष् c. **-***s.* उत्सवः.

Fetid, *a.* पूतिगंधि, पूत, असुगंधि, उग्रगंध, दुर्गंध.

Fetor, *s.* दुर्गंधः, पूति-उग्र-गंधः.

Fetter, *s.* निगडः-डं, बंधनं, पाशः, शृंखला-लं. **-***v. t.* निगडेन बंध् 9 P, संयम् 1 P, यंत्र् 10, निगडयति (D.). **-ed,** *a.* निगडित, पाशबद्ध, संयत, शृंखलित, संदानित.

Fetus, *s.* गर्भः, भ्रूणः, पिंडः, कललं-नं, गर्भस्थः शिशुः.

Feud, *s*, कलहः, कलिः, विग्रहः विरोधः, विपक्षता, द्वंद्वं, युद्धं; 'family f.' गृहच्छिद्रं, गृहरंध्रं, अंतर्भेदः.

Feudatory, *s.* सामंतः.

Fever, *s.* ज्वरः (lit. & fig.), तापः. देहदाहः-तापः; 'inflammatory f.' दाहज्वरः; 'typhoid f.' संनिपातज्वरः, तांद्रिकसंनिपातः; 'ardent f.' तापोल्बणः; 'relapsing f.' मुक्तानुबंधिन् *m.*, संततः. **-***v. t.* उद्-सं-तप् c., ज्वर् c. (ज्वरयति). **-ish,** *a.* ज्वरार्त, ज्वरग्रस्त, ज्वरातुर, ज्वरपीडित, ज्वरित, सज्वर, ज्वरिन्. 2 ज्वरोत्पादक, ज्वरजनक.

Few, *a.* अल्प, कतिपय, स्तोक, परिमित, मित, अप्रचुर, अबहु; 'a f.' कतिचित्, स्तोकाः, कतिपयाः. **-ness,** *s.* अल्पत्वं, स्तोकत्वं.

Fiance, *s.* वधू.

Fiasco, *s.* भंगः, अनिष्पत्ति *f.*, असिद्धि *f.*

Fiat, *s.* आज्ञा, निर्देशः, शासनं, नियोगः, व्यवस्थापत्रं.

Fib, *See* **Falsehood.**

Fibre, *s.* तंतुः, सूत्रं, गुणः, तंत्रं. 2 केस(श)रः-रं, अंशुः, पक्ष्मन् *n.* 3 शिरा, नाडी, स्नसा; 'f. of a lotus' मृणालः-लं-ली, बिसं. **-ed, -ous,** *a.* तंतुमत्, सूत्रिन्, केसरिन्, तंतुमय (यी *f.*), शिराल.

Fickle, *a.* चपल, चंचल, लोल, तरल. चल, अस्थिर, अनवस्थित, अधीर; (of persons only). चलचित्त, चंचलहृदय, लोलबुद्धि, नैकभावाश्रय, प्रकृतितरल, लोल-चंचल-मति, अस्थिरबुद्धि. **-ness,** *s.* चापल्यं, तरलता, लोलता, चांचल्यं अधीरता, अस्थिरता, चलचित्तता, मनोलौल्यं.

Fiction, *s.* कल्पना, रचना, सृष्टि *f.*; मनःकल्पना-सृष्टिः, मानसी सृष्टिः. 2 मिथ्याकथा, कल्पिता कथा. **-Fictitious,** *a.* कृतक, कृत्रिम, काल्पित, असत्य, मृषार्थक, कूटार्थ, कपट, मिथ्या-कूट in comp. **-ly,** *adv.* मिथ्या, सकपटं, मृषा सकूटं, सव्याजं.

Fiddle. *s.* शा(सा)रंगी, पिनाकी. **-***v. t.* सारंगीं वद् c., 'f. stick' शारिका, कोणः, घर्षरिका.

Fidelity, *s.* भक्ति *f.*, आसक्तता, अनुरागः, निष्कपटत्वं, विश्वास्यत्वं, स्वामि प्रभु-निष्ठा-भक्तिः, अभेद्यता; 'f. to a husband' पातिव्रत्यं, पतिसेवा, सतीत्वं, चारित्र्यं.

Fidget, *v. i.* चपल-चंचल-*a.* भू 1 P. –*s.* चापल्यं, चंचलता. **-y,** *a.* चपल, चंचल, लोल, अशांत, अधीर; *See* **Fickle.**

Fiducial, *a.* विश्वासिन, विश्वस्त, असंदिग्ध.

Fiduciary, *a.* न्यस्त, निक्षिप्त. –*s.* न्यासनिक्षेप-धारिन्.

Fie, *interj.* धिक् (with acc.), sometimes with gen.

Fief, *s.* क्षेत्रं, भूमि *f.*, क्षेत्रभूमि:.

Field, *s.* क्षेत्रं, भूमि *f.*, वप्र:-प्रं; 'a collection of f. s' कैदारकं, कैदार्यं, क्षैत्रं, कैदारिकं; 'f. of battle' रणभूमि:, रणाजिरं, रणांगनं-णं, रणं, समरभूमि:; 'f. marshal' सेनापति:, बलाध्यक्ष:, चमूपति:, दंडनायक:, सेनानी *m.* 'f. sports' वनक्रीडा, अरण्य-मृगया-विहार:; 'the general took the f.' सेनानीर्युद्धाय प्रवृत्त:; 'they lost the f.' तस्मिन्युद्धे पराजिग्यिरे. **2** अवसर:, प्रसर:, स्थानं, विषय:.

Fiend, *s.* पिशाच:, राक्षस:, भूत:, वेताल:; *See* **Demon** also. **-ish -like,** *a.* पिशाचतुल्य अतिदारुण, पैशाच (ची *f.*), राक्षस (सी *f.*), आसुर (री *f.*), अतिक्रूर.

Fierce, *a.* उग्र, क्रूर, घोर, रौद्र (द्री *f.*), दारुण, भीषण, भैरव (वी *f.*); *See* **Dreadful, Grim,** also. **2** तीक्ष्ण, तीव्र, चंड, प्रखर, परुष, निष्ठुर (of voice &c.). **3** संरब्ध, कोपज्वलित, क्रोधेद्ध, कोपाकुल, समन्यु, कोपोद्दीपित, क्रोधव्यंजक. **-ly,** *adv.* तीक्ष्णं, तीव्रं, उग्रं, क्रूरं, घोरं, चंडं, निष्ठुरं, सक्रोधं, संरंभेण. **-ness,** *s.* क्रूरता, उग्रत्वं, रौद्रता. **2** तीक्ष्णता, चंडता. **3** संरंभ:, अतिमन्यु:, कोपोन्माद:, क्रोधातिशय:.

Fiery, *See* under **Fire.**

Fife, *s.* वेणु:, वंश:. **-er,** *s.* वांशिक:, वेणुवादक:.

Fifteen, *a.* पंचदशन्; 'f-th' पंचदश (शी *f.*).

Fifty, *a.* पंचाशत्; 'f.-th' पंचाश (शी *f.*), पंचाशत्तम (मी *f*).

Fig, *s.* (Tree) अंजीर:, न्यग्रोध:, उदुंबर:; (fruit) न्यग्रोधं, उदुंबरं, or ex. by फलं in comp.; 'I care a f. for you' न त्वां तृणायापि मन्ये-गणयामि.

Fight, *v. i.* युध् 4 A, विग्रह् 9 P, संप्र-हृ 1 P, संग्रामं आरभ् 1 A, वैरायते (D.), प्रति-आ-युध् (with acc.); 'f. a cause' कार्यार्थं युध्. –*s.*, **-ing,** *s.* युद्धं, रण:-णं, आयोधनं, समर:-रं, विग्रह:; *See* **Battle.** **-er,** *s.* योद्धृ *m.*, युयुत्सु:.

Figment, *s.* कल्पना, मिथ्या-कल्पित-कथा, मानसी सृष्टि:.

Figurante, *s.* नर्तकी, लासिका.

Figure, *s.* आकार:, रूपं, आकृति *f.*, मूर्ति *f.* **2** काय:, देह:, विग्रह:, अंगं, गात्रं, वपुस् *n.*, (**Body** q. v.). **3** मूर्ति:, प्रतिमा, प्रतिरूपकृति *f.* **4** अंक:. **5** अलंकार:; 'f. of speech' वाक्यालंकार:. **6** रूपकं, आरोप:, लक्षणा, उपलक्षणं-णा, उपचार:. **7** प्रतिष्ठा, गौरवं, यशस् *n.*, वर्ण:, कीर्ति *f.*; *See* **Fame.** –*v. t.* वि-धा 3 U, विरच् 10, निर्मा 3 A, सं-परि-क्लृप् c. **2** वर्ण् 10, चित्र् 10, लिख् 6 P, वि-आ°, रूप् 10, चित्रीकृ 8 U, कर्बुरीकृ **3** (To oneself) वि-भू c., चिंत् 10, क्लृप् c., विगण् 10. **-Figurate,** *a.* साकार, रूपवत्, मूर्तिमत्, सरूप. **-Figurative,** *a.* सालंकार. **2** लाक्षणिक-औपचारिक (की *f.*), उपलक्षित; 'f. use' उपचार:. **-ly,** *adv.* सालंकारं, सोपलक्षणं; 'to be used f.' उपचर् pass. (with loc.); अचेतनेपि कूले चेतनवदुपचारदर्शनात्, तस्माच्चेतनवदुपचर्यते (S. B. 99, 100).

Filament, *s.* केश(स)र:-रं, तंतु:, सूत्रं, पक्ष्मन् *n.*, अंशु:; 'f. of a lotus' मृणाल:-लं, बिसं, किंजल्क:.

Filch, *v. t.* मुष् 9 P. चुर् 10, अप-हृ 1 P. **-ing,** *s.* स्तेयं, अपहार:, चौर्यं, मोषणं.

File, *s.* पंक्ति *f.*, आवलि-ली *f.*, श्रेणि-णी *f.*; 'f. of an army' दंडव्यूह:, सैन्यश्रेणि:, बलविन्यास:. **2** सूत्रं, गुण:, तंतु:. **3** लेख्यश्रेणी, लेख्यपत्रसमूह:. **4** व्रश्चन:, पत्रपरशु:. –*v. t.* यथाक्रमं रच् 10 or श्रेण्यां आरुह् c. **2** घृष् 1 P, मृज् 2 P. –*v. i.* व्यूहेन प्र-या 2 P.

Filial, *a.* पुत्रानुरूप, पुत्रयोग्य, पुत्रीय; gen. पुत्र in comp.; 'f. duty' पुत्रधर्म:; 'f. affection' पितृवात्सल्यं, पितृभक्ति *f.* **-ly,** *adv.* पुत्रवत्, पुत्रधर्मानुरूपं. **-Filiation,** *s.* पुत्रत्वं, पुत्रीकरणं.

Filiform, *a.* सूत्राकृति.

Filings, *s.* लोहचूर्ण-किट्टं, लोहजं.

Fill, *v. t.* पृ-पॄ 3 U, भृ 3 U, आ-नि-सं-चि 5 U, प्र-आ-सं-पूर् 10, आ-सं-कॄ 6 P, व्याप् 5 P, व्यश् 5 A, आवृ 5 U; better ex. by 'f. ed'; 'it f. ed my heart with terror' तेन मम हृदयं भयसंकुलं बभूव. **2** प्रचुरीकृ 8 U, बहुलीकृ, संकुलीकृ. –*s.* Ex. by यथेच्छं, पर्याप्तं, आतृप्ति, प्र-नि-कामं; 'drank his f.' यथेच्छमापिबत्, नीवारौदनमंडं पर्याप्तमाचामाति (U. 4) 'drinks his f. &c.' **-ed,** *a.* पूरित, पूर्ण, सं-परि-पूर्ण, आ-सं-कीर्ण, संकुल, आ-समा-कुल, व्याप्त, नि-संचित, आवृत, संभृत, आविष्ट, गर्भ in comp.

Fillet, *s.* पट्ट:, बंधनं, वेष्टनं, बंध: (केशानां).

Fillip, *s.* अंगुलिप्रहार:-घात:-ताडनं, छोटिका.

Filly, *s.* किशोरी, बालतुरगी-वाजिनी-घोटिका.

Film, *s.* पटलं, सूक्ष्मतंतु:, सूक्ष्मत्वच् *f.*, पुट:-टं; 'f. of the eye' अक्षिपटलं, अंतर्धानं. **-y,** *a.* पटलावृत, सपटल.

Filter, *v. t.* शुध् c., संमृज् 2 P, पू 9 U. **-***v. i.* निर्गल् 1 P, निस्यंद् 1 A, निःसृत्य शुध् 4 P.

Filth, *s.* मलः-लं, कालुष्यं, मालिन्यं, अप(व)स्करः, कल्कं, खलं, पंकः, कर्दमः. **-y,** *a.* मलिन, कलुष, समल, मलीमस, मलदूषित, पंकिल, पंकिन्. **2** अशुद्ध, अमेध्य, अपवित्र. **3** कुत्सित, निंद्य, गर्ह्य, दूषणीय, कु-कद् pr.

Fin, *s.* पक्षः, देहाधिः, वाजः (मत्स्यानां); 'f.-footed' जालपादः-द्. **-less,** *a.* पक्षहीन-रहित. **-Finny,** *a.* सपक्ष, पक्षविशिष्ट.

Final, *a.* अंतिम, अंत्य, अंत-शेष in comp., पश्चिम, चरम. **2** निःसंदेह, परिच्छिन्न, सुनिश्चित. अविकल्प, सुनिर्णीत. **3** अपरिवर्तनीय, अप्रतिकार्य. **-ly,** *adv.* अंततः, अंते, शेषे. **2** निरुत्तरतया, सपरिच्छेदं.

Finance,-s, *s.* आयः, करः, बलिः, धनागमः, शुल्कं, राजस्वं; 'his financial condition is prosperous': परिस्फीतं तस्य कोशजातं. **-Financier,** *s.* कोशाध्यक्षः, धनाधिकारिन् *m.*

Find, *v. t.* आप् 5 P, लभ् 1 A, अधिगम् 1 P, विद् 6 U, आ-समा-सद् c., दृश् 1 P: इ-या 2 P, (acc.), प्रतिपद् 4 A. **2** (F. out) बुध् 1 P; ज्ञा 9 U, अवगम् 1 P, अव-इ 2 P, वि-भू c.; निरूप् 10, अनुसंधा 3 U, उपलभ्, अन्विष् 4 P, निर्णी 1 P. निश्चि 5 U, अव-निर्-धृ 10; 'they found him guilty' सोपराधीति ते निर्णिन्युः, तैः सोपराधी स्थापितः. **3** उप-सं-क्लृप् 10, चिंत् 10. **4** ख्या-ख्या 2 P, ख्या-कृ 8 U, व्यक्तीकृ. **-ing,** *s.* अधिगमः, अवाप्ति *f.* **2** निर्णयः.

Fine, *a.* सूक्ष्म, तनु, श्लक्ष्ण, अस्थूल, विरल; 'f. cloth' सूक्ष्मवस्त्रं, अंशुकं, सुवासस् *n.* **2** तीक्ष्ण, तीव्र, कुशाग्रीय, मार्मिक. **3** पेलव. सुकुमार. कोमल, मृदु. **4** विशुद्ध, विमल. निर्मल. **5** परम, उत्तम, उत्कृष्ट, विशिष्ट. **6** सुंदर, कांत, शोभन, वाम, चारु, रूपवत्, सुभग, gen. by सु in comp.; 'of f. teeth' सुदती; 'having f. eyes' सु-वाम-लोचना; 'a f. day' सुदिनं; 'f. art' कला; 'f.-fingered' लघुहस्त; 'it is a f. proposal' उदारः-प्रथमः-कल्पः. 'in fine' अंततः, शेषे, एतावता, एवं च. *v. t.* शुध् c., पू 9 U, मलं हृ or अपकृष् 1 P. **-ly,** *adv.* सूक्ष्मं, विरलतया. **2** चारु, सुष्ठु, सुंदरं, सु pr. **-ness,** *s.* सूक्ष्मता, विरलता, तीक्ष्णता, &c. **2** कांति *f.*, शोभा, चारुता, लावण्यं. **-ry,** *s.* शोभा, आडंबरः, बाह्यशोभा. **2** अलंकारः, मंडनं, भूषणं, प्रसाधनं, आभरणं, परिकर्मन् *n.*, परिष्कारः; 'fond of f.' प्रियमंडन, अलंकारप्रिय.

Fine, *s.* दंडः, अर्थ-धन-दंडः; 'liable to f.' दंड्य. **-***v. t.* दंड् 10 (two acc.), दंडं दा c. (दापयति) with instr. of giver.

Finesse, *s.* माया, सूक्ष्मोपायप्रयोगः, व्यपदेशः. **2** कौशलं, धूर्तता.

Finger, *s.* अंगुलि-ली *f.*, करशाखा; 'fore-f.' तर्जनी, प्रदेशि(श)नी; 'middle f.' मध्यमा; 'third f' अनामिका; 'last f.' कनिष्ठा, कनिष्ठिका, कनीनी-निका; 'f.-ring' अंगुलीयं, अंगुली(रि)यकं, ऊर्मिका; 'three f. s in breadth' त्र्यंगुलं (दारु). **-***v. t.* अंगुल्या स्पृश् or परामृश् 6 P.

Finical, *a.* अतिसूक्ष्म, एकांतकोमल-पेलव, अत्युत्कृष्ट.

Finis, *s.* *See* **End.**

Finish, *v. t.* समाप् c., सं-पृ c. -पूर् 10, निर्वृत् c., अवसो 4 P, निः-सं-पद् c., साध् 5 P or c.: अंतं गम् 1 P, निः-शिष् c., निःशेषीकृ 8 U, पारं गम्. **2** संस्कृ 8 U, परिष्कृ, यत्नतः साध्. **-***s.*, **-ing,** *s.* समाप्ति *f.*, अंतः, निर्वृत्ति *f.*, सिद्धि *f.*, अंतगमनं, &c.

Finite, *a.* प्रमेय, परिच्छेद्य, निरूपणीय, नियत, समर्याद, परिमित, साद्यंत; 'not f.' अनंत. **-ly,** *adv.* समर्यादं, नियतं.

Fir-tree, *s.* देवदारु *m.*, *n.*, शक्रपादपः, पारिभद्रकः, भद्रदारु, द्रुकिलिमं, पीतदारु, दारु, पूतिकाष्ठं.

Fire, *s.* अग्निः, वैश्वानरः, ज्वलनः, अनलः, पावकः, कृशानुः, वह्निः, दहनः, जातवेदस् *m.*, हुताशनः, शिखिन् *m*, हुतभुज् *m.*, हुतवहः, बर्हिः, शुष्मन् *m.*, कृष्णवर्त्मन्, *m.*, तनूनपात्, उषर्बुधः, शिखावत्, *m.*, हव्यवाहनः, हिरण्यरेतस् *m.*, चित्रभानुः, विभावसुः, शुक्रः, शुचिः, कृपीटयोनिः. **2** तेजस् *n.*, सत्वं, उत्साहः; 'on f.' अग्नि-हुतवह-परीत, अग्निदीप्त; 'submarine f.' वाडवः, और्वः, वडवानलः; 'set on f.' दह् c., दीप् c., अग्निं विसृज् 6 P (with loc.): अग्निना ज्वल् c. or दह् c.; 'take f.'; *See* under **Catch.** **-***v. t.* दह् 1 P, ज्वल् c., इंध् 7 A, अग्निसात्कृ 8 U. **2** उत्तिज् c., उद्दीप् c., प्रोत्सह् c., प्रचुद् 10, संक्षुभ् c., प्रेर् c., संधुक्ष् 10. **-***v. i.* दीप् 4 A, ज्वल् 1 P. दह् pass. **2** लोहगोलान् प्रक्षिप् 6 P or विसृज् 6 P. 'F.-arms' आग्नेयास्त्राणि; 'f-brand' अग्निकाष्ठं, अंगारः-रं, अलातं, उल्का, उल्मुकं. **2** प्रोत्साहकः. 'f.-fly' पतंगः, शलभः, खद्योतः, ज्योतिरिंगणः, प्रभाकीटः; 'f.-pan' *See* **Hearth;** 'f.-place' चुल्लि-ल्ली *f.*, अश्मंतं, उष्मानं, उद्धानं, अधिश्रयणी, अंति(दि)का; 'f.-proof' अदाह्य; 'f.-side' अग्निस्थानं, &c. (f.-place). (f.-side comforts गृहसुखानि); 'f.-wood' इंधनं, इध्मं, दाह्यकाष्ठं; 'f.-works' अग्निक्रीडा,-द्रव्याणि. **-Fiery,** *a.* आग्नेय (यी *f.*), तेजस्विन्, अग्निमय (यी *f.*). **2** सुलभकोप, शीघ्रकोपिन्, क्रोधन, क्रोधिल, कोपशील, संरंभिन्. **3** उग्र, तीक्ष्ण, प्र-,चंड, तीव्र.

Firm, *a.* दृढ, स्थिर, निश्चल, अचल, अविचलित, अस्खलित, धीर, अकंपित, अक्षुब्ध, धृतिमत्, व्यवस्थित; 'f. step' अस्खलिता गतिः. 2 गाढ, घन, दृढ, अशिथिल, अविरल, सांद्र, सुसंहत, दृढसंधि; 'of a f. mind' स्थिरधी, स्थिर-निश्चल-मति, दृढात्मन्; 'f. in friendship' दृढसौहृद, गाढसख्य. -*s.* वणिग्जनसंसर्गः, समवायः, संभूय समुत्थानं. -**ly**, *adv.* दृढं, गाढं, घनं, स्थिरं, धीरं, निश्चलं, &c.; 'f. rooted' बद्ध-रूढ-मूल; 'f. devoted' दृढभक्ति; 'f. joined' दृढबद्ध, दृढसंधि. -**ness**, *s.* दृढता, स्थैर्य, द्रढिमन् *m.*, धैर्य, धृति *f.*; अक्षोभः, अस्खलनं, अकंपः. 2 संहति *f.*, घनता, संधिः.

Firmament, *s.* आकाशः-शं, नभोमंडलं, नभस्तलं; व्योमन् *n.*, गगनं-णं, खं, अंतरीक्षं, तारा-उडु-पथः, खगोलः; *See* **Sky** also. -**al**, *a.* वैहायस (सी *f.*), आंतरिक्ष (क्षी *f.*), आकाशीय, नभःस्थ.

First, *a.* प्रथम, आद्य, आदिम, पूर्व, अग्रिम, प्राक्तन (नी *f.*). 2 मुख्य, प्रमुख, प्रधान, अग्र्य, प्रवर, श्रेष्ठ, वरेण्य, अग्रणी, अग्रेसर, वर in comp.; *See* **Principal**, 'f. half' पूर्वार्धः; 'f. part of day' पूर्वाह्णः; 'f. part of night' पूर्वरात्रः, 'for the f. time' प्रथमं; 'from the f.' प्रथमावधि, आप्रथमं; 'f. of all, in the first place' प्रथमं-आदौ-तावत्; 'f. born' अग्रजः, पूर्वजः, अग्रजन्मन् *m.*, ज्येष्ठः, अग्र्यः, :, अग्रिमः; 'f.-fruits' प्रथम-आदि-अग्र-फलं, प्रथमोत्पन्नं; 'f.-rate' श्रेष्ठ, उत्कृष्ट, विशिष्टतम, परम. उत्तम. -*adv.*, -**ly**, प्रथमं, पूर्वं, प्राक्, आदौ, अग्रे, पुरस्तात्.

Fiscal, *a.* धनसंबंधिन्.

Fish, *s.* मत्स्यः, मीनः, झषः, वैसारिणः, अंडजः, विसारः, शकुलिन् *m.*, पृथुरोमन् *m.* -*v. i.* मत्स्यान् ग्रह् 9 U or धृ 1 P or बंध् 9 P. 2 अनुसृ 1 P; 'f.-basket' मत्स्याधानी, कुवेणी; 'f.-book' बडिश-शा-शी, मत्स्यवेधनं; f.-ing net' जालं, आनायः, कुपिनी; 'f.-market' मीनविक्रयस्थानं; 'f.-monger' मत्स्यविक्रयिन्; 'f.-pond' मीनाश्रयः, मत्स्यालयः, मत्स्यपूर्णं सरः; 'f.-spawn' मत्स्यांडं; 'f.-woman' मत्स्यविक्रेत्री. -**er**, -**erman**, *s.* धीवरः, कैवर्तः, दासः-शः, जालिकः, मत्स्याजीवः, मत्स्योपजीविन् *m.*, मात्स्यिकः, निषादः. -**ery**, -**ing**, *s.* धीवरकर्मन् *n.*, मत्स्यबंधनं-ग्रहणं.

Fissile, *a.* भिदुर, भिदेलिम.

Fission, *s.* छेदः.

Fissure, *s.* छिद्रं, रंध्रं, संधिः, भंगः, विदलः-लं, भेदः; (in the ground) बिलं, गर्तः-र्ता, विवरं. -*v. t.* विद् 10, विदल् c. (दलयति).

Fist, *s.* मुष्टि *m. f.*-ष्टी; 'fisticuffs' 'blows with the f.' मुष्टिपातः-प्रहारः-युद्धं, मुष्टीमुष्टि-युद्धं; 'doubling or clenching the f.' मुष्टिबंधः-संग्राहः, खटः. -*v.* मुष्टीमुष्टि युध् 4 A, मुष्टिना तड् 10 or प्र-हृ 1 P.

Fistula, *s.* नाडि-डी-लि-ली *f.*, नाडीव्रणं, नाडीक्षतं; 'f. in anus' भगंदरः.

Fit, *a.* योग्य, क्षम, न्याय्य, अनुरूप, उपपन्न. युक्त, उचित, यथार्ह, समुचित, यथायोग्य, संगत; oft. by अर्ह् or pot. pass. part.; 'to be f. for' क्लृप् 1 A (with dat.), युज्-उपपद् pass. अर्ह् 1P, उचित-योग्य-*a.* भू; 'f. to do a work' कर्मक्षम, अलंकर्मीण. -*v. t.* युज् 7 U, 10, समा-सं-धा 3 U, योग्य-युक्त -*a.* कृ 8 U; 'f. an arrow' बाणं सं-धा; *See* **Fix**; 'this ill f. s thee' नैतदनुरूपं भवतः; 'f. out' सज्जीकृ, सन्नह् c., उपकरणैः उपकल्प् c., or संयुज् or उपस्कृ; 'fit up' **Decorate**, q. v. -*v. i.* युज्-उपपद्-pass., श्लिष् pass., युक्त *a.* भू; 'this f. s well' सुश्लिष्टमेतत् (Mal. 1), सुसंगतमिदं. -*s.* आक्रमः, आवेशः, अवतारः, अभिभवः, 'f. of anger' कोपावेशः; 'f. of fever' ज्वराक्रमः, ज्वराभिभवः. 2 मूर्छा, भ्रांति *f.*, भ्रामरं. -**ful**, -*a.* चल, चपल, चंचल, अनित्य, विषम, लोल, अस्थिर. -**ly**, *adv.* युक्तं, उचितं, सम्यक्, यथार्हं, सांप्रतं, स्थाने. -**ness**, *s.* युक्तता, योग्यता, क्षमता, पात्रता, उपयोगिता, उपपत्ति *f.*, संगति *f.*, पर्याप्ति *f.*, याथार्थ्यं, देशरूपं.

Fitch, *s.* चणकः.

Five, *a.* पंचन्, पंचक, पंचतय; 'in f. ways' पंचधा;, 'f. times' पंचकृत्वः; 'f. fold' पंचगुण *a.* -**Fifth**, *a.* पंचम (मी *f.*)

Fives, *s.* कंदुकक्रीडा.

Fix, *v. t.* स्था c. (स्थापयति), प्रति-सं°; नि-धा 3 U, निरुह् c.; 'f. your dwelling there' तत्र वसतिं कुरु, तत्स्थाने निवस. 2 स्थिरीकृ 8 U, दृढीकृ. 3 (F. upon) निर्णी 1 P, निश्चि 5 U, अव-धृ 10, निरूप् 10, सं-परि-क्लृप् c., निर्दिश् 6 P, नियुज् 7 A, 10. 4 बंध् 9 P (lit. & fig.), युज्, आसंज् c.; निविश् c.; 'did not f. her love on him' तस्मिन्न बबंध भावं (R. vi. 36); 'f. the eyes' दृष्टिं निविश् c., लक्षं बंध्, अनन्यदृष्ट्या-अनिमेषेण-स्तिमितलोचनेन-दृश् 1 P; 'with his eyes f. ed on my face' मन्मुखासक्तदृष्टिः; व्यापृ c., उमामुखे व्यापारयामास विलोचनानि (K. iii. 67); 'f. an arrow' सं-धा 3 U, (धनुष्यमोघं समधत्त बाणं K. iii. 66); 'f. the mind' मनः-चित्तं-निविश् c., or युज् or बंध् or आ-धा, एकाग्र *a.* भू; तेन उपदेशेन मम चेतसि दृढं पदं चक्रे 'the advice is firmly f. ed &c.'; 'I am in a f.' चक्रांतरस्थित इवास्मि. -**ed**, *a.* व्यवस्थित, स्थिरीकृत, स्थापित, प्रतिष्ठित, निरूढ. 2 नियत, निश्चित, ध्रुव, स्थिर,

दृढ, निश्चल, अचल;. *See* **Firm.** 3 सक्त, आ-सं-सक्त, सं-परि-लग्न; निविष्ट, बद्ध. 4 स्थावर, अजंगम, ध्रुव; 'firmly f.' दृढबद्ध, बद्धमूल, प्रतिष्ठित, रूढमूल; 'having the gaze f.' 'with a f. look' आसक्त-बद्ध-दृष्टि, स्तिमित-अनिमेष-लोचन; 'having the mind f. (on one thing); एकाग्रचित्त, अनन्यमनस्क, निविष्ट-आसक्त-मनस्; एकतान, अनन्यवृत्ति, एकाग्र, एकायन, एकसर्ग, एकाग्र्य, एकायनगत; 'of f. resolution' दृढ-निश्चय-संकल्प, धीर-स्थिर-मति, स्थिरधी. **-edly,** *adv.* दृढं, स्थिरं, ध्रुवं, &c ; स्थिर-दृष्ट्या, अनिमेषेण, स्तिमितं, एकाग्रतया, &c. **-edness,** *s.* **Firmness,** q. v. **-ity,** *s.* स्थिरता, स्थैर्य, निष्ठा; 'the mind, devoid of f., rambles' मनो निष्ठाशून्यं भ्रमति (Mal. 1). **-ture,** *s* स्थावरद्रव्यं.

Flabby, *a.* शिथिल, ललित, कोमल, स्निग्ध, मेदुर, अकठिन. **-ness,** शैथिल्यं, लालित्यं.

Flaccid, *a. See* **Flabby.**

Flag, *s.* ध्वजः, केतुः, पताका; 'f.-staff' ध्वज-दंडः-यष्टिः-स्तंभः. 2 (Stone) शिलापट्टः-प्रस्तरः. **-***v. i.* अवसद् 1 P, म्लै-ग्लै 1 P, ध्वंस् 1 A, अपचि-क्षि- pass. 2 (Of persons) शिथिलबल-अवसन्न-भग्नोत्साह *a.* भू, अंगानि मुच् 6 P; *See* **Droop.** **-***v. t.* शिलाभिः आस्तृ 5 U. **-gy,** *a.* शिथिल, क्षीण, अवसन्न, श्लथ.

Flagellate, *v. t.* कशया तड् 10 or प्र-हृ 1 P or आहन् 2 U. **-ion,** *s.* कशाघातः, कशाप्रहारः.

Flageolet, *s.* वंशः, वेणुः.

Flagitious, *a.* घोर, दारुण, अतिदुष्ट, अतिदुर्वृत्त, अति-महा-पापिन्, अतिनिंद्य. **-ness,** *s.* महा-अति-पापं-पातकं, अतिदुष्टता, घोरता, दौरात्म्यं.

Flagon, *s.* पानपात्रं-भाजनं, पुटग्रीवः, कंसः-सं.

Flagrant, *a.* घोर, दारुण, अतिदुष्ट, अतिनिंद्य, पापिष्ठतम. 2 सर्वज्ञात, लोकप्रसिद्ध, सुप्रकाश, सुव्यक्त, पुरःस्फुरत्. **-Flagrancy,** *s.* घोरता, अतिदुष्टता; सुव्यक्तता.

Flail, *s.* मुसलः-लं, कंडनी.

Flair, *s. See* **Odour.**

Flake, *s.* हिम or तुषार-लवः or कणः, हिमतूलं, तुषार-हिम-घनः. 2 शकलः-लं, लवः, कणः, अल्पभागः. 3 फलकः, संस्तरः. **-***v. i.* शकलीभू 1 P. **-y,** *a.* सशकल.

Flambeau, *s.* उल्का, अलातं, उल्मुकं.

Flame, *s.* ज्वाला, शिखा, अर्चिस् *f.*, *n.*, कीलः-ला, अग्निज्वाला-जिह्वा; 'in f. s' ज्वलत्, हुतवहपरीत, दह्यमान. **-***v. t.* ज्वल् c., दीप् c., दह् c., **-***v. i.* ज्वल् 1 P, दीप् 4 A, दह् pass. **-ing,** *a.* उच्छिख, प्रदीप्त, अर्चिष्मत्, उज्ज्वल, ज्वलित, ज्वलत्; 'f. fire' ज्वालाग्निः. **-y,** *a.* शिखा-ज्वाला-मय (यी *f.*), शिखिन्.

Flamingo, *s.* मरालः, राजहंसः.

Flank, *s.* पार्श्वः-र्श्वं, पक्षः, कुक्षिः, उत्संगः, पार्श्व-पक्ष-भागः, पार्श्वांगं. **-***v.* पार्श्वतः रक्ष् or गुप् 1 P. 2 पार्श्वतः अभिद्रु 1 P. 3 स्पृश् 6 P, निकटे-पार्श्वे-वृत् 1 A; *See* **Border.**

Flannel, *s* ऊर्णायुः, और्णपटं.

Flap, *v. t.* वि-धू 5 U, 9 U, 6 P, उत्क्षिप् 6 P, चल् c., आ-स्फल् c. **-***v. i.* आस्फल् 1 P, विधू-उत्क्षिप्-pass. **-***s.* प्रालंबः, लोलकः. 2 (f. ing) आस्फालनं, विधूननं, विधुवनं, उत्क्षेपः-पणं; 'f. ing of ears' कर्णतालः.

Flare, *v. i.* लोलशिखया ज्वल् 1 P. **-***s.* लोलशिखा, कंपितज्वाला.

Flash, *v. i.* स्फुर् 6 P, दीप् 4 A, वि-लस् 1 P, विद्युत् 1 A, सहसा प्रकाश् 1 A or ज्वल् 1 P, अचिरं प्र-भा 2 P. 2 विद्युद्वेगेन-अकस्माद्-उदि 2 P or आविर्भू 1 P or उत्पद् 4 A. **-***s.* स्फुरणं, स्फुरितं, विलासः, सहसा दीप्ति *f.*, आभासः, विभ्रमः, अचिर-क्षण-प्रभा, प्रभाकंपः, क्षणद्युति *f.*, अचिरद्युतिः. **-y,** *a.* क्षणप्रभ, तैजस (सी *f.*). 2 असार, नीरस, फल्गु, निःसत्त्व.

Flask, *s.* काचपात्रं-भाजनं, पानपात्रं, पुटग्रीवः.

Flat, *a.* सम, समस्थ, समरेख, सपाट, अभुग्न. 2 निम्न, अनुच्च, नत, अनुन्नत. 3 असार, नीरस, फल्गु, विरस, रस-स्वाद-हीन, निस्तेजस्, निःसत्त्व. 4 स्पष्ट, स्फुट, व्यक्त, अवक्र, असंदिग्ध, सुव्यक्त, परिस्फुट. 5 अवनिं गत, दंडवत् क्षिप्त; 'he laid himself f. on the ground' भूमौ दंडवत्पतितः; 'f. surface' समपृष्ठं; 'f. roof' पृष्ठं; 'f.-nosed' अवनाट, अवटीट, अवभ्रट, नत-चिपिट-नासिक. **-***s.* समभूमि *f*, समस्थलं-ली, समस्थानं, पाटः. 2 निम्नभूमिः. 3 सैकतं, पुलिनं. 4 पत्रं, फलकः-कं. 5 मंद्रः, अनुदात्तः, मंद्रः. **-ly,** *adv.* समं. 2 स्फुटं, सुव्यक्तं, अवक्रं, असंदेहं. **-ness,** *s.* समता, निम्नता, असारत्वं, &c. **-ten,** *v. t.* समीकृ 8 U. 2 आ-अव-नम् c. (नमयति), नम्रीकृ, निम्नीकृ. 3 रसं हृ 1 P, नीरसीकृ. **-***v. i.* समीभू, नम्रीभू.

Flatter, *v. t.* सं-अभि-परि-स्तु 2 U, प्र-शंस् 1 P, चाटुवचनैः-स्तुत्या-सांत्व् 10 or संतुष् c. or उप-लल् 10 or प्र-लुभ् c. or आ कृष् 1 P, उपच्छंद् 10. 2 चाटूनि वच्-ब्रू- 2 P, प्रियं वद् 1 P. 3 अनु-नी 1 P, आ-राध् c., मिथ्या प्रशंस् श्लाघ् 1 A. 4 मिथ्या आशां उत्पद् c. or वृध् c. **-er,** *s.* चाटुकारः, संस्तावकः, सांत्ववादिन् *m.*, प्रशंसकः, प्रियंवदः, चाटुवादिन् *m.*, मिथ्याशंसकः. **-ing,** *a.* स्तुतिमय (यी *f.*), परितोषक, प्रीतिकर (री *f.*), प्रशंसामय. **-ingly,** *adv.* चाटूक्त्या, अतिप्रशंसापूर्वं, सांत्वनपूर्वं. **-y,** *s.* संस्तावः, स्तुति *f.*.

स्तवः, चाटु *m.n.*, चाटूक्ति *f.*, अतिप्रशंसा, सांत्वनं-ना, उपलालनं, मधुर-प्रिय-वचनं, सांत्ववादः, मिथ्याप्रशंसा, व्याजस्तुतिः, चाटुवादः. **2** अनुनयः, आराधनं, संतोषणं.

Flatulent, *a.* वात-वायु-ग्रस्त, बद्धवात, वातफुल्ल, वायुपूर्ण, वातुल. **-Flatulence, -cy,** *s.* वायुः, वातः, वायुफुल्लता, अंत्राध्मानं, वातिकत्वं.

Flatus, *s.* वातः, वायुः, अंत्रवायुः.

Flaunt, *v. i.* सावलेपं चल्-चर् 1 P, सदर्प-उद्धतं-विकटं-परिक्रम् 1 U, 4 P. **-ing,** *a.* उद्धतगति, विलासाद् मंदगामिन्-दर्शनीयमानिन्, सुभगंमन्य; 'a f. gait' विकटा-धीरोद्धता-गतिः.

Flavour, *s.* आ-,स्वादः, रसः, रुचि *f.* **-***v. t.* सरस *a.* कृ 8 U. **-ed,** *a.* सरस; 'well- f.' सुरस, स्वादु, सुस्वाद. **-less,** *a.* अरस, नीरस, विरस, अस्वादु. **-ous,** *a.* मिष्ट, स्वादु, सुरस.

Flaw, *s.* दोषः, छिद्रं, रंध्रं, वैकल्यं, न्यूनता; 'seeking or finding f. s' रंध्रान्वेषिन्, छिद्रान्वेषिन्, दोषैकदृश्. **2** चंडवातः, प्रभंजनः; *See* **Hurricane.** **3** भंगः, संधिः, भेदः, रंध्रं, छिद्रं; 'f. in a jewel' पुलकः, खंडः. **-***v. t.* छिद्र 10, व्यध्, 4 P. **-less,** *a.* निर्दोष; *See* **Faultless.** **2** निश्छिद्र, नीरंध्र. **-y,** *a.* सरंध्र, सच्छिद्र, सदोष.

Flax, *s.* क्षमा, अतसी, उमा; शणं; 'f.-comb' उमामार्जनी. **-en,** *a.* क्षौम-औम (मी *f.*).

Flay, *v. t.* चर्म अपनी or निर्हृ 1 P or उल्लिख् 6 P or निष्कृष् 1 P, निस्त्वचयति (D.), निस्त्वचीकृ 8 U, त्वक्ष् 1 P. **-er,** *s.* त्वग्विदारकः, चर्मनिष्कर्षकः. **-ing,** *s.* चर्मनिष्कर्षणं, निश्चर्मकरण.

Flea, *s.* मक्षिका, मत्कुणः, देहिका, तल्पकीटः. **-***v. t.* देहिकाः अपनी 1 P.

Fleck, *s.* रे(ले)खा, बिंदु *m.*

Fledged, *a.* संजातपक्ष, गरुत्मत्, सपक्ष, पक्षयुक्त.

Flee, *v. i.* पलाय् 1 A, अपक्रम् 1 U, 4 P, वि-प्र-द्रु 1 P, परा-इ 2 P, अपधाव् 1 P, अप-निर्-गम् 1 P, अप-सृ-सृप् 1 P. **2** त्यज् 1 P, परिहृ 1 P, वृज् 10.

Fleece, *s.* मेषलो(रो)मन् *n.* **-***v. t.* (लोम) छिद् 7 P or लू 9 U. **2** अपहृ 1 P; 'f. ed' हृतसर्वस्व. **-cy,** *a.* बहुलोमन्, लोमश, लोमावृत.

Fleer, *v. t.* अव-उप-हस् 1 P, तिरस्कृ 8 U, अवमन् 4 A, अव-ज्ञा 9 U; *See* **Contemn.** **-***s.* उप-अव-हासः; तिरस्कारः, अवहेलना, अवज्ञा.

Fleet, *s.* नौसमाजः-साधनं, पोतावलि *f.*, युद्धनौसमूहः. **-***v. i.* द्रुतं-शीघ्रं-प्रसृप् 1 P or गम् 1 P, वेगेन चल् 1 P, त्वर् 1 A. **-***a.* वेगवत्, शीघ्र-त्वरित-लघु-गति, प्रजविन्, अतिरंहस्, जवन (नी *f.*), शीघ्रगामिन्, महाजव; 'f. as the wind' वायुगति, वायुवेग; 'f. as thought' मनोजव. **-ing,** *a.* क्षणिक, क्षणभंगुर, अध्रुव, क्षणस्थायिन्; *See* **Fickle.** **-ly,** *adv.* द्रुतं, शीघ्रं, लघु, सत्वरं, जवेन, वेगेन, रंहसा. **-ness,** *s.* वेगः, प्र-,जवः, रंहस् *n.*, त्वरितगति *f.*

Flesh, *s.* मांसं, आमिषं, पिशितं, क्रव्यं, तरसं, पललं; 'dried f.' वल्लूरं-रा, उत्तप्तं, शुष्कं मांसं. **2** शरीरं, विषयसेवा, विषयासक्ति *f.*; 'f. diet or meat' मांसाहारः; 'f.-colour' मांसवर्णः-रागः-लोहितः; 'f.-monger' मांसविक्रयिन् *m.* **-less,** *a.* अमांस, अपुष्ट, मांसहीन. **-ly,** *a.* शारीरिक-दैहिक (की *f.*), विषयिन्, सांसारिक-ऐहिक (की *f.*). **-y,** *a.* मांसल, पुष्ट, पीन, पीवर, मेदस्विन्; *See* **Fat.**

Flexible, *a.* आ-,नम्य, कुंचनीय, नमन-कुंचनशील, कोमल, मृदु, आयम्य. **2** अनुनेय.

Flexion, Flexture, *s.* आ-,नति *f.*-नमनं; भंगः, आ-अव-कुंचनं, वक्रता, वक्रिमन् *m.*

Flexuous, *a.* वक्र, कुटिल, जिह्म, भंगुर.

Flick, *v. t.* आहन् 2 P, प्रहृ 1 P, आस्फाल् 10. **-***s.* *See* **Flip.**

Flicker, *v. i.* चल् 1 P, चंचलतया ज्वल् 1 P, लोलशिखया ज्वल्, चंचलीभू 1 P. **2** पक्षौ आ-स्फल् c. **-ing,** *a.* चल, चंचल, अस्थिर, लोल. **-***s.* चंचलशिखा, चलनं, चांचल्यं.

Flimsy, *a.* असार, फल्गु, सारहीन, निर्बल, निःसत्त्व, अल्पबल, क्षीणशक्ति. **-ness,** *s.* असारता.

Flinch, *v. i.* विमुखी-पराङ्मुखी-भू 1 P, विचल् 1 P, नि-परा-वृत् 1 A, (abl.); पलाय् 1 A, त्यज् 1 P, त्यक्त्वा निर्गम् 1 P or अपसृप् 1 P मुखं परा-वृत् c. **-ing,** *s.* निवर्तनं विमुखता, विचलनं, विमुखीभवनं.

Fling, *v. t.* (सहसा-बलेन) क्षिप् 6 P, अस् 4 P, मुच् 6 P, वि-सृज् 6 P, पत् c., ईर् c.; 'f. away or off' अप-क्षिप्, निरा-कृ, अपास्, अप-हा 3 P; 'f. open' सहसा or बलाद् अपावृ 5 U. **-***s.* क्षेपः-पणं, पातः-तनं; प्रक्षेपः.

Flint, *s.* अरणिः, अग्निग्रावन् *m.*, अग्निप्रस्तरः. **-y,** *a.* अग्निप्रस्तरमय (यी *f.*). **2** कठिणहृदय, पाषाणहृदय.

Flip, *s.* आघातः, प्रहारः, आस्फालनं.

Flippant, *a.* वाचाल, वावदूक, निःसार, वाक्चंचल. **2** चपल, अस्थिर, लोल, चंचल. **-ly,** *adv.* वाक्चापल्येन. **-Flippancy,** *s.* वाक्चापल्यं, वावदूकता; निःसारता. **2** प्रगल्भता, लौल्यं, चापल्यं.

Flirt, *v. t.* सहसा क्षिप् 6 P. **-***v. i.* अव-हस् 1 P, अधिक्षिप् 6 P. **2** वि-भ्रम् 1, 4 P, विलस् 1 P, विलासं-विभ्रमं-दृश् c. **3** चल *a.* भू 1 P, स्पंद् 1 A, कंप् 1 A, स्फुर् 6 P. **-***s.*

आकस्मिकक्षेपः. 2 विलासिनी, लीलावती, चपला, प्रगल्भा. **-ation,** *s.* लीला, हेला, विभ्रमः, विलासः, हावः, खेला, प्रेमलीला. 2 स्पंदनं, स्फुरणं; हृदयकंपः.

Flit, *v. i.* लघु चल् 1 P, द्रुतं वि-प्र-सृप् 1 P, स्थानात्स्थानं गम् or चल् 1 P, इतस्ततो भ्रम् 1, 4 P. 2 प्र-उत्-डी 1, 4 A, व्योम्नि विसृप्. चपलीभू. **-ting,** *s.* भ्रमणं, चलनं, लघु सर्पणं.

Flitch, *s.* वल्लूरं, शूकरोत्ततं.

Flitter *s.* चीरं, कर्पटः, वस्त्रखंडः-डं.

Flittermouse, *s.* जतुका, अजिनपत्रा.

Float, *v. i.* प्लु 1 A; तॄ 1 P. 2 भास् 1 A. **-***v. t.* प्लु c., वह् c. **-***s.* प्लवः, उडुपः, कोलः, वहित्रं, तरणः-णी, तरीः.

Flocculent, *a.* सांद्र, घनीभूत, श्यान.

Flock, *s.* यूथं, संघः, निवहः, समूहः, कुलं, गणः; *See* **Multitude**; 'f. of cattle' पाशवं, पशुकुलं, गो-वृंद-कुलं, 'f. of sheep' अविकुलं, आविकं; 'f. of sheep and goats' अजाविकं; 'in f.s' गणशः, संघशः. **-***v. i.* (Together) संघशः-गणशः-समागम् 1 P or मिल् 6 P or संनि-पत् 1 P, एकत्र मिल्, एकीभू.

Flog, *v. t.* कशया-वेत्रेण-तड् 10 or आ-हन् 2 U or दंड् 10 or प्र-हृ 1 P. **-ging,** *s.* कशाघातः, कशाप्रहारः; 'deserving f.' कश्य.

Flood, *s.* पूरः, ओघः; स्रोतस् *n.*, प्रवाहः, रयः. 2 आप्लावः, संप्लवः, तोयविप्लवः, जलप्रलयः, जलोपप्लवः; 'universal f.' महाप्रलयः, भूतसंप्लवः, संवर्तः. 3 प्राचुर्यं, बाहुल्यं, पूरः, ओघः; 'f. of tears' बाष्पपूरः-ओघः-वर्षः, अश्रुपातः-वर्षः, 'f.-gate' द्वारं, निर्गममार्गः, परि(री)वाहः, जलद्वारं, जलनिर्गमः. **-***v. t.* प्लु c., आ-सं-परि°-, परिवह् c.; 'with her eyes f.-ed with tears' अश्रुपरिप्लुतेक्षणा; 'a f.-ed river' आप्लुतोदका-परिवाहिणी-नदी.

Flook, *s.* हलदंतः.

Floor, *s.* भूमि *f.*, भूपृष्ठं, तलं, भूतलं, गृहभू-भूमि *f.*, गृहपोटः, वास्तु *m. n.*, गृहमूलं, वेश्मभूः. 2 (Story) भूमिः, कोष्ठः; 'a palace having 7 f.s' सप्तभूमिकः प्रासादः; 'the upper f.' उपरिभूमिः. 3 फलकास्तरणं, फलकसंस्तरः, फलकः-कं. **-***v. t.* फलकैः आ-स्तृ 9 U or आच्छद् 10. 2 नि-पत् c., भूमौ क्षिप् 6 P.

Flop, *v. t.* आ-स्फल् c.

Flora, *s.* ओषधिजातं.

Floral, *a.* कौसुम (मी *f.*), पुष्प in comp.

Florid, *a.* रक्त, रक्त-अरुण-वर्ण. 2 अलंकृत, उज्ज्वल, अलंकारशोभित, सालंकार. **-ity, -ness,** *s.* (कपोल)-रागः, अरुणिमन्-रक्तिमन् *m.* 2 वागलंकारः, सालंकारत्वं, अलंकारशोभा.

Floriferous, *a.* पुष्पोत्पादक, पुष्पप्रद.

Florilege, *s.* पुष्पचयः-संगः.

Florist, *s.* मालाकारः, पुष्पविद्याज्ञः.

Flota, *See* **Fleet.**

Flotilla, *s.* लघुनौसमूहः,

Flounce, *v. i.* अंगानि विक्षिप् 6 P or इतस्ततः चल् c. **-***s.* आकस्मिकः अंगविक्षेपः.

Flounder, *v. i.* इतस्ततः क्षिप् pass., लुठ् 1 A, 6 P, वि-प्लु 1 A. 2 वि परि-भ्रम् 1, 4 P.

Flour, *s.* गोधूमचूर्णं, चूर्णं, क्षोदः, पिष्टं, गुंडिका, सक्तवः (pl.).

Flourish, *v. i.* सं-जन् 4 A, सं-भू 1 P; 'when Panini f. ed' यदा पाणिनिः समजायत. 2 वृद्धिं-उन्नतिं-गम् 1 P, सं-ऋध् 4, 5 P, एध् 1 A, सं-वि-वृध् 1 A, प्र-उप-चि pass., स्फाय् 1 A **-***v. t.* वृध् c. 2 चित्र् 10, पुष्पादिना अलंकृ 8 U or शुभ् c. or रंज् c. 3 भ्रम् c. (भ्रमयति), घूर्ण् c. **-***s.* आडंबरः, शोभा, अलंकारः, मंडनं. 2 निः-,स्वनः (of trumpets). 3 दर्पवाक्यं, गर्वोक्ति *f.* 4 भ्रमणं, उद्गमः. **-ing,** *a.* समृद्ध, सुस्थित, सुस्थ, वर्धिष्णु, उदयिन्, उपचीयमान.

Flout, *See* **Contemn.**

Flow, *v. i.* प्र-,स्रु 1 P; प्र-नि-अभि-स्यंद् 1 A, क्षर् 1 P, गल् 1 P, सृ 1 P; प्रवह् 1 P, री 4 A, द्रु 1 P; 'f. ing with tears' बाष्पजलनिस्यंदिन्; 'f. ing with nectar' सुधास्यंदिन्, अमृतस्रुत्; प्र-,स्नु 2 P; 'f. ing (of milk)' प्रस्रवः. 2 प्र-सृप् 1 P, प्र-सृ, प्रवृत् 1 A, प्र-गम्-चल् 1 P, प्र-या 2 P. 3 जन् 4 A, उत्पद् 4 A, उत्-प्र-सं-भू 1 P, प्र-वृत्. 4 स्रंस् 1 A, शिथिलीभू, श्लथ-वितत-गलित *a.* भू. **-***s.* स्रवः, स्रवणं, स्रुति *f.*, स्रावः, क्षरणं, गलनं, प्रवृत्ति *f.*, अभि-नि-स्यं(ष्यं)दः-दनं. 2 प्रवाहः, स्रोतस् *n.*, ओघः, प्रस्रवः, वेगः, रयः, धारः-रा; वेला, पद्धति *f.* 3 समुद्रवेला, वेला; 'f. of tears' अश्रुपातः-प्रवाहः, बाष्पवर्षः, धाराश्रु *n.*; 'f. of words' वागोघः. अप्रतिहता वाक्सरणिः-पद्धतिः. **-ing,** *a.* प्रस्रुत, स्यंदिन्, विसारिन्, स्रवत् 2 अप्रतिहत, अस्खलित; 'a f. delivery' अस्खलितभाषणपद्धतिः. **-ingly,** *adv.* अस्खलितवाक्येन, अप्रतिहतं, द्रुतं, अविलंबितं.

Flower, *s.* पुष्पं, कुसुमं, प्रसूनं, सुमं, सूनं, सुमनस् *f.* (pl.) 2 अवतंसः, ललामभूतः, अलंकारः, तिलकभूतः; 'Rāma is the f. of his class' स्ववर्गललामभूतो रामः. 2 सारः, उत्कृष्ट-श्रेष्ठ-भागः, उत्तमांशः, सारांशः; 'f. of age' यौवनं; 'f. of youth' नवयौवनं; 'being in the f. of youth' आरूढयौवनारंभ, प्रौढयौवन. **-***v. i.* फुल्ल् 1 P, विकस् 1 P, स्फुट् 6 P, भिद् pass. 2 मंडायते-फेनायते (D.). **-***v. t.* पुष्पादिना अलंकृ 8 U or

शुभ् c. -ed, *a.* कुसुमित, पुष्पित, कुसुमसनाथ. 2 विकसित, फुल्ल, स्फुटित. -ing, *a.* पुष्पवत्, कुसुमवत, कुसुमित, प्रफुल्ल, स्फुटितपुष्प. 2 पुष्पद. -less, *a.* अकुसुम, कुसुमहीन. -y, *a.* पुष्प-कुसुम-मय (यी *f.*), सपुष्प, सकुसुम, पुष्पशालिन्; gen. ex. by (*s.*) in comp., 'f. arrows' कुसुमशराः. 2 सालंकार, अलंकृत, अलंकारयुक्त, मंडित.

Fluctuate, *v. i.* इतस्ततः चल् 1 P or घूर्ण् 1 A, लुल् 1, 6 P, विलुठ् 1 A, 6 P. 2 दोलायते (D.), विकल्प् 1 A, संदिह् 2 U; विचल्, अस्थिर-चंचल -*a.* भू 1 P. -ing, *a.* दोलायमान, अस्थिर, चंचल, अनवस्थित, लोल, तरल, चल. -ion, *s.* अस्थैर्य, चलता, अप्रतिष्ठा, चांचल्यं, विकल्पः. संदेहः, अनवस्थिति *f.*, आंदोलनं.

Flue, *s.* धूममार्गः-पथः.

Fluent, *a.* अस्खलितवाच्, अस्खलद्वाक्य, वाक्पटु, द्रुत-त्वरित-वाच् (of persons): अनर्गल, अप्रतिहतौघ, अविश्रांत, अस्खलित, द्रुत, अप्रतिहत, अनवरत. -ly, *adv.* अस्खलितवाचा, द्रुतवाक्येन, अस्खलितं, द्रुतं, अप्रतिहतं, वाग्विभवेन. -**Fluency**, *s.* वाक्पटुत्वं, वाक्चापल्यं, वाग्विभवः, ओघः, अनर्गलता, अप्रतिहतत्वं.

Fluid, *s.* द्रवः, रसः, द्रववस्तु *n.* -*a.* द्रव, विलीन, द्रुत; *See* **Liquid**. -ity, *s.* द्रवता, विलयः.

Flummery, *s.* मिथ्याप्रशंसा-स्तुति *f.*

Flunky, *s.* दासः, चेटः, नीचकर्मकरः.

Flurry, *See* **Agitate**. -*s.* संभ्रमः, व्यग्रता, मोहः.

Flush, *v. t.* अरुणीकृ 8 U, अरुणयति (D.), रंज् c., रक्तीकृ; 'with her face f. ed with anger' कोपारुणितानना. 2 उत्सिच् c., दृप् c., दर्पेण आ-ध्मा 1 P, उद्धतीकृ. -*v. i.* अरुणीभू, रक्तीभू, लोहितायते (D.), रंज् pass.; अरुणवदन-लोहितानन- *a.* भू. -*s.* अरुणिमन् *m.*, रक्तिमन् *m.*, रक्तता, रागः, कपोल-वदन-रागः. 2 प्रफुल्लता, बाहुल्यं, समृद्धि *f.* -*a.* सतेजस्क, प्रौढ, तेजस्विन्. 2 समृद्ध, धनसंपन्न. 3 मुक्तहस्त, अतिव्ययपर. -ed, *a.* अरुणित, रक्त, लोहित. 2 उद्धत, दृप्त, दर्पाध्मात, उत्सिक्त, गर्वित, सावलेप.

Fluster, *v. t.* पानादिना मद् c. or मुह् c. -*s.* चित्तभ्रमः; उन्मादः, मोहः, व्याकुलता.

Flute, *s.* वेणुः, मुरली, वंशः. -*v. i.* 'Blow a f.' (वेणुं) मुखमारुतेन पूर् 10 or वद् c., ध्मा 1 P; 'f.-player' वेणविकः, वेणुध्मः, वांशिकः.

Flutter, -*v. i.* पक्षौ वि-धू 5, 9 U, 6 P or आस्फल् c. or उत्क्षिप् 6 P or विचल् c. 2 इतस्ततः चल् 1 P or धाव् 1 P or प्र-सृ 1 P. 3 कंप् 1 A, स्फुर् 6 P, उच्छ्वस् 2 P, स्पंद् 1 A, क्षुभ् 4 P. -*v. t.* संक्षुभ् c., आकुलीकृ 8 U, स्पंद् c., कंप् c., स्फुर् c. -*s.* विधुवनं, आस्फालनं, उत्क्षेपणं. 2 विकंपः, स्फुरणं, स्पंदनं, उच्छ्वसनं. 3 सं-,क्षोभः, संभ्रमः, सं-आ-वेगः, चित्तवेगः-भ्रमः. -ing, *s.* पक्षास्फालनं, पक्षचालनं. -*a.* विचल, कंपमान; 'f. in the breeze' अनिलोद्धत, पवनाक्षिप्त, पवनाधूत.

Fluvial, *a* नदीसंबंधिन्.

Flux, *s.* (Fluxion) प्रवाहः, प्र-,स्रवः, क्षरणं, गलनं, स्पंदनं. -*v. t.* वि-द्रु c., वि-ली c. -ible, *a.* द्राव्य, गलनीय.

Fly, *s.* मक्षिका, वर्वणा, नीला; 'f.-flap' अवचूलकः, रोमगुच्छः, 'f. leaf' मलपृष्ठं. -*v. i.* उद्-,डी 1, 4 A, उत्-पत् 1 P. खे विसृप् 1 P, आकाशेन या 2 P or गम् 1 P. 2 अप-या 2 P, वि-प्र-द्रु 1 P, पलाय् 1 A; *See* **Flee**. 3 त्वरितं-शीघ्रं गम् or चल् 1 P or विसृप् or अतिक्रम् 1 U, 4 P. -*v. t.* त्यज् 1 P, परिहृ 1 P, वृज् 10. 2 आकाशे निक्षिप् 6 P or विसृप् c. or विसृ c.; 'f. at' आ-अभि-पत्, आ-अभि-द्रु, आ-अभि-प्र-धाव् 1 P; 'let f.' मुच् 6 P, उत्पत् c., विसृज् 6 P. -ing, *s.* डयनं, विसर्पणं, उत्पतनं; 'f. up and down' डीनावडीनं. -*a.* खविसर्पिन्, आकाशगति, आकाशगामिन्, डयमान, नभोगति; 'f. bridge' चलसेतुः, जंगमसेतुः, -**Flight**, *s.* पलायनं, विद्रावः, अपयानं, अपक्रमः-मणं, अपगमः; 'to put to f.' विद्रु c.; 'put to f.' विद्रुत, विद्रावित, कांदिशीक. 2 (Of birds) डयनं, डीनं, उड्डयनं, उत्पतनं, उद्गमनं; 'downward f.' अवडीनं. 3 पक्षि-माला-श्रेणी. 4 मति-बुद्धि-विलासः; 'f. of steps' सोपानपंक्ति-श्रेणि-णी *f.*, सोपानपरंपरा; 'f. of an arrow' शरपातः. -y, *a.* चलबुद्धि, भ्रांत-लोल-मति; अस्थिर, लोल; *See* **Fickle**.

Foal, *s.* किशोरः, अश्वशावः-वकः, बालघोटकः, अंबरीषः.

Foam, *s.* फेनः-णः. 2 मंडः, उत्सेकः; 'snowy f.' हिमधवलं, फेनपटलं. -*v. i.* फेनायते-मंडायते (D.), फेनं उत्पद् c. or निर्गम् c. (गमयति), उत्सिच्-उत्पीड्-pass. -y, *a.* फेनिल, फेनल, फेनयुक्त, फेनिन्.

Fob, *s.* घटीपिधानं-कोशः. -*v. t.* **Cheat**, q. v.

Focus, *s.* केंद्रं. -*v. t.* एकत्रीकृ 8 U.

Fodder, *s.* घासः, यवसं, पशुभोजनं, तृणादि *n.*

Foe, *s.* शत्रुः, अरिः, रिपुः; *See* **Enemy**.

Foetus, *See* **Fetus**.

Fog, *s.* कुहेडिका, कुहा, धूमि(पि-लि)का, कुज्झटिका, कुज्झटि-टी *f.* -gy, *a.* कुहावृत, धूमल, सधूमिक, कुज्झटिकाच्छन्न. धूमिकावृत-मय (यी *f*).

Foible, *s.* छिद्रं, दोषः, अपराधः, न्यूनता, हीनता, वैकल्यं, अगुणः.

Foil, *v. t.* परा-भू 1 P, परा-जि 1 A; भंज् 7 P, व्या-प्रति-हन् 2 P, खंड् 10, परास् 4 U, मोघी-विफली-कृ 8 U. **2 Blunt,** q. v. –*s.* भंगः; व्याघातः; पराभवः. **2** मिथ्याखड्गः, निर्धार खड्गः. **3** पत्रं; 'golden f.' स्वर्णपत्रं. 4 प्रभा-वर्धकं, कांति-शोभा-वर्धकं. **–ed,** *a.* (Of persons) भग्नोद्यम, खंडिताश, हताश, अकृतार्थ; *See* **Disappointed.** 2 (Of efforts &c.) भग्न, प्रतिहत, मोघीभूत, खंडित.

Foin, *s.* यष्टि-खड्ग-आघातः. –*v. t.* यष्टिना प्रहृ 1 P or तड् 10.

Foist, *v. t.* कपटेन लिख् 6 P or निविश् c., मिथ्या कल्प् c., कृत्रिम *a.* कृ 8 U.

Foistiness, *s.* पूतिगंधिता.

Fold, *v. t.* पुटी-गुणी-कृ 8 U, व्यावृत् c., सं-पीड् 10, पुटयति (D.); 'f. ed thrice' त्रिगुणीकृत; 'f. ing his hands together' हस्तौ समानीय (R. II. 64), अंजलिं बद्ध्वा, कृतांजलिः, सां(प्रां)जलिः. **2** संवृ 5 U, पि-धा 3 U, आ-वेष्ट् c., आच्छद् 10. **3 Embrace,** q. v.; 'f. ing her in his arms' भुजाभ्यां तामापीड्य. 4 व्रजे निरुध् 7 U or निविश् c. –*s.* पुटः-टं, भंगः, व्यावृत्ति *f.* व्यावर्तनं; चूणः, वस्त्रभंगः-पुटः, ऊर्मि *f.* 2 व्रजः, अवरोधः, शाला, गोष्ठं; 'cattle-f.' गोव्रजः; 'sheep-f.' मेषगोष्ठः-गोस्थानं, व्रजाजिरं. **3** (In comp.) ex. by गुण; 'eight-f.' अष्टगुण; 'f. ing doors' द्विपक्षद्वारं.

Foliage, *s.* पल्लवः-वं, किसलयः-यं, पर्णं, दलं, पत्रं (gen. used in pl.); पल्लवगुच्छः-चयः.

Foliate, *a.* पर्णावृत, सदल.

Folio, *s.* पुस्तकपत्रं, पृथु-विशाल-पत्रं.

Folk, *s.* जनः, जनसमूहः, जनता, लोकः; 'old f.' वृद्धजनः, वृद्धाः.

Follow, *v. t.* अनु-गम्-व्रज्-सृ 1 P, अनुबंध् 9 P, अनु-इ-या 2 P, अनुचर् 1 P, अनुक्रम् 1 U, 4 P. **3** सेव् 1 A, अनुष्ठा 1 P, आ-स्था 1 A; अनुवृत् 1 A, आश्रि 1 U, पुरस्कृ 8 U, अनुवि-धा 3 U, अनुरुध् 4 A, अनुसृ; 'f. (in) the footsteps of the great' महतां पदमनुविधेयं; 'f. ing the path' पदवीं प्रतिपद्य; 'f. ing a middle course' पुरस्कृतमध्यमक्रमः (R. VIII. 9); 'one misfortune f. s another' दुःखं दुःखानुबंधि (V. 4), विपद्विपदमनुबध्नाति (Ka. 73.) **3** उपास् 2 A, भज् 1 U, आश्रि, परिचर्; शुश्रूषते (desid.). –*v. i.* उत्पद् 4 A, प्राप्-आपद्-सिध्-अनुमा-pass.; परिच्छिन्नस्ताव-ज्जीव इति प्राप्नोति (S. B. 651) it f. s 'therefore &c.'; 'what f. ed is understood' परस्तादवगम्यते (S. 1); (in conversations) ततस्ततः; 'what f. ed next'; 'as f. s' तद्यथा, तद्यथानुश्रूयते, or merely एवं, इति, उक्तप्रकारेण, इत्थं. **–er,** *s.* अनुयायिन्-गामिन्-वर्तिन्-सारिन् *m.* **2** परिजनः, सेवकः, अनु-उप-जीविन् *m.*, अनुगः, अनुचरः, अनुयात्रृकः, अनुगतिकः, परिवारः, सहचरः, सहायः. **3** आश्रितः, भक्तः, अनुषंगिन् *m.* **–ing,** *a.* इदं-एतद् *pron. a.*; 'the f. story' एषा-इयं-कथा; पश्चात् कीर्त्यमान, अनुग, अनुयायिन्. –*s.* अनुसरणं-यानं-गमनं-वृत्ति *f.*-रोधः-वर्तनं.

Folly, *s.* *See* under **Fool.**

Foment, *v. t.* (उष्णोदकादिना) सं-सिच् 6 P, लिप् 6 P, अंज् 7 P, दिह् 2 U; स्विद् c. **2** उद्दीप् c., प्र-सं-वृध् c., उत्तिज् c., प्रोत्सह् c., उत्तप् c., प्रकुप् c., प्रवृत् c.; 'f. disputes' उप-जप् 1 P, भेद वृध् c., भेद-बीजं वप् 1 P. **–ation,** *s.* प्र-,स्वेदनं, घर्मा-नुलेपनं, द्रवस्वेदः. **2** उद्दीपनं, संवर्धनं, उत्तेजनं, प्रवर्तनं. **–er,** *s.* उपजापकः, भेदकरः.

Fond, *a.* वत्सल, अनुरागवत्, सानुराग, अनुरक्त, प्रणयिन्, अनुरागिन्. **2** सेविन्, अभिलाषिन्, आसक्त, रक्त, रत, पर, तत्पर, gen. in comp. **3** मूढ, मुग्ध, अत्यनुरक्त; 'f. of' ex. by शील, लालस, काम, प्रिय, in comp.; oft. by ईह् 1 A, कांक्ष् 1 U, अभिलष् 1, 4 P, भज् 1 U, सेव्-रुच् 1 A; 'f. of sport' क्रीडाप्रिय; 'f. of chase' मृगयाशील; 'f. of change' अवस्थांतरमीहमान; 'f. of drinking' पानासक्त, पानव्यसनिन्. **–ly,** *adv.* सानुरागं, सप्रेम-मं; अतिस्नेहेन, अतिवात्सल्येन. **–ness,** *s.* अनुरागः, आसक्ति *f.*, रति *f.*, प्रीति *f.*, प्रणयः, स्नेहः; 'ingenious f. for the mate' कांतानुवृत्तिचातुर्यं; प्रेमन् *m.*, *n.*, वात्सल्यं; अभिरुचि *f.*, कामः, इच्छा, ईहा.

Fondle, *v. t.* उप-लल् 10, अंके-पा c. (पालयति), क्रोडीकृ 8 U, आलिंग् 1 P, परिष्वंज् 1 A, आ-सं-पीड् 10; 'f. ed too much' दुर्ललित. **–ing,** *s.* उप-,लालनं, आलिंगनं, भुजापीडनं, परिष्वंगः. **2** प्रेम-स्नेह-पात्रं-भाजनं, स्नेहभूमि *f.*

Food, *s.* अन्नं, आहारः, भोजनं, भोज्यं, भक्ष्यं, खाद्यं, खादनं, भक्षणं, अभ्यवहार्यं; भक्तं, विघसः, ग्रासः, अशनं, अंधस् *n.*; cooked f.' ओदनः-नं; 'f. and raiment' ग्रासाच्छादनं, अन्नवस्त्रं; 'forbidden f.' अभक्ष्य.

Fool, *s.* मूर्खः, मूढः, निर्बुद्धिः, अज्ञः, जडः, मंदः, अबुधः, अप्राज्ञः, प्रज्ञाहीनः, स्थूल-जड-धीः, अल्प-धीः-मतिः, मंद-धीः-मतिः, अनात्मज्ञ., वर्वरः; 'make a f. of' उपहासास्पदं कृ 8 U, विडंब् 10, (एवं प्रार्थयिता विडंब्यते S. 2). –*v. t.* मुह् c., वि-प्र-लुभ् c., वंच् 10; *See* **Cheat;** 'f.-hardy' अतिसाहसिक, व्यामूढ, अविमृश्यकारिन्, अविमृश्य प्रगल्भ, प्रमत्तवीर, प्रमत्त. **–ery,** *s.* प्रहसनं,

विडंबना. 2 बालिश्यं, मूर्खक्रिया, बालिशता, मूर्खता, व्यामोहः. **-ish,** *a.* मूर्ख, मूढ, बालिश, अनात्मज्ञ, दुर्मति, दुर्मेधस्, वैधेय, बालिशमति, निर्बुद्धि, जड, स्थूलधी, प्रज्ञा-बुद्धि-हीन; *See* (*s.*). 2 निरर्थक, अविमृश्यकृत-दत्त. **-ishly,** *adv.* मूढतया, अज्ञानेन, मूर्खवत्, मूढवत् मौर्ख्येण **-ishness, -Folly,** *s.* मौर्ख्यं, जाड्यं, मोहः, मंदमतिता, मूर्खता, मूढता, बालिश्यं, बालिशता, दुर्बुद्धिता, अज्ञानं, निर्बुद्धित्वं, ज्ञानाभावः, अनात्मज्ञत्वं.

Foot, *s.* पादः, पदं, चरणः-णं, अंघ्रिः. 2 तलं, अधोभागः, मूलं; उपस्थः. 3 (In metre) चरणः, पदं. 4 पत्ति-पदाति-समूहः-गणः. **-***v. t.* पादेन प्रहृ 1 P or तड् 10 or आहन् 2 U; 'f. of a mountain' उपत्यका, पादः; 'set one's f. in' पदं कृ 8 U (lit. and fig.); आश्रमे पदं करिष्यसि (S. 4), कुतूहलेन रसनाशया हृदि पदं कृतं (Kn. 133); 'walk on f.' पद्भ्यां चर्-व्रज् 1 P, पादचारी भू; 'walking on f.' पादगः, पादचारः; पदातिः; 'water for the feet' पाद्यं; पादोदकं; 'set on f.' प्रवृत् c., उपक्रम् 1 A; प्रारभ् 1 A; 'f.-board' चरणफलकः, 'f.-boy' चेटः, भृत्यः, बालसेवकः, युवप्रेष्यः; 'f.-bridge' संक्रमः, संक्रमसेतुः; 'f.-fall' चरणपातः, पादन्यासः, स्खलनं; 'f.-fight' पदाति-पादग-युद्धं; 'f.-licker' पीठमर्दः, चरणसेवक, 'f.-man' चेटः, सेवकः, प्रेष्यः, परिचरः, किंकरः, 'f.-mark-print' पाद-पद-चिह्नं, पदपंक्ति *f.*, पदवी, पद्धति *f.*; पादमुद्रा; 'f.-pace' पादन्यासः, चरणक्रमः-पातः; 'f-path' संसरणं, चरणवीथि *f.*, पथिकमार्गः, पद्या, 'f.-soldier' पदातिः, पत्तिः, पादातिः-तिकः, प(पा)दातः, पादचारः, प(पा)दगः, पदाजिः, पद्गः, पदिकः; 'f.-step' पादन्यासः, पद-चरण-निक्षेपः-पातः, पदं, पदपंक्ति *f.* (f.-print): पद्धतिः, मार्गः, वर्त्मन् *n.*, पदवि-वी *f.*, लक्षणं; 'f.-stool' पाद-पीठं, चरणपीठं, पादासनं. **-ing,** *s.* पदं, स्थानं, भूमि *f.*, स्थलं, आस्पदं, पदवि-वी, सरणि *f.* 2 वास्तु *m.*, *n.*, मूल, उपष्टंभः. 3 आश्रयः, अवलंबनं, आधारः. 4 स्थिति *f.*, वृत्ति *f.*, अवस्था, भावः, दशा; 'f. of equality' समता, तुल्यभावः. **-less,** *a.* पादहीन, अचरण.

Fop, *s.* दर्शनीयमानिन् *m.*, वेषाभिमानिन् *m.*, दांभिन् *m.*, सुवेशमानिन् *m.* छेकः, रूपगर्वितः. **-pish,** *a.* दांभिन्.

For, *prep.* (On account of) ex. by instr. or abl.; अर्थे-र्थं, हेतुना, हेतोः, कृते, कारणात्, निमित्तात्, निमित्तं, in comp.; 'for his deliverance' मोक्षनिमित्तं, मुक्तिहेतोः, &c. 2 (Purpose) by dat. or by अर्थं-अर्थे in comp. 3 (For the sake of) अर्थे, कृते (with gen.) or by dat. 4 (In exchange for) प्रति, स्थाने, विनिमयेन; तिलेभ्यः प्रतियच्छति माषान्, or तिलविनिमयेन &c. 5 (Considering) अपेक्ष्य, प्रतीक्ष्य, आलोच्य, इति कृत्वा, अपेक्षया in comp. 6 (Towards) प्रति, उद्दिश्य, (with acc.); संमुखं, अभिमुखं, in comp. 7 (Regarding) तावत्, उद्दिश्य; कृते; 'f. myself, rest secure' मद्विषये तावद्वीतचिंतो भव, मामुद्दिश्य न चिंता कार्या. 8 (Showing price) by instr.; त्रिरूपकेण क्रीतः 'bought f. 3 Rs.' 9 (Duration) by acc.; 'for 10 days' दशादिवसं; 'f. how many years' कियंति वर्षाणि; oft. by यावत् or पर्यंतं, आ with abl.; 'f. life' यावज्जीवं, आजीवितांतात्. 10 (on the side of) पक्षे; 'they are f. war' विग्रहमनुमोदंते, विग्रहमुपदिशंति. 11 (As if) वत् or इव. 12 (According to) यथा, अनुरूपं, अनुसारेण, in comp.; 'f. all' ex. by अनादृत्य (with acc.) or loc. abs. 'f. all his wealth' विद्यमानेपि महाकोशे, महाकोशमनादृत्य; 'f. a long time' चिरं, चिरकालं, चिराय; 'out of love f. me' मद्गतप्रीत्या; 'f. the most part' भूयिष्ठ in comp., प्रायः, प्रायेण; 'f. once' सकृदेव. **-***conj.* हि (not at beginning of assertions); यतः, यस्मात्कारणात्, यत्, यस्मात्, इति हेतोः, अनेन हेतुना.

Forage, *s.* यवसं, घासः, तृणादि. 2 पाथेयं, भोजनसंभारः, खाद्यसामग्री. 3 खाद्यान्वेषणं, खाद्यार्थं परिभ्रमणं; प्रसरणं. **-***v. i.* बलात् खाद्यद्रव्यं आ-हृ 1 P, भोजनार्थं परिभ्रम् 1, 4 P. **-ing,** *s.* भोजनान्वेषणार्थं परिभ्रमणं-प्रसरणं.

Foray, *s.* उपद्रवः, अवस्कंदः, विप्लवः.

Forbear, *v.* विरम् 1 P; निवृत् 1 A, (with abl.). परिहृ 1 P, वृज् 10, त्यज् 1 P. 2 विलंब् 1 A. 3 सह् 1 A, क्षम् 1 A, मृष् 4 P. 10, तिज् desid. (तितिक्षते). 4 सं-नि-यम् 1 P, निग्रह् 9 P, आ-वृ 5 U; निरुध् 7 U; 'he could not f. expressing his joy or laughter' संतोषं-हासं-निग्रहीतुं न पारयामास. **-ance,** *s.* क्षमा, तितिक्षा, क्षांति *f.*, सहनं, सहिष्णुता, मर्षणं, सहनशीलता. 2 निवृत्ति *f.*, विरामः, विरति *f.*, वर्जनं, त्यागः, परिहारः. 3 संयमः, दमः, यमः, निग्रहः. **-ing,** *a.* तितिक्षु, सहिष्णु, सहनशील, क्षमिन्, सहन, क्षंतृ, क्षमितृ.

Forbid, *v. t.* प्रति-नि षिध् 1 P or c., प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, निरा-अपा-कृ 8 U. 2 निरुध् 7 U, नि-वृ c. or वार् 10; 'God f.' शांतं पापं or (इति) शांतं, प्रतिहतं अमंगलं. **-ding, -dance,** *s.* नि-प्रतिषेधः, प्रत्याख्यानं, प्रत्यादेशः. 2 निवारणं, निरोधः. **-ding,** *a.* घृणावह, बीभत्सजनक, अनिष्ट.

Force, *s.* बलं, शक्ति *f.*, सामर्थ्यं (*fig.* also); 'the f. of this word' अस्य शब्दस्य शक्तिः &c. 2 प्रभावः; वीर्यं, शौर्यं, वि-परा-क्रमः, ऊर्जस् *n.*, प्रतापः, प्राबल्यं, गौरवं. 3 बलात्कारः, प्रसभः, साहसं, बलं, प्रमाथः, आवेशः; 'f. of passion' रागावेशः. 4 आवेगः, आपातः, अभिभवः. 5 सिद्धि *f.*, फलं, निष्पत्ति *f.*; 'put or bring into f.' प्रवृत् c. 6 सैन्यं, बलं, सेना, अनीकः-कं, पृतना, अनीकिनी, चमूः, वाहिनी, ध्वजिनी, चक्रं, वरूथिनी. **–***v. t.* Ex. by causal of verbs, with बलात् or बलेन, or प्रवृत् c.; *See* **Compel;** 'he was f.-ed to admit that &c.' इति अभ्युपगमनं अवश्यकं मेने. 2 प्रेर् c., प्रणुद् 6 P, समाकृष् 1 P, प्रचुद् 10, प्रोत्सह् c., 3 धृष् c., बलाद् अभिगम् 1 P, बलात्कारं कृ 8 U; 'f. an entrance' बलेन प्रविश् 6 P; 'f. a town' पुरं लंघ् 1 A, 10 or भंज् 7 P or बलात् प्रविश्. **-ed,** *a.* यत्नकृत, यत्नपूर्व, असहज, कृत्रिम, क्लिष्ट (as meaning). **-Forcible,** *a.* प्रबल, समर्थ, क्षम, शक्तिमत्, बलवत्, सप्रभाव; अमोघ, अनिष्फल, प्रभविष्णु. 2 गौरवेण उक्त or प्रतिपादित, दृढ, तीक्ष्ण. 3 बलेन कृत, बलात्कृत, साहसिक (की *f.*), बल in comp.; 'f. consent' बलानुमोदनं. **-Forcibly,** *adv.* (by force) बलेन, बलात्, प्रसभं, प्रसह्य, बलात्कारेण, हठात्. 2 सगौरवं, दृढतया.

Force-meat, *s.* मिष्टान्नं, उपस्करः, व्यंजनं.

Forceps, *s.* संदंशकः-शिका.

Ford, *s.* तीर्थं, तरणस्थानं-स्थलं, घट्टः. **–***v. t.* पद्भ्यां तॄ 1 P or पारं गम् 1 P. **–able,** *a.* अल्पजल, सुतर, सुप्रतर; 'the rivers having become f.' सुखोत्तारतामापन्नास्वापगासु (Ka. 326).

Fore, *a.* अग्र, पूर्व, अग्रगामिन्; gen. ex. by अग्र, पूर्व in comp.; 'f.-fathers' पूर्वजाः, पितरः, पूर्वे-पूर्वाः, वृद्धाः; 'f.-finger' प्रदेशिनी, तर्जनी; 'f.-foot' अग्रपादः; 'f.-head' ललाटं, भालं, ललाट-भाल-पट्टं, अलि(ली)कं, गोधिः; 'f.-land' अंतरीपः-पं, उदग्रभूः-भूमिः; 'fore leg' *s.* पूर्व-अग्र-पादः; 'f.-lock' ललाटकेशः-कचः; 'f.-man' अध्यक्षः, अधिष्ठातृ *m.*, अधीशः; 'f.-mentioned-named-said-spoken' प्रागुक्त, पूर्वोक्त, पूर्वकथित; 'f. mast' अग्रकूपकः; 'f.-most' प्रधान, उत्कृष्ट, परम; 'f.-noon' पूर्वाह्णः,-कालः; 'f.-part' अग्रभागः, पूर्व-आदि-प्रथम-भागः; 'f.-rank' अग्र-प्रधान-पदं; 'f.-tooth' अग्रदंतः, राजदंतः, 'f.-ward' सेनामुखं, रणशिरस् *n.*; 'foreward', *s.* *See* **Preface.**

Forearm, *s.* प्रकोष्ठः, अग्रभुजः-हस्तः-बाहुः. **–***v. t.* पूर्वं सन्नह् 4 P or c. or सज्जीकृ 8 U.

Forebode, *v. t.* आ-,सूच् 10, प्राक् आ-विद् c., पूर्वं कथ् 10; (अनिष्टं) पूर्वं ज्ञा 9 U or अव-गम् 1 P, अनु-मा 3 A; *See* **Bode;** 'the tawny lightning f.-s a hurricane' वाताय कपिला विद्युत् (S. K.). **-er,** *s.* अनिष्टावेदकः, अनिष्टसूचकः. **-ing,** *s.* अनिष्टसूचनं-ज्ञानं-दर्शनं.

Forecast, *v. t.* पूर्व-अग्र चिंत् 10 or निरूप् 10 or निर्दिश् 6 P or अनुसं-धा 3 U. **–***s.* पूर्वकल्पना-विवेकः, अग्रनिरूपणं. पूर्वचिंतनं, दीर्घदृष्टि *f.*

Foreclose, *v. t.* प्रतिबंध् 9 P, प्रति-नि-षिध् 1 P. **-ure,** *s.* प्रतिबंधः, प्रतिषेधः.

Fore-determine, *v. t.* अग्रे-पूर्वं-निर्णी 1 P or निश्चि 5 U.

Foredoom, *v. t.* पूर्वं निर्दिश् 6 P or वि-चर् c.

Fore-fend, *See* **Forbid.**

Forego, *v. t.* त्यज् 1 P, हा 3 P, उत्-वि-सृज् 6 P: 'I shall f. my name' स्वनामत्यागं करोमि (P. 1); 'a foregone conclusion' पूर्वनिर्णीतः-प्रागेवसिद्धः-सिद्धांतः.

Foreign, *a.* विदेशीय, वैदेशिक-पारदेशिक (की *f.*), विदेशज, विदेशिन्, अन्य-भिन्न-देशज-देशीय- देशोद्भव, पारदेश्य, विदेशादागत, बहिर्देशोद्भव; 'a f. country' विदेशः, परदेशः, देशांतरं. 2 बाह्य, बहिर्भव, अप्रस्तुत, अप्रकृत; 'this is f. to our present inquiry' अप्रकृतमेतदस्मिन् विषये. **-er,** *s.* वैदेशिकः, पारदेशिकः, अन्यदेशीयः-देशजः; *See* (*a.*). **-ness,** *s.* बाह्यता, भिन्नता; अप्रकृतता, असंबंधः.

Fore-imagine, *v. t.* पूर्वं-अग्रे-चिंत् 10 or मन् 4 A.

Fore-judge, *v. t.* पूर्वं अवेक्ष् 1 A, विचर् c. or निर्णी 1 P.

Fore-know, *v. t.* पूर्वं ज्ञा 9 U or बुध् 1 P, or विद् 2 P; **Know,** q. v.; प्रदृश् 1 P, अग्रे निरूप् 10. **-ledge,** *s.* अग्र-पूर्व-ज्ञानं, भविष्यज्ज्ञानं, अग्रनिरूपणं, अग्र-पूर्व-दृष्टि *f.*

Forensic, *a.* व्यावहारिक (की *f.*), व्यवहारानुबद्ध.

Fore ordain, *v. t.* अग्रे-पूर्वं-निर्दिश् 6 P or नियुज् 7 A, 10 or वि-धा 3 U.

Forerun, *v. i.* पूर्वं-पुरः-अग्र-सृ or धाव् or गम् 1 P or वृत् 1 A or या-इ 2 P. **-ner,** *s.* अग्रेसरः, पुरो-गः-गामिन् *m.*, अग्र-गः-गामिन् *m.*, अग्रवर्तिन् *m.*, अग्रगतः, पूर्वपुरुषः.

Fore-say,-speak, प्राक्-पूर्वं-वद् 1 P, or कथ् 10.

Foresee, *v. t.* पूर्वं-दृश् 1 P or ज्ञा 9 U; भावि-अनागतं-दृश् or अवेक्ष् 1 A, अग्रे निरूप् 10; gen. ex. by भाविन्; 'I f. my ruin' जानामि भाविनं नाशं. **-Foresight,** *s.* दूरदर्शित्वं-ता, दूर-दीर्घ-दृष्टि *f.*, अग्रनिरूपणं, दूरदर्शनं.

Foreshow, *See* **Forebode**.

Forest, *s.* वनं, अरण्यं, काननं, विपिनं, अटवि-वी *f.*, गहनं, कांतारः-रं; 'a large f.' अरण्यानी; 'growing in f.' वन्य, आरण्य,-क, वनोद्भव, अरण्यज-जात, वन or अरण्य in comp. **-er**, *s.* वनेचरः, वनवासिन् *m.*, आरण्यकः, आटविकः, वनस्थः, वनचारिन् *m.*, वनचरः-वर्तिन् *m.*, वनौकस् *m.*, अरण्यसद् *m.*. **2** अरण्यरक्षकः, वनपालकः.

Forestall, *v. t.* पूर्वं ग्रह् 9 P or आदा 3 A, पूर्वग्रहणेन मोघीकृ 8 U; *See* **Anticipate.** **2** पूर्वं क्री 9 U.

Foretaste, *v. t.* पूर्वं अनुभू 1 P or आस्वाद् 1 A or भुज् 7 A. **-s.** पूर्वानुभवः, पूर्व-अग्र-ज्ञानं, पूर्वास्वादः, पूर्व-अग्र-भुक्ति *f.*

Foretell, *v. t.* पूर्वं कथ् 10, भावि-भविष्यद् वद् 1 P or वच् 2 P; प्रदृश् c., अनागतं निविद् c.; *See* **Predict.** **-er**, *s.* भविष्यद्वादिन् *m.*, भाविदर्शकः, अनागतनिवेदकः, दैवज्ञः.

Forethink, *v. t.* पूर्वं चिंत् 10 or विमृश् 6 P. **-Forethought**, *s.* अग्र-पूर्व-चिंता, पूर्वविमर्शः-विवेकः, प्रसमीक्षा-क्षणं, दूर-दीर्घ-दृष्टि *f.*, पूर्वविचारणं-णा.

Foretoken, *v. t.* पूर्वं सूच् 10. **-s.** पूर्वलक्षणं-चिह्नं-लिंगं, भाविलक्षणं.

Forewarn, *v. t.* पूर्वं सूच् 10 or प्रबुध् c., अग्रे उपादिश् 6 P or ज्ञा c. (ज्ञापयति); 'to be f. ed is to be fore-armed' पूर्वप्रबोधनं पूर्वसन्नाहतुल्यं. **-ing**, *s.* पूर्वप्रबोधः-धनं, पूर्वोपदेशः.

Forfeit, *v. t.* दंड् pass., भ्रंश् 1 A, 4 P, च्यु 1 A, परि-हा pass., (with abl.); 'f. s his kingdom' राज्यात्परिभ्रंशते; 'f. s his right' स्वत्वं तस्मान्निवर्तते; oft. ex. by हीन-हृत in comp.; 'you will f. all your wealth' हृतसर्वस्वो भवेः, सर्वस्वं दंडयेथाः. **-s.** दंडः, धन-अर्थ-दंडः. **-ed**, *a.* दंडित, भ्रष्ट, च्युत, हीन; 'who has f. ed his right' स्वत्वभ्रष्टः, च्युताधिकारः; हृतसर्वस्वः, &c. **-ure**, *s.* हानि *f.*, च्युति *f.*, भ्रंशः, अपहारः, अपवर्तनं, नाशः, दंडदानं.

Forge, *v. t.* घट् c. (घटयति), रच् 10, निर्मा 3 A, वि-धा 3 U, क्लृप् c. **2** मिथ्या-कूटेन-कृ 8 U, कपटकूट in comp.; 'f. s a letter' कूट-कपट-लेखं प्रयुंक्ते; *See* **Counterfeit.** **-s.** निर्माणस्थानं; अग्निकुंडं, उध्मानं. **-er**, *s.* कूटकारः-कृत् *m.*, कपटलेखकारिन् *m.* **-ry**, *s.* कूट-कपट-लेखकरणं, कूट-कपट-करणं, कूटरचना. **-ing**, *s.* घटना, घटनं, रचना-नं; कूटनिर्माण, &c.

Forget, *v. t.* विस्मृ 1 P, न स्मृ; स्मृतेः-स्मरणाद्भ्रंश् 1 A, 4 P or अप-इ 2 P, (of what is forgotten). **-ful**, *a.* विस्मरणशील, लुप्त-नष्ट-स्मृति; अनवहित, प्रमत्त. **-fulness**, *s.* विस्मृति *f.*, विस्मरणं, स्मृतिलोपः, स्मृतिनाशः-भ्रंशः-हानि *f.*, विस्मरणशीलता, अनवधानं.

Forgive, *v. t.* क्षम् 1 A, (with acc. of person also), मृष् 4 P, 10, सह् 1 A, तिज् desid. (तितिक्षते). (with acc. of fault). **2** मुच् 6 P, अव-सृज् 6 P, त्यज् 1 P, (as a debt). **-ness**, *s.* क्षमा, तितिक्षा, क्षांति *f.*, सहिष्णुता, मर्षणं; 'f. of sin' पाप-दोष-मुक्ति *f.* -मार्जनं. **-ing**, *a.* क्षमिन्, सहिष्णु, क्षमावत्, क्षमाशील, तितिक्षु, क्षमायुक्त, क्षंतृ, क्षमितृ.

Fork, *s.* कंटकः, शूलं. **-v. i.** विभिद् pass., द्विशिखीभू 1 P, द्विधा भिद् pass. **-ed,-y**, *a.* द्विशिख, द्व्यग्र; 'having a f. tongue' द्विजिह्व; 'f. lightning' विद्युल्लता.

Forlorn, *a.* त्यक्त, दीन, विधुर, अनाथ, अनाश्रय, गति-शरण-हीन, अ-निः-शरण, अ-निःसहाय, निरवलंब, निराधार, निराश्रय, अगतिक.

Form, *s.* रूपं, आकारः, आकृति *f.*; संस्थानं; वपुस् *n.*, मूर्ति *f.*, (**Body**, q. v.) **2** तंत्रं, मार्गः, पद्धति *f.*, प्रकारः, रीति *f.*, विधा-धः, विधिः, भेदः; 'f. of government' राज्यतंत्रं-पद्धतिः. **3** विधिः; नियमः, स्थिति *f.*, व्यवस्था, आचारः, क्रमः, मर्यादा, व्यवहारः, संस्कारः; 'in due f.' यथाविधि, विध्यनुसारेण, विधिवत्. **4** रचना-नं, विन्यासः. **5** सहाध्यायिवर्गः, छात्रपंक्ति *f.*, गणः. **6** दीर्घपीठं-आसनं. **-v. t.** निर्मा 2 P, 3 A, रच् 10, कृ 8 U, वि-धा 3 U, उत्पद् c., घट् c. (घटयति), क्लृप् c.; 'f. plans' उपायान् चिंत् 10 or मनसा क्लृप् c.; 'the cords that f. ed the net' याभिः रज्जुभिर्जालं निर्मितं. **-al**, *a.* अत्याचारसेविन्, नियमनिष्ठ, अत्यादरयुक्त, सभ्याचारविशिष्ट. **2** नैयमिक-वैधिक (की *f.*), नियमानुसारिन्, व्यवहारानुरूप, आचारानुगत, आचारानुसारिन्, विध्यनुरूप; आचार in comp.; 'just perform the f. salutation' आचारं तावत्प्रतिपद्यस्व. **3** यथार्थ, विशिष्ट. **-alist**, *s.* नियममात्रसेविन् *m.* **-ality**, *s.* आचारः, उपचारः, यथाविधि वर्तनं; अत्यादरः; 'a title of f.' उपचारपदं; 'enough of f.' अलमत्यादरेण. **-ally**, *adv.* सोपचारं, अत्यादरेण, सभ्याचारपूर्वं, अत्यादरपूर्वं. **2** यथाविधि, विधिवत्, नियमानुसारेण. **-ation**, *s.* घटना-नं, निर्माणं, विधानं, रचना, कल्पना-नं, उत्पादनं, उद्भवः; सृष्टि *f.* **-ed**, *a.* घटित, निर्मित, कृत, रचित, क्लृप्त, मय in comp.; 'f. of gold' हेमघटित, सुवर्णमय, &c.; *See* **Composed.** **2** रूप-आकार-आकृति in comp.; 'f. like a conch' शंखाकृति; 'well-f.' सुरूप. **-less**, *a.* निराकार, अरूप.

Former, *a.* पूर्व, प्रथम, अग्रिम, आद्य, आदिम, पूर्वकालीन, प्राक्कालीन, प्राचीन, गतकालीन, पुराण, पुरातन. **-ly,** *adv.* प्राक्, प्राक्काले, भूत-गत-काले, पुरा, पूर्वं, पुराकल्पे, पूर्वकाले; 'as f.' यथापूर्वं, पूर्ववत्; 'f. stated' प्रागुक्त, पूर्वोक्त; 'f. heard' श्रुतपूर्व.

Formic, *a.* पिपीलिका-पुत्तिका-संबंधिन्.

Formidable, *a.* दारुण, भयावह, भीषण, भयानक, भयजनक, भयप्रद, भैरव (वी *f.*), घोर, उग्र, प्रतिभय, रौद्र (द्री *f.*). **2** (Great) प्रबल, महत्, अतिघोर. **-ness,** *a.* भयानकत्वं, भीषणता, भैरवं.

Formula, *s.* सूत्रं, विधिः, नियमः, व्यवस्था, स्थिति *f.* **-Formulate,** *v. t.* विधि-सूत्र-रूपेण रच् 10, or व्यव-स्था c. (स्थापयति).

Fornicate, *v. i.* व्यभि-चर् 1 P, वेश्यां सेव् 1 A or अभिगम् 1 P. **-ion,** *s.* व्यभिचारः, जारकर्मन् *n.*, वेश्यागमनं-सेवा, वेश्यासंभोगः. **-or,** *s.* व्यभिचारिन् *m.*, जारः. **-Fornicatress,** *s.* **Harlot,** q. v.

Forsake, *v. t.* त्यज् 1 P, हा 3 P, उत्-वि-अव-सृज् 6 P, उज्झ् 6 P, रह् 10 (रहयति). **-er,** *s.* त्यागिन् *m.*, त्यक्तृ *m.* **-ing,** *s.* त्यागः, उत्सर्गः.

Forsooth, *adv.* नूनं, नाम, किल, खलु, यत्सत्यं, सत्यमेव.

Forswear, *v. t.* सशपथं त्यज् 1 P or प्रत्या-ख्या 2 P, or अप-नि-ह्नु 2 A. **-***v. i.* मिथ्या-शप् 1 U, कूटं-मिथ्या-शप्. **-er,** *s.* असत्यशपथः, मिथ्याशपथकारिन् *m.*

Fort, Fortress, *s.* दुर्गं, कोटः, कोटि *f.*; 'governor of a f.' दुर्गाध्यक्षः, कोटपालः.

Forte, *s.* विशिष्ट-श्रेष्ठ-गुणः, प्रधानगुणः.

Forth, *adv.* बहिः, अग्रे, पुरतः; with verbs, ex. by निर्, उत्, प्र pr. **2** प्रभृति, आरभ्य; 'from this time f.' अद्य-अतः-प्रभृति, अद्यारभ्य; 'f.-coming' आगामिन्, आसन्न, उपस्थित. **-Forthwith,** *adv.* सपदि, झटिति, द्रागेव, सद्यः, अचिरात्-रेण, आशु, अविलंबितं, तत्क्षणात्.

Fortify, *v. t.* दृढीकृ, स्थिरीकृ 8 U, द्रढयति (D.), सं-स्तंभ् 9 P or c. **2** सुगुप्त-सुरक्षित-*a.* कृ, परिखया आ-परि-वृ 5U or परिवेष्ट् c. **-ication,** *s.* गुप्ति *f.*, परिखा, प्राचीरं, दुर्गं, कूटः, कोटः, प्राकारपरिखादि.

Fortitude, *s.* धैर्यं, सत्त्वं, धीरता, मनःस्थैर्यं. **2** वीर्यं, शौर्यं, विक्रमः, साहसं, पौरुषं.

Fortnight, *s.* पक्षः, मासार्धं, अर्धमासः.

Fortuity, *s.* दैवयोगः-घटना, दैवं, समापत्ति *f.* **-ous,** *a.* दैवायत्त, दैवाधीन, अचिंतित, अतर्कितोपनत, आकस्मिक (की *f.*). **-ously,** *adv.* **Accidentally,** q. v.

Fortune, *s.* दैवं, भाग्यं, भागधेयं, विधिः, अदृष्टं, भवितव्यता; *See* **Fate. 9** ऋद्धि *f.*, श्रीः, लक्ष्मीः, ऐश्वर्यं, संपद् *f.*, संपत्ति *f.*, धनं. **3** शुभं, कल्याणं, भद्रं, शिवं, सौभाग्यं, मंगलं, पुण्योदयः; 'bad f.' दुर्दैवं, दुर्-मंद-भाग्यं, दैवदुर्विपाकः; 'tell f.' शुभाशुभं कथ् 10 or चिंत् 10 or निरूप् 10 or आलोच् 10; 'f.-teller' दैवज्ञः; गणकः, कार्तांतिकः, दैवचिंतकः; 'a female f.-teller' विप्रश्निका, ईक्षणिका, दैवज्ञा; 'f.-telling' शुभाशुभदर्शनं. **-ate,** *a.* भाग्यवत्, महाभाग, सुभाग्य, सुभग, सौभाग्यवत्, दैवशालिन्, धन्य, पुण्यवत्, कृतिन्, श्रीमत्, पुण्यभाज्. **3** शुभ, कल्याण, शिव, मंगल, भद्र. **-ately,** *adv.* दैवात्, दैवभोगात्, दिष्ट्या, सौभाग्येन, भाग्य-दैव-वशात्.

Forty, *a.* चत्वारिंशत् *f.* **-Fortieth,** *a.* चत्वारिंश (शी *f.*)-शत्तम (मी *f.*).

Forward, *a.* अग्रिम, आदिम, अग्रस्थ, पुरोगामिन्. **2** अपूर्णकाल, आकालिक (की *f.*). **3** धृष्ट, प्रगल्भ, निर्लज्ज, प्रतिभानवत्, सप्रतिभ, अविनीत. **4** उद्यत, व्यग्र, उद्युक्त, प्रत्युत्पन्न, अविलंबित. **-***v. t.* सं-प्र-वृध् c., उपकृ 8 U, पुरस्कृ, प्र-वृत् c., समुद्युज् 10, साहाय्यं कृ, उन्नतिं नी 1 P, अनुग्रह् 9 P. **2** प्रेर् c., प्र-चुद् 10, प्र-हि 5 P. **3** **Accelerate,** q. v. **-***adv.* (f. s) अग्रतः, पुरतः; पुरः, अग्रे, पुरस्तात्, सं-अभि-मुखं; 'this day f.' अद्य प्रभृति; 'to go backward and f.' गतागतं कृ; *See* **Forth. -ness,** *s.* उत्साहः, अविलंबः, उद्योगः. **2** प्रागल्भ्यं, निर्लज्जता, धार्ष्ट्यं, अतिप्रसंगः, अविनयः, प्रतिभानं.

Fosse, *s.* खातं, परिखा.

Fossick, *v. t.* लाभाय, अन्विष् 4 P.

Fossil, *a.* शिलाजात. **-***s.* धातुः; शिलाभवं, धातुद्रव्यं; उत्खातद्रव्यं. **-ist,** *s.* धातुविद्याज्ञः.

Foster, *v. t.* पुष् 1, 9 P; पा c. (पालयति), प्र-सं-वृध् c., भृ 3 U, लल् 10. **2** (Love, hatred, &c.) धृ 10, वह् 1 P, बंध् 9 P; 'f.-brother' धात्रेयः, धात्रीपुत्रः; 'f.-child' पोष्यपुत्रः (त्री *f.*), पराचितः; परिस्कं(ष्कं)दः, परिस्क(ष्क)न्नः; परजातः, परैधितः; 'f. father' पालकपितृ *m.*, प्रतिपालकः, धर्मतातः; 'f.- mothe' धात्री, उपमातृ *f.*, प्रतिपालिका; अंकपालिका, मातृका, धात्रेयी.

Foul, *a.* मलिन, समल, अशुचि, कलुष, मलदूषित, मलीमस, आविल, अशुद्ध, अपवित्र, अमेध्य, पंकिल. **2** कुत्सित, कश्मल, गर्ह्य, निंद्य, दुष्ट. **3** अवाच्य, अशिष्ट, अश्लील (language). **4** कूट, कपट, पाप, in comp.; 'f. means' कपटप्रबंधः; 'even by f. means' दुरितैरपि (R. viii. 2); 'f. play' दुरितं, पापं; 'f. weather' दुर्दिनं; 'f. quality' रजोगुणः; 'f. smell' पूतिगंधः, दुर्गंधः; 'fall f. of' उपरि पत् 1 P, परस्परं आ-हन् 2 U or संघट्ट् 1 A; 'f.-mouthed' दुर्मुख, वाग्दुष्ट, कटुवाच, मुखर, परिवादिन्. **-***v. t.* मलिनयति-कलुषयति-आ-

विलयति (D.); दुष् c. (दूषयति.) **-ly,** *adv.* अतिदुष्टं, घोरं, मलिनं. **-ness,** *s.* मालिन्यं, गर्ह्यता, &c.

Found, *v. t.* स्था c. (स्थापयति), प्रति-सं-अव-रुह् c. (रोपयति), निर्मा 3 A or c. (मापयति), बंध् 9 P, प्रवृत् c., आरभ् 1 A; मूल, निबंधन, निष्ठ, in comp.; 'attachment f. ed on love' प्रेममूला-भावनिबंधना-रतिः; 'f. ed on ignorance' अज्ञानज, अज्ञानमूल-लक, अविद्याकल्पित. **-ation,** *s.* प्रतिष्ठापनं, संस्थापनं; निर्माणं. 2 वास्तु *m.*, *n.*, पोटः, गृहप्रतिष्ठा. गृहमूलं, भित्तिमूलं, वेश्मभूः. 3 (Fig.) मूलं, आधारः, उपष्टंभः. **-er,** *s.* संस्थापकः, प्रवर्तकः, आरंभकः, आदिकर्तृ *m.*, प्रतिष्ठापकः, कर्तृ *m.* प्रयोजकः. -*v. i.* जलमज्जनेन नश् 4 P. जले मस्ज् 6 P. **-ling,** *s.* अपविद्धबालकः, उत्सृष्टापत्यं.

Foundery, *s.* संधानी, कुप्यशाला.

Fount, Fountain, *s.* निर्झरः, उत्सः, प्रस्रवणं. वारिप्रवाहः. 2 मूलं, योनि *f.*, प्रभवः, हेतुः, आदिहेतुः. 3 धारायंत्रं (artificial f.).

Four, *a.* चतुर्, चतुष्टय; 'f. times' चतुः; 'in f. ways' चतुर्धा; 'f.-cornered' चतुरस्र-श्र; 'f.-fold' चतुर्गुण; 'f.-footed' चतुष्पाद्, चतुष्पाद; 'f. score' अशीति *f.* **-Fourth,** *a.* चतुर्थ (र्थी *f.*), तुर्य, तुरीय. -*s.* चतुर्थभागः, पादः, चतुर्थांशः; तुरीयः, तुर्यः, तुर्यांशः; 'a rupee and one f.' सपादरूपकः. **-ly,** *adv.* चतुर्थस्थाने. **-Fourteen,** *a.* चतुर्दशन्. **-th,** *a.* चतुर्दश (शी *f.*).

Fowl, *s.* खगः, पक्षिन् *m.*, शकुनः; *See* **Bird.** 2 कुक्कुटः, ताम्रचूडः, चरणायुधः. -*v. i.* पक्षिणो ग्रह् or बंध् 9 P or धृ 1 P. **-er,** *s.* शाकुनिकः, व्याधः. शकुनिलुब्धः, जालिकः, लुब्धकः, पक्षिग्राहकः, जीवांतकः. **-ing,** *s.* पक्षिग्रहणं-वधः-घातः.

Fox, *s.* शृगालः, कि(खि)खिः, खिंकिरः, भूरिमायः, गोमायुः; *See* **Jackal**; 'f.-hunt' शृगालानुसरणं; 'f.-like' विदग्ध, धूर्त, बहुमाय.

Fracas, *s.* कलहः.

Fraction, *s.* भिन्नं, भागः, अपूर्णांकः, राशिभागः. **-al,** *a.* अपूर्ण, भागिक (की *f.*), भागिन्.

Fractious, *a.* कलहकारिन्, शीघ्रकोप; वामशील.

Fracture, *s.* भंगः, भेदः, विदारणं, त्रोटनं, विभंगः, विभेदः. -*v. t.* भंज् 7 P, भिद् 7 P, विदॄ 10; *See* **Break.**

Fragile, *a.* भंगुर, भंगशील, भिदुर, भिदेलिम, सुखभेद्य, सुभंग; विनश्वर, क्षयिन्. **-ity,** *s.* भंगुरता, क्षयिता, भिदुरता

Fragment, *s.* खंडः-डं, शकलः-लं, भागः, अंशः, दलं, भिन्नं; 'in a thousand f. s' सहस्रधा. **-ary,** *a.* अपूर्ण, भागिन्, खंडयुक्त.

Fragrant, *a.* सुरभि, सुगंधि, सुवास, आमोद-परिमल-वत्, सुवासिक, सामोद, परिमलोद्गारिन्, गंधयुक्त, गंधवत्; तिक्त, कषाय. **-ly,** *adv.* सवासं, सामोदं, सगंधं. **-Fragrance,** *s.* आमोदः, परिमलः, सौरभं, सौरभ्यं; गंधः, वासः, सुवासः, सुगंधः.

Frail, *a.* भंगुर, नश्वर, ध्वंसिन्, अनित्य, अस्थायिन्, क्षयिन्, सद्यःपातिन्. क्षण-भंगुर-विध्वंसिन्. **-ness,-ty,** *s.* भंगुरता, नश्वरत्वं, क्षयिता, &c. 2 दोषः, स्खलितं, प्रमादः.

Frame, *v. t.* वि-,रच् 10, वि-धा 3 U, क्लृप् *c.*, कृ 8 U, घट् c. (घटयति), संवि-धा, समा-धा, निर्मा 2 P, 3 A. 2 निबंध् 9 P. 3 सदृशीकृ; 'f. in the mind' मनसा चित् 10 or कल्प् c., चित्ते कृ. -*s.* निर्माणं, रचनं-ना. घटनं-ना. 2 आधारः, उपष्टंभः; आवरणं, कोशः. आवेष्टनं. 3 शरीरं, देहः, गात्रं, वपुस् *n.*, कायः, अंगं; 'f. of body' देहबंधः; 'of a hardy f.' वज्रदेहिन्, सिंहसंहनन. 4 भावः, वृत्ति *f.*, स्थिति *f.*, दशा, अवस्था; 'joyous f. of mind' आनंदवृत्तिः. 5 आकारः, रूपं, आकृति *f.*, रीति *f.*, संस्थानं.

Franchise, *s.* पौरजनाधिकारः. 2 मुक्ति *f.*, मोचनं, स्वाधीनता. -*v. t.* मुच् 6 P.

Frangible, *See* **Fragile.**

Frank, *a.* निष्कपट, सरल, ऋजुमति-बुद्धि, उदार, निर्व्याज, स्पष्ट-स्फुट-वादिन्, असंवृत, अवक्र, अमाय, निर्व्यलीक, दक्षिण, अगूढभाव; अकपट, अव्याज, अमायिन्; 'f.-hearted' विमलात्मन्, उदारधी; शुद्धांतःकरण. **-ly,** *adv.* निर्व्याजं, निष्कपटं, अमायया, सरलं. **-ness,** *s.* अमाया, ऋजुता, निष्कापट्यं, औदार्यं, दाक्षिण्यं, सारल्यं, अकापट्यं, &c.

Frank-incense, *s.* कुंदुरः-रुः, कुंदुः-दः, मुकुंदः, पालंकी.

Frantic, *a.* उन्मत्त, मदविक्षिप्त, व्यस्तचित्त, संरब्ध; 'f. with rage' क्रोधोन्मत्त, कोपोन्मादिन्. **-ally,** *adv.* उन्मत्तवत्, सोन्मादं, ससंरंभं. **-ness,** *s.* उन्मादः, व्यामोहः, चित्तविप्लवः, उन्मत्तता, वातुलता, चित्तविभ्रमः.

Frater, *s.* परिव्राज् *m.* यति *m.*, 2 बंधु *m.*, बांधवः.

Fraternal, *a.* भ्रात्रीय, भ्रातृसंनिभ, भ्रात्रनुरूप. **-ly,** *adv.* भ्रातृवत्, सोदरवत्.

Fraternity, *s.* भ्रातृत्वं, सौभ्रात्रं. 2 समाजः, संसर्गः, साहित्यं, बंधुता. **-Fraternize,** *v. i.* भ्रातृवत् संमिल् 6 P or संयुज् pass. or एकीभू or संनिपत् 1 P.

Fratricide, *s.* भ्रातृघातकः, भ्रातृघातिन् *m.* 2 भ्रातृवधः-हत्या-घातः.

Fraud, *s.* कपटः-टं, छलं, कैतवं, माया, व्याजः, कूटं, वंचनं-ना, उपधिः, प्रतारणं-णा, विप्रलंभः, छद्मन् *n.*, दंभः, कुसृति *f.*, निकृति *f.* **-Fraudulent,** *a.* कपटिन्, सव्याज, शठ, धूर्त, मायिन्, वंचक, प्रतारक, विप्रलंभक, कापटिक-छाद्मिक (की *f.*), कपट in comp.; 'a f. plan' कपटप्रबंधः. **-ly,** *adv.* छलेन, सकपटं, सव्याजं, मायया, धूर्तवत्, समायं, सकैतवं.

Fraught, *a.* धुर्य, धुरीण, भराक्रांत. 2 आ-सं-परिपूर्ण, आकीर्ण, आ-सं-कुल, गर्भ-आवह- in comp.; 'f. with danger' अनर्थावह.

Fray, *s.* कलहः, कलिः, युद्धं, द्वंद्वं.

Freak, *s.* कामचारः, चापल्यं-लं, मनोलौल्यं, छंदः-दस् *n.*, लहरी; तरंगः, विलासः; विभ्रमः, लीला, स्वैरिता. -*v. t.* चित्रीकृ 8 U, चित्र् 10 **-ish,** *a.* चपल, लोल, चलचित्त, लोलमति, स्वैरिन्, कामचारिन्.

Freckle, *s.* जडुलः, कालकः, पिप्लुः.

Free, *a.* अमर्याद, मर्यादातिक्रांत, विनय-हीन-शून्य, प्रगल्भ, धृष्ट, अविनीत. 2 आत्म-स्व-तंत्र, स्वाधीन, अनधीन, अनायत्त, अपराधीन, स्वेच्छाचारिन्, स्वच्छंद, स्वैरिन्, निरवग्रह, अपावृत, अ-वि-वश. 3 मुक्त, विमुक्त, निर्मुक्त, विमोचित. 4 निर्यंत्रण, अबद्ध, अनिरुद्ध, वि-उत्-शृंखल, अनर्गल, निरर्गल. 5 निर्विघ्न, निष्प्रत्यूह, अप्रतिहत, निरवरोध, असंबाध. 6 निश्चिंत, वीतचिंत, विशद, स्वस्थ. 7 मुक्तहस्त, त्यागशील, व्ययपर. 8 अयतवाच्, असंवृत, अनियंत्रितकथ. 9 मूल्यं विना. 10 सर्वसाधारण-सामान्य; 'f. from' ex. by निर्-अ in comp. or by गत, वीत, हीन, रहित, वर्जित, शून्य, मुक्त, mostly in comp.; 'f. from pride' निरवलेप; अनृण, वीतस्पृह, चिंताहीन, &c., 'f. choice' स्वेच्छा, स्वरुचि *f.*; 'f. course' प्रसरः. -*v. t.* मुच् 6 P or c., वि-निर्-, वि-सृज् 6 P or c., मोक्ष् 10; gen. ex. by निर् or अ pr. to nouns; 'f. from obstacle' विघ्नान् अपनी or हृ 1 P, निर्विघ्नीकृ 8 U; 'f. from debt' अनृण *a.* कृ, ऋणं अपाकृ or निस्तृ c.; 'I f.ed him from doubt' तं निर्मुक्तसंदेहमकरवं, तस्य संदेहमपानयम्, 'f.-agency,' 'f. will' स्वेच्छा, यदृच्छा, स्वातंत्र्यं, स्वाच्छंद्यं, स्वैरता, स्वकामः; 'f.-booter' दस्युः, साहसिकः, प्रसह्यचौरः; 'f.-booting' प्रसभं अपहारः, साहसं; 'f.-born' जात-जन्म-स्वतंत्र, जात्या स्वायत्त, जन्मनैव अपरायत्त, कुलीन-जाति, अदासज; 'f.-hearted, -minded' *See* **Frank**; 'f.-hold' निष्करभूमि *f.*, स्वाधीना भूः; 'f.-holder' स्वाधीनक्षेत्रस्वामिन् *m.*; 'f. liver' कुक्षिंभरिः, औदरिकः; 'f.-man' स्वतंत्रः, अपरायत्तः, स्वाधीनः, अदासः; 'f.-spoken' स्फुटवादिन्, स्पष्टवाच्, अगूढभाव; 'f.-thinker' नास्तिकः, अनीश्वरवादिन् *m.*; 'f.-woman' स्वाधीना, स्वैरिणी, स्वैरचारिणी. **-dom,** *s.* स्वतंत्रता, अवशता, स्वातंत्र्यं. 2 मोक्षः-क्षणं, वि-,मुक्ति *f.*, मोचनं. 3 निर्यंत्रणं-णता, निर्विघ्नता. 4 अविनयः, मर्यादातिक्रमः, प्रागल्भ्यं. 5 विरहः, अभावः, राहित्यं, हानि *f.*, मुक्ति *f.*; 'f. of will or thought' स्वेच्छा, स्वरुच्यनुवर्तनं, कामचारः, स्वाच्छंद्यं. **-ly,** *adv.* स्वेच्छया, स्वैरं, स्वच्छंदतः; कामतः अयाचितं 2 बहुशः, बाहुल्येन, मुक्तहस्तं, भूयसा. 3 यथेच्छं, नि-प्र कामं, पर्याप्तं, यथेप्सितं, आतृप्ति. 4 निर्विघ्नं, निर्यंत्रणं, अनिवारितं. 5 मूल्यं विना. **-ness,** *s.* निर्विघ्नता, निष्कापट्यं, वान्यतत्वं, त्यागशीलता, &c.

Freeze, *v. i.* शिलीभू 1 P, घनीभू, संहन् pass., श्यै 1 A, संहतीभू, श्यानीभू, पिंडं बंध् 9 P. -*v. t.* शिली-घनी-कृ 8 U, संहन् 2 P, जडयति (D.), जडीकृ, श्यै c., शिलीकृ; 'a frozen mass of ice' शिलीभूतं हिमं, हिमपिंडः.

Freight, *s.* नौभांडं, नौभारः, पोतद्रव्याणि, नाविकं. 2 तरः, आतरः, तरपण्यं, तारिकं, तार्यं. -*v. i.* (द्रव्याणि) नावि निविश् c. or नि-धा 3 U, द्रव्यैः पूर् 10.

Frenetic, *See* **Frantic.**

Frenzy, *s.* उन्मादः, चित्तविभ्रमः-विप्लवः, उन्मत्तता, आवेशः. **-ed,** *a.* उन्मत्त, भ्रांतचित्त, आविष्ट.

Frequent, *a.* नित्य, अनवरत, सतत, अभीक्ष्ण, बहुशः घटमान or वर्तमान; better ex. by 'f.-ly.' -*v. t.* सेव् 1 A, नित्यं आश्रि 1 U, सततं भज् 1 U or अभिगम् 1 P, जुष् 6 A; सततं गम् &c.; *See* below. **-ative,** *s.* यङ्लुगंतं, यङंतं. **-ly,** *adv.* पुनः पुनः, मुहुर्मुहुः, भूयोभूयः, नित्यं, असकृत्, वारंवारं, अभीक्ष्णं, सततं, बहुशः, अनेकशः, बहुवारं, प्रायः, प्रायेण, प्रायशः, शश्वत्. **-Frequence, -cy,** *s.* पौनःपुन्यं, सातत्यं, अभीक्ष्णता, नित्यता, अविरामः, समभिहारः, अविच्छेदः.

Fresco, *s.* शीतता. 2 मंडोदकचित्रं.

Fresh, *a.* नव, अभिनव, नूतन, नवीन; प्रत्यग्र, अविशीर्ण, अम्लान, अशुष्क (of flowers only); 'f. age' नवं-प्रथमं-वयः; 'f. wound' आर्द्रक्षतं. 2 पेय, आस्वाद्य, अलवण. 3 शीतल, शिव, सुख (of breezes). 4 सरस, अश्रांत, अक्षतवीर्य, अक्लांत, अक्षीणतेजस्; 'a f. man' नवशिष्यः-छात्रः, प्राथमकल्पिकः, शैक्षः (just initiated). **-en,** *v. t.* नवीकृ 8 U, सरसीकृ, (पुनर्नवीकृताः स्मः S. 5). **-ly,** *adv.* सद्यः, नवं, प्रत्यग्रं. 2 शीतलं, सुखं. **-ness,** *s.* नवता, नूतनता, अम्लानता, अक्षीणता. 2 तेजस् *n.*, वीर्यं, सरसत्वं, अक्लांति-अश्रांति- *f.* 3 अलवणता. 4 नवरक्तव्रणः.

Fret, *v. i.* क्षुभ् 4 P, पीड् pass., व्यथ् 1 A, दुर्मनायते (D.), अंतः सं-परि-आ-तप् 4 A, शुच् 1 P, क्लिश् pass., उद्विज् 6 A, आत्मानं तप् c. or क्षुभ c. 2 घर्षणेन क्षि pass., संघृष् pass. -*v. t.* संतप् c., क्षुभ् c.; व्यथ् c. (व्यथयति), पीड् 10, बाध् 1 A, क्लिश् 9 P. 2 घृष् 1 P, घर्षणेन तप् c. -*s.* (Of sea) क्षोभः, वीचिविलोठनं. 2 (F.-fulness) चित्तव्यथा, आत्मपीडाक्लेशः, उद्वेगः, मनस्तापः, मनःक्षोभः, अशांति *f.*, दुर्मनायितं. 3 प्रतीपता, वक्रभावः. 4 जालं. -**ful,** *a.* आत्मतापिन्, शीघ्रकोपिन्, दुर्मनस्, चंड, शीघ्रक्रुध-संतप्त. 2 वक्रप्रकृति, प्रतीप, वक्रभाव, दुष्प्रकृति, वामशील, जिह्मस्वभाव. -**fully,** *adv.* सचित्तक्षोभं, मनस्तापेन.

Fretty, *a.* व्यत्यस्तरेखारूपेण तष्ट.

Friable, *See* **Fragile.**

Friar, *s.* योगिन् *m.*, मुनिः, यतिः, संन्यासिन् *n.* तपस्विन् *m.* -**y,** *s.* मठः, आश्रमः, विहारः.

Fribble, *v. i. See* **Trifle.**

Friction, *s.* घर्षणं, संघर्षः, आ-अभि-घर्षः-र्षणं, आ-वि-घट्टनं, परस्परघर्षणं-मर्दनं.

Friday, *s.* शुक्र-भृगु-वारः-वासरः.

Friend, *s.* मित्रं, सखि *m.*, सुहृद् *m.*, स्निग्धः, प्रणयिन् *m.*, हितः, सहायः, सजुष् *m.*, संगिन् *m.* वयस्यः, बंधुः; (term of address) भद्रः-द्रा; 'an old f.' चिरमित्रं; 'a true f.' सन्मित्रं. -*v. t.* उपकृ 8 U, अनुग्रह् 9 P. -**less,** *a.* मित्र-बंधु-हीन, असहाय, अनाथ, अशरण; *See* **Forlorn.** -**ship,** *s.* सख्यं, मित्रत्वं; मैत्री, मैत्र्यं, बंधुता, सौहृदं, सौहार्दं, स्नेहः, प्रणयः, प्रीति *f.*, प्रेमन् *m.*, *n.*, अनुरागः. 2 साहाय्यं. -**Friendly,** *a.* स्निग्ध, सदय, हितकाम, हितैषिन्, स्नेहशील, सानुराग, सुहृदय, सप्रणय. 2 हित, अनुकूल, अनुग्राहिन्, उपकारक, हितकर; सुखावह, कल्याणकर (री *f.*); 'on f. terms' स्नेहवृत्त्या, मित्रभावेन; 'f. disposed' हितबुद्धि; 'f. dispute' प्रणयकलहः, प्रीतिकलहः. -*adv.* मित्रवत्, हितवत्, स्निग्धं, प्रियं. -**ness,** *s.* हितेच्छा, हितकामता, हितबुद्धि *f.*, अनुकूलता, मित्रत्वं, प्रणयः, स्नेहशीलता.

Frieze, *s.* स्थूलपट्टं-शाटकः, वराशिः.

Frigate, *s.* महायुद्धनौका.

Fright, *s.* भयं, त्रासः, संत्रासः, शंका, साध्वसं, भीति *f.*, उद्वेगः, दरं; 'take f.' सं-उत्-त्रस् 1, 4 P, उत्त्रस्त-चकित-*a.* भू. -*v. t.*, -**en,** *v. t.* भी c. (भापयते-भीषयते), सं-उत्-त्रस् c., उद्विज् c. -**ed,** *a.* भीत, त्रस्त, भयार्त; भयाकुल, चकित, ससाध्वस, जातशंक, शंकित, भयाविष्ट. -**ful,** *a.* भीम, विकट, कराल, दारुण, भीषण, घोर, भैरव (वी *f.*), रौद्र (द्री *f.*), भयानक, भयावह, उग्र, भयंकर; 'f. in appearance' करालवदन, भीमरौद्र-दर्शन, उग्रदर्शन. -**fully,** *adv.* दारुणं, घोरं, उग्रं.

Frigid, *a.* शीत, शिशिर, हिम, जड. 2 निरुत्साह, निःस्नेह; *See* **Cold.** -**ity,** *s.* हिमं, शैत्यं, जडता. 2 विरागः, स्नेहाभावः. -**ly,** *adv.* शीतलं, शिशिरं, निःस्नेहं.

Fringe, *s.* अंचलः-लं, दशाः (*f.* pl.), वस्तयः (*m. f.*); 'like a f. rent from the robe of heaven' छिन्ना इवांबरपटस्य दशाः (Mr. 5). -*v. t.* प्रांतयति (D.); 'f.-ed with gold' सुवर्णमंडितप्रांतं (वस्त्रं).

Frippery, *s.* चीराणि (pl.), जीर्ण-चीर-वस्त्रं, वस्त्रखंडाः, कर्पटाः. 2 निष्प्रयोजनद्रव्यं. उच्छिष्टं.

Frisk, *v. i.* क्रीड् 1 U, इतस्ततः रम् 1 A or नृत् 4 P or प्लु 1 A, खेल् 1 P. वि-हृ 1 P. -**y,** *a.* हृष्ट, प्रहृष्ट, प्रफुल्ल, सानंद.

Frith, *s.* संकटं, संभेदः.

Fritter, *v. t.* खंडशः कृत् 6 P; खंड् 10, शकलीकृ 8 U: 'f. away' खंडशः-अल्पशः-न्यूनीकृ or क्षीणीकृ or क्षै c. (क्षपयति); 'f. away time' अल्पशः (मुधा) वेलां क्षै c. -*s.* खंडः-डं, शकलः-लं.

Frivol, *v. i. See* **Trifle.**

Frivolous, *a.* लघु, अगुरु, अनर्थक, तुच्छ, यत्किंचन, चपल, चपल-लघु-वृत्ति, लघुकर्मन्. -**ness,** -**Frivolity,** *s.* लाघवं, लघुवृत्तिता-त्वं, लघुता, यत्किंचनकारिता, चापलं, चपलकर्म, निरर्थकव्यापारः.

Friz, Frizzle, *v. t.* कुंच् c., व्यावृत् c.

Fro, *adv.* (In 'to and f.') इतस्ततः; 'going to and f.' गमनागमनं.

Frock, *s.* उत्तरीयं, कंचुकः.

Frog, *s.* भेकः, दर्दुरः, मंडूकः, वर्षाभूः शा(मा)लूरः, प्लवः, प्लवगः, प्लवंगमः, वर्षाघोषः 'she-f.' मंडूकी.

Frolic, *v. i.* क्रीड् 1 U, विलस् 1 P, विहृ 1 P, खेल् 1 P, रम् 1 A, विभ्रम् 1, 4 P. -*s.* केलि *f.*, विलासः, क्रीडा, विहारः, वि-भ्रमः, ललिा, खेला, क्रीडाकौतुकं. -**some,** *a.* केलि-विलास-प्रिय, विलासिन्, क्रीडा-खेला-पर, उल्लासिन्, विहारिन्, केलिकर; परिहासशील.

From, *prep.* Gen. ex. by abl., when denoting source or place. 2 (Of cause) by abl. or instr., (only by instr., the noun being *f.*); 'f. curiosity' कुतूहलात्-लेन; 'f. its fragrance' सुरभितया. 3 (Of persons) by abl., or सकाशात् with gen.: रामस्य सकाशात् 'f. Râma' 4 (Of time) by आ with abl. or in comp. ; 'f. the beginning' आमूलात्; आजन्मनः, आजन्म ; gen. by आरभ्य or प्रभृति, with abl.; तद्दर्शनादारभ्य or प्रभृति ; 'f. this day' अद्यप्रभृति, अद्यारभ्य; 'f. above' उपरिष्टात्, ऊर्ध्वात् 'f. day to day' दिनेदिने, दिनाद्दिनं ; 'f. below' अधस्तात्, अधोभागात्; अधःस्थानात्;

'f. behind' पश्चादेत्य, पृष्ठतः, पृष्ठत आगत्य ; f. hence' अतः, इतः ; 'f. afar' दूरतः, दूरात् ; 'f. without' बाहिर्देशात् ; 'f. within' अभ्यंतरात्, अंतःप्रदेशात्.

Front, *s.* अग्रं, अग्रभागः-देशः, मुखं, मूर्धन् *m.*; 'f. door or gate' मुखं, निःसरणं. **2** वदनं, आस्यं, मुखं, आननं. **3** शिरस् *n.*, ललाटं; 'in f. of.' पुरः, पुरतः, अग्रे, अग्रतः, पुरस्तात्, प्रत्यक्षं, समक्षं, साक्षात्, अभि-सं-मुखं-खे, (with gen.) ; 'f. of war' रणधुरा, रणशिरस् *n.*, मूर्धन् *m.n.*, 'f. of army' सेनामुखं, सेनाग्रं, अग्रानीकं (f. ranks); 'in the f.' अग्रे, मूर्ध्नि, धुरि, शिरसि ; 'to place in the f.' पुरस्कृ, अग्रणीकृ, अग्रेसरीकृ. **-***v.* संमुखं-खे स्था 1 P or वृत् 1 A, संमुखी-अभिमुखी-भू; oft. by मुख or अभिमुख in comp. ; 'a house f. ing the east' प्राङ्मुखं-प्राच्यभिमुखं-गृहं. **-age,** *s.* अग्र-पूर्व-भागः, मुखं. **-al,** *a.* लालाटिक (की *f.*), ललाट in comp. **-***s.* ललाटपट्टं ; 'f. of an elephant' कुंभः, गंडः. **-less,** *a.* धृष्ट, निर्लज्ज, निस्त्रप. **-let,** *s.* ललाटपट्टं.

Frontier, *s.* सीमा-मन् *f.*, उपांत, पर्यंतः, प्रांतः, समंतः, सामंतः-तं. **-***a.* 'Dwelling on the f.' सामंत (ती *f.*), सीमावर्तिन्, पर्यंतस्थ, प्रांतनिवासिन् ; *See* **Border.**

Frontispiece, *s.* मुखप्रतिमा-चित्रं; 'f. of a house' गृहमुखं, गृहाग्रभागः.

Frost, *s.* तुषारः, तुहिनं, हिमं, अवश्यायः, नीहारः, प्रालेयं, मिहिका ; 'f.-bitten' हिमासिक्त, तुषार-शीत-उपहत. **-y,** *a.* हिम, तुषार, हिम-तुषार-वत्.

Froth, *s.* फेनः-णः, मंडः-डं, उत्सेचनं ; *See* **Ferment.** **-***v. i.* फेनायते-मंडायते (*D.*). उत्सिच् pass. **-y,** *a.* फेनिल, फेनमय (यी *f.*), फेनिन्. **2** असार, लघु, निःसार, निःसत्व, अंतःशून्य.

Frouzy, *a.* पूतिगंधि, उग्रगंध.

Froward, *a.* अदम्य, अविनेय, अतिलालित, दुर्ललित, उच्छृंखल, दुर्दांत. **2** प्रतीप, प्रतिकूल, वक्रस्वभाव, विलोम, वामशील, प्रतीपाचार. **-ly,** *adv* वक्रभावेन, प्रतिकूलं. **-ness,** *s.* प्रतीपता, वामता, वक्रभावः, अदम्यता.

Frown, *s.* भ्रूभंगः, भ्रू(भ्रु)कुटि-टी *f.*, भ्रूभेदः-क्षेपः-संकोचः. **-***v. i.* भ्रूकुटिं बंध् 9 P or रच् 10 or कृ 8 U, भ्रूभंगेन दृश् 1 P, भ्रुवौ संकुच् 1 P; 'Oh he just f. s at myself' अये मय्येव भ्रूकुटीधरः संवृत्तः(U. 5). **-ing,** *a.* नत-आकुंचित-भ्रू, सभ्रूभंग. **-ingly,** *adv.* सभ्रूभंगं, भ्रूक्षेपेण, भ्रूकुटिं बद्ध्वा, सभ्रूक्षेपं.

Fructify, *v. t.* बहुफलदीकृ 8 U, सफलीकृ, स्फीतीकृ, सफलयति (*D.*). **-Fructuous, -Fructiferous,** *a.* (बहु) फलद, फलिन्, फलदायिन्.

Frugal, *a.* मित-अल्प-व्यय-व्ययिन्, स्वल्प-परिमित-व्यय, अमुक्तहस्त, कृपण, व्ययविमुख. **-ity,** *s.* मितव्ययिता, मित-स्वल्प-व्ययः, अमुक्तहस्तत्वं, कृपणत्वं. **-ly,** *adv.* अमुक्तहस्तं; मित-स्वल्प-व्ययेन, अल्पव्ययपूर्वं, कृपणं.

Fruit, *s.* फलं (lit. and fig.); श(स)स्यं, प्रसवः, उत्पन्नं. **2** परिणामः, उत्तरफलं, कर्मफलं. **3** (Progeny) अपत्यं, संतानः-नं, संतति *f.*, प्रजा, प्रसूति *f.*; फलं. **4** अर्थः, लाभः, फलागमः, फलप्राप्ति *f.*, 'dry f.' वानं; 'unripe f.' शलाटु; 'bear f.' फल् 1 P, फलं बंध् 9 P or दा 3 U, सफलीभू, पच् pass., (सद्य एव सुकृतां हि पच्यते कांक्षितं R. xi. 50) 'f.-bearer' फलदातृ *m.*, फलदः ; 'f.-bearing' फलद, फलेग्रहि, फलभृत्, फलदायिन्, फलिन्, फलशालिन्; 'f.-garden' फलवाटः-टिका; 'f.-season or time' फलकालः-समयः, फलावचयकालः; 'f.-stalk or stem' शस्यमंजरी, प्रसवबंधनं, वृंतं; 'f.-tree' फलदः वृक्षः or वनस्पतिः, फलग्राहिन् *m.* **-age,** *s.* फलोच्चयः, फलभारः-गुच्छः, फलागमः. **-erer,** *s.* फलविक्रयिन् *m.* **-ery,** *s.* फलानि (pl.). **2** फलस्थानं. **-ful,** *a.* फलवत्, फलद, फलिन्, सफल, फलित, अवंध्य, अमोघ, बहुफलद, फलिन, फलेग्रहि. **2** बहुप्रज, प्रजनिष्णु, बह्वपत्य, बहुप्रजोपेत. **3** उत्पादक, जनक; आवह-प्रभवः-मूलं-कारणं in comp. **-less,** *a.* निष्फल, वि-अ-फल, निरर्थक, व्यर्थ, मोघ, वंध्य, अनर्थक, निष्प्रयोजन, निर्गुण, अनुपयुक्त, फलहीन, अवकेशिन्. **-lessly,** *adv.* व्यर्थं, निरर्थकं, मुधा, वृथा, मोघं, निष्फलं. **-lessness,** *s.* वैयर्थ्यं, अनुपयोगः, व्यर्थता, वैफल्यं. **-Fruition,** *s.* उप-,भोगः, भुक्ति *f.*, अनुभवः, आस्वादः; सुखोपभोगः, फलास्वादः, सुखानुभवः, सुखास्वादः.

Frumentaceous, *a.* गोधूममय (यी *f.*)

Frump, *s.* कर्कशा, कैकेयी

Frustrate, *v. t.* विफली-निष्फली-मोघी-कृ 8 U, प्रति-व्या-हन् 2 P, भंज् 7 P, खंड् 10, वृथा-मुधा-कृ; *See* **Baffle.** **-***a.* **Fruitless,** q. v. **-ed,** *a.* प्रति-व्या-हत, मोघीकृत, वृथाभूत; 'f. in attempts or hopes' भग्नोद्यम, व्यर्थप्रयत्न, भग्नसंकल्प; भग्नाश, अकृतार्थ, मोघाश, खंडिताश, प्रतिहत, प्रतिबद्ध. **-ion,** *s.* भंगः, व्याघातः, विफलीकरणं, खंडनं. **-ive, -ory,** *a.* व्याघातिन्, भंजक, वृथाकारिन्.

Frutescent, *a.* गुल्मावृत.

Fry, *s.* क्षुद्रमत्स्यसंघः, मत्स्यसंघातः, पोताधानं. **2** मीनांडं. **-***v. t.* भ्रस्ज् 6 P or c. (भर्जयति), पच् 1 P, भृज्ज् 1 A. **-ing,** *s.* भर्जनं, पचनं; 'f.-pan' पिठरः-रं, भृज्जनं, भ्राष्ट्रः, भर्जनपात्रं, अंबरीषं; ऋजीषं, पिष्टपचनं; (for liquor) स्वेदनी, कंदु-दू *m.-f.* **-ed,** *a.* भ्रष्ट, भर्जित, कंदुपक्व; 'f. grain' धानाः (*f.*, pl.), भ्रष्टयवाः, लाजाः (*m.* pl.).

Fuddle, *v. t.* मद् c., मदेन मुह् c. -*v. i.* मद् 4 P. **-er,** *s.* पानासक्तः, पानरतः.

Fudge, *s.* अनर्थकं, असंबद्धं. -*v. i.* असंबद्धं जल्प् 1 P.

Fuel, *s.* इंधनं, एधस् *n.*, एधः, इध्मं, समिध् *f.*, समिंधनं; 'add f. to the flames' क्षते क्षारं प्रक्षिप् 6 P.

Fugacious, *a.* पलायनशील, पलायनपर; अस्थिर, चपल, लोल.

Fugitive, *s.* कृतपलायनः, पलायिन् *m.*, कांदिशीकः. -*a.* पलायिन्, पलायनपर-शील. 2 चपल, तरल, चंचल, अस्थिर.

Fulcrum, *s.* आधारः, उपस्तं(ष्टं)भः, आलंबः, आश्रयः.

Fulfil, *v. t.* सं-परि-पूर् 10, साध् 5 P or c., निर्वह् c., निः-सं-पद् c., समाप् c., निर्वृत् c., सफलीकृ 8 U, निस्तॄ c., तीर् 10; 'f. a promise' प्रतिज्ञां निर्वह् c. or तीर् or शुध् c. or पा c. (पालयति) or अप-वृज् 10; gen. in pass. constr. ex. by पूर्ण, कृत, आप्त, लब्ध, in comp.; 'whose desires are f. ed' समवाप्त-लब्ध-मनोरथः-कामः, कृतार्थः, पूर्णमनोरथः-कामः, कृतिन् *m.*; 'who has f.ed his promise' पूर्णप्रतिज्ञः, पालित-संगरः, सत्यप्रतिज्ञः, सत्यव्रतः-संधः. **-ler,** *s.* निर्वाहकः, साधकः, पूरयितृ *m.* **-ment,** *s.* पूरणं, सिद्धि *f.*, निष्पत्ति *f.*, साधनं, निर्वाहः; 'f. of desires' कृतार्थता, कामसिद्धिः, इच्छापूरणं, इष्टावाप्तिः.

Fulgent, *a.* उज्ज्वल, दीप्ति-द्युति-मत्; *See* **Bright. -Fulgency,** *s.* तेजस् *n.*, प्रभा, कांति-दीप्ति-द्युति *f.*

Fulgurate, *v. i.* विद्युत् 1 A; स्फुर् 6 P.

Full, *a.* (of) सं-परि-पूर्ण, आ-सं-कीर्ण, आ-सं-कुल, संभृत, व्याप्त, निर्भर, पूरित, मय (यी *f.*) in comp. 2 अशेष, अन्यून, सकल, निखिल, कृत्स्न, समग्र, अविकल, अखंड, संपूर्ण; 'f. year' पूर्णं वर्षं; 'f. speed' पूर्णवेगः; 'f. 8 months old' पूर्णाष्टमास. 3 परिणत, परिपक्व, पक्व, कठोर, प्रौढ, संपन्न. -*s.* पूर्णता, साकल्यं; 'in f.' सविस्तरं, साकल्येन. -*adv.* कृत्स्नशः, सर्वथा, साकल्येन, अशेषतः-षेण, पूर्णं; 'f.-blown' प्रफुल्ल, विकच, विकसित, प्रस्फुट, प्रस्फुटित; 'f.-bodied' स्थूलकाय, सन्नद्धांग, पुष्टदेह; 'f.-bosomed' पीनस्तन (नी *f.*), पीनकुचकुड्मल; 'f.-fed,' पुष्टांग, हृष्टपुष्ट; 'f.-grown' प्रवृद्ध, प्रौढ, कठोर, परिणत, प्ररूढ; गतशैशव, प्राप्तयौवन, यौवनारूढ, समारूढयौवनारंभ (of men); 'f.-growth' प्रौढि *f.*, प्रौढता, प्रवृद्धि *f.*; 'f.-laden' पूर्णभार, सुभाराक्रांत; 'f. moon' पूर्णेन्दुः, सकलेंदुः; 'f. moon day' पौर्णिमा, पूर्णिमा, राका. -*v. t.* वस्त्रं निर्णिज् 3 U. 2 घनीकृ 8 U. **-er,** *s.* रजकः, निर्णेजकः. **-y,** *adv.* अशेषेण, सविस्तरं, अशेषतः, सर्वशः-था, साकल्येन, कृत्स्नशः, निरवशेषं, विस्तरेण-रशः, पूर्णतया. **-ness,** *s.* पूर्णता, निर्भरता, पूर्ति *f.*, संभारः. 2 बाहुल्यं, प्राचुर्यं. 3 परिणामः, परिपाकः, सिद्धि *f.*, प्रौढि *f.*; संपद् *f.*

Fulminate, *v. i.* विकटं रस् or स्तन् 1 P, स्फूर्ज् 1 P. -*v. t.* वज्रनिर्घोषेण इव प्रेर् c. or उदीर् c. **-ion,** *s.* स्फूर्जनं, वज्र-मेघ-निर्घोषः, स्तनितं.

Fulsome, *a.* गर्हित, कुत्सित, गर्ह्य, बीभत्स-जनक, विरस. **-ness,** *s.* विरसता, गर्ह्यता.

Fulvous, *a.* आपीत, पिंगल, कपिल.

Fumble, *v. i.* परामृश् 6 P, समालभ् 1 A, अदक्षं कार्यं वि-धा 3 U. **-ing,** *a.* संभ्रांतं परामृशत्, अदक्षतया कार्यविधायिन्. -*s* अदक्षं कार्यविधानं

Hunt, *v.* मृग् 10 A, मृगयां कृ 8 U, (मृगयायां) अनुधाव् 1 P, अनुसृ 1 P, अनुवृत् 1 A, अनुबंध् 9 P. 2 अन्विष् 4 P, निरूप् 10. **-***s.*, **-ing,** *s.* मृगया, आखेटः, मृगव्यं, आच्छोदनं, पापर्द्धि *f.* 2 अनुसरणं, अन्वेषणं, मार्गणं, अनुधावनं; लाभेच्छा, लिप्सा; 'h.-dress' मृगयावेषः; 'h.-dog' विश्वकद्रुः, मृगयाकुक्कुरः. **-er, Huntsman,** *s.* व्याधः, लुब्धकः, मृगयुः, आखेटकः, मृगवधाजीवः; जीवांतकः; शाकुनिकः (of birds); वागुरिकः, जालिकः (with nets).

Hurdle, *s.* काष्ठावरणं.

Hurl, *v. t.* (तरसा-सवेगं) क्षिप् 6 P, वि-सृज्-मुच् 6 P, अस् 4 U, ईर् c., प्रेष् c., प्रहृ 1 P; 'h. down' नि-अव-पत् c., अव-भ्रंश् c., अधःक्षिप्. **-***s.* क्षेपः-पणं, पातनं. 2 तुमुलं, कोलाहलः. **-ing,** *s.* क्षेपणं; 'h. of stones' शिलावर्षः-आसारः.

Hurly-burly, *s.* तुमुलं, कोलाहलः, तुमुलरवः. कलकलः.

Hurrah, *interj.* जय or हर्ष-निस्वनः-शब्दः-नादः.

Hurricane, *s.* प्रकंपनः, महावातः, अतिवातः, प्रभंजनः, वात्या, प्रचंडवातः, वेगानिलः, वाताली, वात्यावेगः, चक्रवातः, जवानिलः, झंझावातः (with showers).

Hurry, *v. i.* त्वर् 1 A, शीघ्रं गम् 1 P, ससंभ्रमं गम्. **-***v. t.* त्वर् c. (त्वरयति). 2 सत्वरं आकृष् 1 P or प्रणुद् 6 P, or प्रेर् c.; शीघ्रं सं-निः-पद् c. or वि-धा 3 U or साध् 5 P. **-***s.* त्वरा, संभ्रमः, रभस् *n.*, रभसः, व्यग्रता, वेगः, आकुलत्वं, आ-सं-वेगः, त्वरितगति *f.*; 'why are you in such a h.' किमसि

संभ्रांतेव (U. 3); 'in a h.' संभ्रांत, व्याकुल, व्यग्र. **-ed,** *a.* त्वरित, शीघ्र; 'a h. speech' निरस्तं वचः, त्वरितोदितं. **-edly,** *adv.* शीघ्रं, त्वरितं, सत्वरं, ससंभ्रमं, सरभसं, व्यग्रं.

Hurt, *v. t.* क्षि 5 P, तुद् 6 P, हिंस् 7 P, अर्द् 1 P or c., बाध् 1 A, व्यथ् c. (व्यथयति), द्रुह् 4 P, क्षण् 8 P, पीड् 10, अपकृ 8 U, विप्र-कृ, दु 5 P; 'does not h. one's reputation' यशः न क्षिणोति (R. ii. 40). **-s** क्षतं, हिंसा, अपकारः, अपकृति *f.*, बाधा, पीडा, व्यथा. 2 अपायः, क्षयः, हानि *f.*, नाशः. **-ful,** *a.* पीडाकर (री *f.*), अपायावह, हिंसात्मक, बाधक, अपकारिन्, अहित-हानि-क्षति-कर. 2 हिंस्र, घातुक, शरारु. **-fully,** *adv.* हिंसापूर्वं, सापकारं. **-less,** *a.* अक्षत. 2 अहिंस्र, अनपकारिन्, अनुपद्रविन्.

Hurtle, *v. i.* संघट्ट 1 A, अभिसं-पत् 1 P. 2 सरभसं निष्क्रम् 1 U, 4 P or निर्गम् 1 P. 3 **Echo,** q. v.

Husband, *s.* पतिः, भर्तृ, उपयंतृ, परिणेतृ, परिग्रहीतृ, विवोढृ; कांतः, दयितः, धवः, नाथः, स्वामिन्; इष्टः, प्रियतमः, प्राणेशः, हृदयेशः, all *m.* (poetical words) ;'h. and wife' दं(जं)पती, जायापती, भार्यापती; 'h.'s brother' देवरः, देवृ *m.*, देवलः; 'a second h' दिधिषुः; 'h.'s sister' ननांदृ; 'h.'s brother's wife' यातृ ; 'sister's h.' श्यालः, श्यालकः, आवुत्तः, भगिनीपतिः. **-***v. t.* परिमितं व्यय् 10 (व्यययति), न विक्षिप् 6 P; परिमितव्ययं कृ 8 U. 2 कृष् 1 P, 6 U. **-less,** *a.* विधवा, अनाथा, पतिहीना, गतभर्तृका, निर्णाथा. **-ry,** *s.* कृषि *f.*, कृषिकर्मन् *n.*, कर्षणं, कृषिविद्या, वैश्यवृत्ति *f.*, हलभृति *f.* 2 परिमितव्ययः, गृहकर्मनिर्वाहविद्या. **-Husbandman,** *s.* कृष(षि)कः, कर्षकः, कृषीवलः, क्षेत्रिकः, हालिकः; *See* **Farmer.** 2 वैश्यः, विश् *m.* ऊरुजः, ऊरव्यः, अर्यः, भूमिस्पृश् *m.*

Hush, *interj.* तूष्णीं भव, शांतं, वाचंयम-निःशब्द-*a.* भव. **-***v. i.* शम् 4 P, प्र-उप-शम्, तूष्णीं भू, मौनीभू. **-***v. t.* शम् c. (शमयति), निभृतं समा-धा 3 U; *See* **Conceal** also.

Husk, *s.* तुषः, त्वच् *f.*, कोशः, पुटः-टं, आवेष्टनं. 2 बुषं-सं, कडंगरः. **-***v. t.* निस्तुषयति-निस्त्वचयति (D.), त्वचं हृ 1 P, निस्तुषीकृ 8 U. **-ed,** *a.* निस्तुष, त्वग्हीन. 2 सतुष, त्वग्युक्त. **-y,** *a* सतुष, तुषवत्. 2 रूक्ष, कर्कश; 'in h. tones' रूक्षस्वरेण, बाष्पवृत्तिकलुषं.

Hussar, *s.* *See* **Cavalier.**

Hussy, *s.* बंधकी, पापा, दुष्टा स्त्री.

Hustle, *v. t.* **Drive away,** q. v. 2 संबाध् 1 A, संक्षुभ् c.

Hut, *s.* उटजः-जं, पर्णशाला, कुटीरः, तृणकुटी, कायमानं.

Hutch, *s.* कुशू(सू)लः, धान्यकोष्ठः.

Huzza, *s.* जयध्वनिः, हर्षनादः-स्वनः.

Hyaline, *a.* काचमय, काचनिर्मित.

Hybrid, *a.* संकीर्णजाति, संकीर्ण, संकरजात, मिश्रज.

Hydra, *s.* जलव्याल.

Hydraulic, *a.* जल-प्रेरित-चोदित. 2 जलवाहिन्. **-s,** *s.* चलज्जलविज्ञानं.

Hydrocele, *s.* कोष-मुष्क-वृद्धि *f.*, फल or कोष-शोफः.

Hydrocephalus, *s.* मस्तिष्कशोथः, शिरोग्रहः.

Hydrography, *s.* समुद्रवेलादिविवरणं.

Hydromel, *s.* जलसंसृष्टं मधु.

Hydropathy, *s.* जलोपचारः, जलप्रयोगचिकित्सा.

Hydrophobia, *s.* जलसंत्रासः; अलर्काभिभवः, आलर्कं.

Hydropsy, *See* **Dropsy.**

Hyemal, *a.* हैमंत (ती *f.*), शीतकालीन.

Hyena, *s.* तरक्षुः-क्षः, तर्क्षुः.

Hygiene, *s.* आरोग्यविद्या.

Hygrometer, *s.* क्लेदमापकः.

Hymen, *s.* विवाहः, उद्वाहः. 2 विवाहाधिष्ठात्री देवता. **-eal,** *a.* विवाहीय, वैवाहिक-उद्वाहिक (की *f.*).

Hymn, *s.* स्तोत्रं, सूक्तं, गेयं, गानं, गीतं, स्तुतिगीतं; 'a chanter of h.s' उद्गातृ *m.*, सुम्नयुः. **-***v. t.* गै 1 P, वर्ण् 10, गानद्वारेण स्तु 2 U or प्रशंस् 1 P; 'h.s praises' उपवीणयति (D.).

Hyp *s.* *See* **Dejection.**

Hyperbole, *s.* अतिशयोक्ति *f.*, अत्युक्तिः, वागुपचयः, सत्यातिक्रमः. **-ic, -ical,** *a.* अत्युक्तिपूर्व, सत्यातिक्रामिन्. **-ize,** *v. t.* अत्युक्त्या वर्ण् 10 or कथ् 10.

Hyperborean, *a.* उत्तर, उदच्, उदीचीन, उत्तरीय.

Hypercritic, *s.* एकांततः गुणदोषनिरूपकः or छिद्रान्वेषिन् *m.*, दोषैकदृश् *m.*

Hypnotic, *a.* सुषुप्तिजनक.

Hypochondria, *s.* पित्तोन्मादः, वातुकोपः. 2 विषादः, उद्वेगः, अवसादः. **-cal,** *a.* पित्तोन्मादिन्, विषण्ण.

Hypocrite, *s.* दांभिकः, दंभिन् *m.*, कपटिन् *m.*, कापटिकः, कुहक-वृत्तिः, छद्म-कपट-वेशिन् *m.*, 'a religious h.' धर्मध्वजिन् *m.* लिंगवृत्तिः, बकवृत्तिः-व्रतः, आर्य-रूपः-लिंगिन् *m.*, छद्मतापसः. वैडालव्रतः. **-ical,** *a.* दांभिन, कपटिन्, छाद्मिक-कापटिक-दांभिक (की *f.*), छद्म-कपट- in comp.; 'a h. sage' छद्मतापसः, कपटव्रतिन् *m.* मुनिवेषधारिन् *m.* **-ically,** *adv.* सदंभं, सकपटं, सव्याजं; दांभिकवत्, छद्मना. **-Hypocrisy,** *s.* दंभः, दांभिकता, कपटधन

धर्मोपधा, बकव्रतं, धर्मध्वजमात्रं, लिंगवृत्ति *f.*, कुहकवृत्तिः, छाद्मिकत्वं, कापट्यं, सव्याजता, आर्यरूपता.

Hypodermic, *a.* त्वगंतर्गत.

Hypotenuse, *s.* कर्णः, श्रुति *f.*

Hypothecate, *v. t.* आधिं गृहे गुप् 1 P; 'a h.-ed article' गोप्याधिः.

Hypothesis, *s.* उपन्यासः, प्रतिज्ञा, संकेतः, समयः. **-Hypothetic,-al,** *a.* उपन्यस्त, सांकेतिक (की *f.*), सोपन्यास, कल्पित. **-ally,** *adv.* सोपन्यासं, ससंकेतं, ससमयं, प्रतिज्ञाक्रमेण.

Hysterics, (**Hysteria,**) *s.* वातोन्मादः; हर्षमूर्च्छा, हर्षमोहः; मोहः, मूर्च्छा. **-Hysteric,-al,** *a.* हर्षमूर्च्छाल, मूर्च्छावत्; मोहोपहत, मूढ, मुग्ध.

I.

I, *pron.* अहं; oft ex. by अयं जनः (referring to persons, of any number or gender).

Ice, *s.* तुषार-हिम-संघातः, हिमसंहति *f.*, संहत-घनीकृत-जलं, हिमं; *See* **Snow** also; 'i.-berg' हिमपर्वतः-राशिः, हिमसंघातः, तुषारराशिः. *-v. t.* हिमीकृ 8 U, हिमेन शीतीकृ. **-Icy,** 'i.-cold', *a.* हिम, हिम्य, हैम (मी *f.*), तुषारवत्. 2 हिमशिशिर, शीतल; जड, शीत, शिशिर. 3 निरुत्साह, निःस्नेह, वीतराग. **-Icicle,** *s.* हिमकणः-बिंदुः.

Ichneumon, *s.* नकुलः, बभ्रुः, अंगूषः.

Ichor, *s.* पूयरक्तं.

Ichthyography, *s.* मत्स्यवर्णनं. **-Ichthyology,** *s.* मत्स्यशास्त्रं.

Icon, *s.* मूर्ति *f.*, देवताप्रतिमा. **-oclasm,** *s.* प्रतिमाभंगः. **-oclast,** *s.* देवताप्रतिमाभंजकः. **-ography,** *s.* प्रतिमालिखनं. **-ology,** *s.* प्रतिमाविद्या.

Idea, *s.* मति *f.*, बुद्धि *f.* 2 मतं, अभिप्रायः, आशयः, मनोगतं, भावः. 3 कल्पः, संकल्पः, कल्पना, भावना, वासना, बोधः; 'with the i. that' ex. by बुद्ध्या in comp. or इति कृत्वा. **-Ideal,** *a.* मनःकल्पित, मानस (सी *f.*), काल्पनिक-मानसिक (की *f.*), चित्तोद्भावित; मनसिज, मनोभव. *-s.* मनोरथसृष्टि *f.*; oft ex. by परम; 'i. of beauty' परमलावण्यं. **-ism,** *s.* बाह्यशून्यवादः. **-ly,** *adv.* मनसा, कल्पनया, भावनापूर्वं.

Identical, *a.* तद् (*pron. a.*) with एव, अनन्य, अनन्यरूप, निर्विशेष, अभिन्न, अव्यतिरिक्त, अभिन्नरूप, सम, समान, निरस्तभेद, आत्मन्-रूप in comp.; 'i. with the world' जगदात्मक विश्वरूप; 'becoming i. with Brahman' ब्रह्मसायुज्यं प्राप्तः, ब्रह्मलीनः. **-ly,** *adv.* अभिन्नं, समं, निर्विशेषं. **-Identify,** *v. t.* समीकृ 8 U, तुल्यीकृ, अनन्यीकृ. 2 तदेव इति प्रति-पद् c. or वि-भू c., or अभि-ज्ञा 9 U, तुल्यत्वेन परिच्छिद् 7 P. *-v. i.* समीभू. **-ication,** *s.* समीकरणं, एकरूपता, सायुज्यं, अभिज्ञानं, विभावनं; 'i. with Brahman' ब्रह्मसायुज्यं, ब्रह्मभूयं. **-Identity,** *s.* ऐक्यं, साम्यं, संवादः, निर्विशेषः, अभेदः, अनन्यता, तादात्म्यं, सारूप्यं, सरूपता, आत्मता, सायुज्यं; 'i. of thoughts' चित्तैक्यं, एकचित्तता; 'i. of class' सावर्ण्यं, सजातित्वं; 'i. of hand' वर्णसंवादः.

Ideology, *s.* मानसशास्त्रं.

Idiom, *s.* वाक्पद्धति-रीति *f.*, वाग्व्यवहारः, वाक्संप्रदायः, विशिष्टस्वरूपं. **-atic,** *a.* Ex. by (*s.*).

Idiosyncrasy, *s.* देहस्वभावः, जातिस्वभावः.

Idiot, *s.* जडः, मूर्खः, अनात्मज्ञः, मूढः, वैधेयः, बालिशः, अज्ञः, निर्बुद्धिः. **-ic,** *a.* जड, मूढ, मूर्ख, हतज्ञान, बुद्धिविकल. **-Idiocy,** *s.* मूढता, मूर्खता, जाड्यं, अज्ञता, बालिशता; *See* **Fool,-ish, Folly.**

Idle, *a.* अलस, कर्म or कार्य-विमुख or पराङ्मुख (खी *f.*), कर्मद्वेषिन्, आलस्यशील, अनुद्योगशील. 2 अव्यापृत, निरुद्योग, निर्व्यवसाय, कर्म or कार्य-शून्य or रहित, निर्व्यापार, निरुद्यम, निश्चेष्ट; उदासीन, निरुत्साह. 3 निरर्थक, निष्प्रयोजन, व्यर्थ, मोघ; 'it were i. to talk of friend or foe in Govinda' गोविंदविषये मित्रामित्रकल्पनं व्याघातः, व्याहतं एव; 'to be i.' उदास् 2 A; 'i. talk' वृथालापः, वृथाकथा. *-v. t.* (time) उदास्, कालं मुधा क्षै c. (क्षपयति) or नी 1 P or अतिवह् c., कालं हृ 1 P or क्षिप् 6 P, कालक्षेपं कृ 8 U, अलस-निर्व्यापार *-a.* भू. **-er,** *s.* निर्व्यापारः, कालक्षेपकः, कार्यपुटः, मुखनिरीक्षकः. **-ness,** *s.* आलस्यं, कार्यद्वेषः, कार्यविमुखता, उदासीनता. 2 अनुद्योगः, अव्यापारः, कार्यशून्यता, कालक्षेपः-पणं. **-Idly,** *adv.* आलस्येन, अलसवत्. 2 निरुद्योगं, निर्व्यापारं. 3 निरर्थकं, व्यर्थं, वृथा, मुधा.

Idol, *s.* (देव-) प्रतिमा-मानं, मूर्ति *f.*, दैवतं, देवता, देवताविग्रहः, प्रतिकृति *f.* 2 (Fig.) आराध्यदेवता; 'attendant on an i.' देवलः, देवाजीवः-विन् *m.* **-Idolater,** (**Idolatrous**) *s.* मूर्ति-प्रतिमापूजकः-अर्चकः-उपासकः, देवतार्चकः, प्रतिमासेविन् *m.* **-Idolatry,** *s.* प्रतिमा or मूर्ति-पूजा or अर्चनं, देवतार्चनं, प्रतिमासेवा देवतोपासना, मूर्तिसेवा-उपासनं. **-Idolatrize,** *v. i.* प्रतिमां पूज् 10 or अर्च् 1 P. 10. **-Idolize,** *v. t.* देवतां इव आराध् c.

देववत् पूज्, or भज् 1 U; एकांततः प्री-अनुरंज्-pass., अत्यंतानुरक्त-*a.* भू, अतिप्रेम कृ 8 U.

Idoneous, *a.* *See* **Fit**.

If, *conj.* यदि, चेत् (not at beginning); 'if so' यद्येवं, एवं स्थिते; 'if not' नोचेत्, अन्यथा, यदि न; 'as if' इव.

Igneous, *a.* अग्निमत्, आग्नेय-अग्निमय (यी *f.*).

Ignis-Fatuus, *s.* मिथ्याग्निः, मिथ्यादीप्ति *f.*, दीप्त्याभासः.

Ignite, *v. t.* ज्वल् c., दीप् c., सं-इंध् 7 A, संधुक्ष् 10, दह् 1 P, तप् c. **-***v. i.* ज्वल् 1 P, दीप् 4 A, सं-इंध् pass. **-ion,** *s.* दीपनं, ज्वलनं, इंधनं.

Ignoble, *a.* अकुलीन, हीनजाति-वर्ण, नि-अप-कृष्ट, नीच, अधम, जघन्य, अनार्य; *See* **Base.** 2 अकीर्तिकर-लज्जाकर (री *f.*). **-Ignobly,** *adv.* अनार्यवत्, नीच-अधम-वत्.

Ignominy, *s.* **Disgrace,** q. v. **2** अपकर्षः, अवज्ञा, अपमानः, कलंकः, अप्रतिष्ठा, तिरस्कारः, परिभवः. **-ious,** *a.* अपकीर्ति-लज्जा-कलंक-कर (री *f.*), गर्ह्य, कलंकावह, वाच्य.

Ignoramus, *s.* अज्ञः, पंडितंमन्यः.

Ignore, *v. t.* न ज्ञा 9 U, न स्वीकृ 8 U. **-ance,** *s.* अज्ञानं, अविद्या, ज्ञानाभावः, अबोधः, मोहः. 2 ज्ञानहीनता, अनभिज्ञता, अज्ञता, अनभिज्ञानं, निर्बुद्धित्वं; 'difference imagined by i.' अविद्याकल्पितभेदः. **-ant,** *a.* अज्ञ, अवेदिन्, अज्ञान, अनभिज्ञ, oft. ex. by not 'know', q. v. 2 अप्राज्ञ, अविज्ञ, अपंडित, दुर्बुद्धि, निर्बुद्धि, अ-निर्-बोध, विद्या-ज्ञान-प्रज्ञा-बोध-हीन-शून्य-रहित, दुर्मति, अविद्वस्. **-antly,** *adv.* अज्ञानतः, अज्ञानेन, अज्ञान-अबोध-पूर्वं.

Iguana, *s.* गोधा, गोधारः.

Iliac, *a.* आंत्रिक (की *f.*), अंत्र in comp.; 'i. pain' अंत्रशूलं, शूलव्याधिः-रोगः.

Ill, *a.* दुष्ट, पाप, असत्, असाधु, गर्ह्य, खल, कुत्सित, अभद्र, अमंगल, अशुभ, gen. ex. by दुर्, कु, अप, वि, कद्, pr.; *See* **Bad**; oft. by अ in comp. **2** अस्वस्थ, अस्वस्थ-असुस्थ-शरीर, असुस्थ, असुस्थित, व्याधित, सामय, रोगिन्; gen. ex. by आर्त, ग्रस्त, आतुर, पीडित in comp.; 'i. with fever' ज्वरार्त, ज्वरपीडित. **-***s.* दुष्टता, खलता, असाधुता. **2** पापं, दुराचारः, अधर्मः, दुर्वृत्तं, दोषः, अपराधः. 3 अनिष्टं, अशुभं, अमंगलं, अकुशलं, अभद्रं, दुःखं, दुर्गति *f.*, आपद्-विपद् *f.*, व्यसनं, उत्पातः, अनर्थः, अरिष्टं, अनिष्टपातः, कष्टः-ष्टं, अपायः. 4 अपकारः, अपकृति *f.*, अहितं, अपायः, क्षति-हानि *f.*, क्षयः, अपचयः. 5 रोगः, व्याधिः, आमयः, पीडा, उपतापः, अस्वास्थ्यं; *See* **Disease.** **-***adv.* असाधु, अनार्यं, असम्यक्, दुष्टं. 2 दुःखेन, कष्टेन, कृच्छ्रेण; in comp. words, ex. by दुर्, कु, अप, वि, कद्, अ, दुष्ट, पाप; 'i.-advised' अपरीक्षित, अविमृश्य कृत; 'i.-affected' वि-अप-रक्त, द्रोहबुद्धि, अहितैषिन्; 'i.-arranged,-ordered,-regulated' दुष्क्रम, दुर्विरचित, अव्यवस्थित; 'i.-behaved,-bred,-natured' अविनीत, दुःशील, दुर्वृत्त, कुशील, अविनय, दुर्विनीत, अशिष्ट, असभ्य, दुराचार, पाप, कुवृत्ति, विनयापेत; 'i.-breeding' अविनयः, दुःशीलता, असभ्यता, विनयप्रमादः, दुर्वृत्ति *f.*, दुराचारः; 'i.-conditioned' दुर्गत, दुःस्थित; 'i.-dressed' दुर्वाससु, कुप्रावृत; 'i.-fame' अयशः, अपकीर्ति *f.*, अप्रतिष्ठा; 'i.-fated' दुर्भाग्य, मंदभाग्य, दुर्दैव, दैवोपहत, दुर्दैवग्रस्त-उपहत; 'i.-favoured, -formed,-shaped' अप-कु-रूप, कदाकार, दुर्दर्शन; 'i.-fitted' अयोग्य, अनर्ह, अनुचित; 'i.-gotten' अन्यायार्जित; 'i. -grounded' अमूलक; 'i.-judged' अविमृश्य-अविचार्य-कृत, अनालोचित; 'i.-judging' विवेकशून्य; निर्विवेक; 'i.-looking' दुर्दर्शन, कुरूप; 'i.-luck' दुर्दैवं, दुर्भाग्यं, मंदभाग्यं, दैवविपर्यासः-दुर्विपाकः, दुर्जातं, अनिष्टं; *See*(*s.*); 'i.-nature,-temper' दुःशीलं, दुष्प्रकृति *f.*, वक्रभावः-शीलं, वामशीलं, भावप्रतीपता, वामशीलता, स्वभाववक्रता 'i.-natured, -tempered' दुष्प्रकृति, वक्र वाम-शील, दुष्ट-खल-स्वभाव, कटु-कर्कश-प्रतीप-स्वभाव, कु-दुः-शील; 'i.-omened' अशुभसूचक, अनिष्टशंसिन्, अनिष्टलक्षण; 'i.-sounding' अपस्वर, वि-कु-स्वर, कटु; 'i.-timed अकाल, अप्राप्तकाल, अप्राप्तावसर, अनवसर, आकालिक (की *f.*); 'i.-treat' विप्र-अप-नि-कृ 8 U, उपद्रु 1 A, पीड् 10, अर्द् 1 P or c., खलीकृ; 'i.-treatment' अपकारः, पीडा, अर्दनं; *See* (*s.*); 'i.-turn' अपकारः, पापं, अप्रियं अहितं, हिंसा, द्रोहः; 'i.-will' दुष्टभावः-बुद्धिः, द्रोहः, द्वेषः, मात्सर्यं, असूया. **-ness,** *s.* रोगः, व्याधिः, आमयः, रुजा, अस्वास्थ्यं, पीडा, बाधा, आर्ति *f.*, क्लेशः, उपतापः, दुःखं, विकारः, विकृति *f.*; 'dangerous i.' जीवितसंशयः, सान्निपातः.

Illapse, *s.* सहसा प्रवेशः or आक्रमणं. **-***v. i.* सहसा प्रविश् 6 P or पत् 1 P.

Illation, *s.* अनुमानं, तर्कः. **-Illative,** *a.* आनुमानिक (की *f.*). **-ly,** *adv.* अनुमानेन, अपोहेन.

Illegal, *a.* नियम-विधि-विरुद्ध, शास्त्र-स्मृति-व्यवहार-न्याय-विरुद्ध, स्मृत्यपेत, अधर्म्य, अन्याय्य, न्याय-धर्म-रोधिन्, अविधि. **-ity,** *s.* विधि-धर्म-शास्त्र-नियम-विरोधः, अन्याय्यता, अधर्म्यता, अव्यवस्था, नियम-व्यवस्था-विधि-भंगः. **-ly,** *adv.* नियम-विधि-विरुद्धं.

Illegible, *a.* दुर्वाच्य, अव्यक्ताक्षर, अस्पष्टाक्षर, अस्पष्ट-अव्यक्त-वर्ण.

Illegitimate, *a.* अन्याय्य, विधिविरुद्ध; *See* **Illegal. 2** विजात, जारजात, जारज, असतीप्रसूत, अनौरस, विजन्मन्, जारोत्पन्न. **3** कृत्रिम, कृतक, कल्पित; 'an i. child' अनौरसः-सी, जारजः-जा, दासीपुत्रः, कौलटेयः-यी, कौलटेरः-री, बंधकी-उपस्त्री-सुतः-ता, चंभुलः, कौलटिनेयः-यी. **-ly,** *adv.* विजन्मना; अधर्मेण. **-Illegitimacy,** *s.* विजन्मन् *m.*, वैजात्यं, अनौरसत्वं.

Illiberal, *a.* अनुदार, कृपण, कृपणबुद्धि-चेतस्-स्वभाव, (lit. and fig.); अत्याग-अदान-शील, अवदान्य. **-ity,** *s.* अत्यागः, अवदान्यत्वं, अनौदार्यं, कार्पण्यं, नीचता, दीनता.

Illicit, *a.* प्रति-नि-षिद्ध, अधर्म्य, अन्याय्य, नियम-धर्म-विरुद्ध, व्यवहारविरोधिन्.

Illiterate, *a.* अशिक्षित, अप्रबुद्ध, असंस्कृत, अव्युत्पन्न, विद्या-ज्ञान-हीन, निरक्षर, अनक्षर. असंस्कृतचित्त.

Illimited,-able, *a.* निरवधि; अनंत, अमेय, असीम, अमित, अमर्याद; *See* **Endless.**

Illogical, *a.* अयुक्तिसिद्ध, न्यायविरुद्ध-विपरीत, अन्यायानुसारिन्, अन्याय्य, अतार्किक (की *f.*); 'i. conclusion' अपसिद्धांतः, अविनिगमः. **-ly,** *adv.* न्यायविरुद्धं.

Illude, *v. t.* वंच् 10, मुह् c., प्रतॄ c.; *See* **Cheat. -Illusion,** *s.* माया, प्रपंचः, इंद्रजालं, अलीकता, अविद्या; *See* **Delusion. Illusive, -Illusory,** *a.* मायिन्, अलीक, ऐंद्रजालिक; *See* **Delusive.**

Illume, Illumine, Illuminate, *v. t* द्युत्- c., प्रकाश् c. उद्भास् c., उद्दीप् c., वि-,राज् c., भ्राज् c., उज्ज्वल् c. **2** (पत्राणि) रंज् c. **-Illumination,** *s.* उद्भासनं, द्योतनं, प्रकाशनं, उज्ज्वलनं, दीप्ति-द्युति-*f.*, भ्राजिष्णुता. **2** (i. s) दीपालि *f.*, दीपमाला-समूहः, दीपोत्सवः. **3** पत्ररंजनं. **-Illuminator,** *s.* द्योतकः, प्रकाशकः, दीपकः. **2** पत्ररंजकः.

Illustrate, *v. t.* व्या-ख्या 2 P, व्या-चक्ष् 2 A, स्पष्टीकृ 8 U, विवृ 5 U; उदा-हृ 1 P, निदृश् c., निदर्शनेन व्या-ख्या, व्यक्ती-विशदी-कृ, चित्रेण स्पष्टीकृ, प्रकाश् c., द्युत् c., शुभ् c., दीप् c, चित्रादिना शुभ् c. **-ion,** *s.* उदाहरणं, दृष्टांतः, निदर्शनं, व्याख्या-ख्यानं, प्रकाशनं, निरूपणं. **-ive,** *a.* प्रकाशक, दार्ष्टांतिक (की *f.*). **-or,** प्रकाशकः, निदर्शकः, व्याख्यातृ *m.*

Illustrious, *a.* विश्रुत, ख्यात, प्रथित, प्रसिद्ध, महायशस्क; *See* **Famous. 2** विशिष्ट, उत्तम, उत्कृष्ट, परम, प्रमुख, महत्. **-ly.** *adv.* विश्रुतं, प्रथितयशसा, विशिष्टतया. **-ness,** *s.* विश्रुति-ख्याति- *f.*

Image, *s.* प्रतिमा, मूर्ति *f.*, प्रतिकृति *f.*-मूर्तिः-मानं-रूपं, प्रतिच्छंदकः **2** प्रतिबिंबं, बिंबं, छाया, प्रतिच्छाया, प्रतिच्छंदः-दकं; 'this youth is the complete i. of Râma' रामस्याकृतिरस्मिन् शिशौ संपूर्णं प्रतिबिंबिता (U. 4). **3 Idea,** q. v.; 'iron i.' लोहप्रतिमा, स्थूणा, सू(शू)र्मी. *-v. t.* मनसा कॢप् c. or चिंत् 10, प्रतिबिंबयति (D.); 'i. various shapes' तैस्तैराकृतिविस्तैररनुगताः (Mr. 5). **-ery,** *s.* मनः-कल्पना-सृष्टि *f.*-संकल्पः, भावना, वासना. **2** उपलक्षणं, लक्षणा. **3** आभासः, आडंबरः, अनुकारः.

Imagine, *v. t.* मनसा कॢप् c., सं-परि°; सं-वि-भू c., सृज् 6 P, ध्यै 1 P. **2** मन् 4 A, गण् 10, चिंत् 10, तर्क् 10, उत्प्रेक्ष् 1 A, बुध् 1 P, अव-इ 2 P, अवगम् 1 P, उपलभ् 1 A. **-able,** *a.* संभाव्य, चिंतनीय, बोधगम्य; 'with all i. ease' मनसोऽप्यगोचरीभूतया-मनसाप्यकल्प्यमानया-लीलया. **-ary,** *a.* मनःकल्पित, वासना-भावना-सृष्ट, मनोरथसृष्ट, मानस (सी *f.*), काल्पनिक (की *f.*), संकल्पज. **2** अमूलक, असत्य, मायामय (यी *f.*). **-ation,** *s.* भावना-नं, कल्पना-नं, संकल्पः, वासना, मनःकल्पना. **2** (Faculty of i.) कल्पना-तर्क-शक्ति *f.*, भावना, उपलब्धि *f.* **-ative,** *a.* कल्पक, विभावक, भावनापर, कल्पनाशील.

Imbecile, *a.* दुर्बल, अशक्त, क्षीणबल; *See* **Feeble. 2** (In mind) न्यूनबुद्धि, अल्प-विकल-मति, बालिश, कृपणबुद्धि. **-ity,** *s.* दौर्बल्यं, न्यूनबुद्धिता, बालिशत्वं.

Imbed, *v. i.* अंतर्गम् 1 P, निविश् 6 P.

Imbibe, *v. t.* नि-पा 1 P, आ-पा, शुष् c. **2** (Fig.) अधिगम् 1 P, मन-..., ग्रह् 9 U or आकल् 10 (कलयति) or उपलभ् 1 A.

Imbricate, *v. t.* आतिव्याप् 5 P.

Imbroglio, *s.* *See* **Embroglio.**

Imbrue, *v. t.* सिच् 6 P, लिप्, 6P, उक्ष् 1 P, क्लिद् c.; अंज् 7 P, दिह् 2 U; 'i. ed with blood' रक्ताक्त, रक्तक्लिन्न.

Imbue, *v. t.* अभिरंज् c. **2** शास् 2 P, उपदिश् 6 P, शिक्ष् c.

Imitate, *v. t.* अनुकृ 8 U (oft. with gen.), अनुगम्-सृ 1 P, अनु-इ-या 2 P, अनुवृत् 1 A, अनुवि-धा 3 U, अनुवद् 1 P, अनुहृ 1 P, विडंब् 10. **-ion,** *s.* अनुकारः-करणं, अनुकृति *f.*, विडंबनं, अनुवृत्ति *f.*, अनुसरणं. **2** उपमानं, प्रतिरूपं, सादृश्यं. **-ive,** *a.* अनुकरणशील, अनुकारिन्, अनुगामिन्. **-or,** *s.* अनुकर्तृ *m.*, अनुकारकः, अनुयायिन्-अनुकारिन् *m.*, अनुगातिकः.

Immaculate, *a.* निष्कलंक, निर्मल, अकल्मष, अनघ, निर्दोष, विमल.

Immanent, *a.* अंतर्भव, अंतरस्थ.

Immaterial, *a.* अमूर्त, निरवयव, अशरीरिन्, अमूर्तिमत्. 2 लघु, अगुरु, अगुर्वर्थ, यत्किंचित्, निष्प्रयोजन, अनावश्यक (की *f.*), निरर्थक. **-ism,** *s.* निराकारवादः. **-ist,** *s.* निराकारवादिन् *m.* **-ity,** *s.* अमूर्तता, अशरीरता. **-ly,** *adv.* निरर्थकं, निष्प्रयोजनं.

Immature, *a.* अपक्व, अपरिणत, असंपूर्णकाल, असिद्ध, अप्राप्तकाल आकालिक(की *f.*). **-ly,** *adv.* अपक्वं, अपरिणतं, अप्राप्तकालं, अतिशीघ्रं, परिणामकालात् प्राक्. **-ity, -ness,** *s.* अपाकः, अपरिपाकः, अपरिणामः, अप्रौढता, अप्राप्तकालता.

Immeasurable, *a.* अमेय, अमित, अपरिमाण, दुर्मेय, महत्, बहु, अति pr.

Immediate, *a.* अनंतर, अव्यवहित, निरंतर, अव्यवधान. 2 तात्कालिक (की *f.*), सद्यस्क, आचिर, शीघ्र; better by 'i. ly.' 3 सन्निहित, उपस्थित, आसन्न, निकट. **-ly,** *adv* सद्यः, सपद्येव, समनंतरमेव, सपदि; तत्क्षणात्, तत्काले, सद्य एव, झटिति, द्राक्, आशु, अविलंबितं, अचिरादेव; oft. by एव or मात्र; 'i. after he had spoken' तस्मिन्नुक्तवत्येव; मुक्तमात्रे सायके &c.

Immedicable, दुरुपचार, अचिकित्स्य.

Immemorable, *a.* अस्मर्तव्य.

Immemorial, *a.* अस्मार्त, स्मरणातिक्रांत, अतिप्राचीन, अनादि; 'i. succession' अनादिपरंपरा; 'from times i.' अनादिकालात्, अस्मार्तकालात्.

Immense, *a.* अत्यंत, अपरिमेय, अतिमात्र, अनंत, अपरिमाण, अमित, अतिमर्याद, दुर्मेय; महत्, बृहत्, सु-अति-महत्, अतिबृहत्. **-ly,** *adv.* अत्यंतं, अतिमात्रं. **-ity,** *s.* आनंत्यं, अमितता, अपरिमाणत्वं, महत्त्वं, सुमहत्त्वं. **-urable,** *a.* *See* **Immeasurable.**

Immerge, Immerse, *v. t.* अवगाह् c., निमस्ज् c. (मज्जयति), आप्लु c., जले प्रविश् c. **-ed,** *a.* मग्न, नि-अभिनि-विष्ट, व्यापृत, लीन, आसक्त, निष्ठ-पर-तत्पर-in comp.; *See* **Fixed, Intent.** **-Immersion,** *s.* निमज्जनं, अवगाहः-हनं, आप्लावः, स्नानं, अभिषेकः. 2 मग्नता, निष्ठा, तत्परता, अभिनिवेशः.

Immethodical, *a.* क्रमहीन, क्रमविरुद्ध, अव्यवस्थित. **-ly,** *adv.* क्रमविरुद्धं, अक्रमेण.

Immigrate, *v. i.* देशांतरं अधिवस् 1 P or अध्यास् 2 A (with acc.). **-ion,** *s.* देशांतराधिवासः, देशत्यागः. **-Immigrant,** *s.* देशांतराधिवासिन् *m.*

Imminent, *a.* उपस्थित, आसन्न, संनिकृष्ट, उपनत, निकट-आसन्न-वर्तिन्; 'a drought is i.' अनावृष्टिः संपद्यते लग्ना (P. I. 7). 2 आत्ययिक (की *f.*), जीवितसंशयावह; 'he stood in i. peril of death' महति जीवित, संशये अवर्तत.

Immit, *v. t.* *See* **Place.**

Immobile, *a.* स्थिर, निश्चल, अचल, निष्कंप.

Immoderate, *a.* अमित, अपरिमित, अमर्याद, अत्यंत, आतिमात्र, अत्यधिक, सु-अति pr. **-ly,** *adv.* अतिमात्रं, अत्यंतं, सु-अति-pr. **-ion,** *s.* अमर्यादा, मर्यादातिक्रमः, अत्याचारः, अतिरेकः, अतिशयः.

Immodest, *a.* वियात, निर्लज्ज, निस्त्रप, अविनीत, प्रगल्भ, धृष्ट, लज्जा-व्रीडा-त्रपा-हीन. 2 अश्लील, गर्ह्य, अवाच्य, अशुद्ध, अशुचि. 3 असाधु, असद्वृत्त, पांसुल, व्यभिचारिन्. **-ly,** *adv.* निर्लज्जं, प्रगल्भं, धृष्टवत्, अश्लीलं. **-y,** *s.* वैयात्यं, अविनयः, प्रागल्भ्यं, धृष्टता, निर्लज्जत्वं.

Immolate, *v. t.* (यज्ञे) हन् 2 P, विशस् 1 P, उपहारीकृ 8 U, हत्वा उत्सृज् 6 P, बलिं दा 3 U or कृ, आलभ् 1 A, सं-ज्ञा c. (ज्ञपयति); 'i. oneself' प्रेतेन सह आत्मानं दह् 1 P, सह गम्. **-ion,** *s.* उपहारीकरणं, उपहारः, बलिदानं, आलंभः, संज्ञपनं, उत्सर्गार्थं वधः or विशसनं.

Immoral, *a.* असाधु, दुश्चरित्र, दुर्वृत्त, दुराचार-पापकर्मन्, व्यभिचारिन्, व्यसनिन्, पापिन्; दुष्ट, धर्मविरुद्ध, अपुण्य, अशुचि, पाप. **-ity,** *s.* असाधुता, दुर्वृत्तता; व्यसनं, अधर्मः, पापं, पापचरितं, दुश्चरितं, व्यभिचारः. **-ly,** *adv.* धर्मविरुद्धं, दुराचारेण.

Immortal, *a.* अमर, अमर्त्य, जरामरणरहित, अक्षय, अजर, निर्जर, अनश्वर, अविनाशिन्; नित्य, सनातन (नी *f.*), अनंत, शाश्वत (ती *f.*), सदास्थायिन्. **-ity,** *s.* अमरता-त्वं अनश्वरता, आनंत्यं, नित्यता. **-ize,** *v. t.* अमरी-अक्षयी-कृ 8 U; better by (*a.*). **-ly,** *adv.* अजरं, अक्षयं, अनश्वरं, शाश्वतं.

Immoveable, *a.* अचल, स्थिर, स्थावर, अचर, अजंगम.

Immune, *a.* मुक्त, रहित; ex. by अ or निर् pr. अगम्य, अक्षम, अनर्ह. **-ity,** *s.* मुक्ति *f.*, मोक्षः. 2 अभावः, विरहः न्यूनता, राहित्यं; oft. by अ or निर् pr.; 'i. from danger' अभयं, निर्भयत्वं.

Immure, *v. t.* नि-अव-रुध् 7 U, बंध् 9 संयम् 1 P, कारायां गुप् 1 P. 2 परिवृ 5 U. परिवेष्ट् 1 A or c.

Immutable, *a.* अव्यय, निर्विकार, नित्य, अविक्रिय, विकाराक्षम, स्थिर, निर्विकल्प, अपरिवर्तनीय. **-Immutability,** *s.* अविकारः, नित्यता, अव्ययः.

Imp, *s.* पिशाचः, भूतः; *See* **Devil, Demon.**

Impact, *s.* संस्पर्शः, संपर्कः, समा-प्रति-घातः, संघट्टः.

Impair, *v. i.* ह्रस् c., अप-चि 5 U, क्षि 1, 5 P or c., नश् c., विलुप् c., लघूकृ 8 U, ऊन 10, उप-हन् 2 P, दुष् c. (दूषयति), अल्पीकृ, विकलीकृ, क्षीणीकृ. 2 तेजः-बलं-ह्रस् 1 P, दुर्बलीकृ. **-ed,** *a.* ह्रसित, क्षीण, विकल, अपचित, उपहत, विशीर्ण, लुप्त, न्यूनी-विकली-कृत; 'i. in strength' क्षीणबल, निःसत्व. **-ing,** *s.* क्षयः, ह्रासः, अपचयः, अपसादः; वैकल्यं, न्यूनता, लोपः.

Impale, *v. t. See* **Empale.**

Impalpable, *a.* अस्पृश्य, अग्राह्य, स्पर्शाव्यक्त, इंद्रियागोचर, अव्यक्त, अतिसूक्ष्म.

Imparity, *s.* वैषम्यं, भेदः, असाम्यं.

Impart, *v. t.* दा 3 U, 1 P, प्रति-पद् c., सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, संक्रम् c., ग्रह् c., वि-तॄ 1 P (with loc.), संसृज् 6 P, सुवर्णविकारा अर्पितौ न सुवर्णमात्मीयेन धर्मेण संसृजंति (S. B. 431) 'do not i. to gold their properties'. 2 नि-आ-विद् c., कथ् 10; प्रकाश् c., वि-ज्ञा c (ज्ञापयति), ख्या 2 P or c. 3 संचर् c., संक्रम् c.

Impartial, *a.* अपक्षपातिन्, समक्रिय, समदर्शिन्, समवृत्तिभाव, उदासीन, मुक्तसंग, सर्वसम, पक्षपातहीन, न्यायवर्तिन्, न्याय्य, धर्म्य. **-ity,** *s.* अपक्षपातः, धर्मः, समता, निःसंगता, औदासीन्यं, न्याय्यता. **-ly,** *adv.* न्यायेन, निःसंगं, अपक्षपातेन.

Impartible, *a.* अविभाज्य, अवंटनीय.

Impassable, *a.* अगम्य, अलंघ्य, दुस्तर, दुर्गम, दुस्तार्य, गहन, संबाध, संकट.

Impassible, *a.* अ-निः-चेतन, सुखदुःखाक्षम.

Impassioned, *a.* अनुरक्त, अनुरागवत्, रागान्वित, बद्धभाव, सानुराग, प्रीत्याकृष्ट, आसक्तचित्त. 2 सरस, रसिक, रागयुक्त, रागिन्; 'what an i. strain' अहो रागपरिवाहिणी गीतिः (S. 5).

Impassive, *a.* विकार-अक्षम-अगम्य.

Impatient, *a.* (For) उत्सुक, व्यग्र, सोत्कंठ, प्रसित, उत्क; *See* **Eager.** 2 (Of) असह, असहन, अक्षमिन्, असहिष्णु, अक्षम. 3 अधीर, कालहरणाक्षम, अमर्षण, अतितिक्षु. **-ly,** *adv.* अधीरं, सोत्सुकं, व्यग्रं, सावेगं, अक्षांत्या. **-Impatience,** *s.* अधीरता, औत्सुक्यं, व्यग्रता, उत्कंठा, अक्षमा, असहत्वं.

Impawn, *v. t. See* **Pledge.**

Impeach, *v. t.* अभियुज् 7 A, 10, अभिशंस् 1 P. अपवद् 1 U, आघुष् c. **-er,** *s.* अभियोगिन्-योक्तृ *m.* **-ment,** *s.* अभियोगः, अभिशंसनं.

Impeccable, *a.* अपाप, निर्दोष.

Impecunious, *a.* दरिद्र, अकिंचन, निर्धन.

Impede, *v. t.* रुध् 7 U, प्रतिबंध् 9 P, वि-प्रति-हन् 2 P, नि-वृ c., स्तंभ् 9 P, or c., बाध् 1 A, कुंठयति (D.). **-Impediment,** *s.* विघ्नः, प्रत्यूहः, अंतरायः, व्याघातः, उपरोधः, प्रतिबंधः; *See* **Obstacle.**

Impel, *v. t.* नि-प्र-उद्-युज् 10, प्रवृत् c., प्रोत्सह् c., उत्तिज् c., प्रेर् c., नुद् 6 P or c., प्रणुद्, प्रचुद् 10, कृष् 1 P; *See* **Drive. -lent,** *s.* प्रवर्तकः, प्रेरकः, प्रोत्साहकः, प्रचोदकः.

Impend, *v. i.* आ-प्र-लंब् 1 A, उपरि लंब्. 2 उपक्रम् 1 P, समा-पत् 1 P, प्रत्या-सद् 1 P, उप-स्था 1 U, उपागम् 1 P, निकटे-समीपं-वृत् 1 A, or स्था; 'an untimely storm i. s' उपक्रमत्यकालदुर्दिनं (Mr. 5), 'a drought is closely i. ing' अनावृष्टिः संपद्यते लग्ना (P. I. 7). **-ent,-ing,** *a.* उपस्थित, आसन्न, निकटवर्तिन्, उपनत, उपक्रमत्.

Impenetrable, *a.* अभेद्य, अच्छेद्य, अप्रवेश्य, गहन, दुर्गम. 2 कठिन, वज्रमय (यी *f.*); 'darkness i. by the sun' अभानुभेद्यं तमः.

Impenitent, *a.* अननुशयिन्, अननुतापिन्, खेद-पश्चात्ताप-हीन, अननुतप्त. **-Impenitence.** *s.* अननुतापः, अननुशयः, अखेदः; कठिनता, कठोरता.

Imperative, *a.* आज्ञापक, आदेशक, नियोजक, विधायक, प्रचोदक. 2 अविचार्य, अवश्यकर्तव्य, अनुपेक्ष्य; 'i. mood' लोट्, आज्ञार्थः. **-ly,** *adv.* अवश्यमेव.

Imperceptible, *a.* अस्पष्ट, अव्यक्त, अविभाव्य, अगोचर, अगम्य; 'i. to the senses' इंद्रियागोचर, इंद्रियातीत, अतींद्रिय; 'i. to the eye' अप्रत्यक्ष, परोक्ष, नयनागोचर; 'i. difference' अतिसूक्ष्मः भेदः. **-Imperceptibly,** *adv.* अव्यक्तं, अगोचरं, अलक्षितं, निभृतं.

Imperfect, *a.* अपूर्ण, अपरिणत, असंपन्न, अपक्व, असमाप्त, असमग्र. 2 न्यून, विकल, लुप्त, हीन, सदोष, सच्छिद्र, ऊनावयव, विकलेंद्रिय, विकलांग; 'i. memory' विकला स्मृतिः; 'i. comparison' लुप्तोपमा; 'i. tense' लङ्. **-ion,** *s.* दोषः, छिद्रं, रंध्रं, अगुणः दूषणं; कलंकः, वैकल्यं, न्यूनता, हानि *f.*, क्षति *f.*, अपर्याप्ति *f.* **-ly.** *adv.* असंपूर्णं, असम्यक्, विकलं.

Imperforate, *a.* नीरंध्र, अच्छिद्र.

Imperial, *a.* महेश्वरीय, महाराज-अधिराज-in comp.; 'i. rule' आधिराज्यं, चक्रवर्तित्वं.

Imperil, *v. t. See* **Endanger.**

Imperious, *a.* आज्ञापक. 2 दृप्त, उद्धत, धृष्ट, अवलिप्त, सावलेप; 'in an i. tone' सावलेपं, तर्जयंत्या गिरा, उद्धतं, साटोपं. **-ness,** *s.* दर्पः, अवलेपः उत्सेकः, औद्धत्यं; *See* **Pride.**

Imperishable, *a.* अनश्वर, अक्षय-य्य, अक्षयिन्, अविनाशिन्, अव्यय, अजर, अक्षर.

Impermeable, *a.* अप्रवेश्य, अभेद्य.

Impersonal, *a.* अकर्तृक, अकर्तृवाच्य; ex. by भाव 'i. verb, भाववाच्यं.

Impersonate, *v. t.* चेतनवत् उपचर् 1 P. (with loc.). **2** **Feign,** q. v.; 'i. ed Râma' गृहीतरामरूपः वेशः.

Impertinent, *a.* वियात, अशिष्ट, प्रगल्भ, धृष्ट, अविनीत, दुः-कु-शील. **2** अप्रस्तुत, अप्रकृत, अप्रासंगिक (की *f.*); असंगत, असंबद्ध, निष्प्रयोजन, अनर्थक. **3** पराधिकारचर्चक, अव्यापारेषु व्यापारं कुर्वत्. **-ly,** *adv.* अविनयेन, धृष्टतया, प्रगल्भं, अप्रस्तुतं. **-Impertinence,** *s.* अविनयः, प्रागल्भ्यं, धृष्टता, अशिष्टता, वैयात्यं. **2** अप्रस्तुतत्वं, असंबंधः, अनन्वयः, असंगतता.

Imperturbable, *a.* अक्षोभ्य, निर्विकार, समवृत्ति-बुद्धि; अपारिप्लव.

Impervious, *a.* दुर्भेद्य, दुष्प्रवेश्य, अभेद्य. **2** गहन, निबिड, अगम्य, संकट, संबाध, नीरंध्र.

Impetuous, *a.* तीव्र, चंड, तीक्ष्ण, उग्र, प्रबल, अविमृश्य कृत, वेगवत्, सरभस. **2** संरंभिन्, साहसिन्, अमर्षण, साहसिक (की *f.*), असमीक्ष्यकारिन्, तीक्ष्णकर्मन्. **-ly,** *adv.* वेगेन, महावेगेन, सवेगं, उग्रं, ससंरंभं, तीक्ष्णं, साहसेन, सरभसं, तरसा. **-ness, -Impetuosity,** *s.* वेगः, सं-आ-महा-वेगः; चंडता, संरंभः, तीव्रता, साहसं, अमर्षता, रभस् *n.*, रभसः.

Impetus, *s.* वेगः, सं-आ-वेगः. गति-शक्ति *f.*, (fig;) प्रेरणा, प्रचोदना, प्रोत्साहनं.

Impinge, *v. t.* आहन् 2 U (usually A), समापत् 1 P, संघट्ट् 1 A.

Impious, *a.* अभक्त, अधार्मिक (की *f.*), अपुण्यशील, अधर्मिन्; दुष्ट, पापिष्ठ, असाधु. **-ness, -Impiety,** *s.* अभक्ति *f.*, अधर्मः, पापं, दुष्कृतं, धर्मलोपः, देवनिंदा, धर्महीनता, असाधुता, दुष्टता.

Implacable, *a.* अहार्य, अचल, अशाम्य, अशमनीय, अतोषणीय, अनाराध्य, अप्रसाद्य, असांत्वनीय. **2** दीर्घ-अति-द्वेषिन्; 'i. hatred' आमरणांतिकं वैरं, दीर्घद्वेषः, बद्धवैरं.

Implant, *v. t.* नि-धा 3 U, विलिख् 6 P, निरुह् c., प्रति-नि-ष्ठा c. (ष्ठापयति), प्रतिवप् 1 P, निखन् 1 P, 'as if i. ed in the heart' प्रत्युप्तेव...अंतर्निखातेव च (Mal.5;) 'so many are the thorns of anxiety i. ed in the heart' तावंतोपि विलिख्यंते हृदये शोकशंकवः (H. 4).

Implement, *s.* उपकरणं, साधनं, उपस्करः, सामग्री, द्रव्यं, पात्रं, यंत्रं.

Implicate, *v. t.* संबंध् 9 P, संश्लिष् c., लिप् 6 P, संसृज् 6 P, संक्रम् c.; 'he is i. ed in many crimes' अनेकपापैर्लिप्यते, अनेकदोषास्तस्मिन् संक्रांताः. **-ion,** *s.* संबंधः, संसर्गः, समन्वयः, अनुषंगः.

Implicit, *a.* निर्विवाद, अवैकल्पिक-असांशयिक (की *f.*); विचारानपेक्ष, अवितर्कित, अनाशंकित, अविचारित; better by 'i. ly.' **-ly,** *adv.* अवितर्कं, अनाशंकं, असंशयपूर्वं, अविचार्य, निःशंकं, निर्विवादं, निर्विकल्पं.

Implore, *v. t.* प्र-अभि-अर्थ् 10 A, याच् 1 A, सविनयं-सांजलि-याच्, अनुनी 1 P, आराध् c., प्र-सद् c. **-ingly,** *adv.* बद्धांजलि *a.*, पादयोः पतित्वा, सप्रणिपातं, सविनयं.

Imply, *v. t.* सूच् 10, ध्वन् c., वच् desid. (विवक्षति), भंग्या व्यंज् c., उप-लक्ष् 10, बुध् c. **2** (As meaning) प्रति-इ c., द्युत् c., गम् c., अभि-धा 3 U; *See* **Mean;** 'these senses are i. ed' एते अर्थाः प्रतीयंते (S. B. 33); oft. by अर्थ, गर्भ in comp.; 'words i. ing censure' निंदार्थं वचः. **-ed,** *a.* विवक्षित, प्रतीत, उपलक्षित, भंग्या सूचित-ध्वनित; 'i. sense' ध्वनिः, फलितं, फलित-ध्वनित-गर्भित-अर्थः. **-ication,** *s.* विवक्षा, उपलक्षणं-णा, भंगी *f.*, व्यंजना, अनुमानं.

Impolite, *a.* अशिष्ट, असभ्य, ग्राम्य, दुर्मर्याद, असुजन, दुःशील, अनार्य, अविनीत, अदक्षिण.

Impolitic, *a.* अनीतिज्ञ, नयानभिज्ञ, अबुध, अविवेचक, अविज्ञ, असमीक्ष्यकारिन्, अमतिमत्. **2** अहित, सापकार, अनर्थावह, अनिष्टकर (री *f.*), असमीक्ष्यकृत, न्यायविरुद्ध. **-ally,** *adv.* असमीक्ष्य, अनीतिज्ञवत्, अविचार्य. **-Impolicy,** *s.* दुर्णयः, अनयः, अनीति *f.*

Imponderable, Imponderous, *a.* अगुरु, लघु, निर्भार.

Import, *v. t.* (देशांतरात्) आनी or आहृ or आवह् 1 P. **2** सूच् 10, बुध् c., उद्दिश् 6 P, द्युत् c.; *See* **Imply, Mean. 3** गुरुतया संबंध् 9 P or अवलंब् 1 A. **-s.** (I. s) विदेशीयपण्यानि, विदेशजद्रव्याणि, बहिर्देशागतवाणिज्यद्रव्याणि. **2** अर्थः, भावः, अभिप्रायः, आशयः, उद्देशः, विवक्षा; 'of like i.' तुल्यार्थ, समानार्थ. **3** गुरुत्वं, गौरवं. **-ance,** *s.* महत्त्वं, गुरुत्वं, गुरुता, गौरवं, प्रभावः, गरिमन्-महिमन् *m.* **2** उत्कर्षः, उन्नति *f.*, प्रतिष्ठा, प्रतिपत्ति *f.*, गौरवपदं; परम-उच्च-पदं. **3** अभिमानः, दर्पः. **-ant,** *a.* महत्, गुरु, अलघु, गुर्वर्थ, बह्वर्थ, बहु-गुरु-प्रभाव, परम; 'i. object' गुर्वर्थः. **-antly,** *adv.* गुरुतया, परमं. **-ation,** *s.* देशांतरादानयनं. **2** आनीतद्रव्याणि.

Importune, *v. t.* निर्बंधेन प्रच्छ् 6 P or प्रार्थ् 10 A or याच् 1 A, अनु-निर्-बंध् 9 P, अनुरुध् 7 U, अतिप्रार्थनया उद्विज् c. or आयस् c.; 'being i. ed &c.' निर्बंधपृष्टः स जगाद सर्वं (R. xiv. 32); पुनः पुनश्चानुबध्यमाना (Ks. 69). **-acy, -ity,** *s.* निर्बंधः, अतिनिर्बंधः, अतियाचना-प्रार्थना, नित्यप्रार्थना.

आग्रहः. **-ate,** *a.* निर्बंधशील-पर, आग्रहिन्, अतियाचक-प्रार्थक; 'i. demand' अतिनिर्बंधः. **-ately,** *adv.* साग्रहं, निर्बंधेन, पुनःपुनः, सनिर्बंधं.

Impose, *v. t.* निक्षिप् 6 P, नि-विश् c., न्यस् 4 U, नि-आ-धा 3 U, आ-समा-रुह् c. (रोपयति), स्था c. (स्थापयति), नियुज् 7 A, 10; 'i. upon' वंच् 10, विप्र-लभ् 1 A; *See* **Cheat.** **-ing,** *a.* गांभीर्यद्योतिन्, गुरुप्रभाव, विस्मयावह, अद्भुत, विस्मापक, भव्य, प्रकांड, महातेजस्. **-ition,** *s.* न्यासः, आरोपः-पणं, स्थापनं, निवेशनं. 2 करः, शुल्कः-ल्कं. 3 छलं, कपटं, दंभः; *See* **Fraud.**

Impostor, *s.* धूर्तः, दांभिकः, वंचकः, प्रतारकः, कितवः. 2 (In religion) धर्मध्वजिन् *m.*, लिंगवृत्तिः; *See* **Hypocrite.**

Imposture, *s.* वंचना-नं, छद्मन् *n.*, दंभः, कपटं, माया, विप्रलंभः, अतिसंधानं, प्रतारणा; *See* **Fraud.**

Impossible, *a.* अशक्य, असाध्य, असंभव, अकरणीय, दुष्कर; gen. ex. by न शक् pass. **-Impossibility,** *s.* अशक्यता, असाध्यता. 2 असाध्यं, असंभवः; oft. ex. by शशविषाणं-शृंगं, खपुष्पं, गगनकुसुमं.

Impost, *s.* करः, शुल्कः-ल्कं; बलिः, राजस्वं, राजभागः.

Imposthume, *s.* विद्रधिः.

Impotent, *a.* निर्बल, दुर्बल, अशक्त, निःसत्त्व; *See* **Feeble.** 2 क्लीब, पुंस्त्वहीन, नपुंसक. निष्पौरुष. 3 निष्फल, निरर्थक, व्यर्थ, वृथा-मुधा- in comp. **-ly,** *adv.* दुर्बलं, निर्वीर्यं, निःसत्त्वं. **-Impotency,** *s.* दौर्बल्यं, निःसत्त्वं, वीर्याभावः, क्लीबता, अपौरुषं, पुंस्त्वाभावः, वैक्लव्यं.

Impound, *v. t.* गोष्ठे नि-अव-रुध् 7 U or रक्ष् 1 P.

Impoverish, *v. t.* निर्धनीकृ 8 U, दरिद्रीकृ, धनं नश् c. or क्षि c. 2 वीर्य-शक्ति-हृ 1 P or नश् c. **-ed,** *a.* निर्धन, क्षीणधन, परिक्षीण, गतविभव, नष्टार्थ, दरिद्रीकृत, अकिंचन, गत-प्रचलित-विभव; *See* **Poor.** **-ment,** *s.* दारिद्र्यं, धननाशः-क्षयः, परिक्षीणता.

Impracticable, *a.* असाध्य, अशक्य, दुष्कर, असंभव, अनुपपाद्य, अकार्य.

Imprecate, *v. t.* शप् 1 U, आ-क्रुश् 1 P, गर्ह् 1, 10 A, अभिशंस् 1 P. **-ion,** *s.* शापः, आक्रोशः-शनं, अभिशंसनं, गालि *f.* **-ory,** *a.* आक्रोशक, अनिष्टावेदिन्, शापगर्भ.

Impregnable, *a.* अजय्य, अलंघ्य, दुर्जय, दुराक्रम, अनाक्रम्य. 2 गहन, दुर्गम, अगम्य.

Impregnate *v. t.* सिच् 6 P, नि-आ°-, प्र-क्षिप् 6 P; व्याप् 5 P or c., व्यश् 5 A, पूर् 10. 2 (Make pregnant) रेतः सिच्, गर्भं ग्रह् c. or उत्पद् c., ससत्त्वां कृ; *See* **Pregnant.** **-ed,** *a.* सिक्त, व्याप्त, पूर्ण-गर्भ-in comp. 2 आपन्नसत्त्वा, गर्भवती. **-ion,** *s.* सेकः, निषेकः, गर्भाधानं.

Impress, *v. t.* नि-धा 3 U, न्यस् 4 U, निविश् c.; पदं ग्रह् c., निष्ठा c. (निष्ठापयति), चित्तनिष्ठ-*a.* कृ 8 U; संस्कृ; (हृदये) पदं कृ, स्थानं लभ् 1 A (in the mind). 2 अंक् 10, चिह्न् 10, मुद्र् 10; *See* below. 3 हृ 1 P. आकृष् 1 P; *See* **Attract.** **-s.** मुद्रा, अंकः, चिह्नं, लक्षणं. **-ed,** *a.* मुद्रित, अवगाढ, अंकित; निवेशित, निष्ठ-स्थ- in comp.; 'i. in the mind' हृदयस्थ, चित्तनिष्ठ; 'deeply i. on the ground' अवगाढा भूमौ (S. 3). **-ion,** *s.* अंकनं, चिह्नं, मुद्रा, अंकः. 2 संस्कारः, चित्तसंस्कारः. 3 अनुभवः, बुद्धि *f.*, मति *f.*, मतं. 4 परिणामः, उत्पन्नं, संस्कारजन्यं फलं; oft. ex. by अंतरं, अवकाशः, पदं with लभ् or ग्रह्; तद्लब्धपदं हृदि शोकघने (R. viii. 91), लेभेंतरं चेतसि नोपदेशः (R. vi. 66) 'made or left no i. on the heart &c.'. 5 आघातचिह्नं, छेदः. **-ive,** *a.* हृदयहारिन्, हृदयंगम, चित्ताकर्षिन्, हृदयस्पृश्.

Imprint, *v. t.* मुद् 10, अंक् 10, न्यस् 4 U; *See* **Impress.**

Imprison, *v. t.* कारायां-कारागृहे-निक्षिप् 6 P or बंध् 9 P or निरुध् 7 U. 2 बंदिग्राहं ग्रह् 9 U, आसिध् 1 P, बंदीकृ 8 U. **-ment,** *s.* कारावासः, कारानिरोधः, काराबंधनं-प्रवेशः, निरोधः-धनं, बंधनं, आसेधः, प्रग्रहः, बंदीकरणं.

Improbable, *a.* असंभव, अघटनीय, दुर्घट, अनुपपन्न; 'it is i.' नैतदुपपद्यते, संभवति or घटते. **-Improbability,** *s.* असंभवः, अनुपपत्ति *f.*, असंगति *f.*

Improbity, *s.* अशुचिता, अनृजुता, असारल्यं, कापट्यं, कौटिल्यं, शाठ्यं, जिह्मता, खलता; *See* **Fraud.**

Impromptu, *a.* आकस्मिक (की *f.*), अयत्नपूर्व, अचिंतितपूर्व. **-***adv.* पूर्वचिंतां विना.

Improper, *a.* अयुक्त, अनुचित, अनुपपन्न, अनर्ह; oft. by कु-अ pr.; 'i. union' असंगतिः, कुयोगः. **-ly,** *adv.* अयुक्तं, असम्यक्, अस्थाने, अनुचितं, अनुपपन्नं; 'acting i.' अकृत्यकारिन्. **-Impropriety,** *s.* अनौचित्यं, अन्यायः, अयुक्तता, अनुपपत्ति *f.* 2 (Of conduct) अविनयः, कुचरितं, अमर्यादा, दुश्चरितं, अकार्यं, अपचारः, मर्यादातिक्रमः.

Improve, *v. t.* उत्कृष् 1 P or c., संस्कृ 8 U, उन्नतिं-श्रेयस्त्वं-नी 1 P or प्राप् c., उप-चि 5 U, भद्रतर-श्रेयस्-*a.* कृ; शुध् c., प्रमृज् 2 P or c., प्रतिसं-समा-धा 3 U, (as faults). **-***v. i.* सं-वि-अभि-वृध् 1 A, उपचि pass., वृद्धिं-उन्नतिं-उत्कर्षं-इ-या 2 P or गम् 1 P or प्राप् 5 P, श्रेयस्-भद्रतर-*a.* भू 'has i. ed in health’ अस्ति विशेषः; ‘to i. in knowledge’ विद्यां अर्ज् 1 P or अधिगम् or आप्. **-ment,** *s.* वृद्धि *f.*, अभि-प्र-वृद्धिः, उत्कर्षः, उन्नति *f.*, उपचयः, उदयः, अभ्युदयः, आगमः, आधिक्यं, बृंहणं. 2 श्रेयस्त्वं, भद्रतरत्वं, वरीयस्त्वं. 3 शोधनं, प्रतिसमाधानं; ‘i. in knowledge’ विद्यागमः, ज्ञानोपचयः; ‘i. in health’ विशेषः.

Improvident, *a.* अदीर्घदृष्टि, अदूरदर्शिन, *See* **Imprudent.** **-ly,** *adv.* असमीक्ष्य, अविमृश्य. **-Improvidence,** *s.* अदीर्घ-अदूर-दृष्टि *f.*

Improvise, *v. t.* अचिंतितपूर्वं-प्राप्तकालं-कृ 8 U or रच् 10.

Imprudent, *a.* अनयज्ञ, अनीतिमत्, अविज्ञ, अविचक्षण, अनीतिज्ञ, अनभिज्ञ, अमतिमत्; अदीर्घ-अदूर-दृष्टि, अविमृश्य-असमीक्ष्य-कारिन्, अदूरदर्शिन्, अविवेकिन्, निर्विवेक, असावधान. 2 (Of acts) अविमृश्यकृत, अनवहित; better by ‘i.-ly’. **-ly,** *adv.* अविमृश्य, असमीक्ष्य, अविचार्य, अनालोचितं, अदीर्घदृष्ट्या, निर्विवेकं, अविज्ञवत्, अविवेकितया, साहसेन, सावेगं, ससंरंभं. **-Imprudence,** *s.* अदीर्घ-अदूर-दृष्टि *f.*, अपूर्वचिंता, असमीक्षा-क्षणं, अविमर्शः, अविवेकः, अविचारः. 2 अविनयः, दुर्णीति *f*, दुर्णयः.

Impudent, *a.* धृष्ट, वियात, प्रगल्भ, निर्लज्ज, अविनीत, दुर्विनीत, निस्त्रप, लज्जा-त्रपा-व्रीडा-हीन, प्रौढ, प्रतिभावत्. **-ly,** *adv.* धृष्टवत्, प्रगल्भं, निर्लज्जं, वैयात्येन, धार्ष्ट्येन. **-Impudence,** *s.* धृष्टता, धार्ष्ट्यं, वैयात्यं, प्रागल्भ्यं, अविनयः, अलज्जा, निर्लज्जता, प्रतिभा-भानं.

Impugn, *v. t.* प्रत्या-ख्या 2 P, विरुध् 7 U, निरा-कृ 8 U, अधरीकृ, प्रत्यादिश् 6 P; *See* **Contradict.** 2 अपवद् 1 A, विपरीतं वद्, निंद् 1 P, दोषं ग्रह् 9 U.

Impulse, *s.* प्रवर्तनं, प्रणोदनं, प्रवृत्ति *f.*, प्रचोदनं-ना, प्रोत्साहनं-ना; ‘sudden i.’ आकस्मिकी प्रवृत्तिः, वेगः, सं-आ-वेगः. 2 हेतुः, कारणं, निमित्तं, प्रयोजनं. **-Impulsive,** *a.* प्रवर्तक, प्रणोदक, प्रोत्साहक, प्रचोदक. 2 आवेगशील, सहसाप्रवर्तिन्, वेगानुवर्तिन्, संरंभिन्; ‘pray, don't grow i.’ सहसा-आकस्मिकवृत्त्या कर्मणि प्रवर्तितुं नार्हसि. **-ly,** *adv.* सहसा, आकस्मिकप्रवृत्त्या.

Impunity, *s.* दंडाभावः, दंडमुक्ति *f.* 2 अनपायः, अनपकारः, अक्षति *f.*, अहानि *f.*, अनाशः, अहिंसा, अपीडा; ‘with i. (to oneself)’ अपकारं विना, स्वयमक्षतेन, आत्महानिं विना.

Impure, *a.* अशुद्ध, अशुचि, अपवित्र, अनिर्मल, समल, अमेध्य. 2 गर्ह्य, निंद्य, कश्मल, कुत्सित. 3 पांसुल, व्यभिचारिन्. **-ly,** *adv.* अपवित्रं, अशुचिवत्. **-ity, -ness,** *s.* अशुचित्वं, अमेध्यता. 2 मलः-लं, अशौचं, कालुष्यं, किट्टं, मालिन्यं, अपद्रव्यं; *See* **Dirt.** 3 गर्ह्यता, निंद्यता. 4 पांसुलता, लांपट्यं, व्यभिचारः.

Impute, *v. t.* आरुह् c., (रोपयति), संबंध् 9 P, क्लृप् c., प्रसंज् c., निक्षिप् 6 P; *See* **Ascribe.** 2 अप-परि-वद् 1 U, आ-अधि-क्षिप्, निंद् 1 P; *See* **Censure.** **-ation,** *s.* (Act) आरोपः-पणं, कल्पना, संबंधः, प्रसंगः; ‘i. of a crime’ दोषकल्पना, दोषारोपः. 2 अभियोगः, अभिशंसनं. 3 आरोपः, आ-अधि-क्षेपः, दूषणं, अपवादः, कलंकः, परि(री)-वादः; *See* **Calumny.**

In, *prep.* Gen. ex. by loc.; अंतरे, मध्ये, in comp.; with verbs by नि pr. 2 (Denoting instrument, manner, time, direction) ex. by instr.; ‘i. great intimacy’ महता स्नेहेन; ‘i. six days’ षडहेन; ‘i. a short time’ अचिरेण, अचिरात्; ‘i. breadth’ विस्तारेण; ‘drives i. a chariot’ रथेन याति-चरति; ‘i. a joyful mood’ आनंदेन; ‘i. order’ क्रमेण, क्रमशः; ‘i. small quantities’ अल्पशः; ‘i. the same manner’ तद्वत्, तथैव; ‘i. as much as’ यतः, यस्मात्, यत्, oft. by abl. or instr. of abstract nouns; *See* **Because**; ‘i. as much as it arises from ingorance’ अविद्यामूलत्वात्.

Inability, *s.* असामर्थ्यं, दौर्बल्यं, अशक्ति *f.*

Inabstinence, *s.* असंयमः, अनिग्रहः.

Inaccessible, *a.* अगम्य, दुर्गम, दुरासद, दुष्प्राप, दुरारोह, गहन, विषमस्थ.

Inaccurate, *a.* अयथार्थ, अनृत, अतथ्य, अशुद्ध. **-ly,** *adv.* अयथार्थं, अन्यथा.

Inaction, Inactivity, *s.* आलस्यं, अनुद्योगः, निर्व्यापारत्वं, कार्यद्वेषः, औदासीन्यं.

Inactive, *a.* अलस, निर्व्यापार, निरुद्यम, अव्यवसाय; *See* **Idle**; ‘to be i.’ उदास् 2 A.

Inadequate, *a.* अक्षम, अयोग्य, असमर्थ, अपर्याप्त, अनुचित, अननुरूप.

Inadmissible, *a.* अग्राह्य, अनुपादेय; ‘i. into socioty’ अपांक्तेय, अपांक्त.

Inadvertent, *a.* अनवधान, प्रमादिन्, प्रमत्त, उपेक्षक, निरपेक्ष, असमीक्ष्य-सप्रमाद-कृत. **-ly,** *adv.* सप्रमादं, निरपेक्षं, अनवधानात्, असमीक्ष्य, असावधानं. **-Inadvertence,** *s.* प्रमादः, उपेक्षा, अनवेक्षा, अनवधानं.

Inalienable, *a.* अविच्छेद्य, अनन्यहार्य.

Inamorata,-Inamorato, *s.* *See* **Lover.**

Inane, *a.* रिक्त, शून्य, अ-निः-सार.

Inanimate, *a.* अ-वि-चेतन, प्राणहीन निर्जीव.

Inapplicable, *a.* अनुपयोज्य, अनुपपन्न, अयोग्य, अनुचित.

Inapplication, *s.* आलस्यं, अनुद्योगः, कार्यनिवृत्ति *f.*, अप्रवृत्ति *f.*, अमनोयोगः, अनभिनिवेशः.

Inapposite, Inappropriate, *a.* अयोग्य, असंगत, अप्रस्तुत, विरुद्ध.

Inappreciable, *a.* अत्यल्प, क्षुद्र.

Inapprehensive, *a.* निःशंक, अकुतोभय, वीतभय.

Inapt, *a.* अपात्र, अयोग्य. **-itude,** *s.* अपात्रता, अयोग्यता. **-ly,** *adv.* अस्थाने, असंगतं.

Inarticulate, *a.* अव्यक्त, अस्पष्ट, अस्फुट, अव्यक्तपद-वर्ण-अक्षर. **-ly,** *adv.* अस्पष्टं, अव्यक्तं; गद्गदवाचा.

Inartificial, *a.* अकृत्रिम, सहज.

Inasmuch as, *adv.* यस्मात्, येन, यतः.

Inattentive, *a.* अनवधान, निरपे(वे)क्ष, अनासक्त, उपेक्षक, मंदादर, प्रमत्त, प्रमादिन्, अनवहित, अनिविष्टचित्त, शून्यहृदय. **-ly,** *adv.* सप्रमादं, अनवधानेन, प्रमादतः, असमीक्ष्य, अविमृश्य, निरपेक्षं. **-Inattention,** *s.* अनवधानं, अनपे(वे)क्षा, उपेक्षा, अनादरः, अननुरागः, अमनोयोगः, प्रमादः, शून्यहृदयत्वं.

Inaudible, *a.* अश्राव्य, कर्णागोचर; 'i. weeping' निःशब्दरोदनं.

Inaugurate, *v. t.* अभिषिच् 6 P, अधिकारे निविश् c. 2 प्रति-ष्ठा c. (प्रतिष्ठापयति), संस्कृ 8 U, उपक्रम् c. आरभ् c. (रंभयति). **-ion,** *s.* अभिषेकः. प्रतिष्ठापनं, संस्कारः; उपक्रमः.

Inaurate, *See* **Gild,-ed.**

Inauspicious, *a.* अशुभ, अमंगल, अभद्र, अकल्याण (णी *f.*). **-ly,** *adv.* अशुभं, अशुभलग्ने.

Inborn, Inbred, *a.* सहज, नैसर्गिक-स्वाभाविक (की *f.*), स्वभावज, अंतर्भव.

Incalculable, *a.* अगण्य, संख्यातीत. 2 अमित.

Incandesce, *v. t.* प्र-, ज्वल् 10, उत्-तप् c. **-ence,** *s.* अत्युष्णता, उत्तप्तता. **-ent,** *a.* प्रज्वलन, उत्तप्त, अत्युष्ण.

Incantation, *s.* मंत्रः, अभिचारः, योगः, मंत्रप्रयोगः. माया; 'to use i. s' मंत्रैः वशीकृ 8 U or मुह् c. अभिमंत्र् 10 A. अभिचर् c.

Incapable, *a.* अक्षम, असमर्थ, अशक्त, अपर्याप्त, अनुचित, अयोग्य.

Incapacious, *a.* अपृथु, अविपुल, अविशाल, संकट, संबाध.

Incapacitate, *v. t.* शक्तिं हृ 1 P, अक्षमं-अक्षमी-कृ 8 U, अपात्री-अयोग्यं कृ.

Incapacity, *s.* असामर्थ्य, अशक्ति, *f.*, अनर्हता, अयोग्यता, अपात्रता. 2 मेधाभावः, बुद्धिहीनता.

Incarcerate,-ion, *See* **Imprison,-ment.**

Incarnadine, *v. t.* अरुणी कृ 8 U. **-***a.* रक्त, रुधिरताम्र, आताम्र.

Incarnate, *a.* मूर्त, मूर्तिमत्, देहवत्, शरीरिन्, शरीरबद्ध, देहिन्, सशरीर. 2 अवतारिन्, मनुष्यरूपधारिन्, गृहीतदेह, मनुष्यरूपेण अवतीर्ण **-ion,** *s.* अवतारः;शरीरधारणं, देहग्रहणं, मूर्तिमत्ता, सशरीरता; better by (*a.*); *See* **Embody** also.

Incase, *v. t.* भांडे नि-धा 3 U or निविश् c. 2 पि-धा, आवृ 5 U, आ-परि-वेष्ट् c., परि-आ-च्छद् 10.

Incautious, *a.* असमीक्ष्य-अविमृश्य-कारिन्, साहसिन्. 2 अनवधान, प्रमादिन्, प्रमत्त. **-Incaution,** *s.* प्रमादः, असमीक्षा; *See* **Inattention.**

Incendiary, *s.* गृह-अगार-दाहिन् *m.* **-Incendiarism,** *s.* गृहदाहः.

Incense, *s.* धूपः, तुरुष्कः, पिंडकः, सिह्लः, यावनः (olibanum); यक्षधूपः, सर्जरसः, रालः, सर्वरसः; 'artificial i.' वृकधूपः, कृत्रिमधूपकः. **-***v. t.* धूप् 1 P, 10, धूपेन वास् 10. 2 उत्तिज् c., उद्दीप् c., संधुक्ष् धुक्ष् 10, क्षुभ् c., कुप् c., प्रकुप् c.; *See* **Enrage. -Incensory,** *s.* धूपपात्रं-भाजनं.

Incentive, *s.* प्रलोभनं, प्रचोदनं, प्रवर्तनं, उत्तेजनं, प्रोत्साहनं; प्रेरणं, प्रणोदनं, उद्बोधकं. 2 कारणं, निमित्तं, प्रयोजनं, हेतुः. **-***a.* प्रवर्तक, प्रचोदक, &c.

Inception, *s.* प्रारंभः, उपक्रमः.

Incertitude, *s.* विकल्पः, शंका, अनिर्णयः.

Incessant, *a.* सतत, अविरत, अनवरत, अविच्छिन्न, अविश्रांत, प्रसक्त. **-ly,** *adv.* अनवरतं, सततं, अजस्रं, अविच्छेदं, अश्रांतं, सर्वदा, प्रसक्तं, निरंतरं, अभीक्ष्णं.

Incest, *s.* व्यभिचारः, अगम्यगमनं; oft. by गमनं; 'i. with a mother, sister &c.' मातृगमनं; स्वसृगमनं, &c. **-uous,** *a.* अगम्यगामिन्, व्यभिचारिन्; 'i. son' मातृगामिन् *m.*

Inch, *s.* अंगुलः; 'not even an i.' न रेखामात्रमपि, नाल्पमपि; 'by i. es' अल्पाल्पं, अल्पशः.

Inchastity, *s.* व्यभिचारः;असतीत्वं, पांसुलता (of women).

Inchoate, *a.* उपक्रांत, अचिरप्रारब्ध. 2 असंपूर्ण. **-ion,** *s.* उपक्रमः, प्रारंभः.

Incident, *s.* वृत्तं, वृत्तांतः, व्यतिकरः, प्रसंगः, संगति *f.*, घटना. 2 उपाख्यानं, प्रासंगिककथा. **-al,** *a.* प्रासंगिक-आनुषंगिक-आगंतुक-आकस्मिक-आपतिक-नैमित्तिक- (की *f.*), आहार्य, आगंतु, अप्रस्तुत, अप्रकृत; 'i. cause' आगंतुकारणं, कार्यनिमित्तं. **-ally,** *adv.* प्रसंगतः, प्रसंगवशात्, यदृच्छया, कथाप्रसंगेन, कार्यकारणतः, दैवात्, आगंतुकतया.

Incinerate, *v. t.* भस्मसात्कृ 8 U, भस्मीकृ.

Incipient, *a.* आरब्ध, उपक्रांत; प्रथम, अग्र, पुरोगामिन्.

Incise, *v. t.* छिद् 7 P, कृत् 6 P, तक्ष् 1, 5 P; *See* **Cut.** **-ion,** *s.* छेदः, कर्तनं, क्षतं, भेदः.

Incite, *v. t.* प्रवृत् c., प्रोत्सह् c., प्रेर् c., प्रचुद् 10, प्रणुद् 6 P or c., उद्युज् 10; (anger &c.) उद्दीप् c., उत्तिज् c., संधुक्ष् 10. 2 आ-समा-श्वस् c. **-ation,-ment,** *s.* प्रोत्साहनं, प्रचोदनं प्रवर्तनं, प्रेरणं, उत्तेजनं. 2 **Incentive,** q. v.

Inclement, *a.* निष्ठुर, कर्कश, निर्घृण, निर्दय. 2 (Of weather) उग्र, कठोर, रूक्ष, असौम्य, तीक्ष्ण, तीव्र, प्रचंड. 3 वातवृष्टिमत्. **Inclemency,** *s.* अदया, अकारुण्यं, रूक्षता, कटुता.

Incline, *v. i.* नम् 1 P, अव-आ°-, नम्रीभू 1 P. 2 प्रवण-*a.* भू; 'favourably i. ed towards her by (her) penance' तपसा तत्प्रवणीकृतः (K. iv. 42); gen. ex. by शील in comp.; 'i. ed to favour' अनुग्रहशील; or by इष् 6 P, वांछ् 1 P; by मनस् or काम with inf. form, or by desid. forms. **-***v. t.* आ-अव-नम् c. (नमयति), आवृज् 10, नम्रीकृ. 2 प्रवणीकृ, प्रवृत् c., नि-उद्-युज् 10, प्रोत्सह् c., प्रेर् c.; *See* **Incite.** **-***s.* उत्सर्पिणी or अवसर्पिणी भूमिः, प्रवणा भूमिः. **-ation,** *s.* प्रवृत्ति *f.*, प्रवाहः, प्रावण्यं; gen. ex. by शीलता-त्वं or आलुता-त्वं in comp. or by desid. forms; 'i. to fall' पतनशीलता, पतयालुता, पिपतिषा 2 भावः, अभिलाषः, इच्छा, कामः, छंदः, छंदस् *n.*, रुचि *f.*, चित्तप्रवृत्तिः; 'following one's own i.' कामचारिन्, स्वच्छंद, स्वैरवृत्त, कामचार, स्वैर, स्वैरिन्. 3 आ-,नति *f.*; 'i. of a planet's orbit to the ecliptic' परमापमः. **-ed,** *a.* नत, आवर्जित. 2 प्रवर्तित, प्रवण, in comp., शील or आलु in comp. or by desid. forms.

Inclose, *v. t. See* **Enclose.**

Include, *v. t.* परिग्रह् 9 P, अंतर्गण् 10, समाविश् c., अंतः कल् 10, परिसमाप्-अभिव्याप्- 5 P, प्रतिसं-हृ 1 P; gen. ex. by अंतर् with भू-गम्-पत् 1 P or वृत् 1 A (with nom. of what is included). 2 आ-धा 3 U, धृ 10, आ-दा 3 A, गर्भ in comp. **-ed,** *a.* अंतर्भावित, अंतर्गणित; परिगृहीत, अंतर्भूत, अंतर्गत, अंतर्वर्तिन्, समाविष्ट, सहित, अवांतर, गर्भित, अभिव्याप्त; गर्भ in comp.; 'i. space' अंतरालः-लं, अभ्यंतरं; 'those persons i.' तान्नरान् समाकलय्य, तैर्नरैः सह. **-ing,** **-Inclusive,** *a.* परिग्राहिन्, अभिव्यापक; oft. by सह, or सहित *a.*; 'both days i.' उभाभ्यामपि दिनाभ्यां सह, उभयदिनसहितं; 'then enter a hermit with two others (three i. himself)' ततः प्रविशत्यात्मनातृतीयो वैखानसः (S. 1). **-Inclusively,** *adv.* साकल्येन, अशेषेण, सहितं. **-Inclusion,** *s.* अंतर्भावः, अंतर्गणना-नं, समावेशः-शनं, परिग्रहः, अभि-,व्याप्ति *f.*, प्रतिसंहारः.

Incognito, *a.*, प्रच्छन्न, अलक्षित, प्रच्छन्न-गुप्त-रूप. **-***adv.* प्रच्छन्नं, गुप्त-अलक्ष्य-रूपेण, निभृताकारेण.

Incognizance, *s.* अनभिज्ञानं, अप्रतिपत्ति *f.* **-Incognizant,** *a.* अनभिज्ञ, अज्ञ.

Incoherent, *a.* असंगत, असंबद्ध, अनन्वित. **-ly,** *adv.* असंगतं, अनन्वयं. **-Incoherence,** *s.* असंबंधः, असंगति *f.*, अनन्वयः, असंदर्भः.

Incombustible, *a.* अदाह्य, दुर्दाह्य.

Income, *s* आयः, उदयः, आगमः, धनागमः, अर्थप्राप्ति *f.*, धनोदयः.

Incommensurable, *a.* असमपरिमाण, असमान, असदृश. 2 अपर्याप्त.

Incommensurate, *a.* अतुल्य, असमान, अननुरूप; अपर्याप्त, न अलं, असदृश.

Incommode, *v. t.* पीड् 10, क्लिश् 9 P, आयस् c.; 'don't i. yourself' अलमायासेन. **Incommodious,** *a.* अनुपयुक्त, अयोग्य. 2 क्लेश-पीडा-कर (री *f.*), असुखद, उपरोधिन्.

Incommunicative, *a.* वाग्यत, मितवाच्, मितकथ, भाषणविरक्त, संलापविमुख (खी *f.*).

Incomparable, *a.* अतुल, अनुपम, अद्वितीय, निरुपम, अप्रतिम. अप्रतिरूप, अनुपमेय.

Incompassionate, *a.* निर्घृण, क्रूर, नृशंस, निर्दय; *See* **Cruel.**

Incompatible, *a. See* **Inconsistent.**

Incompetent, *a.* अशक्त, असमर्थ, अयोग्य, अकर्मक्षम, अनलंकर्मीण. **-ly,** *adv.* अयोग्यं, अक्षमवत्. **-Incompetence,-cy,** *s.* अक्षमता, असामर्थ्यं, कार्याक्षमता, अपर्याप्ति *f.*

Incomplete, *a.* अपूर्ण, असमाप्त, अनिष्पन्न. सावशेष. 2 विकल, न्यून, लुप्त, हीनांग, न्यूनावयव, लुप्तावयव, असमग्र. **-ly,** *adv.* अपूर्णं, सावशेषं, अपर्याप्तं; वैकल्येन, असमस्तं. **-ness,** *s.* अपूर्णता, असमाप्ति *f.* 2 वैकल्यं, न्यूनता.

Incomplex, Incomposite, *a.* अमिश्रित, असंकीर्ण, शुद्ध.

Incomprehensible, Inconceivable, *a.* अज्ञेय, अगम्य, दुर्बोध, अचिंत्य, अविभाव्य, अग्राह्य, अबोधगम्य, अतर्क्य, अधीगम्य, बोधातीत, इंद्रियातीत, अतींद्रिय, इंद्रियागोचर.

Inconclusive, *a.* अनिर्णायक, अप्रमाण, अनिश्चायक. **-ly,** *adv.* अप्रमाणं, प्रमाणं विना, अनिर्णायकत्वेन.

Incongruous, *a.* असंगत, विरुद्ध, असंबद्ध, अनुपपन्न. **-ness,** **-Incongruity,** *s.*

विरोधः, असंगति *f*., अनुपपत्ति *f*.; oft. by क्र-क्र; *See* **Congruous.**

Inconsequent, *a*. अप्रयुक्त, अप्रयोगिन्, अयौक्तिक, न्यायविरुद्ध, अयुक्तिसिद्ध.

Inconsiderable, *a*. अल्प, क्षुद्र, तुच्छ. 2 अल्पार्घ.

Inconsiderate, *a*. असमीक्ष्य-अविमृश्य-कारिन्, अविवेकिन्, अविमर्शिन्, साहसिन्, प्रमत्त, असावधान; ' on i. deed ' साहसं. **-ly,** *adv*. अविमृश्य, असमीक्ष्य, अविचार्य, सहसा, निर्विवेकं, सरभसं, अनालोचितं, निरवधानं, प्रमादतः, साहसेन. **-ness,** *s*. अविमर्शः, अविवेकः, असमीक्ष्यकारित्वं, अविचारणा, असमीक्षा.

Inconsistent, *a*. असंगत, विरुद्ध, विरोधिन्, असंबद्ध, अनन्वित, विसंवादिन्, विगीत, विपरीत; परस्पर-विरोधिन्-विरुद्ध, परस्परपराहत, संकुल, पूर्वापरविरुद्ध, क्लिष्ट; oft. ex. by विसंवद् 1 U, विरुध् pass., विप्रवद्; *See* **Consistent** also. **-ly,** *adv*. विरोधेन, विरुद्धं, विसंवादेन, परस्परविरुद्धं.

Inconsistence,-cy, *s*. असंगति *f*., असंबंधः, अनन्वयः, विरोधः, वैपरीत्यं, विभेदः, असादृश्यं, विसंवादः, विप्रतिपत्ति *f*., परस्परविरोधः, विरोधोक्ति *f*.

Inconsolable, *a*. अशरण, निर्विनोद, शोकाकुल.

Inconsonant, *a*. *See* **Inconsistent.**

Inconspicuous, *a*. अप्रकाश, अस्पष्ट. 2 अप्रधान.

Inconstant, *a*. अस्थिर, अदृढ; चल, चंचल; तरल, लोलमति, चलचित्त. **-Inconstancy,** *s*. अस्थैर्य, तरलता, चंचलत्वं; *See* **Fickle. -ness.**

Insufficient, *a.* अपर्याप्त, न्यून, अयथेष्ट, अल्प, अप्रचुर, हीन, क्षीण, अनलं *ind.* 2 अनुचित, अक्षम, अयोग्य. **-ly**, *adv.* अनलं, अप्रचुरं, अपर्याप्तं. 2 अनुचितं, अयोग्यं. **-Insufficiency**, *s.* न्यूनता, अपर्याप्ति *f.*, अल्पत्वं, अबाहुल्यं, हीनता, अप्राचुर्यं. 2 अक्षमता, अनौचित्य.

Insular, *a.* द्वीपीय, द्वीप्य, द्वीपसंबंधिन्. 2 जलपरिगत-परिवृत-वेष्टित.

Insulate, *v. t.* पृथक् कृ 8 U; पृथग् विन्यस् 4 P; *See* **Separate**. **-ed**, *a.* अन्यविश्लिष्ट, पृथक् स्थित, अनन्यसंलग्न-संसक्त. **-ion**, *s.* अन्यवियोगः-विश्लेषः, पृथक् स्थिति *f.*

Insult, *s.* अवमानना, निकृति *f.*, मानभंगः, अवज्ञा; परिभवः-भूति *f.*, अप(व)मानः, तिरस्कारः, परिवादः, दुर्वचस् *n.*, खलोक्ति *f.*; अनादरः, भर्त्सना, धर्षणं, आ-अव-क्षेपः; 'add i. to injury' क्षते क्षारं प्रक्षिप् 6 P. **-*v. t*.** निकृ 8 U, अव-अप-मन् 4 A or c., अवज्ञा 9 U, तिरस्कृ, परिभू 1 P, आ-अभि-धृष् c., निंद् 1 P, गर्ह् 1, 10 A, आ-अधि-क्षिप् 6 P, आक्षर् c., अप-परि-वद् 1 U, कुत्स् 10 A, लघूकृ. **-ing**, *a.* अपमानकारिन्, अवमानिन्, परिभाविन्, निंदापर. **-ingly**, *adv.* सावज्ञं, सावमानं.

Insuperable, *a.* दुरतिक्रम, अलंघ्य, दुस्तर, अनतिक्रमणीय, दुरत्यय दुरारोह, दुर्जय.

Insupportable, *a.* दुःसह, असह्य, निःसह, दुरुद्वह, दुर्वह.

Insuppressible, *a.* दुर्निग्रह, दुर्निवार.

Insure, *v. t.* रक्ष् 1 P, प्रति-वि-धा 3 U, सत्यीकृ 1 U, योगक्षेमं कृ or वि-धा, नाशात् निवार् 10. **-ance,** *s* योगक्षेमः, क्षेमविधानं-करणं, सत्यापनं, रक्षणं.

Insurgent, *s.* राजद्रोहिन् *m.*, राजविरोधिन् *m.*, राजापथ्यकारिन् *m.*, प्रजाविप्लव-प्रकृतिक्षोभ-कारिन् *m.*

Insurmountable, *a.* *See* **Insuperable.**

Insurrection, *s.* राजविद्रोहः, राज्यप्रकोपः, नृपाभिद्रोहः, प्रकृति or प्रजा-क्षोभः or कोपः, राज्योपप्लवः, उपप्लवः, उपद्रवः. **-ary,** *a.* राज-विरुद्ध-प्रतीप-विपरीत, उपद्रविन्.

Insusceptible, *a.* अग्राहक, अविकारिन्, ग्रहणाक्षम.

Intact, *a.* अखंड, अविकल, अभेद्य.

Intangible, *a.* अस्पृश्य, स्पर्शागोचर, अस्पर्श-वेद्य, दुरालभ.

Integer, *s.* पूर्णांकः, अभिन्नः, रूपं. **-Integrate,** *v. t.* संपूर् 10. **-Integrity,** *s.* अवैकल्यं, साकल्यं, पूर्णता, अभिन्नभावः, अभेदः, अखंडता. 2 शुचिता, आर्जवं, सारल्यं, वैमल्यं; *See* **Honesty;** ' of strict i. ' अभेद्य, अहार्य.

Integral, *s.* *See* **Integer.** *—a.* पूर्ण, आसकल, समग्र, अभिन्न, अखंड, सांग. 2 पूरित, पूर्ण.

Integument, *s.* वेष्टनं, आ-परि-°; पटलं, कंचुकः, पुटः-टं, कोशः-षः, आच्छादनं, आवरणं.

Intellect, *s.* मतिः, बुद्धिः, प्रज्ञा, धीः, धि(धी)-षणा, मनीषा, प्रेक्षा, शेमुषी, उपलब्धिः, चित्, संविद्, प्रतिपद्, ज्ञप्तिः, चेतना (all *f.*): ' retentive i.' मेधा, धारणावती-धीः. **-ual,** *a.* Ex. by (*s.*) in comp.; बुद्धि विषयक, मानसिक (का *f.*) ; 'i. gain ' ज्ञानोत्कर्षः, मानसोन्नति *f.* 2 बुद्धिमत्, धीमत्, मनीषिन्; ' I. faculty ' धीशक्ति *f.*, निष्क्रमः; ' possessing i. qualities धीगुणसंपन्न. **-ually,** *adv.* धिया, बुद्धिपूर्वं.

Intelligence, *s.* मति *f.*, ज्ञानं, बुद्धिचातुर्यं, वैदग्ध्यं, मेधा; *See* **Intellect.** 2 वार्ता, उदंतः, वृत्तांतः, प्रवृत्ति *f.*, समाचारः. 3 संदेशः वाचिकं. **-er,** *s.* वार्ताहरः, वार्तावह, संदेशहरः, आख्यायकः, वैवधिकः. **-Intelligent,** *a.* मति-बुद्धि-धी-मत्, प्रज्ञावत्, मेधाविन्, सज्ञान, प्राज्ञ, सुधी 2 चतुर, कुशल, निपुण, विज्ञ, विदग्ध, निपुणमति. **-ly,** *adv.* चतुरं, सं-वैदग्ध्यं, सनैपुण्यं, विज्ञवत्, सुबुद्धिपूर्वं, बुद्धि-चातुर्येण. **-Intelligible,** *a.* स्पष्ट, सुगम, बंधगम्य, भिन्नार्थ, सुबोध, सुव्यक्त, सुग्राह्य, बुद्धिगम्य-ग्राह्य. **-Intelligibly,** *adv.* स्पष्टं, सुव्यक्तं, भिन्नार्थं, स्पष्टार्थं.

Intemperate, *a.* असंयत, असंयमिन्, असं-यमशील, अतिमर्याद, अयतवृत्ति, असंयताचार, असंयतेंद्रिय, अमितभोगिन्, (in eating) अतिभोजिन्, अत्याहारिन्, अमिताहार, *See* **Glutton;** (in drinking) अतिपानासक्त, अतिपायिन्, पानप्रसक्त. 2 (Of things) अमित, अपरिमित, अमर्याद, अनियत, अयत, अपरिमाण, उद्रिक्त, अतिरिक्त, अत्यधिक. **-ly,** *adv.* असंयमेन, अमर्यादं, अपरिमितं, अतिशयेन, नियमातिक्रमेण. **-Intemperance,** *s.* असंयमः, अदमः, अनिग्रहः, नियमातिक्रमः, अजितेंद्रियत्वं, अनियतवृत्ति *f.*, अत्याचारः; अतिभोजनं, अत्याहारः, अमिताहारः; अतिपानं, पानप्रसक्ति *f.* 2 उद्रेकः, अमर्यादा, अमितत्वं, आधिक्यं, अनियमः, मर्यादातिक्रमः, अतिशयः, अतिरेकः.

Intend, *v. t.* अभिप्र-इ 2 P, परि-सं-क्लृप् c., इष् 6 P, ईह् 1 A, उद्दिश् 6 P, मनः-मतिं-कृ 8 U, (with dat.), कृ desid. (चिकीर्षति-ते), मनसा चित् 10 or उद्दिश्; oft. ex. by desid. forms, or by मनः-काम with inf. form; ' what do you i. to do' किं कर्तुमनाः **-Intention,** *s.* अभिप्रायः, संकल्पः आशयः, उद्देशः, इच्छा, कामः, चिकीर्षा, आकांक्षा, आकूतं, बुद्धि-मति- *f.*, भावः, मतं, इंगितं. 2 अर्थः, कार्यं, प्रयोजनं. 3 विवक्षा; ' purity of i. ' भाव-चित्त-शुद्धि *f.*; ' change of i. ' बुद्धिभेदः, ' avowed i. ' प्रकटिताशयः; ' with what i. ' किमुद्दिश्य, किमभिप्रेत्य, किं फलमपेक्ष्य. **-al,** *a.* मति-बुद्धि-ज्ञान-पूर्व, बुद्धि-संकल्प-कृत, काम्य, कामकृत, सांकल्पिक-ऐच्छिक-(की *f.*). 2 अभिप्रेत, अर्थवत्. **-ally,** *adv.* मति-बुद्धि-ज्ञान-पूर्वं, मतिपुरःसरं, कामतः, ज्ञानतः, बुद्ध्या, साभिप्रायं, मनः-इच्छा-पूर्वकं, यथा-कामं. **-ed,** *a.* Ex. by आशय, बुद्धि, मति in comp.; ' well-i. ' सदाशय; ' evil-i. ' दुराशय, दुष्टमति, पापबुद्धि.

Intense, *a.* प्रचंड, तीव्र, उग्र, तिग्म, प्रखर, अत्यंत, घन, गाढ, प्रबल, तीक्ष्ण, परम, महत्, गुरु, अतिमात्र, भृश, नितांत; gen. by सु or अति pr. **-ify,** *v. t.* वृध् c., प्रकर्षं नी 1 P, better by कृ with (*a.*). **-ity,-ness,** *s.* चंडता, तीव्रता, अत्यंतता, गाढता, प्रकर्षः, उत्कर्षः, गरिमन् *m.*, अतिशयः, उद्रेकः, अति-भूमि *f.*, पराकोटि *f.*-काष्ठा; ' i. of application ' अत्यंताभिनिवेशः, व्यासंगः. **-ive,** *a.* प्रकर्षकर-वृद्धिकर -(री *f.*). **-ly,** *adv.* अत्यंतं, तीव्रं, तीक्ष्णं, नितांतं, अतीव, बलवत्, सु-अति pr.

Intent, *s.* **Intention,** q. v.; ' to all i. s ' सर्वथा. *—a.* एकाग्र, एकनिष्ठ, सुसमाहित, अनन्यमानस, अनन्यविषय, एक-तान-चित्त-अयन; *See* **Fixed;** आसक्तचित्त, आसक्त, व्यापृत, निरत, नियत, व्यग्र, निष्ठित, समाहित, नि-आ-अभिनि-विष्ट, अभियुक्त oft. by पर, तत्पर, निष्ठ, परायण in comp.; ' i. on evil ' दुष्टपरायण; अध्ययनपर, &c. **-ly,** *adv.* एकाग्रचित्तेन, अनन्यमनसा,

एकाग्रतया, निष्ठापूर्वं, साभिनिवेशं, आसक्तचेतसा, मनोयोगेन; 'look or hear i.' लोचनैः or कर्णैः पा 1 P. **-ness,** *s.* एकाग्रता, एकनिष्ठता, अनन्यचित्तता, आसक्ति *f.*, अभिनिवेशः, तत्परता, निष्ठा, मनोयोगः.

Inter, *v. t.* भूमौ-श्मशाने निखन् 1 P or निक्षिप् 6 P or नि-धा 3 U.

Interact, *s.* विष्कंभकः, प्रवेशकः. **-***v. t.* मिथः चेष्ट् 1 A or बाध् 1 A.

Intercalar,-y, *a.* अधिक, निवेशित; 'i. month' अधिकमासः, मलमासः, मलिम्लुचः. **-Intercalate,** *v. t.* अधिकमासं-दिवसं निविश् c.

Intercede, *v. i.* अंतर् गम् 1 P or स्था 1 P, मध्ये स्था or गम्, मध्यस्था भू, सं-धा 3 U, मध्यस्थतां ग्रह् 9 U, मध्यस्थवृत्तिं आ-स्था 1 U or आश्रि 1 U, माध्यस्थ्यं कृ 8 U; (परार्थं) प्रार्थ् 10 A, अनुनी 1 P, आराध् c., वद् 1 P. **-er,-Intercessor,** *s.* मध्यस्थः, मध्यस्थपुरुषः, परार्थं प्रार्थकः, परार्थवादिन् *m.* **-Intercession,** *s.* माध्यस्थ्यं, मध्यस्थता, सधानं, परार्थप्रार्थनं-ना, परार्थवादः-निवेदनं.

Intercept, *v. t.* रुध् 7 U, विच्छिद् 7 P, वियुज् 7 A, 10, प्रतिबंध् 9 P; *See* **Obstruct. -er,** *s.* रोधकः, विघ्नकरः. **-ion,** *s.* रोधः, विच्छेदः, प्रतिबंधः, विघ्नः, भंगः.

Interchange, *v. t.* परस्परं विनि-मे 1 A or परिवृत् c., व्यति-हृ 1 P. **-***s.* विनिमयः, परिवर्तः, व्यतिहारः, परिवृत्ति *f.*, आदानप्रदानं; *See* **Exchange. -able,** *a.* परिवर्तनीय, परस्परानुगामिन्.

Interclude, *v. t. See* **Intercept.**

Intercommune, *v. See* **Associate. -ion, -ity,** *s.* अन्योन्यव्यवहारः.

Intercourse, *s.* संगः, समागमः, संगति *f.*, संसर्गः, संगमः, संपर्कः, साहचर्यं, साहित्यं, संघट्टनं, अन्योन्यसंसर्गः, आलापः, संवादः, परिचयः; 'sexual i.' मैथुनं, रतिक्रिया, सुरतं, स्त्रीभोगः; 'social i.' लोकव्यवहारः-संसर्गः.

Intercutaneous, *a.* त्वगंतर्भूत.

Interdependence, *s.* परस्पर-निबंधनं, अन्योन्याश्रयः.

Interdict, *v. t.* नि-प्रति-षिध् 1 P, निवार् 10, प्रत्या-ख्या 2 P, प्रत्या-दिश् 6 P; *See* **Forbid. -***s.*. **-ion,** *s.* निषेधः, निवारणं, प्रत्याख्यानं, निरोधः, बाधा. **2** शापः, आक्रोशः. **-ory,** *a.* निषेधक, निवारक.

Interest, *s.* अर्थः, हितं, लाभः, कल्याणं, श्रेयस् *n.*, भूति *f.*, क्षेमः-मं; 'in my i.' मदर्थे-र्थं. **2** आदरः, स्नेहः, रागः, अपेक्षा अनुरागः, स्पृहा, अपेक्षा. **3** पक्षपातः, संगः; 'without any i.' मुक्त-वीत-संग *a.* **4** वृद्धि *f.*, वार्द्धुष्यं; 'simple i.' सरलवृद्धिः; 'compound i.' चक्रवृद्धिः, 'i. at five percent' पंचकेन शतेन, पंचकशतं, पंचोत्तरं शतं. **5** भागः, अंशः, अधिकारः, उद्धारः. **6** रसः, विनोदकत्वं, मनोहरता, हृदयंगमता; दृष्टं कथारसस्याक्षेपसामर्थ्यं (Ka. 346) 'you have seen how the i. (i. ing nature) of the story diverted (me) from my topic'; 'take or feel i.' आदृ 6 A; 'looking to one's own i.' स्वार्थदृष्टि *f.*, स्वार्थपरता, स्वार्थलिप्सा. **-***v. t.* अनुरंज् c., स्नेहं-अनुरागं-उत्पद् c., अनुरक्त-सानुराग- *a.* कृ 8 U. **2** वि-नुद् c., मनः-चित्तं-रंज् c. or विनुद् c., हृदयं गम् 1 P or आकृष् 1 P or हृ 1 P, मनो हृ. **3** भागं-अंशं दा 3 U or लभ् 1 A or आप् 5 P; संबंध्-अनुबंध्-pass. **-ed,** *a.* अनुरक्त, जातानुराग, जातस्नेह. **2** पक्षपातिन्, संगिन्, सपक्षपात. **3** आसक्त, निविष्ट, निरत. **4** भागिन्, अंशिन्. **5** संबद्ध, लाभालाभसंबद्ध. **6** स्वार्थपर, स्वार्थदर्शिन्, स्वलाभासक्त, स्वहितपरायण-तत्पर, स्वलाभापेक्ष, स्वहितैषिन्, स्वार्थलिप्सु. **-ing,** *a.* विनोदिन्, मनोहर, सरस, चित्ताकर्षिन्, हृदयंगम, हृदयहारिन्-ग्राहिन्, विनोदिन्, चित्तरंजक.

Interfere, *v. i.* मध्ये स्था or पत् 1 P, परकार्येषु व्यापृ 6 A, परकार्याणि निरूप् 10 or चर्च् 6 P, 10 A; 'if it should not i. with other duties' न चेदन्यकार्यातिपातः (S. 1); 'he who i. s with matters not his own' अव्यापारेषु व्यापारं यः करोति (P. 1). **2** परस्परं संघट्ट् 1 A or विरुध् 7 U. **-ence,** *s.* माध्यस्थ्यं, परव्यापार-परकार्यचर्चा, परकार्यनिरूपणं; चर्चा, निरूपणं. **2** परस्परसंघट्टः, समाघातः.

Interfluent, *a.* मध्यस्राविन्.

Interfused, *a.* मध्यप्रसारिन्, मध्यप्रसृत.

Interim, *s.* कालाभ्यंतरं, कालांतरालं, मध्य-अंतर्गत-कालः; 'in the i.' अत्रांतरे, कालाभ्यंतरे.

Interior, *a.* अंतरस्थ, अंतर्गत, अंतर्भूत, अंतःस्थ, अंतर्वर्तिन्, आंतर-आभ्यंतर (री *f.*), अंतर् in comp. **-***s.* अंतर्भागः, उदरं, गर्भः, अभ्यंतरं, हृदयं, अंतर् in comp.; 'the i. of a house' गर्भागारं, वासगृहं, भवनोदरं, अंतर्भवनं.

Interjacent, *a.* मध्यवर्तिन्, मध्यस्थित.

Interject, *v. t.* मध्ये-अंतः-क्षिप् 6 P or प्रविश् c. **-ion,** *s.* अंतःक्षेपः-पणं. **2** उद्गारः.

Interlace, *v. t.* संमिश्र 10, संश्लिष् c.

Interlard, *v. t.* मध्ये-अंतर्-निविश् c. **2** संमिश्र् 10.

Interlay, *v. t.* मध्ये नि-धा 3 U or नि-विश् c.

Interleave, *v. t.* अंतः-मध्ये पत्रं निविश् c.

Interlinear, *a.* पंक्तिद्वयमध्ये लिखित.

Interlocution, *s.* संलापः, संवादः, संकथा, संभाषणं -**Interlocutor,** *s.* संभाषकः, संवादकः, उत्तरप्रत्युत्तरकृत् *m.* -**y,** *a.* संवाद-संकथा-रूप, संवादात्मक, संकथासंबंधिन्.

Interlope, *v. i.* अन्यायेन (पराधिकारं) प्रविश् 6 P or आक्रम् 1 U, 4 P. -**er,** *s.* अन्यायेन प्रवेशकः, आगंतुकः.

Interlude, *s.* मध्यरंगः; विष्कंभः-भकः.

Interlunar,-y, *a.* अमा, अमावास्या in comp.

Intermarry, *v. t.* परस्परं विवह् 1 P or दारान् परिग्रह् 9 P or परिणी 1 P. -**age,** *s.* परस्परविवाहः, प्रत्युद्वाहः, विवाहव्यवहारः.

Intermeddle, *v. i.* परकार्याणि निरूप् 10 or चर्च् 6 P, 10 A, पराधिकार-परकार्य-चर्चां कृ 8 U; *See* **Interfere.** -**er,** *s.* पराधिकारचर्चकः-निरूपकः.

Intermedial, Intermediate, *a.* अंतर्-मध्यवर्तिन्, मध्य, मध्यस्थित, व्यवहित, अंतरालस्थित, अंतर-अंतराल-in comp.; 'i. space' अंतरं, अभ्यंतरं, अंतरालं; 'i. time' कालांतरं. -**ly,** *adv.* मध्ये, अंतराले, अभ्यंतरे.

Interminable, *a.* *See* **Infinite.**

Intermingle, *v. t.* संमिश्र् 10, संकॄ 6 P, संसृज् 6 P. संपृच् 2 A, 7 P. संमिल् c.; संकुली-संकीर्णी-कृ 8 U, मिश्रीकृ. -*v. i.* संमिश्रीभू 1 P, संमिल् 6 P. -**ed,** *a.* सं-व्या-मिश्र, मिश्रित, संकीर्ण, संसृष्ट, संपृक्त.

Intermit, *v. i.* विरम् 1 P, निवृत् 1 A (with abl.); शम् 4 P, विच्छिद् pass. -*v. t.* निवृत् c., विरम् c. or शम् c. (रमयति-शमयति), विच्छिद् 7 P, त्यज् 1 P; *See* **Cease.** -**tent,** *a.* सविराम, सविच्छेद; 'i. fever' मुक्तानुबंधी ज्वरः. -**Intermission,** *s.* विरामः, विरति *f.*, निवृत्ति *f.*, विच्छेदः; उपशमः; 'without i.' निरंतरं, अनवरतं, अविरतं, अविच्छेदं. -**Intermissive,** *a.* *See* **Intermittent,** above.

Intermix, *v. t.* *See* **Intermingle.** -**ture,** *s.* संसर्गः, संमिश्रणं, संकरः, संपर्कः, संयोगः, संमिलनं.

Intermontane, *a.* पर्वतमध्यवर्तिन्.

Intermundane, *a.* जगन्मध्यवर्तिन्.

Intermural, *a.* प्राकारांतर्वर्तिन्.

Internal, *a.* अंतर् in comp.; अंतर्गत, अंतःस्थ, आभ्यंतर-आंतर (री *f.*). गर्भस्थ; 'i. soul' अंतरात्मा; 'i. anguish' अंतःशोकः, अंतर्दाहः; *See* **Inside.** -**ly,** *adv.* अंतर्, अंतरे, अभ्यंतरे.

International, *a.* (देशानां) परस्परव्यवहारसंबंधिन्.

Internecine, *a.* परस्परविनाशिन्, मिथःक्षयकर, प्राणापहारिन्.

Interpolate, *v. t.* सकपटं नि-विश् c. or निक्षिप् 6 P, मिथ्या कॢप् c. or अभिलिख् 6 P. -**ion,** *s.* कपटेन निवेशनं, मिथ्याकल्पनं; मिथ्याकल्पितं, निवेशितलेखः.

Interpose, *v. t.* मध्ये निक्षिप् 6 P, अंतर्-धा 3 U, व्यव-धा, मध्ये-अंतः-स्था c. (स्थापयति) or नि-प्र-विश् c. -*v. i.* मध्ये स्था 1 P or वृत् 1 A or गम् or पत् 1 P, अंतर्-इ 2 P, मध्ये प्रविश् 6 P; मध्यस्थतां ग्रह् 9 P, माध्यस्थ्यं अवलंब् 1 A. -**er,** *s.* मध्यस्थः, मध्यवर्तिन् *m.*, मध्यस्थायिन् *m.* -**ition,** *s.* मध्यस्थता, माध्यस्थ्यं; व्यवधानं, मध्यवर्तित्वं, अंतरायः.

Interpret, *v. t.* युज् 10 (words, &c.); व्याख्या 2 P, वि-वृ 5 U, व्याचक्ष् 2 A, अर्थं प्रकाश् c. or व्या-ख्या or वि-वृ or व्याकृ 8 U; *See* **Construe, Explain.** 2 भाषांतरेण वद् 1 P or कथ् 10 or व्याहृ 1 P -**ation,** *s.* (पदानां) योजना; व्याख्या, व्याख्यानं, विवरणं, निरूपणं, अर्थ-बोधनं-प्रकाशनं, विचारः; 'i. of dreams' स्वप्नार्थः, स्वप्न-विचारः-निरूपणं. 2 अर्थः, व्याख्या, टीका, भाष्यं. 3 भाषांतरं. -**er,** *s.* व्याख्यातृ *m.*, विवरणकृत *m.*, अर्थ-प्रकाशकः-बोधकः, 2 भाषाद्वयज्ञः भाष्य-वृत्ति-कारः, टीकाकृत् *m.*

Interregnum, *s.* अराजत्वं, अनायका-अराजका-राज्यस्थिति.

Interrogate, *v. t.* प्रच्छ् 6 P, अनुयुज् 7 A. परीक्ष् 1 A. -**ion,** *s.* पृच्छा, प्रश्नः, अनुयोगः -**ive,** *a.* प्रश्नरूप, प्रश्नार्थक प्रश्नात्मक. -**ively,** *adv.* प्रश्न-रूपेण-क्रमेण अनुयोगतः, प्रश्नार्थरूपेण. -**or,** *s.* प्रष्टृ *m.*, पृच्छकः, अनुयोक्तृ *m.* -**ory,** *s.* प्रश्नः, अनुयोगः. -*a.* *See* **Interrogative** above.

Interrupt, *v. t* प्रति-बंध् 9 P, प्रति-वि-हन् 2 P, उप-नि-रुध् 7 U, भंज् 7 P, विच्छिद् 7 P, खंड् 10, बाध् 1 A, भिद् 7 P, विघ्नयति (D.); (speech &c.) आक्षिप् 6 P 'do not i. him' मैनमंतरा प्रतिबध्नीतं (S. 6) -**ion,** *s.* अंतरायः, प्रतिबंधः, उपरोधः, विच्छेदः, भंगः, भेदः व्याघातः, विघ्नः; 'i. in sleep' निद्राभंगः -**edly,** *adv.* सविच्छेदं, सभंगं. -**er,** *s.* विच्छेद-भंग-कारिन् *m.*, विघ्न-व्याघात-कृत् *m.*

Intersect, *v. t.* परस्परं-अंतरा-छिद् 7 P. -**ion,** *s.* परस्परच्छेदः.

Intersperse, *v. t.* इतस्ततः प्र-क्षिप् 6 P or सं-समा-कॄ 6 P or संमिश्र् 10. -**ed,** *a.* संमिश्र, संकीर्ण. -**ion,** *s.* संमिश्रणं, वि-संकिरणं

Interstellar, *a.* तारागणमध्यवर्तिन्.

Interstice, *s.* छिद्रं, रंध्रं, संधिः, विच्छेदः; अंतरं, अंतरालः-लं, अवकाशः, विवरं; 'without i. s' निरंतर, नीरंध्र, निश्छिद्र, निबिड, घन, अविरल; 'having i. s' सच्छिद्र, सांतराल, विरल

Intertexture, *s.* संग्रथनं, परस्परव्यूति *f.*
Intertwine, Intertwist, *v. t.* ग्रंथ् 9 P, सं-उद्°, परस्परं कुंच् c. or व्यावृत् c., उत्कच् 10, परस्परं ग्रंथ् or संयुज् 7 U. 10, सम्मिश्र् 10; 'with hair i. ed with the tendrils of creepers' लताप्रतानोद्ग्रथितैः केशैः (R. II. 8). अनुव्यध् 4 P, सं-वे 1 U; शैवलेनानुविद्धं (सरसिजं) (S. 1) 'i. ed with moss.'

Interval, *s.* अंतरं, अंतरालं, अभ्यंतरं; अवकाशः, मध्यस्थानं, व्यवधानं, व्यवायः. 2 अवधिः, मध्य-अभ्यंतर-कालः, अवकाशः. 3 विरामः, विच्छेदः, निवृत्ति *f.*, उपशमः; 'in the i.' अंतराले, अंतरा; 'at i. s' काले काले, अंतरा अंतरा, (प्रजानुरागहेतोश्चांतरांतरा दर्शनं ददौ Ku. 68); रम्यांतरः कमलिनीहरितैः सरोभिः (S. 4) 'pleasant at i. s &c.'; 'without i. s' निरंतर, निरंतराल.

Intervene, *v. i.* मध्ये-अंतर् गम् 1 P or भू 1 P or स्था 1 P or वृत् 1 A, अंतर्या 2 P or उप-स्था. 2 अंतर्-इ 2 P, व्यव-धा pass. **-ing,** *a.* मध्यवर्तिन्, मध्यस्थायिन्, व्यवहित, अंतरित, अंतरागत, मध्ये स्थित; 'i. period' अंतरालं, अभ्यंतरकालः. **-Intervention,** *s.* मध्यस्थता, माध्यस्थ्यं, व्यवधानं, अंतर्गमनं, मध्यवर्तनं, मध्ये स्थिति *f.*

Interview, *s.* दर्शनं; सन्निपातः, संगमः, समागमः, अन्योन्य-परस्पर-दर्शनं; 'he had an i. with the king' स नृपदर्शनं लेभे, राजदर्शनं कारितः.

Interweave, *v. t.* *See* **Intertwine.**
Intestate, *a.* अकृतमृत्युलेख.
Intestine, *a.* अबाह्य; *See* **Internal.** 2 अविदेशज, देशीय; गृह in comp.; 'i. quarrels' गृह-च्छिद्रं-भेदः, अंतर्भेदः. **-s.** अंत्रं, पुरीतत् *n.*, नाडि-डी-लि-ली *f.*

Intimate, *a.* गाढ, रूढ, प्र-वि-रूढ, दृढ, दृढबद्ध, घन. 2 (Of persons) सुपरिचित, रूढसौहृद, बद्धसख्य, प्रणयिन्, प्रियतम, हृदयंगम, सुसंसर्गिन्, संस्तुत, दृढ-गाढ-सौहृद. 3 **Internal,** q. v.; 'strangers made i.' बाह्या अभ्यंतरीकृताः (P. I. 9). **-s.** दृढसुहृद् *m.*, दृढमित्रं, सुहृत्तमः, प्रियवयस्यः. **-v. t.** (भंग्या) सूच् 10. संदिश् 6 P, उपन्यस् 4 U, उपक्षिप् 6 P. साकूतं कथ् 10. **-ion,** *s.* सूचना, संदेशः, उपक्षेपः; इंगितं, आकूतं. **-ly,** *adv.* दृढं, गाढं; दृढ-सौहृदेन-संसर्गेण, सुपरिचितं, दृढमित्रवत्; दृढ, गाढ in comp. **-Intimacy,** *s.* गाढसौहृदं, सुपरिचयः, दृढसंसर्गः-संयोगः, संस्तवः, अतिमित्रता-प्रणयः-सख्यं, अत्यासंगः, अतिपरिचयः.

Intimidate, *v. t.* त्रस् c., भी c. (भीषयते-भापयते), सभयं निवृत् c. 2 भर्त्स् 10 A, तर्ज् 1 P, 10 A. 3 **Dishearten,** q. v. **-ion,** *s.* भीषिका, भीषा, भीषणं, भयदर्शनं, भर्त्सनं, तर्जनं.
Into, *prep.* मध्ये, अंतर्, अंतरे; gen. by loc., or by acc. with verbs of motion; 'converted i. water' जलसात्कृत; 'made i. one mass' एकपिंडीकृत-भूत.
Intolerable, *a.* असह्य, असहनीय, दुःसह, अक्षंतव्य, दुर्विषह.

Intolerant, *a.* अक्षमिन्, असहन, अमर्षण, असहिष्णु, अक्षम. 2 परमतासहिष्णु, परमतासूयक, अन्यमतासह. **-Intolerance,** *s.* अमर्षणं, अतितिक्षा, अक्षमा, असहिष्णुता.
Intone, *v. t.* गंभीरं वद् 1 P or वच् 2 P, गंभीरस्वनं उदीर् c. or उदाहृ 1 P. **-ation,** *s.* स्वरः, लयः, वर्णोच्चारणं; स्वरभेदः.
Intort, *v. t.* *See* Contort.
Intoxicate, *v. t.* मद् c., उत्-प्र-°, मदं उत्पद् c., मत्तीकृ 8 U; (fig.) उत्सिच् c., उद्धन् 2 P, आ-ध्मा 1 P, मुह् c. **-ed,** *a.* मत्त, प्र-उत्-मत्त, क्षीब, मदोन्मत्त, उन्मद, मदोदग्र, मदान्वित, शौंड, मदोद्धत; 'to be i.' मद् 4 P, मदेन स्पृश् pass., क्षीब् 1, 4 P. **-ing,** *a.* उन्मादक, मादक, उन्मादिन्. **-ion,** *s.* मदः, मादः, उन्मादः, क्षीबता, शौंडता, मत्तता.
Intractable, *a.* दुर्दम, दुर्दांत, अदम्य, अविधेय, अवश्य, अविनेय, दुर्निग्रह, दुराधर्ष, दुःशास्य, अनिवार्य, प्रतीप, उच्छृंखल.
Intramural, *a.* प्राकारांतर्वर्तिन्, भित्त्यंतर्वर्तिन्.
Intransient, *a.* अभंगुर, चिरस्थायिन्.
Intransitive, *a.* अकर्मक.

Intrench, *v. t.* परिखया रक्ष् 1 P or परिवेष्ट् c. or परि वृ 5 U, परिखां खन् 1 P. 2 आक्रम् 1 U, 4 P **-ment,** *s.* परिखा, परिक्रिया.
Intrepid, *a.* निर्भय, निःशंक, शूर, साहसशील, प्रगल्भ. **-ity,** *s.* वीर्यं, प्रतिभा, प्रतिभानं, शौर्यं, निर्भयत्वं, पौरुषं, विक्रमः **-ly,** *adv.* वीरवत्, सविक्रमं, सप्रतिभं; *See* **Bold,-ly,** &c.

Intricate, *a.* विषम, दुर्गाह्य, संकुल, गहन, दुर्बोध, गूढ, अस्पष्टार्थ. 2 वक्र, असरल, जिह्म, कुटिल. **-ly,** *adv.* विषमं, असरलं, कुटिलं. **-ness, -Intricacy,** *s.* वैषम्यं, गहनता, गूढता. 2 वक्रता, कौटिल्यं, असारल्यं.
Intrigue, *s.* उपजापः कूटप्रबंधः, कपटप्रबंधः, कूटयुक्ति *f.*, कु[illegible] कपट-संकल्पः or प्रयोगः; 'love i.' व्यभिचारकर्मन् *n.*, कामचारितं. **-v. i.** उपजप् 1 P, उपजापं रच् 10, कूटप्रबंधं प्रयुज् A, 10, कूटप्रयोगं रच् **-er,** *s.* उपजापकः, कपट-प्रबंधयोजकः
Intrinsic,-al, *a.* अंतरस्थ, अंतर्गत, सहजवर्तिन्, स्वभावज, आंतर-अभ्यंतर (-री *f.*). 2 सत्य, यथार्थ, वास्तविक (-की *f.*), अकृत्रिम, स्वाभाविक-सांसिद्धिक (-की *f.*). **-ally,** *adv.* वस्तुतः, तत्त्वतः, यथार्थतः, स्वभावतः.

Introduce, *v. t.* प्रविश् c., दर्शनं कृ c. 2 (Insert) प्र-नि-आ-विश् c. 3 परिचयं उत्पद् c. or जन् c. (जनयति); 'i. me to your friend ' तव मित्रेण मम परिचयमुत्पादय. 4 प्रवृत् c., प्रचर्-ल् c., प्रति-ष्ठा c. (-ष्ठापयति), प्रारभ् 1 A, प्रस्तु 2 U, उपक्रम् 1 A. 5 आनी 1 P, आवह् 1 P, आगम् c. (गमयति). **-er,** *s.* प्रवेशकः. 2 प्रवर्तकः, प्रतिष्ठापकः, प्रारंभकः. **-Introduction,** *s.* प्रवेशनं; परिचयकरणं. 2 प्रवर्तनं, प्रचारणं, प्रतिष्ठापनं, निवेशनं; आनयनं. 3 मुखबंधः, आमुखं, प्रस्तावना (of plays); प्रस्तावः, आरंभः, उपन्यासः, वाङ्मुखं, उपोद्घातः, उदाहारः, उपक्रमः, वचनारंभः. **-Introductory, -Introductive,** *a.* प्रावेशिक (की *f.*), आरंभक, प्राथमिक (की *f.*), प्रथम; उपोद्घात or प्रस्तावना in comp.; 'as an i. portion ' उपोद्घातरूपेण, प्रस्तावनाद्वारा. 2 प्रस्तावना रूप; पारिभाषिक (की *f.*).

Intromit, *v. t.* प्रविश् c.

Introspection, *s.* अंतर्दर्शनं, अंतरालोकनं.

Introvert, *v. t.* अंतः परिवृत् c.

Intrude, *v. i.* अनाहूत-*a* प्र-आ-विश् 6 P or आगम् 1 P, सधर्ष प्रविश् or आक्रम् 1 U, 4 P, अनधिकारपूर्वं प्रविश्. **-er,** *s.* आगंतुकः, अनाहूत प्रवेशकः. **-Intrusion,** *s.* आगंतुकभावः, अनाहूत प्रवेशः-शनं. **-Intrusive,** *a.* धृष्ट, आगंतुक, प्रगल्भ, सधर्ष; परचर्चाशील.

Intrust, *See* **Entrust.**

Intuition, *s.* सहजावबोधः, सहजज्ञानं, अंतर्ज्ञानं. **-Intuitive,** *s* सहजोपलब्ध, अंतर्ज्ञानोपलभ्य, अविचारपूर्व उपलब्ध. 2 सहजज्ञ, अंतर्ज्ञानिन्. **-ly,** *adv.* सहजज्ञानेन; अंतर्ज्ञानेन, प्रमाणानिरपेक्षं.

Intumesce, *v. i.* श्वि 1 P; *See* **Swell. -ence,** *s.* शोथः, शोफः.

Inturbidate, *v. t.* कलुषीकृ 8 U, आविलयति (D.); *See* **Confuse.**

Intwine, Intwist, *v. t.* ग्रंथ् 9 P, गु(गुं)-फ् 6 P, रच् 10; *See* **Intertwine.**

Inumbrate, *v. t.* छायया आ-प्र-च्छद् 10.

Inunction, *s.* अभ्यंजनं, विलेपनं.

Inundate, *v. t.* जलेन आप्लु c. or व्याप् 5 P. **-ed,** *a.* आप्लावित, आ-सं-प्लुत, जलाप्लावित, जलव्याप्त, जलमग्न (ग्नी *f.*). **-ion,** *s.* आप्लावः, जलौघः, तोय or जल-विप्लवः-प्लवः-उप-प्लवः, जलवृद्धि *f.*; *See* **Deluge.**

Inurbanity, *s.* अशिष्टता, असभ्यता.

Inure, *v. t.* अभ्यस् 4 U or c., शिक्ष् c., परिचयं कृ 8 U, परिचित-*a.* भू. 2 कठिनी-दृढी-कृ. **-ed,** *a.* अभ्यस्त, ज्ञात, परिचित; अभिज्ञ in comp.. 'i. to fatigue ' जितश्रम, 'i. to seclusion ' परिचितविविक्त.

Inurn, *v. t.* समाधौ नि-धा 3 U or निक्षिप् 6 P.

Inutility, *s.* अनुपयोगः, वैफल्यं, व्यर्थता, मोघता, वैयर्थ्यं.

Invade, *v. t.* अभि-द्रु 1 P, आक्रम् 1 U, 4 P, अवस्कंद् 1 P, अभिप्र-या 2 P, आपत् 1 P, उप-प्लु 1 A. or c.; *See* **Attack. -er,** *s.* आक्रामकः, उपप्लविन् *m.*; gen. ex. by **Enemy,** q. v. **-Invasion,** *s.* आक्रमः-मणं, अवस्कंदः, अभिद्रवः, उपप्लवः, अभिप्रयाणं, अभियोगः, आपातः.

Invalid, *a* दुर्बल, अशक्त, अप्रभाव, निस्तेजस्, व्यर्थ, विफल 2 अप्रमाण; निष्प्रमाण, लघुप्रमाण. **-s.** रोगिन् *m.*, रुग्णः, आतुरः. **-ate,** *v. t.* मोघी-व्यर्थी-कृ 8 U, विफलीकृ, लुप् 6 P or c., अधरीकृ. **-ity,** *s.* निर्बलता, अनिष्पत्ति *f.*, व्यर्थता, मोघता. 2 अप्रामाण्यं.

Invaluable, *a.* अनर्घ, अनर्घ्य, अमूल्य, मूल्यातीत, अतिमूल्य, अत्युत्कृष्ट.

Invariable, *a.* नित्य, सतत, अविकार्य, निर्विकार, स्थिर, नियत, अचल, एकांत; नायमेकांतो नियमः (S. B. 273) 'not an i. rule.' **-y,** *adv.* एकांततः, नित्यं, नियतं.

Invective, *s.* आ-अधि-क्षेपः, निर्भर्त्सना, निंदा, निंदावाक्यं, दुरुक्ति *f.*, अप-परि-वादः, गर्हा. **-a.** निंदक, अपवादक, निंदात्मक.

Inveigh, (against) *v. i.* आ-अव-अधि-क्षिप् 6 P, निंद् 1 P, गर्ह् 1, 10 A, अभिशंस् 1 P; *See* **Abuse, Censure.**

Inveigle, *v. t.* प्र-वि-लुभ् c., मुह् c., चाटूक्त्या आकृष् 1 P or प्रलुभ् c. or निपत् c., वंच् 10. **-er,** *s.* प्र-वि-लोभकः, मोहकः, आकर्षकः. **-ing, -ment,** *s.* प्र-वि-लोभनं; आकर्षणं, मोहः, वंचना, प्रतारणा.

Invent, *v. t.* कॢप् c., निर्मा 3 A, 2 P, सृज् 6 P, वि-धा 3 U, घट् c. (घटयति), रच् 10. 2 मनसा युज् 10 or चिंत् 10 or कॢप् c. 3 मिथ्या कॢप् c. **-ed,** *a.* कॢप्त, निर्मित, रचित, घटित. 2 मनःसृष्ट, मनःकल्पित, मिथ्याकल्पित, काल्पनिक (की *f.*), कृतक, कृत्रिम. **-ion,** *s.* कल्पना-नं, रचना-नं, निर्माणं, घटनं. 2 कॢप्ति *f.*, सृष्टि *f.*, कल्पितं, कल्पना, निर्मितकला. 3 कल्पना, युक्ति *f.*, उपायज्ञानं 4 मिथ्याकल्पनं, कूटरचना, मनःसृष्टिः; 'one's own i.' स्वकपोलकल्पितं. **-ive,** *a* कल्पक, योजक, उपायज्ञ, कल्पनाचतुर, निर्माणकुशल, चतुर, युक्तिमत्. **-or,** *s.* कल्पकः, स्रष्टृ *m.*, निर्मातृ *m.*, चिंतकः, योजकः.

Inventory, *s.* (गृहोपस्करादेः) परिसंख्या, परिगणना, संख्यापत्रं.

Inverse, *a* व्यत्यस्त, विपर्यस्त, व्यस्त, पर्यस्त, विपरीत, वि-प्रति-लोम, प्रतीप, व्युत्क्रांत. **-ly,** *adv* विपर्ययेण, वि-प्रति-लोमतः, व्यत्यासेन, व्युत्क्रमेण **-Inversion,** *s.* विपर्यासः, विपर्य

(र्या)यः, व्युत्क्रमः, व्यत्यासः, पर्यासः, प्रातिलोम्यं, व्यत्ययः; व्यस्तता, विपरीतता.

Invert, *v. t.* विपर्यस् 4 U or c., परि-वि-व्यति-अस्, परिवृत् c., विपर्यासं-विपर्ययं-नी 1 P; *See* **Alter, Change. 2** अधोमुखीकृ 8 U; विलोमीकृ. **-ed,** *See* **Inverse.**

Invertebrate, *a.* पृष्ठवंशहीन. **2** (fig.) संशयात्मन्, अधीर, चंचलमति.

Invest, *v. t.* परि-धा c. (धापयति), आच्छद् 10, प्रावृ 5 U, संवेष्ट् c., वस् c., संव्ये 1 P. **2** अलंकृ 8 U, मंडू 10, भूष् 10. **3** संयुज् 7 U, 10, संपन्न-युक्त-विशिष्ट-*a.* कृ; *See* **Endow. 4** उपरुध् 7 U, पर्यवष्टंभ् 9 P. **5** (Money) लाभार्थं विनियुज् 7 A, 10; 'i. with power' अधिकारे प्रविश् c. or नियुज्; प्रति-ष्ठा c. (-ष्ठापयति), संस्कृ, अभिषिच् 6 P. **-iture,** *s.* अभिषेकः, संस्कारः, प्रतिष्ठापनं, पदस्थापनं, अधिकारदानं; 'i. with the sacred thread' उपनयः-यनं. **-ment,** *s.* परिधानं, वस्त्रं. **2** उपरोधः, अवष्टंभः. **3** लाभार्थं धनविनियोगः.

Investigate, *v. t.* अव-परि-सं-ईक्ष् 1 A, निरूप् 10, अनुसं-धा 3 U, विचर् c., विमृश् 6 P, निर्णी 1 P, निश्चि 5 U, निर्धृ 10, आलोच् 10. **2** अन्विष् 4 P, मृग् 10 A.; *See* **Examine. -ion,** *s.* अवेक्षणं, निरूपणं, अनुसंधानं, विचारः-रणा-णं, विमर्शः, निर्णयः, निश्चयः; चर्चा, अन्वेषणं, अनुयोगः, जिज्ञासा; 'under i.' निरूप्यमाण. **-or,** *s.* अवेक्षकः, निरूपकः, विचारकः, अनुसंधातृ *m.*, निर्णेतृ *m.*

Inveterate, *a.* बद्ध-रूढ-मूल, सुदृढ, गाढ, प्ररूढ, दृढ, स्थिर, चिर-बहु-कालिक (की *f.*), चिरस्थायिन्; 'i. enemy' गाढ-बद्ध-वैरः शत्रुः; 'i. enmity' बद्धवैरं. **-Inveteracy,** *s.* बद्धवैरं, वैरानुबंधः; बद्धमूलता, विरूढता, स्थिरता, अभिनिविष्टता.

Invidious, *a.* द्वेषजनन (नी *f.*), मत्सरावह, ईर्ष्या-असूया-कर (री *f.*). **2** मत्सरिन्, समत्सर, ईर्ष्यालु. **-ly,** *adv.* समत्सरं, साभ्यसूयं, सेर्ष्यं.

Invigorate, *v. t.* बलं-तेजः-शक्तिं वृध् c. or दा 3 U or उप-चि 5 U, आप्यै c., पुष् 1, 9 P, or c.; दीप् c. **-ing,** *a.* बलवर्धन (नी *f.*), तेजस्कर (री *f.*), पुष्टिद, वीर्यप्रद, उत्साहदायिन्. **-ion,** *s.* बल-तेजो-वर्धनं, पुष्टिकरणं. **2** बल-तेजो-वृद्धि *f.*

Invincible, *a.* अजय्य, दुर्जय, दुरासद, अधृष्य, अदम्य.

Inviolable, *a.* अलंघ्य, अनतिक्रमणीय, अभेद्य, अप्रधृष्य. **2** अवाध्य, अनपकार्य, अवध्य (as a herald). **-ness,** *s.* अलंघ्यता, अवध्यभावः.

Inviolate, *a.* अभिन्न, अभग्न, अलंघित, अक्षत, अदूषित, अखंड, अभंग.

Invisible, *a.* अदृश्य, परोक्ष, दुर्दर्श, अंतर्हित, तिरोहित, अंतरित, दर्शनातीत, नयनविषयातीत, दृगगोचर, दृष्ट्यविषय, अलक्ष्य, अचाक्षुष (षी *f.*) ('evidence &c.); 'to be i.' अंतर्-तिरः-धा pass., तिरोभू 1 P, अंतर्-इ 2 P. **-ness,** *s.* परोक्षता, अप्रत्यक्षता, अदर्शनं, तिरोधानं, अंतर्धानं, अविषयः, परोक्षं. **-y,** *adv.* अप्रत्यक्षं, परोक्षं, असमक्षं अलक्ष्यं, असाक्षात्, अदृष्टरूपेण; निभृतं अलक्षितं.

Invite, *v. t.* आ-नि-अभि-मंत्र् 10 A, आ-समा-ह्वे 1 P, अभ्यर्थ् 10 A, आकृ c., आवह् c. **2** आकृष् 1 P, हृ 1 P, प्र-वि-लुभ् c. **-ation,** *s.* निमंत्रणं, आह्वानं, आवाहनं, अभ्यर्थना. **-ing,** *a.* चित्ताकर्षिन्, मोहिन्, मनोहर.

Invocate, *See* **Invoke.**

Invoice, *s.* आवाहपत्रं, बीजकं.

Invoke, *v. t.* आ-ह्वे 1 P, आ-अभि-मंत्र् 10 A, आ-वद् 1 P, संबुध् c., आवह् c., आकृ c., नाम ग्रह् 9 U or स्मृ 1 P; अर्थ् 10 A, अभिवंद् 1 A; 'i. blessings on' आशास् 2 A. **-Invocation,** *s.* आह्वानं, आमंत्रणं, आवाहनं, नामग्रहणं, प्रार्थनं-ना.

Involuntary, *a.* अकाम्य, अनिच्छापूर्व, अबुद्धि-अज्ञान-पूर्व, अनैच्छिक (की *f.*), अस्वेच्छाजात. **2** अकाम, अनिच्छु. **-ly,** *adv.* अकामतः, अकाम- अनिच्छा-अमति-पूर्वं, अनिच्छया, असंतोषेण, अबोध-अज्ञान-पूर्वं.

Involve, *v. t.* अवगुंठ् 10, आवृ 5 U, आ-वेष्ट् 1 A, or c., आच्छद् 10. **2** परिग्रह् 9 P, अंतर्गण् 10, समाविश् c., *See* **Include. 3** अभिभू 1 P, ग्रस् 1 A: 'i. ed in difficulty' विपद्ग्रस्त. **4** संबंध् 9 P, संश्लिष् c., संयुज् 7 U, 10, संसृज् 6 P, लिप् 6 P, संक्रम् c.; *See* **Implicate. -ed,** *a.* आवेष्टित, अवगुंठित, आवृत, आच्छन्न. **2** अंतर्गत, परिगृहीत, समाविष्ट, अंतर्भूत, गर्भ in comp. **3** अभिभूत, ग्रस्त. **4** संबद्ध, संश्लिष्ट, संसृष्ट, संसक्त, अनुषक्त, संयुक्त, लिप्त; 'i. in crimes' पापलिप्त, दोषग्रस्त. **5** ध्वनित, फलित; 'i. meaning' फलितं, फलितार्थः, ध्वनिः. **-Involution,** *s.* आवेष्टनं, आवरणं. **2** जटिलत्वं, व्यतिकरः, संकीर्णता, अन्योन्यसंश्लेषः, परस्परसंसक्ति *f.* **3** (In Math.) संवर्गीकरणं; 'i. to the third power' सवृशत्रयसंवर्गः.

Invulnerable, *a.* अभेद्य, अवेध्य, क्षताक्षम.

Inward, *a.* अंतर्वर्तिन्, अंतःस्थित, अंतरस्थ, अंतर्भव; oft. by अंतर् in comp. **-adv.,** **-ly,** *adv.* अंतः, अभ्यंतरं; 'i. corrupted' अंतर्दुष्ट. **2** मनसा, चित्तेन, हृदये; सुनिभृतं. **-Inwards,** *s.* अंत्राणि (pl.).

Inweave, *v. t.* *See* **Intertwine.**

Inwrap, *v. t.* आवेष्ट् 1 A or c.; *See* **Involve** (1).

Inwrought, *a.* खचित, प्रणिहित, प्रतिबद्ध, छुरित.

Iota, *s.* अणुः, लवः, कणः, कणिका, बिंदुमात्रं.

Irascible, *a.* चंडकोप, क्रोधशील, सुलभकोप, शीघ्रकोपिन्, क्रोधिल, संरंभिन्, चंडस्वभाव. **-ness,** *s.* क्रोधशीलता, सुलभकोपः, चंडता, पित्तस्वभावः-प्रकृति *f.*

Irate, *a.* क्रुद्ध, कुपित, रुष्ट.

Ire, *s.* रोषः, क्रोधः, कोपः. **-ful,** *a.* क्रुद्ध, रुष्ट; *See* **Angry.**

Iris, *s.* इंद्रधनुस् *n.* 2 तारामंडलं. 3 गोलोमी, श्वेतदूर्वा.

Irk, *v. t.* पीड् 10, आयस् c., खिद् c.; *See* **Afflict. -some,** *a.* दुःख-खेद-कर (री *f.*), दुःखद, क्लेशावह, क्लेशद, आयासहेतुक, कष्ट; 'how i. are the toils of state' राज्यं हि नाम (राज्यशासनश्रमाः) महदप्रीतिस्थानं (Mu. 3).

Iron, *s.* लोहः-हं, अयस् *n.* आयसं, कालायसं, कृष्णायसं, पिंडं, तीक्ष्णं, शस्त्रकं, अश्मसारः, लोहं; 'green sulphate of i.' धातुशेखरं, कासीस(शी)शं; 'rust of i.' मंडूरं, सिंहाणं, अयोमलं, 'tipped with i.' आयोग्र, लोहाग्र; 'sulphuret of i.' ताप्यं; 'wrought i.' कुशी. 2 बंधनं, शृंखला-लः-लं, लोहबंधनं. **-***v. t.* शृंखलया बंध् 9 P, or संयम् 1 P. **-***a.* लौह (ही *f.*), लोहमय-अयोमय (यी *f.*,) लोहनिर्मित, आयस (सी *f.*), लोहात्मक, लोह or अयस् in comp.; 'of an i. constitution' वज्रदेह, सिंहसंहनन; 'i.-bar' फालः, लोहपिंडः; 'i.-filings' लोहचूर्ण, लोहजं; 'i.-fisted' लोह-वज्र-मुष्टि; 'i.-foundery' संधानी, कुप्यशाला; 'i.-hearted' अयो-वज्र-हृदय, कठिन-पाषाण-हृदय; 'i.-mold' लोहांकः, लोहचिह्नं; 'i.-monger' लोहकारः, अयस्कारः, व्योकारः, लोहकारकः. **-y,** *a. See* (*a.*) above.

rony, *s.* सोल्लुंठः-ठनं, सोत्प्रासः, व्याजस्तुति *f.*, निंदा, व्याजोक्ति *f.*, विपरीतलक्षणा, उपरोधः; 'it was a strange i. of fate in the case of Râma' रामस्यापि दैवदुर्नियोगः कोपि यत् &c. (U. 4). **-ical,** *a.* (*s.*) in comp.; 'i. speech' सोल्लुंठवचनं, सोल्लुंठनोक्तिः; 'i. speaker' सोल्लुंठनवादिन् *m.* **-ically,** *adv.* सोत्प्रासं, सोल्लुंठनेन, व्याजोक्त्या.

radiate, *v. t.* प्रकाश् c. द्युत् c., दीप् c., राज् c. **-ion,** *s.* प्रकाशनं, द्योतनं, प्रदीपनं. 2 (Irradiance) उद्द्योतः, दीप्ति *f.*, प्रभा, कांति-द्युति *f.*, तेजस् *n.*

Irrational, *a.* विवेक-रहित-वर्जित-हीन, अचेतन, अविवेक, ज्ञान-बुद्धि-हीन, निर्बोध, अ[illegible], चित्शक्तिरहित; पशुधर्मन्. 2 न्याययुक्ति विरुद्ध, अन्याय्य, अयुक्तिसिद्ध, अतार्किक (की *f.*). **-ity,** *s.* बुद्धिहीनता, अन्याय्यता. **-ly,** *adv.* न्यायविरोधेन, अयुक्तिवादेन.

Irreconcilable, *a.* असंधेय, अशाम्य. 2 असंगत, विगीत, परस्परविरुद्ध, परस्परपराहत; *See* **Inconsistent. -ness,** *s.* असंगति *f.*, परस्परविरोधः.

Irrecoverable, *a.* अपुनःप्राप्य, पुनरलभ्य, असमाहार्य. **-y,** *adv.* अनुद्धार्यतया; 'it is i. gone' असंनिवृत्त्यै तदतीतमेव (S. 6).

Irredeemable, *a.* अनिष्क्रेय, अत्यंतनष्ट.

Irreducible, *a.* न्यूनीकरणाक्षम.

Irrefragable, *a.* अखंड्य, अबाध्य, अप्रत्याख्येय, दृढ-स्थिर-प्रमाण.

Irrefutable, *a.* अप्रत्याख्येय, अखंडनीय.

Irregular, *a.* अनियत, विधि-नियम-विरुद्ध, अयथाविधि, अविधि, उत्सूत्र, विधिघ्न (घ्नी *f.*); (as words) अपवादक, निपातित; 'these are put down as i. forms' एते निपात्यंते (S. K). 2 क्रम-हीन-रहित-शून्य-विरुद्ध, अव्यवस्थित, अपर्याय, उच्छृंखल. 3 (In conduct) उत्क्रांतमर्याद, व्यभिचारिन्, विपथ-उत्पथ-गामिन्, दुराचार, कुचरित, अमर्याद. 4 विषम, असम; 'i. in shape' विरूप, कदाकार. **-ity,** *s.* अविधिः, विधि or नियम-विरोधः-भंगः, अनियमः, उत्सूत्रता, निपातः-तनं. 2 अक्रमः, उत्क्रमः, व्यतिक्रमः, अपर्यायः, अपरिपाटि-टी *f.*, अव्यवस्था. 3 व्यभिचारः, विपथगमनं, अमर्यादता, अनाचारः, दुर्वृत्तता. 4 वैषम्यं. **-ly,** *adv.* विधि-नियम-विरुद्धं, अविध्यनुरूपं, अयथाविधि, क्रमविरुद्धं; अनियमेन, अनियतवेलं, अविधितः; अक्रमेण.

Irrelative, *a.* असंबंधिन्, असंग, निःसंग.

Irrelevent, *a.* अप्रस्तुत, अप्रकृत, असंबद्ध, अप्रासंगिक (की *f.*), अनन्वित, प्रस्तुतबाह्य, असंगत. **-ly,** *adv.* अप्रकृतं, अप्रस्तुतं, असंबद्धं. **-Irrelevancy,** *s.* अप्रकृतता, अनन्वयः, असंबंधः, असंगति *f.*, अप्रस्तावः.

Irreligion, *s.* अधर्मः, अपूतता, अभक्ति *f.*, धर्मलोपः, देवनिंदा, पापता. **-Irreligious,** *a.* अधार्मिक (की *f.*), अधर्मनिष्ठ, विधर्म, धर्मभक्ति-हीन; अपुण्य, दुष्ट, पापिन्. **-ly,** *adv.* अधर्मेण, दुष्टवत्.

Irremediable, *a.* अप्रतिविधेय, अप्रतिकार्य, निरुपाय, अशक्यप्रतिकार, उपायातीत, अचिकित्स्य, दुःसाध्य.

Irremovable, *a.* अपरिहार्य, अनपनेय; स्थिर, अचल.

Irreparable, *a.* असमाधेय, असाध्य; अप्रतिकार्य, अशक्यप्रतिकार. **-y,** *adv.* अप्रतिविधेयं; 'the act i. damaged his reputation' तेन कर्मणा तस्य यशस्तथा क्षीणं यथा तत्प्रतिसंधातुमशक्यं.

Irreprehensible, *a.* अनिंद्य, अदूषणीय, निर्दोष.

Irrepressible, *a.* अनिवार्य, दुर्निवार, दुर्निग्रह.

Irreproachable, *a.* अनिंद्य, अगर्ह्य, अनवगीत; *See* **Faultless.**

Irresistible, *a.* अनिवार्य, दुर्निवार, अप्रतिकार्य, अनवग्रह, दुर्निग्रह, दुर्धर, अप्रतिहत. **-y,** *adv.* दुर्निवारं, अनवग्रहं.

Irresolute, *a.* अस्थिर-चल-लोल-मति-चित्त-बुद्धि, चलवृत्ति, चंचलधी, विकल्पशील, संशयात्मन्, अधीर, तरलमनस्. **-ly,** *adv.* अस्थिरचेतसा, चंचलवृत्त्या, लोलबुद्ध्या, अधीरं. **-ness, -Irresolution,** *s.* अस्थैर्यं, विकल्पशीलता, लोलमतित्वं, चलचित्तता, चंचलबुद्धि *f.*, लोलमति *f.*, अनवस्थिति *f.*, चापल्यं.

Irrespective, (of) *a.* अनपेक्ष्य, अगणयित्वा, अव्यपेक्ष्य, विहाय (with acc.); अनपेक्ष, निरपेक्ष, निर्व्यपेक्ष in comp.; *See* **Independent,** (of). **-ly,** *adv.* अनपेक्षं निरपेक्षं.

Irresponsible, *a.* अननुयोगाधीन, अप्रष्टव्य, अपृच्छाधीन.

Irrestrainable, *a.* *See* **Irresistible.**

Irretrievable, *a.* *See* **Irreparable, Irrecoverable.**

Irreverent, *a.* अनादरिन्, परिभाविन्, उपेक्षक, अवज्ञाकारिन्. **-ly,** *adv.* सावज्ञं, सावमानं, अनादरेण. **-Irreverence,** *s.* अवमानः, अवज्ञा, अनादरः, तिरस्कारः, परिभवः.

Irreversible, *a.* अपरिवर्तनीय, अलोप्य, अस्वतंत्र.

Irrevocable, *a.* अनन्यथाकरणिय.

Irrigate, *v. t.* अव-सिच् 6 P, जलेन आप्लु c. or अभ्युक्ष् 1 P, अभिवृष् 1 P. **-ion,** *s.* सेकः, जलप्लावनं, अभ्युक्षणं.

Irriguous, *s.* जलाढ्य, सजल, जलपूर्ण, अनूप, बहूदक, जलसिक्त.

Irritate, *v. t.* कुप् c., क्रुध् c., रुष् c.; *See* **Enrage. -ion,** *s.* प्रकोपः, क्रोधः, रोषः, कोप or रोष-कारणं or हेतुः. **2** उत्तापः, उत्तेजनं, संतापः, दाहः; 'i. of the throat' कासः, क्षवथुः. **-ing, -ive,** *a.* संतापक; कोपावह. **-Irritable,** *a.* क्रोधन, कोपन, कोपशील, सुलभकोप, शीघ्रकोपिन्, चंडप्रकृति-स्वभाव. **-Irritability,** *s.* चंडस्वभावः-प्रकृति *f.*, शीघ्रकोपित्वं.

Irruption, *s.* *See* **Inroad.**

Ischury, *s.* मूत्रावष्टंभः, मूत्रकृच्छ्रं.

Island, Isle, *s.* द्वीपः-पं, अंतरीपं. **-a.** द्वीप्य, द्वीपस्थ, द्वैप (पी *f.*). **-Islander,** *s.* द्वीपवासिन् *m.*, द्वीपस्थः.

Isochronal, *a.* समकालीन.

Isolate, *v. t.* वि-युज् 7 A, 10, विच्छिद् 7 P, विश्लिष् c. *See* **Separate. -ed,** *a* वियुक्त, अन्याविश्लिष्ट, अनन्यसंसक्त, गतसंग. **-ion,** *s.* विच्छेदः, विश्लेषः, असंगः, पृथक्कृत्वं.

Isosceles, *a.* समद्विभुज.

Issue, *v. i.* निर्गम् 1 P, अप-सृ 2 P, निर्-या 2 P, निःसृ 1 P, निष्क्रम् 1 U, 4 P. **2** स्रु 1 P, निः-प्र-°; क्षर् 1 P, गल् 1 P, स्यंद् 1 A. **3** उत्-प्र-भू 1 P, प्र-जन् 4 A, उत्पद् 4 A, प्रवृत् 1 A; *See* **Arise. 4** निष्पद्, निर्वृत्, समाप् pass. **-*v. t.*** निःसृ c., प्रचर्-ल् c., निर्गम् c. (गमयति), बहिर्गम् c. **2** प्रकाश् c., प्र-ख्या c. (ख्यापयति), घुष् 10. **-*s.*** निर्गमः, निःसरणं, निर्याणं, निष्क्रमणं. **2** फलं, परिणामः, उदर्कः; अंतः, उत्तरफलं, उत्पन्नं; *See* **End. 3** संतति *f.*, प्रजा, अपत्यं, संतानः-नं. **4** रक्तातिसारः, स्रावः; 'matter at i.' विवादवस्तु *n.*, विचार्यविषयः. **-less,** *a.* निरपत्य, निर्वंश, निःसंतान, अप्रजस्, निरन्वय.

Isthmus, *s.* संयोगभूमि *f.*

It, *pron.* Ex. by *m. f.* or *n.* form of pronouns, corresponding to the noun; sometimes not ex. at all; 'what is i. that you want' किमपेक्ष्यते त्वया; 'i. is good to study' अध्ययनं प्रशस्यं.

Itch, *s.* कंडु-डू *f.*, खर्जूः, कंडूया; (dry) कच्छु-च्छू *f.*, पामा, पामन् *f.*, विचर्चिका. **2** कंडूयनं. **3** अत्यभिलाषः, अतिस्पृहा, तृष्णातिरेकः. **-*v. i.*** कंडूयति-ते (D.). **2** अत्यंतं इष् 6 P or अभिलष् 1, 4 P, गृध् 4 P. **-y,** *a.* कंडूल, पामन, कच्छुर.

Item, *s.* विषयः, अर्थः, पदं, अधिकरणं, भिन्नभागः.

Iterate, *v. t.* पुनः पुनः वद् 1 P or वच् 2 P. **2** पुनः पुनः कृ 8 U. **-ion,** *s.* पुनरुक्ति *f.*, पौनरुक्त्यं, पुनर्वचनं, पुनःकरणं. **-ive,** *a.* पुनर्वादिन्, पुनःकारिन्.

Itinerant, *a.* भ्रमणशील, अटमान, परिभ्रमिन्, भ्रमणकारिन्, अवनिचर.

Itinerary, *s.* प्रवासवृत्तांतलेखः.

Itinerate, *v. i.* *See* **Travel.**

Ivory, *s.* गज-हस्ति-दंतः, दंतः (the sense being clear). **-*a.*** (*s.*) in comp.; 'i. doll' दंतपांचालिका.

Ivy, *s.* तरुरोहिणी, वृक्षलता.

J

Jab, *v. t.* अप-, व्यध् 4 P.

Jabber, *v. i.* प्रजल्प् 1 P, प्रलप् 1 P,. अव्यक्तं-अस्पष्टं-वद् 1 P, त्वरितं वच् 2 P, **-er,** *s.* वाचालः-टः, वावदूकः, जल्प(ल्पा)-कः. **-ing,** *s.* जल्पः, प्रलापः, प्रजल्पः, अस्पष्टं वचनं.

Jack, *s.* पनसः. 2 वृक्षः, उपस्तंभः, आधारः; 'j.-fruit' पनसं.

Jackal, *s.* शृ(सृ)गालः, गोमायुः, जंबू(बु)कः, क्रोष्टु *m.*, फेरवः, भूरिमायः, शिवा, मृगधूर्तकः, वंचु(च)कः, फेरुः.

Jackanapes, *s.* वानरवृत्ति *f.*, मर्कटशीलं.

Jackass, *s.* गर्दभः, रासभः, खरः.

Jackdaw, *s.* काकः, द्रोणकाकः, द्रोणः.

Jacket, *s.* कूर्पासकः, कंचुकः, निचोलः

Jack-ketch, *s.* घातकपुरुषः, उद्बंधकः.

Jack-pudding, *s.* भंडः, विदूषकः, वैहासिकः.

Jaculate, *v. t.* निर्-,अस् 4 P.

Jade, *s.* कदश्वः, अश्वकः. 2 पुंश्चली, बंधकी, कुलटा, भ्रष्टा, असती, असाध्वी. **-v. t.** खिद् c., क्लम् c., श्रम् c., आयस् c., अवसद् c. **-v. i.** श्रम् 4 P, क्लम् 1, 4 P, आयस् 1, 4 P, अवसद् 1 P, खिद् pass. ग्लै 1 P. **-ed,** *a.* क्लांत, श्रांत, खिन्न, श्रमार्त, ग्लान. **-Jadish,** *a.* दुष्ट, पापीयस्, कुत्सित, कु-कद्-दुर्-pr.

Jag, *s.* भंगः, दंतः, छेदः. **-v. t.** भंगुरी-दंतुरी-कृ 8 U, क्रकचरूपेण छिद् 7 P. **-ged,-gy,** *a.* दंतुर, अनुक्रकच, भंगुर, क्रकचाकार.

Jaggery, *s.* गुडः, मत्स्यंडी, फणितं.

Jail, *s.* कारा, कारागृहं, कारागारं, कारावेश्मन् *n.*, बंधनागारं, बंधनालयः, बंधन-निरोध-स्थानं, बंदिशाला, गुप्ति *f.* **-er,** *s.* काराध्यक्षः, बंदिपालः, काराधिपतिः, कारागृहावेक्षकः.

Jam, *s.* मिष्टान्नं, स्वाद्वन्नं, संधितं. **-v. t.** सं-पीड् 10, संबाध् 1 A, संमृद् 9 P, क्लिश् 9 P. **-med,** *a.* संपीडित, संबाध, संकुल, संकट.

Jangle, *v. i.* वि-वद् 1 A, विप्र-लप् 1 P, वि-प्रति-पद् 4 A, कलहं कृ 8 U. **-v. t.** Rattle, q. v. **-s., -ing,** *s.* विवादः, विप्रलापः, वा-क्कलहः, वाग्युद्धं.

Janitor, *s.* द्वाःस्थः, द्वारपालः, प्रति(ती)हारः.

Janty, *a.* चपल, लघु-चल-स्वभाव, सरस.

January, *s.* पौषमाघं.

Jape, *v. t.* परि-उप-अव-हस् 1 P.

Jar, *s.* घटः-टी, कुंभः, कलशः-शी-शं; (earthen) मृद्भांडं, मृण्मयं पात्रं; कुटः, निपः; 'a large j.' माणिकः, अलिं(लं)जरः. 2 कर्कशध्वनिः-शब्दः, संघर्षणध्वनिः, कटु-परुष-स्वनः. 3 कलहः, विसंवादः. 4 संघट्टः, समाघातः, परस्पराघातः. **-v. i.** संघट्ट् 1 A, समाहन् 2 P. 2 कर्कशं ध्वन्-स्वन् 1 P. 3 विवद् 1 A, कलहायते (D.) विप्र-लप् 1 P. **-ring,** *a.* कर्णकर्कश, परुष, कटु, कर्कश-शब्दकारिन्. 2 परस्परविरुद्ध; *See* **Inconsistent.**

Jargon, *s.* प्रलपितं, अनर्थकं वचनं, अनर्थक-वागुपचयः; संकीर्णवाच् *f.*

Jasmine, *s.* भूपदी, श(शी)तभीरुः, मल्लिका, आस्फोटा (wild); मागधी, गणिका, यूथि-का, अंबष्ठा; अतिमुक्तः, पुंड्रकः; वासंती, माधवी, सुमनाः, मालती, जाति-ती *f.*, सप्तला, नवमल्लिका-मालिका; माध्यं, कुंदः-दं (different species).

Jasper, *s.* सूर्यकांतः.

Jaundice, *s.* कामला-लः, पांडुः, पांडुरोगः. **-ed,** *a.* कामलोपहत, पांडुग्रस्त. 2 सास्वीकृत, सत्यात् परिवर्तित.

Jaunt, *v. i.* विहारार्थं परिभ्रम् 1, 4 P or पर्यट् 1 P. **-s.** विहारः, पर्यटनं.

Javelin, *s.* शूलः-लं, शल्यं, शंकुः, प्रासः, शक्ति *f.*, अस्त्रं, कुंतः.

Jaw, *s.* हनु *m. f.* 2 वक्त्रं, मुखं; 'lower j.' पीचं, कुंजः, चिबुकं, चिबुः, 'locked j.' हनुग्रहः; 'j.-tooth' दंष्ट्रा; 'fallen in the j.s of death' मृत्योर्मुखे पतितः, मृत्युदंष्ट्रां-तर्गतः. 3 भर्त्सना, वाक्पारुष्यं, तर्जनं, आक्रो-शः. **-v. i.** तर्ज् 1 P, 10 A, भर्त्स् 10 A, आक्रुश् 1 P. **-ed,** *a.* हनुमत्, हनुविशिष्ट.

Jay, *s.* चाषः-सः, किकीदिविः, किकिदिवः-विः, किकीदिवीः-वः, किकिः, दिवः.

Jealous, *s.* मत्सरिन्, समत्सर, सासूय, साभ्य-सूय, सेर्ष्य, परोत्कर्षासहन, परसुखद्वेषिन्; *See* **Envious.** 2 प्रेमसंशयिन्, शंकाशील, प्रीत्याशंकिन्; 'a j. husband' परपुरुष-व्य-भिचार-जार-शंकित; 'a j. wife' परस्त्रीशं-किनी. 3 कृतादर, आदृत, साभिमान, सावधा-न, अनुपेक्षक. **-ly,** *adv.* समत्सरं, सेर्ष्यं, सासूयं, साभ्यसूयं; साभिमानं. **-ness, -y,** *s.* मत्सरः, मात्सर्यं, असूया, ईर्ष्या, अभ्यसूया, सापत्न्यं, परोत्कर्षद्वेषः. 2 शंकाशीलता, व्य-भिचारशंका, प्रेम-प्रीति-शंका. 3 सावधानता, अभिमानावेक्षा.

Jeer, *v. i.* उप-अव-हस् 1 P, अव-आ-क्षिप् 6 P, अव-ज्ञा 9 U, तिरस्कृ 8 U, गर्ह् 1, 10 A, अवहासास्पदीकृ. **-s.** उप-अव-हासः, अवक्षेपः; अवज्ञा. **-ingly,** *adv.* सोपहासं, सावक्षेपं; सावज्ञं.

Jejune, *a.* शुष्क, रूक्ष, नीरस, विरस, निःसार, निःसत्व.

Jelly, *s.* श्यान-सांद्र-द्रव्यं.

Jeopardy, *s.* संशयः, संदेहः, शंका; 'j. of life' जीवितसंशयः, प्राणसंदेहः. **-Jeopard,** *v. t.* **-ize,** *v. t.* संशये पत् c., संशयस्थ-संशयित-*a.* कृ 8 U; 'one who j.-es his life' संशयितजीवितः ; *See* **Danger** also.

Jerk, *v. t.* (सहसा) चल् c., वि-धू 6 P, 5, 9 U; लघु-सहसा तड् 10 or प्रहृ 1 P, अकस्मात्-सवेगं-क्षिप् 6 P. **-s.** चालनं, लघुप्रहारः, लघ्वाघातः, लघु-आकस्मिक-क्षेपः.

Jerkin, *s. See* **Jacket.**

Jessamine, *s. See* **Jasmine.**

Jest, *s.* परि(री)हासः, नर्मन् *n.*, हास्यं, विनोदोक्ति *f.*, प्रहसनं, विनोदभाषणं, परिहासोक्तिः, नर्मालापः; 'truce to (fie upon) your j. s' धिक्प्रहसनं (U. 4.), अलं परिहासेन; 'uttered in j.' परिहासजल्पितं; 'made a j. of the matter' तमर्थं परिहासमिव मेने. **2** खेला, क्रीडा, केलि *f.*, कौतुकं; 'in j.' परिहासेन, परिहासपूर्वं. **-v. i.** परिहस् 1 P. विनोद-परिहास-वाक्यं वद् 1 P or उदीर् c.; क्रीड् 1 P. **-er,** *s.* वैहासिकः, परिहासयितृ *m.*, परिहास-विनोद-कारिन् *m.*, भंडः, चाटुपटुः; 'king's j.' विदूषकः, नर्मसचिवः. **-ingly,** *adv.* परिहासपूर्वं, सपरिहासं, सविनोदं.

Jet, *s.* जलोत्क्षेपः. **2** कृष्णप्रस्तरः; 'j.-black' घनकृष्ण, अतिकृष्ण. **-ty,** *a.* कृष्णवर्ण.

Jewel, *s.* मणि *m. f.*, रत्नं; 'j. of a woman' स्त्रीरत्नं; 'j.-house' मणिशाला, रत्नागारं; 'j.-mine' रत्नाकरः, रत्न-मणि-खनि *f.*-भूमि *f.* **-led,** *a.* रत्नवत्, मणि-रत्न-मय (यी *f.*), रत्नसनाथ, मणि-रत्न-खचित, रत्नानुविद्ध. **-ler,** *s.* रत्नाजीविन् *m.*, मणिकारः, रत्नकारः. **-Jewelry,** *s.* रत्नानि (pl.), रत्नादिकोशः-षः.

Jiffy, *s.* निमेषः, क्षणः.

Jig, *s.* नृत्यविशेषः. **2** वंचना, व्याजः, छलं.

Jilt, *s.* प्रतारिका, चपला, वंचिका, संकेतलंघिनी. **-v. i.** प्रेमसंकेतं लंघ् 1 A, 10, प्रेमविषये वंच् 10, or प्रतॄ c., खंड् 10.

Jingle, *v. i.* शिंज् 2 A, 10, क्वण् 1 P, वि-रु 2 P, झणझणायते (D.), कलं स्वन् 1 P **-s., -ing,** *s.* शिंजितं, शिंजा, झणत्कारः, झणझणस्वनः, क्वणितं, क्वणनं, कलरवः.

Job, *s.* कार्यं, कृत्यं, व्यापारः, क्रिया. **2** लघु-क्षुद्र-नीच-क्रिया. **3** स्वार्थपरं कार्यं, आत्मवृद्ध्यर्थं कर्मन् *n.* **-v. i.** क्षुद्रकर्माणि कृ 8 U, स्वार्थमुद्दिश्य कार्यं कृ. **2** पण् 1 A. **3** *v. t.* अपव्यय् 4 P. **-ber,** *s.* क्षुद्रकर्मकारिन् *m.*, परार्थं क्रयविक्रयकारिन् *m.*, स्वार्थप्रवर्तकः, क्रयविक्रयिन् *m.* **-bing,** *s.* क्षुद्रकर्मव्यवसायः, स्वार्थप्रवृत्ति *f.*

Jockey, *s.* अश्वज्ञः, हयज्ञः, अश्वविद् *m.*, अश्वकोविदः, अश्वविद्याविशारदः. **-v. t.** अश्वज्ञ इव प्रतॄ c. or वंच् 10. **-ism,** *s.* अश्वविद्या-शिक्षा.

Jocose, Jocular, *a.* हास्यकर (री *f.*), विनोदिन्, हास्यावह, विनोदात्मक, सरस, हास्यगर्भ, सकौतुक; (of persons) परिहासशील, परिहासक, विनोद-नर्मालाप-पर, कौतुकिन्. **-ly,** *adv.* परिहासेन, परिहासपूर्वं, सकौतुकं, विनोदार्थं, रसिकवत्. **-ness,-ity,** *s.* परिहासशीलता, रसिकता, विनोदः, कौतुकं, उल्लासः, हर्षः, प्रमोदः.

Jocund, *a.* प्र-,हृष्ट, प्र-,मुदित, आनंदवृत्ति. **-ity,** *s.* उल्लासः, प्रहर्षः, आनंदः; *See* **Glad.**

Jog, (on) *v. i.* मंदं मंदं प्रसृप् 1 P or चल् 1 P or सृ 1 P. **-v. t.** अरत्निना तड् 10, ईषत् चल् c. **-s.** ईषदाघातः, ईषत्प्रहारः-चालनं; 'j.-trot' गज-मंद-गति *f.*, मंदप्रयाणं.

Join, *v. t.* युज् 7 U, 10, सं-आ°-,संसंज् 1 P, यु 2 P, संश्लिष् c., सं-धा 3 U, संबंध् 9 P, संहन् 2 P, एकत्र कृ 8 U, संग्रंथ् 9 P, योक्त्रयति (D.), घट् c. (घटयति), संपृच् 2 A, 7 P. **2** (Go to) समुपागम् 1 P, सं-इ 2 P, संमिल् 6 P, संगम् 1 A; pass. of roots above (with instr.); 'j. hands' अंजलिं बंध् 9 P, प्रां(सां)जलि-*a.* भू, हस्तौ समा-नी 1 P; 'j. ed their hands in marriage' विवाहविधिना ताभ्यां अन्योन्यपाणिग्रहणं कारयामास, वधूवरं संगममाचकार **-ed,** *a.* युक्त, युत, संयुक्त, संयुत, संश्लिष्ट, संहत, सं-समा-सक्त, लग्न, संलग्न, संबद्ध, संपृक्त, संहित, सहित, संगत, समेत, मिलित, घटित. **-er,** *s.* तक्षकः, रथकारः, सूत्रधारः, तष्टृ *m.*, तक्षन् *m.*, काष्ठतक्ष् *m.*, वर्धकिः. **-ery,** *s.* काष्ठतक्षणं. **-ing,** *s.* सं-,योगः, संधिः, संसर्गः, संधानं, संश्लेषः, संघातः, संगमः, संसक्ति *f.* **-Joint,** *s.* संधिः, पर्वन् *n.*, ग्रंथिः, कांडः-डं, अस्थिग्रंथिः-संधिः; 'out of j.' विलग्न, विसंधि. **-a.** संयुक्त, समवेत, एककार्यव्यापृत, सहत. **2** असंविभक्त, अविभक्त, साधारण (णी *f.*), सामान्य, सह in comp.; संघातवत्, संभूयकारिन्; 'j. proprietor' सहाधिकारिन् *m.*; 'j. family property' संसृष्टिधनं; 'members of a j. family' संसृष्टाः, संसृष्टिनः; 'with j. labour' संभूयश्रमेण, सर्वेषां यत्नेन; 'j.-stock company' संभूयसमुत्थानं; 'j.-heir' भागिन् *m.*, संविभागिन् *m.*, समांशहरः, समांशिन् *m.* **-v. t.** संधियुक्त-*a.* कृ; ex. by (*s.*). **-ed,** *a.* संधिविशिष्ट, ग्रंथिल, संधि-ग्रंथि-युक्त, पर्ववत्. **-ly,** *adv.* समं, सह, संभूय, संयोगेन, सहितं, समवायेन, एकीभूय, एकचित्तीभूय, युगपत्. **-Jointure,** *s.* विधवाधनं; स्त्रीधनं.

Joke,-er, *See* **Jest,-er.**

Jole, *s.* गंडः, कपोलः.

Jolly, *a.* प्र-,हृष्ट, सानंद, उज्जृम्भित प्रमोदिन्, हृष्ट-प्रीत-हृदय; परिहासशील, विनोदिन्, विलासिन्, विनोदशील. **-ity,** *s.* उल्लासः, आनंदः, प्र-,हर्षः, प्रमोदः, उत्सवः. **-ness,** *s.* विनोदपरता, प्रहासः,

Jolt, *v. t.* संक्षुभ् 9 P or c. **-v. i.** क्षुभ् 1 A, 4 P. **-s., -ing,** *s.* संक्षोभः, उद्घातः, आकस्मिकक्षेपः.

Jolthead, *s.* स्थूलबुद्धिः, मूर्खः, मूढः; *See* Fool.

Jostle, *v. t.* स्कंधताडनेन निराकृ 8 U or निः-सृ c. or निर्-धू 6 P, 5, 9 U or निर्-अस् 4 U; परस्परं समाहन् 2 P or संघृष् 1 P or संमृद् 9 P, अभिसं-पत् 1 P; संघट्ट् 1 A. **-ing,** *s.* परस्परसमाघातः-घर्षणं, अन्योन्यसंमर्दः, अभिसंपातः.

Jot, *s.* कणः, लवः, अणुः, लेश-लव-कण-बिंदु-मात्र, तिलमात्रं. **-***v. t.* (स्मरणार्थं) लिख् 6 P or अंक् 10. **-ting,** *s.* अभिलिखितं.

Journal, *s.* वार्ता-वृत्त-समाचार-पत्रं or पत्रिका. **-ist,** *s.* वृत्तपत्रप्रकाशकः-लेखकः.

Journey, *s.* प्रयाणं, प्रस्थानं, प्रवासः, यात्रा, देशभ्रमणं-पर्यटनं, अध्वन् *m.*, मार्गः, अध्व or मार्ग-गमनं or क्रमणं, ' on account of the fatigues of j. ' अध्वसंजातखेदात्; उत्थाय पुनरवहत् (Ka. 299). ' resumed his j.' &c.; ' it is only a week's j. ' सप्ताहगम्योऽध्वा; ' to return from a j. ' प्रवासाद् उपावृत् 1 A; ' may the j. be pleasant to you ' शिवास्ते पंथानः संतु. **-***v. i.* प्र-या 2 P, मार्गेण गम् or व्रज् or चर् 1 P or या. पर्यट् 1 P, परिभ्रम् 1, 4 P वह् 1 P, दिवा रात्रौ चावहत् (Ka. 301); ' to j. abroad' प्रवस् 1 P. **-er,** *s.* अध्वगः, पथिकः, पांथः, यात्रिकः. **-Journeyman,** *s.* वैतनिकः, हस्तकर्मकारः.

Jovial, *a.* उल्लासिन्, सदानंदिन्.

Joy, *s.* आनंदः, हर्षः, उत्सवः.

Jubilant, *a.* जयघोषं कुर्वाण, जयध्वनिकारिन्.

Jubilate, *v. i.* जयघोषं कृ 8 U, नंद् 1 A, हृष् 1 P

Jubilee, *s.* प्रहर्षः, महोत्सवानंदः, महोत्सवः, उत्सवकालः.

Judge, *s.* प्राड्विवाकः, अ(आ)धिकरणिकः, अक्षदर्शकः, धर्माध्यक्षः, धर्माधिकारिन् *m.*, न्यायाध्यक्षः, निर्णेतृ *m.*, दंडनायकः. **2** (In general) अभिज्ञः, गुणदोषज्ञः, विशेषज्ञः, परीक्षकः, परिच्छेदकः, विवेकिन् *m.*, गुणग्राहिन् *m.*, रसज्ञः, तद्विद् *m.*, **-***v.* वि-विच् 3, 7 U. परिच्छिद् 7 P, वि-ज्ञा 9 U, विभू c., विचर् c., निर्णी 1 P, निश्चि 5 U, अवनिर्-धृ 10, अव-परि-ईक्ष् 1 A, तीर् 10. अनुसं-धा 3 U. **2** वितर्क् 10, विमृश् 6 P, विगण् 10, विकल्प् c., मनसा विचर् or विविच्, मन् 4 A; ' it is for you to j. whether &c. ' एतद्विषये भवान् प्रमाणं; ' j. me by my acts फलेन मद्गुणदोषनिर्णयः क्रियतां; ' to j. ill or wrongly मिथ्या कल्प् c. or संभू c. or मन्. **-ment,** *s.* विवेकः, परिच्छेदः, विचारः-रणा विज्ञानं, विभावनं, निर्धारणा, निर्णयः, निश्चयः, संकल्पः, अवधारणं-णा. **2** (Judicial decision) निर्णयः, विचारः, निर्णयपादः, आधर्षणं; तीरणं, दंडाज्ञा. **3** अनुभवः, तर्कः, ज्ञानं, अनुमानं. **4** मति *f.*, बुद्धि *f.*, मतं, अभिप्रायः, संकल्पः, बोधः; ' according to one's j. ' यथामति, यथाबुद्धि. **5** (Divine j.) ईश्वराज्ञा, ईश्वर-विधिः-नियमः-शासनं; ' j.-day ' विचारादिनं; ' j.-hall ' न्यायसभा, विचार-धर्म-सभा; ' j.-seat ' व्यवहारासनं, न्यायासनं, धर्मासनं. **-Judicatory,** *s.* धर्म-विचार-न्याय-सभा, व्यवहारमंडपः, धर्माधिकरणं. **2** न्यायप्रणयनं. **-Judicature,** *s.* न्यायाधिकारः, व्यवहारदर्शनाधिकारः; *See* Judicatory above. **-Judiciary,** *a.* विचारक, व्य(व्या)वहारिक (की *f.*). **-Judicial,** *a.* व्यवहारविषयक, व्यवहार in comp.; ' j. proceeding ' व्यवहारदर्शनं, व्यवहारः, न्यायविचारः. **-ly,** *adv.* व्यवहारानुसारेण, यथाव्यवहारं, न्यायानुरूपं. **-Judicious,** *a.* (Act) समीक्ष्य-विमृश्य-कृत, न्याय्य, धर्म्य, समंजस, उचित, यथान्याय, सविवेक, युक्त, योग्य. **2** (Persons) विमृश्य-समीक्ष्य-कारिन्, विवेकिन्, नीतिमत्, परिच्छेदक, नयज्ञ, प्राज्ञ, विवेकदृश्वन्, विशेषज्ञ, सदसद्दर्शिन्. **-ly,** *adv.* युक्तं, समंजसं, यथान्यायं, उचितं, सम्यक्. **2** सविवेकं, सपरिच्छेदं, सुविमृश्य, सुविचार्य, प्राज्ञ-विज्ञ-वत्.

Jug, *s.* कुंभः, कलशः, कंसः, उदकपात्रं; *See* Jar.

Jugate, *a.* संयुक्त, संश्लिष्ट.

Juggle, *v.* मुह् c., छल् 10, वंच् 10, दृष्टिं मुह् c. or बंध् 9 P, मायां-कुहकं-इंद्रजालं-कृ 8 U **-***s.*, **-ing, -ry,** *s.* माया, कुसृति *f.*, दृष्टिमोहः-बंधः, इंद्रजालं, कुहका-कं, इंद्रियदृष्टि-मोहः, हस्तलाघवं-चापल्यं. **2** वंचना, छलं, कूटता, प्रतारणा. **-er,** *s.* ऐंद्रजालिकः, मायिन् *m.*, मायाकारः, मायाजीविन् *m.*, कुहकजीविन् *m.*, कौसृतिकः, अ(आ)हितुंडिकः

Jugular, *a.* कंठस्थ, कंठ्य.

Juice, *s.* रसः, द्रवः, सारः, निर्यासः, आसवः ' j. issuing from the elephant's temples' मदः, दानं, मदवारि. **-less,** *a.* नीरस, अरस विरस, असार, सारहीन-शून्य, शुष्क, पिंढीर **-y,** *a.* रसमय (यी *f.*), रसपूर्ण, सरस, बहुरस, रसाढ्य, सार-रस-वत्.

Jujube, *s.* बदरी, कर्कंधु-धू *m. f.*, कोलि *f.*, कोलाली; (fruit) बदरं, कोलं, कुवलं, फेनिलं, सौवीरं, घोंटा.

July, *s.* आषाढश्रावणं.

Jumble, *v. t.* संकृ 6 P, संमिश्र् 10, संक्षिप् 6 P, संकुली-संकरी-कृ 8 U. **-***v. i.* संकृ pass., संकरी-संकुली-भू 1 P. **-***s.* संकरः, सं-,मिश्रणं, संक्षोभः, संकुलता, संनिपातः.

Jump, *v. i.* प्लु 1 A, वल्ग् 1 U, स्कंद् 1 P. ' j. about नृत् 4 P; ' j. over ' लंघ् 1 A, 10; ' j. up ' उत्प्लु, उत्पत् 1 P; ' j. with ' **Agree,** q. v. **-***s.*, **-ing,** *s.* प्लवनं, उत्पतनं

बलिगतं, प्लुतं-ति *f.*, प्लवः, आस्कंदः, झंपः-पा. **-er,** *s.* प्लवकः, झंपिन् *m.*

Junction, *s.* सं-,योगः, संगमः, संमिलनं, संगति *f.*, समागमः, संश्लेषः, संधिः, संसर्गः, संघातः, संसक्ति *f.*, संपर्कः; ' j. of rivers' संभेदः, संगमः. 2 संधिस्थानं.

Juncture, *s.* वेला, समयः; कष्टकालः-समयः, संकटवेला. 2 संधिः, ग्रंथिः.

June, *s.* ज्येष्ठाषाढकं.

Jungle, *s.* गुल्मावृतं स्थानं.

Junior, *a.* कनीयस्, अवर, अवरज, यवीयस्, अवरपदभाज्.

Junket, *s.* निभृतोत्सवः. 2 मिष्टान्नं, मोदकः.

Junta, Junto, *s.* सभा, समाजः, गूढसंसर्गः, कुसंसर्गः.

Juridical, *a.* व्य(व्या)वहारिक (की *f.*); *See* **Judicial.**

Jurisconsult, *s.* स्मृतिशास्त्रज्ञः, धर्मशास्त्रकोविदः.

Jurisdiction, *s.* अधिकारः, व्यवहारदर्शनाधिकारः, न्यायप्रभुत्वं.

Jurisprudence, *s.* धर्मशास्त्रं, स्मृतिशास्त्रं, व्यवहार or विद्या-ज्ञानं or शास्त्रं, विधिः; ' a head of j. ' व्यवहारविषयः,-पदं.

Jurist, *s.* धर्मशास्त्रकोविदः, स्मृतिज्ञः.

Jury, *s.* सभ्याः; प्रमाणपुरुषगणः.

Just, *a.* (Of persons) न्यायवर्तिन्, न्यायिन्, न्यायशील-पर, साधुवृत्ति, ऋजु, विमलात्मन्, निष्कपट, निर्व्याज, शुचि, न्यायपरायण, धार्मिक-सात्त्विक (की *f.*). 2 न्याय्य, धर्म्य, यथान्याय, न्यायानुसारिन्, सत्य, तथ्य, योग्य, युक्त, यथार्थ, उचित, सम्यच्. 3 सम, समवृत्ति, निःपक्षपात, समदर्शिन्. 4 संपूर्ण, अविकल, अन्यून. *-adv.* अंतिकं-के, समीपं, निकटे. 2 प्रायः, प्रायशः; oft. by भूयिष्ठ, कल्प, प्राय in comp., or by desid.: *See* **About.** 3 सद्यः, अचिरादेव, नातिचिरात्, प्राक्; oft. by एव, मात्र in comp.; 'j. now' अधुनैव; 'it is j. proper' उचितमेव; ' j. dead ' सद्योमृत; 'j. born' जातमात्र. 4 युक्तं, सम्यक्, यथार्थं, यथावत्. 5 तावत् ' j. come here ' इतस्तावदागम्यतां; ' j. so ' एवमेव, तथैव, एवमेतत्, अथ किं, युक्तं, युज्यते; 'j. as' 'j. like' इव, यद्वत्, or निर्विशेष in comp.: 'stay j. as in your own house' स्वगृहनिर्विशेषमत्र वस; ' bred j. like one's own children ' स्वपुत्रनिर्विशेषं संवर्धित. कष्टेन, कृच्छ्रेण. **-ly,** *adv.* निर्व्याजं, निर्व्यलीकं, सारल्येन. 2 यथान्यायं, न्यायेन, धर्मेण, न्यायतः, धर्मतः, यथाधर्मं, न्यायानुसारेण, सम्यक्, यथावत्. 3 सत्यं, अवितथं, यथार्थं, अर्थतः, यथावत्, यथातथं, यथार्हं, उपपन्नं, यथोचितं, युक्तं, स्थाने, यथायोग्यं, अंजसा. **-ness,** *s.* न्याय्यता, यथार्थता, योग्यता, औचित्यं, युक्तता; साम्यं, पक्षपातः. **-Justice,** *s.* धर्मः, न्यायः, नयः, नीति *f.*, न्यायिता, ऋजुता, साधुता. 2 न्याय्यता, युक्तता, योग्यता, यथार्थता, सत्यता, युक्ति *f.*, याथार्थ्यं. 3 साम्यं, समदर्शित्वं, अपक्षपातः, सर्वसमता. 4 न्यायदंडः, योग्य-दंडः-शिक्षा, अपराधानुरूपो दंडः. 5 धर्माध्यक्षः; प्राड्विवाकः; *See* **Judge**; ' court of j. ' न्याय-धर्म-सभा, व्यवहारमंडपः. **-ship,** *s.* धर्माधिकारः, न्यायाध्यक्षत्वं. **-Justiciary,** *s.* **Judge,** q. v. **-Justify,** *v. t.* न्याय्य *-a.* इति प्रति-पद् *c.* or प्रदृश् *c.*: शुध् *c.* दोषं निराकृ 8 U or निवार् 10 or शुध् *c.* or मृज् 2 P, दोषाद् मुच् 6 P or *c.* **-able,** *a.* निवार्यदोष, शोधनीय, शुद्धिक्षम. **-ication,** *s.* शुद्धि *f.*, शोधनं, दोषशुद्धिः, दोषमुक्ति *f.* -मार्जना, दोषप्रतीकारः, विमोचनहेतुः, अपव्यपदेशः. **-er,** *s.* शोधकः, दोषनिवारकः.

Justle, *v.* *See* **Jostle.**

Jut, *v. i.* प्रलंब् 1 A, बहिर्वृत् 1 A or स्था 1 P. *-s.* प्रलंबनं, आभोगः, प्रालंबः.

Jute, *s.* शणं.

Juvanescent, *a.* तरुणीभवत्.

Juvenile, *a.* तरुण, अल्पवयस्क, युवन्, कौमार (री *f.*), अभिनववयस्. **-ity,** *s.* यौवनं, तारुण्यं, कौमारं, यौवनावस्था, तारुण्यभावः.

Juxtapose, *v. t.* संनि-धा . **-ition,** *s.* सान्निध्यं, संनिधिः, संस्थिति *f.*, सन्निकर्षः, संसर्गः, नैकट्यं, उपश्लेषः.

K.

Kaw, *v. i.* कै 1 P, ध्वांक्ष् 1 P. *-s.* काकरवः, रुतं.

Keel, *s.* नौतलं.

Keen, *a.* तीक्ष्ण, शित, निशित, शात, निशात, शितधार, तीक्ष्णाग्र; तीव्र, तिग्म, प्रखर. 2 व्यग्र, उच्चंड, उत्सुक, उत्कट, कुतूहलिन्; *See* **Eager.** 3 सूक्ष्म, कुशाग्र-ग्रीय, विदग्ध. 4 उग्र, कटु, अरुंतुद, मर्मस्पृश्, तिग्म (words) ' k. words ' वागिषुः, वागग्निः; 'k.-eyed' 'k.-sighted' सूक्ष्ममति, तीक्ष्ण-सूक्ष्म-बुद्धि, कुशाग्रमति-बुद्धि, दूरदर्शिन्. **-ly,** *adv.* तीक्ष्णं, तीव्रं, उग्रं, प्रखरतया. **-ness,** *s.* तीक्ष्णता, तीव्रता. 2 व्यग्रता, उच्चंडता, कौतूहलं, अत्युत्साहः. 3 सूक्ष्मता, विदग्धता, कुशाग्रमतित्वं, बुद्धिसूक्ष्मता. 4 कटुता, तिग्मता, उग्रता.

Keep, *v. t.* रक्ष् 1 P, पा 2 P, पा *c.* (पालयति), गुप् 1 P, त्रै 1 A, अव् 1 P. 2 धृ 1 P, 10; धा 3 U. नि-आ-°, निविश् *c.*, स्था *c.* (स्थापयति), न्यस् 4 U. 3 रुध् 7 U,

नि-अव-उप-°, धृ, बंध् 9 P, निवार् 10, प्रति-नि-षिध् 1 P, नि-सं-यम् 1 P. 4 (As cattle) निरुप् 10, पा c., रक्ष्. 5 (As a secret) न प्रकाश् c. or भंज् 7 P, or भिद् 7 P गुप्, रक्ष्. 6 (Observe) आचर् 1 P, अनु-ष्ठा 1 P, वि-धा, कृ, सेव् 1 A. भज् 1 U, आश्रि 1 U, आ-स्था 1 U, आ-अव-लंब् 1 A. 7 शुष् c., निर्वह् c., अप-वृज् 10, पूर् 10, तॄ 1 P, साध् 5 P or c., पा c. (पालयति) (as a promise). 8 भृ 1 P, 3 U, पुष् c., पा c.; (as servants) व्यापृ c., सेवायां नियुज् 7 A, 10, वेतनं-भृतिं दा 3 U; 'to k. bad hours' वेलातिक्रमेण स्वप् 2 P; 'to k. in mind हृदये-मनसि कृ, अव-धृ; 'k. company with' संगम् 1 A, सं-इ 2 P, सह वस् or चर् 1 P. संवस्; *See* **Associate.** –*v. i.* स्था, वृत् 1 A, आस् 2 A, न विरम् 1 P or निवृत or विश्रम् 4 P, with pres. part. (when followed by p. p. &c.); 'he kept weeping' रुदन्नास्त, रुदन्नोपरराम; 'k. going up and down' आरोहावरोहं कुर्वन्नास्त. 2 संसंज्-संश्लिष्-अनुबंध्- pass., लग् 1 P. 3 वस् 1 P. –*s.* रक्षा-क्षणं, पालनं, गुप्ति *f.* 2 अवस्था, दशा, स्थिति *f.*, वृत्ति *f.*, भावः. 3 भृति *f.*, पोषणं. 4 दुर्गं, कोटः. 5 काराबंधनं. निरोधः, गुप्तिः. **–back, –from,** निग्रह् 9 P, संयम्, संहृ 1 P, निवृ c.; (*v. i.*) निवृत्, विरम्. **–in,** गुह् 1 U, आच्छद् 10, अंतर्धा, संवृ 5 U. **–off,** निवार्, निवृत् c., निरुध्, प्रति-वि-हन् 2 P, प्रतिकृ, व्यप-ऊह् 1 U, परिहृ 1 P; (*v. i.*) निवृत्, विरम्; *See* **Cease. –on,** *See* **Keep** (*v. i.*) above: प्रवृत्, प्रारब्धं सं-पद् c. **–out,** व्यावृत् c., प्रतिषिध्; *See* **Exclude. –to,** अनुवृत्, अनुसृ 1 P, अनुरुध् 4 A, परिरक्ष्, परिपा c. (पालयति); *See* **Keep** (*v. t.*) above. **–under,** वशीकृ, वशं नी 1 P, स्वायत्तीकृ. **–up,** प्रवृत् c., पा c.; (*v. i.*) जागृ 2 P; न दम् or श्रम् 4 P. **–er,** *s.* रक्षकः, पालकः, रक्षितृ *m.*, रक्षिन् *m.*, गोप्तृ *m.*, पः-पालः in comp. **–ing,** *s.* रक्षा, अवेक्षा, पालनं, गुप्तिः. 2 सादृश्यं, अविरोधः, संगति *f.*, आनुरूप्यं; 'in k. with' अनुरूप-संवादिन्-सदृश-योग्य-*a*

Keep-sake, *s.* स्मृतिदानं; स्नेहाभिज्ञानं.

Keg, *s.* काष्ठभांडं.

Kelter, *s. See* **Order.**

Ken, *s.* गोचरः-रं, विषयः; नयनविषयः-पथः, बुद्धिविषयः. –*v. t.* दूरादालोक् 1 A, 10 or ईक्ष् 1 A or दृश् 1 P. 2 परि-ज्ञा 9 U. अव-गम् 1 P.

Kennel, *s.* श्वशाला, श्वगृहं, कुक्करालयः. 2 श्वगणः. 3 जलमार्गः, प्रणालः-ली. –*v. i.* श्वगृहे वस् 1 P.

Kerchief, *s.* आवरणं, वेष्टनं, आभरणं, 'hand-k.' हस्तप्रचारकः, नक्तकः; 'neck-k.' ग्रीवावेष्टनं, कंठवस्त्रं.

Kernel, *s.* बीजं, गर्भः, अष्ठि *f.*, अष्ठीला, फलबीजं-गर्भः, सारभूतं द्रव्यं. 2 मध्यः-ध्यं, गर्भः, उदरं, हृदयं, अभ्यंतरं. **–ly,** *a.* बीजाकार, बीजपूर्ण.

Kestrel, *s. See* **Castrel.**

Kettle, *s.* कटाहः, पिठरः-रं, स्थाली, उखा, कुंडं; 'k.-drum' भेरि-री *f*, दुंदुभिः, डिंडिमः.

Key, *s.* अंकुटः, कुंचिका, ताली, उद्घाटकः-कं. 2 व्याख्या, निर्वचनं, टीका; 'k.-hole' कुंचिकाछिद्रं; 'k.-stone' संधान-संयोग-प्रस्तरः.

Kibe, *s.* पादस्फोटः, विपादिका.

Kick, *v. t.* पादेन-लत्तया-प्रहृ 1 P or तड् 10 or आ-हन् 2 U, लत्ताप्रहारं कृ 8 U; पादं-पार्ष्णिं-खुरं-क्षिप् 6 P. –*s.* पाद-लत्ता-प्रहारः, पादाघातः, पार्ष्णि-खुर-क्षेपः, खुराघातः.

Kid, *s.* छागशावः-शावकः, अजशिशुः, अजपोतः, छागशिशुः. 2 काष्ठभारः

Kidnap, *v. t.* (बालकं-दासं) चुर् 10, अपहृ 1 P, or बलाद् हृ. **–per,** *s.* बालस्तेयकृत् *m.* **–ping,** *s.* बालस्तेयं, बालापहारः.

Kidney, *s.* वृक्कः-क्का, गुर्दः; 'k.-bean' मुद्गः, माषः, शिंबा, शिंबिकः-का.

Kill, *v. t.* हन् 2 P, व्यापद् c., मृ c., सूद् 10, निषूद्, नश् c., प्र-मी 9 U or c. (प्रमापयति), हिंस् 7 P, तृह् 6, 7 P, वि-शस् 1 P, पंचत्वं-परलोकं गम् c. (गमयति) or नी 1 P; शद् c. (शातयति), निवृत् c., नि-कृत् 6 P, अप-नी, क्षि 5 P or c. **–er,** *s.* हंतृ *m.*, घातकः, नाशकः, निषूदनः, अंतकः; gen. हन् or घातिन् in comp.: 'k. of Vritra' वृत्रहन्; 'k. of Madhu' मधुभूदनः. **–ing** *s.* हत्या, वधः, हननं, घातः, मारणं, नाशः, निषूदनं, हिंसा-सनं, आलंभः, विशसनं, व्यापादनं, प्रमापणं, निबर्हणं, निकारणं, विशारणं, प्रवासनं, परासनं, संज्ञपनं, निर्ग्रंथनं, निस्तर्हणं, क्षणनं, परिवर्जनं, निर्वापणं, प्रमथनं, क्रथनं, उज्जासनं, पिंजः, विशरः, उन्माथः.

Kiln, *s.* पाकपुटी, आपाकः.

Kimbo, *a.* वि-अव-भुग्न, वक्र, कुटिल.

Kin, *See* **Kindred;** 'of k.' सजातीय, सगोत्र. 'Kith and k. आप्ताः (pl.)

Kind, *a.* दयालु, सदय, कृपाकुल, कृपालु, अनुकंपिन्, सानुकंप, सकरुण, करुणात्मन्, दया-करुणा-शील, करुणार्द्र, दयार्द्र, स्निग्ध, कृपा-दया-घृणा-वत्, कारुणिक (की *f.*); प्रियकर (री *f.*), हित, प्रियैषिन्, हितैषिन्, हितकाम, हितबुद्धि, उपकार-पर-शील, उपकारिन्, सुहृदय, अनुकूल, सुशील, प्रसन्न, प्रीत. 2 मधुर, प्रिय; 'k. to the poor' दीनानुकंपिन्, दीनवत्सल; 'k. office' उपकारः; 'k. act'

सुकृतं; ' k. words ' प्रियवचनं; ' speaking k. words ' प्रियंवद, प्रियवादिन्; ' k. present ' प्रीतिदानं. -*s.* जाति *f.*, गणः, वर्गः. 2 विशेषः, भेदः, प्रकारः, जातिः, रूपं, विधा, in comp.; 'of many k. s' बहुविध; ' of various k. s ' विविध, नानारूपविध, नाना *ind.*; ' of this k. ' एवंविध, एवंरूप; ' of all k. s ' सर्वप्रकार; ' Jati is a k. of flower ' जातिः कुसुमविशेषः-भेदः. **-ly,** *a.* सौम्य, मृदु, कोमल, स्निग्ध, प्रिय. 2 अनुकूल; समानशील. -*adv.* सदयं, सकरुणं, दयया, कृपया, प्रीत्या, सस्नेहं, सानुकंपं, सानुग्रहं; प्रियं, हितेच्छया, सुशीलवत्, सुजनवत्; ' speaking k. 'प्रियवादिन्; 'k. disposed' हितबुद्धि, अनुरक्त. **-ness,** *s.* प्रसादः, अनुग्रहः, कृपा, दया, अनुकंपा, करुणा, प्रीति *f.*, स्नेहः, कृपालुता, दयालुता, हितेच्छा, कृपाशीलता, सुशीलं, सौजन्यं, प्रेमन् *m. n.*, आनुकूल्यं. 2 उपकारः, उपकृतं-ति *f.*, प्रियं, सुकृतं-तिः, हितं. **-Kindliness,** *s.* सौम्यता, स्निग्धता; सौजन्यं, सुशीलता.

Kindle, *v. t.* प्र-उत्-सं-दीप् c., इंध् 7 A, ज्वल् c., तप् 1 P or c. 2 उत्तिज् c., संधुक्ष् 10, प्रोत्सह् c.; प्रकुप् c., रुष् c.; ' with glances k. ed with anger ' क्रोधेद्धैर्दृष्टिपातैः (Rat. 1). -*v. i.* ज्वल् 1 P, दीप् 4 A, तप् 4 A.

Kindred, *a.* सजातीय, सगोत्र, सनाभि, सवर्ण, सवंशीय, सकुल्य, संबंधीय. 2 समान, समतुल्य-गुण, सधर्मन्, अनुगुण. -*s.* बंधुता, ज्ञातित्वं, ज्ञातिभावः, सगोत्रता, सजातित्वं, संबंधः, सपिंडता. 2 (Relatives) बंधवः ज्ञातयः, बांधवाः, सगोत्राः, सकुल्याः, गोत्रजाः, संबंधिनः (pl.); बंधुजनः, बंधु-ज्ञाति-वर्गः, बंधुबांधव-गणः.

Kine, *s.* pl. of **Cow,** q. v.

Kinematics, *s.* गतिशास्त्रं.

King, *s.* राजन् *m.*, नृपः, नरपतिः, नृपतिः, भूपतिः, भूपः, भूपालः, नरेंद्रः; and comp. of ईशः, अधीशः, पतिः, इंद्रः, पः, पालः, भृत् or भुज् with ' Man ' and 'Earth,' q. v. अवनिपः, क्षोणिपालः, भूभृत्, महीभुज्, क्षितिपतिः; ' supreme or great k. ' महाराजः, अधिराजः, सम्राज्, अधीश्वरः, मंडलेश्वरः; ' k. of k. s. ' राजराजः, राजाधिराजः, सार्वभौमः, चक्रवर्तिन् *m.* 'k. of beasts' मृगेंद्रः, मृगाधिपः, पशुपतिः; ' k.-craft ' राजनीति *f.*, -नयः, राज्यचातुर्यं; ' k.'s-evil ' गंडमाला. **-dom,** *s.* राज्यं, राष्ट्रं, विषयः. 2 आधिपत्यं, ऐश्वर्यं, प्रभुत्वं, स्वामित्वं. 3 जाति *f.*, वर्गः, गणः; ' animal k. ' प्राणिवर्गः-जातिः. **-less,** *a.* अराजक, अनायक, राज-नृप-हीन. **-like, -ly,** *a.* राजकीय. 2 राजानुरूप, राजयोग्य, राजार्ह, राजसदृश (शी *f.*), नृपोचित, राज in comp. **-ship,** *s.* राजत्वं, प्रभुत्वं, ऐश्वर्यं, आधिपत्यं, नृपत्वं, राजपदं, राजाधिकारः.

Kinsfolk, *See* **Kindred** (*s.*).

Kinsman, *s.* बंधुः, बांधवः, ज्ञातिः, सकुल्यः, सजातिः-तीयः, सगोत्रः, सनाभिः, गोत्रजः, बंधुजनः.

Kirk, *s.* *See* **Church.**

Kismet, *s.* *See* **Fate.**

Kiss. *v. t.* चुंब् 1 P, निंस् 2 A; ' k. the lip ' अधरं पा 1 P, अधररसं पा; ' k. on the head ' शिरसि आ-सम-उप-आ-घ्रा 1 P. -*s.* चुंबनं, चुंबितं, अधरपानं. **-er,** *s.* चुंबकः.

Kit, *s.* उपकरणसमुदायः, उपस्करः, उपकरणसामग्री, संभारः. 2 महाकुपी. 3 लघुसारंगी.

Kitchen, *s.* महानसं, रसवती, सूदशाला, पाकशाला-स्थान-गृहं; ' k. garden ' शाकशाकिनं, शाकशाकटं, शाकवाटिका; ' k.-maid ' पाकचेटी; 'k.-work ' पाककार्यं, पाकनिष्पत्ति *f.*; ' superintendent of the k. ' पौरोगवः.

Kite, *s.* चिल्लः-ल्ला, आतापि(यि)न् *m.* 2 चिल्लाभासः, चिल्लासदृशं क्रीडनकं.

Kitten, *s.* मार्जारशावः-वत्सः-शिशुः.

Kittle, *a.* संशयस्थ, संदिग्ध. -*v. t.* कुतकूतयति (D.).

Kleptomania, *s.* चौर्यरुचि *f.*

Knab, *v. t.* दंश् 1 P, दंतैः ग्रह् 9 U or धृ 1 P.

Knack, *s.* कौशलं, चातुर्यं, वैदग्ध्यं, पाटवं; हस्त-कौशलं-लाघवं; *See* **Skill.** 2 क्रीडनकं, क्रीडावस्तु-द्रव्यं.

Knag, *s.* ग्रंथिः, पर्वन् *n.* 2 **Peg,** q. v. **-ged, -gy,** *a.* ग्रंथिल, पर्ववत्.

Knap, *s.* **Knob,** q. v. 2 उन्नतभूभागः, उत्सेधः. -*v. i.* **Snap,** q. v.

Knar, Knarl, *s.* काष्ठग्रंथि *f.*

Knave, *s.* धूर्तः, कितवः, जाल्मः, वंचकः, शठः, प्रतारकः, कूटकारः, दांभिकः. **-ish,** *a.* धूर्त, कितव, शठ, जाल्म, वंचक, प्रतारक, धूर्तशील, कपटिन्. **-ishly,** *adv.* सकपटं, सव्याजं, शठवत्, धूर्ततया. **-ishness, ry,** *s.* धूर्तता, शाठ्यं, कैतवं, माया, व्याजः, छलं, कपटं.

Knead, *v. t.* (कराभ्यां) मृद् 9 P or c., संपीड् 10, चूर्ण् 10, पिष् 7 P. **-ing,** *s.* मर्दनं, पीडनं; 'k.-trough ' द्रोणि-णी *f.*

Knee, *s.* जानु *n.*, ऊरुपर्वन् *n.*, अष्ठीवत् *m. n.*, ऊरुसंधिः; ' go or fall on the k. s ' जानुभ्यां (अवनौ) गम् or पत् 1 P; ' k.-deep ' जानुदघ्न (घ्नी *f.*,) ,-द्वयस (सी *f.*),-मात्र (त्री *f.*); ' k.-pan ' जानुफलकं.

Kneel, *v. i.* जानुभ्यां (अवनौ) गम् or पत् 1 P or नम् 1 P, (क्षितितले) जानुनी निधा 3 U or न्यस् 4 U or निविश् c. or नम् c.

Knell, *s.* प्रेतघंटा.

Knick-knack, *s.* क्रीडनकं, क्रीडाद्रव्यं-वस्तु.

Knife, *s.* कर्तरिका, छुरिका, छुरी, कृपाणी, कृपाणिका, असिपुत्री-पुत्रिका, शस्त्री, असिधेनुः-नुका.

Knight, *s.* सादिन् *m.*, योधः, भटः.

Knit, *v. t.* सं-,ग्रंथ् 9 P, सिव् 4 P, निषिव्. 2 संबंध् 9 P, संयुज् 7 U, 10, संश्लिष् c., व्यतिषंज् 1 P, संहन् 2 P; व्यतिषजति पदार्थान् (Mal. 1) 'k. s objects together'; 'k. the eyebrows' भ्रुकुटिं बंध्, भ्रुवौ संकुच् 1 P or भिद् 7 P; *See* **Frown.** **—***a.* ग्रथित, स्यूत, संश्लिष्ट, व्यतिषक्त; 'well-k.' संहत, सुसंहत, दृढसंधि. **-ting,** *s.* सूत्रश्लेषः-ग्रथनं; 'k.-needle' दीर्घसूचि-ची *f.*

Knob, *s.* पिंडः, गंडः; ग्रंथिः, पर्वन् *n.*, संधिः (in wood). **-bed, -by,** *a.* सपिंड, पिंडिन्, ग्रंथिल, सगंड.

Knock, *v. t.* समा-आ-हन् 2 U, तड् 10, प्रह् 1 P; 'k. on the head' मस्तकं तड्, मस्तकाघातेन व्यापद् c.; (fig.) मोघीकृ 8 U, विफलीकृ, भंज् 7 P. —*v. i.* द्वारं तड् or प्रह्. —*s.* आघातः, अभिघातः, प्रहारः, ताडनं, घातः, हति *f.*; 'k. with a stick' वेत्राघातः; 'k. with the fist' मुष्टिघातः-प्रहारः. **-against,** अभि-प्रति-आ-हन्, संघट्ट् 1 A, अभिसं-पत् 1 P; 'k. ed her head against a rock' दृषदं शीर्षेण आजघ्ने. **-down,** नि-अव-पत् c., आघातेन-प्रहारेण-निपत् c. or भ्रंश् c. **-off,** सत्वरं-लघु-संपद् c. or साध् 5 P. 2 विरम् 1 P, निवृत् 1 A. **-out,** प्रहारेण निर्गम् c. (गमयति) or निः-सृ c. or बहिष्कृ 8 U; 'k. out the brains' मस्तिष्कं निष्पिष् 7 P. **-up,** खिद् c., आयस् c., अवसद् c., श्रम् c. or क्लम् c. (श्र-क्ल-मयति); (*v. i.*) श्रम् 4 P, क्लम् 1, 4 P, खिद् pass., अवसद् 1 P, ग्लै-म्लै 1 P; 'k. ed up by the journey' अध्वसंजातखेदः, नितांतं परिश्रांतः. **-er,** *s.* प्रहर्तृ *m.*, ताडयितृ *m.* 2 द्वारमुद्गरः, द्वारताडनी.

Knoll, *v. i.* घंटां वद् c. or तड् 10. —*s.* क्षुद्रपर्वतः, उन्नतभूभागः, वप्रः-प्रं.

Knot, *s.* ग्रंथिः, ग्रंथनं, ग्रंथिका, बंधः, गंडः; (of garments) नीवि-वी *f.*; (in wood) पर्वन् *n.*, संधिः. 2 संधिः, संयोगः, संश्लेषः, संबंधः. 3 मंडलं, समूहः, गणः, वर्गः, संघः, चक्रं, निवहः. 4 (Of trees) षंडः, गुच्छः, स्तबकः, गुल्मः-ल्मं, स्तंबः, कांडः. —*v. t.* ग्रंथिं बंध् 9 P, ग्रंथ् 9 P, संश्लिष् c., 'k. ed hair' वेणी; 'k. ed wound' रूढग्रंथिः व्रणः (U. 2). **-ted, -ty,** *a.* ग्रंथिल, ग्रंथिमत्, पर्व-संधि-मय (यी *f.*), पर्ववत्. 2 विषम, गूढ, दुर्ज्ञेय, दुर्बोध, गहन, गूढार्थ; 'k. point' ग्रंथिः, विषमपदं.

Know, *v. t.* ज्ञा 9 U, विद् 2 P, बुध् 1 P, अवगम् 1 P, अव-इ 2 P, अभि-ज्ञा, परिचित-*a.* भू 1 P. 2 अनु-भू, वि-भू c., उपलभ् 1 A, ग्रह् 9 U; 'how should a dependent k. of sincere happiness (pleasure)' परायत्तः प्रीतेः कथमिव रसं वेत्तु पुरुषः (Mu. 3). **-er,** *s.* ज्ञातृ *m.*, ज्ञानिन् *m.*, वेत्तृ *m.* ज्ञः-अभिज्ञः in comp. **-ing,** *a.* विज्ञ, ज्ञानिन्; gen. ex. by विद्, ज्ञ or अभिज्ञ in comp.; 'k. Dharma' धर्मविद्, धर्मज्ञः. **-ingly,** *adv.* ज्ञानपूर्वं, कामतः, बोध-मति-बुद्धि-पूर्वं, जानत्-*a.* with अपि. **-ledge,** *s.* (Act) ज्ञानं, परि-वि-ज्ञानं, बोधः-धनं, वेदनं, अवगमः, उपलंभः, उपलब्धि *f.* 2 (Learning) ज्ञानं, विद्या, विद्वत्ता, पांडित्यं, व्युत्पन्नता, वैदुष्यं. 3 अभिज्ञानं, परिचयः; 'spiritual k.' आत्मज्ञानं-विद्या, परमार्थज्ञानं, अध्यात्मविद्या, परमार्थः, ब्रह्मविद्या, परमार्थबोधः; 'acquiring k.' विद्यार्जनं, विद्यागमः, ज्ञानप्राप्ति *f.*; 'eager after k.' ज्ञानेच्छु, जिज्ञासु; 'thirst after k.' जिज्ञासा, ज्ञानलिप्सा, ज्ञानेच्छा; 'according to one's k.' यथाज्ञानं; 'for the right k. of words and their meaning' वागर्थप्रतिपत्तये (R. i. 1); 'without the k. of' अविज्ञाप्य, अनिवेद्य, अगोचरं-रेण, परोक्षं क्षे; 'with the k. of' गोचरं-रेण, प्रत्यक्षं, साक्षात्, समक्षं; 'to come to the k. of' श्रुति-कर्ण-पथं या-इ-2 P or गम् 1 P; 'k. is power' बुद्धिर्यस्य बलं तस्य (P. i. 8). **-Known,** *a.* ज्ञात, विदित, अवगत, बोधित, उपलब्ध, अनुभूत, विभावित. 2 ख्यात, विश्रुत, प्रसिद्ध, वि-प्र-ख्यात, विज्ञात; 'to make k.' वि-ज्ञा c. (ज्ञापयति), नि-आ-विद् c., बुध् c., 'to become k.' ज्ञा-प्रति-इ pass.; 'be it k. to your honor' एवमत्रभवंतो विदांकुर्वंतु; 'be it k.' ज्ञातं-विदितं-अस्तु; 'became k. by that name' तदाख्यया (भुवि) पप्रथे (R. xv. 101), तदाख्यां जगाम.

Knuckle, *s.* अंगुलिपर्वन् *n.*-संधिः-ग्रंथिः-पर्व; संधिः, ग्रंथिः. —*v. i.* वशीभू 1 P, वशं गम् 1 P or इ-या-2 P. **-ed,** *a.* संधि-पर्व-विशिष्ट, ग्रंथिल.

Knurl, *s.* ग्रंथिः, गंडः. **-ed,** *a.* ग्रंथिल.

Kosmos, *s.* विश्वं, जगत् *n.*

L.

Label, *s.* पत्रं, अंकपत्रं, पंजिकं, लेपपत्रं. –*v. t.* लेपपत्रं आसंज् c. or अनुबंध् 9 P.

Labial, *a.* ओष्ठ्य.

Labio-dental, *a.* दंतो(तौ)ष्ठ्य.

Labor (Labour), *s.* श्रमः, परिश्रमः, प्र-आ-यासः, क्लेशः, कष्टं, दुःखं 2 उद्यमः, उद्योगः, व्यापारः, व्यवसायः, चेष्टा, प्र-,यत्नः, उत्साहः. 3 प्रसूतिकालः-समयः, प्रसवकालः, प्रसवावस्था; 'pain of l.' प्रसूति-प्रसव-वेदना-यातना-व्यथा; 'bodily l.' व्रातं, देह-काय-क्लेश-आयासः-श्रमः; 'unpaid l.' विष्टि *f.*, आजूः; 'got by one's l.' स्वकष्टार्जित. –*v. i.* परिश्रमं-आयासं-कृ 8 U, श्रम् 4 P, प्र-,यत् 1 A, व्यव-सो 4 U. चेष्ट् 1 A. उद्यम् 1 P, प्रवृत् 1 A, आयस् 1, 4 P. व्रातं कृ, शरीरायासं कृ. 2 खिद्-क्लिश्-पीड् pass., व्यथ् 1 A. 3 प्रसवावस्थायां वृत्, (आसन्नप्रसवा or प्राप्तप्रसववेदना सा स्त्री); 'l. under' बाध्-अभिभू-आक्रम्-पीड्-उपहन्-pass., 'l. ing under hundreds of anxieties' चिंताशतैर्बाध्यमान-अभिभूत; अतिभाराक्रांत &c.; 'l. ing under a disease' रोगपीडित, रुजार्त. –*v. t.* महाश्रमेण-प्रयत्नेन-साध् 5 P or सं-पद् c. or क्लृप् c. or वि-धा 3 U or कृ or अनु-ष्ठा 1 P. 2 कृष् 6 U. **-ed,** *a.* श्रम-यत्न-कष्ट-सिद्ध, यत्न-श्रम-पूर्व. प्रयत्नकृत. **–er,** *s.* कृतश्रमः, कर्मिन् *m.*, व्यवसायिन् *m.*, कार्मः. 2 कर्मकरः, कर्मकारः, भृतकः, वैतनिकः, भृति-भरण्य- भुज् *m.* 3 कृषकः, कृषीवलः; *See* **Farmer.** **–Laborious,** *a.* श्रम-आयास-कष्ट-साध्य, कष्ट-आयास-प्रद, पीडाकर (री *f*), दुःखसाध्य, कष्ट. 2 आयासिन्, कृतश्रम, श्रम-उद्योग-कर्म-शील. उद्यमिन्, उद्योगिन्, सोद्यम, सोद्योग, सोत्साह; *See* **Industrious.** **–ly,** *adv.* श्रमेण, श्रम-आयास-पूर्वं, आ-प्र-यासेन, सयत्नं, सोद्योगं, सोद्यमं, सोत्साहं; कष्टेन, कृच्छ्रेण. **–ness,** *s.* श्रमसाध्यता. 2 उद्योगः, उद्यमः, व्यवसायः, उद्योगशीलता. **–Laboratory,** *s.* रसक्रियास्थानं, रससंस्कारशाला. 2 उद्योग-शिल्प-शाला-गृहं.

Labyrinth, *s.* अतिगहनः प्रदेशः, दुस्तरं or सुगहनं स्थानं, अशक्यनिर्गमः प्रदेशः, गहनं. **–ian,** *a.* गहन, सुदुस्तर.

Lac, *s.* ला(रा)क्षा, अलक्तः-क्तकः, जतु *n.*, यावः, द्रुमामयः. 2 लक्षं.

Lace, *s.* सूत्रं, तंतुः, गुणः. 2 सूत्रजालं, जालाभरणं, जालरूपं, पक्ष्माभरणं. –*v. t.* सूत्रेण बंध् 9 P, or संयुज् 7 U, 10 or संश्लिष् c. 2 जालाभरणैः भूष् 10 or अलं-कृ 8 U.

Lacerate, *v. t.* दॄ 9 P, 10, निर्भिद् 7 P, व्यवच्छिद् 7 P, वि-पट् 10, कृत् 6 P; *See* **Tear.** **–ion,** *s.* विदारः-रणं, निर्भेदः, विपाटनं. 2 भेदः, छिद्रं, संधिः.

Laches, *s.* कालातिपातः, कालव्ययः; उपेक्षा.

Lachrymal, *a.* अश्रुप्रवाहिन्, अश्रूत्पादिन्. 2 अश्रुसंबंधिन्. **–Lachrymatory,** *s.* अश्रुपात्रं भाजनं. **–Lachrymose,** *a.* सास्र, बाष्पाकुल.

Lack, *v.* न धा 3 U or धृ 1 P or भृ 3 U; gen. ex. by हीन, रहित, वर्जित, शून्य in comp., or अ or निर् pr.; 'l. s wisdom' निर्बुद्धिः, अज्ञानः, बुद्धिहीनः, &c. –*s.* अभावः, हीनता, न्यूनता, विरहः, शून्यता. 2 प्रयोजनं; 'l.-lustre' निष्प्रभ, अतेजस्, मंदच्छाय, मलिनकांति; 'l.-brain' निर्बुद्धिः, मतिहीनः, मूढः, मूर्खः.

Lack-a-day, *interj.* अहो, हंत, हा, अहह, बत.

Lack-a-daisical, *a.* ध्यानपर-मग्न, चिंताकुल, उत्कंठित, विषण्ण.

Lacker, Lacquer, *v. t.* लाक्षारसेन छद् 10, कुक्कुभेन लिप् 6 P.

Lackey, *s.* चेटः, दासः, भृत्यः, पार्ष्णिग्राहः, पार्श्वानुचरः.

Laconic,-al, *a.* संक्षिप्त, लघु, अल्प-मित-शब्दक, अविस्तीर्ण, सांक्षेपिक (की *f.*); 'l. message' लघुसंदेशप्रदा सरस्वती. 2 अल्प-मित-भाषिन्. **–ally,** *adv.* संक्षेपेण, संक्षेपतः, अविस्तरेण, मितोक्त्या. **–ism, –Laconism,** *s.* लाघवं; लघूक्ति *f.*, संक्षेपोक्तिः; मितवाक्यं-भाषणं.

Lactary, *s.* क्षीरस्थानं, गोदुग्धस्थानं.

Lactation, *s.* क्षीर-दुग्ध-दानं.

Lacteal, Lactean, Lactious, *a.* क्षीरिन्, क्षीर-दुग्ध-मय (यी *f.*), पायस (सी *f.*). 2 अन्नरसवाहिन्.

Lactiferous, *a.* दुग्ध-क्षीर-वाहिन्.

Lactometer, *s.* दुग्धमापनयंत्रं, दुग्धमापनी.

Lad, *s.* बालः-लकः, बटुः, दारकः, कुमारः-रकः, शिशुः, किशोरः, माणवकः.

Ladder, *s.* नि(निः)श्रेणि-णी *f.*, निश्रयि-(य)णी, अधिरोहिणी, सोपानपथः, सोपानपरंपरा-पद्धति *f.*

Lade, *v. t.* *See* **Load.**

Lading, *s.* नौभारः, पोतस्थद्रव्यं.

Ladle, *s.* दर्वि-र्वी *f.*, कंबि-बी *f.*, खजाका; 'wooden l.' तर्दूः, दारुहस्तकः; 'sacrificial l.' स्रुवः-वा, स्रुच् *f.*, चमसः-सी. **–ful,** *s.* कंबि-दर्वी-पूरकं-मात्रं.

Ladrone, *s.* दस्युः, जाल्मः, कितवः.

Lady, *s.* (As a title) देवी; 'your or her ladyship' अत्रभवती, तत्रभवती, भवती. 2 गृहिणी, स्वामिनी, भार्या. 3 आर्या, वनिता, कुलांगना, कुलस्त्री, कुलवधूः, भाविनी, कुलजा; 'l.-bird,-fly, -cow' इंद्रगोपः, शक्रगोपः, इंद्र-शक्र-कीटः; 'l.-love' प्रिया, कांता,

प्रणयिनी, कामिनी, दयिता; 'l.'s maid' प्रसाधिका, वस्त्रपरिकल्पिका. -**like,** *a.* शिष्ट, सभ्य, सुविनीत, आर्यवृत्ति. 2 पेलव, कोमल, मृदु, सुकुमार.

Lag, *v. i.* मंदायते (D.), चिर(रा)यति (D.), विलंब् 1 A, मंदं मंदं चल्-चर् 1 P. -*s.* अंत्यजाः, हीनजनाः (pl.); हीनवर्णः. -*a.*, -**Laggard,** *a.* मंद, मंदकर्मन्, विलंबिन्, चिरक्रिय, मंदायमान.

Lagoon, *s.* अनूपः, कच्छः, कच्छभूः, जलसनाथः प्रदेशः.

Laic,-al, *a.* *See* under **Lay.**

Laidly, *a.* अप्रिय, जुगुप्सित, बीभत्स.

Lair, *s.* (श्वापदानां) आ-नि-लयः, शयनस्थानं, वासस्थानं, गुहा, बिलं.

Laity, *s.* *See* under **Lay.**

Lake, *s.* सरस् *n.*, कासारः, ह्रदः, सरसी, तडागः-गं, तटाकः-कं; पद्माकरः, सरोवरः, जलाधारः, जलाशयः.

Lamb, *s.* मेषशावः-वकः, अजाशिशुः, मेषवत्सः-पोतः, अविपोतः. -**kin,** *s.* क्षुद्रमेषशिशुः, अविपोतकः.

Lambative, *a.* लेह्य. -*s.* लेह्यं, अवलेहः-हं.

Lambent, *a.* इतस्ततः वेपमान, लोल, कंपमान, तरल, चंचल.

Lame, *a.* खंज, पंगु (गू *f.*), खोड-ल-र, विकलगति, व्यंग; 'l. of a leg' पादेन खंज. 2 (Fig.) दुर्बल, विकल, सच्छिद्र, न्यून. -**ly,** *adv.* खंजवत्. 2 विकलं. -**ness,** *s.* खंजता, पंगुता, गतिवैकल्यं. 2 वैकल्यं, दुर्बलता, न्यूनता, सच्छिद्रता.

Lamel, Lamella, *s.* कवचः, आवेष्टनं, पटलं.

Lament, *v.* विलप् 1 P, रुद् 2 P, आ-,क्रंद् 1 P, अनु-,शुच् 1 P, परि-देव् 1 A, परिदिव् 10 A, क्रुश् 1 P, वि-आ-अभि-°; 'they l. ed his departure' तद्गमनमन्वशोचन्, तद्गमनमुद्दिश्य अक्रोशन्, &c. -**able,** *a.* शोच्य, शोचनीय, शोकविषय, शोकास्पदं, शोकार्ह. -**ation,** *s.* विलापः, रोदनं, परिदेवनानं, परिदेवितं, शोकः, शुच् *f.*, विलपनं, रुदितं, आ-वि-क्रोशः, आ-,क्रंदनं, क्रंदितं. -**ed,** *a.* शोचित; 'the l. Krishna' शोकास्पदीभूतः or स्वर्ग-परलोक-वासी कृष्णः. -**er,** *s.* शोचकः, परिदेवकः.

Lameter, Lamiter, *s.* खंजः, पंगुः.

Lamina, *s.* कवचः-चं, शल्कं, पत्रं, फलकः-कं. -**Laminated,** *a.* सपत्र, फलकिन्.

Lamp, *s.* प्र-,दीपः, दीपकः, दीपिका, दशाकर्षः, दोषास्यः; 'l.-black' कज्जलं, दीपकिट्टं; 'l.-light' दीपप्रभा-प्रकाशः; 'l.-stand' दीपवृक्षः-पादपः-आधारः.

Lampoon, *s.* निंदालेखः, अवगीतं, निंदार्थो लेखः. -*v. t.* लेखैः निंद् 1 P or आक्षिप् 6 P or अव-गै 1 P. -**er,** *s.* निंदकः, अवगायकः, आक्षेपकः.

Lanate,-ed, *a.* लोमश, लोमविशिष्ट.

Lance, *s.* प्रासः, कुंतः, शूलः-लं, शल्यं, शक्ति *f.*, तोमरः. -*v. t.* प्रासेन व्यध् 4 P or निर्भिद् 7 P. -**er,** *s.* प्रासिकः, कौंतिकः, शाक्तीकः, शक्तिधरः-ग्रहः, शूलधरः. -**ing,** *s.* (gums) लेखनं.

Lancet, *s.* शलाका.

Lanch, *v. t.* *See* **Cast.**

Lancinate, *See* **Lacerate, Tear.**

Land, *s.* (Opposed to sea) स्थलं; 'proceeded by l.' प्रतस्थे स्थलवर्त्मना (R. IV. 60): 'the way by l.' स्थलमार्गः-वर्त्मन् *m.* 2 भूः, भूमि *f.*, प्रदेशः, विषयः, राष्ट्रं. 3 मृद् *f.*, मृत्तिका. 4 क्षेत्रं, क्षेत्रभूमिः; 'arable l.' कृष्ट-सीत्य-भूमिः; 'barren l.' मरुः, मरुस्थलं-ली, धन्वन् *m.*; 'marshy l.' कच्छभूः, अनूपभूमिः; 'waste or fallow l.' खिला-अप्रहता-भूमिः; 'gift of l.' भूमिदानं; 'l.-animal' स्थलचरजंतुः, भूमिचरजंतुः; 'l.-fight' स्थलयुद्धं; 'l.-force' स्थलसैन्यं, स्थलयोधाः; 'l.-holder' भू-क्षेत्र स्वामिन् *m.*, क्षेत्रपतिः; 'l.-lord,-lady भूक्षेत्र-स्वामी-मिनी, गृहपतिः, गृहेश्वरः-री. 'l.-locked' भूवेष्टित, भूमिपरिगत; 'l. lotus' स्थलारविंदं, स्थलकमलिनी; 'l.-mark' सीमाचिह्नं, स्थल-भूमि-सीमा, सीमालिंगं; 'l. owner' भूस्वामी, क्षेत्रपतिः-स्वामी; 'l. scape' नयनगोचरीभूतः भूप्रदेशः or भूभागः दृष्टिगत-दृष्टिगोचर-प्रदेशः; भूभागः, प्र-,देशः 'l.-tax' भू-क्षेत्र-करः; 'l. waiter' शौल्किकः. -*v. t.* (पोताद्-नावः) अवतॄ c., अव-रुह् c. (रोपयति); उत्तॄ c., स्थले निविश् c. -*v. i.* अवतॄ 1 P, अवरुह् 1 P, उत्तॄ, निविश् 6 P. -**ed,** *a.* अवतीर्ण, नौकावरूढ, नौकोत्तीर्ण. 2 भूमिसंपन्न, क्षेत्रवत्, भूमिधन; भू in comp.; 'l. property' भूमिद्रव्यं, भूमिः, क्षेत्रं, स्थावरद्रव्यं; 'l. proprietors' भूस्वामिनः. -**ing,** *s.* उत्तरणं; 'l.-place' तरस्थानं, तरः, तरणस्थानं, घट्टः-ट्टी.

Lane, *s.* संकट-संबाध-पथः-मार्गः, कुपथः.

Language, *s.* भाषा, वाणी, वाच् *f.* 2 वचनं, वचस् *n.*, वाक्यं, उक्ति *f.*, व्याहारः, निगदः, भाषणं, भाषितं, आलापः, भारती. 3 भाषासरणि-पद्धति *f.*, वाग्व्यापारः; वचोविन्यासः; 'abusive l.' वाक्पारुष्यं, खलोक्तिः, आक्षेपवचः; आक्षरणं; 'dignity of l.' वचसां प्रौढता.

Languid, *a.* परि-,म्लान, क्लांत, ग्लान, लुलित, अवसन्न, शिथिल, विषण्ण, खिन्न, श्रांत, स्रस्त, विश्लथ, मुक्त; अलस, मंद, शिथिल-क्षीण-बल, श्लथांग-स्रस्तांग (गी *f.*); *See* **Droop.** -**ly,** *adv.* म्लान-ग्लान-वत्, सविषादं, अलसवत्, मंदं, क्लांतमनसा, मुक्तगात्रैः. -**ness,** -**Languor,** *s.* ग्लानि *f.*, म्लानि *f.*, अवसादः, शिथिलता,

क्लांति *f.*, ग्ला(म्ला)नता, मुक्तावयवता; मोहः, बलशैथिल्यं, गात्रस्रंसः, अंगश्लथः, तंद्रा-न्द्रि *f.*, आलस्यं, जडता, जाड्यं, कार्यविमुखता.

Languish, *v. i.* अवसद् 1 P, परि-,क्लम् 1, 4 P, परि-,म्लै-ग्लै 1 P, स्रंस् 1 A, गल् 1 P, शिथिलीभू 1 P, क्षि-विशॄ-खिद्- pass.; ध्वंस् 1 A. 2 (With love) उत्तम् 4 P, उत्कंठ् 1 A, उत्सुक-*a.* भू. **-ing,** *a.* म्लायत्, क्षीयमाण, स्रंसिन्, मुक्त. 2 उत्सुक, उत्कंठित, कामालस; 'with her l. looks' अलसेक्षणा, कामालसदृष्टिः, कामार्द्रदृष्टिः. **-ingly,** *adv.* अवसादेन, अलसवत्. 2 सोत्कंठं, सोत्सुकं; कामालसदृष्ट्या. **-ment,** *s.* अवसादः, ग्लानता; *See* **Languor.** 2 औत्सुक्यं, उत्कंठा, उत्सुकता.

Laniary, *s.* घात-वध-स्थानं. 2 चर्वणदंतः, अग्रदंतः

Lanier, *s.* चर्मबंधः, वरत्रा.

Laniferous, *a.* रोमोत्पादिन्, लोमोद्भवकारिन्.

Lank, *a.* कृश, क्षाम, क्षीण, क्षीणमांस-शरीर; *See* **Lean.** 2 दीर्घतनु, दीर्घदेह. 3 श्लथ, शिथिल. **-ness,** *s.* कृशता, कार्श्यं, क्षामता. &c. **-y,** *a.* कृशदीर्घ, दीर्घक्षाम.

Lantern, *s.* प्रच्छन्नदीपः, सावेष्टनो दीपः, आवृतदीपिका; दीपः, दीपिका; 'l.-jawed' क्षीणवदन.

Lanuginous, *a.* लोमश, लोममय (यी *f.*).

Lap, *s.* उत्संगः, अंकः, क्रोडं. 2 अंचलः-लं; वस्त्रांतः, दशाः-वस्तयः (pl.); 'to place on the l.' क्रोडीकृ 8 U. **-v. t.** पुटीकृ, व्यावृत् c. 2 आ-परि-वेष्ट् 1 A or c.; अवगुंठ् 10, आ-परि-वृ 5 U, क्रोडे नि-धा 3 U. 3 लिह् 2 U, आ-अव-सं°; आ-स्वाद् 1 A; 'l.-dog' अंके पालनीयः कुक्कुरः; 'l. ful' अंकपूरणकं.

Lapidarious, *a.* शिला-प्रस्तर-मय (यी *f.*).

Lapidary, *s.* मणिकारः, रत्नाजीवः. 2 रत्नमणि-च्छिद् *m.*

Lapis Lazuli, *s.* वैदूर्यं, असितोपलः, नीलोपलः.

Lappet, *s.* *See* **Lap (2).**

Lapse, *s.* क्रमः, गति *f.*, प्रवाहः, प्रवृत्ति *f.*, अत्ययः, अतिक्रमः; 'after a l. of time' अथ दिनेषु गच्छत्सु, कालक्रमेण, गच्छता कालेन. 2 स्खलितं, प्रमादः, भ्रमः. 3 स्खलनं, पातः, भ्रंशः, च्युति *f.*, पतनं. **-v. i.** क्रमशः या 2 P or गम् 1 P or सृप् 1 P; शनैः शनैः अति-इ 2 P or अतिक्रम् 1 U, 4 P. 2 भ्रंश् 1 A, 4 P, च्यु 1 A, पत् 1 P, विचल् 1 P, व्युत्क्रम्. 3 स्खल् 1 P, प्रमद् 4 P, भ्रम् 1, 4 P. 4 संक्रम्, अपवृत् 1 A. **-ed,** *a.* पतित, भ्रष्ट, &c. 2 परहस्तगत, संक्रांत, अपवृत्त; 'a l. suit' नियतवेलातीतं कार्यं.

Lapwing, *s.* टिट्टिभः-भकः, कोयष्टिकः.

Lar, *s.* कुल-गृह-देवता.

Larboard, *s.* नौवामभागः.

Larceny, *s.* चौर्यं, स्तेयं; *See* **Theft.**

Lard, *s.* शूकरवसा-मेदस् *n.* 2 शूकरमांसं, वल्लूरं. **-v. t.** शूकरमेदसा पृ 3 U or c. 2 वि-सं-मिश्र् 10. 3 आ-प्यै c.; पुष् 1, 9 P or c.

Larder, *s.* भक्ष्यमांसागारं, भोजनागारं.

Large, *a.* (In size) विशाल, पृथु, बृहत्, स्थूल, विपुल, महत्, गुरु, उरु, पृथुल, आयत, विस्तीर्ण. 2 (Of l. body) महाकाय, स्थूल-विकट-शरीर, पृथु-बृहत्-शरीर; पीन, पीवर. 3 (In number) महत्, गुरु, पुष्कल, विपुल, प्रभूत, प्रचुर, बहु, बहुल, भूरि; 'of l. soul' महात्मन्; 'of l. nature' उदारधी, महात्मन, अकृपणचेतस्. 4 (In age) वृद्ध, वयोधिक; 'larger boy' वर्षीयान् बालः; 'at l.' अपराधीनं, स्वेच्छया, स्वेच्छाचारेण, निर्यंत्रणं, निरवग्रहं, निरवरोधं. 2 सविस्तरं, विस्तरेण, विस्तरशः. 3 पूर्णतया, साकल्येन. **-ly,** *adv.* बहु, भूरि, अतीव, विपुलं, प्राचुर्येण, सु-अति pr. **-ness,** *s.* स्थूलता, बृहत्त्वं, वैपुल्यं, प्राचुर्यं, बहुत्वं, बाहुल्यं; महाकायता, शरीरबृहत्त्वं, पीनता, पीवरता. 2 आयामः, विस्तारः.

Largess, *s.* दानं, वितरणं, पारितोषिकं, उपायनं, उपहारः; *See* **Gift.**

Lark, *s.* भा(भ)रद्वाजः, व्याघाटः, भारवः.

Larum, *s.* आसन्नभयसूचना-घोषणा.

Larva, *s.* कीटः, कीटडिंभः.

Larynx, *s.* कंठनालः-ली, पृकः.

Lascar, *s.* नाविकः, पोतवाहः.

Lascivious, *a.* कामुक, कामिन्, रतार्थिन्, कामासक्त, रतिसुखासक्त, भोगासक्त, लंपट, स्त्रीलंपट, कामप्रवण; *See* **Lustful.** 2 कामहेतुक, काममूलक. **-ly,** *adv.* कामुकवत्, लंपटवत्, भोगासक्तया. **-ness,** *s.* कामुकत्वं, भोगासक्ति *f.*, रतासक्तिः, व्यवायेच्छा, लांपट्यं.

Lash, *s.* कशा, प्रतिष्कशः-षः, चर्मरज्जु *f.*, चर्मबंधः. 2 कशाघातः-ताडनं-प्रहारः. 3 वागसिः, परुषवचनं. **-v. t.** कशया आहन् 2 P or तड् 10 or प्रहृ 1 P. 2 वि-धू 5, 9 U. 6 P. विचल् c., इतस्ततः क्षिप् 6 P or चल् c. 3 वाग्बाणैः भिद् 7 P or तड्, वागसिना प्रहृ; तीक्ष्णं निंद् 1 P; 'l. ed into fury' वाग्बाणैः उत्तेजितक्रोधः; शिलातलप्रतिघातोत्पतनफेनिलाम्भसं (Ka. 133): 'l. ed into foam by striking' &c. जर्जरितजलतरंगविततनीहारं (Mal. 9) 'so as to l. the water into snowy foam.' 4 रज्ज्वा बंध् 9 P: 'worthy of being l. ed' कश्य, कशार्ह.

Lass, *s.* तरुणी, कन्या, बाला, कुमारिका, दारिका.

Lassitude, *s.* खेदः, क्लमः, ग्लानि *f.*; *See* **Languidness.**

Lasso, *s.* पाशः, पाशबंधः-रज्जु *f.*

Last, *a.* अंत्य, अंतिम, अवर, अवतरम, चरम, पश्चिम; शेष-अंत-in comp. 2 गत, अतीत, चरम, पूर्व, भूत. 3 जघन्य, अधम, अपकृष्ट. 4

परम, उत्तम, अत्यंत; 'l. night' गतायां रात्रौ; 'the l. year' गत-अतीत-संवत्सरः, परुत् *ind.*; 'l. but one' उपांत्य, उपांतिक; 'l.-born' अवरज; 'at l.' अंते, अंततः; 'l. part' शेषभागः; 'l. part of the night' उत्तररात्रः, चरमयामः; 'l. half' उत्तरार्धः, पश्चार्धः, परार्धः, 'the year before l.' परारि *ind.*; 'to the l.' शेषं यावत्. -*adv.* अंते, शेषे, अंततः, अवरं, चरमं, अवरतः. -*v. i.* अव-स्था 1 A, स्था 1 P; oft. by अवधिः in comp.; 'l. ing for many days' चिरस्थायिन्, एष ते जीवितावधिः प्रवादः (U. 1) 'will l. through life'; 'this will l. as food for four months' एतेन (अस्माकं) मासचतुष्टयस्य भोजनं भविष्यति; 'the bloom of youth l.s for a few days' कतिपयदिवसस्थायिनी यौवनश्रीः (Bh. II. 2). **-ing,** *a.* स्थायिन्, चिर-दीर्घ-कालस्थायिन्; अनपायिन्, नित्य, स्थिर, ध्रुव, अक्षय, शाश्वत (ती *f.*), अजर, चिरंतन (नी *f.*). **-ly,** *adv.* अंते, अंततः, चरमतः, शेषे, अवरतः.

Latch, *s.* अर्गला-लं, विष्कंभः, अर्गलाबंधः, तालकं, द्वारबंधनी; 'the postern door was on the l.' अर्गलानिरुद्धं पक्षद्वारं.

Latchet, *s.* पादुकाबंधनी.

Late, *a.* विलंबेन आगत or प्राप्त; कालातीत, वेलातीत, समयातीत, अतिक्रांतकाल, अतिकाल, अतीतकाल-समय. **2** अवसित, परिणत, अवसन्न. **3** नूतन, अचिर, प्रत्यग्र, अभिनव, आधुनिक (की *f.*), नातिपुराण, सद्यस्कालीन. **4** अतीत, गत, व्यतीत, भूत; प्राक्तन-पूर्वतन (नी *f.*), पौर्विक (की *f.*), 'at a 'l. hour of the day' परिणते दिवसे, अवसन्नप्राये अहनि; 'at a l. hour of the night' क्षीणभूयिष्ठायां क्षपायां; 'at a l. period of life' परिणते वयसि. -*adv.* विलंबेन, विलंबात्, वेलातिक्रमेण, अतिकालं-समयं, चिरेण, चिरात्, चिरकालेन-लात्; 'to be l.' वेलातिक्रमं कृ 8 U, चिर(रा)यति (D.); 'why are you l.' किमिति चिरायित त्वया; 'l. in life' परिणतवयसि, *See* above; 'too l. in the day' अतिपराह्णे; 'too l. in the evening' अतिसाये. **2** अकाले, असमये. **-ly,** 'of late,' *adv.* इदानींतने काले, नातिचिरात्प्राक्, आधुनिकसमये; अचिरं. **-ness,** *s.* कालातीतता, कालातिक्रमः; परिणामः, परिणति *f.* **-Later,** *a.* उत्तर, अपर, पर, उत्तरकालीन, पाश्चात्य. -*adv.* (on) उत्तरं, उत्तरोत्तरं, पश्चात्, उत्तर-पर-काले.

Latent, *a.* नि-,लीन, गूढ, छन्न, गुप्त, अदृष्ट, अप्रत्यक्ष, अप्रकाश, अप्रकट, अदृश्य, अंतर्हित, निभृत; 'a l. disease' धातुस्थः-शरीरांतर्गतः-रोगः.

Lateral, *a.* पार्श्वीय, पार्श्वस्थ, पार्श्विक (की *f.*). **-ly,** *adv.* पार्श्वभागे, पार्श्वतः, पार्श्वे.

Lath, *s.* सूक्ष्मकाष्ठ-दारु, तनुफलकः-कं.

Lathe, *s.* कुंदः-दं, भ्रमः-मि *f.*, चक्रं.

Lather, *s.* अंजनफेनः, मार्जनतैलफेनः.

Latifolious, *a.* पृथु-विशाल-पर्ण.

Latitude, *s.* अक्षः. **2** (Celestial) निक्षेपः. **3** विस्तारः, विस्तृति *f.*, प्रथिमन् *m.*, आयति *f.* **4** अनियंत्रणं, स्वातंत्र्यं, नियमोपेक्षा, नियमातिक्रमः, शैथिल्यं; 'degree of l.' अक्षांशः; 'l. of a planet' पतनं; 'parallel of l.' अक्षांशवृत्तं. **-Latitudinarian,** *a.* शिथिल, अनियंत्रण, निर्यंत्रण. -*s.* मतस्वातंत्र्यावलंबिन् *m.*, निर्बंधहीनः. **-ism,** *s.* मतशैथिल्यं, विचारस्वातंत्र्यं, अनियंत्रणं.

Latten, *s.* रीति *f.*, पित्तलं.

Latter, *a.* उत्तर, अपर, पर, अवर, अन्य, (*pron. a.*); पश्चिम, चरम, अंतिम; उत्तरोक्त, अवरोक्त; 'former and l.' पूर्वापरं; 'in the l. part of the day' पराह्णे. **-ly,** *adv.* अर्वाक्काले, अधुनातनकाले; *See* **Lately.**

Lattice, *s.* जालमार्गः, गवाक्षः, जालं, गवाक्षजालं, वातायनं; 'l.-work' जालकर्मन् *n.*

Laud, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U, कृत् 10, गुणं वर्ण् 10. -*s.* प्रशंसा, श्लाघा, स्तुति *f.*, गुण-वर्णना-कीर्तनं. **-able,** *a.* श्लाघ्य, स्तुत्य, प्रशस्य, श्लाघार्ह, प्रशंसार्ह, स्तवनोचित; *See* **Praise,-worthy. -ation,** *s.* प्रशंसनं, श्लाघनं. **-atory,** *a.* प्रशंसागर्भ, प्रशंसक, स्तुतिरूप, प्रशंसा-श्लाघा-स्तुति-मय (यी *f.*), प्रशंसाकर (री *f.*). **-er,** *s.* प्रशंसकः, स्तावकः.

Laugh, *v. i.* हस् 1 P, प्र-वि°; स्मि 1 A (l. gently); 'l. violently' उच्चैः हस्, अट्टहासं कृ 8 U; 'l. at' अव-उप-हस्, उपहासास्पदं मन् 4 A, अव-मन्; 'l. in the sleeves' अंतर्-निभृतं-हस्. -*s.*, **-ing, -Laughter,** *s.* हासः, हसनं, हास्यं, हसितं, वि-प्र°; स्मितं; 'a horse-l.' अट्टहासः, उच्चैर्हासः, प्र-अति-हासः; 'an inward l.' अंतर्हासः **-able,** *a.* हासकर (री *f.*), हास्यास्पदं, हास्य. **-er,** *s.* हासकः, हासिन् *m.* **-ing,** *a.* हास्यमुख (खी *f.*), स्मेरमुख, हास्यवदन; 'l.-stock' उपहासास्पदं, हास्यपात्रं. **-ingly,** *adv.* सहासं, विहस्य, सस्मितं.

Launch, *v. t.* (नावं जले) क्षिप् 6 P, मुच् 6 P or c.; प्रविश् c.; वह् c.; 'l. thy hundred-shafted bolt' मुंच शतशोऽशनिं (M. 5). **2** सहसा विसृज् 6 P or प्रक्षिप्, प्रास् 4 U. -*v. i.* जलं प्रविश् 6 P. -*s.* नौमोचनं or जलप्रवेशनं.

Laundress, Launder, *s.* रजकभार्या, निर्णेजकी. **-Launderer,** *s.* रजकः, निर्णेजकः. **Laundry,** *s.* रजकगृहं, वस्त्रधावनशाला.

Laurel, *s.* नारलं (?); 'win l. s' ख्यातिं गम् 1 P, यशः अधिगम्; 'wear your l. s with modesty' लब्धेपि जये मा गर्वाध्मातो भूः; (भाग्येषु अनुत्सेकी भव S. 4).

Lava, *s.* आग्नेयोद्गारः.

Lave, *v. t.* क्षल् 10, धाव् 10; निज् 3 U; *See* **Wash.** **-atory**, *s.* धावनस्थानं. **-er**, *s.* धावन-प्रक्षालन-पात्रं, द्रोणी. **-ment**, *s.* वस्ति *m.f.*

Lavish, *a.* अतित्यागिन्, अतिव्ययिन्, व्ययशील-पर, अपरिमितव्यय, बहुप्रद, मुक्तहस्त. 2 अमित, अपरिमित, अतिरिक्त, अत्यधिक, अति pr. **-***v. t.* अपरिमितं व्यय् 10 (व्यययति), मुक्तहस्तेन दा 3 U or विसृज् 6 P or त्यज् 1 P or वितॄ 1 P or विश्रण् 10 or अप-चि 5 U or वृष् 1 P or अवा-कॄ 6 P; विक्षिप् 6 P. **-er**, *s.* अतिव्ययिन् *m.*, मुक्तहस्तः, व्ययपरः. **-ly**, *adv.* अतिव्ययेन, मुक्तहस्तेन, अपरिमितं, अत्यंतं. **-ment,-ness**, *s.* अति-अपरिमित-व्ययः, महाव्ययः, अतित्यागः, अत्युत्सर्गः, मुक्तहस्तत्वं, बहुप्रदत्वं.

Law, *s.* धर्मः, स्मृति *f.*, व्यवहारः, आचारः; धर्म-स्मृति-व्यवहार-शास्त्रं. 2 विधिः, शासनं, व्यवस्था, नियमः, नि-आ-देशः, नियोगः, सूत्रं, राजाज्ञा, चोदना, व्यवस्था-शासन-पत्रं, मर्यादा, स्थिति *f.*; कार्याकार्यनियमः, विधिनिषेधनियमः. 3 न्यायः, नीति *f.*, धर्मानुसारः, व्यवहारविधिः; 'a code of l. s' धर्मसंहिता, धर्म-स्मृति-शास्त्रं; 'criminal l.' दंडनीतिः-विधिः; 'matter recognizable by l.' व्यवहारविषयः-पदं; 'versed in l.' स्मृतिशास्त्रज्ञ, व्यवहारपंडित; 'common l.' स्मृतिः; 'breaking a l.' व्यवस्थातिक्रमः; 'going to l.' राजसभां-व्यवहारासनं-गत्वा विवादप्रशमनं-निर्णयः; 'to go to l.' विवद् 1 A, व्यव-हृ 1 P; 'against the l.' स्मृतिविरुद्धं; 'l.-breaker' व्यवस्थाभेदिन्-लंघिन्, नियमातिक्रामिन्; 'l.-giver' स्मृति-शास्त्रकारः, व्यवस्थापकः, शासितृ *m.*, विधि-न्याय-प्रवर्तकः; 'l.-suit' अर्थः, कार्यं, व्यवहारपदं; 'lay down a l.' व्यव-स्था c. (-स्थापयति). **-ful**, *a* न्याय्य, शास्त्रविहित, शास्त्रोक्त, धर्म्य, यथान्याय, धर्मसंमत, धर्मशास्त्रानुरूप, शास्त्रसंमत, स्मृत्युक्त, व्यवहार-विधि-प्रोक्तः, विध्यनुसारिन्, अनिषिद्ध, धर्माविरोधिन्; 'l. wife' धर्मपत्नी; 'l. means' धर्मोपायः, न्यायोपायः. **-fully**, *adv.* विध्यनुसारेण, न्यायतः, धर्मेण, धर्मतः, धर्मानुसारेण, स्मृतिशास्त्रानुरूपं, यथान्यायं. **-fulness**, *s.* न्याय्यता, धर्म्यता; धर्मानुसारः, धर्माविरोधः. **-less**, *a.* विध्यपेत, स्मृति-विधि-विरुद्ध, धर्म-न्याय-विरुद्ध, अन्याय्य, अधर्म्य. 2 (Of persons) अनियंत्रण, अनियत उच्छृंखल, स्वेच्छाचारिन्, स्वैरगति, अवश, कामचार, उद्दामवृत्ति; दुराचार, निर्मर्याद, अशिष्ट, आचार-धर्म-भ्रष्ट. **-lessly**, *adv.* अवशं, उच्छृंखलं, दुराचारवत्, धर्मविरोधेन, शास्त्रविरुद्धं. **-lessness**, *s.* कामवृत्ति *f.*, मर्यादातिक्रमः, अनाचारः, आचारभ्रष्टता, नियमातिक्रमः; स्वेच्छाचारः. **-Lawyer**, *s.* विधिज्ञः, न्यायनिपुणः, व्यवहारपंडितः, धर्मशास्त्रज्ञः, धर्मज्ञः, स्मृतिपारगः; अर्थिप्रत्यर्थिपक्षसमर्थकः.

Lawn, *s.* तृणभूमि *f.*, तृणावृता भूः, शाद्वलं स्थानं, सतृण-हरित-स्थलं. 2 क्षौमं, अंशुकं, दुकूलं.

Lax, *a.* शिथिल, श्लथ, स्रस्त, विगलित. 2 मृदु, कोमल, अतीक्ष्णदंड. 3 दुराचार, भ्रष्टचरित्र, धर्म-कर्म-भ्रष्ट; 'l. in bowels' मृदु-अबद्ध-कोष्ठ. **-***s.* अतिसारः, प्रवाहिका. **-ative**, *a.* सारक, रेचक. **-***s.* सारकं. **-ity,-ness**, *s.* शैथिल्यं, अतीक्ष्णता; अनाचारः, मर्यादातिक्रमः; इंद्रियासंयमः, &c.

Lay, *v. t.* धा 3 U, नि-आ°, न्यस् 4 U, नि-विश् c., स्था c. (स्थापयति); सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, आरुह् c (रोपयति); दा 3 U, धृ 1 P; क्रमेण स्था c. or नि-धा; प्रक्लृप् c., प्रयुज् 7 A, 10 (a plot, snare, &c.). 2 आ-स्तृ-स्तॄ 5, 9 U. 3 शम् c. (शमयति), प्र-उप-°; सांत्व् 10, स्थिरीकृ 8 U. 4 शी c.; निपत् c.; 'l. eggs' अंडमोक्षं कृ, अंडानि सू 2, 4 A; 'l. siege' रुध् 7 U, वि-ष्टंभ् 9 P; *See* **Besiege**; 'l. blame on' दोषं समारुह् c. or निक्षिप्; 'l. waste' उप-प्लु 1A, उपद्रु 1 P, उद्-ध्वंस् c., निर्जनीकृ; *See* **Devastate**; 'a sinful action, though done by others, is laid at his doors' पापं कर्म च यत् परैरपि कृतं तत्तस्य संभाव्यते (Mr. 1); 'l. aside' अप-निर्-अस्, त्यज् 1 P, हा 3 P, उत्सृज् 6 P, उज्झ् 6 P; 'l. it aside for a while' मुहूर्तं तत् आस्तां-तिष्ठतु तावत्; (as dress &c.) उद्-वि-मुच् 6 P, अवतॄ c., अवरुह् c.; 'l. hands on' परामृश् 6 P, धृष् c.; 'laid upon him his hand' तं हस्तेन पस्पर्श or परामृशत्; 'l. hold of' धृ, ग्रह् 9 U; *See* **Catch**; 'l. the dust' धूलिं संसिच् 6 P or आ-हन् 2 U; 'l. open or bare' विवृ 5 U, आविष्कृ; स्फुटीकृ, वि-अंज् 7 P or c., स्पष्टी-प्रकटी-कृ; प्रकाश् c. **-before**, उपनि-अस्, उपक्षिप्, पुरो-नि-धा, प्रसृ c., नि-आ-विद् c. **-by**, सं-,रक्ष् 1 P, संचि 5 U. **-down**, न्यस्, निक्षिप्, नि-धा, न्यासीकृ. 2 शी c., निविश् c. 3 विमुच्, परि-,त्यज्, वि-हा. 4 (Oneself) संविश् 6 P, शी 2 A. 5 प्र-णी 1 P, वि-धा (rules &c.); 'l. down arms' युद्धाद्विरम् 1 P, शरणं व्रज् 1 P; 'l. down life' प्राणान् त्यज्. **-in**, संग्रह्, संचि, संरक्ष्. **-on**, पत् c., प्र-युज्, सम्-ऋ c. **-out**, विनि-युज् 7A, 10, प्र-युज्,

ष्पन् 10 (न्यपयति). 2 परि-प्र-क्लृप् c., विन्यस् 4 U, विरच् 10, प्र-युज्, चिंत् 10; *See* **Contrive.** 3 प्रसृ c., विस्तृ c., दीर्घीकृ; प्रकाश् c., प्रकटीकृ 'l. oneself out'; चेष्ट् 1 A, प्रयत् 1 A, उद्यम् 1 A. **-to,** आरुह् c., निक्षिप्; *See* **Ascribe;** 'l. to a ship' नौगतिं रुध् or स्तंभ्. **-up,** नि-धा, रक्ष्, संचि; 'to be laid up,' शय्याग्रस्त-*a*. भू 1 P, उत्थातुं अक्षम-*a*. भू; 'laid up with fever' ज्वरेणोत्थातुमक्षमः. **-Lay,** *s.* गानं, गीतं, काव्यं. 2 आस्तरः-रणं, फलकः-कं. **-*a*.** सामान्य, साधारण (णी *f*.), पुरोहितभिन्न. **-man,** *s.* गृहस्थः, सामान्य-साधारण-जनः, अदीक्षितः, प्राकृतः. **-Laical,** *a*. गृहस्थिन्, गार्हस्थिक (की *f*.), पुरोहितभिन्न, अदीक्षित. **-Laity,** *s.* गृहस्थ-सामान्य-जनवर्गः, प्राकृत-साधारण-जनाः, पुरोहितभिन्नवर्गः.

Layer, *s.* स्तरः; आस्तरः-रणं, फलकः-कं. 2 **Twig,** q. v.

Lazar, *s.* कुष्ठिन् *m.*, श्वित्रिन् *m.*, कोठोपहतः, त्वग्दोषोपहतः; ' l.-house ' कुष्ठिशाला, श्वित्र्यालयः.

Lazy, *a*. अलस, तंद्रिल, जड, मंद, मंथर, तंद्रालु, मंदगति, आलस्यशील, अनुद्योगिन्, उद्योगविमुख (खी *f*.), अव्यवसायशील; शीतक, अनुष्ण, तुंदपरिमृज. **-ly,** *adv*. अलसवत्, जडवत्, मंदं मंदं, जाड्येन. **-ness,** *s.* आलस्यं, मांद्यं, जाड्यं, जडता, तंद्रिका, तंद्रालुता, कार्यद्वेषः, अनुद्योगशीलता, उत्साहविमुखता, अलसशीलता.

Lea, *s.* *See* **Lawn** (1).

Lead, *s.* सीसं, सीसकं, नागं, योगेष्टं, वप्रं; 'red l.' सिंदूरं, नागसंभवं, रक्तचूर्णं, नागजं, नागगर्भं. **-*s*.** नायकत्वं, नेतृत्वं, अधिष्ठातृत्वं, मुख्यत्वं, अग्रगमनं-यानं, पुरःसरणं. **-*v. t*.** नी 1 P, वह् 1 P, प्राप् c., गम् c. (गमयति) (all with two accusatives); आ-ज्ञा 3 A. 2 (Way) दृश् c., आ-निर्-दिश् 6 P. 3 अधि-ष्ठा 1 P, अध्यास् 2 A, प्रणी, आ-निर्-दिश्; पुरस्कृ 8 U; अग्रणीः-नायकः-अग्रेसरः-भू 1 P (with gen.); वसिष्ठाधिष्ठिता देव्यः (U. 1) 'led by Vasishtha '&c., दशरथस्य दारानधिष्ठाय (U. 4;) 'led by the demon ' दानवं पुरस्कृत्य. 4 आकृष् 1 P, प्र-वि-लुभ् c., प्रवृत् c., प्रेर् c., प्रोत्सह् c., नी; मूढः परप्रत्ययनेयबुद्धिः (M. 1) ' has his mind led by the convictions of others. ' 5 (Time) नी, गम् c., अतिवह् c., क्षै c. (क्षपयति), या c. (यापयति); ' led a dissolute life ' विषयसुखनिरतो जीवितमत्यवाहयत्; ' l. ing a life above their station ' स्वस्थानानुचितां-स्वस्थानातिरिक्तां-जीवयात्रां कल्पयंतः. **-*v. i*.** (On) अग्रे-पुरः-पुरतः-अग्रतः-भू or गम् 1 P or वृत् 1 A or स्था or चर् or सृ 1 P. 2 (To) (lit.) गम्, या 2 P; ' on the way l. ing to Chitrakûta ' चित्रकूटयायिनि वर्त्मनि (U. 1). 3 (Cause) ex. by dat. of noun with or without भू, आवह्, उत्पद् c., जन् c. (जनयति); 'advice to fools l.s to their provocation' उपदेशो हि मूर्खाणां प्रकोपाय (भवति) (H. 3). **-ed,** सीसकयुक्त. **-en,** *a*. सीसकनिर्मित, **-er,** *s.* नायकः, नेतृ *m.*, मार्गदर्शकः, मार्गोपदेशकः (lit.); मुख्यः, मुखरः, अग्रणीः, प्रमुखः, अधिपः, ईश्वरः, पतिः, अध्यक्षः, अधिपतिः, अधिष्ठातृ *m.* 2 पुरोगः-गमः, अग्रगः, अग्र-(ग्रे)सरः, पुरःसर, पुरोगामिन् *m.*; ' l. of an army ' सेनानीः, चमूपतिः, योधाध्यक्षः, सेनानायकः; ' l. of a religious sect ' गुरुः, आचार्यः. **-ership,** *s.* नायकत्वं, आधिपत्यं. **-ing,** *a*. अग्रग, पुरोगामिन्, पुरःसर, पुरोगम, प्राक्-अग्र-गामिन्. 2 अग्र, अग्र्य, मुख्य, उत्कृष्ट, प्रमुख, परम, उत्तम, प्रधान in comp. 3 (To) आवह, कर (री *f*.) in comp.; ' l. to happiness ' कल्याणावह, कल्याणकर, कल्याणोदर्क. **-*s*.** नयः, नीति *f*., नेतृत्वं; ' l.-strings ' आलंबनसूत्राणि; ' hold or keep in l.-string ' आत्माधीन-*a*. कृ, स्ववशं नी, नियम् 1 P. **-Led.** *a.* नीत, प्रेरित, अधिष्ठित, &c.; ' l. by ' ex. by पुरःसर, पुरोगम, प्रमुख, आदि in comp.

Lead-wort, *s.* पाठिन् *m.*, चित्रकः, वह्निसंज्ञकः.

Leaf, *s.* पत्रं, पर्णं, छदः, दलः-लं, पलाशं, छदनं; (of a book) पत्रं; (of a door) कपा(वा)टः-टं-टी, अररं-री; ' fallen l. ' प्रपर्णं; ' faded l. ' शीर्णपर्णं; ' to strip off the leaves ' निष्पत्रीकृ 8 U. **-less,** *a*. निष्पत्र, अपर्ण, निष्पर्ण, निर्दल, पत्र-पर्ण-दल-हीन. **-let,** *s.* पत्रकं, सूक्ष्म-लघु-पत्रं. **-y,** पर्णावृत, पर्णमय (यी *f*.), बहुपर्ण, बहुपत्र-दल, सपत्र, सपर्ण, पर्णिन्.

League, *s.* संधिः, साहित्यं, संघातः, ऐक्यं, संयोगः, संघट्टनं, अन्योन्योपकारप्रतिज्ञा. 2 गव्यूति *f*. **-*v. i*.** संधा 3 U, पक्षीय-*a*. भू 1 P, संहन्-संयुज्-pass., संमिल् 6 P, संधिं कृ 8 U, संघट्ट् 1 A; ' l.ed with the enemy ' शत्रुपक्षे स्थित. **-ed,** *a*. कृतसंधि, संधित, संहत, संघातवत्, संयुक्त, कृतसंसर्ग, संसृष्ट, मिलित; ' having l. ' संभूय, मिलित्वा. **-er,** *s.* संगिन् *m.*, संसर्गिन् *m.*, सह-संभूय-कारिन् *m.*

Leak, *s.* छिद्रं, रंध्रं, संधिः. 2 धारा, स्रवः, स्पंदः, द्रवः. **-*v. i*.** (अलक्षितं) स्रु 1 P; परिस्रु, रा 4 A, क्षर् 1 P गल् 1 P, स्यंद् 1 A; आयुः परिस्रवति भिन्नघटादिवांभः (Bh. ii. 109) ' like water l. ing from a broken jar ' &c. **-ing,** *s.* स्रवः, क्षरणं,

निस्यंदः, स्यः. -*y*, *a*. छिद्रपूर्ण, स्रवणशील, सच्छिद्र, सरंध्र.

Lean, *a*. कृश, परि-, क्षाम-क्षीण, अवसन्न, तनु, क्षीणशरीर-मांस, कृशांग (गी *f*.); 'you are growing l.-er and l.-er day by day' अनुदिवसं परिहीयसेऽङ्गैः (S. 3); 'l. ness of body' शरीरसादः. -*s*. स्नायुः, वस्नसा. -*v. i*. अव-लंब् 1 A, आ-सं-श्रि 1 U; 'l. ing on a mango stick' अवलंब्य चूतयष्टिं; मदलेखया दत्तहस्तावलंबा (Ka 206) 'l. ing on M.'s arm.' **2** पक्षं आश्रि or अवलंब्, प्रवण-*a*. भू 1 P. **3** आ-अव-नम् 1 P, नम्रीभू, बहिर्लंब्, तिरः-तिर्यक् लंब्. -*v. t*. उप-धा 3 U, निविश् c., न्यस् 4 U; वामहस्तोपहितवदना (S. 4) 'l. ing her face on her left hand'; also ex. by (*v. i.*). -**ing**, *a*. आलंबिन्, संश्रित, आनत; प्रवण, बहिर्लंब, प्रलंब, वक्र. -*s*. प्रवणता, सं-आ-श्रयः, आलंबनं. -**ness**, *s*. कृशता, कार्श्यं, क्षीणता, क्षामता, अव-,सादः, शोषः, शरीरशोषणं.

Leap, *v. i*. प्लु 1 A, उत्-प्लु, वल्ग् 1 P; नृत् 4 P; 'l. down' अवतॄ 1 P, अवप्लु; 'l. up' उत्पत्, उत्प्लु; 'l. over' लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अति-इ 2 P. -*s*. प्लुति *f*., प्लुतं, प्लवः, वल्गितं, झंपः, प्लवनं; 'quick (deer's) l.' हरिणप्लुतं; 'going by l. s' प्लुतगति, प्लवग. -**ing**, *s*. प्लवनं, वल्गितं, प्लुतिः; 'l. over a period' मंडूकप्लुतिः.

Learn, *v. t*. शिक्ष् 1 A, अधि-इ 2 A, पठ् 1 P, अधिगम् 1 P, अभ्यस् 4 U; अभ्यासेन विद्यां लभ् 1 A or प्राप् 5 P. -*v. i*. ज्ञा 1 U, अवगम्, विद् 2 P, बुध् 1 P, उपलभ्, श्रु 5 P, गृहीतार्थ-*a*. भू 1 P; *See* **Know**. -**ed**, *a*. विद्वस् (दुषी *f*.), विपश्चित्, ज्ञानिन्, विद्या-विशिष्ट-संपन्न-वत्, कृत-उपात्त-विद्य पंडित, बुध, प्रा(प्र)ज्ञ; ज्ञानवत्, व्युत्पन्न, बहुश्रुत, सूरि, विद्यावृद्ध, साक्षर. **2** अधीतिन्, विचक्षण, विज्ञ, कुशल, निपुण, प्रवीण, चतुर; कोविद, ज्ञ, विद् in comp. **3** (Of books &c.) पांडित्यस्य सूचक, ज्ञानस्य गमक; 'a l. man' पंडितः, विपश्चित्, सूरिः, बुधः, &c.; 'l. in law' स्मृतिज्ञ, न्यायविद्. -**edly**, *adv*. पंडितवत्, प्रज्ञवत्, सज्ञानं, निपुणतया, सकौशलं. -**er**, *s*. शिष्यः, छात्रः, अध्येतृ *m*., विद्यार्थिन् *m*. -**ing**, *s*. विद्या, विद्वत्ता, विद्वत्त्वं, ज्ञानं, पांडित्यं, व्युत्पत्ति *f*., प्राज्ञता, विद्यासंपद् *f*. **2** (Act) अध्ययनं, शिक्षणं, अभ्यासः, विद्यार्जनं, विद्याप्राप्ति *f*., ज्ञानागमः. **3** शास्त्रं, विद्या; 'sacred l.' श्रुति *f*., निगमज्ञानं; 'he affects great l.' पंडितंमन्यः, पंडितायते (D.).

Lease, *s*. पट्टः, पट्टोलिका. -*v. t*. आविहितकालात् निरूपितमूल्येन दा 3 U or विसृज् 6 P.

Leasing, *s*. *See* **Falsehood**.

Leash, *s*. चर्मबंधः, चर्मरज्जु *f*. **2** त्रयं, त्रितयं.

Least, *a*. अणु, अल्प, स्तोक, अत्यल्प, अल्पिष्ठ, कनिष्ठ, स्तोकतम, अल्पतम, क्षोदिष्ठ; 'the l. sorrow' अणुरपि शोकः; 'the l. particle' लवः, लेशः, अणुः कणः. -*adv*. स्तोकं, अल्पिष्ठं, किंचित्, कियत्; 'in the l.' मनागपि, अल्पमपि, स्तोकांशेनापि, स्तोकमपि, लेशमपि, किमपि, किंचिदपि; 'at l.' ex. by अवर-*a*. in comp.; 'witnesses should be at l. three' त्र्यवराः साक्षिणो ज्ञेयाः (Y. II. 69); 'at l. 100 Rs.' शतावरा रूपकाः; oft. by तावत्, 'at l. once' सकृदपि तावत्.

Leather, *s*. परिष्कृतं चर्म; 'l.-bag' चर्मभस्त्रिका, चर्मप्रसेविका; 'l.-bottle' कुतू *f*., 'a small l.-bottle' कुतुपः, 'l.-dresser' चर्मकृत्, चर्मकारः; 'l.-seller' चर्मविक्रयिन्. -**Leathern**, *a*. चर्मकृत-निर्मित, चर्ममय (यी *f*.), चर्म in comp.

Leave, *s*. अनुज्ञा-ज्ञानं, अनुमति *f*., अनुमोदनं. **2** आमंत्रणं, आप्रच्छनं; 'to take or ask l. of' आमंत्र् 10 A, आप्रच्छ् 6 A; *See* **Adieu**; 'to give l.' अनु-ज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A. -*v. t*. त्यज् 1 P, हा 3 P, उत्सृज् 6 P, उज्झ् 6 P, रह् 1 P 10, परिहृ 1 P, वर्ज् 10, निर्-,मुच् 6 P. **2** निर्गम् 1 P, अपगम्, अप-इ-या 2 P, अपसृ 1P, अपक्रम् 1 U, 4 P, (all with abl.). **3** मृत्युपत्रेण दा 3 U; 'estate left (after death)' रिक्थं. **3** विरम् 1 P, निवृत् 1 A (with abl.); मुच्, त्यज्, अपास् 4 P; oft. ex. by स्था 1 P, आस् 2 A; 'l. it now' तिष्ठतु-आस्तां तदधुना. **4** निक्षिप् 6 P, न्यस्, सम्-ऋ c. (अर्पयति); 'l. everything to him' सर्वं तदधीनं कुरु. **5** शिष् 7 P, or c., अव-परि°; उद्-वृत् c., 'nothing was left' न किमप्यवशिष्टं; 'to be left' शिष् pass.; 'we being left behind' अस्मास्वपहीनेषु (S. 2). -*v. i*. निर्गम्, अप-या, विरम्, &c. -**for**, प्र-स्था 1 A (with acc.). -**off**, विरम्, निवृत्, त्यज्; *See* above. 'the peacock left off dancing' परित्यक्तनर्तनो मयूरः (S.4). 'when it left off raining' शांते पानीयवर्षे (H. 3). -**out**, वृज्, परित्यज्. -**Leavings**, *s*. शेषः-षं, परि-अव°; शिष्टं, अव-परि°, शेषभागः-खंडः, उद्वर्तः, उच्छिष्टं. **2** मलं; 'l. of food' शेषान्नं, भक्षित-भुक्त-शेषः-षं, भुक्तावशिष्टं, उच्छिष्टं, भुक्तोज्झितं; 'one who eats l.' शेषभोजिन्, उच्छिष्टाशनः.

Leaven, *s.* किण्वं, नग्नहुः, कारोत्तरः, मंडः-डं. —*v. t.* दुष् c. (दूषयति); रंज् c.

Leacher, *s.* लंपटः, कामासक्तः, कामुकः, स्त्रीपरः-लंपटः, सुरतार्थिन् *m.* **—ous,** *a.* कामुक, कामासक्त, सुरतार्थिन्, स्त्रीपर; *See* **Lustful. —ously,** *adv.* लंपटवत्, कामुकवत्. **—ousness,-y,** *s.* **Lust,** q. v.

Lection, *s.* पाठः. 2 पाठांतरं, पाठभेदः.

Lecture, *s.* प्रपाठः, व्याख्यानं, शासनं, अध्यापनं; 'it is easy to read l. s to others' सुखमुपदिश्यते परस्य (Ka. 156) (*cf.* परोपदेशे पांडित्यं). **2** वाग्दंडः, निर्भर्त्सनवाक्यं. —*v.* पठ् c., अधि-इ c. (अध्यापयति), शास् 2 P, उपदिश् 6 P. **2** निर्भर्त्स् 10 A, निंद् 1 P, गर्ह् 1, 10 A. **—er,** *s.* पाठकः, अध्यापकः, शिक्षकः, उपदेशकः, प्रवक्तृ *m.*, वादिन् *m.*, व्याख्यातृ *m.*

Ledge, *s.* कटकः-कं, कूटं. **2** शिला, शिलाफलकं. **3** फलकः-कं, आस्तरः. **4** आलि-ली *f.*, आवलि-ली *f.*

Ledger, *s.* (बृहत्) गणनापुस्तकं.

Lee, *s.* निर्वातस्थानं-देशः. **2** वाताभिमुखी दिक्. **-ward,** *adv.* अनुवातं, वातानुलोमं.

Leech, *s.* रक्तपा, जलौ(लू)का, जलौकसः (*f.* pl.); जलसर्पिणी, रक्तपायिनी, जलजंतुका. **2** भिषज् *m.*, वैद्यः, चिकित्सकः.

Leek, *s.* कंदः-दं.

Leer, *s.* कटाक्षः, दृष्टिविक्षेपः, दृक्पातः, अर्धवीक्षणं, साचिविलोकितं, अपांगदर्शनं. **2** कुस्मितं. —*v. t.* कटाक्षेण ईक्ष् 1 A or दृश् 1 P, साचि-तिर्यक्-विलोक् 1 A, 10. **2** कुस्मि 1 A. **—ing,** *a.* अपांगदर्शिन्, साचि-तिर्यक्-दृष्टि. **2** कुस्मेर.

Lees, *s.* मलं, किट्टं, उच्छिष्टं.

Left, *a.* वाम, सव्य, दक्षिणेतर; 'l.-handed' वामहस्त, सव्यसाचिन्; 'to the l.' वामेन, वामतः.

Leg, *s.* जंघा, प्रसृता, पादः; 'swelling of the l.' श्लीपदं; 'having a swelled l.' कुंभपादः-पदी; 'long-l. ed' दीर्घपाद-द्, दीर्घजंघ. **—Legging,** *s.* जंघारक्षणं.

Legacy, *s.* उत्तरदानं, मृत्युलेखार्पितदानं.

Legal, *a.* धर्म्य, न्याय्य, स्मार्त (र्ती *f.*), व्यवहारानुरूप, न्यायानुसारिन्, शास्त्रविहित, शास्त्रोक्त, स्मृत्युक्त, धर्म-न्याय-अनिषिद्ध; *See* **Lawful. 2** स्मृति, धर्म, व्यवहार, in comp.; 'l. proceeding' व्यवहारः; 'wrong l. opinion' अव्यवस्था; 'written l. opinion' पह्रोलिका. **—ity,** *s.* न्याय्यता, धर्म्यता, धर्म-शास्त्र-अनुसारः; **2** कर्ममार्गसेवा, कर्मनिष्ठा. **—ize,** *v. t.* व्यवस्था c. (स्थापयति), शास्त्रसंमत-*a.* कृ 8 U, कृ with (*a.*). **—ly,** *adv.* धर्मेण, न्यायेन धर्मतः, न्यायतः; यथाधर्मं, यथान्यायं, धर्मानुसारेण.

Legate, *s.* दूतः, प्रणिधिः. **—Legation,** *s.* दूत-धर्मः-क्रिया, दौत्यं.

Legatee, *s.* मृतारिक्थभागिन् *m.*, उत्तराधिकारिन् *m.* **—Legator,** *s.* उत्तरदानकारिन् *m.*

Legend, *s.* कथा, उपाख्यानं, आख्यायिका, पुरावृत्त-पुराण-कथा, पुरावृत्तं, लोक-जन-कथा, इतिहासः, पुराणं. **—ary,** *a.* पौराणिक (की *f.*), पुराणोक्त, पुराणकथित. —*s.* ऐतिहासिकः, पुराणकथकः.

Leger-de-main, *s.* हस्तलाघवं-चापल्यं माया, कुहका-कं, इंद्रजालं.

Legible, *a.* व्यक्ताक्षर, सुवाच्य, निर्वाच्य, सुव्यक्त सुस्पष्ट, स्पष्टाक्षर. **—Legibly,** *adv.* सुस्पष्टं, व्यक्ताक्षरैः, सुव्यक्तं.

Legion, *s.* चमूः, सेना, वाहिनी; *See* **Force. 2** सैन्य-दलं-गुल्मः-व्यूहः-समूहः. **3** चक्रं, निवहः; 'their name is a l.' अतिसंख्याः-संख्यातीताः-ते.

Legislate, *v. i.* व्यवस्थां वि-धा 3 U or कृ 8 U; विधीन् रच् 10 or प्रक्लृप् c. or स्था c. (स्थापयति), व्यवस्था c. **—ion,** *s.* विधिप्रकल्पनं, व्यवस्था-नियम-विधानं, विधि-नियम-व्यवस्था. **—ive,** *a.* व्यवस्थापक, विधिकारिन्. **—or,** *s.* व्यवस्थापकः, शासितृ *m.*, शास्तृ *m.*, न्यायप्रवर्तकः, व्यवस्थाकारः. **—ure,** *s.* व्यवस्था-विधि-विधायिनी सभा.

Legitimate, *a.* न्याय्य, धर्म्य, उचित, यथायोग्य, यथान्याय; *See* **Lawful, Legal. 2** सत्य, यथार्थ. **3** धर्मज, औरस (सी *f.*), औरस्य, उरस्य, धर्मपत्नीज, स्वजात, सुजन्मन्; 'a l. wife' धर्मपत्नी; 'a l. son' उरस्यः, औरसः-स्यः. —*v. t.* औरसीकृ 8 U. **—ly,** *adv.* यथान्यायं, धर्मेण, न्यायतः, धर्मानुसारेण, यथाधर्मं, युक्तं, यथोचितं, यथार्थं. **—Legitimacy,** *s.* न्याय्यता, धर्म्यता, यथार्थता, युक्तता, औचित्यं. **2** औरसत्वं, सुजन्मन् *n.*, धर्मजत्वं, औरसजन्मन् *n.*

Legume, Legumen, *s.* शमी, शिंबा, मुद्गः, शिंबिका. **2** शमीधान्यं.

Leisure, *s.* अवसरः, अवकाशः, विश्रामः, क्षणः, कार्य-निवृत्ति *f.* -विच्छेदः, विश्रांति *f.*, 'being at l.' लब्धावकाश, प्राप्तावकाश, प्राप्तावसर, निर्व्यापार, लब्धक्षण, कार्यरहित. **—ly,** *a.* मंथर, मंद, अशीघ्र, अक्षिप्र, अत्वरित, सावकाश. —*adv.* 'at leisure,' मंदं मंदं, शनैः, अशीघ्रं, अक्षिप्रं, यथावकाशं, प्राप्तावसरं.

Lemon, *s.* जंबी(म्बि)रः, जभः, जंभीरः, जंभरः-लः, दंतशठः, फलपूरः, बीजपूरः; रुचकः, मातुलुंगकः; (fruit) जंबीरं, जंभफलं &c.

Lemonade, *s.* जंबीररसः.

Lemures, *s.* *See* **Devil.**

Lend, *v. t.* (अभिहितकालात्) दा 3 U, 1 P, सम्-ऋ c. (अर्पयति) निक्षिप् 6 P, न्यस् 4 U; 'l. money' ऋण दा 'l. money at

interest' कुसीदं कृ 8 U; 'l. one's hand to' उपकृ, अनुग्रह् 9 P; *See* **Help**; 'l. one's ear to' श्रु 5 P, सावधानो भूत्वा आकर्ण् 10. **–er,** *s.* उत्तमर्णः, ऋणदायिन् *m.*, ऋणदः. **–ing,** *s.* ऋणदानं, ऋणसमर्पणं.

Length,-en, *See* under **Long.**

Lenient, *a.* सौम्य, मृदु, अतीक्ष्ण, कोमल, अतीव्र, अपरुष; क्षमावत्, क्षमिन्, सदय, कृपालु, दयार्द्र. 2 सान्त्वकारिन्, साम in comp.; 'a l. measure' सामोपायः, सामोपचारः, सामप्रयोगः. **–ly,** *adv.* अनुग्रं, अतीक्ष्णं, सौम्यं, सदयं, अपरुषं, क्षमापूर्वं. **–Lenity, –Leniency,** *s.* सौम्यता, मृदुता, अतीक्ष्णता, अतीव्रता, कोमलता, क्षमा, क्षमाशीलता, दया, कृपार्द्रभावः, कृपा; सामन् *n.*, सामबुद्धि *f.* **–Lenitive,** *a.* शमक, शांतिद, शांतिकर (री *f.*). 2 स्निग्ध, चिक्कण. **–***s.* प्र-उप-शमनं, क्लेशापहं, शूलघ्नं.

Lens, *s.* काचः; 'convex l.' मध्योन्नतकाचः; 'concave l.' मध्यनिम्नकाचः; 'a double convex l.' यवः; 'a crystal l.' सूर्यकांतः, अर्काश्मन् *m.*, दीप्तोपलः.

Lenticular, *a.* मसूरोपम.

Lentiform, *a.* यवाकृति, यवरूप.

Lentigo, *s.* जटु(डु)लः, कालकः, पिप्लुः. **–Lentiginous,** *a.* जटुलिन्, कालकयुक्त.

Lentil, *s.* मसु(सू)रः-रा.

Lentous, *a.* सांद्र, श्यान, घन. **–Lentor,** *s.* सांद्रता, श्यानता.

Leo, *s.* सिंहः, सिंहराशिः. **–Leonine,** *a.* सैंह (ही *f.*), सिंहशील-धर्मन्.

Leopard, *s.* चित्रकः, चित्रव्याघ्रः.

Leper, *s.* कुष्ठिन् *m.*, श्वित्रिन् *m.*, कुष्ठरोगिन् *m.*, कुष्ठपीडितः. **–Leprosy,** *s.* कुष्ठं, श्वित्रं, कोठः, मंडलकं, कुष्ठरोगः, त्वग्रोगः, दुश्चर्मन् *n*, 'black l.' महारोगः, महाव्याधिः, रक्तकुष्ठं; 'wasting l.' गलत्कुष्ठं. **–Leprous,** *a.* कुष्ठिन्, श्वित्रिन्, कुष्ठपीडित.

Lesion, *s.* अपकारः, पीडा, क्षति *f.*

Less, *a.* न्यून, ऊन, अल्पतर, अल्पीयस्, क्षुद्रतर, स्तोकतर, सूक्ष्मतर. **–***adv.* न्यूनं, अल्पं, &c.; 'no l. than' ex. by अवर-*a.*; त्र्यवराः साक्षिणः; 'much l.' किमुत, किं पुनः, किमु; 'a little l. than 10,000 years' किंचिदूनं शरदामयुतं (R. x. 1);); (as a suffix) ex. by अ, निर्, विहीन, रहित, वर्जित, वीत, विगत, in comp. **–en,** *v. t.* न्यूनीकृ 8 U, ऊन् 10, ह्रस् c., अप-चि 5 U, लघूकृ, लघयति (D.), क्षि 1, 5 P or c. **–***v. i.* ह्रस् 1 P, न्यूनीभू 1 P, अल्पीभू, क्षि-अपचि-pass. **–er,** *a.* क्षुद्रतर, &c.

Lessee, *s.* पट्टोलिकाधारिन् *m.*

Lesson, *s.* पाठः, अध्यायः. 2 शासनं, उपदेशः, बोधः-धनं, शिक्षा. 3 वाग्दंडः, भर्त्सनं; take l. from' उपदेशं ग्रह् 9 U. **–***v. t.* उपदिश् 6 P. शास् 2 P.

Lest, *conj.* नोचेत्, अन्यथा, 'love not sleep l. thou come to want' तंद्रासक्तो मा भव नोचेत् अकिंचनो भविष्यसि; sometimes ex. by न इति or कदाचित् with pot. or, मा with simple future or imperative; मा कस्यापि तपस्विनो हस्ते पतिष्यति (S. 2) 'l. she fall into the hands &c.' मास्य विकारो वर्धतां (M. 4); 'l. he should kill us' मा नो हिंसीदिति; 'beware l. you be enticed by women' तथा प्रयतेथा यथा न प्रलोभ्यसे वनिताभिः (Ka. 109.)

Let, *v. t.* अनु-ज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A, सह् 1 A; oft. ex. by the imperative of aorist forms without अ; 'l. it not so happen' एवं मा भूत्. 2 भाटकेन दा 3 U; मूल्येन दा or विसृज् 6 P, 3 रुध् 7 U, निवार् 10: स्तंभ् 9 P. 4 (Blood) स्रु c., मोक्ष् 10; *See* **Bleed**; 'l. alone' न उपद्रु 1 P, न बाध् 1 A, oft. by आस् 2 A, स्था 1 P; 'now l. it alone' आस्तां तत्तथैव, 'l. go,' 'l. loose' मुच् 6 P or c., मोक्ष्, शिथिलीकृ 8 U; शिथिलयति (D.), स्रंस् c., विसृज्, श्र(श्रं)थ्-श्लथ् 1 P, 10; 'l. ing his hand go' मुक्त-स्रस्त-शिथिलित-हस्तः; 'l. slip' मुच्, विक्षिप् 6 P, मुधा या c. (यापयति). **–down,** अवतॄ c., अवरुह् c. (रोपयति), अव-नि-पत् c., अवमुच्, अवसृज्, अधःनि-धा 3 U or स्था c (स्थापयति). **–in,** प्रविश् c.; अभ्यंतरीकृ. **–off,** निर्-विमुच्; मास्, क्षिप्, ईर् c., विसृज्. मोक्ष्; 'l. off with a fine' दंडदानेन विमुक्त. **–out,** मुच्, मोक्ष्. 2 भंज् 7 P, भिद् 7 P, प्रकाश् c. (as secrets). 3 पण्येन दा.

Lethal, *a.* *See* **Deadly** under **Die.**

Lethargy, *s.* जाड्यं, मंदता, निद्रालुता, आलस्य, तंद्रा, तंद्रि-द्री *f*, जडबुद्धित्वं, निद्रालसता, कार्यजडता, कार्यद्वेषः, अतिमांद्यं. 2 घोर-गाढ-निद्रा, निर्भरनिद्रा. **–ic,** *a.* निद्रालु, निद्रालस, निद्राशील, जड, मंद, जडबुद्धि, सुप्तमति; कार्यजड, कार्यविमुख (खी *f.*); आलस्यशील. **–ically,** *adv.* जडवत्, मंदवत्. **–icalness,** *See* (*s.*)

Lethe, *s.* विस्मृति *f.*, विस्मरणं, स्मृतिनाशः-लोपः. 2 वैतरणी.

Letter, *s.* अक्षरं, वर्णः; 'printing l.' मुद्राक्षरं. 2 लेखः, पत्रं, लेख्यं, संदेशपत्रं; 'by l.' पत्रद्वारेण; 'l. from an inferior to a superior' विज्ञप्ति-विज्ञापना-पत्रं; 'l.-carrier' पत्रवाहः, लेखहारः. 3 शब्दार्थः, अक्षरार्थः, वाक्यार्थः, वचनं; 'obey orders to the l.' यथावचनं आज्ञामनुरुध् 4 A. 4 (Letters) विद्या, ज्ञानं; 'a man of l. s' कृतविद्यः, विद्वान्, *See* **Learned**; 'l. by l.' अक्षरशः

'a dead l.' लुप्तार्थं वचनं. —*v. t.* अक्षरैः अंक् 10 or मुद् 10. **-ed,** *a.* अक्षरांकित, अक्षरमुद्रित-चिह्नित. 2 कृतविद्य, उपात्तविद्य; *See* **Learned.**

Lettuce, *s.* हरितकं, शिग्रुः.

Levant, *a.* पूर्वदेशज, प्राग्भव, पौरस्त्य, पूर्वदिक्स्थ. —*s.* पूर्वदेशः, प्राग्देशः.

Levee, *s.* राजदर्शनं, राजदर्शनमेला, दर्शकमेला.

Level, *a.* सम, समस्थ, सपाट, समरेख, समभूमिस्थित; 'lie l. with the ground' भूमिसात्कृ pass. 2 क्षितिजसमसूत्र; 'a l. ground' समभूमि *f.*, सानु *m. n.*, प्रस्थः, समस्थलं-ली. —*s.* समं, समभूमिः- स्थलं, समतलं-पृष्ठं-देशः, प्रस्थः, प्रदेशसमता, पाटः. 2 समता, तुल्यता, साम्यं, तुल्य or सम-भावः or वृत्ति *f.*; 'reduced to the l. of the poor, दरिद्रसमतां नीत-गमित; 'on a l. with' सम, तुल्य, समान; 'along the l.' अनुप्रस्थं. 3 लक्ष्यसूत्रं-देशः. 4 नियमः, सूत्रं. —*v. t.* समीकृ 8 U; समस्थलीकृ. 2 लक्ष्यीकृ, उद्दिश् 6 P. सं-धा 3 U, वेर् c, मुच् 6 P, क्षिप् 6 P. **-ler,** समकारिन् *m.*, विशेषनाशकः, भेद-भावलोपकः. **-ness,** *s.* समता, साम्यं, समभूमिभावः.

Lever, *s.* उत्तोलनदंडः; तुलायंत्रं.

Leveret, *s.* शशशिशुः-शावकः.

Leviathan, *s.* तिमिः, तिमिंगलः.

Levigate, *v. t.* चूर्ण् 10, क्षुद् 7 U, पिष् 7 P. 2 श्लक्ष्णीकृ 8 U, परिष्कृ.

Levitate, *v. t.* लघूकृ 8 U.

Levitical, *a.* याजकीय, पुरोहितसंबंधिन्.

Levity, *s.* लघुता, लाघवं, लघिमन् *m.*, गौरवहीनता. 2 चापल्यं, चांचल्यं, तरलता, लोलता, चापलं, लौल्यं.

Levy, *v. t.* (Forces) समा-हृ 1 P, शस्त्राणि ग्रह् c., युद्धे व्या-पृ c. or प्रवृत् c. 2 (A tax) ग्रह् 9 U, आदा 3 A, दा c. (दापयति); 'l. ed taxes from them' स ताभ्यो बलिमग्रहीत् (R. i. 18). —*s.* सैन्यसमाहारः. 2 दापनं, ग्रहणं 3 सैन्यसमूहः.

Lewd, *a.* कामुक, कामवश, सुरतार्थिन्, लंपट, भोगासक्त, कामासक्त; *See* **Lustful.** 2 दुष्ट, दुराचार, दुर्वृत्त, दुरात्मन्, पापात्मन्. **ly,** *adv.* कामुकवत्, लांपट्येन. **-ness,** *s.* लांपट्यं, भोगासक्ति *f.*, रतार्थिता, व्यवायेच्छा. 2 दुष्टता, दुराचारता, दौरात्म्यं.

Lexicon, *s.* कोशः-षः; अभिधानं, शब्दसंग्रहः-कोशः, निघंटुः. **-Lexicographer,** *s.* कोशकारः. **-Lexicography,** *s.* कोशरचना.

Liable, *a.* योग्य, अधीन, अर्ह, वश in comp.; gen. ex. by अर्ह् 1 P, पात्रं, आलु or शील in comp., or by pot. pass. part.; 'l. to punishment' दंडनीय, दंडयोग्य, दंडार्ह; 'l. to be blamed' निंदापात्रं; 'l. to fall' पतयालु, पतनशील; 'man is l. to err' मनुष्याः स्खलनशीलाः-प्रमादाधीनाः; *See* **Apt,** also. 2 अनुयोगाधीन, प्रष्टव्य, आह्वानाधीन, अभियोज्य. **-ness,-Liability,** *s.* अधीनता, शीलता, पात्रता, आलुता in comp.; आह्वानाधीनता, अनुयोगाधीनता. 2 (Liabilities , ऋणं, उद्धारः, पर्युदंचनं.

Liaison, *s.* संबंधः, प्रेमबंधः.

Liar, *s.* *See* under **Lie.**

Libation, *s.* उदक-दानं-तर्पणं-पातनं-निषेकः, (देवतार्थं) पेयनिषेकः 2 तर्पणोदकं, निषिक्तद्रव्यं-रसः, अभिघारः; 'to make l. s to' उदकादिदानेन तृप् c., उदकं पत् c. or निषिच् 6 P.

Libel, *s.* परि(री)वादलेखः, अपवाद-निंदा-आक्षारण-लेखः-पत्रं, पिशुनलेख. —*v. t.* परिवद् 1 U, अप-भाष् 1 A, अभि-शंस् 1 P, निंदापत्रेण कलंकयति (D.) or आक्षर् 10; 'not only he who actually l.s great persons, but he also who countenances such l. is guilty' न केवलं यो महतोपभाषते शृणोति तस्मादपि यः स पापभाक् (K. v. 83). **-ler,** *s.* अपवादकः, अभिशंसकः, परिवादरतः, अभ्यसूयकः, पिशुनः. **-lous,** *a.* परिवादगर्भ, कलंकावह, अपवादक, पिशुन, कलंक-दुष्कीर्तिकर (री *f*).

Liberal, *a.* उदार, वदान्य, दानशील, अकृपण, बहुप्रद, स्थूललक्ष्य, त्यागिन्, त्यागशील, मुक्तहस्त, उदारहस्त, व्यय-पर-शील. 2 (L.-minded) उदार-धी-चेतस्-चरित, महात्मन्, महानुभाव, महेच्छ, महाशय. 3 कुलीन, महाकुल, अभिजात. 4 विपुल, बहुल, प्रचुर, परिपूर्ण, अतिरिक्त; 'l. education' सार्वविषयिकं ज्ञानं. **-ity,** *s.* औदार्य, वदान्यता, त्यागः, दानशीलता, अकार्पण्यं, बहुप्रदत्वं, दातृत्वं, अतिदानं. 2 माहात्म्यं, उदारचित्तत्वं, चित्तौदार्यं. **-ly,** *adv.* उदारतया, अकार्पण्येन, मुक्तहस्तेन, अति-व्ययेन-त्यागेन; बाहुल्येन, बहु :.

Liberate, *v. t.* मुच् 6 P or c., मोक्ष् 10, वि-निर्°; विसृज् 6 P, निस्तॄ c., उद्-धृ-हृ 1 P, त्रै 1 A. **-ion,** *s.* वि-,मुक्ति *f.*, मोचनं, मोक्षः-क्षणं, उद्धारः, त्राणं, निस्तारः. **-or,** *s.* वि-,मोचकः, मोक्षकः, उद्धर्तृ *m.*, तारकः. निस्तारकः, रक्षितृ *m.*

Libertine, *a.* खंडितवृत्त, व्यसनिन्, कामविषयासक्त, विषयिन्, भोग-काम-आसक्त, दुर्वृत्त, निर्-अ-मर्याद, भ्रष्टचरित्र, मुक्तमर्याद, दुराचार, व्यभिचारिन्, कामवृत्त. —*s.* लंपटः, कामुकः, कामासक्तः, विटः, स्त्री-लंपटः-परः-सेविन् *m.* **-ism,** *s.* व्यसनं, व्यभिचारः, लांपट्यं, विषयासक्ति *f.*, भोग-काम-आसक्तिः, दुर्वृत्तता, अमर्यादा, स्त्रीव्यसनं-व्यासंगः.

Liberty, *s.* स्वाधीनता, स्ववशता, स्वतंत्रता, स्वातंत्र्यं, अनायत्तता, अपारतंत्र्यं, अयंत्रणं, दास्याभावः, अदास्यं, स्वाच्छंद्यं, स्वेच्छाचारिता. 2 स्वेच्छा, स्वकामः, स्वरुचि *f.*, यदृच्छा. 3 अनुज्ञा, अनुमति *f.* 4 मुक्ति *f.*, मोक्षः-क्षणं, मोचनं. 5 विरहः, अभावः, शून्यता. 6 अधिकारः, क्षमता, शक्ति *f.* 7 कर्मवशता, दैवानधीनता, अदैवपरता. 8 अमर्यादा, मर्यादातिक्रमः, अविनयः, विनयातिक्रमः, विनयोल्लंघनं; 'don't take l. with your teachers' गुरुषु अविनयं मा कार्षीः; 'your ladyship is at l. to do what befits the occasion' यदत्रावसरप्राप्तं तत्र प्रभवति भवती (Ks.158), बंधे मोक्षे च अधुना सा ते प्रभवति (Ks. 354) 'she is at l., to detain or set you free'; 'to set at l.' मुच् 6 P or c. मोक्ष् 10; *See* **Liberate**; 'at l.' अयंत्रित, निरवग्रह; *See* **Free.**

Libidinous, *a. See* **Lustful.**

Libra, *s.* तुला, तुलाराशिः. **-Librate,** *v. t.* तुल् 10. **-ion,** *s.* तोलनं.

Library, *s.* पुस्तकसंग्रहः-समूहः, ग्रंथसमुदायः-संग्रहः. 2 पुस्तकालयः, ग्रंथालयः, ग्रंथशाला, पुस्तकशाला-अगारं. **-Librarian,** *s.* ग्रंथशालाध्यक्षः, पुस्तकालयाधिकृतः, ग्रंथाध्यक्षः.

License, *s.* अनुज्ञा, अनुमति *f.*, आज्ञा; 'written l.' अनुज्ञापत्रं-लेखः. 2 अनियंत्रणं, मर्यादातिक्रमः, व्यतिक्रमः, उत्क्रमः, निर्यंत्रणं; 'poets have l. (in every way)' निरंकुशाः कवयः. *-v. t.* अनु-ज्ञा 9 U. आज्ञापत्रं-अनुमतिलेखं-दा 3 U. अनुमन् 4 A. **-Licentiate,** *s.* लब्धानुज्ञः, अधिकारयुक्तः, दत्ताधिकारः.

Licentious, *a.* अनियंत्रण, निर्मर्याद, स्वेच्छाचारिन्, कामवृत्त, स्वैरिन्, उच्छृंखल, अबद्ध, अनर्गल. 2 कामासक्त, उद्दामचरित, अतिक्रांतमर्याद, दुराचार, अशिष्टाचार, धर्मभ्रष्ट, व्यसनिन्, व्यसनासक्त, विषयासक्त, कामुक, दुर्वृत्त, लंपट; स्त्रीव्यसनिन्; *See* **Libertine, Lustful. -ly,** *adv.* उच्छृंखलं, निर्यंत्रणं, निर्मर्यादं; कामुकवत्, लंपटवत्. **-ness,** *s.* व्यभिचारः, अत्याचारः, दुराचारः, दुर्वृत्तता, व्यसनिता, भ्रष्टचारित्रं-त्र्यं, लांपट्यं, स्त्रीसंगपरता, मर्यादातिक्रमः, व्यतिक्रमः, उत्क्रमः, निर्यंत्रणा.

Lichen, *s.* सुकरी, सुकराक्रांता, शिलावल्का.

Lick, *v. t.* लिह् 2 U, आ-अव-सं-परि°; 'l. up' ग्रस् 1 A, गॄ 6 P. 2 तड् 10, प्र-हृ 1 P; 'l. the dust (before one)' भूमौ निपत् 1 P or शी 2 A. **-ing,** *s.* लेहः-हनं. 2 आघातः, प्रहारः, ताडनं, दंडाघातः, वेत्रप्रहारः. **-Lickerish,** *a.* सुरस, स्वादु, मिष्ट. 2 लेहोत्सुक, भोगोत्सुक.

Licorice, *s.* यष्टिमधु *n.*, यष्टि(ष्टी)मधुकं, मधुयष्टिका, मधुकं, क्लीतकं.

Lid, *s.* पिधानं, आच्छादनं, आवरणं, पटलं, पुटः-टं-टी, छदः-दनं, शरावः, मुद्रः, वर्धमानकः, उदंचनं; 'eye-l.' नेत्रच्छदः, अक्षिपुटः.

Lie, *s.* असत्यं, अनृतं, वितथं, अतथ्यं, अलीकं, मृषा or अनृत-वाक्यं or वचनं, मृषोक्ति *f.*, मृषोद्यं, मिथ्या-वादः-भाषणं-वचनं-उक्तिः, मृषा-असत्य-वादः, असत्यभाषणं. *-v. i.* शी 2 A, अधि-शी (with acc.), आस् 2 A, निपत् 1 P, संविश् 6 P, 2 वस् 1 P, स्था 1 P, अव-स्था 1 A; gen. by भू, वृत् 1 A, अस् 2 P, विद् 4 A; 'Lanka l.s to the south of India' लंका भारतवर्षस्य दक्षिणतोऽवस्थिता or वर्तते. 3 **Consist in,** q. v. 'l. hard upon' पीड् 10, बाध् 1 A, आ-यस् c. **-down,** शी, संविश्, स्वप् 2 P, निपत्. **-in,** प्रसवावस्थायां वृत्; 'lying-in-chamber' अरिष्टं, सूतिकागृहं; 'l. in the wait' निभृते स्था, नि-ली 4 A; 'l. in the way' रुध् 7 U, अंतर्-इ 2 P, अंतरायो भू. **-on,** आ-अव-समा-लंब् 1 A, आश्रि 1 U; *See* **Depend.** 2 'Be incumbent' q. v. **-with,** संगम् 1 A, अनुगम्, मैथुनं कृ 8 U. 2 अधीन-*a.* भू; गम्; 'the fault l.s with you entirely' सर्वथा तवैवायं दोषः, त्वमेवात्र सर्वात्मना दोषभाक्; 'the fault l. with my friend' सखीगामी (अयं) दोषः (S. 4).

Lie, *v. i.* अनृतं-मिथ्या-असत्यं-वद् 1 P or वच् 2 P or भाष् 1 A, &c. (Speak, q.v.); 'thou liest in the throat' नितांतमनृतं वदसि; **-Liar,** *s.* मिथ्या-मृषा-अनृत-असत्य-वादिन् or भाषिन्, असत्यवाच्, अलीक-वाच्, अनृतिन्, all *m.* असत्यशीलः, मिथ्यावादशीलः. **-Lying,** असत्य-अनृत-मिथ्या-भाषणं, मृषा-मिथ्या वादः, मिथ्यावादित्वं, असत्यता; *See* (*s.*). *-a.* मृषावादिन्, अनृतवाच्, असत्य; *See* above.

Lief, *adv.* कामं, प्र-नि-कामं, कामतः, इच्छापूर्वं, संतोषेण, प्रीत्या.

Liege, *s.* प्रभुः, स्वामिन् *m.*, ईश्वरः, पतिः; महाराजः, देवः (in addressing). *-a.* भक्त, सेवा-भक्ति-बद्ध, प्रभु-स्वामि-भक्त, स्वाम्यनुरक्त, प्रभुवश; 'l. man' भक्तः, प्रभुसेविन् *m.* 2 आज्ञापकः; better ex. by (*s.*).

Lien, *s.* आविक्षितकाल *-a.* स्वाम्यं or अधिकारः or स्वत्वं.

Lientery, *s.* अतिसारः, आमातिसारः.

Lieu, *s.* स्थानं, भूमि *f.*; 'in l. of' स्थाने, विनिमयेन; *See* **Instead** (of). **-Lieutenant,** *s.* प्रतिनिधिः, प्रतिपुरुषः; (lit.) सेनापतिप्रतिनिधिः; 'l. governor' प्रतिशासकः; 'lord l.' राजप्रतिनिधिः.

Life, *s.* जीवनं, जीवितं, प्राणधारणं, असुधारणं. 2 जीवः, सत्त्वं, जीवितं, चैतन्यं

चेतना, प्राणवायुः, प्राणात्मन् *m.*, जीवात्मा; ‘endowed with l.’ जीविन्, प्राणिन्, सजीव, सचेतन; ‘love of l.’ जीविततृष्णा, जिजीविषा; ‘impatience of l.’ जीवितद्वेषः-त्रासः; ‘deprived of l.’ हतप्राण-जीवित, नष्टप्राण; ‘support of l.’ प्राणयात्रा-धारणं-रक्षणं; ‘reckless of l.’ जीवितव्ययिन्, जीवितनिरपेक्ष; ‘means of l.’ जीवनोपायः. 3 (Life-time) आयुस् *n.*, जीवितं, जीवनं, जीवितकालः, आयुर्मर्यादा, आयुःपरिमाणं; ‘possessed of long l.’ दीर्घायुस्, आयुष्मत्, चिरायुस्; ‘for l.’ ‘during l.’ ‘all one's l.’ यावज्जीवं, आमरणात्; ‘in all one's l.’ आजन्म, जन्मतः प्रभृति or आरभ्य; ‘my lamp of l. is nearly out’ निर्वाणभूयिष्ठो मे जीवितप्रदीपः or अवसितप्रायो मे जीवितावधिः. 4 (fig.) जीवितं, प्राणाः, (त्वं जीवितं मे U. 3). 5 संसारः, भवः, संसृति *f.*, लोकयात्रा, भूलोकवासः, गृहवासः. 6 वृत्ति *f.*, आचारः, व्यवहारः, रीति *f.*, चेष्टितं, प्रवृत्तिः, वृत्तं, आचरणं; ‘leading a virtuous l.’ साधुवृत्त, सदाचार, पुण्यमार्ग. 7 चरितं, चरित्रं, जीवनवृत्तांतः, चरित्ररचना-कथनं. 8 अवस्था, दशा, स्थिति *f.*, वृत्तिः, भावः, गति *f.* 9 उत्साहः, वीर्यं, तेजस् *n.*, सत्वं, रसः; ‘bring or restore to l.’ उज्जीव् *c.*, सोच्छ्वास-*a.* कृ 8 U, असून् प्राप् *c.*, (परीक्षितं दुर्लभानसून्प्रापितवान् Ka. 175); ‘come to l.’ उज्जीव् 1 P; ‘active l.’ प्रवृत्तिः, प्रवृत्ति-संसार-मार्गः, लोकव्यवहारः; ‘retired l.’ निवृत्तिः, निवृत्तिमार्गः; ‘he entered on a military l.’ योधवृत्तिमाश्रयत; ‘engaging in public l.’ लोकव्यवहारप्रवृत्तिः; ‘in this l.’ इह, इहलोके; ‘the vicissitudes of l.’ संसारचक्रं-परिवर्तनं, दशांतराणि; ‘l.-blood’ प्राणः, तत्वं, सारभूतं द्रव्यं; ‘l.-giving’ प्राणद, जीव-द-दायिन्; वीर्यद, उत्साहकर (री *f.*); ‘l. guard’ राजपरिचरः, शरीररक्षकः; ‘l.-time’ जीवितावधिः, जीवितकालः; ‘during one's l.-time’ यावज्जीवं. **-less**, *a.* गतजीवित, गतासु, परासु, व्यसु, गत-नष्ट-प्राण, हतजीवित, प्राण or जीव-रहित or हीन, अचेष्ट. 2 अजीव, निर्जीव, वि-अ-चेतन, चैतन्य-हीन-रहित, निश्चेतन. 3 निःसत्व, निरुत्साह, निस्तेजस्, सत्व-रस-हीन.

Lift, *v. t.* उन्नम् *c.* (नमयति), उद्गम् *c.* (गमयति), उच्छ्रि 1 U, उद्यम् 1 A, उत्था *c.* (उत्थापयति), उत्क्षिप् 6 P, उद्वह् 1 P, उन्नी 1 P, उत्कृष् 1 P, उत्तुल् 10; oft. by उत् in comp.; ‘with the neck l.-ed up’ उत्कंधरः; उद्बाहुः, उद्ग्रीवः, उन्मुखः, &c. 2 (In rank) उत्कृष्टपदे नियुज् 7 A, 10, मानं संवृध् *c.*, प्रतिपत्तिं-प्रतिष्ठां-उत्कर्षं-पदवृद्धिं-लभ् *c.* (लंभयति); ‘l. with pride’ दृप् *c.*, गर्वेण उद्धन् 2 P, दर्पेण आ-ध्मा 1 P; ‘to l. up the voice’ तारस्वरेण-उच्चैः-आक्रुश् 1 P. :-*s.* उन्नमनं, उच्छ्रयः, उत्कर्षः, उत्थापनं. 2 प्रतिपत्ति *f.*, पदवृद्धि *f.*, उन्नति *f.* 3 उपकारः, साहाय्यं.

Ligament, *s.* बंधः, बंधनं, पाशः, निगडः, शृंखला-लं-लः. 2 संधिबंधः, ग्रंथि-अस्थि-बंधनं.

Ligature, Ligation, *s.* बंधनं, वेष्टनं, परि-आ-वेष्टनं, रज्जु *f.*

Light, *a.* लघु (in all senses); अगुरु, अल्पभार, अल्पप्रमाण, लघुभार, लघुप्रमाण; सुवाह्य, सुखवाह्य, सुसह्य, अदुर्वह, अदुःसह. 2 सुख, सुकर, अकष्ट, सुसाध्य, सुगम, निरायास, अविषम, अकठिन. 3 चपल, लघु, लघुशरीर-गति. 4 सोल्लास, प्रफुल्ल, निश्चिंत. 5 चपल, चंचल, लोल, तरल, अस्थिर, अनवस्थित, लघुचित्त-स्वभाव-चेतस्, गांभीर्यहीन, निर्गौरव. 6 तुच्छ, क्षुद्र, अत्यल्प, तृणप्राय, लघ्वर्थ, अल्पार्थ, अल्प-लघु-प्रभाव; ‘l. armed’ लघ्वायुध, लघुशस्त्रभृत्; ‘l.-fingered’ लघुहस्त, चपलपाणि; ‘l.-footed’ लघु-शीघ्र-गति, द्रुतगति; ‘l.-headed’ लघु-चित्त-चेतस्, चपल-लोल-मति; भ्रांत or विक्षिप्त-बुद्धि or चित्त; बुद्धिभ्रमात् प्रलापिन्; ‘l.-headedness’ चित्त or बुद्धि-भ्रमः or विप्लवः; ‘l.-hearted’ लघुचित्त-चेतस्, क्षुद्रमनस्; हृष्ट-प्रसन्न-हृदय, उल्लासिन्, प्रफुल्लचित्त, आनंदित, सोल्लास; ‘l.-minded’ लघु-चेतस्-चित्त, क्षुद्र or कृपण-बुद्धि or मति; ‘l. spirited’ हृष्टहृदय-चित्त, &c. 7 पांडु, श्वेत; oft. ex. by आ, ईषत्; ‘l. red’ श्वेतारुण, ईषद्रक्त; ‘l. blue’ श्वेतनील, आनील; ‘l. food’ सुपच्यं-सुपाकं-अन्नं; ‘to make l. of’ लघूकृ 8 U, लघु मन् 4 A, न गण् 10, तृणाय मन्. -*v. i.* आ-पत् 1 P; (अकस्मात्) आसद् *c.*, प्राप् 5 P, आ-उपा-गम् 1 P. 2 अवतॄ 1 P, अव-रुह् 1 P, अव-नि-पत्; अध्यास् 2 A, अधि-शी 2 A (with acc.), निषद् 1 P, नि-ली 4 A. **-en**, *v. t.* लघूकृ, लघयति (D.); शम् *c.* (शमयति), प्र-उप°. **-er**, *a.* लघुतर, लघीयस्. -*s.* तरालुः, वहित्रं, उडुपं. **-ly**, *adv.* लघु, लाघवेन, अल्पप्रमाणेन. 2 सुखेन, अकष्टेन, अनायासेन. 3 निष्कारणं, हेतुं विना. 4 लघुगत्या, चपलं, सत्वरं. 5 लघुचेतसा, चंचलवत्, अस्थिरतया; ‘to think l.’ लघु मन् 4 A. **-ness**, *s.* (lit.) लघुता-त्वं, लाघवं, अल्पभारत्वं, भाराभावः. 2 सुखं, सौकर्यं, अनायासः, सुसाध्यता, अकष्टत्वं. 3 सुवाह्यता, सुसह्यता. 4 लाघवं, चापल्यं, द्रुतगतित्वं, शरीरलघुता. 5 चापल्यं, चांचल्यं, अस्थिरता, लोलता, चपलता, अगौरवं, लघिमन्, लाघवं, लघुता. 6 लघुता, तुच्छता, क्षुद्रता. **-some**, *a.* हृष्ट, सोल्लास, प्रफुल्ल, वीतचिंत, सानंद.

Light, *s.* प्रकाशः, आलोकः, भा, प्रभा, आभा, द्युति *f.*, कांति *f.*, दीप्ति *f.*, तेजस् *n.*, ज्योतिस् *n.*, रुचि *f.*, भास् *f.*, त्विष् *f.*; वर्चस् *n.* 2 प्र-,दीपः, दीपिका; 'l. house' दीपगृहं. 3 ज्ञानं, बोधः, अवगमः, प्रकाशः. 4 प्रसिद्धि *f.*, प्रख्याति *f.*, प्राकाश्यं, प्रकाशता, प्राकट्यं. 5 दृष्टि *f.*; 'See or come to l.' प्रसिद्धि-प्रकाशतां-गम् 1 P, प्रकाशी भू 1 P, आविर्भू, प्रादुर्भू; 'bring to l.' प्रकाश् c., प्रकटीकृ 8 U, स्पष्टीकृ, आविष्कृ, वि-वृ 5 U, प्रख्या c. (ख्यापयति); 'to throw l. on', विशदीकृ, विवृ, प्रकाश् c.; *See* **Explain**; 'from the l. of utility' उपयोगदृष्ट्या; 'considered in this l.' अनया दृष्ट्या. —*v. t.* दीप् c., उत्-प्र-सं°; प्र-,द्युत् c., प्रकाश् c., अव-वि-भास् c., ज्वल् c., प्र-उत्-सं-°; सं-,इंध् 7 A; संधुक्ष् 10; तप् c., प्र-सं-उत्°; 'to be l. ed' दीप् 4 A, ज्वल् 1 P. **—en,** —*v. t.* प्रकाश् c., दीप् c., ज्वल् c., द्युत् c.; *See* (*v. t.*) above. —*v. i.* स्फुर् 6 P, द्युत् 1 A, प्रकाश् 1 A, विलस् 1 P. **—er,** *s.* प्रकाशकः, द्योतकः, दीपकः, द्युतिदः. **—less,** *a.* निष्प्रभ, अप्रभ, निरालोक, निस्तेजस्. **—some,** *a.* दीप्तिमत्, प्रकाशवत्, सुप्रभ, तेजस्विन्, सुप्रकाश, तेजोमय (यी *f.*). **-ning,** *s.* तडित्, विद्युत्, सौदामि(म)नी, अचिरप्रभा, क्षणदा, चंचला, चपला, शतह्रदा, ह्रादिनी, शंपा, ऐरावती, क्षण-प्रभा-द्युति (all *f.*); 'fire of l.' वैद्युतः अग्निः; 'forked l.' तडिल्लता, विद्युल्लता; 'the falling of l.' विद्युत्पातः; 'struck by l.' विद्युता उपहत.

Ligneous, *a.* काष्ठ-दारु-मय (यी *f.*), काष्ठ-दारु-रूप.

Ligniferous, *a.* काष्ठद, दारुप्रद.

Ligniform, *a.* काष्ठरूप, काष्ठाकृति.

Like, *a.* सदृश (शी *f.*), तुल्य, सम; समान, सन्निभ, अनुकारिन् (with gen. or instr.); oft. by उपम, निभ, रूप, विध, प्रतिम, संकाश, नीकाश, प्रतीकाश, भूत, (all in comp.); also by स or अनु in comp.; 'of l. properties' सगुण, अनुगुण-धर्मन्, सम-तुल्य-गुण, समभाव; 'of l. form' सरूप, अनुरूप, तुल्याकृति, तुल्यरूप; 'l. a father' पितृभूतः, पितृस्थानीयः; 'of l. class' सजाति, सजातीय, सवर्ण, सवर्ग, तुल्यवर्ण; 'almost l. Hara' हरकल्प; 'l. this' ईदृश-श्, एतादृश-श्; 'l. that' तादृश्-श; 'l. what' कीदृश्-श; 'l. which' यादृश्-श; 'l. me, us' मादृश, अस्मादृश, &c.; 'l. thee, you' त्वादृश, युष्मादृश, &c.; 'l. your honour' भवादृश; 'to be l.' अनुकृ 8 U (with gen.), संवद् 1 P (with instr.), अनुहृ 1 P (with acc.); *See* **Resemble**; 'the son was l. his generating cause (father)' न कारणात् स्वाद्बिभिदे कुमारः (R. v. 57); 'these and the l.' एवमादि; 'in l. manner' तथा, एवं, तद्वत्, तथैव, एवमेव, एवंविधं. —*s.* समः, तुल्यः, सदृशः, तुल्यगुणः, यमकः-लः; 'his l. was and will never be seen' अनेन सदृशो न भूतो न भविष्यति. —*adv.* Ex by वत् in comp., इव, यथा, निर्विशेषं in comp.; 'l. an earthen pot' मृद्घटवत्; often by Karm. or Bah. comp.; 'black l. a cloud' मेघश्याम; 'having a moon-l. face' चंद्रमुख; 'brought up l. one's own children' अपत्यनिर्विशेषं संवर्धित; 'to act l.' अनुकृ. 2 **Likely,** q. v. —*v. t.* रुच् 1 A (with dat. of person who likes); अभिनंद् 1 P, अनु-सं-अभि-मन् 4 A, अनुमुद् 1 A, प्रशंस् 1 P, प्री pass., तुष् 4 P; 'does not l. the present' उपायनं नाभिनंदति, उपायनेन न तुष्यति &c., स्निह् 4 P, अनुरंज् pass. (with loc.). —*v. i.* इष् 6 P, अभिलष् 1, 4 P, रुच्; oft. by काम in comp.; 'just as you l.' यस्ते छंदः (V. 3), यद्रुचते रोचते; 'doing as one l. s' कामचारः, स्वैरवृत्तः, स्वच्छंदः, स्वैरिन्; 'taking what form he l. s' कामरूपः; 'do what you l.' यथाभिलषितं क्रियतां. **—ed,** *a.* मत, अभि-अनु-सं-° इष्ट, प्रिय, दयित. **—en,** *v. t.* उप-मा 3 A, 2 P, सदृशीकृ; *See* **Compare.** **-ing,** *s.* रुचि *f.*, अभिरुचिः, कामः, इच्छा, तोषः, प्रीति *f.*, तुष्टि *f.*, प्रणयः, अनुरागः, अभिलाषः, छंदः, छंदस् *n.*, सं-अनु-मति *f.*; 'he was not to her l.' स न तस्या रुचये बभूव (R. vi. 44); 'of your l.' त्वदभिमत. **-ness,** *s.* सादृश्यं, साम्यं, तुल्यत्वं, आनुरूप्यं, सारूप्यं, तुला, उपमा, अनुकारः, संवादः, आनुगुण्यं, औपम्यं, &c. 2 रूपं, आकृति *f.*, आकारः, मूर्ति *f.* 3 प्रतिमा-मानं, प्रतिरूपं-कृतिः, प्रतिमूर्तिः, प्रतिच्छंदः, चित्रं, आलेख्यं, प्रतिबिंबं; 'a speaking l.' संवादिनी आकृतिः. **-wise,** *adv.* तथैव, तथा, तद्वत्. 2 अपि, अपि च, किं च, तथा, अपरं च. **-Likely,** *a.* संभाव्य, संभवनीय, उपपन्न, सत्यसंकाश; श्रद्धेय; 'it is l. that' इति संभवति or उपपद्यते. 2 (Probable) ex. by प्रायः, प्रायशः, प्रायेण, with pot. pass. part., or by अपि नाम; 'he is l. to come to-morrow' प्रायस्तेन श्व आगंतव्यं; अपि नाम तयोः अभिमतः पाणिग्रहः स्यात् (Mal. 1) 'is it l. that &c.' **-hood,-ness,** *s.* संभाव्यता संभवः; better by (*a.*); *See* above.

Lily, *s.* नलिनी, उत्पलं, कुमुदं, पद्मं; *See* **Lotus.**

Limation, *s.* मार्जनं, लोहमार्जनेन घर्षणं.

Limature, *s.* लोहचूर्णं, लोहजं.

Limb, *s.* अंगं, अवयवः, (lit. & fig.); गात्रं; 'over every l.' प्रत्यंग, सर्वांगीण-*a.*; 'l. by l.' अवयवशः, गात्रे गात्रे. 2 प्रांतः, कोटि *f.*, सीमा. **-ed**, *a.* अंगिन्, सावयव; 'large-l.' बृहदवयव, महांग (गी *f.*); 'slender-l.' तन्वंग, कोमल-पेलव-अंग. **-less**, *a.* अनंग, निरवयव,अंगहीन

Limber, *a.* मृदु, कोमल, शिथिल, अदृढ, नम्य.

Limbo, *s.* नरकः, निरयः. 2 कारा, कारागारं, बंधनागारं.

Lime, *s.* (Tree) जंबीरः; *See* **Lemon**. 2 (Quick-l.) चूर्णः-र्णं, कर्करं; 'l.-water' सुधा, लेपः (for colouring); 'l.-stone' चूर्णखंडः, चूर्णोपल, कर्करं. **-y**, *a.* चूर्णमय (यी *f.*), सचूर्ण, कर्करमय. 2 श्यान, सांद्र, चूर्णोपम.

Limit, *s.* अवधिः, मर्यादा, सीमा, सीमन् *f.*, पर्यंतः, अंतः, प्रांतः, परिच्छेद; परिमाणं, इयत्ता, अवसानं; वेला (of sea); 'of narrow l. (scope)' अल्पविषय-*a.*; 'set or fix a l. to' परिच्छिद् 7 P; 'no (definite) l. can be set to his fame' तस्य यश इयत्तया परिच्छेत्तुं नालं (R. vi. 77). **-*v. t.*** परिच्छिद्, परि-मा 2 P, 3 A; इयत्तया परिच्छिद्, सीमां नि-रूप् 10 or निर्धृ 10; *See* **Define**. 2 सं-नि-यम् 1 P or c.; सं-वृ 1 P, संकुच् 1 P or c., नियंत्र् 10, निबंध् 9 P, निग्रह् 9 P. **-ation**, *s* परिच्छेदः, सीमा-मर्यादा-निरूपणं. 2 परिमितता, सावधिकता, समर्यादत्वं, ससीमता. **-ed**, *a.* परिच्छिन्न, परिमित, मित, समर्याद, सावधिक; नियत, संहृत, अल्पविषय, संकुचित, अव्यापक, संबाध; 'not through the l. nature of (your) merits' न गुणानामियत्तया (R. x. 32); 'l. meaning' नियतार्थः; 'l. knowledge' अल्पविषयं ज्ञानं; 'l. monarchy' नियंत्रितं or संयतं प्रभुत्वं. **-er**, *s.* परिच्छेदकः, **-less**, *a.* अमित, अनंत, असीम, निरवधि.

Limmer, *s.* नीचजनः, अपसदः in comp.

Limn, *v. t.* लिख् 6 P or चित्र् 10. **-er**, *s.* चित्रकरः.

Limous, *a.* सकर्दम, पंकिल.

Limp, *v. i.* खंज् 1 P, लंग् 1 P, खोड्-खोट्-खोल्-1 P. **-*s.*** लंगः, लंगगति *f.* **-*a.*** मृदु, शिथिल, कोमल. **-er**, *s.* खंजः, लंग-खंज-गतिः. **-ing**, *a.* खंज, खोर, खोल, खोड, लंगगति, विकलगति. **-ingly**, *adv.* खंजवत्, लंगगत्या.

Limpid, *a.* स्वच्छ, प्रसन्न, विमल, स्वच्छतोय, प्रसन्नवारि, विमलजल. **-ness**, *s.* स्वच्छता, विमलता, प्रसादः.

Lin, *s.* पल्वलं, तडागः-गं, जलाशयः.

Linch-pin, *s.* अक्षाग्रकीलः, अ(आ)णिः, उद्धयः.

Lincture, *s.* अवलेहः, लेह्यं.

Line, *s.* रे(ले)खा, रेखा. 2 पंक्तिः, पद्धतिः, सरणिः-णी, राजिः-जी, आवलिः-ली, ततिः, श्रेणिः-णी (all *f.*), माला. 3 सूत्रं, रज्जु *f.*, गुणः, तंतुः. 4 आकारः, आकृति *f.*, रूपं. 5 प्राकारः, वप्रः, परिखा, प्राचीरं. 6 (Of troops) दंडः, व्यूहः, पंक्तिः, बलविन्यासः. 7 क्रमः, अनुक्रमः, पर्यायः. 8 परिपाटि-टी *f.*, श्रेणिः-णी, पंक्तिः, परंपरा, माला, पारंपर्यं, आवलिः-ली; आनुपूर्व्यं. 9 (Of conduct) मार्गः, पथिन् *m.*, रीति *f.*, सरणिः, व्यवहारः. 10 देशः, विषयः, अंगं. 11 दिश् *f.*, दिशा, मार्गः. 12 भूचक्रं; *See* **Equator**; 'ruled l.' रेखा, अंकः; 'in a l.' पंक्तिक्रमेण, पंक्तिशः; 'by l. and rule' यथासूत्रं; 'l. of the face' वदन-मुख-रेखा; 'printed l.' पंक्तिः; 'l. of a stanza' पादः, चरणः-णं; 'in a regular l.' अनुक्रमेण, क्रमशः, आनुपूर्व्येण, अनुपूर्वशः; 'l. of the family' वंशक्रमः-परंपरा-आवलिः; 'a good l. of conduct' सुमार्गः, सुपथः; 'a bad l. of conduct' वि-कु-पथः, विमार्गः, उन्मार्गः; 'l. of study' अध्ययनक्रमः; 'l. of posterity' वंशावली; 'fishing-l.' बडिशसूत्रं; 'to draw l. s.' लिख् 6 P; 'draw l. s on the ground' भूमिं रेखाभिः वि-उत्-लिख् or अंक् 10; 'to draw the l.' वि-भिद् 3, 7 U, भेदं दृश् c., or निरूप् 10. **-*v. t.*** अंतः आ-,छद् 10, अभ्यंतरे छद्. 2 पंक्तिक्रमेण स्था c. (स्थापयति) or निविश् c. 3 रेखाभिः अंक्; 'the streets were l. ed with guards' अनुरथ्यं पंक्तिक्रमेण रक्षिणः स्थापिताः. **-age**, *s.* अन्वयः, वंशः, कुलं, संतति *f.*, संतानः, गोत्रं, वंशावली, वंशपरंपरा; 'of royal l.' राजवंश्य, राजकुलप्रसूत; 'of high or noble l.' अभिजात, महाकुल. **-al**, *a.* रेखारूप-मय (यी *f.*). 2 परंपरागत, परंपरायात-प्राप्त, क्रमप्राप्त-आगत-आयात, अन्वयागत, परंपरीण, कुलक्रमागत; 'l. descent' अन्वयागमः, क्रमागमः, कुलक्रमागमः; 'l. descendant' संतानः, संततिः, अपत्यं. **-ally**, *adv.* परंपरया, पारंपर्येण, वंशक्रमेण, कुलक्रमागमेन, 'l. descended' वंशक्रमायात; *See* above. **-ing**, *s.* अंतराच्छादनं, अंतःपटलं-पुटं-वेष्टनं, आस्तरः-रणं. **-Lineament**, *s.* रेखा, वदन-मुख-रेखा, वदनाकारः, वदनाकृति *f.*, लक्षणं, चिह्नं. **-Linear**, *s.* पांक्त or रेखा-रूप or मय (यी *f.*).

Linen, *s.* क्षौमं, क्षौमपटः-वस्त्रं; शाणपटः-वस्त्रं; **-*a.*** क्षौम-औम-(मी *f.*), शाण (णी *f.*), अतसीनिर्मित; 'l.-draper' क्षौमवस्त्रविक्रयिन् *m.*, वस्त्रविक्रयोपजीविन् *m.*

Linger, *v. i.* वि-लंब् 1 A, मंदायते (D.), चिर (रा)यति (D.), कालं क्षिप् 6 P *or*

सृ 1 P, मंदं मंदं चल् (सृ) 1 P. 2 विलंब् 1 A, विचार् c. 3 चिरं-दीर्घकालं-स्था 1 P, or वृत् 1 A; 'l. ing on a sick bed' चिररोगिन्. -er, s. विलंबकारिन्, विलंबिन्, मंदगामिन्, मंदगति, चिरक्रियः, दीर्घसूत्रिन्, all m. -ing, a. दीर्घ, चिरस्थायिन्, चिर-दीर्घ-कालीन, चिरकालस्थ. 2 विलंबिन्, विलंबित, मंदायमान. -s. विलंबः, कालक्षेपः-यापनं. -ingly, *adv.* मंदं मंदं, विलंबेन, साविलंबं, मंदगत्या, कालक्षेपेण.

Linget, *s.* धातु-लोह-पिंडः.

Lingual, *a.* मूर्धन्य, मूर्धस्थानीय.

Linguiform, *a.* जिह्वाकृति, जिह्वारूप.

Linguist, *s.* भाषाकोविदः, शाब्दिकः, शब्दव्युत्पन्नः, भाषाप्रवीणः, भाषाज्ञः, बहुभाषाज्ञः, अनेकभाषानिपुणः. **-ic**, *a.* (*s.*) in comp.

Liniment, *s.* प्र-आ-वि-लेपः-पनं, उपदेहः, अभ्यंजनं, मर्दनौषधं.

Link, *s.* संधिः, ग्रंथिः. 2 बंधनं, बंधपाशः, शृंखला-लः-लं. 3 संयोगः, संबंधः, अन्वयः, संदर्भः, प्रबंधः. 4 उल्का, उल्मुकं 'l. s of life' जीवितनिबंधनानि; 'l. boy' उल्काभृत्. **-***v. t.* संयुज् 7 U, 10, सं-धा 3 U, संश्लिष् c., संबंध् 9 P, ग्रथ्-बंध् 1 P, ग्रथ् 9 P. *See* **Knit. -ed**, *a.* संयुक्त, संश्लिष्ट, संबद्ध, आन्वित, सान्वय.

Linn, *s.* जलप्रपातः, निर्झरः.

Linseed, *s.* अतसी, उमा, क्षुमा, उमा-अतसी-बीजं, &c.

Linsey-woolsey, *a.* क्षौमोर्णं. 2 असार, निः-सत्त्व; क्षुद्र.

Linstock, *s.* ज्वलनकाष्ठं, अग्निदशलाका.

Lint, *s.* क्षौमबंधः, विकेशिका.

Lintel, *s.* द्वाराग्रकाष्ठं, द्वारोर्ध्वदारु *n.*

Lion, *s.* सिंहः, हरिः, केसरिन् *m.*, पंचास्यः पंचाननः, हर्यक्षः, कंठीरवः, मृगरिपुः, मृगाशनः पुंडरीकः, पंचनखः, चित्रकायः, मृगद्विष्; and comp. of इंद्रः, राजन्, पतिः, अधिपः, आधिपतिः with मृग or पशु; मृगपतिः, मृगराजः, मृगाधिपः, पशुपतिः, &c.; 'l.'s part' भूयिष्ठभागः. **-ess**, सिंही. **-like,-ly**, *a.* सिंहस्वभाव, सैंह (ही *f.*).

Lip, *s.* ओष्ठः (strictly upper), दशन-रदन-छदः, रद-दंत-छदः, दशन-दंत-वासस् *n.*, अधरः (strictly lower); 'a red or cherry l.' बिंबो(बौ)ष्ठः, बिंबाधरः; 'a woman having cherry l. s' बिंबोष्ठी; 'drinking the l.' अधरपानं, अधरामृतसेवनं; 'l.-honeyed' मुखमधु; 'l.-loyalty' मुखभक्ति *f.*, वाग्दर्शिता भक्तिः. 2 कर्णः, पार्श्वः, कंठः, मुखं, &c. **-ped**, *a.* ओष्ठ in comp.

Lipothymy, *s. See* **Fainting, Swoon.**

Lippitude, *s.* क्लिन्नाक्षता, चुल्लत्वं.

Liquate, *See* **Liquefy** below.

Liquefy, *v. i.* वि-,द्रु 1 P, वि-,ली 9 P, 4 A, जलसाद्भू 1 P, क्षर् 1 P, द्रवीभू. **-***v. t.* वि-,द्रु c., वि-,ली c., द्रवीकृ 8 U, जलसात्कृ. **-action**, *s.* द्रवीकरणं, द्रावः, विलयः-यनं, क्षरणं, द्रवीभवनं. 2 द्रवत्वं, विलीनता.

Liquid, *s.* द्रवः, रसः, जलं, द्रव-वस्तु-द्रव्यं, पदार्थः. **-***a.* द्रव, द्रुत द्रवरूप, विलीन, प्रवाहिन्, तरलं; 'reduced to a l. state' द्रवतामापन्न, विलीन, जलीभू[illegible]तामुपेत (Ks. 122). **-it**[illegible], *s.* द्रवत्वं रसता, द्रवभावः, [illegible]धर्मः.

Liquidate, *v. t.* शुध् c., अपाकृ 8 U. निस्तॄ c., अपनी 1 P, अपवृज् 10; मुच् 6 P or c., मोक्ष् 10; 'debt contracted to l. another debt' ऋणार्णं. **-ion**, *s.* शोधनं, शुद्धि *f.*, अपाकरणं, निस्तारः, मुक्ति *f.*, मोक्षः-क्षणं, अपनयनं.

Liquor, *s.* सुरा, मद्यं, हाला, वारुणी, वरुणात्मजा, मदिरा, आसवः, शी(सी)धु *m. n.*, हलिप्रिया, परिस्रुत् *f.*, गंधोत्तमा, प्रसन्ना, इरा, कादंबरी, परिस्रुता; कश्यं; 'l.-shop' शुंडापानं, मदस्थानं, शुंडा, पानं; 'round of drinking l.' मधुवारः-क्रमः; 'distilling of l.' संधानं, अभिषवः; 'l.-ferment' किण्वं, नग्नहुः, कारोत्तरः, मंडः; 'company of l.-drinkers' आपानं, पानगोष्ठिका; 'drinking l.' सरकः, अनुतर्षणं, मद्यपानं. 2 **Liquid**, q. v. 3 पेयं.

Lisp, *v. i.* स्वरभंगेन-अस्पष्टं-वद् 1 P or वच् 2 P or उच्चर् c. or उदीर् c., अव्यक्तं वद्, अस्फुटवाचा जल्प् 1 P, स्खल् 1 P. **-s.**, **-ing**, *s.* गद्गदवाच् *f.* -वाक्यं, अस्फुटोच्चारणं, अव्यक्तवर्ण जल्पितं, स्खलितवाच्. **-er**, *s.* अस्पष्टवाच्, गद्गदवाच्, अस्फुटवादिन्, all *m.* **-ingly**, *adv.* अस्फुटवाचा, गद्गदवाचा.

Lissom, *a. See* **Flexible.**

List, *s.* आवलि-ली *f.*, पंक्ति *f.*, परिसंख्या, परिगणना, अनुक्रमणिका, सूचि-ची *f.* 'a l. of names' नामावली; 'a l. of errata' शुद्धिपत्रं. 2 वस्त्रखंडः. 3 वस्त्रप्रांतः, दशाः, वस्तयः (pl.). 4 युद्ध-रण-भूमि *f.*, रंगः, रणाजिरं, मल्लभूः-भूमिः; 'enter or take the l. s' रणार्थं सज्जीभू 1 P or सन्नद्ध-*a.* भू. **-***v. t.* वस्त्रखंडैः आच्छद् 10. 2 वस्त्रखंडान् संसिव् 4 P. 3 गणनापत्रे नामानि अभिलिख् 6 P or आरुह् c. (रोपयति). 4 **Listen**, q. v. **-***v. i.* इष् 6 P, रुच् 1 A, अभिलष् 1,4 P; *See* **Like**, 2 आ-अव-लंब् 1 A, प्रवणीभू 1 P; *See* **Lean. -Listless**, *a.* अनवहित, निरपेक्ष, उदासीन, प्रमादिन्, अनुत्सुक, निरुत्साह; अनिच्छु, निरीह, निरुद्योग, विरक्त, निःस्पृह. 2 जड, ग्लान; *See* **Languid. -ly**, *adv.* अनवधानेन, निरपेक्षं, उदासीन-

वत्, निरुत्सुकं, अनपेक्षया, जडवत्, निःस्पृहं. **-ness,** *s.* अनवधानं, अनपेक्षा, औदासीन्यं, अनौत्सुक्यं, विरक्ति *f.*, अनिच्छा, अनीहा, अस्पृहा, अनुत्साहः, अनास्था, जडता, मांद्यं.

Listen, *v. i.* श्रु 5 P, आकर्ण् 10, नि-शम् c., कर्णं दा 3 U, अव-धा 3 U, अवहित-साव-धान-*a.* भू 1 P; ' l. now ' अवधीयतामधुना, कर्णं देहि. 2 अनुवृत् 1 A, अनुरुध् 4 A. **-er,** *s.* श्रोतृ *m.*

Literal, *a.* मूल, मुख्य, प्रकृत, अरूपक; मूलार्थक, मुख्यार्थक, शब्द in comp. 2 यथाशब्द, शब्दार्थानुसारिन्, मूलपदानुसारिन्. 3 अक्षरमय (यी *f.*); ' l. meaning ' प्रकृतार्थः; शब्दार्थः, मूलार्थः. **-ity,** *s.* मुख्यार्थः, प्रकृतार्थः, शब्दार्थः, मूलार्थः, अरूपकं. **-ly,** *adv.* मूलार्थानुसारेण, शब्दतः, शब्दशः, यथाशब्दं, अक्षरशः.

Literary, *a.* विद्या-साहित्य-संबंधिन्, विद्याविषयक, शास्त्र-ज्ञान- in comp.; ' l. work' शास्त्रग्रंथः; ' l. dispute ' ज्ञानसंघर्षः. 2 (Literate) विद्यावत्, विद्यासंपन्न, विद्याविशिष्ट, विद्यानुरागिन्; विद्या-शास्त्र- in comp.; *See* **Learned.** **-Literature,** *s.* साहित्यं, विद्या, शास्त्रं; शास्त्रसमूहः; पुस्तकसमुदायः; 'dramatic l.' नाट्यपुस्तकसमूहः. **-Literati,** *s.* विद्वत्समाजः, पंडितवर्गः-गणः, विद्वद्वृंदं.

Lithe, *a.* शिथिल, मृदु, भिदेलिम, सुखनाम्य.

Lithograph, *v. t,* शिलाया उपरि लिख् 6 P, शिलां रेखादिभिः मुद्र् 10 or अंक् 10. **-s.** शिला or पाषाण-लेखः or मुद्रा. **-er,** *s.* शिलालेखकः, शिलामुद्राकृत् *m.* **-y,** *s.* शिलालेखनविद्या, पाषाणलेखनं.

Lithontriptic, *a.* अश्मरीहर, अश्मरीघ्न (घ्नी *f.*).

Lithotomy, *s.* मूत्राश्मोच्छेदः.

Lithotripsy, *s.* अश्मरीसंघर्षः.

Litigant, *a.* विवदमान, विवादार्थिन्, कार्यार्थिन्, व्यावहारिक (की *f.*). **-s.** वादिन् *m.*, कार्यार्थी, व्यवहर्तृ *m.*, अर्थी, विवादार्थी. **-Litigate,** *v. i.* वि-वद् 1 A, व्यव-हृ 1 P. **-v. t.** विवादास्पदीकृ 8 U. **-ed,** *a.* वाद-ग्रस्त, विवादास्पदीकृत-भूत, वादानुगत. **-ion,** *s.* वि-,वादः, व्यवहारः. **-Litigious,** *a.* विवादप्रिय-शील, विवादार्थिन्, विवादपर-रत-आसक्त.

Litter, *s.* शिबिका, याप्ययानं. 2 तृणशय्या, तृणसंस्तरः-शयनं. 3 शावकगणः-संघः. 4 द्रव्यसंकरः, व्यस्तता. **-v. t.** शावकगणं सू 2, 4 A, or उत्पद् c. 2 तृणेन आवृ 5 U or आस्तृ 5 U. 3 इतस्ततःविकॄ 6 P or विक्षिप् 6 P.

Little, *a.* अल्प, अल्पक, क्षुद्र, लघु, अणु, सूक्ष्म, ह्रस्व; श्लक्ष्ण, दभ्र, अणुक, क्षुद्र-अल्प-लघु-परिमाण, अल्प-मात्र, अबहु; स्वल्प, स्तोक, अप्रचुर, ईषत्, in comp. 2 क्षुद्रतनु, अल्पकाय-शरीर-तनु. 3 क्षुद्र-लघु-मति, कृपण-मनस्-चेतस्-बुद्धि; (as a diminutive) ex. by the suffix क; ' a l. girl' बालिका; ' a l. boy' बालकः; ' a l. cottage' कुटिका; 'very l.' अल्पिष्ठ, अत्यल्प; 'a l. wealth' द्रव्य-लेशः-लवः, स्तोकं द्रव्यं; ' a l. finger' कनिष्ठांगुलि *f.*; 'for a l. while' कंचित्कालं. **-*adv.*** 'a l.' ईषत्, किंचित्, स्तोकं, मनाक्, अभूरि, अबहु; oft. by आ, दर, ईषत् in comp.; ' a l. split' दरदलित; 'not a l.' भृशं, अत्यंतं; ' a l. distant' अनतिदूर, ईषद्दूर; ' l. less' ईषदून, किंचिन्न्यून, कल्प-प्राय- in comp.; 'a l. less than dead' मृतप्रायकल्प; 'l.-minded' कृपणबुद्धि, क्षुद्र-लघु-चेतस्. **-s.** अल्पं, किंचित्, स्तोकं, अल्प-स्तोक-भागः, अल्पांशः, किंचन, मात्रा, लवः; कणः, लेशः; अल्पमात्रं; 'by l. and l.' अल्पाल्पं, अल्पशः, स्तोकशः. **-ness,** *s.* अल्पता, तनुता, लघुता, स्तोकता, &c. 2 (Of mind) दीनता, कार्पण्यं, क्षुद्रता, कदर्यता, न्यं.

Littoral, *a.* तटस्थ, तीरस्थ.

Liturgy, *s.* प्रार्थनामार्गः, भक्तिमार्गः

Live, *v. i.* वस् 1 P, नि-प्रति-°; अधिवस्, अध्यास् 2 A, अधि-ष्ठा 1 P (with acc.). 2 जीव् 1 P, प्र-अन् 2 P, श्वस् 2 P, धृ pass. or 6 A, विद् 4 A, वृत् 1 A; 'here I l.' एषा ध्रिये (U. 3); 'as long as you l.' यावज्जीवं, यावत्प्राणान् धारयसि or असुधारणं करोषि. 3 (On) उप-आ-जीव्, शरीरवृत्तिं-प्राणयात्रां-कॢप् c. or निर्वृत् c. or कृ 8 U. प्राणधारणं कृ, निर्वह् 1 P; 'l.-ing on fish' मत्स्याजीव, मत्स्योपजीविन्; sometimes by वृत्ति *f.*; ' l. ed on fruits, roots, &c.' फलमूलादिभिः वृत्तिमकरोत्; ' l. ing on the leaves of trees falling down of themselves' स्वयंविशीर्णद्रुमपर्णवृत्तिता (K. v. 28); 'l. s on wild fruits' वन्यफलैः शरीरवृत्तिं निर्वर्तयति. 4 जीवितं-कालं गम् c. (गमयति) or या c. (यापयति) or नी 1 P or अतिवह् c. or वृत् c.; 'l. through time' चिरस्थायिन्-अमर-*a.* भू 1 P. **-a.** सजीव; *See* **Living** below;'l.-long' दीर्घ-चिर-कालीन, चिरस्थायिन्; ' l.-stock ' जीवधनं. **-ing,** *a.* सजीव, जीविन्, प्राणभृत्, सचेतन, प्राणधारिन्, चेतनावत्, सचेष्ट, श्वसमान; ' a l. being ' प्राणी, जीवी, जंतुः, प्राणभृत्, शरीरी, जीवः, देही, चेतनः, सत्त्वं, 'world of the l.' जीवलोकः. 2 वर्तमान, ध्रियमाण, विद्यमान; ' a l. poet ' वर्तमानकविः. 3 अक्षय, अनश्वर, अनपायिन्, अविनाशिन्, अजर, अमर

(spring &c.). 4 आ-उप जीविन्, आजीव or वृत्ति in comp.; 'l. by arms' शस्त्रोपजीविन्; 'l. by agriculture' कृष्याजीव; 'l. wickedly' दुर्वृत्ति, दुर्वृत्त, पापाचरित, पापवृत्ति; 'l. by beggary' याचकवृत्ति, &c.; 'within l. memory' स्मार्ते काले; 'a l. sacrifice' जीवोपहारः; 'a l. death' जीवितमरणं. -*s*. जीवनं, प्राणधारणं, वासः. 2 जीविका, आ-उप°-; आजीवः, वृत्ति *f*., जीवनं, वर्तनं, आ-उप-जीवनं, जीवनोपायः, जीवन-जीव-साधनं, प्राण-शरीर-यात्रा, निर्वाहः, प्राण-जीव-निर्वाहः, प्राण-शरीर-स्थिति *f*., जीवनार्थः. 3 धर्माध्यापकवृत्तिः, धर्मदायः; 'good l.' सुभोजनं, मिष्टाहारः, परमान्नभोजनं; 'bad l.' कदन्नभोजनं. **-Livelihood**, *s*. जीविका, वृत्तिः, जीवनं, प्राणयात्रा; *See* Living above; 'bare l.' ग्रासाच्छादनमात्र, अन्नोदकमात्रं, दिननिर्वाहः. **-Lively**, *a*. सोल्लास, उल्लासिन्, आनंदिन्, प्रहृष्ट, उल्लसित, प्रमुदित, आनंद-उल्लास-वृत्ति. 2 स-सत्त्व, सोत्साह, उत्साहशील, तेजस्विन्, तीव्र, तीक्ष्ण; 'of a l. countenance' प्रफुल्लवदन, हास्यमुख (खी *f*.), सुहास्यवदन, प्रसन्नमुख. -*adv*. सोत्साहं, प्रफुल्लतया, सोल्लासं. **-ness**, *s*. उल्लासः, प्र-, हर्षः, आनंदः, प्रफुल्लता, उत्साहः, तेजस् *n*., सत्त्वं.

Liver, *s*. यकृत् *n*., कालखंडं, कालकं, कालेयं.

Livery, *s*. वेषः, कुल-आर्य-वेषः; 'l.-man' कुलवेशधारिन् *m*., पौरवेशः; 'l.-stable' अश्वपोषणशाला, अश्वशाला.

Livid, *a*. नील, नीलवर्ण, सीसकवर्ण, नीलकृष्ण. **-ity, -ness**, *s*. नीलवर्णः, नीलिमन् *m*., सीसकवर्णः.

Lixivium, *s*. क्षारजलं-अंबु *n*. **-Lixivious**, *a*. क्षाराक्त, क्षारविशिष्ट.

Lizard, *s*. सरटः-टुः, कृकं(कु)लासः-शः, प्रतिसूर्यः-र्यकः; 'house-l.' गृहगोधा-धिका, मुस(श)ली, ज्येष्ठा-ष्ठी, गृहालिका.

Lo, *interj*. पश्य, प्रेक्षस्व.

Load, *s*. भारः, भरः; धुर् *f*, पर्याहारः. 2 बाधा, पीडा, दुःखं; कष्टं; 'the body is a l. (to me)' भारः कायः, भारभूतं शरीरं, कष्टप्रायं शरीरं; 'l. s of gold' सुवर्णभाराः; 'bearing a l.' भारवाहन, भारसह, धूर्वह, धुरंधर. -*v. t*. भारं न्यस् 4 P or नि-धा 3 U or निविश् c. or आरुह् c. (रोपयति), भारेण पूर् 10, भारेण पीड् 10 or आक्रम् 1 U, 4 P, भाराक्रांत-*a*. कृ 8 U; 'trees l. ed with fruits' फलभाराक्रांता वृक्षाः; *See* **Bend** (*v. i.*). 2 (A gun) आग्नेयचूर्णेन पूर्, आग्नेयचूर्णं निविश् c. **-ed**, *a*. सभार, भाराक्रांत, भारग्रस्त, भारवत्, आरोपित-निवेशित-भार, धुरीण. 2 गर्भ in comp., पूर्ण, पूरित; 'l. with perfume' परिमलाक्रांत, वासगर्भ, वासपूर्ण. **-ing**, *s*. भारारोपणं. 2 भारः.

Loadstone, *s*. अयस्कांतः, अयोमणिः, लोहकांतः, चुंबकः, लोहचुंबकः, चुंबकप्रस्तरः-मणिः.

Loaf, *s*. अपूपः, पूपः, पिष्टकः, करंभः. -*v. i*. कालापव्ययं कृ 8 U.

Loam, *s*. चिक्कण-स्निग्ध-मृत्तिका. **-y**, *a*. चिक्कण, मसृण.

Loan, *s*. ऋणं, ऋणदानं, धनप्रयोगः, आविहितकालात् द्रव्यप्रयोगः.

Loath, *a*. अनुत्सुक, अनिच्छु, वि-पराङ्-मुख (खी *f*.), विरक्त, अनिच्छत्, अकाम, निष्काम.

Loathe, *v. t*. गर्ह् 1, 10 A, गुप् desid. (जुगुप्सते), अत्यंतं द्विष् 2 U; *See* **Abhor**. **-ful, -some**, *a*. बीभत्स, अतिगर्हित, घृणाकारिन्, अतिगर्ह्य, कुत्सित, घृणार्ह, जुगुप्सावह. **-ing**, *s*. बीभत्सः, जुगुप्सा, घृणा, गर्हा, अतिनिर्वेदः-द्वेषः. **-ingly**, *adv*. सबीभत्सं, घृणापूर्वं.

Lob, *s*. स्थूलकायः, स्थूलशरीरः.

Lobby, *s*. सभोपशाला, उपगृहं-शाला.

Lobe, *s*. (कर्णस्य) पालि *f*., पालिका, लतिका. 2 भागः, अंशः. **-ed**, *a*. पालिविशिष्ट.

Local, *a*. स्थानिक (की *f*.), स्थानीय, दैशिक (की *f*.), देश्य, देशीय, देश-स्थान- in comp.; 'l. usage' देशाचारः; 'l. news' इहवृत्तं. 2 एक-देशीय-देशिन्-स्थानिक. **-ity**, *s*. स्थानं, प्र-,देशः, स्थलं. **-ly**, *adv*. स्थानविषये, स्थानमुद्दिश्य.

Locate, *v. t*. निविश् c., नि-धा 3 U, स्था c. (स्थापयति), विन्यस् 4 U; *See* **Place**. **-ion**, *s*. स्थापनं, निवेशनं, विन्यासः. 2 स्थानं, प्रतिष्ठानं, अधिकरणं. **-ive**, *s*. सप्तमी विभक्तिः, अधिकरणं.

Lock, *s*. तालः-लकं, तालयंत्रं. 2 (Of hair) पाशः, कलापः, केशकलापः-पाशः, अलकः; शिखंडकः, काकपक्षः (of young persons); चूडा, शिखा. 3 जलस्तंभनी-बंधनी 4 आलिंगनं, आश्लेषः, उपगूहनं. -*v. t*. तालेन बंध् 9 P or पि-धा 3 U or निरुध् 7 U. 2 रुध्, बंध्, संयम् 1 A. 3 गाढं आलिंग् 1 P, दृढं परिष्वंज् 1 A; *See* **Clasp, Embrace**; 'l. ed in sleep' निद्रालीढ, निद्रानिमीलितलोचन; 'l.-jaw,' 'l. ed jaw' हनुस्तंभः-ग्रहः. **-er**, *s*. तालकसनाथः कोष्ठः, सपुटकः.

Locket, *s*. कुड्डुपः.

Locomotion, *s*. स्थानांतर-स्थलांतर-गमनं, चलनं, गमनागमनं. 2 चलन-गमनागमन-शक्ति *f*. **-Locomotive**, *a*. चल, चलन, जंगम, चलनशील, गतिविशिष्ट, चलनधर्मक, संचारिन्.

Locus, *s*. निधिः, निधानं.

Locust, *s.* शल(र)भः, टिरिः.

Locution, *s.* वाक्यं, उक्ति *f.*, वचनं.

Lode, *s.* धातुरेखा.

Lodh, *s.* लोध्रः, गालवः, शा(सा)बरः, तिरीटः, तिल्वः, मार्जनः.

Lodge, *v. i.* निवस् 1 P, वि-श्रम् 4 P, आश्रि 1 U, अव-स्था 1 A, स्था 1 P, वृत् 1 A, लग् 1 P, अनुबंध्-संज्- pass. –*v. t.* नि-धा 3 U, न्यस् 4 U, निविश् c., स्था c. (स्थापयति), *See* **Place**. 2 वस् c., आश्रयं दा 3 U, वासस्थानं दा; 'to l. a suit or complaint' राज्ञे निविद् c. –*s.* उपगृहं, उद्यानगृहं. 2 **Lodging**, q. v. **–ing**, *s.* वासगृहं-स्थानं, वासः, नि-आ-वासः, वसति *f.*, नि-आ-लयः, आ-सं-श्रयः, निकेतनं; *See* **House**. **–ment**, *s.* निवेशनं, स्थापनं. 2 अव-सं-स्थिति *f.* 3 निवेशः-शनं, समावासः.

Loft, *s.* अट्टः, चंद्रशाला, शिरोगृहं, उपरिकोष्ठः.

Lofty, *a.* उन्नत, तुंग, उच्च, उन्नम्र, उच्छ्रित, प्रांशु, सोच्छ्राय. 2 उद्धत, मदोदग्र, दृप्त, अवलिप्त, साटोप, मदोद्धत, गर्वोद्धत; *See* **High**. 3 प्रौढ, प्रगल्भ, धीर, गंभीर, गुरु, महत्. **–ly**, *adv.* उच्चैः, ऊर्ध्वं. 2 सगर्वं, साटोपं, सदर्पं, उद्धतं. **–ness**, *s.* (lit.) उन्नति *f.*, उत्सेधः, उच्छ्रयः, तुंगता, उच्चत्वं, प्रांशुता. 2 औद्धत्यं, आटोपः, अवलेपः, दर्पः, गर्वः, अभिमानः. 3 प्रौढता, प्रागल्भ्यं, धीरता, गुरुत्वं, महत्त्वं, माहात्म्यं, उत्कर्षः, उन्नतत्वं, उन्नतिः.

Log, *s.* काष्ठं, दारु-काष्ठ-खंडः-डं, स्थूल-बृहत्-काष्ठं. 2 गतिमापः.

Logarithm, *s.* संवर्गमानं, घातप्रमापकः.

Logger-head, *s.* स्थूल-जड-बुद्धिः, मूढः, मूर्खः, जडः; 'to be at l. s' विवद् 1 A, कलिं-कलहं-प्रारभ् 1 A. **–ed**, *a.* स्थूल or जड-धी or बुद्धि.

Logic, *s.* तर्कः, न्यायः, आन्वीक्षिकी, न्याय or तर्क-शास्त्रं- or विद्या, युक्तिवादः. **–al**, *a.* तार्किक नैयायिक-यौक्तिक-(की *f.*), तर्कशास्त्रविषयक. 2 तर्क-न्याय-युक्ति-सिद्ध, तर्क-न्याय-संमत, न्यायानुसारिन्, तर्कानुरूप; 'a l. conclusion' निगमनं. **–ally**, *adv.* न्यायतः, यथान्यायं, तर्कानुसारेण, न्यायशास्त्रानुरूपं. **–ian**, *s.* नैयायिकः, तार्किकः, तर्किन् *m.*, न्यायविद् *m.*, तर्क-न्याय-शास्त्रज्ञः.

Logomachy, *s.* वाग्युद्धं, वाक्कलहः, वितंडा. 2 शब्दविवादः.

Loin, *s.* श्रोणि-णी *f.*, कटि-टी *f.*, नितंबः, जघनं, स्फिच् *f.* (hip & l. s); श्रोणिफलकं, कटी-श्रोणि-तटं; 'gird the l. s' परिकरं बंध् 9 P, कटिं बंध्; 'born from one's own l. s' अंगज, अंगजात.

Loiter, *v. i.* विलंब् 1 A, मंदायते (D.), कालं क्षिप् 6 P or हृ 1 P; 'l. about' मंदं मंदं चल्-र् 1 P, इतस्ततः मंदं भ्रम् 1, 4 P, चिरं अव-स्था 1 A. **–er**, *s.* कालक्षेपकः, अलसः, विलंबिन् *m.*, मंदगतिः, चिरक्रियः. **–ing**, *s.* विलंबनं, मंदगमनं, कालक्षेपः; *See* **Linger, -er**.

Loll, *v. i.* आलस्येन अवलंब् 1 A or आश्रि 1 U or संविश् 6 P or शी 2 A. –*v. t.* लल् 10 (ललयति); 'l. the tongue' जिह्वां लल् or बहिष्कृ 8 U. **–ing**, *s.* ललनं.

Lone, Lonely, *a.* विविक्त, निर्जन, विजन, निर्मनुष्य, निभृत, न्यून-हीन-संचार, एकांत; निर्मानुष (षी *f.*). 2 अनाथ, असहाय, एकाकिन्, एक, केवल. 3 विविक्त-प्रिय, विविक्तसेविन्; 'a l. place' विविक्तं, निर्जनदेशः; 'in a l. place' विविक्ते, विजने, छन्नं, निःशलाकं, रहः, उपांशु. **–liness**, *s.* विविक्तं, निर्जनता, विजनता. 2 एकाकिता, असहायता. 3 विविक्तसेवा-रुचि *f.*-प्रीति *f.* **–some**, *a.* निर्जन, दारुण, निरानंद, घोर.

Long, *v. i.* (for) (अत्यंतं) स्पृह् 10 (with dat.), इष् 6 P, अभिलष् 1, 4 P, वांछ् 1 P, ईह् 1 A, कांक्ष् 1 P, आशंस् 1 A; *See* **Wish**; लुभ् 4 P, गृध् 4 P; sometimes ex. by denom. in य or काम्य; 'l. s for a son' पुत्रीयति, पुत्रकाम्यति; पुत्रमीप्सति, &c. 2 दोहदवती भू 1 P, दोहदिनी भू. –*a.* दीर्घ, आयत, आयामवत्, लंब, दीर्घपरिमाण, दीर्घाकार; विस्तृत, विस्तीर्ण. 2 चिर in comp., दीर्घ-चिर-कालीन, दीर्घ-चिर-कालिक (की *f.*), चिरंतन (नी *f.*), चिरस्थायिन्-स्थित, चिरकाल-दीर्घकाल-स्थायिन्. 3 दूर, वि-सु-दूर. 4 दीर्घसूत्र, चिरक्रिय, विलंबकारिन्. 5 परि-प्र-माण, मात्र, मित, परिमित in comp.; 'three fingers l.' त्र्यंगुलमात्र-परिमाण, त्र्यंगुलमित, त्र्यंगुल; 'being a l. way off' दूरस्थ, दूरस्थायिन्; 'a l. period दीर्घ-चिर-कालः; 'for a l. time' चिरं, दीर्घं, चिराय; *See* (*adv.*); 'the l. run' आयति *f.*; 'a l. vowel' दीर्घस्वरः. –*adv.* चिरं, चिरेण, चिराय, दीर्घ-चिर-कालं, दीर्घं, बहुकालं, चिरदिवसं. 2 दूरं, दूरे, दूरपर्यंतं; 'l. absent' चिरप्रवासिन्, चिरगत; 'l. sick' दीर्घ-चिर-रोगिन्; 'living l.' चिरजीविन्, आयुष्मत्; 'l. since left' चिरत्यक्त, &c.; 'how l.' कियच्चिरं, कियंतं कालं; कियत्कालं; 'how l. after' कियच्चिरेण; 'not very l.' नातिचिरं; 'very l.' सुचिरं; 'l. ago' प्रागेव, पूर्वमेव, अतीतदीर्घकाले; 'not l. ago' नातिचिरात् प्राक्, अनातिपूर्वं; 'ere l.' अचिरेण, अचिरात्; 'as l. as' 'so l.' यावत्-तावत्; 'as l. as one lives' यावज्जीवं; आमरणात्; 'the whole year l.' आवर्षांतात्, वर्षपर्यंतं; 'l. after' बहोः कालात्, दीर्घकालानंतरं. In comp. words ex. by दीर्घ, चिर, लंब, दूर, आयत; 'l.-armed' दीर्घभुज, लंबहस्त; 'l.-bellied' लंबोदर;

'l.-continuing' चिरस्थायिन्; 'l.-eyed' आयताक्ष, आयतनेत्र; 'l.-headed' सूक्ष्मनिपुण-मति, विदग्ध, पटु; l.-lasting' चिरस्थायिन्, चिरकालिक; *See* (*a.*); 'l.-legged' दीर्घपाद, ऊर्ध्वजानु, ऊर्ध्वज्ञु; 'l.-lived' चिर (र) जीविन्, दीर्घायुस्, चिरायुस्, चिरायुष्य, जैवातृक, आयुष्मत्; 'l.pepper' कृष्णा, उपकुल्या, वैदेही, मागधी, चपला, कणा, उ(ऊ)षणा, पिप्पलिः-ली. शौंडी, कोला; करिपिप्पली, कपिवल्ली, कोलवल्ली, श्रेयसी, वशिरः; 'l. pepper root' ग्रंथिकं, पिप्पलीमूलं, चटकाशिरस् *n.*; 'l.-sighted' दूर-दीर्घ-दृष्टि; 'l.-suffering' सहिष्णु, सहनशील, क्षमिन्, बहुक्षम; (*s.*) क्षमा, सहिष्णुता, सहनशीलता. **-er,** *a.* दीर्घतर; 'any l.' अतःपरं-ऊर्ध्वं, इतः परं; 'why delay any l.' किमित्यधुना विलंब्यते. **-ing,** *a.* अत्यभिलाषिन्, अत्याकांक्षिन्; कुतूहलिन्, स्पृहयालु, उत्कंठित उत्कट, लालस, अत्युत्सुक; 'a l. desire' उत्कटेच्छा; 'a l. woman' श्रद्धालुः; दोहदवती. *-s.* अत्यभिलाषः, अतिस्पृहा-वांछा, अत्याकांक्षा, उत्कंठा, लालसा, औत्सुक्यं, अतिलिप्सा; इच्छा; कामः, मनोरथः, स्पृहा, तृष्णा, आकांक्षा; 'the l. of a pregnant woman' दोहदः, गर्भदोहदः. **-ingly,** *adv.* सस्पृहं, सतृष्णं, सोत्सुकं, सोत्कंठं. **-Longanimity,** *s.* क्षमा, क्षांति *f.* **-Longeval,-Longevous,** *a.* चिरंजीविन्; *See* **Long-lived.** **-Longevity,** *s.* दीर्घायुः; चिरायुः. **-Longmetry,** *s.* दैर्घ्यमानं. **-Length,** *s.* दैर्घ्यं, दीर्घता-त्वं, आयामः, द्राघिमन् *m.*, आरोहः, आयति *f.*, विस्तारः, आनाहः, विस्तृति *f.*, वितति *f.* **2** मात्रा, अवधिः, मर्यादा, पर्यंतः; 'my rudeness (impudence) was carried to the l. of taking up arms' आयुधपरिग्रहं यावदुपारूढो दुर्योगः (U. 6). **3** मानं, प्र-परि-माणं. **4** चिर-दीर्घ-कालः, कालदैर्घ्यं; 'to such a l.' एतावत्पर्यंतं, यावत् (with acc.); 'for a l. of time' चिरं, चिरकालं; 'to a great l.' अतिमात्रं, अतिमर्यादं; 'at l.' सविस्तरं, विस्तरेण, सुविस्तरं रेण, विस्तरशः, असंक्षेपतः. **2** अंते, अंततः, शेषे, चिरकालात्, चिरस्य, अतीतदीर्घकाले. 'spread at l.' विस्तीर्ण; 'to lie at full l.' दंडवत् पत् 1 P. **-en,** *v. t.* दीर्घीकृ 8 U, प्र-वि-तन् 8 U, विस्तॄ c., प्र-वि-सृ c., आयम् 1 A, आयती-वितती-कृ. *-v. i.* विस्तॄ-वितन्-pass., दीर्घीभू. **-wise,** *adv.* अन्वायामं, अनुदैर्घ्यं, अनु in comp. **-y,** *a.* विस्तीर्ण, दीर्घ, आयत, सविस्तर, असंक्षिप्त.

Longitude, *s.* ध्रुवकः, द्राघिमन् *m.* **2** रेखांशः; (of heavenly objects) भोगः; 'circle of l.' रेखांशवृत्तं. **-Longitudinal,** *a.* अनुदैर्घ्य, अन्वायाम.

Looby, *s.* स्थूलजनः, ग्राम्यः, वृषलः, प्राकृतः.

Mustard, *s.* सर्षपः, तं(तु)तुभः, कदंबकः; ' black m. ' कृष्णिका, राजिका, क्षवः, क्षुता(धा)भिजननः, आसुरी, राजसर्षपः; ' white m. ' सिद्धार्थः-र्थकः.

Muster, *v. t.* संग्रह् 9 P, समा-हृ 1 P, समानी 1 P, सं-ऊह् 1 U; समाह्वे 1 P, एकीकृ 8 U, संगम् c., (गमयति). 2 (सैनिकान्) परिसं-ख्या 2 P or परिगण् 10, एकत्र समानी. -*v. i.* सं-इ 2 P, संमिल् 6 P, संगम् 1 A; *See* **Assemble;** ' m.-roll ' नामावलि-ली *f.*, परिसंख्या, परिगणना.

Mutable, *a.* विकारवत्, अस्थिर, परिवर्तनीय, विकारशील, अनियत, अनवस्थित, अस्थायिन्, व्ययिन्. 2 लोल, चंचल, तरल; *See* **Fickle.** **-ness,-Mutability,** *s.* अस्थैर्यं, व्ययिता, विकारशीलता, परिवृत्तिक्षमता, अनवस्थिति *f.* 2 लौल्यं, चांचल्यं, तरलता. **-Mutation,** *s.* परिणामः, विकृति *f.*, विकारः, विक्रिया, स्थिति-अवस्था-भेदः.

Mute, *a.* मूक, जड, जडवाच्, वाक्शून्य, अवाच्, वाणीहीन, निःशब्द, मुद्रितमुख; ' m. with wonder' आश्चर्यजडीकृत. -*s.* मूकजनः, मूकः. 2 पक्षिपुरीषं. **-ly,** *adv.* निःशब्दं, मूकवत्, जडवत्. **-ness,** *s.* मूकता, जाड्यं, वागभावः, वाक्स्तंभः, मौन-मूक-भावः.

Mutilate, *v. t.* व्यंगीकृ 8 U, विकलीकृ; (अंगानि) खंड् 10, व्यव-च्छिद् 7 P, कृत् 6 P. **-ed,** *a.* विकलांग (गी *f.*), क्षतविक्षत, छिन्नभिन्न, खंडितांग, खंडितविग्रह, नष्टेंद्रिय. **-ion,** *s.* व्यंगीकरणं, व्यवच्छेदः-दनं, खंडनं, अंगकर्तनं. 2 न्यूनांगता, व्यंगता, वैकल्यं.

Mutiny, *s.* सैन्यद्रोहः- अपरागः-विरक्ति *f.*-क्षोभः- प्रकोपः, संक्षोभः, व्युत्थानं; ' let him raise a m. in Jambudwipa' जंबुद्वीपे कोपं जनयतु (H. 3). -*v. i.* अभि-द्रुह् 4 P, प्रकोपं दृश् c., विरागं दृश् c., क्षुभ् 4 P, व्युत्था 1 P, शासनं लंघ् 1 A, 10. **-eer,** *s.* प्रकोपकारिन्, आज्ञालंघिन्, अभि-वि-द्रोहिन्, द्रोह-क्षोभ-कारिन् all *m.* **-ous,** *a.* अंतःप्रकोपकर (री *f.*), आज्ञालंघिन्, क्षोभ-प्रकोपकारिन्; प्रतीप, अवश, अनायत्त, दुःशास्य.

Mutter, *v.* अस्फुटं-अस्पष्टं वद् 1 P or जल्प् 1 P, अव्यक्तं उच्चर् c., नीचैः वद्; ' m. prayers' जप् 1 P. 2 गर्ज् 1 P, स्तन् 1 P, गंभीरं स्वन् 1 P. -*s.* **-ing,** *s.* अस्पष्टोच्चारणं, अव्यक्तभाषणं, उपांशुवादः-भाषितं. 2 जपः, जाप्यं, स्वाध्यायः. 3 गर्जितं, स्तनितं, निर्घोषः. **-er,** *s.* अस्फुटवादिन् *m.*, उपांशुवादिन् *m.* **-ingly,** *adv.* उपांशु, नीचैः, अस्पष्टं, अव्यक्तं.

Mutton, *s.* मेषमांसं, अविमांसं.

Mutual, *a.* परस्पर, अन्योन्य, मिथः, इतरेतर, in comp. ; ' m. help ' अन्योन्यसाहाय्यं; oft. by प्रति pr. ; ' m. obligation ' प्रत्युपकारः; प्रतिघातः, प्रत्यभियोगः, &c. **-ity,** *s.* परस्परयोगः-भावः-संबंधः, व्यतिकरः, अन्योन्याश्रयः, व्यतिहारः. **-ly,** *adv.* परस्परं, अन्योन्यं, मिथः, इतरेतरं, (*a.*) in comp.

Muzzle, *s.* घोणा. 2 मुखं, प्रवेशः ; छिद्रं, द्वारं. 3 मुखबंधनी-रोधनी. -*v. t.* मुखं बंध् 9 P or रुध् 7 U.

Myography, *s.* स्नायुवर्णनं.

Myope, *s.* अल्पदृश् *m.*, अदीर्घदृष्टिः.

Myriad, *s.* अयुतं, दशसहस्रं.

Myrmidon, *s.* परिचरः, क्रूरपरिचरः.

Myrobalan, *s.* आमलकः-की-कं, तिष्यफला, अमृता, वयस्था; (beleric m.) विभीतकः-की-कं, अक्षः, तुषः, कर्षफलः, भूतावासः, कलिद्रुमः; ' yellow m. ' अव्यथा, अभया, पथ्या, कायस्था, पूतना, अमृता, हरीतकी, हैमवती, चेतकी, श्रेयसी, शिवा.

Myrrh, *s.* बोलः, गंधरसः, रसगंधः, प्राणः, पिंडः, गोपरसः, गोपः, रसः, गोसः.

Mystery, *s.* रहस्यं, नि-,गूढं, गुह्यं, गूढार्थः, गूढतत्त्वं, गहनवस्तु-विषयः. **-ious,** *a.* निः-, गूढ, गहन, रहस्य, गुह्य, गुप्त, गूढार्थ, गुप्तार्थ, दुर्ज्ञेय, दुर्बोध, अव्यक्त, अस्पष्ट; ' m. are the ways of Fate ' कर्मणो गहना गतिः; ' a m. person ' अव्यक्तकर्मा पुरुषः, गूढचरित्रो नरः. **-iously,** *adv.* गहनं, गूढं. **-iousness,** *s.* गूढता, गहनता, दुर्बोधता.

Mystic,-al, *a.* गूढ, गुप्त, गहन; *See* **Mysterious. -ally,** *adv.* गूढं, गहनं. **-ism,-ness.** *s.* गूढता, गहनता. **-Mystify,** *v. t.* गहनीकृ 8 U, गूढीकृ.

Myth, Mythe, *s.* पुराणं, पुरावृत्तं, पुराण-पुरावृत्त-कथा, पुरावृत्ताख्यानं, पौराणिकी कथा. 2 कल्पितकथा, कूटार्थकथा. **-ic,-ical,** *a.* पौराणिक (की *f.*), पुराणकथित-उक्त. 2 काल्पनिक (की *f.*), कूटार्थ. **-Mythology,** *s.* पुराणं, इतिहासः, पुराणशास्त्रं, देवताख्यानं. **-ical,** *s.* पौराणिक-ऐतिहासिक -(की *f.*); *See* above. **-ist,** *s.* पुराविद् *m.*, पुराणविद्, इतिहासज्ञः.

N.

Nab, *v. t.* अकस्मात् धृ 1 P or ग्रह् 9 U.

Nacre, Naker, *s.* मुक्तास्फोटः, शुक्तिपुटं.

Nadir, *s.* अधोबिंदुः.

Nag, *s.* अश्वकः, घोटकः; *See* **Horse. -***v. t.* क्लिश् 9 P, अर्द् 1 P.

Naiad, *s.* जलदेवता, अप्सरस् *f.*

Nail, *s.* नखः-खं, नखरः-रं, कररुहः, पुनर्भवः, पुनर्नवः; ' to fight tooth and n. ' अत्यावेशेन (नखानखि) विवद् 1 A or युध् 4 A. 2 कीलकः, कीलः, शंकुः, लोहकीलः,-शंकुः. -*v. t.* कील् 10, (सा नश्चेतसि कीलितेव Mal. 5), कीलैः बंध् 9 P; ' n. ed to the spot ' तत्स्थानकीलित.

Naive, *a.* सरल, दक्षिण, निर्व्याज, निर्व्यलीक, ऋजु, सरलमति, सुजन; *See* **Frank. -ly,** *adv.* निर्व्याजं, अमायया, सारल्येन. **-Naivete,** *s.* सारल्यं, दाक्षिण्यं, सौजन्यं, अमाया, अव्याजः, आर्जवं, निर्व्याजता.

Naked, *a.* नग्न, विवस्त्र, निर् or अ-वस्त्र or वसन, विवसन, विवासस्, अपरिच्छन्न, दिग्वासस्, दिगंबर, वस्त्र or वसन-हीन-रहित-शून्य; विवृत, अनावृत, अनाच्छादित. 2 असज्ज, असंनद्ध, अभूषित. 3 केवल, अनावृत, शुद्ध, मात्र in comp. 4 स्पष्ट, सुप्रकाश, स्फुट; ' by the n. eye ' नेत्रमात्रेण; ' a n. woman ' नग्ना, कोटवी; ' he would not have left me n. to my enemies ' शत्रुप्रहारवशं-शत्रुवशायत्तं-मां नाकरिष्यत्. **-ly,** *adv.* नग्नवत्, अपरिच्छन्नं; केवलं, स्पष्टं. **-ness,** *s.* नग्नता, नग्नभावः; अनावृतत्वं.

Name, *s.* नामन् *n.*, नामधेयं; अभिधा, अभिधानं, आख्या, संज्ञा, अभिधेयं, आह्वयः, आह्वा, उपाधिः, लक्षणं, व्यपदेशः; ' do you know them by n. ' अपि ज्ञायंते ते नामधेयतः; ' I shall ask his mother's n. ' अस्य मातरं नामतः पृच्छेयं (S. 7); ' call by n. ' नाम ग्रह् 9 U, संबुध् c., नाम्ना आह्वे 1 P; ' calling by n. ' नामग्रहः-हणं, संबोधनं; ' he calls me by my n. ' नामग्राहं मामाह्वयति; ' family n. ' उपनाम, कुलनाम; ' in one's n. ' वचनेन, वचनात्; ' say to the king in my n. ' वाच्यस्त्वया मद्वचनात्स राजा (R. xiv. 61); ' what is the n. of the sage ' किंनामधेयोसौ मुनिः; ' in the n. of ' (in oaths) साक्षीकृत्य. 2 प्रतिष्ठा, कीर्ति-ख्याति-प्रसिद्धि-विश्रुति- *f.*, प्र-,वि-,ख्यातिः, यशस् *n.*; 'who has made a n. ' लब्धप्रतिष्ठः; ' good n. ' सुकीर्तिः, सुख्यातिः; 'bad n.' अप-अ-कीर्तिः, दुष्कीर्तिः, अप्रतिष्ठा. -*v. t.* अभि-धा 3 U, आह्वे 1 P, आ-ख्या 2 P, आ-प्र-चक्ष् 2 A, उदाहृ 1 P, व्यप-दिश् 6 P, संज्ञां-नाम-कृ 8 U (with gen.); *See* **Call**; ' hence his father n. ed his son Aja after the Creator ' अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार (R. v. 36). 2 नाम्ना निर्दिश् 6 P or उदा-व्या-हृ, नामतः कथ् 10 or वच् 2 P or ब्रू 2 U or कृत् 10, नाम ग्रह्; *See* **Tell** also. **-ed,** 'by name' *a.* अभिहित, ख्यात, संज्ञित, कीर्तित, उदाहृत, व्यपदिष्ट gen. ex. by नाम *ind.*, or by (*s.*) in comp. ;' a son n. Râma ' रामनामा or रामो नाम or रामसंज्ञः पुत्रः. 2 नामधारिन्, कृत-लब्ध-प्राप्त-नामन्. **-ing,** *s.* नामकरणं, नामनिर्देशः-ग्रहणं. **-less,** *a.* अनामक, नामहीन, अप्रसिद्ध. **-ly,** *adv.* यथा, नाम; ex. by तद्यथा, (विरक्तानां द्विविधं प्रतिविधानं तद्यथा अनुग्रहो निग्रहश्च Mu. 3). **-Namesake,** *s.* एक-सम-नामकः, एकनामधारिन् *m.*, सनामन् *m.*

Nap, *s* अल्प-स्वल्प-निद्रा, अदीर्घनिद्रा. 2 रो-(लो) मन् *n.* 3 गंडः. **-v.** *i.*, 'take a n.' अल्पकालमात्रं स्वप् 2 P. **-less,** *a.* लोमहीन. **-py,** *a.* लोमश, लोममय (यी *f.*). 2 निद्रालु. 3 स्वाप or निद्रा-कारिन् or आवह.

Nape, *s.* मन्या, घाटा, अवटुः, कृकाटिका.

Napkin, *s.* मुख-वदन-मार्जनवस्त्रं, नक्तकः.

Narcotic, *a.* निद्रा or स्वाप-कारिन् or जनन (नी *f.*). **-s.** निद्रावहं औषधं, निद्रौषधं.

Nard, *s.* जटिला, जटामांसी, तपस्विनी, लोमशा, मिशी (षी).

Narrate, *v. t.* वर्ण् 10, परि-कृत् 10, कथ् 10, आख्या 2 P, नि-आ-विद् c., अभि-धा 3 U, व्याहृ 1 P, वद् 1 P, चक्ष् 2 A; *See* **Tell.** **-ion,** *s.* कीर्तनं, कथनं, वर्णनं, आख्यानं, निवेदनं. 2 कथा; *See* below. **-ive,** *s.* कथा, आ-उपा-ख्यानं, आख्यायिका, वृत्तांतः, चरित्रं, कथाप्रबंधः; इतिहासः. **-a.** कथासंबंधिन्, कथा in comp., विवरणविषयक. **-or,** *s.* निवेदकः, कथकः.

Narrow, *a.* अविस्तृत, अविस्तीर्ण, सं-नि-रुद्ध, संकट, संबाध, संकु(को)चित, संवृत, अपृथु, अविपुल, अनायत, निरायत, अल्पपरिमाण, अवितत. 2 अल्प, परि-,मित, संयत, नियत, निबद्ध; *See* **Limited;** 'a n. pass' संकटं, संबाधः, संकटमार्गः. 3 (Fig.) क्षुद्र, अल्प, लघु, कृपण, अनुदार; 'of n. views', 'n. minded' क्षुद्रमनस्, लघुचेतस्, कृपण-बुद्धि-धी-मति-चेतस्, अनुदारशील. 4 सूक्ष्म, अतिसूक्ष्म, निपुण, सुविशुद्ध. **-v.** *t.* संक्षिप् 6 P. संकुच् 1 P, संबाध् 1 A, संहृ 1 P, संवृ 5 U, आकुंच् c., परि-मा 3 A, 2 P, सं-नि-यम् 1 P; *See* **Limit.** **-v.** *i.* Pass. of roots above. **-ly,** *adv.* अविस्तृतं, संकटं, संबाधं, अनायतं. 2 कृच्छ्रेण, कथमपि, कष्टेन, ईषदूनं; by कल्प-प्राय- in comp; 'he n. escaped being foiled' जितप्रायः-कल्पः. 3 सूक्ष्मं, निपुणं. **-ness,** *s.* अविस्तृति *f.*, संकोचः, अल्पविस्तारः, अल्पावकाशः, मितता, कार्पण्यं, दैन्यं, अनुदारता, &c.

Nasal, *a.* अनुनासिक (की *f.*), नस्य, नासिक्य, सानुस्वार. **-s.** अनुनासिकं.

Nascent, *a.* प्रादुर्भवत्; वर्धिष्णु.

Nasty, *a.* मलिन, अशुद्ध, समल, अपवित्र, अमेध्य; कुत्सित, गर्हित, अश्लील. **-ily,** *adv.* मलिनं, कुत्सितं. **-iness,** *s.* मालिन्यं, मलं, गर्ह्यता, अपवित्रता.

Natal, *a.* जन्म in comp.; 'n. country' जन्मभूः.

Natant, *a.* तरत्, प्लवत्.

Nation, *s.* राष्ट्रं, जनपदः, देशः, विषयः; (people) लोकः, जनाः, प्रजाः, जनता, जनः, लोकः, देशजनः-लोकः, देशवासिनः. **-al,** *a.* देशीय, दैशिक (की *f.*), देश्य, राष्ट्रीय, देश in comp.; 'n. custom' देशाचारः; 'n. law' देशधर्मः; 'n. calamity' उत्पातः, जनपदोद्ध्वंसः. 2 देशाभिमानिन्. सामान्य. साधारण (णी *f.*), सर्वजनीन; *See* **General.** **-ality,** *s.* स्वदेशाभिमानः. 2 देशीयता, देशोद्भवता. **-ally,** *adv.* सामान्यतः, जातितः.

Native, *a.* देशज, देशीय, देशोद्भव, स्वदेशोत्पन्न. 2 सहज, अकृत्रिम, नैसर्गिक (की *f.*), स्वभावज; *See* **Natural.** 3 जन्मप्राप्त, जन्मसिद्ध, जन्म-स्थ in comp.; 'n. country' जन्मभूमि *f.* -देशः, स्वविषयः-राष्ट्रं; 'n. place' जन्मस्थानं, उत्पत्तिस्थानं. **-s.** देशवासिन् *m.*, देशजः, देशोद्भवः, देशीयजनः-लोकः. **-ity,** *s.* उत्पत्ति *f.*, संभवः, उद्भवः, जनि *f.* 2 जन्मपत्रिका, जातकं; 'cast one's n.' जातकं निरूप् 10; 'star at one's n.' जन्मनक्षत्रं; 'name given at one's n.' जन्मनाम.

Natron, *s.* सर्जि *f.*, सर्जिका, सर्जिकाक्षारः, कापोतः, सुखवर्चकः.

Natty, *a.* शोभन, परिमृष्ट, सुरेख, विनीत.

Nature, *s.* सृष्टि *f.*, जगत् *n.*, भूमंडलं, विश्वं, ब्रह्मांडं, सर्गः. 2 मार्गः, रीति *f.*, क्रमः, विधिः, नियमः, धर्मः, सृष्टिक्रमः. 3 प्रकृति *f.*, माया, शक्ति *f.*, निर्मात्री देवता, आदिशक्तिः-माया, प्रधानं (according so Sūnkhyas). 4 प्रकारः, रूपं, जाति *f.*, रीतिः, विधा, in comp. 5 भावः, प्रकृतिः, स्वभावः, निसर्गः, धर्मः, तत्त्वं, सत्त्वं, गुणः, प्रकृति-निसर्ग-जाति-स्वभावः संसिद्धि *f.*, स्वरूपं, स्वधर्मः; शीलं. 6 स्वभाव or प्रकृति-गुणः or धर्मः; 'properties of n.' गुणत्रयं (सत्त्वं, रजः, तमः); 'good n.' सद्भावः, सुशीलं, सौजन्यं; 'of tbis n.' एवंविध; 'by n.' प्रकृत्या, जात्या, जन्मतः, स्वभावतः; 'blind by n.' जन्मांध, जात्यंध, जनुषांध; 'functions of n.' देह-शरीर-धर्मः. **-ed,** *a.* स्वभाव, शील, प्रकृति in comp. **-Natural,** *a.* स्वाभाविक-नैसर्गिक-सांसिद्धिक-प्राकृतिक-साहजिक-औत्पत्तिक- (की *f*), सहज, स्वभाव-निसर्ग-ज, स्वभाव-प्रकृति-सिद्ध, स्व, निज, अंतर्भव, अंतर्जात, प्रकृतिस्थ; 'n. enemy' जातशत्रुः, सहजारिः; 'n. enmity' शाश्वतिकः विरोधः; oft. ex. by (*s.*); स्वभाव एवैष परोपकारिणाम् (S. 5) 'it is n. with the benevolent.' 2 योग्य, यथामार्ग-न्याय, युक्त, उचित. 3 स्वभावानुगत, अनुलोम, प्रकृत्यनुसारिन्, स्वभावयोग्य. 4 अकृत्रिम, अकृतक, अयत्नकृत, अयत्ननिर्मित; 'n. cavity' देवखातं; 'n. loveliness' अव्याजसौंदर्यं. 5 अक्लिष्ट, अयत्नकृत, सुलभ 6 (Child) गूढज, अनौरस (सी *f.*), जारज, उपस्त्रीजात. विजात; *See* **Illegitimate.** 7 सत्य, यथार्थ, सरल, अकृत्रिम, प्रकृत. 8 यथाकाल; 'n.

death ' यथाकालं मरणं; 'n. day' सावनदिनं; 'n. form' स्वरूपं; ' n. disposition ' स्वभावः, जन्मस्वभावः; 'n. history' जडाजडशास्त्रं, स्थावरजंगमशास्त्रं; 'n. philosophy' पदार्थविज्ञानं; ' n. to ' सुलभ; ' levity n. to mortals' मानुषतासुलभो लघिमा (Ka. 134). -*s*. मूढः, मूर्खः, जडः. **-ist,** *s*. पदार्थशास्त्रज्ञः, पदार्थविज्ञानिन् *m*. **-ize,** *v. t.* अभ्यस् 4 U; *See* **Familiarize.** 2 देशीय-*a*. कृ 8 U. **-ly,** *adv*. प्रकृत्या, निसर्गेण, स्वभावतः, स्वभावेन, निसर्गतः, जात्या, (*s*.) in comp; 'n. charming ' निसर्गमधुर, प्रकृतिसुभग, अव्याजसुंदर-मनोहर, *&c*. 2 यथाक्रमं, अनुलोमं, सृष्टिक्रमानुसारेण. 3 अकृत्रिमं, अक्लिष्टं, अयत्नतः, सहजशक्त्या-गत्या. 4 स्वतः, स्वयं, अंतःप्रवृत्त्या, अबलात्, सहजावबोधेन. 5 अवश्यं, निर्विवादं, नियतं, अनायासेनैव; नूनं, खलु. **-ness,** *s*. सहजत्वं, अकृतकता, याथार्थ्य, &c.

Naught, *s*. न किमपि, न किंचित्-किंचन. 2 शून्यं, खं; ' set at n. ' अव-ज्ञा 9 U, तृणीकृ 8 U; *See* **Contemn, Defy.** -*adv*. न किमपि, न किंचिदपि, न ईषदपि-स्तोकमपि. -*a*. असार, निर्गुण.

Naughty, *a*. दुष्ट, उपद्रविन्, दुर्वृत्त, प्रतीप, अविनेय, अवश्य, हिंसाशील, अपकारप्रिय; *See* **Mischievous.-ily,** *adv*. प्रतीपं, दुष्टभावेन. **-iness,** *s*. दुर्वृत्तता, प्रतीपता.

Naumachy, *s*. नौयुद्धं.

Nausea, *s*. वमनं, उत्क्लेदः, वमनेच्छा. 2 वैकृतं, बीभत्सः, कुत्सा, घृणा, निर्वेदः. **-Nauseate,** *v. i.* वम् desid (विवमिषति). -*v. t.*, **Abhor,** q. v. **-Nauseous,** *a*. बीभत्सावह, बीभत्स, निर्वेदप्रद, गर्हित, कुत्सित. 2 वमनोत्पादिन्.

Nautic,-al, *a*. नाविक (की *f*.), नौ in comp.

Naval, *a*. समुद्र in comp., नाव्य, नाविक. 2 नौकात्मक, नौरूप.

Nave, *s*. नाभि-भी *f*., पिंडि-डी *f*., पिंडिका. 2 (देवालयस्य) मध्यभागः.

Navel, *s*. नाभि-भी *f*., तुंदः-दि-दी *f*., तुंदिका, उदरावर्तः; ' hollow of the n ' नाभ्यावर्तः; ' having a protuberant n. ' तुंदिन्, तुंदिल-भ, तुंदवत्; 'n.-string' नालः, नाभिनालः.

Navigable, *a*. नाव्य, नौतार्य, नौगम्य.

Navigate, *v*. नावा तॄ 1 P or प्लु 1 A or गम् 1 P or भ्रम् 1, 4 P. 2 (A ship) चल् c., वह् c., नी 1 P, प्रेर् c. **-ion,** *s*. नावा तरणं-गमनं-पर्यटनं, नौयात्रा, नौभ्रमणं-गमनं, समुद्रयानं-यात्रा. 2 नौवाहनं-चालनं-नयनं. 3 नाविकविद्या, नौकागमनविद्या-शास्त्रं. **-or,** *s*. नाविकः, समुद्रयायिन् *m*. 2 नौवाहः, नौनायकः.

Navy, *s*. (युद्ध-) नौसमूहः-साधनं, पोतावलि *f*., नौकासमूहः.

Nay, *adv*. न, नहि; ' n. more नेदमेव, अन्यच्च, अन्यदपि, पुनः, न केवलं इदं; ' say n. ' **Deny,** q. v.

Neap, *a*. नीच, निम्न.

Near, *prep*. समीपं-पे (with gen.), आरात् (with abl.), समया, निकषा (with acc.), उप in comp.; (with verbs) ex. by उप, आ, अभि, प्रति. -*a*. आसन्न, प्रत्यासन्न, सन्निहित, समीप, निकट, समीप-निकट-स्थ, उपांत, अंतिक, समीप-निकट-वर्तिन्, उपकंठ संनिकृष्ट, सविध, अभ्यास-श, सवेश, सवेश, अभ्यर्ण, अभ्यग्र, सनीड, समर्याद, अदूर; ' quite n. ' संसक्त, अव्यवहित, अपदांतर; ' very n. ' नेदिष्ठ, अंतिकतम. 2 दृढसंबद्ध-संसक्त, परिचित. 3 स्वार्थसंबंधिन्. 4 कृपण, अल्पव्ययिन्; (relation) निकट, आसन्न; ' who is n. her delivery ' आसन्नप्रसवा; 'n. his death' आसन्नमृत्युः. -*adv*. समीपं-पे, अंतिकं-के, निकटं-टे, अभितः, उपांते, आरात्, निकषा, अदूरं-रे, संनिधौ, सकाशे, उप in comp.; ' n. at one 's side ' पार्श्वे, पार्श्वतः. 2 **Nearly,** *See* below. -*v. t.* उप-गम् 1 P, उपसृ 1 P, समीपं-गम्; *See* **Approach. -ly,** *adv*. प्रायः, प्रायेण, प्रायशः, ईषदूनं, कल्प-प्राय-भूयिष्ठ-उप-in comp.; ' n. like Kumara ' कुमारकल्पः; ' n. dead ' मृतप्राय-कल्प; 'n. five years old ' पंचवर्षदेशीय; ' n. four ' उपचतुर. 2 दृढं, गाढं, ' n. connected ' दृढसंबद्ध. **-ness,** *s*. आसन्नता, नैकट्यं, संनिधिः, अभ्यासः, संनिकर्षः, सामीप्यं. 2 दृढसंसर्गः-संबंधः संसक्ति *f*., परिचयः. 3 कार्पण्यं, दैन्यं.

Neat, *a*. शुद्ध, शोभन, परिष्कृत, विनीत, परिमृष्ट, सुरेख. 2 कुशल, प्रवीण. 3 गोजातीय; ' n.- herd ' गोपालः. **-ly,** *adv*. विनीतं, शुद्धतया, शोभनप्रकारेण. **-ness,** *s*. शुद्धता, परिष्कारः, परिपाटि-टी *f*.

Nebula, *s*. शुक्लं, शुक्लपटलं.

Nebulous, *a*. मेघावृत, मेघाच्छन्न; *See* **Cloudy.**

Necessary, *a*. अवश्य, अवश्यंभाविन्, अपरिहार्य, अवश्यकरणीय, अवश्यक, आवश्यक (की *f*.), भवितव्य, भाव्य, अनिवार्य. 2 अपेक्षित, आकांक्षित. 3 विधि-दैव-वश, दैवाधीन; 'the n. result of acts ' कार्य-कर्म-वशः; oft. ex. by pot. pass. part. or अर्ह् 1 P. -*s*. शौचकूपः. **-ian,** *s*. दैववादिन् *m*.; दैवपरः; *See* **Fatalist. -ies,** अवश्यवस्तूनि, द्रव्यसंभारः, उपकरणसामग्री; ' n. of life ' अन्नोदकं, अन्नाच्छादनं. **-ily,** *adv*. अवश्यं, नूनं, खलु, अवश्यं-नियतं-एव.

Necessity, *s*. अवश्यंभाविता, अनन्यगतित्वं, आवश्यकत्वं, अवश्यकता, नियतत्वं, अवश्यकर्तव्यता, कार्यवशः, 2 दैन्यं, दीनता, दुर्गति *f*., दारिद्र्यं, आपन्नदशा. 3 प्रयोजनं,

हेतुः, कारणं, अर्थः, निमित्तं, कार्यं; अपेक्षा, आकांक्षा. 4 भवितव्यता, नियति *f*., दैवं, विधिः, दैवाधीनता. **-ate,** *v. t.* अवश्यीकृ 8 U; also ex. by अवश्यं; 'your insolence n. s your dismissal' धृष्टस्त्वमवश्यं (स्वाधिकारात्) दूरीकर्तव्यः. 2 प्रवृत् c., अवश्यं कृ c.; *See* **Compel.** **-ous,** *a.* दुर्गत, दीन, दरिद्र.

Neck, *s.* ग्रीवा, गलः, कंठः, कंधरा-रः, शिरोधरा, शिरोधिः; 'back of the n.' अवटुः, घाटा, कृकाटिका; 'n. of a pitcher' पात्रकंठः; 'seize by the n. and turn out' अर्धचंद्रं दत्वा निःसृ c.; 'n.-cloth' 'n.-kerchief' ग्रीवावस्त्रं, गलावष्टनं, ग्रैवेयकं; 'n.-lace', हारः, माला, सूत्रं, ग्रैवं, ग्रैवेयकं, कंठमाला-भूषा-आभरणं; 'n.-lace of jewels' मणिमाला, रत्नावलि-ली *f*.; 'n.-lace of pearls' मुक्तावलिः, मुक्तालता, मौक्तिकसरः; 'n.-lace of gold' कनकसूत्रं.

Necrology, *s.* मृतजनवृत्तांतः.

Necromancy, *s.* प्रेतसिद्धि *f*., पिशाचविद्या, भूतविद **-e** याज्ञः; *See* **Magic, -ian.**

Nectar, *s.* अमृतं, सुधा, पी(पे)यूषं, सुधा-अमृत-रसः; 'n. of flowers' मधु *n*., पुष्पासवः, पुष्परसः, मकरंदः, मरंदः. **-ean, -eous, -ine,** *a.* अमृतोपम, सुधातुल्य, अमृत-सुधा-मय (यी *f*.).

Need, *s.* प्रयोजनं, कार्यं, अर्थः, उपयोगः, or ex. by किं (with instr.) कारणं, निमित्तं, हेतुः, अपेक्षा, आकांक्षा; 'rich persons have n. of (even) a starw' तृणेन कार्यं भवतीश्वराणां (P. I. 1): 'according to n.' यथाकार्यं, प्रयोजनवशात्. 2 व्यसनं, आपद् *f*., कृच्छ्रं, कष्टं, दुर्गति *f*., दुःखं, दारिद्र्यं, क्लेशः, संकटसमयः; 'times of n.' आपत्समयः; 'a friend in n. is a friend indeed' स सुहृद् व्यसने यः स्यात्. **-***v. t.* अपेक्ष् 1 A, आकांक्ष् 1 P; प्रार्थ् 10 A, इष् 6 P; oft. ex. by (*s.*); 'he n. s help' तस्य साहाय्येन प्रयोजनं. 2 (Must) ex. by अवश्यं or by अर्ह् 1 P, or pot. pass. part.; 'you n. not come to me' मां प्रत्यागमनं न तेऽवश्यकं. **-ful,** *a.* अपेक्षित, अपेक्षणीय, अवश्यक आकांक्षित. **-less,** *a.* निरर्थक, निष्प्रयोजन, निरपेक्ष, निः-अ-कारण, अहेतुक. **-lessly,** *adv.* निरर्थकं, निष्प्रयोजनं, व्यर्थ,हेतुं विना **-lessness,** *s.* अ-कारणं, कारणाभावः. **-y,** *a.* दरिद्र, दीनं,निःस्व, अकिंचन, दुर्गत; *See* **Poor.** **-Needs,** *adv.* अवश्यं (एव), नूनं, खलु.

Needle, *s.* सूचि-ची *f*., सेवनी; 'the eye of a n.' सूचिरंध्रं-छिद्रं: 'a magnetic n.' लोहमणिशलाका; 'n.-maker' सूचिकारः 'n.-woman' सूचिका; 'n.-work' सूचिकर्मन् *n*. सूत्रकर्मन् *n*.

Nefarious, *a.* अतिघोर, अतिदुष्ट, निंद्य, दारुण, दुष्टतम, पापिष्ठ, महा-अति-पातकिन्. **-ly,** *adv.* अतिघोरं, अतिदुष्टतया. **-ness,** *s.* अतिघोरता, पापिष्ठता.

Negative, *a.* अस्वीकारार्थक, निषेधार्थक, नास्तिगर्भ, निषेधद्योतिन्. अभावरूप, अकरणरूप, अभावात्मक; 'n. quantity'-क्षयराशिः. **-***s.* नञ्, निषेधार्थक-अस्वीकारार्थक-शब्दः. 2 नास्ति-अभाव-पक्षः, निषेधवाक्यं 'two n.s make one affirmative द्वौ नञौ प्रकृतार्थं गमयतः; 'to reply in the n.' नेति वद् 1 P. **-***v. t.* नि-प्रति-षिध् 1 P, प्रत्यादिश् 6 P, प्रत्या-ख्या 2 P, निरस् 4 U, अपलप् 1 P; *See* **Confute, Reject.** **-ly,** *adv.* नेति, नास्तीति, सनिषेधं, अस्वीकारेण. **-Negation,** *s.* प्रत्याख्यानं, प्रत्यादेशः, निषेधः, अस्वीकारः, अपलापः. 2 अभावः.

Neglect, *v. t.* उपेक्ष् 1 A, न अनुष्ठा 1 P or आचर् 1 P, वि-स्मृ 1 P, प्र-मद् 4 P (with abl.), न अव-धा 3 U or श्रु 5 P (words); प्रमादतः त्यज् 1 P; 'n. ed his duty' स्वाधिकारात्प्रमत्तः (Me. 1). 2 अतिचर्, अतिवृत् 1 A, अति-व्यति-क्रम् 1 U, 4 P, उत्,-लंघ् 1 A, 10; त्यज्, हा 3 P, अपास् 4 U. 3 अव-ज्ञा 9 U, अव-मन् 4 A, अवगण् 10, अव-धीर् 10, तिरस्कृ 8 U, न गण् or आदृ 6 A; *See* **Contemn.** **-***s.* **Negligence,** *s.* उपेक्षा, अनपे(वे)क्षा, प्रमादः, अनवधानं, विस्मरण, असावधानत्वं. 2 त्यागः, अननुष्ठानं, लोपः, अति-व्यति-क्रमः, अतिपातः, लंघनं, उपात्ययः, उत्सर्जनं. 3 अवज्ञा, अवमानः, अनादरः, अवधीरणं-णा. **-ful, -Negligent,** *a.* उपेक्षक, मंदादर, निरपेक्ष, अनवधान, प्रमत्त, अनवहित, असावधान, प्रमादिन्. **-fully,** *adv.* सोपेक्षं, निरपेक्षं, उपेक्षया, मंदादरं, अनवहितं, असावधानं, प्रमादतः, प्रमादेन, सप्रमादं, प्रमत्तवत्, असमीक्ष्य.

Negotiate, *v. i.* व्यवहृ 1 P, पण् 1 A. 2 संधये संवद् 1 P. **-***v. t.* संधि-धा 3 U, व्यवहारेण सं-धा. 2 वि-क्री 9 A. **-ion,** *s.* पणनं, व्यवहारः. 2 संधिक्रमः, सामन् *n*., शमनं, मध्यस्थाश्रयः. **-or,** *s.* व्यवहारिन् *m*., पणिकः, व्यवहर्तृ *m*. 2 मध्यस्थः, संधि-साम-विद् *m*. सामकुशलः.

Negro, *s.* श्यामदेहः, कृष्णांगः.

Neigh, *v. i.* हेष्-ह्रेष्-रेष् 1 A. **-***s.*, **-ing,** *s.* हे(ह्रे)षा, हेषारवः, हेषितं, अश्वनादः-स्वनः.

Neighbour, *s.* प्रतिवेशिन् *m*., प्रतिवेशः-श्यः, प्रतिवासिन् *m*. प्रातिवेशिकः, निकट or समीप-

स्थ:-वर्तिन् *m.* वासिन् *m.* ,सामंत:; 'next door n.' प्रातिवेश्य:, अनंतरवासी. -*a* प्रतिवासिन्, समीपस्थ, &c. -*v. t.* निकटे स्था 1 P or वृत् 1 A or वस् 1 P; *See* **Border.** **-hood,** *s.* संनिधि:, उपकंठ:,सांनिध्यं, सामीप्यं, संनिकर्ष:, उपांत:-तं, नैकट्यं, अभ्यास:. 2 समीप-संनिहित-देश:, सामंत, प्रतिवेश:, अधिवास:. 3 समीप-निकट-वासिन:, प्रातिवेश्या:, प्रतिवासिन:, (*pl.*). **-ing,** *a.* समीप-निकट-वर्तिन्, समीप-निकट-स्थ, सामंत, संनिहित, उपांत, आसन्न; *See* **Near.** **-ly,** *a.* प्रतिवासयोग्य; उपकारशील, हित.

Neither, (nor) *a., conj.* न-न वा, न च न च, (न च न परिचितो न चाप्यगम्य: M. 1), or simply न-न, (मा-मा, with Imperative). 2 एक, एकतर, अन्यतर with न, or by उभौ.

Neogamist, *s.* नवोढ:-ढा, नवभार्या, नवपति:.

Neology, *s.* नूतनन्याय:-मतं. 2 नूतनशब्दाश्रय:. **-ist,** *s.* नूतनमताश्रयिन् *m.* नूतनन्यायसेविन् *m.*

Neophyte, *s.* नवशिष्य:-छात्र:, अनभ्यस्त:, प्राथमकल्पिक:, अपरिचित:.

Nepenthe, *s.* दु:खशमनं.

Nephew, *s.* भ्रात्रीय:, भ्रातृव्य:-ज:, भ्रातृपुत्र:-सुत:. 2 (Sister's son) भागिनेय:, स्वस्रीय:, भगिनी or स्वसृ-पुत्र: or सुत:.

Nephritic,-al, *a.* वृक्कसंबंधिन् 2 वृक्करोगहर.

Nepotism, *s.* ज्ञात्यतिस्नेह:, कुलपक्षपात:.

Nereid, *s.* जल-समुद्र-देवता.

Nerve, *s.* शिरा, वस्नसा, स्नसा; धमनि-नी *f.*, मज्जा-ज्ञान-तंतु:. 2 बलं, वीर्यं, तेजस्-ओजस् *n.*, शरीरदृढता. 3 धैर्यं, धृति *f.*, मन:स्थैर्यं. -*v. t.* बलं-धैर्यं दा 3 U or वृध् *c.* **-less,** *a.* निर्बल, दुर्बल, शक्तिहीन. **-ous,** *a.* शिराल; मज्जातंतुगत. 2 ओजस्विन, सबल, वीर्यवत्, ऊर्जस्वल, सुदृढ, धीर. 3 क्षिप्रक्षोभ, कंप-वेपन-शील, धैर्यहीन. **-ously,** *adv.* सवीर्यं, सबलं. 2 सकंपं, धैर्यं विना. **-ousness,** *s.* वीर्यं, ओजस् *n.* ऊर्जस् *n* बलं. 2 स्नायुविकार:, कंपशीलता, अधृति:.

Nescience, *s. See* **Ignorance.**

Nest, *s.* नीड:-डं, कुलाय:, निलय:, पक्षिस्थानं-गृहं. 2 गृहं, स्थानं, आधार:, आशय:; 'find a mare's n.' शशविषाणं आसद् *c.* or लभ् 1 A. **-Nestle,** *v. i.* (पक्षिवत्) नीडं आश्रि 1 U or अधि-शी 2 A, सुखेन शी or संविश् 6 P or नि-ली 4 A. -*v. t.* पुष् 1, 4, 9 P or c , पा *c.* (पालयति). **-ing,** *s.* नीडस्थ: पक्षिशाव:.

Net, *s.* जालं, पाश:, बंधनं-नी, पाशबंध:, वि-(वी)तंस:; 'n. for deer' वागुरा, मृगबंधनी, मृगजालं; 'n. for fish' आनाय:, जालं; 'n.-work' जाल-सूत्र-कर्मन् *n.* 2 कूटयंत्रं, उन्माथ:. -*a.* शुद्ध, अशेष, निरुद्धार, अभग्न, अखंड, अन्यून. -*v. t.* जाले बंध् 9 P or ग्रह् 9 U. 2 जालीकृ 8 U.

Nether, *a.* अधस् in comp.; अधर, अवर, अध:स्थ, अधोभव, अधस्तन (नी *f.*); 'n. world' अधोलोक:; 'n. garment' अधोवास:. **-most,** *a.* अवरतम.

Nettle, *s.* पीतपर्णी. -*v. t.* सं-परि-तप् *c.*, प्रकुप् *c.*, रुष् *c.*; *See* **Enrage, Excite.**

Neural, *a.* वस्नसा-शिरा-संबंधिन् **-gia,** *s.* वातशूलं.

Neurology, *s.* शिरावर्णनं.

Neurotomy, *s.* शिराच्छेदविद्या.

Neuter, *a.* नपुंसक, क्लीब, तृतीय(या)-प्रकृति, षंढ; 'n. gender' क्लीबं, नपुंसकं; *See* below. **-Neutral,** *a.* मध्यस्थ, तटस्थ, उदासीन, अपक्षपातिन्, समदृष्टि, समभाव, उभयसामान्य, अपक्षपात; *See* **Indifferent.** -*s* तटस्थ:,उभयसामान्य:. **-ity,** *s.* माध्यस्थ्यं ताटस्थ्यं, अपक्षपात:, औदासीन्यं, उभयसाम्यं, समभाव:, समदृष्टि *f.* **-ly,** *adv.* औदासीन्येन, उभयसामान्यं, समभावेन. **-Neutralize,** *v. t.* विशिष्ट-गुणान् नश् *c.*, दुर्बलीकृ 8 U, बलं-शक्तिं-नश् *c.* 2 उदासीनीकृ. **-ation,** *s.* विशिष्टगुणनाश:-शनं, विशेषधर्मलोप:, दुर्बलीकरणं. 2 उदासीनीकरणं. **-ed,** *a.* नष्ट-गुण-शक्ति-बल.

Never, *adv.* न कदाचित्, न कदापि, न कदाचन, न जातु, न कर्हिचित्; 'n.-fading' अजर; 'n.-failing' अमोघ, अक्षय्य; 'n. more' न भूय:, नेत:परं, न पुन:.

Nevertheless, *conj.* तथापि, किंतु, पुन:, परंतु, परं.

New, *a.* नव, नवीन, अभिनव, नूतन, प्रत्यग्र (of flowers &c.). 2 आधुनिक (की *f.*), इदानींतन-अधुनातन-(नी *f.*), अर्वाचीन. 3 अपूर्व अभूत-अदृष्ट-पूर्व, अश्रुतपूर्व. 4 अनभ्यस्त, अपरिचित, अविज्ञानिन्; 'n. comer' आगंतुक:, नवागत:; 'n.-born' नवोत्पन्न, सद्योजात; 'n.-fangled' 'n. fashioned' नवघटित, नवकल्पित-सृष्ट; 'n. year's day' वर्षप्रतिपद् *f.* **-ly,** *adv.* नवं, प्रत्यग्रं, सद्य:, नूतनं, नव in comp.; 'n. married wife' नवोढा, नवपाणिग्रहणा वधू:; 'n. ripe (blown)' प्रत्यग्रविकासित. **-ness,** *s.* नवीनता, अपूर्वता. 2 नूतनारीति:, नवाचार:.

News, *s.* वार्ता, वृत्तांत:, प्रवृत्ति *f.*, उदंत:, समाचार:, वृत्तं. 2 संवाद:, जनवाद:-श्रुति *f.*, लोकप्रवाद:, किंवदंती; 'good n.' भद्रं, शुभं, शुभवार्ता; 'ill n.' अशुभं, अशुभवार्ता; 'ill n. travels fast' अशुभवार्ता सत्वरं बहुलीभवति; 'n.-monger' वार्तावृत्ति:, वार्तायन:, वार्तावहनवृत्ति:, 'n. paper' वार्ता-समाचार-पत्रं, वृत्तपत्रं.

Newt, *s.* क्षुद्रगोधा.

Next, *a.* (Of time) आगामिन्; 'on Monday n.' आगामिनि सोमवासरे. 2

अनंतर, अव्यवहित, अव्यवधान, संसक्त, निरंतराल; 'n. to the skin' शरीरसंसक्त. 3 सन्निहित;पार्श्वस्थ,अंतिक,समीप or निकटस्थ or वर्तिन्; *See* **Near**; oft. ex. by पर, अन्य, अंतरं in comp.; 'n. born' अनंतरज; 'in the absence of the first, the n. and so on' पूर्वाभावे परः परः; 'on the n. day' पराह्णे, परेद्युः; 'the n. world' परलोकः, लोकांतरं; 'n. door to' अदूर, ईषदून (with abl.); कल्प in comp.; 'in the n. world' अमुत्र, परत्र; 'n. moment' क्षणांतरं; 'n. but one' एकांतरं. -*adv.* अनंतरं, परं, परतः (with abl.); ततः, तदनंतरं, अथ, परस्तात्, ततः-परं-ऊर्ध्वं; 'what n.' ततः किं, ततस्ततः.

Nexus, *s.* बंधः, संधिः.

Nib, *s.* चंचु *f.*, तुंडं. 2 अग्रं, आणि *f.*, अग्रभागः. **-bed,** *a.* साग्र, आणिमत्.

Nibble, *v. t.* (अल्पाल्पं) दंश् 1 P अवकृत् 6 P, चर्व् 1 P, 10; क्रमशः-अल्पाल्पशः-खाद् 1 P or कृत् or भक्ष् 10. 2 छिद्रं अन्विष् 4 P, दोषं ग्रह् 9 U, असूयति (D.) (with dat.).

Nice, *a.* ललित, शोभन, सु in comp., सुभग, रम्य, रमणीय, रुचिर, मनोहर, साधु. 2 स्वादु, सुरस, मिष्ट, आस्वादवत्, रुचिर, रुचिकर. 3 सूक्ष्मदृष्टि-दर्शिन्, कुशाग्रबुद्धि. 4 सूक्ष्म, अतिसूक्ष्म, सुपरिशुद्ध, सम्यच्. 5 अस्थूल, सूक्ष्म, विरल (cloth). 6 कोमल, मृदु, पेलव, सुकुमार. 7 अतिसूक्ष्म, अतिनिपुण. **-ly,** *adv.* सुष्ठु, सु *pr.*, ललितं, शोभनं, सम्यक्. 2 सूक्ष्मं, सूक्ष्मत्वेन. **-ness,-ty,** *s.* लालित्यं, रम्यता, स्वादुता, सौरस्यं; सूक्ष्मदृष्टि *f.*, सूक्ष्मदर्शिता, कुशाग्रमतित्वं, सूक्ष्मता; युक्ति *f.*, नीति *f.*

Niche, *s.* (प्रतिमा-) आधारः, निकेतनं, स्थानं.

Nick, *s.* ग्रंथिः; अवच्छेदः. 2 शुभ-अनुकूल-समयः, युक्त-उचित-कालः, शुभयोगः-कालः-लग्नं. -*v. t.* अवच्छिद् 7 P. 2 शुभलग्ने आसद् c.

Nickname, *s.* संज्ञा, उपाधिः, उपाधिनामन् *n.* -*v. t.* उपाधिं दा 3 U.

Nictate, *v. i.* निमिष् 6 P; नि-मील् 1 P. **-ion,** *s.* निमेषः; निमीलनं.

Nidification, *s.* नीडकरणं, कुलायरचनं.

Niece, *s.* भ्रातृकन्या-सुता, भ्रात्रीया. 2 (Sister's daughter) भागिनेयी, स्वस्रीया.

Niggard, *s.* कृपणः, क्षुद्रः, कदर्यः. -*a.*, **-ly,** *a.* कृपण, क्षुद्र, कदर्य, त्यागविमुख (खी *f.*), बद्धमुष्टि. **-ly,** *adv.* कृपणवत्, अल्पव्ययेन. **-ness,** *s.* कार्पण्यं, कदर्यता; *See* **Miser,** &c.

Niggle, *v. i.* कालापव्ययं. कृ 8 U.

Nigh, *a.*, *adv.* *See* **Near.**

Night, *s.* रात्रि-त्री, रजनिः-नी, क्षपा, निशा, विभावरी, श(शा)र्वरी, यामिनी, त्रियामा, निशीथिनी, क्षणदा, तमस्विनी, तमिः-स्री-स्रा, (all *f.*): 'a dark n.' तमिस्रा, तामसी; 'moonlight n.' ज्योत्स्नी, ज्योतिष्मती; 'by n.', 'at n.' रात्रौ, निशि, नक्तं, दोषा; 'number of n. s' गणरात्रं; 'beginning of n.' प्रदोषः, रजनीमुखं, निशामुखं; 'n. and day' रात्रिंदिवं, नक्तंदिवं; 'a n. and 2days' पक्षिणी; 'sitting up at n.' रात्रिजागरः; 'n.-attack' सौप्तिकं, सौप्तिकाक्रमः; 'n.-blindness' रात्र्यंधता; 'n.-dress' रात्रिवेशः; 'n.-fall' प्रदोषः, निशा-रजनी-मुखं, संध्याकालः, रात्रियोगः; 'n.-hag' रात्रिचरा, रात्र्यटा; 'n.-man' खल-मल-पूः; 'n. mare' दुःस्वप्नः, कुस्वप्नः; 'n.-shade' निदिग्धिका, स्पृशी, व्याघ्री, बृहती, कंटकारिका, प्रचोदनी, कुली, क्षुद्रा, दुःस्पर्शा, राष्ट्रिका; 'n.-wandering' निशाचर, रात्रि(त्रिं)चर; 'n.-watch' नगररक्षिणः (pl.); यामः, प्रहरः. **-ly,** *a.* नैश (शी *f.*), दोषातन (नी *f.*), (*s.*) in comp.; 'n. watch' रात्रिजागरणं. -*adv.* रात्रौ, निशि, नक्तं. 2 प्रतिरात्रं, निशिनिशि, रात्रौ रात्रौ.

Nightingale, *s.* प्रियगीतः, बुलबुलः.

Nihil, *s.* शून्यं, अभावः. **-ism,** *s.* शून्यवादः. **ist,** *s.* शून्यवादिन् *m.* **-ity,** *s.* अभावः, शून्यता.

Nimble, *a.* चपल, लघु, लघुगति, लघुशरीर, चपलदेह, क्षिप्र-चपल-गति; 'n.-footed' लघुपाद; 'n.-handed' लघुहस्त; 'n.-witted' चपल-शीघ्र-बुद्धि. **-ness,** *s.* लघुता, देहचापल्यं, चापल्यं, क्षिप्रता. **-Nimbly,** *adv.* लघु, लघु-द्रुत-गत्या, चपलतया, द्रुतं.

Nine, *a.*, *s.* नवन्; 'n.-fold' नवगुण. **-Ninth,** *a.* नवम (मी *f.*); 'n.ly' 'in the n. place' नवमस्थाने. **-Nineteen,** *a.*, *s.* नवदशन्, ऊनविंशति *f.*; 'n.-th' नवदश (शी *f.*). **-Ninety,** *a.*, *s.* नवति *f.*

Ninny, *s.* अल्पधीः, मूर्खः, जडः.

Nip, *v. t.* नि-,कृत् 6 P, अवछिद् 7 P. 2 संदंश् 1 P, चर्व् 1 P, 10. 3 पीड् 10, अर्द् 1 P or c. 4 नश् c., उच्छिद्, विशृ 6 P or c.; म्लानीकृ 8 U; 'n. in the bud' कलिकावस्थायां एव नश् c., जातमात्रं हन् 2 P or प्रशमं नी 1 P, (जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत् P. III. 1). -*s.*, **-ping,** *s.* निकृंतनं, अवच्छेदः. 2 हिमार्तीकरणं. **-ped,** *a.* छिन्न, पीडित, &c. 3 हिमार्त, हिमपीडित. **-Nippers,** *s.* संदंशः-शकः, कंकमुखं.

Nipple, *s.* चूचुकः-कं, स्तन-कुच-अग्रं, स्तनमुखं.

Nit, *s.* लिक्षा, यूकांडं. **-ty,** *a.* लिक्षापूर्ण.

Nitre, *s.* यवक्षारः, यवाग्रजः, पाक्यः. **-ous,-y,** *a.* यवक्षारमय (यी *f.*).

Nitrogen, *s.* निर्गुणवायु *m.*

No, *adv.* न, नो, नहि; ' n , n. ' मा मैवं. **-*a.*** (Before nouns) ex. by न; अ, अन्, निर् pr.; हीन, शून्य, रहित in comp., ' n. one ' न कोपि, न कश्चन; ' n.-body ' न काश्चित्, न काचन; ' having n. issue ' अनपत्य, वंशहीन, &c.

Noble, *a.* कुलीन, आभिजात, आर्य, आभिजनवत्, महाकुल, सत्कुलजात, सद्वंशज, कुल-ज or जात, कुलप्रसूत, वंशविशुद्ध. 2 (N.-minded) उदार, महात्मन्, महामनस्, उदात्त, उदार-धीमति, महानुभाव, महाशय, महेच्छ. 3 महत्, धीर, श्रेष्ठ, उत्कृष्ट, विशिष्ट, उत्तम, महाभाग, उन्नत, प्रमुख, प्रशस्त, वि-प्र-ख्यात, प्रतिपत्तिमत्, सुप्रतिष्ठ, कीर्तिमत्, यशस्विन्; श्रीमत्, महाप्रताप, महातेजस्, तेजस्विन्, ओजस्विन्; *See* **Majestic** also; oft. ex. by ऋषभः, सिंहः, व्याघ्रः, पुंगवः, शार्दूलः in comp.; *See,* **Excellent;** ' n.-looking ' धीरदर्शन; महानुभावाकृति; ' n. in reason ' उदात्तधी 'n. animal ' उदात्तसत्त्वं; ' n. nature ' सत्त्वं. **-*s.*,** ' N.-man ' शिष्टजनः, कुलीनः, कुलीन-उत्कृष्ट-पदस्थः, आर्यजनः, अभिजनवत् *m.* **-ness,** *s.* महत्त्वं, महिमन् *m.*, उत्कर्षः, उन्नति *f.*, श्रेष्ठता &c.; प्रतापः, वैभवं; *See* below. **-Nobly,** *adv.* कुलीनवत्, आभिजात्येन; ' n. born ' कुलोत्पन्न; *See* (*a.*). 2 औदार्येण, उदारतया, माहात्म्येन, उदारचेतसा, उदात्तं, धीरं. 3 सप्रतापं, अतितेजसा, महाविभूत्या, ऐश्वर्येण. **-Nobility,** *s.* कुलीनता, आर्यता, आभिजात्यं, कुलोत्कर्षः सद्वंशता. 2 औदार्यं, माहात्म्यं, महानुभावः, उदारधीः; महाशयः, महिमन् *m.* 3 महत्त्वं, महिमा, उत्कर्षः, विशिष्टता, श्रेष्ठत्वं, प्रकर्षः, उन्नतिः, प्रतिपत्ति *f.*, प्रतिष्ठा, प्र-वि-ख्याति *f.* 4 प्रतापः, ऐश्वर्यं, विभूति *f.*, ओजस्-तेजस् *n.*, धीरता, श्रीः. 5 शिष्ट-कुलीन-जनः, कुलीनलोकाः-जनाः. **-Noblesse,** *s.* कुलीनजनाः, कुलीनजनसमाजः

Nocent, *a.* *See* **Mischievous.**

Noctavagant, *a.* रात्रिचर.

Nocturnal, *a.* *See* **Nightly.**

Nod, *s.* शिरःकंपः-चालनं, शिरःसंज्ञा-संकेतः. 2 शिरः-मस्तक-प्रणामः. **-*v.*** (मस्तकं, शिरः) चल् c.; ' Mâlati n. s her head ' मालती मूर्धानं चालयति (Mal. 8); शिरसा संकेतं-संज्ञां कृ 8 U or दा 3 U; ' n. consent ' शिरःकंपेन अनुमन् 4 A or अनुमतिं सूच् 10. 2 (शिरः) प्र-आ-वि-अव-नम् c. (नमयति).

Nodated, *a.* ग्रंथिल, ग्रंथिमत्.

Noddle, *s.* *See* **Head.**

Noddy, *s.* *See* **Idiot.**

Node, *s.* पातः. 2 अस्थिगुल्मः, गंडः, पिंडः

Nodose, *a.* ग्रंथिल, ग्रंथिमत्.

Nodule, *s.* घनः, पिंडः; शर्करा, लोष्टः.

Noise, *s.* नि-,नादः, ध्वनिः, शब्दः, नि-,स्वनः, घोषः, महा-उच्च-स्वरः, उत्क्रोशः, वि-,रावः, रवः, निर्ह्रादः; ' rattling n. ' रणितं, रणत्कारः; 'jingling n.' क्वणः, क्वणनं, क्वणितं; ' loud n. ' कलकलः, कोलाहलः, तुमुलं, महाशब्दः-स्वनः-घोषः. 2 जनरवः-प्रवादः-श्रुति *f.*; ' make n. ' नद् 1 P, ध्वन् 1 P, वि-,रु 2 P, रण् 1 P, शब्दायते (D.), कोलाहलं-कलकलं-कृ 8 U; ' shallow water makes great n. ' अर्धो घटो घोषमुपैति नूनं. **-*v. t.*** घुष् 10, उत्-वि-°, प्रकाश् c., प्र-, ख्या c (ख्यापयति), प्रकटीकृ. **-ful,** *a.* सशब्द; *See* Noisy below. **-less,** *a.* निःशब्द, नीरव, निर्घोष. **-lessly,** *adv.* निःशब्दं, नीरवं. **-Noisy,** *a.* महाशब्द-स्वन-नाद, तुमुल-महाशब्द-कोलाहल-कारिन्, मुखर, घोषण, घोषकारिन्, घोषकर (री *f.*), बहु-महा-घोष; बद्ध-कृत-कलकल. 2 निनादपूरित, कलकलव्याप्त, मुखर, सशब्द, नादिन्, सं-नि-र्ह्रादिन्. **-ily,** *adv.* उच्चैः-स्वरेण, महाशब्देन. **-iness,** *s.* महाशब्दः-ध्वनिः.

Noisome, *a.* दुर्गंध, पूतिगंधि, कुत्सित, दुष्ट, समल. 2 मारक, मारात्मक, क्षयकर (री *f.*), नाशावह, घातुक, बाधक. **-ness,** *s.* दुर्गंधः, पूति *f.*, उग्रगंधता.

Nomad,-ic, *a.* पशुचारणोपजीविन्; अस्थिरवास.

Nome, *s.* प्र-,देशः, देशभागः.

Nomenclature, *s.* परिभाषा, पारिभाषिकशब्दसंग्रहः.

Nominal, *a.* नामसंबंधिन्, नामविषयक. 2 शाब्द (ब्दी *f.*), शाब्दिक-वाचनिक-(की *f.*). 3 नाममात्र, नामधारिन्-भृत्, नाममात्रधारिन्, शब्द-नाम-in comp.; ' I am but a n. lord of the earth ' ननु शब्दपतिः क्षितेरहं (R. VIII. 52); ' n. verb ' नामधातुः **-ly,** *adv.* शब्द-नाम-मात्रेण, नामत एव, शब्दतः.

Nominate, *v. t.* नाम-संज्ञां-कृ 8 U, नाम निर्दिश् 6 P; *See* **Call, Name.** 2 (To an office) नियुज् 7 A, 10 or प्रति-ष्ठा c (-ष्ठापयति). **-ion,** *s.* नियोगः, नियोजनं, प्रतिष्ठापनं. **-ive,** *s.* कर्तृ *m.*, कर्तृवाचकः, प्रथमा विभक्तिः. **-or,** *s.* नियोजकः. **-Nominee,** *s.* नियुक्तः, अधिकृतः.

Non, (a prefix) Ex. by अ, अन्; ' n.-acceptance' अपरिग्रहः, अस्वीकारः; 'n.-appearance, n.-attendance' अनुपस्थिति *f.*, असंनिधानं, अदर्शनं, अविद्यमानता; ' n.-attainment ' अप्राप्ति *f.*, अलाभः; ' n. attention ' अनवधानं, प्रमादः; ' n.-chalant' निरुत्सुक, अनपे(वे)क्ष, उदासीन, निःस्पृह

‘n.-compliance’ अननुरोधः, अननुवर्तनं, विरोधः; ‘n.-conductor’ अवाहकः, अनायकः; ‘n.-conformist’ अननुरोधिन् *m.*, अननुवर्तिन्; सामान्यधर्मविरोधिन् *m.* मतांतरग्राहिन् *m.* ‘n.-comformity’ अननुरोधः, मतांतरग्रहणं; ‘n.-descript’ अवर्णित, अकृतलक्षण; ‘n. resistance’ अप्रतीकारः; &c. &c.

Nonage, *s.* बाल्यं, बाल्यदशा; *See* **Minority.**

Nonagenarian, *s.* नवतिवर्षीयः.

Nonagon, *s.* नवकोणाकृति *f.*

Nonce, *s.* अवसरः, कालः; ‘for the n.’ अस्मिन्समये.

Nonchalance, *s.* औदासीन्यं, अनपेक्षा.

Nondescript, *a.* विचित्र, अपरूप, विलक्षण

None, *a.* न कश्चित्, न कोपि, न कश्चन, न काचित्, &c.; oft. ex. by न with other words; ‘n. other’ नान्य, नेतर; ‘n. but’ एव; (with compar. adj.) न किमपि, न ईषदपि, न मनागपि, न स्तोकमपि.

Nonentity, *s.* अभावः, असंभवः, असत्ता, असद्भावः, शून्यता. **2** शून्यं, अवस्तु *n.*; ‘he is a n. in the kingdom’ राज्ये अकिंचित्करः सः.

None-such, *s.* निरुपमं or अद्वितीयं वस्तु *n.*

Nonfeasance, *s.* अकर्मन् *n.*

Nonpareil, *a.* अप्रतिम, अनुपम, अद्वितीय.

Nonplus, *v. i.* कुंठ् 10, वि-,मुह् c., आकुलीकृ 8 U, निरुत्तरीकृ. **-s** कुंठता, वि-,मोहः, निरुत्तरता, अगति *f.*, निरुपायता. **-ed,** *a.* कुंठित, निरुपाय, गतिहीन, अगतिक, मूढ, निरुत्तर.

Nonsense, *s.* असंबद्ध-अनर्थक-वाक्यं-वचनं-भाषणं, मृषाकथा-आलापः, प्रलापः, जल्पितं, असत्यं, अयाथार्थ्यं, अनर्थकं; ‘to talk n.’ प्रलप् 1 P, प्रजल्प् 1 P, असंबद्धं भाष् 1 A; ‘talking n.’ असंबद्धप्रलापिन्, वाचाल, जल्पक. **-Nonsensical,** *a.* असंबद्ध, असंगत, अनर्थक, निरर्थक, मृषार्थक, अयथार्थ. **-ly,** *adv.* अनर्थकं, असंबद्धं, असंगतं, मृषा, वृथा. **-ness,** *s.* असंबद्धता, &c.

Nonsuited, *a.* नष्ट-हीन-वाद, अवसन्न; अर्थाद् हीन; ‘to be n.’ अवसद् 1 P, अर्थात्-वादाद् हा pass.

Noodle, *s.* मूढः, मूर्खः, अल्पधीः, जडमतिः.

Nook, *s.* कोणः, अस्रः; विविक्तस्थानं.

Noon, *s.* (N.-time) मध्याह्नः, मध्यदिनं, मध्याह्नकालः. **-***a.* माध्याह्निक (की *f.*), माध्यंदिन (नी *f.*).

Noose, *s.* पाशः, वागुरा, बंधनं; *See* **Snare;** ‘n. for the neck’ कंठपाशः. **-***v. t.* पाशेन बंध् 9 P, पाशे ग्रह् 9 U or पत् c.

Nor, *conj.* न च, न वा; *See* **Neither.**

Norm, *s.* आदर्शः, निदर्शनं. **2** विधिः, नियमः, सूत्रं. **-al,** *a.* यथाक्रमं, वैधिक (की *f.*). **2** विद्यारंभशिक्षक.

North, *s.* उत्तरा, उदीची, उत्तरदिश्-दिशा, उत्तराशा, कौबेरी; ‘to the n.’ उत्तरं (with abl.), उत्तरतः (with gen.); ‘facing the n.’ उदङ्मुख-*a.* (खी *f.*).

-*a.*, **-erly, -ern,** *a.* उत्तर, उदीचीन, उत्तरस्थ, उदीच्य, उदच्; ‘in a n. direction’ उत्तरेण (with acc. or gen.); ‘n.-east’ उत्तरपूर्वा, पूर्वोत्तरा, ऐशानी, प्रागुत्तरा, प्रागुदीची; (*a.*,-erly,-ern), प्रागुत्तर, पूर्वोत्तर, प्रागुदीचीन; पूर्वोत्तरस्थ; ‘n.-pole’ ‘n.-star’ ध्रुवः; ‘n.-west’ उत्तरपश्चिमा, वायवी; (*a.*,-erly,-ern) वायव, वायुदिक्स्थ. **-ward,** *a.* उत्तर, उत्तरदिक्स्थ. **-wards,** *adv.* उत्तराभिमुखं, उत्तरतः, उत्तरेण, उत्तरदिशि.

Nose, *s.* नासा, नासिका, घ्राणं, घोणा, नसा, नस्या, गंधवहा, गंधज्ञा; ‘led by the n.’ नस्योत, नस्तित; (fig.) यथेच्छं कृष्ट, स्वेच्छया नीत; ‘aquiline n.’ शुकनासा; ‘having a sharp n.’ खरणस्, खरणस; ‘having a hoof-like n.’ खुरणस्, खुरणस; ‘having a flat n.’ नतनासिक; *See* under **Flat;** ‘having a prominent n.’ प्रलंबघोण, घोणोन्नत; ‘breathing through the n.’ नासिकंधम; ‘n.-string’ नस्यं; ‘n.-cut’ छिन्ननास; ‘n.-gay’ कुसुमस्तबकः, पुष्पगुच्छः, गुच्छः, गुत्सः; ‘n.-ring’ नासाभरणं. **-less,** *a.* अ-वि-नासिक, विग्र, विख्र, विख्य, गतनासिक. **-Nostril,** *s.* नासारंध्रं-विवरं-छिद्रं-पुटं, बिलं.

Nosology, *s.* रोगनिदानशास्त्रं.

Nostrum, *s.* गुप्तौषधं.

Not, *adv.* न, नो, न हि. **2** (Prohibitive) मा; oft. by अलं with instr. or gerund ‘do n. fear’ अलं भयेन, मा भैषीः; ‘do n. boast much’ अलमलं बहु विकत्थ (M. 1); ‘do n. do so’, ‘do n. say so’ मा मा एवं; (rather angrily) मा तावत्. **3** (Privative) अ, निर्, अन्, वि pr.

Notch, *s.* छेदः, दंतः, भंगः; ‘n. of a bow’ अटनि-नी *f.* **-***v. t.* अव-,छिद् 7 P, दंतुरी-भंगुरी-कृ 8 U. **-ed,** *a.* दंतुर, भंगुर, दंतुरित.

Note, *s.* लिंगं, लक्षणं, चिह्नं, अंकः; अभिज्ञानं. **2** स्मरणचिह्नं, स्मरणं. 3 टीका, व्याख्या, भाष्यं, टिप्पनी, वृत्ति *f.*; ‘edited with n. s’ टिप्पनीसमवेतं प्रकाशितं (पुस्तकं). **4** स्वरः, क्वणः; ‘a wrong n.’ अप-वि-स्वरः; ‘high n.’ तारः, तारस्वरः; ‘cracked n.’ काकस्वरः; ‘key-n’ वादिन् *m.*; (the seven n. s being निषादः, ऋषभः, गांधारः, षड्जः, मध्यमः, धैवतः, पंचमः); ‘sweet n.’ काकली; ‘sweet indistinct n.’ कलः; ‘deep n.’ मंद्रः; ‘continued n.’ एकतालः. **5** ख्याति *f.*, कीर्ति *f.*, यशस् *n.*, प्रतिष्ठा. ‘of n.’ विश्रुत, लब्धकीर्ति-प्रतिष्ठ. 0

वि-,रुतं, रावः, नादः, स्वनः, शब्दः, ध्वनिः. 7 अवेक्षा, अवधानं, मनोयोगः, अभिनिवेशः; ' take n. of ' अवेक्ष् 1 A, अव-धा 3 U, मनसि-चित्ते-कृ 8 U, अवधृ 10. 8 पत्रं, पत्रकं, लेखः, लेख्यं; ' n.-book ' स्मरण-अंकन-पुस्तकं; ' n.-worthy ' स्मरणीय, स्मरणार्ह, अवेक्षणीय. **–***v. t.* निर्वर्ण् 10, आलक्ष् 10, निरूप् 10, अवेक्ष्, आलोच् 10. आलोक् 1 A, 10. 2 लिख् 6 P, (लेख्ये) आरुह् c. (रोपयति), (पत्रे) निविश् c. 3 अंक् 10, चिह्नयति (D.). **–able,** *a.* स्मरणीय, स्मरणार्ह, स्मर्तव्य. 2 विशिष्ट, उत्कृष्ट, परम; ख्यात, प्रसिद्ध, विशेष in comp.; ' a n. guest ' अतिथिविशेषः. **–***s.* कुलीन-विशिष्ट-जनः, आर्यः; *See* **Noble. –ably,** *adv.* प्रसिद्धं, विशेषेण, विशेषतः. **–ary,** *s.* लेखकः, लिपिकारः, लिपिजीविन् *m.* **–ation,** अंकनं, अंकविद्या. **–ed,** *a.* लक्षित, निरूपित, लिखित, पत्रारूढ. 2 प्र-वि-ख्यात, सुविश्रुत, प्रसिद्ध, लब्धप्रतिष्ठ, प्रथित.

Nothing, *s.* अभावः, शून्यं, असत् *n.*, अवस्तु *n.*, असत्त्वं. 2 न किंचित्, न किमपि, न स्तोकमपि. 3 अल्प-लघु-विषयः, अल्पार्थः, अगुर्वर्थः; ' for n. ' अकारणं, अनिमित्तं, वृथा, मुधा, निरर्थकं; ' good for n. ' व्यर्थ, निरर्थक, अकिंचित्कर (री *f.*). ' n. but ' नान्यत् किमपि (with abl.). **–***adv.* न मनागपि, न किंचिदपि, न स्तोकमपि, न मनाक्, न किमपि. **–ness,** *s.* अभावः, शून्यता.

Notice, *v. t.* लक्ष् 10, सं-आ-°, निरूप् 10, आलोक् 1 A, 10, प्र-अव-निर्-परि-ईक्ष् 1 A, दृश् 1 P, निर्वर्ण् 10. 2 मनो धा 3 U, अव-धा 3 U, सावधान *a.* भू 1 P. 3 अभि-धा, निर्दिश् 6 P, उद्दिश्, कथ् 10, वर्ण्. 4 संभू c., आदृ 6 A, संमन् c., सत्कृ 8 U. **–***s.* आलोकनं, निरूपणं, अवेक्षा-क्षणं, परीक्षा-क्षणं. 2 निर्देशः, उल्लेखः, अभिधानं, उद्देशः, कथनं, वर्णनं. 3 अवेक्षा, मनोयोगः, अवधानं,चित्ताभिनिवेशः, विचारः, गणना; ' take n. of ' आदृ, अवेक्ष्, विचर् c., आलोच् 10; *See* **Consider.** 4 सूचना, निवेदनं, बोधनं, बोधः. 5 विज्ञापना, विज्ञप्ति *f.*, घोषणं-णा, ख्यापना; ' written n. ' घोषण-विज्ञप्ति-प्रसिद्धि-पत्रं. 6 आदरः, सत्कारः, संभावना, संमानः.

Notify, *v. t.* वि-,ज्ञा c. (ज्ञापयति), बुध् c., प्रकाश् c., सूच् 10, घुष् 10, प्र-ख्या c., (ख्यापयति), नि-आ-विद् c., कृत् 10. **–ication,** *s.* विज्ञापनं-ना, विज्ञप्ति *f.*, घोषणा, सूचनं-ना, ख्यापनं.

Notion, *s.* मति *f.*, बुद्धि *f.*, बोधः, मनोगतं, मतं, कल्पना, भावः, अभिप्रायः, भावना, आशयः, वासना; ' under the n. that ' इति बुद्ध्वा. **–al,** *a.* मनः-सृष्ट, मनोगत, मनःकल्पित, संकल्पज; *See* **Ideal.**

Notorious, *a.* प्रसिद्ध, प्र-वि-ख्यात, प्रथित, विश्रुत, विज्ञात, लोकप्रसिद्ध-विश्रुत, लौकिक (की *f.*); ' a n. report ' सार्वलौकिकःप्रवादः. 2 दुर्नामन्, कुख्यातिमत्, ख्यातगर्हण, कुप्रसिद्ध; ' a n thief ' सर्व-विज्ञातः चौरः; ' to become n. ' बहुलीभू 1 P, प्रकटीभू, सर्वप्रकाशतां गम् 1 P. **–ly,** *adv.* सुप्रसिद्धं, प्रकटं, ख्यातगर्हणं. **–ness,-Notoriety,** *s.* प्र-वि-ख्याति *f.*, प्रकाशता, प्रसिद्धि *f.*, विश्रुति *f.*, प्रथा. 2 दुर्नामन् *n.*, कुकीर्ति *f.*, वाच्यता, अपकीर्तिः.

Notwithstanding, *part.* तथापि, तदपि, एवं सत्यपि; gen. ex. by gen. or loc. abs. or by अनादृत्य (with acc.); ' n. his teacher's presence ' विद्यमानेपि गुरौ; *See* ' In spite of' under **Spite.**

Nought, *s. See* **Naught.**

Noun, *s.* नामन् *n.*, विशेष्यं, सुप्, वाचकः.

Nourish, *v. t.* परि-, पुष् 1, 4, 9 P or c., संवृध् c., परि-,पा c. (पालयति), सं-,भृ 1, 3 U; (अन्नादिना) आप्यै c., बृंह् c., वृध् c., संतृप् c. **–er,** *s.* पालयितृ *m.*, संवर्धकः. **–ing,** *a.* पुष्टिकर (री *f.*), पुष्टिद, पौष्टिक (की *f.*). **–ment,** *s.* पोषणं, पुष्टि *f.*, पालनं, संवर्धनं, भरणं, अन्नदानं. 2 आहारः, भोजनं, भक्ष्यं, अन्नं, पौष्टिकं, जीवनसाधनं.

Novel, *a.* नव, नूतन, नवीन, अपूर्व, अदृष्ट-अश्रुत-पूर्व, अद्भुत; *See* **New. –***s.* कल्पित-कथा, आख्यायिका, प्रबंधकल्पना, कूटार्थ-कथा. **–ist,** *s.* आख्यायिकाकारः. **–ty,** *s.* पूर्वता, नवता, नूतनता. 2 अदृष्टपूर्वं वस्तु, कौतुकं, अद्भुतं.

November, *s.* कार्तिकमार्गशीर्षं.

Novennial, *a.* नववर्षीय.

Novercal, *a.* वैमात्रेय, वैमातृक (की *f.*), विमातृयोग्य.

Novice, *s.* शैक्षः, प्राथमकल्पिकः, नवशिष्यः-छात्रः, अनभ्यस्तः, अलब्धकौशलः. **–Novitiate,** *s.* नवशिष्यता, अनभ्यासः, नवच्छात्रदशा. 2 नवाभ्यासकालः, विद्यारं-भावधिः.

Now, *adv.* अधुना, इदानीं, संप्रति, सांप्रतं, प्रस्तुत-वर्तमान-काले,इहसमये. 2 अथ,अथातः, अतःपरं, अतः;' n.-n. ' क्वचित्-क्वचित्,कदाचित्-कदाचित्, अंतरा-अंतरा, (अंतरा पितृसक्तमंतरा मातृसंबंधमालापं कुर्वन् Ka. 118); ' n. and then ' काले काले, कदाचित्, कदापि; ' till n. ' अद्य यावत्; ' from n. ' अद्यारभ्य, अद्य प्रभृति, अतःपरं; ' just n. ' अधुनैव, अचिरात्, इदानीमेव; ' n.-a-days ' एषु दिवसेषु, संप्रति, अधुनातनकाले; ' n.-a-days people ' इदानींतना-आधुनिकाः-जनाः.

No-wise, *adv.* न सर्वथा, न कथमपि.

Noxious, *a.* हिंस्र, उपद्रविन्, हिंसक, दुष्ट, हिंसालु, घातुक, अपकारिन्, हिंसात्मक, अहित-अनिष्ट-कारिन्; *See* **Harmful.**

Nozzle, *s.* नासाग्रं, प्रोथः, नस्तः; अग्रं, अग्रभागः.

Nubile, *a. See* **Marriageable.**

Nubilous, *a.* मेघावृत, अभ्राच्छन्न; *See* **Cloudy.**

Nucleus, *s.* बीजं, गर्भः; संचयास्पदं.

Nude, *a.* नग्न, विवस्त्र; *See* **Naked.** **-ation** *s.* विवस्त्रीकरणं. **-ity,** *s.* नग्नता.

Nudge, *v. t.* कूर्परेण चल् *c.*

Nugatory, *a.* व्यर्थ, मोघ, निरर्थक, निष्फल, विफल, निष्प्रभाव, अप्रमाण, अनिष्पन्न.

Nugget, *s.* पिंडः, घनः.

Nuisance, *s.* उत्पातः, कंटकः, (of persons); बाधा, पीडा, पीडा-क्लेश-हेतुः; 'public n.' लोककंटकः; 'family n.' कुलाधिः, गृहोत्पातः.

Null, *a.* मोघ, व्यर्थ, निष्फल, विफल, निर्बल, निष्प्रभाव, अनिष्पन्न, लुप्त, वृथा-मुधा in comp. **-ify,** *v. t.* मोघी-विफली- कृ 8 U, लुप् 6 P or c., खंड् 10. **-ity,** *s.* मोघता, व्यर्थता, वैफल्यं. **2** अभावः, शून्यता.

Nulla, *s.* प्रणाली.

Numb, *a.* जड, सुप्त, स्तब्ध, अस्पंद, अचेतन, चैतन्य-रहित, स्तब्धगति; 'n. with cold' शीताकुल. **-***v. t.* जडीकृ 8 U, जडयति (D.), चैतन्यं हृ 1 P or स्तंभ् 9 P or c. **-ness,** *s.* जाड्यं, स्तंभः, जडिमन् *m.*, स्वापः, त्वक्सुप्ति *f.*, चैतन्यनाशः-स्तंभः.

Number, *s.* संख्या, राशिः. **2** संख्या, गणना, परिमाणं. **3** गणः, समूहः, निवहः, संघः; *See* **Multitude**; oft. ex. by बहु, बहुल, प्रचुर, अनेक, or जनः in comp.; 'a n. of young women' युवतिजनः, तरुणीगणः; 'in n. s' संघशः, गणशः, बहुशः, अनेकशः; 'a whole n.' अभिन्नं. **4** अंकः. **5** छंदस् *n.*, पद्यं, कविता. **6** वचनं; 'science of n.' गणितं, व्यक्तगणितं, अंकविद्या; '100 in n.' शतं, शतसंख्यक. **-***v. t.* सं-परिसंख्या 2 P, गण् 10, संकल् 10 (कलयति). **2** अंक् 10, अंकं लिख् 6 P or स्था c. (स्थापयति); oft. ex. by संख्या in comp.; 'the enemy's force n. ed 500' पंचशतसंख्यं शत्रुसैन्यं. **-er,** *s.* गणकः, संख्याकृत् *m.* **-ing,** *s.* गणनं-ना, संख्यानं. **-less,** *a.* असंख्य, संख्यातीत, गणनातीत, अगण्य, असंख्यात.

Numbles, *s.* मृगांत्राणि.

Numeral, *s.* संख्या, अंकः. **-***a.* संख्यात्मक, संख्यावाचक-विषय, संख्या in comp. **-ly,** *adv.* यथासंख्यं.

Numerary, *a.* नियतसंख्यक.

Numeration, *s.* संख्यानं, गणना.

Numerator, *s.* अंशः, लवः.

Numerical, *a.* संख्या in comp.; 'n. superiority' संख्याधिक्य-उत्कर्षः. **-ly,** *adv.* संख्यामपेक्ष्य-उद्दिश्य, यथासंख्यं.

Numerous, *a.* बहु, बहुसंख्य, बहुल, भूरि, अनेक, प्रचुर, नैक; *See* **Many.** **-ly,** *adv.* बहुशः, बाहुल्येन, अनेकशः.

Numismatics, *s.* मुद्राविद्या.

Numskull, *s. See* **Idiot, Fool.**

Nun, *s.* परिव्राजिका, तपस्विनी, मठवासिनी, ब्रह्मचारिणी, तपोनिष्ठा. **-nery,** *s.* विहारः. मठः.

Nuncio, *s.* धर्माध्यक्षदूतः.

Nuncupative, *a* शाब्दिक, वाचिक, अलिखित.

Nuptial, *a.* वैवाहिक-औद्वाहिक (की *f.*), वैवाह (ही *f.*), विवाह-परिणय- in comp.; 'n. ceremony' परिणयविधिः, विवाहक्रिया; 'n. gift' यौतकं, औद्वाहिकं, पारिणाय्यं; 'n. s' विवाहः, उद्वाहः, परिणयः, पाणिग्रहणं.

Nurse, *s.* धात्री, उपमातृ *f.*, मातृका, अंकपाली. **2** परिचारिका, उपचारिका, रुग्णपालिका. **3** पालकः, पोषकः. **-***v. t.* (रोगिणं) उपचर् 1 P, सेव् 1 A, परि-पा c. (पालयति; यत्नादुपचर्यतामसौ (S. 3) 'let her be carefully n. ed.' **2** पा c (पालयति), पुष् 1, 4, 9 P, वृध् c., लल् 10; *See* **Nourish.** **3** दुग्धं पा c. (पाययति), स्तन्यं दा 3 U or धे c. (धापयति). **-ery,** *s.* पालन-पोषण-स्थानं; बालगृहं-स्थानं; 'n. song' शिशुगीतिः; 'n. man' पुष्पाजीविन् *m.* **-ing,** *s.* उपचारः, सेवा. **2** पालनं, पोषणं, लालनं. **-ling,** *s.* स्तनंधयः, स्तनपः, बालः, शिशुः.

Nurture, *v. t.* विनी 1 P, शिक्ष् c., उपदिश् 6 P. **2** पा c. (पालयति), पुष् 1, 4, 9 P or c., वृध् c,; *See* **Nourish.** **-***s.* आहारः, भक्ष्यं. **2** शिक्षणं, विनयः, उपदेशः. **3** पोषणं, पालनं, वर्धनं.

Nut, *s.* फलं; बीजं, गर्भः (internal contents); 'cocoa-n.' नारिकेलफलं; 'n. crackers' संदंशः-शफः; 'n-meg' जाति(ती)फलं, पुटकं; 'n.-shell' बीजकवचः-पुटं. **-arian,** *s.* फल-आहारिन्-उपजीविन् *m.*

Nutant, *a.* प्रणतशिरस्. **-Nutation,** *s.* शिरःकंपः.

Nutrition, *s.* पोषणं, पालनं, पुष्टि *f.*, आप्यायनं.

Nutriment, *s.* आहारः, पुष्टिदं अन्नं.

Nutritious,-Nutritive, *a.* पुष्टिकर (री *f.*), पुष्टिद, पौष्टिक (की *f.*), पोषक, धातु-बल-वर्धन (नी *f.*).

Nux vomica, *s.* वरस्वरा.

Nuzzle, *v. i.* नासां अवनम् c. (नमयति).
Nymph, *s.* अप्सरस् *f.*, अप्सरा, स्वर्गस्त्री; देवता in comp.: 'wood-n.' वनदेवता; 'sea-n.' जलदेवता.
Nymphomania, *s.* उत्कटा, सुरतेच्छा.

O.

O, Oh, *interj.* हे, भोः, अयि, अये, अरे; हा, अहह (sorrow). 2 अहो (joy and surprise), हंत, अहो, बत. 3 आः (anger &c.). 4 आ, आं; 'oh for' ex. by अपि नाम; 'oh for a lodge in a wilderness' अपि नाम विपिने निवासं लभेय; 'oh that' *See* **Would.**
Oaf, *s. See* **Fool.**
Oak, *s.* सिंदूरः.
Oakum, *s.* खंडितरज्जु *f.*
Oar, *s.* क्षे(क्षि)पणि-णी *f.*, नौ-नौका-दंडः. —*v. t.* क्षेपण्या चल् c. or वह् c.; *See* **Row.** —**Oarsman,** *s.* नौदंडधरः.
Oasis, *s.* (मरुमध्ये) शाद्वलस्थलं, रम्यस्थानं.
Oath, *s.* शपथः, अभिशापः, वचनं, प्रतिज्ञा, समयः; 'bind by an o.' शप् c.; 'to take an o.' शप् 1, 4 U, शपथं शप्; 'with an o.' सशपथं, शपथपूर्वं.
Obdurate, *a.* अनम्य, कठिन, कठिनहृदय-चित्त, अनुतापविमुख (खी *f.*), दुराग्रह; *See* **Hard.** -**Obduracy,** *s.* चित्तकाठिन्यं, कठोरहृदयता, अनुतापविमुखता; काठिन्यं, कठोरता.
Obeisance, *s.* नमस्कारः; प्रणामः, प्रणति *f.*, वंदनं, प्रणिपातः, नमस्या; अभिवादनं; 'prostrate o.' साष्टांगप्रणामः-नमस्कारः, अष्टांगपातः; 'to make an o.' प्रणम् 1 P, प्रणिपत् 1 P, नमस्कृ 8 U, अभिवद् c.
Obelisk, *s.* सूच्याकारः स्तंभः.
Obese, *a.* पीन, पीवर, स्थूल; *See* **Fat.**
Obey, *v. t.* (Orders) कृ 8 U, अनु-स्था 1 P, अनुवृत् 1 A, अनुवि-धा 3 U, पा c. (पालयति), अनुरुध् 4 A, मन् c., प्रतिग्रह् 9 P, अभ्युप-इ 2 P or गम् 1 P; (persons) वचने श्रु 5 P, शासने स्था, आज्ञां-वचनं-अनुवृत्, यथादिष्टं वि-धा; श्रु desid. (शुश्रूषते), उपचर् 1 P, सेव् 1 A, उपास् 2 A, आज्ञां कृ or अनुरुध् &c. —**Obedient,** *a.* आज्ञानुवर्तिन्, आज्ञाकर (री *f.*), आज्ञाविधायिन्, अनुविधायिन्, अनुरोधिन्, आज्ञा-निदेश-कारिन्, आज्ञापर, विधेय, विनयग्राहिन्, वचने स्थित, आश्रव, वश्य, प्रणेय, वशानुग, शुश्रूषु, आज्ञावचन-ग्राहिन्-सेविन्, आज्ञाधीन; 'o. to one's parent' पितृवश्य, पितृवचनपर. -**ly,** *adv.* आज्ञानुसारेण, यथाज्ञं, यथादिष्टं, निर्देशानुरोधेन. —**Obedience,** *s.* आज्ञानुवर्तनं-अनुरोधः-अनुसारः-अनुसरणं-करणं-पालनं-सेवनं-धारणं, वश्यता, अनुविधायित्वं, शुश्रूषा, आज्ञाकरत्वं, आज्ञापरता, अनुवर्तनं, अनुरोधः.
Obit, *s. See* **'Death.'** -**uary,** *a.* मृत्युसंबंधिन्. —*s.* मृत्युलेखः.
Object, *s.* द्रव्यं, वस्तु *n.*, अर्थः, विषयः, इंद्रियार्थः; 'visible o.' चक्षुर्विषयः; (fig.) पात्रं, पदं, स्थानं, आस्पदं, भाजनं, भूमि *f.*, विषयः; 'o. of confidence' विश्वासास्पदं, विश्वासभूमिः; 'the sole o. of my affection' स्नेहस्यैकायनीभूता (M. 2): 'o. of dispute' विवादविषयः, व्यवहारास्पदं. 2 अर्थः, फलं, हेतुः; (desired o.) अभीष्टं, इष्टं, समीहितं, कांक्षितं, ईप्सितं, कामः, मनोरथः; *See* **Desire.** 3 निमित्तं, कारणं, प्रयोजनं, कार्यं. 4 अभिप्रायः, आशयः, तात्पर्यं, उद्देशः, लक्ष्यं; 'with what o. in view' किमपेक्ष्य फलं, केन हेतुना, किमुद्दिश्य, किंनिमित्तं, किमर्थं; 'accomplishment of one's o.' कृतार्थता, चरितार्थता, इष्टसिद्धि *f.*, फलप्राप्ति *f.*; 'highest o.' परमार्थः; 'o. of hearing' श्रुतिविषयः. 5 कर्मन् *n.*; 'a root governing two o. s' द्विकर्मकः धातुः. —*v.* वि-प्रति-रुध् 7 U, बाध् 1 A, खंड् 10, निरस् 4 U, अधरीकृ 8 U, अपवद् 1 A, न अनुमन् 4 A or अनुमुद् 1 A, दोषं ग्रह् 9 U, 'the sage will not o. to this' नात्र दोषं ग्रहीष्यति कुलपतिः (Ś. 3); नि-प्रति-षिध् 1 P, (तदेष सर्गः न भवद्भिः प्रतिषेधनीयः R. xiv. 42); in discussions gen. ex. by ननु, इति चेत् or कथं तर्हि, followed by उच्यते or अत्रोच्यते (we reply); प्रत्यव-स्था 1 A, वितंड् 1 A. -**ion,** *s.* बाधः-धा, अपवादः, विरोधः, आक्षेपः, दोषः, आपत्ति *f.*, कक्षा, उद्ग्राहः, विरुद्धहेतुः, विप्रतिषेधः, प्रत्यवायः, प्रतिबंधः, पर्युदासः, 'making an o.' दोषग्रहणं, विरोधोपन्यासः; 'settling an o.' समा-प्रतिसमा-धानं, आक्षेपपरिहारः. -**ionable,** *a.* बाध्य, सबाध, सदोष, निषेधार्ह, वर्ज्य, परिहार्य, आशंकनीय. -**ive,** *a.* विषयाश्रित, पदार्थनिष्ठ, कर्मविषयक. —**or,** *s.* बाधकः, अपवादकः.
Objuration, *s.* शपथः.
Objurgate, *v. t.* निंद् 1 P, भर्त्स् 10 A, उपालभ् 1 A, आ-अधि-क्षिप् 6 P, तिरस्कृ 8 U. -**ion,** *s.* निंदा, भर्त्सनं-ना, उपालंभः, आक्षेपः, धिक्कारः; *See* **Censure.** -**ory,** *a.* निंदक, निंदार्थक.

Oblation, *s.* बलिः, उपहारः, उपायनं; हव्यं, हवनं, हुतं, आहुति *f.*, इष्टि *f.*, यागः, निर्वपणं; 'o. of eatables' नैवेद्यं; 'o. to all deities' वैश्वदेवः; 'to make o. s to fire' हु 3 P.

Obligate, *v. t. See* Oblige, below.

Oblige, *v. t.* Ex. by causal of verbs, gen. with बलेन or बलात्; प्रयुज् 10, प्रवृत् c.; *See* **Compel.** **2** नियमपूर्वं-सप्रतिज्ञं बंध् 9 P. **3** अनुग्रह् 9 P, उपकृ 8 U, उपकारेण बंध्, हितं-प्रसादं-उपकारं कृ; 'I am much o ed to you for this reward' एतेन पारितोषिकदानेन भवता सुतरामुपकृतोस्मि-अनुगृहीतोस्मि; 'I am much o. ed' अनुगृहीतोस्मि, महानयं प्रसादः. **-ation,** *s.* अवश्यकता, कर्तव्यता, भारः, ऋणं, बंधः, धर्मः; 'free from the o. s of debt' ऋणमुक्त, मुक्तर्ण, अनृण; religious o.' व्रतं, नियमः, चोदना, विधिः. **2** संविद् *f.*, समयः, प्रतिज्ञा, नियमः, अभ्युपगमः, संधा, सं-आ-श्रवः. 3 अनुग्रहः, उपकारः, उपकृति *f.*-तं, हितं, प्रियं; 'under o.' उपकृत-अनुगृहीत-*a.*; 'my o. s to you are immense' तव मयि उपकाराः संख्यातीताः; 'to lay under o. s' उपकृ; *See* (*v.*). **-atory,** *a.* अवश्यक आवश्यक (की *f.*), अपरिहार्य, अवश्यकर्तव्य; oft ex. by अवश्यं; *See* under **Compel.** **-ing,** *a.* अनुग्रह-उपकार-शील, उपकारिन्, अनुग्राहिन्, हित-उपकार-बुद्धि, सुशील, दाक्षिण, अनुकूल, सुजन. **-ingly,** *adv.* दाक्षिण्येन, सुजनतया, सानुग्रहं, सुशीलवत्. **-ingness,** *s.* उपकार-अनुग्रह-शीलं, सौजन्यं.

Oblique, *a.* वक्र, कुटिल, जिह्म, असरल, तिर्यच्, अनृजु, विषम; 'o. speech' वक्रोक्ति *f.*, भंगि-गी *f.*, उपरोधवचनं; 'o. case' अप्रधानकारकं. **-ly,** *adv.* वक्रं, कुटिलं, तिर्यक्, तिरः, साचि, जिह्मं. **-ness,** *s.* वक्रता, कौटिल्यं, अनृजुता, वैषम्यं; 'o. of sight' वक्रदृष्टि *f.*, दृष्टिवक्रता; 'o. of conduct' विमार्ग-उत्पथ-गमनं, असदाचारः, सत्पथ-भ्रंशः-त्यागः.

Obliterate, *v. t.* वि-,लुप् 6 P or c., प्र-परि-अव-मृज् 2 P or c., व्यामृश् 6 P or c., विनश् c., उच्छिद् 7 P, उन्मूल् 10. **-ion,** *s.* लोपः, मार्जनं, व्यामर्शः, उच्छेदः.

Oblivion, *s.* अ-वि-स्मृति *f.*, अ-वि-स्मरणं; 'to bury into o.' विस्मृ 1 P. **2** दोषविस्मरणं. **-Oblivious,** *a.* स्मृतिहर (री *f.*), विस्मारक, विस्मृतिकर (री *f.*). **2** विस्मरणशील.

Oblong, *a.* दीर्घाकार, आयत, दीर्घचतुरस्र. *-s.* आयतः.

Obloquy, *s.* निंदा, परि(री)वादः, अपवादः; वाच्यता, भर्त्सना, गर्हा; *See* **Censure, Calumny.**

Obnoxious, *a.* वश, अधीन, आयत्त, योग्य, अर्ह; पात्रं, आस्पदं, विषयः in comp.; ex. by pot. pass. part.; *See* **Liable, Apt. 2** गर्हित, द्वेष्य, द्वेषणीय, गर्ह्य; अनिष्ट, अप्रिय, निंद्य, अप्रीतिकर (री *f.*). **-ly,** *adv.* अप्रियं, गर्ह्यतया. **-ness,** *s.* अधीनता, वशता, पात्रता. **2** द्वेष्यता, गर्ह्यता.

Obscene, *a.* अश्लील, ग्राम्य, अनक्षर, अवाच्य, गर्ह्य, कुत्सित, दुरुक्त, बीभत्स, अश्राव्य, विपात, व्रीडावह. **2** अशुभ, अभद्र, अमंगल, अलक्षण. **-ly,** *adv* अश्लीलं, अवाच्यं. **-ity, -ness,** *s.* अश्लीलता, अवाच्यता; 'o. of language' दुरुक्ति *f.*, दुर्वाक्यं.

Obscure, *a.* तमोवृत, सांधकार, निष्प्रभ, मलिन, सतिमिर, निस्तेजस्, तमस्विन्. **2** अप्रसिद्ध, नातिविश्रुत, अविज्ञात, अख्यात, अल्पकीर्ति, लघुप्रतिष्ठ. **3** नि-,गूढ, दुर्बोध, क्लिष्ट, दुर्ज्ञेय, गहन, दुर्गम, विषम, अप्रकाश, अस्पष्ट, अस्फुट, गूढार्थ, अव्यक्त. *-v. t.* (तमसा) प्र-आ-च्छद् 10, आ-वृ 5 U, उप-रुध् 7 U, अंतरयति (D.), मलिनी-तिमिरी-कृ 8 U, मलिनयति तिमिरयति- (D.), प्रभां-तेजः-हृ 1 P or क्षि 1, 5 P.; 'o. with clouds' मेघैः आच्छद् or आवृ **2** गहनीकृ, गूढीकृ; ex. by (*a.*). **3** (Fig.) प्रत्या-दिश् 6 P, प्रत्या-ख्या 2 P, प्रच्छद्; *See* **Eclipse.** 'o. er of S'ri' प्रत्यादेशः श्रियः (V. 1). **-ation,** *s* मलिनीकरणं, कांति-प्रभा-हरणं. **2** तेजः or प्रभा-क्षयः or हानि *f.*, निष्प्रभता, सांधकारता. **-ed,** *a.* तमोवृत, नष्ट-क्षीण-मलिन-क्षत-प्रभ-कांति-प्रकाश, मलिन, निस्तेजस्, हत-ज्योतिस्. **-ity, -ness,** *s.* निष्प्रभता, तेजः or कांति-क्षयः or हानिः, तमस् *n.*, तमिस्रं, अंधकारः. **2** गूढता, गहनता, अस्फुटता, दुर्बोधता. **3** अप्रसिद्धि-अविख्याति-*f.*, अल्पप्रतिष्ठा-कीर्ति *f.* **-ly,** *adv.* निष्प्रभं, सतिमिरं, सांधकारं. **2** गूढं, दुर्बोधं, असुगमं, अस्पष्टं, अव्यक्तं.

Obsecrate, *v. t. See* **Entreat.**

Obsequies, *s.* उत्तरकार्य-क्रिया, अंत्यकृत्यं, प्रेत-कार्य-क्रिया; अंत्येष्टिक्रिया, और्ध्वदेहिकक्रिया, अंत्येष्टि *f.*, प्रेत-संस्कारः, पारलौकिकं. **-Obsequial,** *a.* और्ध्वदेहिक-और्ध्वदैहिक- (की *f.*), अंत्येष्टियोग्य; by (*s*) in comp.

Obsequious, *a.* छंदोनुवर्तिन्, अत्यनुवर्तिन्, अत्यनुरोधिन्, वशवर्तिन्, वशानुग, विनत, नम्र; *See* **Obedient. -ly,** *adv.* अत्यनुरोधात्, छंदोनुवर्तनेन. **-ness,** *s.* अत्यनुरोधः, अत्यनुवृत्ति *f.*, छंदोनुवर्तनं.

Observe, *v. t.* दृश् 1 P, ईक्ष् 1 A, वि-आ-अव-लोक् 1 A, 10, निरूप् 10, आ-,लक्ष् 10, निर्वर्ण् 10, आलोच् 10 (o. carefully); *See* **Look. 2** उपलभ् 1 A, वि-भू c., वि-ज्ञा 9 U, अवधृ 10. **3** अनु-,पा c. (पालयति), रक्ष् 1 P, आ-अव-लंब् 1 A, आ-श्रि 1 U, आचर्

1 P, अनु-ष्ठा 1 P, सेव् 1 A, निषेव्, वि-धा 3 U, कृ 8 U; 'o. silence' मौनमाचर्; 'o. a fast' उपवस् 1 P; (rules) अनुवृत् 1 A, अनुसृ 1 P, अनुरुध् 4 A. 4 अभि-धा 3 U, वच् 2 P, ब्रू 2 U, वाक्यं वद् 1 P or उच्चर् c. **-able,** *a.* दृश्य, प्रेक्षणीय, दृष्टिगोचर. 2 अनुष्ठेय, निषेव्य. **-ance,** *s.* पालनं, रक्षणं, आचरणं, सेवनं, आलंबनं, अनुसरणं, अनुवर्तनं, विधानं, अनुष्ठानं. 2 आचारः, व्यवहारः, रीति *f.*, चरित, आचारकर्मन् *n.*; 'religious o. व्रतं, नियमः, विधिः. **-ant,** *a.* निरीक्षक, दर्शिन्, अवलोकिन्, सापेक्ष, अवहित, सावधान. 2 पालक, निषेवक, अनुसारिन्, आश्रित; आस्थित; 'o. of benefits' कृतज्ञ, कृतवेदिन्. **-ation,** *s.* अवलोकनं, निरीक्षणं, अन्वेक्षणं, अवेक्षा, निरूपणं, आलोचनं. 2 वचनं, उक्ति *f.*, उदाहारः, वाक्यं; लेखः, लिखितं (in writing). **-atory,** *s.* वेधगृहं-शाला. **-er,** *s.* प्रेक्षकः, अवेक्षकः, निरूपकः.

Obsess, *v. t.* आ-विश् 6 P. 2 पीड् 10, दू 5 P, अर्द् 1 P.

Obsolete, *a.* लुप्तप्रयोग, लुप्त, अप्रचालित, अप्रचल, गतव्यवहार, व्यवहारातीत, अव्यवहार्य. **-ness,** *s.* लोपः, अप्रचारः, अव्यवहारः.

Obstacle, *s.* अंतरायः, प्रत्यूहः, व्याघातः, प्रतिबंधः, वि-प्रति-ष्टंभः, वारणं, विघ्नः, रोधः, उप-प्रति-अव-नि°-, विघातः, बाधः-धा, व्यवधानं, प्रत्यर्थिन्, *m.*, 'though an o. to his meditation' प्रत्यर्थिभूतामपि समाधेः (K. I, 59).

Obstetric, *a.* प्रसवसंबंधिन्. *-s.* (O. s) गर्भमोचनशास्त्रं, प्रसवकर्मन् *n.*

Obstinate, *a.* प्रतिनिविष्ट, अविनेय, अवश्य, अननुनेतव्य, निर्बंधवत्, निर्बंधशील, स्वैरिन्, दुर्दम, आग्रहिन्, दुराग्रह, प्रतीप, कठिन, दृढ. 2 दुःसाध्य, दुरुपचार. **-ly,** *adv.* निर्बंधेन, अतिदृढं, स्वैरं, साग्रहं, सनिर्बंधं, दुराग्रहेण. **-ness, -obstinacy,** *s.* निर्बंधः, आग्रहः स्वैरिता, दुराग्रहः, निर्बंधशीलं, दृढता, अवश्यता, प्रतिनिविष्टता, प्रतीपता.

Obstipation, *s.* स्तंभनं, अवरोधः.

Obstreperous, *a.* बहुघोषकारिन्, महास्वन, तारस्वर, तुमुल, अत्युच्च, अतिपरुष (of noise). **-ly,** *adv.* उच्चैःस्वरेण, सकोलाहलं, तुमुलरवेण.

Obstruct, *v. t.* रुध् 7 U, नि-वि-सं-प्रति-उप°, वि-प्रति-व्या-हन् 2 P, वृ c., or वार् 10, वि-, स्तंभ् 9 P, or c., प्र-सं-बाध् 1 A, विघ्नयति (D.), नि-प्रति-षिध् 1 P. **-er,** *s.* विघ्नकरः, प्रतिबंधकः-रोधकः. **-ion,** *s.* रोधनं, वारणं, प्रतिबंधनं. 2 विघ्नः, अंतरायः, प्रत्यूहः, प्रतिबंधः, व्याघातः; *See* **Obstacle.** 3 आ-, नाहः, अवरोधः, प्रतिबंधः **-ionist,** *s.* विघ्नकारिन् *m.*, प्रतिबंधशीलः. **-ive, -Obstruent,** *a.* संप्रतिरोधिन्, बाधक, प्रतिबंधक, विघ्नकारिन्, विघ्नकर (री *f.*), विघातिन्, निवारक.

Obtain, *v. t.* आप् 5 P, लभ् 1 A, विद् 6 U, अश् 5 A, अधिगम् 1 P, अर्ज् 1 P or c., आ-समा-सद् c., आ-प्रति-पद् 4 A, संपद् c.; oft. by इ-या-2 P; *See* **Get.** *-v. i.* प्रचल्-र् 1 P, प्रवृत् 1 A, सं-स्था 1 A; *See* **Hold.** **-able,** *a.* प्राप्य, लभ्य, अधिगम्य; 'easily o.' सुलभ, सुसाध्य; 'hardly o.' दुष्प्राप, दुर्लभ, दुराप. **-er,** *s.* अर्जकः, प्रापकः. **-ing,** *a.* प्रचलित, प्रवृत्त, स्थापित, प्रसिद्ध. **-ment,** *s.* लाभः, प्राप्ति *f.*, अधिगमः, अर्जनं.

Obtest, *v. t.* *See* **Entreat.**

Obtrude, *v. i.* हठात्-आगंतुकतया-बलेन-प्रविश् 6 P or गम् 1 P or आक्रम 1 U, 4 P. *-v. t.* बलेन प्रविश् c. or प्र-सृ c. 2 अतिनिर्बंधेन ग्रह् c. or प्र-दा 3 U or उपंन्यस् 4 U. **-Obtrusion,** *s.* बलेन प्रवेशः, अनाहूतगमनं, सगर्व आक्रमः, आगंतुकभावः. **-Obtrusive,** *a.* धृष्ट, आगंतुक (की *f.*), सप्रगल्भ, बलात् प्रवेशक. **-ly,** *adv.* बलेन, हठात्, प्रसभं, प्रसह्य.

Obtund, *v. t.* घनीकृ 8 U, जडीकृ, तेजः हृ 1 P. **-Obtuse,** *a.* जड, मंद, स्थूल, मूढ, मंद-जड-मति-बुद्धि-धी. 2 अतीक्ष्ण, अतीव्र, अप्रखर, धाराहीन, निर्धार, घन, स्थूल, निस्तेजस्, अनिशित; 'o. angle' बहिर्लंबः-विषमः-कोणः. **-ly,** *adv.* जाड्येन; जडवत्, अतीव्रं, घनं, स्थूलं. **-ness,** *s.* जाड्यं, मूढता, मंदता; स्थूलता, घनता, अतीक्ष्णता,

Obvert, *v. t.* अधोमुखीकृ 8 U; अभिमुखीकृ. **-Obverse,** *s.* मुखं, अग्रभागः.

Obviate, *v. t.* परिहृ 1 P, नि-,वृ c., निरस् 4 U, प्रतिकृ 8 U, प्रतिवि-धा 3 U, विहन् 2 P, निवृत् c., वि-प्रति-रुध् 7 U; *See* **Obstruct.**

Obvious, *a.* स्पष्ट, व्यक्त, स्फुट, परिस्फुट, सुस्पष्ट-व्यक्त, सुगम, सुप्रकाश, भिन्नार्थ, स्पष्टार्थ; 'o. to the sight' दृष्टिगोचर, प्रत्यक्ष, सुलक्ष्य. **-ly,** *adv.* स्पष्टं, व्यक्तं, स्फुटं, सुप्रकाशं, भिन्नार्थं. **-ness,** *s.* स्पष्टता, स्फुटता.

Occasion, *v. t.* उत्पद् c., जन् c. (जनयति), आवह् 1 P, उत्था c., भू 1 P (with dat.). *-s.* अवसरः, समयः, कालः. अवकाशः, प्रस्तावः, प्रसंगः, प्रसरः, वेला, स्थानं; 'according to the o.' यथावसरं, यथाकालं, प्रसंगानुरूपं, प्रस्तावसदृशं. 2 प्रयोजनं, अपेक्षा, आकांक्षा, उपयोगः, कार्यं, कारणं. 3 वृत्तं, संगति *f.*, घटनं-ना. 4 निमित्तं, हेतुः, प्रयोजनं, कारणं, उपाधिः. **-al,** *a.* नैमित्तिक-प्रासंगिक- (की *f.*), प्रसंगागत, कार्योपात्त, निमित्तोपनत. 2 आगंतुक-आपतिक-(की *f.*,), अनियत, अनित्य, अनियत-

कारण, अनुकाल, विरल, कादाचित्क (की *f*.); better by 'o.-ly'. **-ally,** *adv*. कदाचित्, कदापि, क्वचित्, काले काले, अंतरा अंतरा, प्रसंगवशात्, यथासंभवं, कार्यवशात्, निमित्तेन, प्रसंगानुरूपं. **-ed,** *a*. उत्पादित, उत्पन्न, जनित, जात, उदित, उद्भूत; gen. ex. by ज, उद्भव, प्रभव, मूल, कारण, निमित्त, कर्तृ, हेतु in comp.; 'fever o. by fatigues' श्रमनिमित्तः ज्वरः &c.

Occident, *s*. पश्चिमा, प्रतीची, पश्चिमा दिक्. **-al,** *a*. पश्चिम, प्रतीच्य, पाश्चात्य, प्रतीचीन.

Occiput, *s*. मस्तक-शिरः-पृष्ठं.

Occult, *a*. नि-,गूढ, दुर्ज्ञेय, दुर्बोध, गहन, गुप्त, अज्ञात, गूढार्थ. **-ism, -ness,** *s*. गूढता, गहनता.

Occultation, *s*. आच्छादनं, ग्रासः.

Occupy, *v. t*. अधि-ष्ठा 1 P, अधि-वस् 1 P, अध्यास् 2 A, आश्रि 1 U, आविश् 6 P, आ-अध्या-क्रम् 1 U, 4 P (all with acc.); व्याप् 5 P, पूर् 10, व्यश् 5 A; वृत् 1 A (with loc.), पदं कृ 8 U or वि-धा 3 U, स्था; 'o. a throne' राज्यमारुह्-राजपदमधिरुह् 1 P; 'o. ing the honourable position of a housewife' श्लाघ्ये गृहिणीपदे स्थिता (S. 4). 2 (Possess) भुज् 7 A, धृ 1 P, 10, धा. 3 प्र-नि-युज् 7 A, 10, व्या-पृ c., प्रवृत् c., व्यापृत-*a*. कृ; 'o. oneself' व्यापृ 6 A, व्यापृत-निरत-आसक्त-*a*. भू 1 P, प्रवृत् (with loc.); आत्मानं व्यापृ c. **-ancy,** *s*. भोगः, भुक्ति *f*., आवेशः, आक्रमः, अधिकारः. **-ant,** *s*. भोक्तृ भोगिन्, अधिकारिन् all *m*. **-ation,** *s*. वृत्ति *f*., आ-उप-जीविका, आजीवः, जीवनसाधनं-उपायः. 2 क्रिया, कृत्यं, प्रवृत्तिः, चरितं, चेष्टा. 3 नियोगः, अधिकारः, स्वकर्मन् *n*. धर्मः. 4 अधिवासः, आवेशनं, अधिष्ठानं, व्याप्ति *f*., आक्रमणं, भोगः, भुक्तिः; 'daily o.' नित्यकृत्यं; 'to do the usual morning o. s.' उचितेषु प्रभातकरणीयेषु (S. 4). **-ed,** *a*. आविष्ट, आक्रांत, अध्युषित, अध्यासित, अधिष्ठित, व्याप्त, भुक्त, आश्रित. 2 व्यापृत, व्यापारिन्, व्यवसायिन्, प्रवृत्त, कर्म-निष्ठ-रत-उद्युक्त, क्रियावत्; gen. ex. by रत, निष्ठ, मग्न, व्यापृत, पर in comp., or by व्यापृ, प्रवृत्. **-er,** *s*. अधिष्ठातृ *m*. भोक्तृ *m*.

Occur, *v. i*. वृत् 1 A, विद् 4 A; जन् 4 A, उत्पद् 4 A, सं-भू 1 P. 2 उप-स्था 1 U, आगम् 1 P, उप-नम् 1 P; *See* **Befall.** 3 सं-,वृत्, समा-पद्, घट् 1 A, आ-नि-पत् 1 P, सं-भू; 'o. to the mind' मनसि उद्-इ 2 P, or भू or जन् or स्फुर् 6 P, or आविः-प्रादुः-भू; 'this did not o. to his mind' इति तस्य बुद्धौ न संजातं, इति तस्य हृदये नापतितं (Ka. 288); 'the following (thoughts) o. ed to my mind' आसीत्-समभूत्-मे मनसि; 'these two verses o. to our memory (mind)' स्मृत्युपस्थितौ इमौ द्वौ श्लोकौ (U. 6). **-rence,** *s*. घटना-नं, वृत्तं, वृत्तांतः, भूतं, व्यतिकरः; संभवः, संगति *f*., उत्पत्ति *f*., उपस्थिति *f*., उपागमः; 'of usual o.' नित्यसंभूत; 'of rare o.' दुर्लभ, चिरोपनत. **-rent,** *s*. शत्रुः; *See* **Enemy.** 2 वृत्तं, वृत्तांतः.

Ocean, *s*. समुद्रः, सागरः, सिंधुः, उदन्वान्, अर्णवः, रत्नाकरः, अकूपारः, पारावारः; and comp. of धिः, निधिः, पतिः, राशिः with 'Water' q. v.; वारिराशिः, जलनिधिः, अब्धिः, अंबुधिः, वार्धिः, अपांपतिः, सरित्पतिः, तोयराशिः अंबुराशिः, &c.; 'o.-bound' सागरांत, समुद्रवलय-रसन-मेखल; 'o. of misery' दुःख-सागरः, व्यसनार्णवः. **-a., -ic,** *a*. सामुद्र (द्री *f*.), समुद्रीय, (*s*.) in comp.

Ochre, *s*. सुवर्णगैरिकं.

Ochlocracy, *s*. प्राकृतजनप्रभुत्वं.

Octagon, *s*. अष्टास्रं, अष्टकोणाकृति *f*. **-al, -Octangular,** *a*. अष्टकोण, अष्टास्र.

Octave, *s*. अष्टकं. **-Octavo,** *a*. अष्टपत्रक.

Octennial, *a*. अष्टवार्षिक (की *f*.), अष्टवर्षीय. 2 अष्टवर्षस्थायिन्.

October, आश्विनकार्तिकं.

Octogenarian, *a*. अशीतिवयस्क.

Octohedron, *s*. अष्टपृष्ठः.

Octopetalous, *a*. अष्टदल.

Octosyllable, *s*. अष्टाक्षरं.

Octuple, *a*. अष्टगुण, अष्टविध.

Ocular, *a*. चाक्षुष (षी *f*.), प्रत्यक्ष; 'o. evidence' प्रत्यक्ष-चाक्षुष-प्रमाणं, चाक्षुषज्ञानं. **-ly,** *adv*. प्रत्यक्षप्रमाणेन. **-Oculist,** *s*. चक्षुः-नेत्र-वैद्यः.

Odd, *a*. विषम, असम, अयुग्म. 2 विलक्षण, असाधारण (णी *f*.), अपरूप, असंगत, अपूर्व, वि-, चित्र, अद्भुत, असामान्य, लोकोत्तर; 'game of o. and even' मुष्टिद्यूतं. **-ity, -ness,** *s*. वैषम्यं. 2 वैलक्षण्यं, वैचित्र्यं, असंगति *f*., अपूर्वता, आचारवैलक्षण्यं. 3 कौतुकं. **-ly,** *adv*. विषमं, चित्रं, विलक्षणं. **-Odds,** *s*. वैषम्यं, न्यूनाधिकभावः, तारतम्यं. 2 आधिक्यं, उत्कर्षः, विशेषः, श्रेष्ठता, विशिष्टता; 'fight at o.' अधिकबलेन शत्रुणा युध् 4 A.

Ode, *s*. गीतं, गानं, गेयं.

Odious, *a*. गर्हित, कुत्सित, निंद्य गर्ह्य, द्वेष्य, अप्रिय, द्वेषपात्रं-भाजनं-आस्पदं; कश्मल (report). 2 द्वेषावह, द्वेषोत्पादिन्. **-ly,** *adv*. कुत्सितं, गर्हणीयतया. **-ness,** *s*. गर्ह्यता, द्वेष्यता. **-Odium,** *s*. वि-,द्वेषः, गर्हा, कुत्सनं, घृणा.

Odontagy(ia), *s.* दंत-शूलं-पीडा-व्यथा.

Odour, *s.* गंधः, वासः; 'strong or fragrant o.' सुगंधः, सुवासः, सौरभं-भ्यं, आ-,मोदः, परिमलः; 'bad o.' दुर्गंधः, पूतिगंधः. **–ous, –Odoriferous,** *a.* सगंध, सुगंधि, परिमलवत्, सामोद, गंधवत्, सुरभि, सवास.

Œsophagus, *s.* *See* '**Gullet.**'

Of, *prep.* Gen. ex. by genitive or by comp.: 'o. great strength' महाबल. **2** (Showing reference) अधिकृत्य, उद्दिश्य (with acc.), or by गत in comp.; 'by thinking o. her husband' भर्तृगतया चिंतया. **3** (Made of) by Tat. comp.: or मय (यी *f.*), निर्मित in comp.; or by derivatives; 'pot o. gold' हेमपात्रं, हेममयं or हैमं पात्रं. **4** (Partitive sense) by gen. or loc., or मध्ये, मध्यात् with gen. **5** (Apposition) ex. by comp. or by नाम *ind.*; 'the island o. Ceylon' सिंहलद्वीपं, सिंहलं नाम द्वीपं. **6** (Showing cause) by instr. or abl.; 'died o. fever' ज्वरेण मृतः.

Off, *adv.* दूरे, दूरं, दूरतः; (with verbs) ex. by अप, वि, निः, अव, उत्; 'o. with his head' उच्छेद्यतामस्य शिरः; 'o. with him to the prison' अपनीयतामसौ कारागृहं. **–***a.*, 'far o.' दूरवर्तिन्, दूरस्थित-स्थ. **–***interj.*, 'get o.', 'be o.' दूरं अपेहि, अपसर; 'o.-hand' प्रत्युत्पन्न, अचिंतितपूर्व, आकस्मिक (की *f.*), असावधान, निरपेक्ष; 'badly o.' दुःस्थित, दुर्गत, आपन्न, कृच्छ्रगत; 'well o.' सुस्थ, सुस्थित, संपन्न.

Offal, *s.* उच्छिष्टं, भुक्तावशेषः-षं, शेषान्नं, मलं, उच्छिष्टान्नं; मांसोच्छिष्टं, अवशिष्टमांसं.

Offend, *v.* अपराध् 4, 5 P (with gen. or loc.), विप्रियं-अनार्यं कृ 8 U or आचर् 1 P, अप्रसादं उत्पद् c.; कस्मिन्नपि पूजार्हे अपराद्धा शकुंतला (S. 4) 'Sakuntalā has o. ed (committed an offence against) some respectable person'. **2** पीड् 10, व्यथ् c. (व्यथयति), क्लिश् 9 P, दु 5 P, सं-परि-तप् c. **3** (Against) अतिचर्, अति-व्यति-क्रम् 1 U, 4 P, लंघ् 1 A, 10, अतिवृत् 1 A, भिद् 7 P, भंज् 7 P, लुप् c. **4** रुष् c., क्रुध् c., प्र-,कुप् c., क्षुभ् c., कुपित-क्षुब्ध- *a.* कृ, कोपं जन् c. (जनयति); अव-अप-मन् c. **5** रुध् 7 U, बाध् 1 A, स्खल् c. (स्खलयति). **–ed,** *a.* कुपित, क्षुब्ध, प्रकोपित, क्रुद्ध, रुष्ट, जातामर्ष, संतप्त, असंतुष्ट. **2** बाधित, व्याहत, प्रतिरुद्ध; 'to be o.' कुप्-क्रुध्-रुष् 4 P. **–er,** *s.* अपराधिन्, अपराद्धः, दोषिन्, पापिन् पातकिन्, कृतागस्, कृतापराधः, सदोषः, अपराधकृत्, कुकर्मन् all *m.* **–Offence,** *s.* अपराधः, दोषः, पापं, पातकं, अघं, एनस्-आगस् *n.*, दुरितं, कुकर्मन् *n.* दुष्कृति *f.* **2** कोपः, क्रोधः, रोषः, अमर्षः, मन्युः, असंतोषः; 'easily taking o.' शीघ्रकोपिन्, सुलभकोप. **3** विप्रियं, अपमानः, अवज्ञा. **4** रोधः, बाधा-धः, स्खलनं; *See* Obstacle. **–less,** *a.* निर्दोष, निरपराध. **–Offensive,** *a.* कोपजनन (नी *f.*), रोषावह, अप्रिय, अतुष्टि-अप्रीति-कर (री *f.*), असुखद, अरम्य, विरुद्ध, कटु, असभ्य; 'o. to the ear' श्रवणकटु, कुश्राव्य; 'o. to the taste' विरस. **2** बीभत्स, जुगुप्सावह, गर्ह्य, कुत्सित, गर्हित, दुर् pr.; 'o. smell' दुर्गंधः, पूतिगंधः. **3** पीडाकर (री *f.*), अनिष्टावह, अहित, अपकारक, उपघातिन्; 'act on the o.' अपराधे अग्रेसरः भू 1 P: 'o. weapon' घातोपयुक्तं शस्त्रं. **4** आक्रामक, आ-अभिघातिन्. **–ly,** *adv.* सापकारं, अप्रियं, सापराधं, सदोषं. **–ness,** *s.* अप्रियता, कटुता, गर्ह्यता, सापकारता, घातुकता.

Offer, *v. t.* उप-नी 1 P, उप-हृ 1 P, प्र-उप-क्लृप् c., उप-स्था c. (स्थापयति); प्र-दा 3 U, 1 P, प्रति-पद् c., नि-विद् c., ऋ c. (अर्पयति), निक्षिप् 6 P, स्पृश् c., उपहारं दा, उपढौकृ c. **2** उपन्यस् 4 U, उप-क्षिप्, पुरो नि-धा 3 U, अभि-धा, निर्-उद्-दिश् 6 P. **3** प्र-,दृश् c., प्रकटीकृ; प्रसृ c., प्रक्षिप्. **4** दा desid. (दित्सति-ते). **5** (As an oblation) उपहृ, निर्वप् 1 U, निर्वप्, उत्सृज् 6 P, ऋ c., उपहारीकृ, उपायनीकृ: 'o. mango-sprouts in memory of Smara' स्मरमुद्दिश्य निवपेः सहकारमंजरीः (K. iv. 38); 'water o. ed to the Manes' निवापसलिलं; 'o. a burnt oblation' हु 3 P; 'o. a price' मूल्यं निर्दिश् or अभि-धा; 'o. violence' बलात्कारं कृ. **–***v. i.* उपस्था 1 U, आविः-प्रादुः-भू 1 P, उपनम् 1 P, दृश्-लक्ष् pass., आ-नि-पत् 1 P. **2** (Show willingness) ex. by desid. form, or वद् 1 P with future; 'he o.-ed to aid me' तव साहाय्यं करिष्यामीति उवाद. **3** प्रयत् 1 A, उद्यम् 1 A, चेष्ट् 1 A, उत्-जृंभ् 1 A; *See* **Attempt**. **–***s.* उपन्यासः, उपक्षेपः, प्रस्तावः, अभिधानं, निर्देशः, वचनं, निवेदनं; sometimes प्रार्थना; 'o. for marriage' विवाहप्रार्थना; 'makes an o. of' दित्सति. **2** प्रयत्नः, उद्यमः, प्रवृत्ति *f.* **–er,** *s.* उपहर्तृ उपनेतृ, अर्पकः, निवेदकः, होतृ. all *m.* **–ing,** *s.* उपहरणं, उपनयनं, अर्पणं. **2** बलिदानं, बलिकर्मन् *n.* निर्वपणं, हवनं. **3** उपायनं, उपहारः, उत्सर्गः, बलिः, दानं; *See* **Oblation, Mane. 4** (Sacrificial) हविस् *n.*, हव्यं, हुतं, आहुति *f.* **5** अर्घः, उपायनं, प्राभृतं.

Office, *s.* कर्मन् *n.*, कार्यं, नियोगः, क्रिया, कृत्यं, व्यापारः, धर्मः, प्र-,वृत्ति *f.* 2 अधिकारः, पदं, पदवी, स्थानं, आस्पदं, नियोगः, अधिकारपदं. 3 विधिसंग्रहः. 4 उद्योगस्थानं, कार्यानुष्ठानगृहं, कार्यस्थानं; 'good o.' उपकारः, उपकृतं-ति *f.*, सुकृतं, अनुग्रहः, हितं; 'ill o.' अपकारः, अपक्रिया, अनिष्टं; 'holding o.', 'in o.' प्राप्ताधिकार, अधिकारापन्न, पदारूढ, अधिकृत; 'dismissed from o.' च्युत-भ्रष्ट-अधिकार, पदभ्रष्ट-च्युत; 'permanent o.' स्थिराधिकारः; 'temporary o.' चलपदं. **-Officer**, *s.* अधिकृतः, नियुक्तः, नियोगिन् *m.* अधिकारिन् *m.* आधिकारिकः, कार्यवीक्षकः; 'o. of the king' राजपुरुषः भृत्यः, प्रकृतिपुरुषः; 'o. of justice' धर्माधिकारिन् *m.* न्यायाध्यक्षः; 'military o.' सेनापदभाज् *m.* सैनिकाध्यक्षः; बलाधिपः. **-Official**, *a.* राजपुरुषः-भृत्यः, अधिकारी, नियोगी, पुरुषः, भृत्यः. -*a.* आधिकारिक (की *f.*), अधिकारपद-विषयक-संबंधिन्; अधिकारयुक्त. **-dom**, *s.* अधिकृतवर्गः. **-ly**, *adv.* अधिकारपूर्वं, अधिकारवशात्. **-Officious**, *a.* अनधिकारचर्चाशील, परकार्यचर्चक; *See* **Meddlesome.** 2 उपकारशील, अनुकूल, हित. 3 अत्युपचार, अत्युपकारिन्. **-ly**, *adv.* अधिकारचर्चया, सप्रतिभं, प्रगल्भतया. **-ness**, *s.* अनधिकारचर्चा, परकार्यचर्चा-प्रवेशः.

Off-scouring, *s. See* **Dirt.**

Off-set, *s.* प्ररोहः, अंकुरः. -*v. t.* समीकृ 8 U.

Off-shoot, *s.* प्ररोहः, अंकुरः, शाखा (lit. and fig.)

Offspring, *s.* संतानः, संतति *f.*, प्रसूति *f.*, प्रजा, अपत्यं, प्रसवः, तोकं; 'male o.' पुत्रः, सूनुः, पुमपत्यं, पुंसंतानः; 'female o.' कन्या, सुता, स्त्र्यपत्यं; 'having no o.' निर्वंश, निरपत्य, निःसंतान.

Offuscate, *v. t. See* **Obscure.**

Oft, Often, (O.-times), *adv.* असकृत्, बहुशः-धा, बहु-अनेक-वारं, मुहुर्मुहुः, भूयो भूयः, अनेकशः, अनेकदा, वारंवारं, अभीक्ष्णं; 'how o.' कतिशः, कतिवारान्; 'as o. as so o.' यतिवारं-ततिवारं.

Ogle, *s.* कटाक्षः, कटाक्ष-अपांग-दर्शनं, नयनोपांतविलोकितं, अर्धवीक्षणं, भ्रूविलासः. -*v. t.* कटाक्षेण ईक्ष् 1 A or अवलोक् 1 A, 10, तिर्यक्-साचि-दृश् 1 P.

Ogre, *s.* क्रव्याद् *m.*, दैत्यः, दानवः, राक्षसः.

Oil, *s.* तैलं, स्नेहः, अभ्यंजनं; 'pour o. on burning fire' क्षते क्षारं प्रक्षिप् 6 P; 'o.-bottle' कुतू *f.*; 'o.-cake' तैलकिट्टं, पिण्याकः, तिलकल्कं; 'o.-man' तैलिकः, तैलिन् *m.* तैल-स्नेह-कारः, चाक्रिकः; 'o.-mill' तैलपेषणी. -*v. t.* तैलेन लिप् 6 P or अंज् 7 P or दिह् 2 U. **-ed**, *a.* तैलाक्त, स्नेहाक्त, अभ्यक्त. **-y**, *a.* तैलमय (यी *f.*), सस्नेह सतैल, तैलयुक्त-वत्, तैलाक्त; चिक्कण, मसृण, स्निग्ध, (fig. also).

Ointment, *s.* अंजनं, वि-,लेपः-पनं, प्र-अनु-लेपः, अभ्यंजनं, उपदेहः; 'perfumed o.' गात्रानुलेपनी, वर्ति *f.*, वर्णकं.

Old, *a.* (Person) वृद्ध, स्थविर, प्रवयस्, परिणत, परिणतवयस्, जीर्ण, वयोवृद्ध; जरठ, जरत्, जरातुर, गतवयस्क, जीन, जरण, जरंड; 'to grow o.' जॄ 4, 9 P, ज्या 9 P, परिणम् 1 P; 'o. age' जरा, परिणामः, परिणति *f.*, वार्धकं-क्यं; वृद्धावस्था, वृद्धभावः, ज्यानि *f.*, जीर्णि *f.*; 'o. lady' जरती, स्थविरा, वृद्धा, पलिता, पलिक्नी; 'o. man' स्थविरः, जरठः, वृद्धः, जरन्, पलितः. 2 (Showing age) ex. by वर्ष, वत्सर, वर्षीण-य in comp.: '8 years o.' अष्टवर्षीय, अष्टवर्ष-वर्षात्मक; 'a year o.' वर्षजात; '2 days o.' द्व्यहजात; 'how o. are you' किं ते वयःप्रमाणं, किंवर्षीयोसि. 3 (Not new) बहु-चिर-कालिक (की *f.*), चिर-दीर्घ-कालीन, चिरकाल-चिर-स्थायिन्, चिरंतन (नी *f.*); oft. by चिर in comp.; 'o. servant' चिरसेवकः, मूलभृत्यः, मौलः; 'o. friend' चिरमित्रं, चिरंतनसुहृद्. 4 जीर्ण, जर्जर, जर्जरित; 'o. cloth' चीरं, जीर्णवस्त्रं, पटच्चरं. 5 (Ancient) पुराण, प्राचीन, पूर्व, पूर्वतन (नी *f.*), प्राक्तन, पुरातन, प्रतन, प्रत्न, पौराण (णी *f.*), प्राक्-पूर्व-कालीन, पुरावृत्त; 'of o.' 'in olden times' पुरा, पुराकल्पे, पूर्वं. **-en**, *a.* पुरातन, पुराण, प्राचीन. **-ish**, *a.* ईषद्वृद्ध.

Oleaginous, *a.* स्निग्ध, चिक्कण, मेदुर, मसृण

Oleander, *s.* प्रति(ती)हासः, करवीरः, शतप्रासः, चंडातः, हयमारकः.

Oleraceous, *a.* शाकविषयक.

Olfactory, *s.* नस्य, नासा in comp.

Olibanum, *s.* तुरुष्कः, पिंडकः, सिह्लः, यावनः; *See* **Incense** also.

Oligarchy, *s.* अल्पजनाधिपत्यं-प्रभुत्वं. **-ic**, *a.* अल्प-कतिपय-स्वामिक.

Olio, *s. See* **Medley.**

Olive, *s.* जितवृक्षः.

Omen, *s.* निमित्तं, शकुनः-नं, लक्षणं, चिह्नं, अजन्यं, पूर्वलक्षणं-चिह्नं, शुभाशुभलक्षणं; 'of good o.' शुभ, मंगल, सुलक्षण; 'good o.' सुलक्षणं; 'ill o.' दुश्चिह्नं, दुर्लक्षणं, अपशकुनः, अजन्यं, अवलक्षणं, अशुभलक्षणं. **-Ominous**, *a.* अनिष्ट or अशुभ-शंसिन् or आवेदिन्, दुर्लक्षण, अलक्षण. 2 शुभ-मंगल-शंसिन्. 3 शाकुनिक (की *f.*), शकुननिमित्त in comp. **-ly**, *adv.* अशुभलक्षणेन, दुर्लक्षणपूर्वं.

Omit, *v. t.* वृज् 10, वि-परि-°, परि-त्यज् 1 P, उत्-,क्षिप् 6 P, मुच् 6 P, उत्सृज् 6 P.

अपास् 4 U, हा 3 P. **2** अतिक्रम् 1 U, 4 P, उपेक्ष् 1 A, लंघ् 1 A, 10, अतिचर् 1 P, अतिवृत् 1 A, लुप् c., न कृ 8 U or वि-धा 3 U or अनु-ष्ठा 1 P. **-Omission,** *s.* वर्जनं, त्यागः, उत्सर्गः, लंघनं, अतिक्रमः, अतिचारः, लोपः, उपात्ययः, 'o. to do something' अननुष्ठानं, अविधानं, उपेक्षा.

Omnifarious, *a.* सर्वविध-प्रकार.

Omnigenous, *a.* सर्वप्रकार-जातीय.

Omnipotent, *a.* सर्वशक्तिमत्, सर्वसमर्थ-शक्ति, अमित-अपार-शक्ति. **-Omnipotence, -cy,** *s.* सर्वशक्तित्वं, अपार-अमित-शक्ति *f.*, सर्वसामर्थ्यं, अनंतशक्तिः.

Omnipresent, *a.* सर्वगत, सर्वात्मक, सर्व-विश्व-व्यापिन्, विश्वात्मन्, विश्वरूप. **-Omnipresence,** *s.* सर्व-विश्व-व्याप्ति *f.*, विश्वात्मता, विश्वरूपता, सर्व-विश्वव्यापिता.

Omniscient, *a.* सर्वज्ञ, सर्वविद्-वेदिन्-बुध, सर्वदर्शिन्-साक्षिन्, विश्वनेत्र, त्रिकालज्ञ. **-Omniscience,** *s.* सर्वज्ञत्वं, सर्वज्ञानं.

Omnivagant, *a.* सर्वगत, सर्वगामिन्.

Omnivorous, *a.* सर्वभक्ष, सर्वभोजिन्.

Omphalic, *a.* नाभ्य, नाभि in comp.

Omphalocele, *s.* नाभिस्फोटः.

On, *prep.* Gen. ex. by loc., अधि pr., उपरि (with gen.). **2** (Time, place) by loc.; 'o. the shore' तीरे, तीरोपांते, उपतीरं. **3** (With verbs of motion) by loc. or instr., (स्कंधेन or स्कंधे छागं गृहीत्वा); 'go o. foot' पद्भ्यां गम् 1 P. **4** (Direction) by loc. or by तस्, त्र affixed; 'o. the left' वामतः; 'o. all sides' सर्वतः, सर्वत्र, समंततः. **5** (After) ex. by abl. or loc. abs.; 'o. his arrival' तस्मिन् आगते, तदागमनात्; or by gerund; 'o. hearing his speech' तस्य वचः श्रुत्वा. **6** (Concerning) विषय-संबंधिन् in comp. or by comp.; 'a work o. morals' नीतिग्रंथः; 'so o.' इत्यादि (*a.*); 'hence, o. thy life' स्वजीवितं यदि वांछसि तर्हि द्रागपसर, अपसरास्मात्स्थानान्नो चेत् त्वं जीवितेन वियोक्ष्यसे; 'o. o., to the combat' ननु युद्धाय प्रयात. *-adv.* अग्रतः, अग्रे, प्र pr.; 'having clothes o.' परिहितवस्त्र. **-ward,** *a.* अग्रेसर (री *f.*), अग्रगामिन्, वर्धिष्णु. **-wards,** *adv.* अग्रे, अग्रतः, पुरतः.

On-dit, *s.* किल *ind.*; *See* **Rumour.**

One, *a.* एक; 'o. of two' एकतर; 'o. of many' एकतम; 'only o.' अनन्य; 'fixed on o. object' अनन्यविषय, अनन्यवृत्ति. **2** (Any) कश्चन, कोपि. **3** (Same) एक, तद् with एव; 'at o. time' युगपत्, समं, एककाले; 'having o. meaning' एकार्थ. *-s.* जनः, नरः, मनुष्यः; 'gen. not ex.; 'o. should always protect oneself' आत्मानं सततं रक्षेत्; 'o. by o.' एकैकशः, एकैकं, प्रत्येकं, पृथक्पृथक्; 'o. day' कदाचित्, कदापि काले; 'young or little o s.' शिशुजनः, बालाः; 'in o. way' एकधा; 'o.-self' आत्मन् *m.*, स्वयं *ind.*; 'o.'s own' स्व, निज, आत्मीय, स्वीय, आत्म in comp.; 'to be at o.' समन् 4 A; 'o.-eyed' एकाक्ष, काण, एकाक्षिहीन; 'o.-sided' असम, एकपक्षीय, एकदेशीय; 'o. another' अन्योन्यं, परस्परं, इतरेतरं, 'to be o.-self again' प्रकृतिमापद् 4 A, संज्ञां लभ् 1 A: *See* 'come to senses' under **Sense;** 'to bring to o.-self' प्रकृतौ स्था c. (स्थापयति). **-ness,** *s.* एकत्वं, एकभावः, अद्वैतं, अभेदः, अविशेषः. **-Once,** *adv.* सकृत्, एकवारं. **2** (O. upon a time) एकदा, अथैकदा, अथ कदाचित्. **3** पुरा, पूर्वं, प्राक्काले; 'at o.' समं, युगपत्, एककाले, समकाले-लं; सद्यः, सपदि, तत्क्षणात्, तत्क्षणेन, तत्काले; 'all at o.' अकस्मात्, एकपदे; 'o. more' पुनरपि, भूयः, पुनः.

Oneirocritic,-al, *a.* स्वप्नविचारिन्.

Oneiromancy, *s.* स्वप्नार्थविचारः, स्वप्नार्थज्ञापनं.

Onerous, *a.* दुर्भर, गुरु, गुरुभार, दुर्वह, दुःसह.

Onion, *s.* पलांडुः, सुकंदकः.

Only, *a.* एक, एव, एकाकिन्, केवल, मात्र-मात्रक in comp., अद्वितीय, अनन्य; 'having that as the o. recourse' तदेकशरण, अनन्यगतिक. *-adv.* केवलं, एव, मात्र in comp.; 'not o. but' न केवलं followed by अपि or किंतु.

Onomatopœia, *s.* अनुकारः; अनुकरणं.

Onset, *s.* आ-अभि-क्रमः-मणं, आस्कंदः, अभिसंपातः, आपातः, अभिग्रहः, अभ्याघातः.

Onslaught, *s.* अभ्याघातः; *See* **Onset**

Ontology, *s.* सत्त्वविद्या, भूतविचारः. **-ist,** *s.* सत्त्वविद्याज्ञः.

Ooze, *v. i.* (शनैः) च्यु-स्रु-गल् 1 P, स्यंद् 1 A, प्र-स्नु 2 P, री 4 A. *-v. t.* स्रु c., स्यंद् c., &c. *-s.* क्षरत्पंकः, मृदुमृत्तिका **2** स्रवः, द्रवः, धारा. **-ing,** *s.* स्यंदनं, क्षरणं, स्रवः. **-y,** *a.* सद्रव.

Opaque, *a.* प्रकाशाभेद्य, किरणाभेद्य; अस्वच्छ, कलुष, निष्प्रभ, सांधकार. **-ness,-Opacity,** *s.* अस्वच्छता, निष्प्रभता, कालुष्यं. **2** शुक्रं.

Opal, *s.* पुलकः, विमलकः.

Open, *v. t.* (Door &c.) अपा-वि-वृ 5 U, उद्-घट् c., निरर्गलीकृ 8 U; (lotu-) विकस् c., प्रबुध् c., भिद् 7 P or c., (सूर्यांशुभिर्भिन्नमिवारविंदं K. I. 32), स्फुट् c.; (eyes) उन्मील् c., उत्फुल् c., उन्मिष् c.; (mouth) व्या-दा 3 P, जृंभ् c., उत्-वि-°; (hand) प्रसृ c., वितन् 8 U, विस्तृ c. **2**

वि-अंज् 7 P or c., विवृ, प्रकटीकृ, आविष्कृ, व्यक्तीकृ, प्रकाश् c., 'o. the heart', 'o. oneself' हृद्गतं निविद् c. 3 (As meaning) व्या-ख्या 2 P, व्याचक्ष् 2 A. व्याकृ, व्यक्तीकृ, विवृ. 4 छिद् 7 P, निर्भिद्. 5 शुध् c., वि-परि°. 6 प्रारभ् 1 A, प्रस्तु 2 U, प्र-उप-क्रम् 1 A. –*v. i.* उन्मील् 1 P, विकस् 1 P, स्फुट् 6 P, दल् 1 P, भिद् pass., फुल्ल् 1 P. 2 विस्तृ-विवृ- pass., वि-जृंभ् 1 A, प्रसृ c.-वितन्-pass.; (in other senses) pass. of roots in (*v. t.*). 4 (Ground) स्फुट्, विदल्, द्विधाभू, विदॄ-भिद्-pass. 5 प्रवृत् 1 A, प्रारभ् pass. –*a.* वि-अपा-वृत, असंवृत, उद्घाटित; (eyes) उन्मीलित, उन्मिषित; (hand) प्रसारित, वितत, विस्तृत, विस्तीर्ण; (mouth) विजृंभित, सजृंभ, उज्जृंभ, व्यात्त; (letter) उन्मुद्र, निरावेष्टन, अकोशस्थ. 2 निर्यन्त्रण, असंबाध, निरर्गल, अनर्गल, अरुद्ध, उत्-वि-शृंखल, निरवग्रह; वि-, शुद्ध, निर्विघ्न; *See* **Free.** 3 निर्व्याज, उत्तान, निष्कपट, सरल, ऋजु, निर्माय, उदार, शुद्धमति, विमलात्मन्; *See* **Frank**; 'o.-minded person' उत्तानहृदयः जनः. 4 सु-, प्रकाश, वि-, स्पष्ट, व्यक्त, प्रकट, अगूढ, अगुप्त. 5 निर्वृक्ष, अपादप; अनाश्रय. 6 गम्य, उपसर्पणीय; *See* **Accessible,** 'lays him o. to his enemy' शत्रुगोचरे (विषये) तं पातयति; 'o. to dispute' विवादास्पदं, विवादग्रस्त-*a.*; 'lay o' प्रकाश् c.; *See* (*v. t.*) 'o. air' अनावृतप्रदेशः-भूभागः; 'o. at one end' एकमुख; 'having gone out into the o. air' प्रकाशं निर्गतः (S. 4); 'o.-eyed' विवृताक्ष, उत्फुल्लनयन, सचेतन (fig.); 'o.-handed' उदार, मुक्तहस्त; 'o.-hearted' उदार, उत्तानहृदय, निर्व्याज; 'o.-mouthed' व्यात्तमुख. **–er,** *s.* उद्घाटकः, प्रकाशकः. **–ing,** *s.* विवरणं, विवृति *f.*, उद्घाटनं; उन्मीलनं, विकासः, भेदः, स्फुटनं. 2 छिद्रं, रंध्रं, द्वारं, विवरः, स्फु(स्फो)टनं, भिदा. 3 प्रारंभः, उपक्रमः, प्रस्तावः, उपोद्घातः. –*a.* विकसत्, स्फुटत्. 2 प्रथम, आद्य, आरंभक. **–ly,** *adv.* प्रकाशं, सुस्पष्टं, व्यक्तं, परि-, स्फुटं. **–ness,** *s.* विवृतत्वं, विवृति *f.*, निर्व्याजता, सारल्यं, निष्कापट्यं, दाक्षिण्यं, शुद्धमतिता, व्यक्तता, स्पष्टता, प्रकाशता, प्राकट्यं.

Opera, *s.* संगीतनाटकं.

Operate, *v. i.* गुणं आवह् 1 P, कार्यं उत्पद् c. or दृश् c., फलं सं-पद् c. or साध् c., प्र-भू 1 P, प्रबलीभू; *See* **Effect.** 2 कृ 8 U, वि-धा 3 U, चेष्ट् 1 A, प्रवृत् 1 A प्र-यत् 1 A व्यापृ 6 A. 3 शस्त्रेण उपचर् 1 P or साध् c. **–ion,** *s.* क्रिया, कर्मन् *n.*, कृति *f.*, कार्यं, कृत्यं. 2 चेष्टितं, प्रवृत्ति *f.*, उद्यमः, उद्योगः, प्रयत्नः, व्यापारः. 3 प्रवर्तकत्वं, हेतुता, का साधनं; 'mental o.' मनोव्यापार. 'quick in o.' आशुकारिन्, सद्यःफल, आशुगुणावह. 4 (Surgical) शस्त्रक्रिया-कर्मन् *n.* शस्त्रोपायः, शस्त्रोपचारः. **–ive,** *a.* कर्मकारिन्, प्रवर्तक, प्रयोजक, कारणीभूत. 2 गुणावह, गुणकारिन्, सिद्धिकर (री *f.*), प्रबल, सप्रभाव, प्रभविष्णु, कार्यक्षम. –*s.* कर्म-शिल्प-कारः, कारुः. **–or,** *s.* कारकः, कर्तृ *m.* प्रवर्तकः.

Operose, *a.* श्रम-कष्ट-साध्य.

Ophiology, *s.* सर्पविद्या.

Ophthalmia, *s.* नेत्राभिष्यंदः.

Opiate, *a.* निद्रावह, निद्रा-स्वाप-कारिन्, स्वापन. –*s.* निद्रावहं औषधं स्वापनं.

Opine, *v. i.* मन् 4 A तर्क् 10; *See* **Think.** **–Opinion,** *s.* मतं, मति *f.*, तर्कः, बुद्धि *f.*, बोधः, अभिप्रायः, आशयः; 'such is my o.' इति मे मतिः; 'difference of o.' मति-(त)भेदः, विप्रतिपत्ति *f.*, वैमत्यं; 'regard for public o.' लोक or जन-लज्जा or भयं; 'secure the good o. of your husband' भर्तुर्बहुमता भव (S. 4). **–ated, –ative,** *a.* स्वमताभिमानिन्, मताग्रहिन्, दुराग्रहिन्.

Opium, *s.* अहिफेनं, अफेनं.

Opponent, *a.* विरुद्ध, प्रतिकूल, वि-प्रति-पक्ष. वैरिन्. –*s.* शत्रुः, अरिः, वैरिन्, वि-प्रति-पक्षः; प्रतियोद्धृ, प्रतियोगिन्, प्रतिरोधकः all *m.*

Opportune, *a.* समयोचित, प्राप्तकाल, कालयोग्य, प्रस्तावसदृश (शी *f.*), प्राप्तावसर, सामयिक-प्रास्ताविक- (की *f.*). **–ly,** *adv.* प्राप्तकालं, काले, स्थाने, यथासमयं, यथावसरं, प्रस्तावसदृशं, कालोचितं. **–ness,** *s.* कालौचित्यं, प्रस्तावयोग्यता. **–Opportunity,** *s.* प्रस्तावः, अवकाशः, अवसरः, कालः, समयः, प्रसंगः, वेला, कार्यकालः, योगः. 2 साधनं, उपायः, प्रयुक्ति *f.*; 'lose an o.' कालं क्षिप् 6 P or हृ 1 P; 'seizing an o.' अवसरं गृहीत्वा, गृहीतावसर, लब्धावकाश; 'to await an o.' अवसरं प्रति-पा c. (पालयति).

Oppose, *v. t.* वि-नि-प्रति-रुध् 7 U, प्रतिबंध् 9 P, प्रतिकृ 8 U, प्रतिकूलयति (*D.*), प्रत्यव-स्था 1 A, वि-प्रति-हन् 2 P, बाध् 1 A, निवृ c.; (in fighting) प्रतियुध् c.; संमुखी-अभिमुखी-कृ 8 U or भू. **–ed,** *a.* विरुद्ध, विपरीत, प्रतिकूल, विप्रतिपन्न, बाधित, वारित, असंमत, विद्विष्ट, 'o. to the practice of the world' लोकाचारविरुद्ध, लोकासंमत, लोकविद्विष्ट. 2 इतर in comp.; 'o. to false' मिथ्येतर. **–er,** *s.* विरोधकः, प्रतिहंतृ *m.* **–Opposite,** *a.* सं-प्रति-अभिमुख (खी *f.*), संमुखस्थ. 2 विरुद्ध, विरोधिन्, विपरीत, प्रतिकूल, वि-प्रति-पक्ष, प्रतिद्वंद्विन्, विपर्यस्त, व्यत्यस्त, इतर in comp.

of natural' सहजेतर; सख्येतर, &c. 3 पार, अपर, अंतर in comp.; 'the o. bank' पारं, तीरांतरं, अपरतीरं. -s. विपर्ययः, व्यत्यासः, विपरीतं; by (a.). **-ion,** s. वैपरीत्यं, प्रातिकूल्यं, विरोधः, विपक्षता, विपर्य(र्या)यः, व्यत्ययः, व्यत्यासः, विपर्यासः. 2 विरोधः, प्रतिक्रिया, प्रतिबंधः, प्रतियोगः-यत्नः, व्याघातः, बाधः-धा. 3 विरोधकजनाः, प्रतियोगिपक्षः, विरोधिजनवर्गः. 4 विरुद्ध-द्वेष-भावः, वैरं. **-ly,** *adv.* सं-अभि-मुखं, विपरीतं, प्रतिकूलं, विपर्ययेण.

Oppress, *v. t.* पीड् 10, अर्द् 1 P or c., उपद्रु 1 P. बाध् 1 A, नि-अप-कृ 8 U, विप्रकृ, उपप्लु 1 A. उप मृद् 9 P or c., कृष् c., अभिद्रुह् 4 P, अभिभू 1 P. **-ion,** s. पीडा, पीडनं, बाधः-धा, अर्दनं, उपमर्दः, उपप्लवः, उपद्रवः. नि-विप्र-अप-कारः, नैष्ठुर्यं, क्रौर्यं. **-ive,** a. बाधक, पीडाकर (री *f.*), उपप्लाविन्, उपद्राविन्, पीडाप्रद, अपकारक; निष्ठुर, अतिक्रूर, क्लेशद. 2 अतिभारवत्. **-or,** s. प्रजापीडकः, उपप्लावकः, उपद्राविन् *m.*, अत्याचारः, निष्ठुरः, क्रूरचरितः.

Opprobrium, s. निंदा, गर्हा, कुत्सा, तिरस्कारः, अपवादः, अवज्ञा, परिभवः, वाच्यता, धिक्कारः. **-Opprobrious,** a. गर्ह्य, निंदात्मक, गर्हारूप, निंदा-गर्हा-अर्थक; परुष, मुखर, द्वेष्य. **-ly,** *adv.* सापवादं, सतिरस्कारं. **-ness,** s. गर्ह्यता, निंदकत्वं.

Oppugn,-er, *See* **Oppose** &c.

Optative, a. इच्छार्थक.

Optic,-al, a. चाक्षुष (षी *f.*), चक्षुः-नेत्र in comp. 2 दृक्शास्त्रसंबंधिन्. -s. चक्षुरिंद्रियं, दृगिंद्रियं. **-Optics,** s. दृग्विद्या-शास्त्रं.

Optimacy, s. कुलीनवर्गः-जनाः.

Optimism, s. उत्तमता, उत्कृष्टता.

Option, s. अभि-,रुचि *f.*, इच्छा, कामः, अभिलाषः, ईप्सितं; विकल्पः, विभाषा (in grammar); 'it is left to your o' अत्र स्वरुच्या वर्ततां भवान्, यथाभिलाषं क्रियतां. **-al,** a. वैकल्पिक- ऐच्छिक- (की *f.*), काम्य, सविकल्प, यथाकाम, रुच्यधीन, स्वेच्छातंत्र. **-ally,** *adv.* विकल्पेन, अन्यतरस्यां, (ह्रकोरन्यतरस्यां), वा, विभाषया.

Opulent, a. श्रीमत्, धनिन्, धनाढ्य, वित्तवत्, धन-वित्त-संपन्न, धानिक, समृद्ध, संपन्न, धनेश्वर, बहुधन. **-Opulence,** s. विभवः, ऐश्वर्यं, समृद्धि *f.*

Or, *conj.* अथवा, यद्वा, वा (never at beginning) repeated after each word, or after the last; (in questions) नु, (स्वप्नो नु माया नु मतिभ्रमो नु); उत, आहो, आहोस्वित् (correl. of किं 'whether'). 2 अन्यथा, इतरथा, अथवा, नोचेत्.

Oracle, s. दैवी वाक्, देव-आकाश-वाणी, आकाशभवा-अशरीरिणी-सरस्वती. 2 प्रश्न-देवता-देवः. 3 प्रश्न-शकुन-स्थानं. 4 प्रमाणं, आप्तः, प्रमाणपुरुषः; आप्तवचनं. **-Oracular,** a. देववाणीतुल्य, प्रमाणभूत, आप्त, प्रामाणिक (की *f.*).

Oral, a. वाचिक (की *f.*), उक्त, अलिखित; 'o. message' वाचिकं. **-ly,** *adv.* वाचा मुखद्वारा, अलिखितं.

Orange, s. नारंगः, नागरंगः, ऐरावतः, नादेयी, भूमिजंबुका; (fruit) नारंगफलं; 'o.-coloured' पिच्छिल, कौसुंभ (भी *f.*). **-Orangery,** s. नागरंग-वाटिका.

Oration, s. वाक्प्रबंधः, सालंकारं वचनं, प्रवचनं, सरस्वतीनिष्यंदः (fluent o.). **-Orator,** s. प्र-,वक्तृ *m.*, वाक्शौंडः-चतुरः, प्रवचनपटुः, सद्वक्तृ *m.* वाक्पटुः, वाग्मिन् *m.*, वागीशः, वाक्पंडितः-विशारदः, सभापंडितः. **-ical,** a. वाक्चातुर्यमय (यी *f.*), सालंकार, वागलंकारमय. **-y,** s. वाग्मिता, वाक्पाटवं-चातुर्यं, सुवक्तृत्वं, वाक्शक्ति *f.*, वक्तृत्वं, सभापांडित्यं. 2 प्रार्थनागारं, उपासनास्थानं, भजनालयः. **-Oratorio,** s. तालबद्धं धर्मकीर्तनं. 2 **Oratory** q. v.

Orb, s. मंडलः-लं, बिंबः-बं, वर्तुलं, चक्रं, वृत्तं, गोलः-लं; 'the moon with entire (undiminished) o.' पूर्ण-अविकल-मंडलः चंद्रः, अखंडकलः शशी (Mal. 2). **-ed, -Orbicular,** a. मंडलाकार, वर्तुल, गोलाकृति. **-Orbiculate,** s. वर्तुलं. -a. वर्तुल; *See* (s.).

Orbit, s. कक्षा-क्षः, ग्रहपथः-मार्गः.

Orchard, s. वाटिका, वाटः-टी, उपवनं, वृक्षोद्यानं, वृक्षवाटिका; 'fruit o.' पुष्पवाटिका.

Orchestra, s. वादित्रस्थानं-स्थलं. 2 वादकसमूहः, वादित्रगणः.

Ordain, *v. t.* वि-धा 3 U, आदिश् 6 P, निर्दिश्, संव्यव-स्था c. (स्थापयति), प्र-परि-क्लृप् c.: प्रचुद् 10, वच् 2 P, स्मृ 1 P; 'o. ed by *Sastras*' शास्त्रोक्त, शास्त्रविहित-स्मृत, शास्त्रनिर्दिष्ट, &c. 2 (अधिकारे) नियुज् 7 A, 10, अधिकृ 8 U, or c., अभिषिच् 6 P, व्या-दिश्, (religiously) दीक्ष् 1 A, धर्मकर्मणि नियुज्. **-er,** s. प्रकल्पकः, संस्थापकः, प्रचोदकः.

Ordeal, s. दिव्यं, सत्यं, परीक्षा, प्रमाणं; 'o. by fire' कोशः-षः, तप्तदिव्यं; 'subjecting oneself to o.' दिव्यग्रहणं; 'trying o.' (fig.) तत्त्वनिकषा आपद्.

Order, *v. t.* आदिश् 6 P, निर्-नि-समा-व्या-दिश्, शास् 2 P, आ-ज्ञा c. (ज्ञापयति), प्रचुद् 10. 2 वि-धा 3 U, प्रणी 1 P, निर्वह् c.; *See* **Manage.** 3 परिक्लृप् c., क्रमेण विन्यस् 4 U or c. or स्था c. (स्थापयति) or नि-धा, संवि-धा, व्यव-स्था c., वि-,रच् 10;

व्यूह् 1 U. 4 **Ordain**, q. v. -*s.* आज्ञा, आ-नि-देशः, निर्देशः, शासनं, नियोगः; ' written o. ' आज्ञापत्रं; ' what are your o. s ' को नियोगोऽनुष्ठीयतां; ' your Majesty's o. s will be obeyed ' यथाज्ञापयति देवः. 2 प्र-,चोदनं-ना, विधिः, नियमः, विधानं, प्रेरणा, वचनं. 3 क्रमः, अनुक्रमः, परिपाटि-टी *f.*, आनुपूर्व्य-र्वी, पर्यायः, परंपरा, पारंपर्यं, आवृत् *f.*; व्यवस्था, विन्यासः, विरचनं-ना, संविधानं; ' natural o. ' आनुलोम्यं; 'inverted o.' ' reverse o. ' प्रातिलोम्यं, व्युत्क्रमः, व्यतिक्रमः, विपर्ययः, विपर्यासः, व्यत्यासः, व्यत्ययः; ' o. of battle ' व्यूहः, सैन्यरचना, बलविन्यासः; ' natural o. of words ' अन्वयः; ' in natural or direct o.' अनुलोमं-मतः; 'in inverted o. ' प्रतिलोमं-मतः; in good o. ' सुस्थित, सुरक्षित, सुविहित; 'in o. ' सुविन्यस्त, सुविरचित, व्यवस्थित, क्रमेण स्थापित; (*adv.*) क्रमेण, क्रमशः, यथाक्रमं, क्रमानुरूपं, अनुपूर्वशः, आनुपूर्व्येण, परिपाट्या; ' in o. to' ex. by अर्थं-र्थे in comp.; by dat. or by inf.; ' out of o. ' अव्यवस्थित, भग्नक्रम, अस्वस्थ. 3 मार्गः, स्थिति *f.*, रीति *f.*, पद्धति *f.*, आचारः, नियमः; 'not breaking the (established) o. ' स्थितेरभेत्ता (R. III. 27) स्थित्यै दंडयतो दंड्यान् (R. I. 25) ' for maintaining o. &c.'; 'breaking the o. ' स्थितिभेदः, अतिपातः, पर्ययः, उपात्ययः. 5 गणः, वर्गः, वर्णः, जाति *f.*; ' the lower o. s ' अवर-अधम-वर्णाः, अंत्यवर्गः, अधमजातीयाः. 6 आश्रमः, वर्णाश्रमः; ' head of a religious o. ' आश्रमगुरुः. **-er**, *s.* आज्ञापकः, आदेष्टृ *m.*; शास्तृ *m.* **-less**, *a.* क्रमहीन,शून्य, अक्रम, अनवस्थित. **-ly**, *a.* व्यवस्थित, यथाक्रम, क्रमानुगत, सक्रम, अनुपूर्व. -*adv.* यथाक्रमं, पर्यायेण, क्रमशः.

Ordinal, *a.* क्रमवाचक. -*s.* क्रमिकसंख्या. 2 विधिसंहिता.

Ordinance, *s.* विधिः, मर्यादा, कल्पः, प्र-,चोदनं-ना, स्थिति *f.*, धर्मशास्त्रविधिः-मर्यादा, नियमः, सूत्रं. 2 नि-आ-देशः, शासनं, नियोगः.

Ordinary, *a.* प्रचलित, प्रसिद्ध, प्रायिक (की *f.*), लोकप्रसिद्ध. 2 साधारण (णी *f.*), सामान्य, व्य(व्या)वहारिक-आचारिक-नैयमिक-(की *f.*), नित्य, यथाव्यवहार, यथापद्धति; ' something more than o. ' विशेषः. 3 सामान्य, मध्यम, प्राकृत, अवर, नीतिविशिष्ट; ' an o. woman ' नातिरूपवती स्त्री, सामान्यलावण्योपेता. -*s.* धर्माध्यक्षः. 3 साधारणभोजनस्थानं. **-ily**, *adv.* सामान्यतः, साधारणतः, प्रायः, प्रायेण, प्रायशः.

Ordinate, *a.* यथानुक्रम, अनुपूर्व. **-ion**, *s.* विधानं, कल्पनं, नियोगः. 2 दीक्षा; *See* **Ordain.**

Ordnance, *s.* युद्धास्त्रसामग्री, युद्धयंत्रसमूहः.

Ordure, *s.* पुरीषं, विष्ठा, उच्चारः; *See* **Dung**; ' to void o. ' पुरीषं उत्सृज् 6 P or उच्चर् 1 P.

Ore, *s.* धातुः, खनिज-असंस्कृत-धातुः.

Organ, *s.* इंद्रियं, करणं, हृषीकं, विषयिन् *n.*; (of action) साधनं, करणं, उपकरणं, कर्मसाधनं, कर्मेंद्रियं; ' intellectual or internal o. ' धींद्रियं, अंतरिंद्रियं. 2 द्वारं, मुखं, साधनं. 3 वंशी. **-ic,-ical**, *a.* इंद्रियसंबंधिन्, इंद्रियमय (यी *f.*)-विशिष्ट, इंद्रियोत्पन्न, सकरण; इंद्रिय in comp. **-ism**, *s.* रचना, घटना. **-ist**, *s.* वंशीवादकः **-Organize**, *v. t.* निर्मा 3 A, 2 P, सृज् 6 P, क्लृप् c., वि-रच् 10, घट् c. (घटयति). 2 वि-धा 3 U, संवि-धा, विन्यस् 4 U, क्रमेण स्था c. (स्थापयति), व्यव-स्था c., व्यूह् 1 U. 3 इंद्रियैः संयुज् 7 U, 10. **-ation**, *s.* निर्माणं, सृष्टि *f.*, घटनं-ना, विन्यासः, व्यूहः-हनं, संविधानं. 2 भागविरचनं-कल्पना-विन्यासः. 3 सेंद्रियता.

Orgasm, *s.* आ-सं-वेगः, क्षोभः, उत्तापः, अत्यंतावेगः.

Orgy, *s.* रात्र्युत्सवः, नैशोत्सवः, प्रहर्षः, प्रमोदः.

Orient, *a.* उज्ज्वल, भास्वत्; *See* **Bright.** 2 उद्यत्, उदयमान. -*s.* प्राची, पूर्वदेशः. **-al**, *a.* पौरस्त्य, प्राच्य, पूर्वदेशीय, पूर्व, प्राचीन. -*s.* पूर्वदेशवासिन् *m.* **-alist**, *s.* पूर्वदेशीयभाषाज्ञः.

Orifice, *s.* मुखं, छिद्रं, रंध्रं, द्वारं, सुषिरं, विवरं; ' o. of the ear ' ऋषभः.

Origin, *s.* मूलं, प्रभवः, आ-प्रा-रंभः, उत्पत्ति *f.*, उद्भवः, उद्गमः, संभवः, जन्मन् *n.*, जाति *f.*, आदिः, योनि *f.*, बीजं, हेतुः, आदिकारणं, उत्पत्तिस्थानं. 2 प्रयोजकः, प्रवर्तकः; ' of low o. ' हीनजाति-जन्मन्, दुर्योनि, ' of good o. ' मौल (ली *f.*), उत्कृष्टजाति. **-al**, *a.* मौल, प्रथम, आदिम, आद्य, पूर्व, आदि-मूल-in comp.; ' o. passage ' मूलं, मूलवचनं. 2 अपूर्व, अपूर्वकल्पित, अचिंतितपूर्व, स्वतः-स्वयं-कल्पित. 3 अपूर्वरचक, स्वतः कल्पक. -*s.* मूलं, आदर्शः, मूलपत्रं-ग्रंथः-लेखः; *See* (*s.*). **-ality**, *s.* अपूर्वरचनाशक्ति *f.*, कल्पकत्वं-त्ता, अपूर्वकल्पनासामर्थ्यं, कल्पनाशक्तिः. 2 अपूर्वता. **-ally**, *adv.* आदौ, प्रथमं, प्रथमतः, प्रारंभे, मूलतः. **-ate**, *v. t.* (प्रथमं) उत्पद् c., जन् c. (जनयति), उद्भू c., सृज् 6 P, क्लृप् c., प्रवृत् c., निर्मा 3 A; प्रारभ् 1 A, उपक्रम् 1 A. -*v. i.* (प्रथमं) उत्पद् 4 A, जन् 4 A,

प्र-उद्-सं-भू 1 P, प्रसू 1 P; उद्-इ 2 P, उद्-गम् 1 P, प्रवृत् 1 A, उत्था 1 P; ex. by (*s.*) or by 'Arise', q. v. **-ation,** *s.* प्रारंभः, प्रथमोद्भवः. **-ator,** *s.* प्रवर्तकः, उत्पादकः, कल्पकः, योजकः, आरंभकः, निर्मातृ *m.* also ex. by (*s.*)

Orion, *s.* मृगशीर्षं.

Orison, *s.* प्रार्थना, स्तवः, स्तुति *f.*, उपासना, स्तोत्रं.

Ornament, *s.* अलंकारः, वि-,भूषणं, आभरणं, मंडनं; (decoration) अलंकरणं भूषा, अलंक्रिया, संस्कारः, परिष्कारः, परिकर्मन् *n.*, प्रतिकर्मन् *n.* प्रसाधनं कल्पना, लज्जा, नेपथ्यं, शोभा; (fig.) ललामं, अवतंसः, अलंकारः, तिलकः; 'o. to the Kshatriya family' क्षत्रियकुलावतंसः; आश्रमललामभूता; पंडितकुलतिलकः &c. *-v. t.* अलंकृ 8 U, परिष्कृ, मंड् 10; भूष् 10, प्रसाध c., शुभ् c., रंज् c. **-al,** *a.* शोभावह, वि-,भूषक, शोभाप्रद, शोभा-भूषा-कर (री *f.*), अलंकरिष्णु; or by (*s.*). **-ally,** *adv.* विभूषणार्थं. **-ation,** *s.* अलंकरणं, मंडनं; रंजनं.

Ornate, *a.* कांतिमत्, विचित्र, शोभित, वि-,भूषित; सालंकार, अलंकारमय (यी *f.*), अलंकृत, कृतालंकार. **-ly,** *adv.* सालंकारं, शोभापूर्वं.

Ornithology, *s.* पक्षिविद्या. **-ist,** *s.* पक्षिविद्याज्ञः.

Orphan, *s.*, *a.* अनाथः, मातापितृरहितः-हीनः, गतमातृकः, गतपितृकः. **-age,** *s.* अनाथता. **2** अनाथाश्रयः, अनाथालयः.

Orpiment, *s.* (Yellow) पिंजरं, पीतनं, तालं, आ(अ)लं, हरितालकं.

Orrery, *s.* ग्रहमालानुकरणयंत्रं.

Orris, *s.* वचा, उग्रगंधा, षड्गंधा, गोलोमी, शतपर्णिका; (white) हैमवती, श्वेतवचा.

Orthodox, *a.* शास्त्रीय, शास्त्रसंमत, शास्त्रमतानुसारिन्, धर्मपरायण, सत्यधर्मानुरोधिन्. **-y,** *s.* शास्त्रानुसारः, शास्त्रमार्गावलंबनं, धर्मपरायणता.

Orthoepy, *s.* शुद्धोच्चारः-रणं. **-ist,** *s.* शुद्धोच्चारणविद् *m.*

Orthogon, *s.* समचतुरस्रं. **-al,** *a.* समकोणाकृति.

Orthography, *s.* अक्षर-वर्ण-विन्यासः, वर्णविन्यासशास्त्रं-विचारः.

Orts, *s.* *See* **Offal.**

Oscillate, *v. i.* दोलायते (D.), प्रेंख् 1 P, इतस्ततः चल् 1 P or कंप् 1 A or स्फुर् 6 P or स्पंद् 1 A; *See* **Waver. -ion,** *s.* आदोलनं, प्रेंखणं, इतस्ततः चलनं, गतागतं. **-ing,-ory,** *a.* दोलायमान, स्पंदमान, स्फुरित.

Oscitant, *a.* वि-,जृंभमाण, जृंभित. **2** निद्रालु, तंद्रालु. **-Oscitate,** *v. i.* वि-,जृंभ् 1 A.

Osprey, *s.* कुररः-री, उत्क्रोशः.

Osseous, *a.* अस्थिमय (यी *f.*). **-Ossicle,** *s.* अस्थिकं. **-Ossify,** *v. t.* अस्थिसात्कृ 8 U. *-v. i.* अस्थिसाद् भू 1 P. **-Ossuary,** *s.* अस्थिस्थानं.

Ostensible, *a.* व्यक्त, सुप्रकाश, प्रकट, प्रसिद्ध, अगूढ. **-Ostensibly,** *adv.* प्रकाशं-शतः, प्रकटं, अगूढं.

Ostentation, *s.* आडंबरः, दंभः, दर्पः, विकत्थनं, आत्मश्लाघा. **-Ostentatious,** *a.* आडंबर-प्रिय-शील, दंभशील, दांभिक (की *f.*); आत्मश्लाघिन्. **-ly,** *adv.* साडंबरं, दंभपूर्वं, सदंभं.

Osteocope, *s.* अस्थिवेदना.

Osteology, *s.* अस्थिवर्णनं-विद्या.

Ostler, *s.* *See* **Groom.**

Ostracise, *v. t.* वि-निर्-वस् c. **-Ostracism,** *s.* विवासनं, निर्वासनं.

Other, *a.* अन्य, अपर, इतर, पर, अन्यतर (*pron. a.*) अंतरं in comp. **2** भिन्न, व्यतिरिक्त. **3** अव-,शिष्ट 'the o. s' अपरे, अन्ये, इतरे, शिष्टजनाः; 'at o. times' अन्यदा; 'the o. day' अन्येद्युः, नातिचिरं. **-wise,** *adv.* अन्यथा, इतरथा. **2** वा, न-नो-चेत्, अन्यथा, अथवा.

Otiose, *a.* अनवहित, निरुत्साह, प्रमत्त, अव्यापृत.

Otter, *s.* उद्रः, जलमार्जारः.

Ought, *v.* Ex. by अर्ह् 1 P; gen. by pot. pass. part. or by pot.: *See* **Must.**

Ounce, *s.* टंकद्वयं, पणार्धं. **2** द्वीपिन् *m.*

Oust, *v. t.* निःसृ c., निष्कस् c., अपास् 4 U, निराकृ 8 U, बहिष्कृ; *See* **Dispel, Drive out.**

Out, *adv.* बहिः (with abl.); 'gone o.' बहिर्गत; (with verbs) ex. by निर्, वि, अप, प्र, बहिः; 'to be o.' प्रकाशतां गम् 1 P, प्रकाशीभू 1 P; 'the secret is o.' रहस्यं भिन्नं. **2** निर्वापित-*a.*; 'to be o.' प्रशम् 4 P, निर्वा 2 P; 'the lamp was o.' दीपः प्रशशाम-निर्ववौ. **3** क्षीण-विगत-अवसित-*a.* **4** अंतं-शेषं-यावत्, आ-अवसानात्; 'hear me o.' शृणु मे सावशेषं वचः (M. 4); 'let me speak o.' वचः समापयानि तावत्. **5** उच्चैः, उच्च-तार-स्वरेण, मुक्तकंठं. **6** व्यक्तं, प्रकटं, स्पष्टं, स्फुटं; 'o. upon (with) the thief' दूरीक्रियतां-निःसार्यतां-असौ चौरः; 'o. of' बहिः with abl., or by abl.; (among) मध्यात् with gen., or by gen. or loc.; (exclusion) ex. by अ, निर्, वि, अप, गत, नष्ट, त्यक्त in comp.; 'o. of the road' त्यक्त-भ्रष्ट-मार्ग; 'o. of one's mind' हत-नष्ट-बुद्धि, बुद्धिभ्रष्ट; 'o. of place' अस्थान, अनुचित;

'o. of order' उत्सूत्र, क्रमहीन, विधिविरुद्ध, अव्यवस्थित; 'o. of tune' अप-विस्वर; (showing motive) ex. by instr. or abl.; (beyond) अतीत, अगोचर in comp., अति pr.; 'o. of sight' नयनविषयातीत, दृग्गोचर, अंतर्हित; 'o. of one's reach' अविषय, अप्राप्य; 'o. of one's power' अतिशक्ति; 'o. of use' गत-लुप्त-व्यवहार, अव्यवहारित; 'o. of fashion' लोकाचारविरुद्ध: 'o of time' गतकाल, कालातीत; 'o. of hope' गताश, निराश; 'o. of man's strength' अतिमानुष; 'to pass o. of sight' नयनविषयं अति-इ 2 P or अतिक्रम् 1 U, 4 P; stand o. of hearing' श्रवणागोचरस्तिष्ठ; 'o. of employment' क्षीणवृत्ति, निर्व्यापार, नियोगहीन; 'o. of office' भ्रष्ट-च्युत-अधिकार, अधिकारभ्रष्ट-च्युत; 'o. of hand' सद्यः, सपदि; 'o.-door' द्वारबहिःस्थ, बहिःप्रदेशकृत; 'o.-house' उपगृहं, बहिर्गृहं. *-interj.* अपेहि, अपसर, धिक् (with acc.). **-er, -ermost,** *a.* बाह्य, बहिःस्थ, बहिर्भव, बहिर्वर्तिन्, बहिः in comp. **-most,** *a.* अतिबाह्य. **-ward,** *a.* बाह्य, बहिः in comp. 2 दृश्य, आविर्भूत, प्रकट, प्रकाश. 3 अवास्तव (वी *f.*), मिथ्या-मृषा in comp. *-adv.* (O. s) बहिः, बहिर्भागे-देशे. **-wardly,** *adv.* बाह्यतः, बहिः, बहिर्भागे. 2 अवस्तुतः, मृषा, मिथ्या, कृतकं, कृत्रिमं.

Out-act, *v. t.* अत्याचर् 1 P, अतिकृ 8 U.

Out-balance, *v. t. See* **Outweigh.**

Out-bid, *v. t.* अधिकमूल्यदानेन अभि-भू 1 P.

Outbreak, Outburst, *s.* उद्भेदः, निर्गमः, प्रादुर्भावः, उदयः, आस्फोटः.

Outcast, *s.* निष्कासितः, बहिष्कृतः, जातिबाह्यः-भ्रष्टः, जाति-वर्ण-पतितः, अपांक्तः, अपांक्तेयः, पतितः. 2 चं (चां)डालः, अपसदः, हीनजातिः-वर्णः, विहीनः, विवर्णः, नीच-अधम-वर्णः; *See* **Mean.**

Outcome, *s.* फलं, परिणामः, उदर्कः.

Outcry, *s.* उत्क्रोशः, आक्रोशः, कोलाहलः, कलकलः, तुमुलं, संहूति *f.*, उद्घोषः; 'popular o.' जनरवः संहूतिः. 2 आर्तनादः-रवः.

Outdo, *v. t.* अति-शी 2 A, अतिक्रम् 1 U, 4 P; *See* **Excel.**

Outfit, *s.* सज्जा, सामग्री, उपकरणसंभारः, परिच्छेदः.

Outgo, *v. t.* अति-इ 2 P, अतिचर् 1 P, अतिगम् 1 P. **-ing,** *s.* व्ययः, अपचयः, क्षयः, विनियोगः.

Outgrow, *v. t.* अतीत्य वृध् 1 A, अति-वृध्.

Outing, *s.* भ्रमणं, पर्यटनं, विहारः.

Outlander, *s.* वैदेशिकः.

Outlandish, *a.* विजातीय, विदेशीय, विदेशज, पर-अन्य-देशीय. 2 असंगत, ग्राम्य, अशिष्ट, असभ्य.

Outlaw, *s.* निषिद्धाग्न्युदकः, न्यायरक्षणबाह्यः. *-v. t.* न्यायाद् बहिष्कृ 8 U, अग्न्युदकदानं निषिध् 1 P.

Outlay, *s.* (द्रव्यादेः) व्ययः, अपचयः, विनियोगः; धनोत्सर्गः, द्रव्यव्ययः.

Outlet, *s.* द्वारं, मुखं, निर्गमः, परि(री)वाहः, जलोच्छ्वासः, निर्गमद्वारं; स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते (K. iv. 26) 'finds an o.' &c.

Outline, *s.* बाह्यले(रे)खा, आकारमात्रं, वस्तुमात्रं. 2 पांडुलेख्यं, चित्रारंभः. 3 स्थूलवर्णनं, असूक्ष्मविचारः.

Outlive, *v. t.* अति-जीव् 1 P.

Outlook, *s.* अवेक्षणं, अवेक्षा.

Outlying, *a.* दूरस्थ. 2 असंसक्त.

Outmanœuvre, *v. t.* अभि-भू 1 P, अति-रिच् 7 U.

Outmarch, *v. i.* अग्रे या 2 P, अति-या.

Outnumber, *v. t.* संख्यया अति-शी 2 A, अधिकसंख्य-*a.* भू 1 P, अधिकीभू.

Outpour, *v. t.* वृष् 1 P, निषिच् 6 P, उत्सृज् 6 P. *-s.*, **-ing,** *s.*, वर्षः-र्षण, उत्सर्गः.

Output, *s.* फलं, उत्पन्नं, लाभः.

Outrage, *s.* साहसं, आधर्षः-र्षणं, बलात्कारः, अन्यायः, अत्याचारः, उपमर्दः, उपद्रवः, अभि-,द्रोहः, उपघातः, प्रमाथः, मर्यादातिक्रमः. 2 न्यक्कारः, धिक्कारः, अवलेपः, उत्सेकः. *-v. t.* कलंकयति (D.); (a woman) सतीत्वाद् भ्रंश् c. or च्यु c., दुष् c. (दूषयति), आधृष् c.; उपमृद् c., प्रमंथ् 9 P or c., उपद्रु 1 P, अभिद्रुह् 4 P, न्यक्कृ 8 U, धिक्कृ; *See* **Insult** also. **-ous,** *a.* दारुण, घोर, उग्र, अतिदुष्ट, उच्चंड, प्रमाथिन्, अतिसाहसिक (की *f.*), राक्षस (सी *f.*), निर्लज्ज, वीतत्रप, अतिदुराचार. **-ously,** *adv.* घोरं, दारुणं, अत्याचारपूर्वं, अतिसाहसेन. **-ousness,** *s.* दारुणता, &c.

Outreach, *v. t.* अतिगम् 1 P, अति-इ 2 P.

Outrider, *s.* अश्वारूढः परिचरः.

Outright, *adv.* सद्यः, सपदि, तत्क्षणं-णे, अविलंबितं. 2 सर्वथा, साद्यंतं, सम्यक्, सु-अति pr. 3 स्पष्टं, व्यक्तं, अवक्रं.

Outroot, *v. t. See* **Eradicate.**

Outrun, *v. t.* अतिधाव् 1 P, धावने अति-शी 2 A.

Outset, Outstart, *s.* प्रारंभः, उप-प्र-क्रमः, आदिः, उपोद्घातः; 'at the very o.' प्रथममेव, आदावेव, उपोद्घातरूपेण.

Outshine, *v. t.* अधिकं प्रकाश् 1 A or द्युत् 1 A, अति-शुभ् 1 A or रुच् 1 A.

Outside, *s.* बहिर्भागः, बहिःप्रदेशः, बाह्यभागः; oft. by बहिः, 'charming on the o. only' बहिरेव मनोरम. 2 परमावधिः. *–adv.* बहिः (with abl.), बहिर्भागे. *–a.* बाह्य, बहिस्थ, बहिः in comp. **–er,** *s.* बहिर्देशवासिन् *m.*, अन्यदेशीयः, पारदेशिकः; *See* **Foreigner.**

Outskirt, *s.* उपांतः, पर्यंतः, सीमा, परिसरः, प्रांतः, उत्संगः; 'o. of a village' ग्रामांतः, उपकंठं; 'o. of a forest' वनांतः.

Outspoken, *a.* स्पष्ट-स्फुट-वादिन्, स्फुटवक्तृ; *See* **Candid, Frank.**

Outspread, *v. t.* विस्तृ c., प्र-वि-सृ c., वितन् 8 U.

Outstanding, *a.* अशोधित, अनिष्पन्न, अनिस्तीर्ण.

Outstretch, *v. t.* प्र-सृ c., उच्छ्रि 1 U or c.; oft. by उत् in comp.; 'with the neck o. ed' उत्कंधर, 'with hands o. ed as far as the wrist' आपूर्वभागोत्थितैः करतलैः (S. 4).

Outstrip, *v. t.* अति-इ 2 P, अतिक्रम् 1 U, 4 P. अतिवृत् 1 A, अतिचर् 1 P, लंघ् 1 A, 10; oft. by अति in comp. 'o. s the senses' इंद्रियगोचरो न वर्तते, अतींद्रियः.

Outvie, *v. t. See* **Excel.**

Outweigh, *v. t.* भारेण-भारतः-अतिरिच् pass. (with abl.), अधिकभारीभू 1 P; (Excel, q. v.).

Outwit, *v. t.* प्र-तृ c., वंच् 10, वि-प्र-लभ् 1 A; *See* **Cheat.**

Oval, Ovate, *a.* अंडाकार, अंडाकृति. *–s.* अंडाकारः, अंडाकृति *f.*, कक्षा-क्षः.

Ovarious, *a.* अंडयुक्त, अंडरूप. **–Ovary,** *s.* अंडाशयः.

Ovation, *s.* लोक-संभावना-सत्कारः.

Oven, *s.* चुल्लि-ल्ली *f.*, कंदु *m. f.*, आपाकः, उखा.

Pecuniary, *a.* अर्थ-धन-द्रव्य-in comp. 'p. loss' अर्थहानिः; 'p. difficulty' अर्थकृच्छ्रं. 2 धन-द्रव्य-रूप, अर्थात्मक.

Pedagogue, *s.* बालशिक्षकः-पाठकः. 2 **Pedant,** q. v.

Pedal, *a.* पादविषयक, पादसंबंधिन्.

Pedant, *s.* पंडितंमन्यः, पंडितमानिन् *m.*, विद्यागर्वितः. **-ic,-ical,** *a.* पांडित्यदर्शिन्, समुद्धत. **-ically,** *adv.* विद्याभिमानेन. **-ry,** *s.* विद्यावलेपः, पांडित्यदर्पः, दंभार्थं पांडित्यदर्शनं.

Peddler, *s. See* **Pedler.**

Pedsstal, *s.* (स्तंभादेः) पादः, आधारः; स्तंभतलं, फलकः

Pedestrian, *s.* पदातिः, पादचारिन् *m.*, प-(पा)दगः, पादातः; *See* **Foot-soldier.** *-a.* पादग, पादचारिन्-गामिन्, पाद in comp. **-ism,** *s.* पादचारः, पादगमनं.

Pedicle, Pedicel, *s.* मंजरि-री *f.* **2** वृंतं, प्रसवबंधनं.

Pedicular, *a.* यूकापूर्ण.

Pedicure, *s.* पादरोगवैद्यः. **2** पादावेक्षा.

Pedigree, *s.* वंशावलि-ली *f.*, अन्वयः, वंशः, कुलं. **2** वंशावलिपत्रं, वंशचरितं.

Pedler, *s.* (भ्रमन्) भांडवाहः, क्षुद्रद्रव्यविक्रयिन् *m.*

Peduncle, *s.* वृंतं, प्रसव-पुष्प-बंधनं.

Peel, *s.* त्वच् *f.*, वल्कं, चर्मन् *n.*, शल्कं. *-v. t.* त्वचं अप-नी 1 P or निष्कुष् 1 P or निर्लुंच् 1 P, त्वचयति (D.), निस्त्वचीकृ 8 U, त्वक्ष् 1 P. *-v. i.* निस्त्वचीभू 1 P. **-ing,** *s.* त्वक्षणं, त्वग्निष्कर्षः.

Peep, *v. i.* जालमार्गेण दृश् 1 P or वीक्ष् 1 A, प्रच्छन्नं ईक्ष्, सूक्ष्मं निरूप् 10; जालांतरप्रेषितदृष्टिरन्या (R. vii. 9) 'another p. ing through a window.' **2** शनैः उद्-गम् 1 P or उद्-इ 2 P or प्र-निर्-भा 2 P, प्रकाश् 1 A, दृश्-लक्ष्-pass., प्रादुः-आविः-भू 1 P. **3** विरु 2 P, कूज् 1 P. *-s.* जालमार्गेण वीक्षणं, सूक्ष्मनिरूपणं-वीक्षणं-दृष्टिः *f.* **2** पूर्व-प्रथम-दर्शनं-आलोकः-प्रकाशनं; 'p.-hole' जालमार्गः-रंध्रं, सूक्ष्मरंध्रं, जालांतरं.

Peer, *s.* वयस्यः, सहायः, तुल्यः; तुल्य-समपदस्थः. **2** कुलीनः, अभिजातः, शिष्टजनः. *-v. i.* **Appear,** q. v. **2 Peep,** q. v. **-er,** *s.* सूक्ष्मनिरूपकः. **-ess,** *s.* कुलीना. **-less,** *a.* अतुल, अनुपम, अप्रतिम; *See* **Matchless.**

Peevish, *a.* पिशुन, प्रतीप, वक्र, वक्र-वामशील, दुःशील, कर्कश, रूक्षभाव, दुष्टप्रकृति. **2** कलहप्रिय, कोपन. **-ly,** *adv.* प्रतीपं, वक्रभावेन. **-ness,** *s.* पैशुन्यं, वक्रभावः-शीलं, रूक्षस्वभावः, दुःशीलता, कार्कश्यं.

Peewit, *s. See* **Lapwing.**

Peg, *s.* नागदंतः, भारयष्टि *f.*, विहंगिका; 'p. of a lute' कूणिका; 'iron p.' कीलः-लकः. *-v. t.* नागदंते अवलंब् c. or बंध् 9 P.

Pelf, *s.* अन्यायार्जितं धनं.

Pell, *s. See* **Skin,** or **Hide** *s.*

Pellet, *s. See* **Pill.**

Pellicle, *s.* तनुत्वच् *f.*, सूक्ष्मचर्मन् *n.*, पटलं, पुटः-टं.

Pell-Mell, *adv.* संकुलं, संकीर्णं, क्रमं विना.

Pellucid, *a.* स्वच्छ, निर्-वि-मल, विशद, प्रसन्न, शुद्ध. **-ity,** *s.* **-ness,** *s.* स्वच्छता, निर्मलता, वैशद्यं, प्रसादः.

Pelt, *v. t.* (लोष्टैः) प्रहृ 1 P, तड् 10, अभि-, हन् 2 P, आहन् 2 U; 'he was p. ed to death' लोष्टघातं हतः. **3** तीव्रं-चलवत्-वृष् 1 P, धारासारेण वृष्; 'there was a p. ing shower of rain' धारासारेण महती वृष्टिर्बभूव (H. 3). *-s.* चर्मन् *n.*, दृति *f.*, कृत्ति *f.* **2** प्रहारः, आघातः

Pelvis, *s.* बस्तिदेशः.

Pen, *v. t.* लिख् 6 P, पत्रे निविश् c. **2** (व्रजे) नि-अव-रुध् 7 U. *-s.* लेखनी, कलमः, अक्षरतूलिका, तूलिका, वर्णिका (painter's p.). **2** व्रजः, अवरोधः; 'cow-p.' गोशाला, गोष्ठं; 'p.-man' लिपिज्ञः, लेखकः, लेखनकुशलः; 'p.-manship.' लिपि *f.*, लेखनविद्या, लेखनचातुर्य-कौशलं. **-Pent,** (up) *a.* नि-अव-रुद्ध; 'p. house' उपगृहं.

Penal, *a.* दंडार्ह, दंडनीय, दंड्य. **2** दंडविषयक. **-ty,** *s.* दंडः, निग्रहः, शासनं. **2** साहसं, अर्थ-धन-दंडः.

Penance, *s.* तपस् *n.*, तपस्या, तपश्चर्या, कृच्छ्रं, यमः, कायक्लेशः; 'imposed p.' प्रायश्चित्तं; 'practise p.' तपः तप् 4 A or आचर् 1 P, तपस्यति (D).

Penchant, *s. See* **Inclination.**

Pencil, *s.* तूलिका, तूलि *f.*, वर्तिका, ईषिका; लेखनी. *-v. t.* लिख् 6 P, वर्तिकया लिख् or अंक् 10.

Pendant, *s.* कर्णावतंसः, कुंडलं, प्रालंबः, लोलकः.

Pendent, *s.* वि-,लोल, चल, प्रलंबमान, प्रलंब, आलंबिन्, आ-प्र-लंबित.

Pending, *a.* अनिर्णीत, अनिश्चित, अनिष्पन्न; 'p. the decision' यावन्निर्णयो न क्रियते.

Pendulous, *a.* प्र-,लंब, लंबिन्, लंबित, लोल.

Pendulum, *s.* लोलकः, लोलदंडः.

Penetrate, *v. t.* प्र-आ-विश् 6 P, निर्-,भिद् 7 P, व्यध् 4 P, छिद् 7 P, गाह् 1 A (forest &c.); निखन् 1 P. **2** व्याप् 5 P, मुर्छ् 1 P, (छाया न मूर्च्छति मलोपहतप्रसादे दर्पणतले S. 7). **3** अर्थं बुध् 1 P or ज्ञा 9 U, आशयं ग्रह् 9 U. **-ion,** *s.* प्रवेशः-शनं, भेदः-दनं, वेधः-धनं. **2** व्याप्ति *f.*, मूर्च्छनं. **3** अर्थबोधः, अर्थ-आशय-ज्ञानं. **4** (Power of p.) ग्रहणसामर्थ्यं, कुशाग्र-सूक्ष्म-मति *f.* or बुद्धि *f.*, तीक्ष्ण or सूक्ष्म-बुद्धित्वं or मतित्वं, वैदग्ध्यं; 'a man of p.' सूक्ष्ममतिः, कुशाग्रबुद्धिः, विदग्धः, मर्मज्ञः मार्मिकः. **-ing, -ive,** *a.* प्रवेशक, भेदिन्,

वेधिन्, भेदक. 2 व्यापक, व्यापिन्. 3 सूक्ष्म or तीक्ष्ण-मति or बुद्धि, कुशाग्रमति-बुद्धि, विदग्ध, मर्मज्ञ, मर्मवेदिन्.

Peninsula, *s.* द्वीपकल्पः-ल्पं. **-r,** *a.* द्वीपकल्परूप; द्वीपकल्पस्थ.

Penis, *s.* लिंगं, उपस्थः, शिश्नः, मेढ्रः, मेहनं, शेफस् *n.*, चर्मदंडः.

Penitent, *a.* अनुशयिन्, अनुतापदग्ध, जात-कृत-अनुताप. **-ial,** *a.* अनुतापजनित, अनुशयार्थक, पश्चात्तापरूप. **-iary,** *s.* प्रायश्चित्तागारं, कारावासः. **-ly,** *adv.* सानुशयं, सपश्चात्तापं. **-Penitence,** *s.* अनुतापः, पश्चात्तापः, अनुशयः, अनुशोकः; *See* **Repentance.**

Pennant, Pennon, *s.* ध्वजः, पताका, केतुवसनं; *See* **Banner,** **-Pennate,** *a.* सपक्ष, पक्षयुक्त.

Penny, *s.* मुद्रा. **-Penniless,** *a.* अकिंचन, निर्धन; *See* **Poor.**

Pensile, *a.* *See* **Pendent.**

Pension, *s.* (भूत-पूर्व-सेवार्थं) वृत्ति *f.*, वेतनं, वार्षिकं. **-*v. t.*** (भूत-पूर्व-सेवार्थं) वृत्तिं दा 3 U. **-er,** *s.* वृत्तिभुज् *m.*, वृत्तिभोगिन् *m.*

Pensive, *a.* चिंता or ध्यान-पर or परायण, सचिंत, चिंताक्रांत, उन्मनस्क, उदासीन; 'in a p. mood' सचिंतवृत्त्या, गंभीरं. **-ly,** *adv.* सचिंतं, ध्यानपूर्वं. **-ness,** *s.* ध्यानपरता, विषादः, खेदः.

Pentachord, *s.* पंचतंत्रीवाद्यं.

Pentagon, *s.* पंचभुजः. **-al,** *a.* पंचकोण, पंचभुज.

Pentangular, *a.* पंचकोण, पंचास्र.

Penult, *s.* उपांत्याक्षरं. **-imate,** *a.* उपांत्य; 'p. letter' उपधा, उपांत्यं.

Penumbra, *s.* खंडच्छाया.

Penury, *s.* दारिद्र्यं, निर्धनता, दुर्गति *f.* **-ious,** *a.* दीन, निर्धन, निःस्व; *See* **Poor.** 2 कृपण, क्षुद्र, कदर्य; *See* **Miserly.**

Peon, *s.* भृत्यः, पदातिः; *See* **Servant.**

People, *s.* जनः, लोकः, प्रजा, (pl. also); जनता, देशवासिनः, प्रकृतयः (pl.); 'country p.' ग्रामीणाः, ग्रामीयजनः, जानपदाः; 'common p.' प्राकृताः, इतरे-पृथग्-जनाः, सामान्य or प्राकृत-जनाः or लोकाः. 2 वर्गः, गणः, वर्णः, जनः, लोकः. 3 सेवकजनः-गणः, परिवारः. **-*v. t.*** जनैः पूर् 10 or आकॄ 6 P, वस् c.

Pepper, *s.* मरी(रि)चं, कालकं, वेल्लजं, कृष्णं, ऊषणं, धर्मपत्तनं; 'long p.' पिप्पली; *See* under **Long.** **-*v. t.*** अवकॄ 6 P.

Pepsin, *s.* जाठररसाविकारः.

Peptic, *a.* पाचक, पाचन, दीपन, अग्निद.

Peracute, *a.* अतितीक्ष्ण, अतितीव्र.

Peradventure, *adv.* कदापि, कदाचित्, दैवात्, दैववशात्.

Perambulate, *v. t.* परि-इ 2 P, परिक्रम् 1 U, 4 P, परिभ्रम् 1, 4 P, पर्यट् 1 P, परि-सृ-गम् 1 P; इतस्ततः चल्-चर् 1 P. **-ion,** *s.* परिक्रमः-मणं, परिभ्रमणं, पर्यटनं.

Per annum, *adv.* प्रतिवर्षं, प्रतिवत्सरं.

Perceive, *v. t.* उपलभ् 1 A, ज्ञा 9 U, वि-भू c., बुध् 1 P, ग्रह् 9 U. अवगम् 1 P, अव-इ 2 P, अनुभू 1 P, विद् 2 P; *See* **Know.** **2** (By the eye) दृश् 1 P, ईक्ष् 1 A, निरूप् 10, आ-,लक्ष् 10, आलोक् 1 A, 10; *See* **See.** **-ed,** *a.* ज्ञात, विदित, उपलब्ध, गोचर; 'p. by the senses' इंद्रियगोचर. **-er,** *s.* लक्षकः. **-Perceptible,** *a.* वेद्य, उपलभ्य, प्रत्यक्ष, दृष्टिगोचर, व्यक्त, परिस्फुट, सुस्पष्ट; oft. by विषय, गोचर, ग्राह्य in comp.; 'p. by the eye' प्रत्यक्ष, चक्षुर्ग्राह्य, दृष्टिगोचर; कर्णविषय, इंद्रियगोचर, &c. **-Perceptibly,** *adv.* प्रत्यक्षं, प्रत्यक्षतः. **Perception,** *s.* उपलब्धि *f.*, ग्रहणं; बोधः, अवगमनं, अनुभवः, वेदनं, विभावनं, ज्ञानं, व्यक्ति *f.* 2 (Power of p.) ग्राहकत्वं, ग्रहण-वेदन-शक्ति *f.*. विषयानुभवः, चैतन्यं, चिच्छक्ति *f.* **-Perceptive,-Percipient,** *a.* ग्रहणक्षम. ग्राहिन्, ग्राहक, विषयग्रहणसमर्थ, चेतन.

Per cent, *adv.* Ex. by उत्तर in comp; '5 p.' पंचोत्तरं शतं.

Perch, *s.* वासयष्टि *f.*. संडीनयष्टिः, यष्टिः, दंडः. **-*v. i.*** अध्यास् 2 A (with acc.), नि-ली 4 A, निषद् 1 P (with loc.); सं-शी 1 A (of birds.).

Perchance, *adv.* *See* **Perhaps.**

Percolate, *v. i.* कणशः-लवशः स्रु-क्षर्-गल् -1 P or स्यंद् 1 A. *v. t.* शुध् c., बिंदुक्रमेण-लवशः स्रु c. or गल् c. **-ion,** *s.* लवशः क्षरणं-स्रवणं-गलनं.

Percussion, *s.* समाघातः, संघट्टः, आ-प्रति-घातः.

Perdition, *s.* उच्छेदः, क्षयः, वि-प्र-नाशः. 2 अधोगति *f.*, अधःपातः, नरक-निरय-पातः; 'p. (ruin) seize thee' (cf. 'Murrain take thee') अकरणिः-अजीवनिः-अवग्राहः-निग्राहः-ते भूयात्.

Perdue, *a.* प्रच्छन्न, गूढ.

Perdurable, *a.* चिरस्थायिन्.

Peregrinate,-ion, *See* **Travel.**

Peremptory, *a.* सुनिश्चित, निर्णीत, नियत; अविशंक्य, अवैकल्पिक (की *f.*), परिच्छिन्न, अवश्यक. 2 स्पष्ट, परिस्फुट, सुव्यक्त, भिन्नार्थ; 'p. order' अलंघनीयः-अनतिक्रमणीयः-आदेशः; 'the command of elderly persons is (to be considered as) p.' आज्ञा गुरूणां ह्यविचार-

णीया (R. xiv. 46). 3 दृढ-स्थिर-मति, सकृत्प्रवादिन्, दृढसंकल्प. **-ily**, *adv.* सुनिश्चितं, सुव्यक्तं, भिन्नार्थं, सुस्पष्टं, प्रावण्येन, दृढनिश्चयपूर्वं. **-iness**, *s.* स्पष्टता, दृढनिश्चयः, दृढता, अवितर्क्यता.

Perennial, *a.* वर्षावधि, वर्षस्थायिन् 2 नित्य, अक्षय्य, निरंतर, अविरत.

Perfect, *a.* सिद्ध, संपन्न, निष्पन्न, समाप्त, परिणत. 2 अशेष, समग्र, सकल, सं-परि-पूर्ण, समस्त, अविकल, अखंड, अक्षत, अन्यून, निर्दोष. 3 परम, उत्कृष्ट, विशिष्ट, उत्तम; निपुण, कुशल, अभिज्ञ, पारंगत, विशारद, प्रवीण, परिपक्व, संपन्न. 4 (In grammar) लिट्. **-***v. t.* साध् c., सिध् c. (साधयति), सं-निः-पद् c., परि-सं-पूर् 10, समाप् c., निर्वृत् c.; ex. by कृ 8 U with (*a.*). **-er**, *s.* संपादकः, साधकः. **-ion**, **-ness**, *s.* सिद्धि *f.*, संपन्नता, समग्रता, अखंडता, संपरि-पूर्णता, निष्पत्ति-समाप्ति- *f.* 2 परि-, पाकः, परिणति *f.*, पक्वावस्था, उत्कृष्टता, उत्कर्षः, विशिष्टता, प्रकर्षः, परा कोटिः-काष्ठा. 3 नैपुण्यं, संपन्नता, कौशलं, विज्ञानं, प्रावीण्यं. 4 गुणः, परम-उत्तम-गुणः, विशेषः, प्र-उत्-कर्षः. **-ive**, *a.* साधक, संपादक, समापक, सिद्धिकर (री *f.*). **-ly**, *adv.* सर्वथा, सर्वशः, साकल्येन; समग्रं, संपूर्णं, अशेषतः, निःशेषं.

Perfidy, *s.* विश्वासघातः-भंगः-भेदः, असत्यसंधता, प्रतिज्ञा-समय-भंगः; शत्रुसेवा, कापट्यं, वंचनं-ना. **-ious**, *a.* असत्यसंध, विश्वास or विश्रंभ-घातिन् or भेदिन्, भग्नप्रतिज्ञ, वंचक, शठ, मिथ्याचार, शत्रुसेविन्. 2 (Of acts) अनार्य. **-iously**, *adv.* विश्वासघातेन, शठवत्, कैतवेन.

Perforate, *v. t.* आ-,व्यध् 4 P, छिद्रयति (D.), निर्भिद् 7 P, उत्-समुत्-कॄ 6 P, (मणौ वज्रसमुत्कीर्णे R. i. 4); 'un-p. ed jewel' अनाविद्धं रत्नं (S. 2.) **-ed**, *a.* विद्ध, सच्छिद्र, उत्कीर्ण, सरंध्र, सुषिर. **-ion**, *s.* वेधः-धनं, निर्भेदः. 2 छिद्रं, रंध्रं, विवरं, सुषिरं. **-or**, *s.* वेधनिका, आविधः, आस्फोटनी.

Perforce, *adv.* बलात्, बलेन, प्रसभं, प्रसह्य, बलवत्, बलात्कारेण.

Perform, *v. t.* कृ 8 U, निर्वृत् c., आचर् 1 P, सं-निः-पद् c., साध् 5 P or c., वि-धा 3 U, अनु-ष्ठा 1 P, निर्वह् c.; (promise) पूर् 10, तॄ 1 P शुध् c., अपवृज् 10; (a sacrifice) आतन् 8 U, आहृ 1 P. 2 (On the stage) नट् 10, अभि-नी 1 P, प्रयुज् 7 A, 10; *See* **Act**; 'has not been (seen) p ed on the stage' न प्रयोगतो दृष्टं (Rat. 1). **-ance**, *s.* संपादनं, साधनं, करणं, विधानं. निर्वर्तनं. अनुष्ठानं, आचरणं. 2 कार्यं, कर्मन् *n.*, क्रिया, कृति *f.*, व्यापारः, चेष्टा, चेष्टितं, प्रवृत्ति *f.*, चरितं. 3 प्रयोगः, अभिनयः, नाटनं. **-er**, *s.* कर्तृ *m.*, संपादकः, निर्वर्तकः, अनुष्ठातृ *m.* निर्वाहकः. 2 (In dramas) अभिनेतृ *m.*, नटः; प्रयोजकः. 3 वादकः.

Perfume, *v. t.* अधि-, वास् 10, धूप् 1 P, 10, धूपेन वास्, सुरभीकृ 8 U, परिमलयति-आमोदयति- (D.), भू c. **-***s.* परिमलः, आमोदः, सुगंधः, सु-,वासः, सौरभं-भ्यं. 2 (Thing scented) गंधः, गंधद्रव्यं, गांधिकं. 3 (For the person) गात्रानुलेपनी; वर्ति *f.*, अनु-वि-लेपनं, वर्णकं; 'p. artificially made' कृत्रिम वृक-धूपः. **-ed**, *a.* सुवासित, सवास, सुरभीकृत, सामोद, धूपित, भावित. **-er**, *s.* गांधिकः, गंधोपजीविन् *m.*, गंधविक्रयिन् *m.* गंधवणिज् *m.*, गंधाजीवः. **-ery**, *s.* गंधद्रव्यं, गंधव्यापारः-विक्रयः. **-ing**, *s.* वासनं, भावनं. 2 (With unguents) चर्चा, चार्चिक्यं, अनु-वि-लेपनं, स्थासकः, अंगरागः.

Perfunctory, *a.* अनवहित, निरुत्साह, प्रमत्त, अनुत्कंठ; *See* **Negligent**. **-ily**, *adv.* अनवधानेन, निरुत्साहं. **-iness**, *s.* अनवधानं, अनास्था, निरुत्साहता.

Perhaps, *adv.* कदाचित्, दैवात्, कदापि, नु वा, किंस्वित्, स्यात्, or by pot.

Periapt, *s.* रक्षाकरंडः

Pericardium, *s.* हृदयकोशः, हृदाशयः.

Pericarp, *s.* बीजकोशः-गुप्ति *f.*

Pericranium, *s.* कपालावरणं.

Perigee, *s.* नीचतमं नेदिष्ठ-स्थानं.

Peril, *s.* भयं, शंका, संदेहः, संशयः. **-***v. t.* संशये पत् c. **-ous**, *a.* संदिग्ध, सशंक, भयहेतुक; *See* **Danger**, **Hazard**.

Period, *s.* समयः, कालः, वेला, कालावधिः, अंतरं, अवधिः, नियतकालः. 2 कालचक्र-पर्यायः-आवर्तः, वर्षचक्रं, युगं. 3 अंतः, अवसानं, विरामः. 4 पूर्णवाक्यं, वाक्योच्चयः, पूर्णविरामः; 'p. of life' वयः, वयोवस्था; 'last p.' चरमवयः, अंत्यावस्था. **-ic**, **-ical**, *a.* नित्य, अनुकालिक-नियतकालिक-सामयिक-(की *f.*). **-***s.* सामयिकपुस्तकं; 'a monthly p.' मासिकपुस्तकं. **-ically**, *adv.* काले काले, समयतः, कालानुरूपं, नियतकाले.

Periosteum, *s.* अस्थित्वच् *f.*

Peripatetic, *a.* इतस्ततः-भ्रमत्-भ्रमणशील.

Periphery, *s.* परिवेशः-षः, परिधिः, परिणाहः. 2 नेमि-मी *f.*, प्रधिः.

Periphrase, **Periphrasis**, *s.* वागुपचयः, वाग्विस्तरः, वाग्बाहुल्यं-प्रपंचः. **-***v. t.* प्रपंचयति (D.), वाग्विस्तरेण वर्ण् 10 or व्या-ख्या 2 P. **-Periphrastic**, *a.* बहुवाक्य, बहुपद; 'p. future' लुट्.

Perish, *v. i.* नश् 4 P, प्र-वि-°, क्षि-pass.; प्रमी 4 A, ध्वंस् 1 A, क्षयं-नाशं-लयं-गम्

1 P or इ-गा 2 P, प्र-वि-ली 4 A; मृ 6 A. व्यापद् 4 A; *See* **Die.** **-able,** *a.* वि-, नश्वर (री *f.*), विनाशधर्मन्, भंगुर, क्षयिन्, वि-,ध्वंसिन्, क्षयिष्णु, क्षय-नाश-शील, लयाधीन; 'p. in a moment' क्षणिक, क्षणभंगुर.

Peristyle, *s.* स्तंभपंक्ति-श्रेणी *f.*

Peritoneum, *s.* अंत्रवेष्टनं.

Perjure, *v. t.* साक्ष्ये मिथ्या-अनृतं वद् 1 P, मिथ्या शप् 1, 4 U, कूटसाक्ष्यं कृ 8 U. **-ed, -er,** *a., s.* कूटशपथकारिन्, मिथ्याशपथक, कूटसाक्षिन्. **-y,** *s.* कूट or मिथ्या साक्ष्यं or

Perk,-y, *a.* *See* **Saucy.** [शपनं.

Permanent, *a.* नित्य, स्थिर, नित्य-चिर-स्थायिन्, ध्रुव, अक्षय, स्थायिन्; *See* **Lasting.** **-ly,** *adv.* नित्यं, स्थिरं, ध्रुवं, शाश्वतं, सर्वकालं. **-Permanence,-cy,** *s.* स्थिरता, स्थायित्वं, ध्रुवता, नित्यता, अक्षयता, अनपायः, सनातनत्वं. 2 प्रतिष्ठा, स्थिति *f.*, (कुलस्य स्थित्यै K. 1. 18), (दशरथस्य कुलं प्रतिष्ठां गतं U. 5).

Permeate, *v. t.* व्याप् 5 P, व्यश् 5 A; *See* **Pervade.** 2 प्र-विश् 6 P, भिद् 7 P, गाह् 1 A. **-ion,** *s.* व्याप्ति *f.*, प्रवेशः, भेदनं. **-Permeable,** *a.* व्याप्य, भेद्य, प्रवेश्य.

Permit, *v. t.* अनु-ज्ञा 9 U, अनुमन् 4 A. अनुमुद् 1 A, आज्ञां दा 3 U. *See* **Allow.** **-s.** अनुज्ञा-अनुमति-पत्रं, अनुज्ञा. **-Permissible,** *a.* अनुज्ञेय, अनुमंतव्य, अनुज्ञार्ह. 2 धर्म्य, न्याय्य, ग्राह्य, युक्त; *See* **Lawful.** **-Permission,** *s.* अनुज्ञा, अनुमति *f.* -तं, अनुमोदनं; आदेशः, आज्ञा. **-Permissive,** *a.* अनुज्ञाप्रद, अनुमोदक; अनवश्यक.

Permute, *v. t.* वि-नि-मे 2 A, परि-वृत् 1 A. **-ation,** *s.* वि-,निमयः, परिवर्तः, परिवृत्ति *f.*, व्यतिहारः. 2 अंकपाशः.

Pernicious, *a.* घातक, अपकारक, वि-, नाशक, हिंस्र, हिंसक, अपकारिन्, दुष्ट, गर्ह्य; *See* **Injurious.** **-ly,** *adv.* सापकारं, सापायं, सनाशं.

Peroration, *s.* उपसंहारः.

Perpendicu'ar, *a.* लंब, लंबरूप; सरल, ऋजु, अकुटिल. **-s.** लंबः. **-ly,** *adv.* लंबरूपेण, सरलं, ऋजु.

Perpetrate, *v. t.* कृ 8 U, वि-धा 3 U, आचर् 1 P; *See* **Commit.**

Perpetual, *a* नित्य, सतत, शाश्वत (ती *f.*), अविच्छिन्न, अविरत, संतत, निरंतर, सनातन (नी *f.*), अनंत, नित्य-चिर-स्थायिन्. **-ly,** *adv.* नित्यं, सदा, नित्यशः, शाश्वतं, शश्वत्, सततं, अविरतं **-Perpetuity,** *s.* अविच्छेदः, नित्य-चिर-स्थायिता, आनंत्यं, नित्यता, अविरामः, नैरंतर्यं, अक्षयास्थिति *f.*, सनातनत्वं; 'to p.' शाश्वतीः समाः. **-Perpetuate,** *v. t.* स्थिरीकृ 8 U, कृ with (*a.*).

Perplex, *v. t.* मुह् *c.*, आकुलीकृ 8 U. सं-वि भ्रम् *c.* (भ्रमयति), मोहं-संभ्रमं-उत्पद् *c.* 2 संकुलीकृ, संकीर्णीकृ. क्लिश् 9 P; *See* **Embarrass. Confuse.** **-ed.** *a.* आ-व्याकुल, संभ्रांत, वि-,मूढ, कातर. व्यग्र, उद्विग्न. अधीर; व्याकुलचित्त, संभ्रांतमनस्, व्यस्त-मूढ-विक्षिप्त-चित्त. **-ing,** *a.* मोहक, संदिग्ध, भ्रम-मोह-कारिन्, मोहकर (री *f.*), मोहन, भ्रांतिजनन (नी *f.*); विषम. **-ity,** *s.* व्या-, मोहः, आ-व्या-कुलत्वं-ता. संभ्रमः. व्यग्रता, चित्तविक्षेपः, व्यस्तचित्तत्वं, चित्तवैक्लव्यं, संशयः, संदेहः.

Perquisite, *s.* अधिकलाभः. पुरस्कारः; *See* **Gift.**

Persecute, *v. t.* प्र-सं-बाध् 1 A, उप-द्रु 1 A, पीड् 10. उप-द्रु 1 P, क्लिश् 9 P, पीडार्थं अनुसृ 1 P, अभि-,द्रुह् 4 P. **-ion,** *s.* बाधा, उपद्रवः, उपप्लवः, पीडनं, अभिद्रोहः. **-or,** *s.* बाधकः, उपद्रवकारिन् *m.*

Persevere, *v. i.* मनः-चित्तं-अभिनिविश् *c.*, सदा प्रवृत् 1 A. अभियुज् *pass.*, अभिनिवेशेन सं-पद् *c.*, सततं प्रयत् 1 A. अनवरतं चेष्ट् 1 A, निर्बंधं कृ, साग्रहं प्रवृत्; 'p. in your opposition' स्थिरप्रतिषेधो भव (S. 2); 'he who p. s in good actions' सदाचारप्रवृत्तः. सदा सन्मार्गपत्यी. **-ance,** *s.* अभिनिवेशः, अध्यवसायः, उद्यमसातत्यं, दीर्घप्रयत्नः-उद्यमः-उद्योगः-उत्साहः, अतिनिर्बंधः, सदाभियोगः. 2 अनवरतचेष्टा, प्रवृत्ति *f.*, प्रसक्ति *f.*, धैर्यं. आग्रहः, उद्योगः, उद्यमः, व्यवसायः. **-ing,** *a.* अभियोगवत्-उद्यमिन्, अभिनिविष्ट, अध्यवसायिन्, दीर्घोद्योगिन्, सदाप्रवृत्त, उत्साहवत्.आग्रह-निर्बंध-शील, प्रसक्त, प्रसित. **-ingly,** *adv.* अभिनिवेशेन, दीर्घोद्योगेन, प्रसक्तं सोत्साहं, सनिर्बंधं.

Persist, *v. i.* साग्रहं प्रवृत् 1 A, अतिनिर्बंधेन आचर् 1 P. पर्यव-स्था 1 A; *See* below; 'do not p. in your wickedness' दुराचरितेषु मा ते निर्बंधो भूत्; *See* **Persevere.** **-ence,-cy** *s.* निर्बंधः, आग्रहः, अभिनिवेशः, पर्यवस्थानं, दृढाग्रहः. **-ent,** *a.* निर्बंधपर, साग्रह; *See* **Obstinate.** **-ently,** *adv.* साग्रहं. निर्बंधेन.

Person, *s.* पुरुषः, नरः, जनः, व्यक्ति *f.*; 'this p.' अयं जनः (referring to the speaker); 'a female p.' स्त्रीजनः. अंगनाजनः. 2 शरीरं, अंगं, वपुस् *n.*, देहः. कायः, तनु *f.*, गात्रं; *See* **Body.** 3 रूपं. आकारः, आकृति *f.*, मूर्ति *f.*; 'an enemy in the p. of Krishna' कृष्णरूपः शत्रुः. 4 पात्रं, भूमिका. 5 पुरुषः (in grammer). 'in p.' स्वयं, स्वतः, आत्मना, साक्षात्. प्रत्यक्षं. **-able,** *a.* सुरूप, सुगात्र (त्री *f.*),

शोभनाकार. **-age,** *s.* पुरुषः, जनः, नरः, व्यक्तिः. 2 श्रेष्ठ-विशिष्ट-जनः. **-al,** *a.* व्यक्तिगत, पुरुषविशेषानुबद्ध, विशिष्ट-जनोद्दिष्ट. 2 शारीरिक-दैहिक- (की *f.*), शरीर-अंग in comp.: 'p. beauty' अंगसौष्ठवं; 'p. graces' शरीरलावण्यं, 'p. union' शरीरसंबंधः; 'p. attendant' आसन्नपरिचारकः; 'p. attendance' शरीर-चर्या-शुश्रूषा. 3 स्वयंकृत, स्व-आत्म-कृत, साक्षात्कृत. 4 आत्मन्, स्व. निज in comp.; 'for p. profit' आत्म-स्व-हिताय; 'p. experience' स्वानुभवः 5 पुरुष-व्यक्ति-वाचिन्, पुरुष in comp. 6 अस्थावर, जंगम. **-ality.** *s.* व्यक्तिगताक्षेपः; विशेष-व्यक्ति-निर्देशः, व्यक्त्युद्देशः, व्यक्तिसंस्पर्शः. 2 व्यक्तिः, पृथक्त्वं, स्वत्वं. **-ally,** *adv.* स्वयं, स्वतः, प्रत्यक्षं-क्षतः, साक्षात्. 2 व्यक्तितः, पृथक्. **-Personate,** *v. t.* रूपं-वेषं ग्रह् 9 U or धृ 1 P, 10 or आ-स्था 1 U (with gen.), छद्म-कूटं-कृ 8 U; oft. ex. by वेश or रूप in comp., or by denom.; 'p. ing Nala' नलरूपमास्थाय, नलरूपः, नलवेशधारिन् 'p. as king' नृपायते, राजानति. 2 अभि-नी 1 P, नट् 10, रूप् 10. **-ion,** *s.* रूप-वेश-धारणं-ग्रहणं. 2 अभिनयः, नाटनं. **-or,** *s.* वेशधारिन्-भृत् *m.* 2 अभिनेतृ *m.* **-Personify,** *v. t.* चेतनत्वं-चेतनभावं-आरुह् c. (रोपयति), (अचेतने) चेतनवदुपचर् 1 P, (अचेतनेपि चेतनवदुपचारदर्शनात् S. B.99). **-ed,** *a.* Ex. by मूर्ति *f.*, मूर्तशरीरिन्-*a.*, इव or साक्षात्. **-ication,** *s.* चेतनत्वारोपः, चेतनधर्मारोपः, मनुष्यगुणारोपः. उपचारः; oft. by इव, साक्षात्; 'p. of virtue' साक्षात्-मूर्तिमान्-धर्मः; *See* **Embodied.**

Personnel, *s.* कार्यकारिवर्गं..

Perspicacious, *a.* तीक्ष्ण-सूक्ष्म-दृष्टि, सूक्ष्म-दर्शिन्. 2 तीक्ष्ण or सूक्ष्म-बुद्धि or मति, कुशाग्र-बुद्धि. **-ness, -Perspicacity,** *s.* सूक्ष्म-दृष्टित्वं, दृष्टिसूक्ष्मता, दृक्पाटवं. 2 सूक्ष्ममतित्वं.

Perspicuous, *a.* स्पष्ट, विशद, प्रसन्न, व्यक्त, सुप्रकाश, सुबोध. **-ly,** *adv.* स्पष्टं, विशदं, भिन्नार्थं. **-ness, -Perspicuity,** *s.* स्पष्टता, प्रसादः, वैशद्यं.

Perspire, *v. i.* प्र-,स्विद् 4 P. स्वेदं-घर्मं-स्रु c. **-v.** *t.* रोमद्वारा निःसृ c. or स्रु c., स्विद् c. **-ation,** *s.* स्वेदनं, घर्म-स्वेद-स्रावः. 2 स्वेदः, घर्मः, स्वेद-घर्म-जलं-बिंदुः-उदकं; 'excessive p.' प्रस्वेदः. **-ing,** *a.* सस्वेद, सघर्म, स्वेद-घर्म-स्राविन्. स्वेदित, स्विन्नः 'violently p.' प्रस्विन्न, भृशस्विद्.

Persuade, *v. t.* अनु-नी 1 P, प्रबुध् c., अनु-शास् 2 P. प्र-वृत् c., नियुज् 10, प्रोत्सह् c., आकृष् 1 P; oft. by causal of roots. 2 प्रति-इ c., प्रतीतिं-विश्वासं जन् c. (जनयति), संशयं-संदेहं-छिद् 7 P. *See* **Convince. -ed,** *a.* अनुनीत; जातनिश्चय-विश्वास, प्रतीत, छिन्नसंशय, जातप्रत्यय; 'I feel p.' इति मे प्रतीतिः, इति दृढं मन्ये. **-er.** *s.* प्रवर्तकः, प्रोत्साहकः, नियोजकः. **-Persuasion,** *s.* अनुनयः, अनुशासनं, उपदेशः, प्रवर्तनं, नियोजनं, प्रबोधः-धनं, प्रोत्साहनं. 2 संदेह-संशय-च्छेदः, शंकानिवृत्ति *f.*, दृढनिश्चयः, प्रत्ययः, निर्णयः. 3 मतं, मार्गः, पथिन् *m.*, संप्रदायः. **-Persuasive, Persuasory,** *a.* सानुनय, प्रवर्तक, प्रबोधक, अनुनायिन्, हृदयग्राहिन्, आकर्षिन्. 2 प्रत्ययकारिन्, संशयच्छिद्.

Pert, *a.* चपल, लघु; *See* **Lively. 2** धृष्ट, प्रगल्भ, अविनीत. **-ly,** *adv.* चापल्यात्, धृष्टतया, अविनयेन. **-ness,** *s.* चापल्यं, धार्ष्ट्यं, अविनयः.

Pertain, *v. i.* संबंध् pass., संबंधिन्-*a.* भू 1 P; *See* **Belong.**

Pertinacious, *a.* निर्बंधशील, आग्रहिन्, स्थिर-दृढ-प्रतिज्ञ; धीर, दृढ. **-ly,** *adv.* सनिर्बंधं, साग्रहं. **-ness, -Pertinacity,** *s.* निर्बंधः, आग्रहः, अभिनिवेशः, दार्ढ्यं, धैर्यं; *See* **Obstinate, -cy.**

Pertinent, *a.* प्रास्ताविक (की *f.*), युक्त, यथायोग्य, उपपन्न, योग्य, प्रस्तावसदृश (शी *f.*); 'to be p.' उप-पद् 4 A, युज् pass. **-ly,** *adv.* युक्तं, उपपन्नं, यथोचितं, प्रसंगानुरूपं, प्रस्तावसदृशं. **-Petinence,-cy,** *s.* युक्तता, उपपत्ति *f.*, योग्यता, प्रसंगसंगति *f.*, याथार्थ्यं, प्रस्तुतानुसारः.

Perturb, *v. t.* सं-,क्षुभ् c., आकुलीकृ 8 U, उपहन् 2 P. वि-मुह् c.. व्यग्रीकृ, व्यस् 4 A, संकरीकृ; *See* **Confuse. -ation,** *s.* सं-, क्षोभः, व्यग्रता, उपप्लवः, व्या-,मोहः, आकुलत्वं, वैक्लव्यं, उद्वेगः. **-ed,** *a.* क्षुब्ध, आ-व्या-कुल, विक्लव, व्यग्र, परिप्लव, उद्विग्न, पर्याकुल.

Peruse, *v. t.* समग्रं पठ् 1 P or अधि-इ 2 A, निपुणं वच् c.; *See* **Read. -al,** *s.* अध्ययनं, पठनं, पारायणं.

Pervade, *v. t.* अभि-,व्याप् 5 P, वि-अश् 5 A, सर्वतः आक्रम् 1 U. 4 P or प्रविश् 6 P, वि-गाह् 1 A, मुर्च्छ् 1 P; मूर्च्छंत्यमी विकाराः ऐश्वर्यमत्तेषु (S. 5) 'p. (the minds of) those' &c., '(the freshness of) youth has p. ed her limbs' यौवनमंगेषु सन्नद्धं(S.1). **-ing, -Pervasive,** *a.* व्यापक, व्यापिन्; 'p. all things' सर्वग, सर्वव्यापिन्; 'p. the whole body' सर्वांगीण **-Pervasion,** *s.* अभिव्यापनं-व्याप्ति *f.*, आक्रमणं; मूर्च्छनं.

Perverse, *a.* वाम, कुटिल, प्रतीप, विपरीत, वक्र. प्रतिकूल, वि-प्रति-लोम. वक्र-वाम-शील, कुटिलमति, पिशुनः *See* **Obstinate. -ly,** *adv.* वामतया, कौटिल्येन, प्रतीपं, विपरीतं; वामशीलतया. **-ness,** *s.* प्रतीपता. वामता..

वैपरीत्यं, कौटिल्यं, दुष्टता, दौरात्म्यं, दुःशीलं.

Pervert, *v. t.* वि-कृ 8 U, परिवृत् *c.*, साचीकृ, विरूप् 10, विलोमीकृ, अन्यथा कृ; भ्रंश् *c.* विपर्यस् 4 U or *c.*, कलुषयति (D.), कलुषीकृ; दुष् *c.* (दूषयति), विपरिणम् *c.* (णमयति). **-er, -ing**, *s.*, *a.* विकारिन्, विपरिणामिन्, विपर्यासकारिन्. **-Perversion**, *s.* विकारः, विकृति *f.*, विक्रिया, विलोमत्वं, प्रतीपता, विपरिणामः, विपर्यासः, विपर्ययः, दूषणं, भ्रंशनं, साचीकरणं, कालुष्यं.

Pervious, *a.* व्याप्य, भेद्य, प्रवेश्य.

Pest, *s.* मारि-री *f.*, म(मा)रकः; (fig.) आधिः, कंटकः, उत्पातः, शल्यं; वामाः कुलस्याधयः (S. 4) 'are a p. to the family' 'p. of the people' लोककंटकः. **-er**, *v. t.* बाध् 1 A. पीड् 10. उपद्रु 1 A. *See* **Harass.** **-ilence**, *See* (*s.*) above. **-iferous, -ilential**, *a.* मरकावह, मारात्मक, घातुक, विनाशक, दूषक, बाधक, अपकारक, अपकारिन्, अनिष्टकर (री *f.*)

Pestle, *s.* मुस(श)लः-लं, अयोग्रं.

Pet, *s.* प्रेम-प्रीति-पात्रं, प्रेमास्पदं, क्रीडामृगः. 2 ईषत्कोपः, कोपावेशः. **-***a.* प्रिय, प्रेमास्पदीभूत, वल्लभ; *See* **Favourite.** **-***v. t.* लल् 10; *See* **Fondle.**

Petal, *s.* दलं. पत्रं. **-ed, -ous**, *a.* सदल, दलवत्.

Petition, *v. t.* अर्थ् 10 A, प्र-अभि°-, याच् 1 A; निविद् *c.*, वि-ज्ञा *c.* (ज्ञापयति). **-***s.* प्रार्थना, याच्ञा, निवेदनं, विज्ञप्ति *f.*, विज्ञापना. 2 (Written) विज्ञप्तिः, प्रार्थना-निवेदन-पत्रं. **-er**, *s.* प्रार्थकः, प्रार्थयितृ *m.*, अर्थिन् *m.*, याचकः, निवेदकः; 'ascertain who are the p.s' ज्ञायतां कः कः कार्यार्थीति (Mr. 9).

Petrify, *v. t.* पाषाणी-प्रस्तरी-कृ 8 U, कठिनीकृ, जडीकृ, संस्तंभ् *c.*; 'p. ed with astonishment' आश्चर्यजडीकृत. **-***v. i.* पाषाणीभू 1 P. **-action**, *s.* पाषाणीकरणं; पाषाणीभूतद्रव्यं.

Petroleum, *s.* शिलातैलं-रसः.

Petrology, *s.* अश्म-विद्या or शास्त्रं.

Petticoat, *s.* शाटी, शाटकः, चंडातकं, अधोंशुकं (girl's): 'p. government' स्त्रीशासनं; 'under p. government' स्त्रीजितः, स्त्रीवशः.

Pettifogger, *s.* क्षुद्र-अधम-वृत्तिः.

Pettish, *a.* कर्कश, वक्रशील-भाव, परुषस्वभाव, प्रतीप; *See* **Peevish.** **-ly**, *adv.* कर्कशं, परुषं. **-ness**, *s.* कार्कश्यं, स्वभावपारुष्यं.

Petty, *a.* लघु, क्षुद्र, अल्प; *See* **Small**; oft. by उप or कल्प in comp.; 'a p. king' उपराजा, नृपकल्पः.

Petulant, *a.* कर्कश, प्रतीप, दुःशील, वामः *See* **Peevish.** 2 अविनीत, प्रगल्भ, धृष्ट. **-ly**, *adv.* प्रतीपं, धृष्टवत्. **-Petulance**, *s.* प्रतीपता, दुःशीलं, धृष्टता.

Pewit, *s.* *See* **Lapwing.**

Pewter, *s.* कांस्यं, पीतलोहं. **-er**, *s.* कांस्यकारः.

Phalanx, *s.* व्यूहः; पंक्ति *f.*

Phantasm, *s.* आ-,भासः, छाया, माया मनोरथसृष्टि *f.*

Phantasmagoria, *s.* मायाजालं.

Phantasy, *s.* *See* **Fancy.**

Phantom, *s.* भूतः, वेतालः, पिशाचः, रात्रिचरः. 2 आ-,भासः, मनोरथसृष्टि *f.*, माया, कल्पना.

Pharisee, Pharisaic, *s.*; *a.* *See* **Hypocrite.**

Pharmacopœia, *s.* औषधतत्त्वशास्त्रं, भेषजसंस्कारग्रंथः.

Pharmacy, *s.* औषधिक्रिया-संस्कारः-विद्या.

Pharos, *s.* दीपस्थानं-गृहं.

Phase, Phasis, *s.* दर्शनं, वस्तु *n.*; 'p. s of the moon' चंद्रस्य क्षयवृद्धी. 2 (Point of view) दृष्टि *f.*; *See* **View.**

Pheasant, *s.* वीजनः, जीवंजीवः.

Phenomenon, *s.* दृग्विषयः, गोचरवस्तु *n.*, दर्शनं, आलोकः. 2 उत्पातः, अद्भुतं.

Phial, *s.* लघुकूपी, काचकूपी-पात्रं.

Philander, *v. i.* स्त्रीजनसमागमं अभ्यस् 4 P, वि-लस् 1 P. विलासं-विभ्रमं-दृश् *c.*

Philanthropy, *s.* लोकहितेच्छा. लोक-जनप्रीति *f.*, सर्वभूतदया, विश्वप्रीतिः. विश्वसौहृदं. **-ic, -ical**, *a.* लोकहितैषिन्, जनहितकामः, जगन्मित्रं.विश्वामित्रं, विश्वसुहृद्. **-ist**, *s.* जनहितैषिन् *m.* विश्वसुहृद्.

Philippic, *s.* भर्त्सनवाक्यं, निंदात्मकः प्रबंधः.

Philology, *s.* भाषाविज्ञानं-तत्त्वं. शब्दव्युत्पत्तिशास्त्रं-विद्या. **-er-, -ist**, *s.* शाब्दिकः भाषातत्त्वज्ञः. **-ical**, *a.* शाब्दिक (की *f.*), शब्दशास्त्रीय.

Philomath, *s.* विद्याप्रियः-भक्तः.ज्ञानसेविन् *m.* **-y**, *s.* विद्यासेवनं.

Philosophy, *s.* दर्शनं; 'six systems of p.' षड्दर्शनं. 2 तत्त्वज्ञानं, विज्ञानं, तत्त्वविद्या-शास्त्रं; तत्त्वं, ज्ञानं, विद्या, शास्त्रं in comp.; 'moral p.' नीतिशास्त्रं; 'logical p.' तर्कशास्त्रं-विद्या, &c. **-er**, *s.* दर्शनज्ञः, तत्त्वविद् *m.*, तत्त्वज्ञः ज्ञानिन् *m.* तात्त्विकः, ज्ञानी, पंडितः, प्राज्ञः, ज्ञाननिष्ठः; 'p.'s stone' चिंतामणिः; स्पर्शमणिः. **-ic, -ical**, *a.* तत्त्व-दर्शन in comp.; दार्शनिक (की *f.*). 2 विज्ञ. तत्त्व-

ज्ञानपर, ज्ञान-विद्या-पर. **-ically,** *adv.* दर्शनानुसारेण. तत्त्वतः. **-ize,** *v. i.* तत्त्वं निरूप् 10 or आलोच् 10 or अन्वीक्ष् 1 A.

Philtre, *s.* मंत्रौषधं, वशीकरणचूर्णं.

Phiz, *s. See* **Face.**

Phlebotomy, *s.* शिरावेधः-मोक्षः-छेदः, रक्तमोक्षणं-स्रावः.

Phlegm, *s.* कफः, श्लेष्मन् *m.*, सिंघाणकं. 2 मांद्यं, जाड्यं; 'a medicine removing p.' (phlegmagogue) श्लेष्मघ्नं, कफनाशनं. **-atic,** *a.* कफिन्, श्लेष्मल-ण, बहुकफ. 2 कफकर (री *f.*), श्लेष्मजनन (नी *f.*). 3 श्लेष्मज. 4 जड, मंद, शीत; *See* **Indifferent.**

Phonetic, *a.* स्वरसंवादिन्, ध्वनि-स्वर-in comp. **-Phonetics, Phonics,** *s.* स्वर or ध्वनि-विद्या or शास्त्रं.

Phonograph, *s.* स्वरलेखनयंत्रं.

Photograph, *s.* आलोकलेख्यं. **-er,** *s.* आलोकलेख्यकारः.

Phrase, *s.* वाक्यं, उक्ति *f.*, वचनं. *-v. t.* अभि-धा 3 U, उद्दिश् 6 P; *See* **Call.** **-Phraseology,** *s.* वाक्यबंधः-रचना, भाषासरणि *f.*, वाक्प्रकारः, वाग्रीति *f.*-व्यापारः-व्यवहारः; 'dramatic p.' नाट्योक्तिः, नाट्यपरिभाषा.

Phrenetic, *a.* उन्मत्त; *See* **Frantic.** **-Phrenitis,** *s.* सन्निपातज्वरः, उन्मादः; *See* **Frenzy.**

Phrenology, *s.* मास्तिष्कविद्या.

Phthisic, Phthisis, *s.* श्वासावरोधः. श्वासकृच्छ्रं; क्षयः, क्षयरोगः, शोषः, यक्ष्मन् *m.*, राजयक्ष्मा. **-Phthisical,** *a.* क्षयिन्, क्षयरोगिन्.

Phylactery, *s.* रक्षाकरंडः.

Physic, *s.* चिकित्सा, उपचारः, वैद्यक्रिया. औषधोपचारः. 2 औषधं. भेषजं. अगदः. *-v. t.* कित् desid. (चिकित्सति-ते), उपचर् 1 P. भेषजं दा 3 U. **-ian,** *s.* वैद्यः, भिषज् *m.*, चिकित्सकः, अगदंकारः, रोगहारिन्-हृत् *m.* **-Physical,** *a.* साकार, स्थूल, जड; *See* **Material.** 2 अंग, विग्रह. शरीर in comp.: 'p. strength' शरीरबलं; 'p. substance' स्थूलद्रव्यं-वस्तु. 3 **Medicinal,** q. v.; 'p. science (physics)' पदार्थविज्ञानं-शास्त्रं. **-ly,** *adv.* प्रकृत्या, स्वभावतः. जातितः, जन्मतः; *See* **Naturally.**

Physiognomy, *s.* आकृति *f.*, वदनाकृतिः, मुखं, वदनं. 2 वदनलक्षणनिरूपणं. **-ist,** *s.* मुखसामुद्रिकः.

Physiography, *s.* भूवर्णनं.

Physiology, *s.* प्राण्योषधिजीवनशास्त्रं.

Physique, *s.* शरीरस्थिति *f.*

Piacular, *a.* अघ-पाप-नाशिन्

Picaroon, *s.* समुद्रीयदस्युः.

Pick, *v. t.* चि 5 U, ग्रह् 9 U, समाहृ 1 P, आ-दा 3 A, उद्-धृ 1 P, 10, लू 9 U, छिद् 7 P, (flower &c.). **2** शुध् c., मृज् 2 P or c., परिष्कृ 8 U. **3** (Up) वृ 5 U, उद्धृ 1 P, उद्ग्रह्; पृथक् कृ; 'p. a bone' अस्थिमांसं चर्व् 1 P, 10; 'p. out' उत्पद् 10, निष्कुष् 1 P; 'p. a quarrel' कलहं उत्-स्था c. (उत्थापयति); 'p. holes (in another's coat) परस्य छिद्राणि दृश् 1 P, रंध्राणि-छिद्राणि-अन्विष् 4 P: 'p. the pocket' ग्रंथिं छित्वा अपहृ. *-s.* **Pick-axe,** q. v. **2** उद्धारः, वरणं. **3** विशिष्टभागः, उत्कृष्टभागः; 'ear-p.' कंडूयनकं; 'tooth-p.' दंतोल्लेखनी; 'p.-axe' टंकः, पाषाणभेदनी, पाषाणदारणः; 'p.-pocket' ग्रंथिच्छेदकः-चौरः. **-ing,** *s.* उद्धरणं, उद्ग्रहणं.

Picket, *s.* सेनारक्षः, रक्षकदलं. **2** शंकुः, स्थाणुः.

Pickle, *s.* संधितं, संधानं, संधितद्रव्यं. **2** लवणं. *-v. t.* सं-धा 3 U, उपस्कृ 8 U.

Picnic, *s.* विहरणं, वनभोजनं.

Pictorial, *a.* सचित्र, चित्रोपेत, चित्रालिखित.

Picture, *s.* चित्रं, आलेख्यं, प्रतिमा, प्रतिकृति *f.*, प्रतिरूपं, प्रतिच्छंदः-दकं, प्रतिच्छाया; 'as if drawn in a p.' आलिखित इव; 'p.-board' चित्रफलकः; 'p.-frame' चित्राधारः, चित्रावरणं; 'p.-gallery' चित्रावली, चित्रशाला; 'p.-maker' चित्रक(का)रः. *-v. t.* मनसि कृ 8 U. आलोच् 10, मनसा कल्प् c. or विचर् c. or वि-भू c. **2** चित्र् 10, आलिख् 6 P, वर्ण् 10. **-ed,** *a.* चित्रगत, आलेख्यगत, चित्रार्पित, आलिखित. **2** मनसा कल्पित. **-Picturesque,** *a.* चित्रोपम, वि-,चित्र, शबल.

Piebald, *a. See* **Variegated.**

Piece, *s.* खंडः-डं, विभागः; अंशः, लवः, शकलः-लं. वि-,दलं, भिन्नं. **2** रचना, प्रबंधः; 'to break in p.s' शकलीकृ 8 U, खंडशः कृ. खंड् 10; 'to fall to p.s' वि-,दल् 1 P; 'p. of poetry' काव्यप्रबंधः, कविता; 'p. of work' कार्यं; 'p. of money' मुद्रा; 'p. of water' जलाधारः, जलाशयः; 'in p.s' खंडशः, लवशः; 'p. at chess' शा (सा)रिः-रः; 'a p. to each' एकैकं, प्रत्येकं, पृथक् पृथक्; 'what a p. of work is man' अहो निर्माणविशेषः नरजीवः; 'of a p.' एकरूप-प्रकार; 'of a p. with' सदृश (शी *f.*), अनुरूप; *See* **Like.** *-v. t.* संयुज् 7 U, 10, संधा- समाधा-3 U. **-less,** *a.* अखंड. **-Piecemeal,** *adv.* खंडशः, लवशः, भागशः, खंडं खंडं, पृथक् पृथक्. *-a.* भागिन्, खंड in comp.

Pied, *a. See.* **Veriegated.**

Pier, *s.* सेतुबंधः **2** स्तंभः, वप्रः-प्रं.

Pierce, *v. t.* व्यध् 4 P, निर्-भिद् 7 P, प्र-भंज् 7 P, छिद् 7 P; *See* **Perforate.** **2** आ-उप-हन् 2 U, शीतवातोपहतः ' p. ed by cold winds '. **-ed,** *a.* विद्ध, निर्भिन्न, छिद्रित; ' p. ed through the heart ' भिन्नहृदय; ' having the ears p. ' विद्ध-छिद्रित-कर्ण. **-er,** *s.* वेधकः, भेदकः. **2** वेधनिका, वेधनी. **-ing,** *a.* वेधक; वेधिन्, भेदिन् भिद्-छिद् in comp.: ' p. the vital parts of the heart ' हृदयमर्मभिद्-छिद्; (sound) परुष, कर्कश. **-s.** वेधः-धनं, निर्भेदः, छेदः-दनं.

Piety, *s.* *See* under **Pious.**

Pig, *s.* शूकरशावः-वकः शूकरः; *See* **Hog.** **2** कुशी, लोहपिंडः; ' p.-iron ' असंस्कृतं अयः; 'p. -headed ' स्थूल, स्थूलधी. **-gish.** *a.* शूकरोपम. **-Piggery**, *s.* शूकरालयः.

Pigeon, *s.* कपोतः, पारावतः, कलरवः; ' wood p. ' हारि(री)तः; ' p.-hearted ' भीरुहृदय, कातर; ' p.-hole ' कपोतबिलं; ' p.-house,-cot ' कपोतपालिका, विटंकः.

Pigment, *s.* वर्णकः; वर्णः, रंगः.

Pigmy, *s.* वामनः, ह्रस्वः, खर्वः. **-a.** वामन, ह्रस्व, खर्व, लघुतनु, अल्पमूर्ति.

Pike, *s.* प्रासः, कुंतः, शूलः-लं; *See* **Lance;** ' p.-man ' प्रासिकः, कौंतिकः, शाक्तीकः, शूलिन् *m.*

Pilaster, *s.* चतुरस्रः स्तंभः.

Pile, *s.* राशिः, चयः, निकरः, पुंजः, पूगः, स्तोमः, समूहः. **2** चिता, चिति *f.*, चित्या. **3** स्थूणा, स्तंभः, शंकुः, कीलः **4** हर्म्यं, भवनं, महामंदिरं. **5** ऊर्णा. **-v. t.** समाचि 5 U, राशीकृ 8 U.

Piles, *s.* अर्शस् *n.*, दुर्नामकं, अर्शोरोगः, गुदकीलकः, गुदांकुरः; ' affected by p. ' अर्शस.

Pilfer, *v. t.* मुष् 9 P, चुर् 10, अपहृ 1 P **-er,** *s.* चौरः, मोषकः; *See* **rob,-ber.**

Pilgrim, *s.* यात्रिकः, तीर्थसेविन् *m.* **-age,** *s.* तीर्थयात्रा, यात्रा, यात्राप्रसंगः, तीर्थाटनं-सेवा; 'on a p. to Garuda ' गरुडस्य यात्राप्रसंगेन; ' place of p. ' तीर्थः-र्थं, पुण्यस्थानं.

Pill, *s.* वटिका, गुटिका, गुलिका.

Pillage, **-v.** *t.* वि-,लुंट्-ठ् 1 P, 10, अपहृ 1 P. **-s.** विलुंठनं, लोप्त्रं, लोत्रं, अपहारः. **-er,** *s.* लुंठकः, अपहारकः.

Pillar, *s.* स्तंभः, स्थाणुः, स्थूणा, अवष्टंभः; यूपः (sacrificial); ' p. of state ' राज्यस्य आधारस्तंभः; ' p. s of justice ' न्यायाधाराः, धर्मावष्टंभाः.

Pillow, *s.* उपधानं, उपबर्हः, बालिशं; 'p.-case' उपधानकोशः-आवेष्टनं; ' I slept, making my left arm serve as a p. ' वामभुजमुपधाय अशयिषि (D. K. ii. 5). **-v.** *t.* उपधा 3 U, उपधानीकृ 8 U.

Pilous, *a.* लोमश, प्रचुरलोमन्. **-Pilosity,** *s.* लोमशत्वं, लोमप्राचुर्यं.

Pilot, *s.* कर्णधारः-ग्राहः, कार्णिकः, कर्णिन् *m.*, नाविकः, नौवाहः **2** **Guide,** q. v. **-v.** *t.* मार्गं दृश् c., प्रणी 1 P, वह् c. **-age,** *s.* कार्णिकवेतनं.

Pimp, *s.* विटः, संचारकः; *See* **Pander.**

Pimple, *s.* पिटिका, स्फोटः, क्षुद्र-तनु-व्रणः, रक्तस्फोटः-गंडः, रक्तवटी. **-ed,-y,** *a.* सस्फोट, व्रणिन्, दद्रुण, पिटिकावृत.

Pin, *s.* सूचि *f.*, कीलः-लकः-कं, शलाका, शंकुः, शल्यं **2** (Of a carriage) आणिः-णी, अक्षाग्रकीलः; ' p.-maker ' सूचिकारः. **-v.** *t.* सूच्या बंध् 9 P, कील् 10.

Pincers, *s.* संदंशः-शकः, कंकमुखं.

Pinch, *v. t.* पीड् 10, बाध् 1 A, क्लिश् 9 P. संकुच् 1 P (the body), आर्तीकृ 8 U; 'p. ed with cold ' शीतार्त, हिमपीडित, ' p. ing poverty ' दुःसहं दारिद्र्यं. **2** अंगुल्यग्रेण पीड्. **3** मुष्टिना संग्रह् 9 P, संग्रह्; 'none but the wearer knows where the shoe p. es ' न हि वंध्या विजानाति गुर्वीं प्रसववेदनां. **-s.** अंगुलिपीडनं; संग्राहः, ग्रहणं; ' p. of snuff ' नस्यकूर्चः. **2** संकटावस्था, दुर्गति *f.*, कष्टं, कृच्छ्रं; ' p.-fist ' बद्ध-दृढ-मुष्टिः, अमुक्तहस्तः.

Pine, *s.* देवदारुः-रु, पीतद्रुः, सरलः, पूतिकाष्ठं; *See* **Fir** also. **-v.** *i.* (Away) अवसद् 1 P, परि-,म्लै-ग्लै 1 P, क्षि-pass., खिद्-प्ली 4 A. **2** (For) उत्तम् 4 P, उत्कंठ् 1 A. उत्सुकायते (D.); oft by उत्क, उत्सुक, उत्कंठ in comp.: ' a heart p. ing away in absence ' विरहोत्कंठं हृदयं; 'p. ed for his home ' गृहं गंतुमुदताम्यत्; अद्रिसुतासमागमोत्कः (K. vi. 95) ' p. ing to be united with Parvati '; अंतःपुरविरहपर्युत्सुकस्य राजर्षेः (S. 3) ' who is p. ing by separation &c. **-ing,** *s.* म्लानि *f.*, अवसादः, उत्कंठा. **-a.** म्लान, क्षीण विषण्ण, उत्क, उत्सुक, सोत्कंठ.

Pinion, *s.* पक्षः, पर्णं **2** बाहुपाशः-बंधः. **-v.** *t.* पक्षौ बंध् 9 P, बाहू बंध्.

Pink, *s.* पाटलवर्णः, पाटलः. **2** अग्रं, शिखरं, पराकाष्ठा. **-a.** पाटल, पाटलवर्ण; ' p.-eyed ' गज-सूक्ष्म-नेत्र. **-v.** *t.* व्यध् 4 P; *See* **Perforate.**

Pinnace, *s.* क्षुद्र-लघु-नौका.

Pinnacle, *s.* अट्टः, प्रासादाग्र-शृंगं, प्रोच्छ्रितं हर्म्यं. **2** शिखरं, शृंगं, अग्रं.

Pioneer, *s.* आटविकः, काष्ठ-तरु-छिद् *m.* **2** मार्गदर्शकः, अग्रेसरः, अग्रयायिन् *m.* *See* **Forerunner.** **-v.** *t.* सैन्यमार्गं शुध् c.

Pious, *a.* धार्मिक (की *f.*), पुण्य-धर्म-शील, धर्मात्मन्, पुण्य, पुण्यात्मन्, भक्तिमत्, शुचि-

व्रत, भक्ति or धर्म-निष्ठ or परायण, धर्माचार; 'led a p. life' धर्माचरणेन आयुरक्षपयत्; 'p. action' धर्म्यक्रिया; for p. purpose' धर्मार्थं. 2 धर्म-भक्ति-मूलक. **-ly,** *adv.* भक्त्या, धार्मिकवत्. **-ness,-Piety,** *s.* धर्मनिष्ठा-परता-आसक्ति *f.* धर्मात्मता, पुण्यशीलं, ईश्वर-धर्म-भक्ति *f.*, ईश्वरनिष्ठा-सेवा, पुण्यता, भक्तिः; 'distinguished for p.' धर्मप्रधान. 2 पितृसेवा, पुत्रधर्मः. [त्रि-रु 2 P.

Pip, *s.* बीजं. 2 बिंदुः, अंकः. **-v.** *i.* कूज् 1 P,

Pipe, *s.* वंशः, वेणुः, सुषिरं. 2 नालः, नाडि-डी-लि-ली *f.*, प्रणालः-ली; 'water-p.' सारणि *f.*, प्रणालिका. **-v.** *i.* वेणुं वद् c. or ध्मा 1 P. **-er,** *s.* वांशिकः, वेणुध्मः.

Piquant, *a.* उग्र, तिग्म, कटु, तीक्ष्ण, प्र-,खर. 2 मिष्ट, स्वादु, सरस.

Pique, *s.* कलिः, कलहः; ईषत्कोपः. **-v.** *t.* ईषत् कुप् c. or रुष् c. 2 उत्तिज् c., उत्पद् c., प्रोत्सह् c., प्र-वृत् c. 3 (Oneself) अभिमन् 4 A; विकत्थ् 1 A; 'he p.s himself upon his learning' पंडितंमन्योऽसौ.

Pirate, *s.* समुद्रदस्युः. 2 साहसिकनौका. 3 शब्दचौरः. **-v.** *t.* अपहृ 1 P, लुंट्-ठ् 1 P, 10. **Piracy,** *s.* समुद्रीयचौर्य-लुंठनं **-Piratical,** *a.* साहसिन्, साहसिक (की *f.*).

Piscator, *s. See* **Fisherman.**

Pisces, *s.* मीनः, मीनराशिः.

Piscivorous, *a.* मत्स्याशन, मत्स्याद्.

Pismire, *s. See* **Ant.**

Piss, *s.* मूत्रं, मेहः. **-v.** *t.* मूत्रं उत्सृज् c., मिह् 1 P, मूत्र् 10.

Pistil, *s.* गर्भकेसरः-रं.

Pit, *s* गर्तः-र्ता, विवरं, बिलं, अवटः; 'p.-coal' आकरांगारः; 'p.-fall' गूढ or छन्न-कूपः or गर्तः, अंधकूपः. **-v.** *t.* सूक्ष्मगर्तैः अंक् 10 or चिह्नयति (D.). 2 योद्धुं प्रोत्सह् c, प्रतियुध् c.

Pitch, *v. t.* रच् 10, प्रतिवि-धा 3 U; रुह् c. (रोपयति), स्था c. (स्थापयति), निविश् c. 2 क्षिप् 6 P, प्र-,अस् 4 P, नि-,पत् c. 3 अरालेन अंज् 7 P. **-v.** *i.* आ-अव-पत् 1 P, अवरुह् 1 P, अव-तॄ 1 P. अध्यास् 2 A. 2 निविश् 6 A, शिबिरं अध्यास्. 3 अधोमुखेन पत्, अवाक् गम् 1 P. 4 (Upon) वृ 5 U; *See* **Choose.** **-s.** तिंदुः, रालः, अरालः, यक्षधूपः सर्जरसः, सर्वरसः, बहुरूपः 2 कोटि *f.*, काष्ठा, अग्रं; शिखरं; 'highest p.' परा काष्ठा-कोटिः. 3 परिमाणं, पर्यंतः; *See* **Degree.** 4 उत्संगः, कटकः-कं. 5 स्वरः; 'mineral p.' शिलाजतु *n.* **-y,** *a.* तिंदुलिप्त. 2 सूचिभेद्य, अंध, अतिकृष्ण.

Pitcher, *s.* कुंभः, घटः, घटी, कलसः-शः, पुटग्रीवः; *See* **Jar.**

Pith, *s.* मज्जा, गर्भः, सारः. 2 सारः, सारांशः, सत्त्वं, तत्त्वं. 3 निर्यासः, रसः. 4 सत्त्वं वीर्यं, बलं, उत्साहः. **-less,** *a.* असार, निःसार फल्गु, निःसत्त्व, विरस. **-y,** *a.* ससार, स रसपूर्ण, सरस, ससत्त्व, सारवत्, सारगर्भ. 2 सप्रभाव, तेजस्विन्, वीर्यवत्, ससत्त्व.

Pittance, *s.* स्तोकांशः, अत्यल्पभागः; अल्प-मूल्यं-वेतनं, ग्रासाच्छादनमात्रं.

Pity, *s.* दया, अनुकंपा, करुणा, घृणा, कृपा अनुक्रोशः; 'in p. to my passion' (राग-जनितं) दुःखं मे निरवेक्ष्य (Mr. 5); 'what a p. it is' अहो नु कष्टमेतत्. **-v.** *t.* 'take p. on' दय् 1 A (with gen.); अनुकंप् 1 A, दयां कृ 8 U (with loc.); प्रसद् 1 P. **-Piteous, Pitiable,** *a.* अनुकंप्य. करुणा-अनुकंपा-योग्य, दयाविषयः-भाजनं-पात्रं, करुण, दीन; 'in p. accents' करुणस्वनैः. 2 वराक (की *f.*), तपस्विन् (of persons). **-ly,** *adv.* करुणं, दीनं. **-ness,** *s.* अनुकंप्यता, कारुण्यं; दैन्यं. **-Pitiful -Pitying,** *a.* करुणार्द्र, करुणामय (यी *f.*). करुणा-दया-शील, सदय, सानुकंप, दयालु कृपालु; *See* **Kind;** 'a p. person' दयानिधिः-सागरः, दीनबंधुः-वत्सलः. 2 करुण. दीन, शोच्य 3 **Contemptible.** q. v. **-ly.** *adv.* सदयं, सानुकंपं, सकरुणं. **-ness,** *s.* दयालुता, कारुण्य, दयार्द्रता. **-Pitiless,** *a.* निर्दय, निरनुक्रोश, निर्घृण, निष्कृप, क्रूर निष्ठुर, कठोर, अकरुण. **-ly,** *adv.* निर्दयं, क्रूर निष्ठुरं.

Pivot, *s.* विवर्तनकीलः.

Placard, *s.* घोषणापत्रं. **-v.** *t.* घोषणापत्रेण प्रकाश् c.

Placate, *v. t.* **Appease,** q. v. **-Placable** *a.* क्षमाशील; सांत्वनीय, आराध्य, प्रसाद्य.

Place, *s.* स्थानं, स्थलं, प्र-,देशः, स्थली, भू-भूमि *f.*, धिष्ण्यं. 2 पदं, आस्पदं, विषयः. 3 पदं पदवि-वी *f.*, अधिकारः, नियोगः, अधिकार-पदं; *See* **Office.** 4 अवकाशः, अवसरः प्रसरः; 'p. of honour' संमानपदं, गौरव-पदं; 'in one p.' एकत्र; 'in many p.s' बहुत्र; 'p. of residence' निवास-स्थानं; वसति *f.*; 'p. for dancing' नृत्य-शाला-स्थानं; 'out of p.' अस्थाने, अनुचितं; 'in the p. of a father' पितृ-स्थाने-भूमौ; 'p. for fear' भयस्थानं-कारणं-हेतुः; 'in one p.-in another p.' क्वचित्-क्वचित्, इतः-इतः, एकत्र-अन्यत्र; 'in the first p.' प्रथमं, प्रथमतः, प्रथमं तावत्, 'in the next p.' अपरंच, पुनः, पुनश्च; 'to give p.' स्थानं त्यज् 1 P, व्यप-सृप् 1 P, अप-सृ 1 P; 'to take p.' *See* **Happen, Occur.** **-v.** *t.* स्था c. (स्थापयति), धा 3 U नि-आ°-, वि-,न्यस् 4 U, निक्षिप् 6 P, आ-नि-विश् c., आरुह् c. (रोपयति), धृ 10 oft. by कृ 8 U, दा 3 U, व्यापृ c.. (व्या-

पारयामास करं किरीटे R. vi. 19); 'p. over' अधिष्ठा, अधि-ष्ठा 1 P; 'p. in an office' पदे नियुज् 7 A, 10 or आरुह् c.

Placid, *s.* शांत, प्र-उप°-, प्रसन्न, निराकुल, अनुद्विग्न, जितक्रोध, असंभ्रम, शांतात्मन्, प्रसन्नचित्त. **-ly,** *adv.* प्रसन्नं, शांत्या, शांतचेतसा, निराकुलं. **-ity, -ness,** *s.* शमः, शांति *f.*, प्रसादः, अक्रोधः, असंभ्रमः, अक्षोभः.

Plagiarism, *s.* शब्दचौर्यं, वागपहारः. **Plagiarist,** *s.* शब्द-ग्रंथ-चौरः.

Plague, *s.* मारी, महामारी, म(मा)रकः. 2 उत्पातः, अरिष्टं, अनर्थः, शल्यं, उपद्रवः, कंटकः, उपप्लवः; *See* **Pest.** *-v. t.* मार्या ग्रस् 1 A or आक्रम् 1 U, 4 P. 2 बाध् 1 A, पीड् 10, तप् c., दु 5 P; *See* **Harass.** **-ing,** *a.* बाधक, पीडक, क्लेशद, पीडाप्रद.

Plain, *s.* समभूमि *f.*-देशः-स्थलं-ली, समभूभागः; *See* **Level.** *-a.* सम, सपाट. 2 विनीत, निरलंकार, अभूषित, निर्भूषण. 3 स्पष्ट, व्यक्त, विशद, परि-,स्फुट, सुबोध, स्पष्टार्थ, भिन्नार्थ, प्रकाश, प्रत्यक्ष, प्रकट. 4 केवल, मात्र in comp. 5 (Style) अनलंकृत, शुद्ध, अनलंकार, अव्यंजन. 6 (Food) उपस्कर-हीन-शून्य, असंस्कृत. 7 अमाय, दक्षिण, निष्कपट, निर्व्याज, सरल, कपट-माया-हीन, निर्व्यलीक, अकृत्रिम, ऋजु; *See* **Frank.** 8 सामान्य, साधारण (णी *f.*): मध्यमरूप, नातिसुंदर (री *f.*); 'a p. woman' 'one p. in person' सामान्यलावण्योपपन्ना, नातिसुभगा, अनतिसुंदरी; 'p. dealing' न्यायाचार, शुद्ध-सरल-मति, निर्व्यलीक, दक्षिण, अमाय, ऋजु; (*s.*) सारल्यं, निष्कापट्यं. *-v. t.* समीकृ 8 U. **-ly,** *adv.* स्पष्टं, व्यक्तं, स्फुटं, स्पष्टार्थं, सुबोधं, प्रकाशं, प्रकटं, प्रत्यक्षं. 2 निर्व्याजं, निर्व्यलीकं, अवक्रं, सारल्येन, अमायया, निष्कपटं. 3 विनीतं, अनलंकारं; 'p. dressed' विनीतवेष. **-ness,** *s.* समता, विनीतत्वं, भूषणाभावः, व्यक्तता, स्पष्टता, वैशद्यं, सुबोधता, प्राकाश्यं, अव्याजः, निर्व्याजता, अकापट्यं, सारल्यं, अमाया, आर्जवं, &c.

Plaint, *s.* प्रतिज्ञा, अभियोगः, भाषापादः, भाषा, पूर्वपक्षः, पक्षः. 2 विलापः, विलपनं, परिदेवनं-ना, शोकः. **-Plaintiff,** *s.* अर्थिन् *m.*, वादी, अभियोगी, कार्यार्थी, अभियोक्तृ *m.*, सूचकः. **-Plaintive,** *a.* परिदेविन्, विलापिन्. 2 शोकावह, शोकार्थक, शोक-दुःख-गर्भ; करुण, दीन, सकरुण; 'in p. words' परिदेवितक्षरैः. **-ly,** *adv.* करुणं, दीनं.

Plait, *s* भंगि-गी *f.*, भंगः, ऊर्मि *f.*, पुटः, व्यूणः. 2 वेणि-णी *f.*, कबरी, धम्मिल्लः. *-v. t.* ग्रंथ् 9 P, व्या-वृत् c., पुटीकृ 8 U, संवे 1 P, वेणीकृ, वेणीरूपेण ग्रंथ्.

Plan, *s.* उपायः, प्रयोगः, प्र-,युक्ति *f.*, कल्पना 2 सूत्रपातः, चित्रलेखनं; आलेख्यं, स्थूलवर्णनं. *-v. t.* प्र-सं-कल्प् c., प्र-,युज् 10, चिंत् 10, मंत्र् 10 A, अनुसंधा 3 U, आलोच् 10, मनसा विचर् c. or वि-भू c. 2 आलिख् 6 P, सूत्रपातं कृ 8 U. **-ning,** *s.* उपाय-कल्पना-योजना

Planch, *See* **Plank.**

Plane, *a.* सम, समस्थ. *-s* समं, समक्षेत्रं, धरातलं. 2 तक्षणी, त्वक्षणी. *-v.* समीकृ 8 U. 2 तक्ष् 1, 5 P.

Planet, *s.* ग्रहः, ज्योतिस् *n.*; 'minor p.' उपग्रहः; 'passage of a p.' संक्रमः, संक्रांति *f.*; 'aspect of a p.' ग्रहदशा; 'influence of a p.' ग्रहावेशः. **-ary,** *a* ग्रह in comp.

Planish, *v. t.* समीकृ 8 U., तिज् c., प्र-मृज् c.

Plank, *s.* फलकः-कं; दारु-काष्ठ-फलकः. *-v. t* फलकैः आस्तृ 9 U or आच्छद् 10.

Plant, *s.* ओषधि *f.*, लता; तरुः, वृक्षः. *-v. t.* (Seeds) आ-,रुह् c. 2 प्रति-,स्था c (स्थापयति), वि-,न्यस् 4 U निविश् c., नि-खन् 1 P. नि-धा 3 U, रुह् c. 3 अधि-, वस् c. **-ation,** *s.* रोपणं. 2 क्षेत्रं, in comp., वाटः-टी, वाटिका; शाकटं-शाकिनं in comp., वृक्षवाटिका; 'sugar-p.' इक्षुशाकटं-वाटिका. 3 **Colony,** q. v. **-er,** *s.* रोपयितृ *m.*, रोपकः. 2 वाटिकेश्वरः.

Plantain, *s.* कदली-लः, रंभा, वारणबुसा-षा, मोचा, अंशुमत्फला, काष्ठीला; 'p. fruit' कदलीफलं, मोचं; 'wild p.' काष्ठकदली.

Plantigrade, *a.* पादतलचारिन्.

Plash, *s.* आघातः, आस्फालनं. 2 क्षुद्रजलाशयः. *-v. i.* जले क्रीड् 1 P, जलं आस्फल् c. *-v. t.* अवच्छिद् 7 P, लू 9 U, कृत् 6 P. 2 संग्रंथ् 9 P. **-y,** *a.* जलाढ्य.

Plaster, *s.* लेपः, सुधा, चूर्णलेपः. 2 उपनाहः उपदेहः. *-v. t.* लिप् 6 P, वि-अनु-प्र-°, दिह् 2 U, उप-नह् 4 P. **-er,** *s.* लेपकः, पलगंडः. **-ing,** *s.* वि-प्र-लेपः-पनं.

Plastic, *a.* आकारद, कल्पक. 2 नम्य, सुखनम्य.

Plat, *s.* **Plot,** q. v. *-v. t.* **Weave,** q. v. 2 प्र-सं-कल्प् c., चिंत् 10.

Plate, *s.* पात्रं, भाजनं. 2 कोशः-षः, हेमरूप्यं. 3 फलकः-कं, पत्रं; पट्टः-ट्टं, पट्टिका; 'copper p.' ताम्रपट्टः, ताम्रपत्रं; 'p.s of grant' शासन-नियम-पत्राणि. *-v. t.* रजतपत्रेण आवृ 5 U or आच्छद् 10; रजतेन अलंकृ 8 U. **-ed,** *a.* रजतपत्रावृत, रूप्यनिबद्ध.

Plateau, *s.* समस्थली, अधित्यका: *See* **Level.**

Platform, *s.* वेदि *f.*, वेदिका, उन्नतस्थानं.

Platoon, *s.* गुल्मः-ल्मं.

Platter, *s.* पात्रं, भाजनं.

Plaudit, *s.* प्रशंसा, धन्यवादः, जयघोषः.

Plausible, *a.* सत्याभास, सत्यसंकाश, बाह्यतः रमणीय.

Play, *v. i.* क्रीड् 1 P, रम् 1 A, वि-हृ 1 P, विलस् 1 P, खेल् 1 P. **2** (At dice) दिव् 4 P, क्रीड्, ग्लह् 1 A; 'p. s at dice' अक्षैः-अक्षान्-दीव्यति. **3** वद् c. (instrument). **4** चेष्ट् 1 A, वृत् 1 A, चल् 1 P. —*v. t.* रूप् 10, नट् 10, अभिनी 1 P, ex. by denom.; 'p. s the king' नृपायते; 'p. s the woman' स्त्रीवाचरति. **2** प-,चल्-ऱ् c., प्रवृत् c., प्रसृ c. **3** वि-धा 3 U, कृ 8 U, अनु-ष्ठा 1 P. —*s.* क्रीडा, खेला-लनं, लीला, केलि *f.*, विनोदः, विलासः, विहारः, कौतुकं, परिहासः; 'in p.' लीलया, परिहासेन. **2** नाटकं. **3** अक्षक्रीडा, द्यूतं, देवनं. **4** अभिनयः, गति *f.* 5 आचरणं, चेष्टितं; वृत्ति *f.*, व्यापारः, कृत्यं, चेष्टा; 'foul p.' दुश्चेष्टितं. **6** चलनं. सरणं. **7** प्रसरः, अवकाशः, अवसरः; 'p.-day' अनध्यायदिवसः-तिथिः, विश्रामदिवसः; 'p. house' नाटक-रंग-शाला; 'p.-thing' क्रीडनकं, क्रीडाद्रव्यं-वस्तु. **—er,** *s.* क्रीडकः; (at dice) अक्ष-,देविन् *m.*, अक्षक्रीडकः, अक्षद्यूतः. **2** नटः, कुशीलवः, नर्तकः, अभिनेतृ *m.* पात्रं. **—ful,** *a.* क्रीडासक्त, क्रीडापर-मग्न, केलि-क्रीडा-लीला-शील, लीला-खेला-पर, विलासिन्, विनोदिन्; (of things) सलील-क्रीडा-केलि in comp.; 'p. anger' प्रणयक्रीडा-कोपः, केलिकोपः. **—fully,** *adv* क्रीडापूर्वं, परिहासेन (jokingly); लीलया, सकौतुकं, सविलासं, सखेलं. **—fulness,** *s.* क्रीडासक्ति *f.*, लीलापरता, सलीलत्वं, क्रीडाशीलता.

Plea, *s.* कारणोत्तरं, उत्तरं, उत्तरपादः. **2** व्यपदेशः, छद्मन् *n.*, अपदेशः, निमित्तं, कारणं, मोचनहेतुः. **3** वादः, व्यवहारः, कार्यं. **4** प्रार्थना; 'raising a p.' व्याजीकरणं. **—Plead,** *v.* उत्तरं दा 3 U or प्रतिपद् 4 A or वद् 1 P, निमित्तं दृश् c., वि-,अप-दिश् 6 P; 'p. guilty' अपराधी अस्मीति वद् or प्रतिपद्; 'tears shall p. in vain' अश्रुपातो निर्गुणो भवेत्. **2** विनयेन प्रार्थ् or अभ्यर्थ् 10 A, सविनयं याच् 1 A; 'p. ed for his life' जीवितदानार्थं प्रार्थयामास. **3** उप-क्षिप् 6 P, उपन्यस् 4 U. व्यपदेशार्थं पुरः क्षिप्. 4 (Cause) प्रति-पद् c., परार्थं उत्तरं वद्, परपक्षं समर्थ्; 'p. ing headache as an excuse' शिरःशूलस्पर्शं व्यपदिशन्; 'p. ing illness' अस्वास्थ्यव्याजेन-व्यपदेशेन. **—er,** *s.* अभिभाषकः, उत्तरवादिन् *m.* समर्थकः, हेतुवादिन् *m.* **—ing,** *s.* हेतु-उत्तर-वादः, व्यपदेशनं, हेतुपन्यासः.

Please, *v. i.* प्री 9 P, 10 (प्रीणयति), तृप् c., सं-परि-°, रम् c. (रमयति), प्रमुद् c., सुखयति (D.), आ-नंद् c., सं-,तुष् c., प्रसद् c., आह्लाद् c., हृष् c., आ-राध् c., अनुरंज् c.; oft. by इच्छा, प्रसादः, कृपा; विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया (R. viii. 46) 'if it p. God to do so' &c.; 'he was p. ed to accept my presents' ममोपायनानि स सुप्रीतमनसा-सुप्रसन्नं-स्वीचकार; 'may it p. your ladyship' प्रसीदतु भट्टिनी (M. 4). **2** (Like) *See* below. —*v. i.* 'to be p. ed' तुष् 4 P, तृप् 4 P; रम्-मुद् 1 A, नंद् 1 P. **2** अर्ह् 1 P or प्रसद् 1 P, with inf., or simply by Imperative; 'p. sit here' अत्रोपविशत्वार्यः; 'worthy Sir, p. to wait for 2 or 3 days' द्वित्राण्यहान्यर्हसि सोढुमर्हन् (R. v. 25) **3** रुच् 1 A, इष् 6 P; *See* **Like;** 'just as my friend p. s' यदभिरोचते वयस्याय; 'do as you p.' यथाभिलषितं क्रियतां. **—ance,** *s.* क्रीडोद्यान. **—ant,** *a.* सुखकर (री *f.*), मधुर, सुखद-प्रद, सुखावह, रम्य, रमणीय, प्रिय, मनोहर-रम, अभिराम, सुभग, अभिमत, सुख, काम्य, कांत, हर्षावह, रुचिर, हृद्य, हृदयंगम, प्रीति-तुष्टि-कर, मनोज्ञ, मंजुल, चारु; 'a p. joke' हृदयंगमः परिहासः (Mal. 3). **—antly,** *adv.* सुखं, रम्यं, मधुरं, प्रियं, रुचिरं. **-antry,** *s.* परि(री)हासः, नर्मभाषितं, विनोदः, नर्मालापः, विनोद-नर्म-उक्ति *f.* **—ing,** *a.* सुख in comp.; रम्य, कांत; *See* **Pleasant,** 'p to the ear' सुखश्रव, श्रुतिसुख, मंजुलस्वन, सुश्राव्य; 'p. to the eye' प्रेक्षणीय, नयनाभिराम, सुदृश्य; 'p. language' चाटु *m. n.*, चाटूक्तिः. **—ingly,** *adv.* शुभं, सुखं, सुख-चारु in comp. **—Pleasure,** *s.* सुखं, सं-परि-तोषः, आनंदः, प्रीति *f.*, सौख्यं, तुष्टि *f.*, प्र-, मोदः, आह्लादः, हर्षः, मुदा. **2** अभि-, रुचि *f.*, इच्छा, अभिलाषः, छंदः-दस् *n.*, कामः; 'at one's p.' स्वेच्छया, कामतः, यथाकामं, यदृच्छया, स्वैरं; 'wandering at p.' कामचारिन्, स्वच्छंदगामिन्; 'sensual p.' भोगः, विषयसुखं, विषयानुरागः; 'sexual p.' रति *f.*, रतिसुखं, सु-,रतं; 'p.-boat' केलि-क्रीडा-नौका; 'p.-ground' आरामः, क्रीडा-केलि-विलास-वनं-काननं, प्रमदवनं, क्रीडोद्यानं; 'p.-mansion' केलिगृहं-भवनं, लीलागारं, विलासमंदिरं. **3** प्रसादः, अनुग्रहः. **—able,** *a.* रम्य, रमणीय, सुखद, सुख; *See* **Pleasant. —ist,** *s.* विषयिन् *m.*, विषयासक्तः, भोगासक्तः, भोगपरायणः.

Plebian, *a.* प्राकृत (ती *f.*), सामान्य, साधारण (णी *f.*), अवरवर्ण, अकुलीन. —*s.* प्राकृतः, प्राकृतजनः, पृथग्जनः; नीच-अवर-जनः.

Plectrum, *s.* कोणः, शारिका.

Pledge, *s.* न्यासः, निक्षेपः, आधिः, उपनिधिः, उपन्यासः-निक्षेपः, पणः. **2** अभिज्ञानं; 'p. of love' प्रीत्यभिज्ञानं. **3** प्रतिज्ञा, क्षणः, परिपणः-णनं; 'I have given a p.' विहितप्रतिज्ञः-गृहीतक्षणः-अहं. **4** प्रतिभूः, लग्नकः, बंधकः. **-***v. t.* न्यस् 4 U, निक्षिप् 6 P, आ-नि-धा 3U, परि-,पण् 1 A, आधी-न्यासीकृ 8 U. **2** (One's word) प्रति-श्रु 5 P, प्रति-ज्ञा 9 A, (with dat. of person), उरीकृ. वचनेन बंध् 9 P; ex. by (s.); अस्मत्सौदामिनीसमक्षमनयोर्वृत्तेयं प्रतिज्ञा (Mal. 1) 'they two p. ed their word' &c.: 'he has p. ed his virtue (honor) that he would not harm you' तव विरूपकरणं तेन सुकृतमंतरे धृतं (P. iv. 1): 'he who has p. ed his word' कृत-विहित-प्रतिज्ञः, प्रतिज्ञा-वचन-बद्धः.दत्तवचनः-प्रतिज्ञः, गृहीतक्षणः.

Pledget, *s.* पट्टः, आवेष्टनं.

Pleiades, *s.* कृत्तिकाः.

Plenary, *a.* सं-परि-पूर्ण, समग्र.

Plenipotent, *a.* पूर्णशक्तियुक्त. **-Plenipotence,** *s.* पूर्णसामर्थ्यं शक्ति *f.* **Plenipotentiary,** *s.* पूर्णशक्तियुक्तः, महादूतः.

Plenish, *v. t.* उपस्कृ 8 U, परि-छद् 10.

Plenist, *s.* पूर्णतावादिन् *m.*

Plenitude, *s.* पूर्णता, प्राचुर्यं, वैपुल्यं, समृद्धि *f.*, अतिरेकः, उत्सेकः, परा कोटिः-काष्ठा.

Preside, *v. i.* (Over) अधि-ष्ठा 1 P, अध्यास् 2 A, (with acc.); अधीश् 2 A, प्र-भू 1 P (with gen.); अवेक्ष् 1 A, अध्यक्षः-अधिपतिः-भू, अभिमन् 4 A; अग्न्याद्यभिमानिनीभिर्देवताभिः (S. B. 725) 'p.ing over fire &c.' -**ency,** *s.* अध्यक्षता, अधिष्ठानं, अधिकारः. 2 आधिपत्यं, अधिष्ठातृत्वं, अध्यक्षपदं, अधीशत्वं, better by (*v.*); 'during his p.' तस्मिन्नधितिष्ठति. 3 मंडलं, भोगः, देशविभागः. -**ing,** *a.* अध्यक्ष, अधिष्ठातृ, अभिमानिन्, अधि pr.; 'the p. deity' अधिदेवता, अधिष्ठात्री देवता; 'the soul p. over the body' शरीराभिमानी आत्मा. -**President,** *s.* अध्यक्षः, अधिष्ठातृ *m.* अधीशः, अधि-,पतिः, अध्यासीनः, अधिकारिन्, *m.* प्रभुः, नायकः. -**ship,** *s.* आधिपत्यं, अध्यक्षता; *See* **Presidency**

Press, *v. t.* पीड् 10, निः-आ-°, निष्कुष् 1 P, मर्द् 1 P, निर्दुह् 2 U; (together) संपीड्, संहन् 2 P, संदं, संकुच् 1 P, संपिंड् 10, संघट्ट् c. 2 **Clasp,** q. v; 'p. ing him to the bosom' तं वक्षसा परिरभ्य; भुजाभ्यां आपीड्य 'p. ing in the arms' &c. 3 प्रेर् c., प्रचुद् 10, प्रणुद् 6 P or c., आकृष् 1 P, आहृ c. 4 निर्बंध् 9 P, अनु-अनुनिर्-बंध्, साग्रहं-निर्बंधेन-प्रच्छ् 6 P or याच् 1 A or अर्थ् 10 A, पुनः पुनः प्रच्छ्: *See* **Importune.** 5 बलेन प्रवृत् c. or नियुज् 7 A, 10 or व्यापृ c. 6 बाध् 1 A, पीड्, क्लिश् 9 P, उद्विज् c., सं-परि-तप् c, व्यथ् c. (व्यथयति). 7 मुहुर्मुहुः-पुनः पुनः-उपदिश् 6 P or कथ् 10 or अनुशास् 2 P. -*v. i.* समापत् 1 P, आ-अधि-क्रम् 1 U, 4 P, अभिद्रु 1 P; (against,) संघट्ट् 1A, प्रतिहन् 2 P, अभ्याहन्; संघट्टयन्नंगदमंगदेन (R. vi. 73); 'making his Angada ornament p. against Indra's.' 2 सवेगं प्रगम् or प्रसृ 1 P, सरभसं उपसृप् 1 P or संगम् 1 A; 'p.-ing close to the rock' शिलायामात्मानं निबिडं-निरंतरं-संसंजयन्. 3 प्र-, धाव् 1 A, 'my time p. es' कालातिपातो मया नैव कर्तुं शक्यते; 'p. through' अतीत्य-अतिक्रम्य-गम्, उल्लंघ् 1 A, 10, निस्तॄ 1 P. -*s.* पीडनं, निष्कर्षः. 2 मुद्रण-मुद्रा-यंत्रं. 3 पीडन-पेषण-यंत्रं. 4 जनसंकुलं-संमर्दः. लोकनिवहः. 5 निर्बंधः, पीडा, अतिभारः. -**er,** *s.* पीडकः, बाधकः. -**ing,** *a.* अतिनिर्बंधक, बाधक, अत्यवश्यक, अविलंब्य, अव्याक्षेप्य, विलंबाक्षम, अनतिपात्य; 'p. business of state' आशुसंपादनीयं-विलंबाक्षमं-राजकार्यं. -**ingly,** *adv.* निर्बंधेन, सनिर्बंधं, साग्रहं. -**ure,** *s.* पीडनं. 2 बलं, शक्ति *f.*, प्रभावः, वेगः, प्रवर्तनं, प्रेरणा, प्रणोदः, प्रोत्साहः. 3 भारः, पीडा, बाधा, क्लेशः; 'p. of business' कार्यभारः; having much p. of work' कार्यसमाकुल.

Prestige, *s.* दीर्घरूढा प्रतिष्ठा, चिरप्रतिष्ठितं गौरवं. 2 माया, इंद्रजालं.

Presto, *adv. See* **Quickly.**

Presume, *v. t.* (अविचार्य-अनिश्चित्य) तर्क् 10, सं-भू c., अनु-मा 3 A, 2 P. 2 धृष् 5 P, धर्षेण आक्रम् 1 U, 4 P, उत्सह् 1 A, प्र-भू 1 P; प्रगल्भ् 1 A, दृप् 4 P, साहसं कृ 8 U; कः पतिदेवतामन्यः परिमार्ष्टुमुत्सहेत (S. 6) 'p. to lay hands on &c.'; तद्दोषनिरूपणरूपं साहसं मा कुरु 'do not p. to find fault with him'. -**Presumption,** *s.* तर्कः, कल्पना, भावना, अनुमानं, ग्रहणं. 2 साहसं, धार्ष्ट्यं, प्रागल्भ्यं. 3 अवलेपः, दर्पः, अभिमानः, अहंकारः, गर्वः. 4 संभाव्यता, संभवः. -**Presumptive,** *a.* आनुमानिक (की *f.*), अनुमानसिद्ध, संभावित; 'p. proof' अनुमाननिर्णयः. -**Presumptuous,** *a.* साहसिक (की *f.*), धृष्ट, धृष्णु, प्रगल्भ. 2 अवलिप्त, अत्यभिमानिन्; 'a p. statement' साहसोक्ति *f.*, साहसं. -**ly,**

adv. साहसेन, धृष्टवत्, प्रगल्भं, सावलेपं, सगर्वं. **-ness**, *s*. धृष्टता, प्रागल्भ्यं; प्रतिभा, प्रतिभानं.

Presuppose, *v. t.* पूर्वं क्लृप् c. or भू c. **-ition**, *s*. पूर्वकल्पना-भावना.

Pretend, *v*. अप-व्यप-दिश् 6 P, छलं-कपटं-व्याजं-कृ 8 U ध्वजीकृ; gen. ex, by मिथ्या, कृतक, कपट, व्याज, छद्म in comp. or by भू c., दृश् c.; 'p. ing to be asleep' सुप्तमिव आत्मानं संदर्श्य, व्याजसुप्त, सुप्तलक्षण, मिथ्यासुप्त; 'p. ing to be affected by poison' भावितविषवेगः; 'p. s not to hear' अश्रुतिमभिनयति; 'p. ing to be just' आर्यध्वजिन्-लिंगिन्; 'p. ed weeping' कपट-व्याज-रोदनं. **2** अभिमन् 4 A, मिथ्या मन्; 'he p. s to know everything' अहं सर्वज्ञोस्मीति तस्याभिमानः (अवलेपः). **3** मिथ्याहेतुं दृश् c. or वद् 1 P. **-ed**, *a*. छाद्मिक-कौटिक-(की *f*.), व्याज-कपट-छद्म-कूट-मिथ्या in comp.; 'p. ascetic' छद्मतापसः, तापसध्वजी-लिंगी; *See* **Hypocrite**; *See* (*v*.) also. **-edly**, *adv*. सकपटं, सव्याजं, छलेन, मिथ्या. **-ing**, *a*. **-er**, *s*. छाद्मिकः, कापटिकः, अभिमानी-ध्वजी-लिंगी-मन्यः-अभियोगी in comp.; 'p. in learning' पंडितंमन्यः, विद्याभिमानी; 'p. in religion' धर्मध्वजी, आर्यलिंगी, धार्मिकवेशधारी, कपटधर्मी; 'p. to the throne' राज्याभियोगी. **-Pretence**, *s*. व्याजः, अप-व्यप-देशः, छद्मन् *n*., उपधिः, कपटं, छलं, उपधा, कूटः-टं, कैतवं, मिषं, मिथ्याहेतुः, निमित्तं. **2** अभिमानः, अभियोगः. **-Pretension**, *s*. अभिमानः, अभियोगः, स्वत्वप्रतिपादनं; 'lay p. s to' *See* **Claim**. **2** महत्त्वाकांक्षा, यशोलिप्सा, लोभः; 'p. s to the throne' राज्यं मदीयमिति प्रतिपादनं, राज्याभियोगः.

Preterite, *a*. भूत, परोक्षः 'p. tense' लङ्.

Preterition, *s*. अतिक्रमः-मणं, अत्ययः.

Pretermit, *v. t.* *See* **Omit**.

Preternatural, *a*. अद्भुत, विलक्षण, निसर्ग-प्रकृति-बाह्य. **-ly**, *adv*. अद्भुतं, वैलक्षण्येन.

Pretext, *See* **Pretence** under **Pretend**.

Pretty, *a*. सु in comp., चारु, शोभन, कमनीय, वाम, सुंदर; *See* **Beautiful**, **Lovely**. -*adv*. ईषत्, स्तोकं, अल्पं; आ, कल्प, देश्य, देशीय in comp.; 'p. warm' मंदोष्ण, कोष्ण, कदुष्ण; 'p. clear' शुद्धकल्प-प्राय; 'p. ripe' आपक्व, पक्वप्राय. **2** (P. nearly) प्रायेण, प्रायशः, बहुशः, कल्प-भूयिष्ठ-प्राय in comp.; 'p. nearly finished समाप्तभूयिष्ठ &c. **-ly**, *adv*. चारु, सुंदरं, चारु-सु in comp. **-ness**, *s*. चारुता, सौंदर्यं, लावण्यं.

Prevail, *v. i.* अभिभू 1 P, प्र-भू, पराभू, पराजि 1 A, आक्रम् 1 U, 4 P; अति-शी 2 A, अतिरिच् pass., प्रबल-क्षम-*a*. भू; *See* **Excel**. **2** (In) प्रचलित-प्रवृत्त-*a*. भू, प्रचल्-वृत् 1 P, प्रवृत् 1 A; 'darkness p. ed everywhere' सर्वं तमोवृतं आसीत्. **3** सिध् 4 P, निष्पद् 4 A; 'p. with, on, or upon' अनुनी 1 P, प्रवृत् c., प्रोत्सह् c.; *See* **Persuade**; 'p. against मूर्च्छ् 1 P, (मारुतस्य रंहः शिलोच्चये न मूर्च्छति R. II. 34). **-ing**, **-Prevalent**, *a*. प्रचलित, साधारणी-बहुली-भूत, प्रसिद्ध, प्रचल, प्रवृत्त, साधारण (णी *f*.); 'universally p.' सर्वत्र प्रचलित, सर्वप्रवृत्त 'long since p.' चिरप्रवृत्त. **2** प्रबल, प्रधान, अतिरिक्त, अधिकबल, प्रभविष्णु, सप्रभाव. **-ingly**, *adv*. प्राबल्येन, सप्रभावं. **-Prevalence**, *s*. प्रचारः, प्रवृत्ति *f*., प्रचलनं,, प्रसिद्धि *f*., साधारण्यं. **2** प्राबल्यं, प्राधान्यं, आधिक्यं, अतिरेकः.

Prevaricate, *v. i.* सापह्नवं मिथ्योत्तरं दा 3 U, अप-व्यप-दिश् 6 P, छलं कृ 8 U, अपलप् 1 P, अप-नि-ह्नु 2 A, वाक्छलं कृ; 'when he p. ed' यदा वाक्यभेदान् बहून् कथयत् (Mu. 2). **-ing**, *a*. अपलापिन्, निह्नवकारिन्, व्यपदेशिन्. **-ion**, *s*. वाक्छलं, अपलापः, अप-नि-ह्नवः, व्यप-अप-देशः, वक्रोक्ति *f*., छद्मवादः, उत्तराभासः.

Prevent, *v. t.* वृ c., नि-विनि-°, रुध् 7 U, प्रति-अव-नि°, प्रति-नि-षिध् 1 P, प्रतिकृ 8 U, बाध् 1 A, प्रतिबंध् 9 P, प्रतिष्टंभ् 9 P, प्रति-व्या-हन् 2 P, प्रत्या-ख्या 2 P, निवृत् c., अंतरायःभू- परिपंथीभू 1 P; 'do not p. me from fighting' युध्यमानं मां मा रुंद्धि, युध्यमानस्य मेंऽतरायो मा भूः. **-ion**, *s*. प्रतिरोधः, नि-, वारणं, प्रतिबंधः, प्रतिकारः, व्याघातः, प्रतिषेधः; 'p. is better than cure' प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरं. **-ive**, *a*. हर (री *f*.), घ्न (घ्नी *f*.), in comp., निवारक, प्रतिबंधक, निरोधक. -*s*. वारणं, प्रतिबंधकं.

Previous, *a*. पूर्व, प्राग्भूत, भूत, गत, अतीत, पूर्ववृत्त-गत, प्राक् in comp. **-ly**, *adv*. पूर्वं, प्राक्, पुरस्तात्, पूर्व in comp.

Provise, *v. t.* अग्रेदृश् 1 P or नि-रूप् 10. **2** पूर्वं सूच् 10 or प्र-बुध् c. **-ion**, *s*. अग्रनिरूपणं-दृष्टि *f*.

Prey, *s*. आमिषं (fig. also); मांसं, भक्ष्यं अन्नं, खाद्यं, भोज्यं; 'fell a p. to enemies' द्विषामामिषतां ययौ (R. XII. 11). -*v. i.* भक्ष्यं आ-अप-हृ 1 P. **2** (Upon) भक्ष् 10; संतप् c., बाध् 1 A, क्रमशः नश् c.

Price, *s*. मूल्यं, अर्घः, पण्यं, अवक्रयः, वस्नः; 'high p.' महार्घः, बहुमूल्यं. -*v. t.* मूल्यं स्था c. (स्थापयति) or संकल्प् c. **-ed**, *a*. कृतमूल्य; 'high-p.' महार्घ-र्ह, बहुमूल्य.

दुर्मूल्य; 'low-p.' अल्पमूल्य. **-less**, *a.* अनर्घ-र्घ्य, अमूल्य.

Prick, *v. t.* व्यध् 4 P, निर्-,भिद् 7 P, तुद् 6 P, पीड् 10; व्यध् c. (व्यधयति), क्लिश् 9 P or c. 2 प्रेर् c., उत्तिज् c., प्रोत्सह् c., प्रणुद् 6 P or c. 3 (Ears) उन्नम् c. (नमयति), उच्छ्रि 1 U, स्तब्धीकृ 8 U; 'with ears p. ed' स्तब्धकर्ण. **-s.**, **-ing**, *s.* प्रतोदः, तोत्रं,तोदनं; सूचि *f.*, शल्यं, कंटकः. 2 वेधः-धनं, तोदनं. 3 यातना, तीव्रव्यथा, आतंकः, शूलः-लं. **-ed**, *a.* विद्ध, भिन्न, शल्य-सूचि-विद्ध-भिन्न; 'p. at heart' भिन्न-विद्ध-मर्मन्. **-er**, *s.* वेधकः. 2 तोत्रं; *See* (*s.*).

Prickle, *s.* कंटकः, सूचि-ची *f.*, शल्यं, शूकं. **-y**, *a.* सकंटक, सशूक, बहुकंटक-शूक.

Pride, *s.* (Good) अभिमानः. 2 अहंकारः, गर्वः, उत्सेकः, अवलेपः, दर्पः, औद्धत्यं, मदः, मादः, आटोपः, अहंमानः, मानः, चित्तसमुन्नति *f.*, अवष्टंभः, चित्तोद्रेकः, स्मयः; (impudent) प्रागल्भ्यं, धृष्टता, प्रतिभा-भानं. 3 अलंकारः, अवतंसः, ललामं,अभिमानास्पदं-भूमिः. **-v. t.** (Oneself upon) आत्मानं श्लाघ् 1 A or विकत्थ् 1 A, अभिमन् 4 A, or ex. by (*s.*): 'p.-ing himself on his learning' पंडितमानी, पंडितंमन्यः, विद्याभिमानी, जातज्ञानावलेपः; 'p. ing herself upon her beauty' रूपगर्विता. **-Proud**, *a.* (In a good sense) अभिमानिन्. 2 दृप्त, गर्वित, अवलिप्त, सगर्व, सदर्प, उत्सिक्त, उद्धत, उत्सेकिन्, अभिमानिन्, साटोप, साहंकार; अहंमानिन्, उत्-, मत्त, समुन्नद्ध; प्रगल्भ, धृष्ट, प्रतिभावत्, गर्विताचित्त, मदोद्धत; दर्पाध्मात, स्मयाकुल. 3 (Building &c.) उत्तुंग, प्रोच्छ्रित, विशाल, सप्रताप; 'p. of one's birth' कुलाभिमानिन्; रूपगर्वित, यौवनोन्मत्त, &c, 'to be p.' दृप् 4 P गर्व् 1 P, प्रगल्भ् 1 A **-ly**, *adv.* सदर्पं, सगर्वं, सावलेपं, साटोपं, साहंकारं, उद्धतं.

Priest, *s.* (Family) पुरोहितः, पुरोधस् *m.* कुलाचार्यः. 2 (Sacrificial) ऋत्विज् *m.*, याजकः, अध्वर्युः,होतृ *m.* याज्ञिकः 3(Vedic) श्रोत्रियः, मंत्रविद् *m.*, ब्राह्मणः, द्विजः, विप्रः. 4 आचार्यः, गुरुः, उपाध्यायः, पुरोहितः, धर्माचार्यः, धर्माध्यक्षः. 5 (Of a deity) पूजकः, उपासकः, अर्चकः; 'p.-craft' उपाध्यायच्छलं-कैतवं; 'p. ridden' पुरोहिताधीन. **-ess**, *s.* होत्री, याज्ञिका. **-hood**, *s.* पौरोहित्यं, उपाध्यायपदं-वृत्ति *f.*, 2 पुरोहिताः,पुरोहित or याज्ञिक-गणः or वर्गः, पौरोहित्यं. **-ly**, *a.* याजकीय, पौरोहित्यसंबंधिन्, (*s.*) in comp.

Prig, *s.* दांभिकः, दंभिन् *m.*, रूपगर्वितः. **-gish**, *a.* दांभिक (की *f.*), आत्माभिमानिन्.

Prim, *a.* अतिविनीत, अतिसूक्ष्म.

Prime, *s.* आदिः, आरंभः, पूर्व-प्रथम-भागः. 2 उत्तमदशा, प्रौढता, उत्तमभागः-अंशः; 'in the p. of youth' प्रथमे वयसि ; the p. of youth' प्रथमं वयः, नव-अक्षत-यौवनं, यौवनश्रीः; 'being in the p. of youth' अक्षत-नव-यौवन. **-a.** प्रथम, आद्य. 2 मुख्य, प्रधान, प्रमुख, अग्र्य; 'p. minister' मुख्यमंत्री, प्रधानामात्यः, महामंत्री. 3 उत्कृष्ट, श्रेष्ठ, परम, उत्तम, विशिष्ट; *See* **Principal**. **-ly**, *adv.* प्रथमं, श्रेष्ठं. **-ness**, *s.* उत्तमता, विशिष्टता. **-Primary**, *a.* प्रथम, आद्य, आदिम, पूर्व, मौल (ली *f.*), मूल-आदि in comp.; 'p. cause' आदिकारणं-बीजं, निदानं, मूलहेतुः; 'p. sense' मूलार्थः. 2 प्रधान, मुख्य, प्रमुख, अग्र्य; *See* **Prime**. **-ily**, *adv.* प्रथमं-मतः, आदौ, पूर्वं, मुख्यशः, प्राधान्येन. **-iness**, *s.* प्रथमता, प्राधान्यं. **-Primate**, *s.* प्रधानोपाध्यायः. **-Primer**, *s.* प्रथम-आरंभ-पुस्तकं. **-Primeval**, *a.* आद्य, आदिम, प्राक्कालीन, पूर्वकालीन, प्राक्तन (नी *f.*), मौलिक-प्राथमिक- (की *f.*). **-Primitive**, *a.* प्राथमिक, प्रथम, आद्य, *See* **Primeval**. 2 मूल in comp., अव्युत्पन्न; *See* **Primary**. 3 प्राक्तनमार्गसेविन्. **-ly**, *adv.* आदौ, आरंभे, प्रथमं-मतः. 2 प्राक्तनव्यवहारानुसारेण.

Primogenial, *a.* प्रथम-आदि-जात, मूल in comp.

Primogenitor, *s.* प्रथम-कुल-पुरुषः. **-Primogeniture**, *s.* पूर्वजत्वं, ज्येष्ठत्वं, अग्रजत्वं, वयोज्येष्ठता.

Primordial, *a.* आद्य; बीजभूत, मौल (ली *f.*), *See* **Primeval**.

Prince, *s.* कुमारः, राजपुत्रः-सुतः, युवराजः. 2 नृपः, राजन् *m.*, पार्थिवः; *See* **King**. 3 भर्तृदारकः, कुमारः, (in dramas). **-dom**, *s.* राज्यं, राष्ट्रं, विषयः. 2 यौवराज्यं. **-like**, **-ly**, *a.* राजयोग्य-सदृश (शी *f.*),राजार्ह,नृपोचित,नृपोपम, राजकीय, प्रतापवत्, ऐश्वर्यवत्, प्रताप-वैभव-शालिन्. 2 राजवंश्य, राजकुलज; 'p. birth' राजवंशप्रसूतिः, 'p. merits' राजोचिता गुणाः **-Princess**, *s.* कुमारी, राजपुत्री, नृपात्मजा, नृपसुता; भर्तृदारिका.

Principal, *s.* अध्यक्षः, अधि-,पतिः, नायकः, मुख्यः; *See* **Leader**. 2 मूलं,मूलधनं, नीवि-वी *f.*, परिपणः. **-a.** मुख्य, परम, प्रधान-वर in comp., प्रमुख, अग्र, अग्र्य, प्रवर, श्रेष्ठ, विशिष्ट,उत्कृष्ट, उत्तम, अनुत्तम, वर्य, वरेण्य, परार्ध्य, अग्रि(ग्री)य, प्राग्रहर; नायक, अग्रणी, मुखर, धुर्य, धुरीण, धूर्वह, धुरंधर, oft. ex. by व्याघ्र, पुंगव, ऋषभ, कुंजर, सिंह, शार्दूल, नाग, प्रकांड, in comp.: *See* **Excellent**, 'p. door' सिंहद्वारं; 'p. queen' अग्र-पट्ट-महिषी; 'p. minister' प्रधानामात्यः. **-ity**, *s.* राष्ट्रं, प्रदेशः, मंडलं,

राज्यं. **-ly,** *adv.* प्रधानतः, प्राधान्येन, मुख्यशः, विशेषतः, विशेषेण.

Principle, *s.* तत्त्वं, मूलतत्त्वं, बीजं, सारः. 2 कारणं, हेतुः, आदिबीजं-हेतुः, मूलं, अंगं, अवयवः, साधनं, मूलांगं-द्रव्यं. 3 नियमः, विधिः, सूत्रं, उत्सर्गः, स्थिति *f.*, व्यवस्था. 4 गुणः, भावः, धर्मः, स्वभावः. 5 क्रमः, रीति *f.*, मार्गः, मर्यादा, धारा, पद्धति *f.* 6 आधारः, आश्रयः, उपष्टंभः, मूलं; (opp. of practice) आगमः, शास्त्रं; 'grounded in p. s' आगमिन्, शास्त्रनिपुण, 'having good p.s' सुनियमनिष्ठ, सुवृत्त; 'of bad p. s.'; खंडितवृत्त, भ्रष्टचरित.

Print, *v. t.* मुद्रयति (D.). अंक् 10. मुद्राक्षरैः अंक्. **-s.** चिह्नं, अंकः. मुद्रा; 'foot-p.' पदं, पदमुद्रा-चिह्नं. 2 मुद्रणयंत्रं. 3 मुद्रणं; 'in p.' मुद्र्यमाण. **-ed,** *a.* मुद्रित, मुद्रांकित, मुद्राक्षरांकित. **-er,** *s.* मुद्रकः; मुद्रणकृत् *m.* **-ing,** *s.* मुद्रणं, मुद्रांकनं, 'p.-house' मुद्रणयंत्रालयः, मुद्रणशाला; 'p. press' मुद्रणयंत्रं.

Prior, *a.* प्रधान, गरीयस्, गुरुतर, पूर्व, अग्र्य, आदिम, आद्य, पूर्व-आदि-प्राक् in comp.; 'p. existence' प्राग्भावः, पूर्वं जन्म; 'p. and subsequent' पूर्वापर, परापर, परावर. **-s.** मठाध्यक्षः, मठाधिपतिः, विहारपालः. **-ity,** *s.* पूर्वता, प्रथमता. 2 (Of rank) अग्रपदं-मानः; श्रेष्ठपदं, प्राधान्यं. **-y,** *s.* मठः-विहारः, आश्रमः.

Prism, *s.* क्रकचायतं. **-Prismatic,** *a.* क्रकचायत.

Prison, *s.* कारा, बंदिशाला-गृहं, बंधनालयः, कारागृहं, चारः-रकः, गुप्तिस्थानं; 'escaped from the p.' बंधनं भित्त्वा पलायांचक्रे; 'keep in p.' बंधने निरुध् 7 U. **-er,** *s.* बंदि-दी *f.*. कारागुप्तः, रुद्धः, कारागारस्थः. 2 (Of war) युद्धगृहीतः.

Pristine, *a.* प्राक्तन (नी *f.*), पुराण, पूर्व, पूर्वकालिक (की *f.*), प्राचीन, प्राक्कालीन.

Private, *a.* विजन, विविक्त, निर्जन, एकांत, निभृत, निःशलाक. 2 स्व, आत्मीय, असाधारण (णी *f.*). असामान्य, विविक्त, स्व-आत्म in comp. 3 गुप्त, गूढ, रहस्य, प्र-,छन्न, अप्रकट, अव्यक्त, रहस्-मिथः-अंतः-in comp. 4 अनधिकारिन् अनाधिकारिक (की *f.*); 'p. profit' आत्महितं, स्वलाभः; 'p. road' गूढ-प्रच्छन्न-मार्गः; 'p. door' अंतर्द्वारं, गूढद्वारं, प्रच्छन्नं; 'p. apartments' अंतःपुरं. अवरोधगृहं, अंतर्गृहं; 'now is the time to be p.' रहस्यमधुना (Bh. II 97); 'p. talk' रहःसंकथा, मिथोजल्पः; 'p. parts' गुह्यं, उपस्थः; 'p. room' अंतःशाला-कोष्ठः, उपरोधकं. **-s.** सैनिकः. **-ly,** 'in p.' *adv.* रहः, रहसि, मिथः, रहस्ये. निभृतं, विविक्ते, एकांते, विजने, उपांशु, गूढं, प्रच्छन्नं, गुप्तं, अप्रकाशं, अप्रकटं. **-ness,** **Privacy,** *s.* रहस् *n.*, विविक्तं, विजनं, रहोभावः, विविक्त-एकांत-वासः; रहस्यं, गुप्तता, छन्नता, अप्राकाश्यं. 2 रहः-स्थानं-स्थलं, विविक्त-निर्जन-स्थानं, निर्जनदेशः.

Privation, *s.* अभावः, विरहः, राहित्यं, हानि *f.*. क्षयः, लोपः, नाशः. 2 कष्टं, कृच्छ्रं, आपद्-विपद् *f.* 3 आहारविरहः, आहाराभावः, सुखसाधनलोपः, अन्नवस्त्रहानिः. **-Privative,** *a.* हानि-क्षय-लोप-कर (री *f.*). 2 अभावात्मक, अभावरूप, अभाववाचिन्. **-s.** अभावशब्दः, नञ्पदं. **-ly,** *adv.* अभावरूपेण.

Privilege *s.* विशेषाधिकारः, असामान्याधिकारः, स्वाधिकारः, अधिकारः, स्वत्वं. **-v. t.** विशेषाधिकारं दा 3 U. **-ed,** *a.* अधिकारविशिष्ट, साधिकार, विशेषाधिकारयुक्त.

Privy, *a.* गूढ, प्रच्छन्न, विविक्त, रहः in comp.; *See* **Private.** 2 (To) संसर्गिन्, सहाय, सहकारिन्; सहज्ञानिन्, सहवेदिन्, 'p. council' गूढसभा; 'p. councillor' गूढसभासद्. **-s.** शौचस्थानं-कूपः, उच्चारप्रस्रावस्थानं. **-ly,** *adv.* रहसि, गूढं; *See* **Privately.** **-Privity,** *s.* सहकारिता, सहायता, संसर्गः, सहज्ञानं. 2 गुह्य or गुप्तस्थानं or इंद्रियं, अधोंगं.

Prize, *s.* पारितोषिकं, उपायनं, प्रतिफलं. 2 रत्नं, बहुमूल्यं वस्तु, महार्घद्रव्यं. 3 युद्धजितं धनं-द्रव्यं. 4 जय or सिद्धि-फलं or लाभः. 5 स्पर्धा-पण-जेयं, पणः; 'p.-fighter' मल्लः; 'p.- fighting' मल्लयुद्धं, स्पर्धायुद्धं. **-v. t.** बहु मन् 4 A, अवेक्षया पा c. (पालयति), संमन् c. 2 मूल्यं-अर्घं-निरूप् 10 or निर्णी 1 P. **-ed,** *a.* बहुमत, अभीप्सित, इष्ट.

Pro, *Prefix,* प्र, अग्रे; 'p. s and cons.' विधिनिषेधपक्षौ.

Probable, *a.* संभाव्य, सत्यसंकाश; gen. ex. by सं-भू 1 P, उप-पद् 4 A, युज् pass. or by (*adv.*); 'It is p.' एतत् उपपद्यते, संभवति, युज्यते, स्यान्नाम एवं. **-Probably,** *adv.* प्रायेण, प्रायः, प्रायशः, किल, नाम, स्यात्; by pot. pass. part. of भू; एतेन मम प्रियमित्रेण भाव्यं 'he is p. my dear friend.' **-Probability,** *s.* संभवः, संभाव्यता, अनुमानं, better by (*adv.*).

probate, *s.* मृतलेखप्रमाणं.

Probation, *s.* परीक्षा-क्षणं. **-ary,** *a.* परीक्ष्यमाण. **-er,** *s.* परीक्ष्यमाणः; अंतेवासिन् *m.*, नवशिष्यः, प्राथमकल्पिकः.

Probe, *s.* शलाका, एषणी. **-v. t.** शलाकया परीक्ष् 1 A. 2 निपुणं-सूक्ष्मं-परीक्ष् or आलोच् 10. **-ator,** *s.* परीक्षकः. **-ing,** *s.* क्षतपरीक्षणं.

Probity, *s.* *See* **Honesty.**

Problem, *s.* प्रश्नः, विकल्प or विवाद-प्रश्न or विषयः. 2 कृत्यं, उपपाद्यं. 3 (Question) उद्देशकः (in Math.); ' its solution ' न्यासः (Lit.). **-atical,** *a.* संदिग्ध, अनिश्चित, वैकल्पिक (की *f.*).

Proboscis, *s.* प्रोथः, करः, शुंडा, हस्तः.

Proceed, *v. i.* प्रचल् 1 P, प्र-या 2 P, प्रगम्-सृ 1 P, अग्रे गम्, प्र-स्था 1 A. 2 प्रवृत् 1 A, न विरम् 1 P; ' the play still p. s ' क्रीडा अद्यापि प्रवर्तते एव. 3 पुनः वक्तुं प्रवृत्. 4 प्रवृत्, आरभ् 1 A, प्र-उप-क्रम् 1 A;(with) प्रस्तु 2 U or c , प्रवृत् c., (प्रारब्धं) सं-पद् c.,निष्पद् c., निर्वह् c.;'p. with your tale' ततस्ततः, ततः, परं कथय; ' p with the matter at issue ' प्रस्तूयतां विवादवस्तु (M. 2); ' you may p. with your dinner preparations in honor of the worthy Brāhma*nas* ' प्रवर्त्यतां भगवतो ब्राह्मणानुद्दिश्य पाकः (Mu. I). 5 प्र-उत्-सं-भू 1 P, प्रवृत्, उत्पद् 4 A. प्र-,जन् 4 A, उद्-इ 2 P, निःसृ, निर्गम्; oft. ex. by कारणं, मूलं, निमित्तं, हेतुः; ' from what cause does thy disorder p. ' किंनिमित्तं ते संतापः (S. 3). 6 (Against) अभियुज् 7 A, 10, राजकुले निविद् c. **-ing,** *a.* उत्पन्न, जात, प्रभव, उद्भव, उत्थित, मूल, कारण, निमित्त, हेतु in comp. *See* (*v.*). **-s., -Procedure,** *s.* कार्यं, व्यवहारः, व्यापारः, चरितं, चेष्टितं, आचारः, वृत्तं, कृति *f.*, विधानं, अनुष्ठानं. 2 रीति *f.*, क्रमः, संप्रदायः, मार्गः, पर्यायः; ' legal p. ' व्यवहारविधिः, व्यवहारक्रमः.**-Proceeds,** *s.* उत्पन्नं, उदयः, लाभः, फलं. **-Process,** *s.* प्रसरः, प्रगमः, प्रवृत्तिः, यानं. 2 क्रमः, रीतिः, मार्गः, पर्यायः, विधिः, गतिः, परिपाटि-टी *f.*,सरणि-णी *f.*, पद्धति *f.* 3 व्यवहारः, कार्यं; 'in p. of time' कालक्रमेण, दिनेषु गच्छत्सु, गच्छता कालेन. **-Procession,** *s.* यात्रा, जन or लोक-यात्रा or श्रेणी . 2 प्रगमनं, प्रस्थानं, प्रचलनं, प्रवृत्तिः **-al,** *a.* यात्रारूपं.

Proclaim, *v. t.* घुष् 10, उत्-वि°-, प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रकटयति (D.), प्रकटीकृ, कृत् 10, उच्चर् c. 2 **Outlaw,** q. v. **-er,** *s.* घोषकः, प्रख्यापकः. **-Proclamation,** *s.* घोषः-षणं-णा, ख्यापनं, प्रकाशनं, उत्कीर्तनं; ' written p. ' घोषणपत्रं, राजाज्ञापत्रं.

Proclivity, *s.* प्रावण्यं, प्रवृत्ति *f.*, शीलता in comp. **-Proclivious,** *a.* प्रवण, शील in comp.

Procrastinate, *v.* विलंब् 1 A, व्याक्षिप् 6 P, कालं क्षिप् or हृ 1 P, चिर(रा)यति (D.), मंदायते (D.). **-ion,** *s.* विलंबः, दीर्घसूत्रता, व्याक्षेपः, कालयापनं-हरणं-क्षेपः. **-or,** *s.* दीर्घ-सूत्रः-त्रिन् *m.* चिरक्रियः.

Procreate, *v. t.* प्र-सू 2, 4 A, उत्पद् c., जन् c. (जनयति). **-ion,** *s.* प्रसवः, प्रसूति *f.*, जननं, उत्पत्ति *f.*, प्रजोत्पादनं. **-ive,** *a.* उत्पादक, सावक, जनयितृ. **-or,** *s.* जनकः, उत्पादयितृ *m.*

Proctor, *s.* प्रतिहस्तः, प्रतिनिधिः.

Procumbent, *a.* शयान, पतित.

Procure, *v. t.* आ-नी 1 P, सं-पद् c., घट् c. (घटयति). 2 लभ् 1 A, आप् 5 P, अधि-गम् 1 P, विद् 6 U, आ-समा-सद् c.; *See* **Get.** **-er,** *s.* प्रापकः, संपादकः. 3 विटः, नर्मसचिवः, संचारकः, कुंडाशिन् *m.* **-ess,** *s.* कुट्ट(ट्टि)नी, शंभली, दूती-तिका, संचारिका, सु-,रततालो.

Prodigal, *a.* मुक्तहस्त, अति-अमित-बहु-व्ययिन्, उत्सर्गिन्, अतिव्ययशील-पर, अतित्यागिन्. **-s.** मुक्तहस्तः, व्ययपरः. **-ity,** *s.* अतिव्ययः, अपचयः, बहु-अमित-व्ययः, अतित्यागः, अत्युत्सर्गः, अर्थोत्सर्गः, मुक्तहस्तत्वं. **-ly,** *adv.* महाव्ययेन, मुक्तहस्तेन, अत्युत्सर्गेण.

Prodigy, *s.* अद्भुतं; अद्भुत or अपूर्व-विषयः or वस्तु, उत्पातः, महाश्चर्यं, अनन्यसाधारणं वस्तु. 2 (Of persons) अद्भुतशक्ति, अद्भुतबुद्धिसंपन्न. **-ious,** *a.* महाप्रमाण, अतिमहत्-बृहत्, विकट-राक्षस-शरीर, अद्भुताकारः *See* **Giant.** 2 अद्भुत, अपूर्व, विलक्षण, विचित्र, आश्चर्य **-iously,** *adv.* अद्भुतं, साश्चर्यं. **-iousness,** *s.* अद्भुतता, अतिमहत्त्वं.

Produce, *v. t.* निर्मा 3 A, 2 P, सृज् 6 P, उत्पद् c., जन् c. (जनयति), उत-सं-भू c., साध् 5 P or c., कृ 8 U, वि-धा 3 U, क्लृप् c., घट् c., (घटयति), वि-,रच् 10. 2 प्र-,सू 2, 4 A, उत्पद् c., सं-प्र-जन् c. 3 प्र-,दृश् c., आ-उपा-नी 1 P, प्रसृ c., पुरस्कृ, पुरोनि-धा, अग्रे स्था c. (स्थापयति) or निविश् c., आविष्कृ, प्रकटीकृ, निष्कृष् 1 P. 4 प्र-,दा 3 U. 5 वृध् c. **-s.** फलं, उत्पन्नं, लाभः, उत्पत्ति *f.*, प्रसवः. **-ed,** *a.* उत्पन्न, उत्पादित, निर्मित, घटित, सृष्ट, जनित, जात, उद्भूत; ' to be p. ' जन् 4 A, उत्पद् 4 A, उत्था 1 P, सं-उद्-भू 1 P; *See* **Arise;** gen. ex. by ज, जात, जन्य, प्रभव, उद्भव, हेतु, प्रवृत्त, प्रयुक्त in comp.; ' p. from water ' अंभोज, जलोद्भव, &c.: ' p. from flowers ' कुसुमभव &c. **-er,-ing,** *s., a.* उत्पादक, प्रसविन्, प्रद, द, दायिन्, आवह, कारिन्, कर (री *f.*), in comp. **-Product,** *s.* फलं, उत्पन्नं, लाभः. 2 परिणामः, फलं, उत्तरफलं. 3 गुणनफलं, वधः, घातः, फलं, गुणाकारः. **-ion,** *s.* उत्पादनं, निर्माणं, सृष्टि *f.*, घटनं, विधानं, निष्पादनं. 2 जननं, उत्पत्तिः, प्रसवः, उद्भवः, संभवः, जन्मन् *n.* 3 निर्मितद्रव्यं-वस्तु, शिल्पनिर्माणं. **-ive,** *a.* शस्यप्रद-दायिन्, सफल, अवंध्य. 2 उत्पादक; दायिन्,

द, प्रद, कारिन्, आवह in comp ; 'p. of gain' लाभप्रद, लाभावह. 3 लाभ or फलप्रद [or कर.

Proem, *s.* *See* **Preface.**

Profane, *v. t.* अपवित्रीकृ 8 U, दुष् c. (दूषयति). 2 लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अतिचर् 1 P. 3 **Contemn,** q. v. **-***a.* अपवित्र; अपुण्य, अमेध्य, अशुद्ध; not **Holy** q. v. 2 अधार्मिक (की *f.*), धर्म-ईश्वर-द्वेषिन्, धर्म-ईश्वर-निंदारूप. 3 असंस्कृत, अप्रतिष्ठित, संस्कारहीन. 4 लौकिक-सांसारिक-प्रापंचिक-(की *f.*). **-ation,** *s.* दूषणं, अपवित्रीकरणं, अतिक्रमः-मणं. **-ly,** *adv.* धर्मनिंदापूर्वं, अधार्मिकवत्. **-ness,** *s.* धर्म or ईश्वर-निंदा- or द्वेषः, धर्म or ईश्वर-अवज्ञा or अतिक्रमः.

Profess, *v. t.* प्रति-ज्ञा · A, प्रकाश् c., प्रतिज्ञापूर्वं कथ् 10 or वद् 1 P, स्वी-अंगी-कृ 8 U, उ(ऊ)रीकृ, अभ्युपगम् 1 P. 2 छद्म-छलं-कृ, दृश् c., भू c.; *See* **Pretend,** oft. by नाम; तव कन्या नाम भवेयं (D. K. II. 5) 'I shall p. myself to be your daughter'. 3 उद्यम् 1 A, चेष्ट् 1 A. **-ed,** *a.* स्वीकृत, अंगीकृत, प्रकाशित, प्रकटित, व्यक्तोदित, प्रकाश. **-edly,** *adv.* प्रतिज्ञापूर्वं, प्रकाशमेव, सप्रतिज्ञं. **-ion,** *s.* प्रतिज्ञा, उक्ति *f.*, वचनं, अंगी-स्वी-कारः, प्रकाशवादः-वचनं, ख्यापनं. 2 **Pretension,** q. v.; 'p.s of love' कृत्रिमप्रीतिः, अलीकः रागाविर्भावः. 3 वृत्ति *f.*, आ-उप-जीविका, आजीवः, व्यवसायः, व्यापारः; 'military p.' शस्त्राजीवः, क्षत्रवृत्तिः. **-ional,** *a.* वृत्तिमत्, व्यवसायिन्, (*s.*) in comp. **-or,** *s.* अध्यापकः, गुरुः. 2 ख्यापकः, प्रकाशकः, प्रतिज्ञातृ *m.*, स्वीकर्तृ *m.* **-orship,** *s.* अध्यापकपदं-पदवी.

Proffer, *v.* *See* **Offer.**

Proficient, *a.* प्रवीण, कुशल, निपुण, अभिज्ञ, विचक्षण, पारंगत, अभ्यंतर, निष्णात, व्युत्पन्न, लब्धप्रतिष्ठ, पटु. **-Proficience,-cy,** *s.* प्रावीण्यं, वैचक्षण्यं, प्रतिष्ठा, कौशलं, पाटवं; 'has attained p. in all sciences' सर्वशास्त्रेषु परां प्रतिष्ठां गतः, परं कौशलमवाप, सकलशास्त्रपारंगतः.

Profile, *s.* पार्श्वदृश्यं, अर्धमुखदर्शनं.

Profit, *s.* लाभः, हितं, उपकारः, अर्थः, कल्याणं. 2 फलं, लाभः, आयः, उदयः, वृद्धि *f.*, कलांतरं, लभ्यं; 'p. and loss' लाभालाभौ; 'capital with p. thereon' मूलकलांतरे. **-***v. t.* हितमावह् 1 P, उपकृ 8 U, हिताय भू 1 P. **-***v. i.* (Oneself) फलं-लाभं-प्राप् 5 P or विद् 6 U. 2 वृध् 1 A, उन्नतिं-उत्कर्षं-या 2 P, प्र-उप-चि pass.; *See* **Improve.** **-able,** *a.* लाभ-अर्थ-कर (री *f.*), लाभप्रद, लाभ-फल-द, फल-लाभ-आवह. 2 हित, हितकर, हितावह, उपयुक्त, उपकारिन्, सोपकार. **-ableness,** *s.* साफल्यं, फलवत्ता, उपयुक्तता. **-ably,** *adv.* सलाभं, सफलं, सहितं, अमुधा. **-less,** *a.* निष्फल, अफल, अहित, व्यर्थ, निरर्थक.

Profligate, *a.* खंडितवृत्त, दुश्चरित्र, दुराचार, पाप-निरत-अभिनिविष्ट, व्यसनिन्, दुर्वृत्त, भ्रष्ट-नष्ट-चारित्र, भोग-विषय-आसक्त. **-***s.* व्यसनिन् *m.* लंपटः, विषयिन् *m.* भोगासक्तः. **-ly,** *adv.* सव्यसनं, दुर्वृत्ततया. **Profligacy,** *s* व्यसनिता, भ्रष्टचरितं, दुराचारः, भ्रष्टता, भोगासक्ति *f.*, दुर्वृत्तता.

Profound, *a.* प्र-,गाढ, अतिग(गं)भीर, घन, अगाध. 2 परम, गाढ, घन, अत्यंत, सु-अति-pr.; 'p. respect' परमादरः, आदरातिशयः. 3 गहन, नि-,गूढ, गूढार्थ, दुर्बोध, दुर्ज्ञेय परमगहन. 4 (Of persons) निष्णात, पारंगत, परम, व्युत्पन्न, अभिनिविष्ट, गूढतत्त्वज्ञ **-ly,** *adv.* गंभीरं, गाढं, अत्यंतं, भृशं, सु-अति pr. **-ness, Profundity,** *s.* गांभीर्यं, अगाधता. 2 घनता, गाढता. 3 गहनता, गूढता. 4 अभिनिवेशः.

Profuse, *a.* प्रचुर, प्रभूत, अपरिमित, विपुल, बहु, अत्यधिक, अतिरिक्त, समृद्ध, उद्रिक्त, अतिशय-सु-अति in comp. 2 मुक्तहस्त, अतिव्ययिन्, व्ययपर; *See* **Prodigal;** 'he is a p. writer' वागुपचयप्रियः, प्रचुरवाक्यानि लेखे प्रयोजयति **-ly,** *adv.* प्रचुरं, भृशं, भूरि, बाहुल्येन, अत्यंतं, सु-अति pr.; अतिव्ययेन, अपरिमितं **-ness,-Profusion,** *s.* अतिव्ययः, अमितव्ययः, अत्युत्सर्गः. 2 समृद्धि *f.*, प्राचुर्यं, उद्रेकः, अतिरेकः, उपचयः, बाहुल्यं.

Prog, *s.* भोजनं, अन्नं, भैक्ष्यं.

Progenitor, *s.* पितृ *m.* प्रजापतिः, पूर्वजः, पूर्व-कुल-पुरुषः, जन्मदः, जनयितृ *m.* *See* **Ancestor.**

Progeny, *s.* संतानः, अपत्यं, संतति *f.*, प्रजा.

Prognostic, *s.* निमित्तं, अजन्यं, शकुनः-नं, लक्षणं; *See* **Omen.** **-***a.* प्र-उद्-बोधक, अग्रसूचक. **-ate,** *v. t.* पूर्व-अग्रे-सूच् 10 or दृश् c.; *See* **Forebode.** **-ation,** *s.* पूर्वसूचनं-ना. **-ator,** *s.* पूर्वलक्षणज्ञः, अग्रसूचकः.

Programme, *s.* सूचिपत्रं; कार्यक्रमः-परिपाटी.

Progress, *s.* प्र-,वृद्धि *f.*, उत्कर्षः, क्रमशः वृद्धिः, उत्कर्षक्रमः. 2 प्राप्ति *f.*, आगमः; 'p. in learning' विद्यागमः, विद्याभिनिवेशः. 3 प्र-गमनं, प्रयाणं, यानं, यात्रा, प्रस्थानं, प्रसरः, क्रमः-मणं, अयनं; *See* **March;** 'difficult p.' संक्रमः, दुर्गसंचरः. **-***v. i.* उत्कृष् pass., वृद्धिं-उन्नतिं-या 2 P, प्र-,वृध् 1 A, प्र-उप-चि pass.; *See* **Improve.** 2 प्रगम्-चल्-सृ 1 P, प्रया 2 P, प्रस्था 1 A; *See* **Advance.** **-ion,** *s.* श्रेढी, श्रेढीव्यवहारः; 'first term' मुखं, वदनं, आदिः; 'common difference' चयः; 'geometric mean' चयो गुणः; 'sum' श्रेढीफलं; 'number of terms' गच्छः. **-ive,** *a.* आनुक्रमिक (की *f.*),

क्रमिक, अधिकाधिक, उत्तरोत्तर, क्रमशः वर्धमान. **-ively,** *adv.* क्रमशः, अनुक्रमेण, उत्तरोत्तरं, अधिकाधिकं.

Prohibit, *v. t.* नि-प्रति-षिध् 1 P, प्रत्यादिश् 6 P, निवृ c., प्रत्या-ख्या 2 P, नि-अव-रुध् 7 U. **-ion,** *s.* नि-प्रति-षेधः, त्यादेशः, निरोधः, निवारणं, बाधा. **-or,** *s.* निवारकः, निषेधकः. **-ive, -ory,** *a.* निषेधक, निवारक. नि-प्रति-षेधिन्, निषेधार्थक,निषेधवाचिन्.

Project, *s.* उपायः, प्र-,युक्ति *f.*, कल्पना,:प्रयोगः. संकल्पः, प्रबंधः. **2** अभिप्रायः, आशयः, उद्देशः. **-v.** *i.* प्रलंब् 1 A, बहिर्लंब्, उपरि लंब्, बहिः स्था 1 P or भू 1 P or वृत् 1 A. **-v.** *t.* प्र-,क्षिप् 6 P, प्रास् 4 U, निपत् c., प्रमुच् 6 P; *See* **Throw. 2** (मनसा) क्लृप् c., निरूप् 10, चिंत् 10, युज 10, आलोच् 10, अनुसं-धा 3 U. **-ile,** *a.* प्रक्षेपणीय, दूरवेधिन्. **-s.** अस्त्रं; *See* **Missile. -ing,** *a.* प्र-,लंब, उन्नत, उदग्र, उत्तुंग, बहिर्वर्तिन्; oft. by उत्सेध, उत्सेधिन्; ' with a p. nose ' प्रलंबनास, घोणोन्नत, उन्नस; ' having p. teeth ' उदग्रदत्, करालदंत, ' having p. breasts ' स्तनाभोगवती, उन्नतस्तनी; 'shattered by falling over (her) p. breasts' पयोधरोत्सेधनिपातचूर्णिताः (K. v. 24). **-ion,** *s.* प्रलंबता, उदग्रता. **2** आभोगः, उत्सेधः; निर्यूहः, दंतकः. **3** छेद्यकं. **-or,** *s.* चिंतकः, योजकः.

Prolapse, Prolapsus, *s.* भ्रंशः. **-v.** *i.* भ्रंश् 1 A, 4 P.

Prolated, *a.* प्लुत (vowel), दीर्घोच्चारित.

Prolegomenon, *s.* प्रस्तावना, उपोद्घातः.

Prolepsis, *s.* पूर्वग्रहणं, पूर्वादानं.

Prolific, *a.* अवंध्य, बहुप्रज-प्रसव-अपत्य, प्रसवशील, सुतिन्, बहुसंतान. **2** बहुफलप्रद, बहुफल; *See* **Productive. -ally,** *adv.* प्राचुर्येण , विपुलं.

Prolix, *a.* सु-अति-विस्तर, प्रपंचित, सुदीर्घ, दीर्घसूत्रिन्, अत्यायत. **-ity,** *s.* अतिविस्तरः. प्रपंचः, वाग्विस्तरः-प्रपंचः, वागुपचयः; दीर्घसूत्रता, अतिविस्तारः. **-ly,** *adv.* विस्तरशः; अतिविस्तरेण, सप्रपंचं.

Prologue, *s.* प्रस्तावना, आमुखं, प्रास्ताविकी विज्ञप्तिः; ' benedictory p. नांदी.

Prolong, *v. t.* दीर्घीकृ 8 U, प्र-वि-तन् 8 U, वि-प्र-सृ c., विस्तृ c., आयम् 1 A or c. **2** व्याक्षिप् 6 P or विलंब् c.; ' a p. ed note ' तानः. **-ation,** *s.* विस्तारः, विततिः *f.*, आयतिः, दीर्घीकरणं.

Prolusion, *s.* *See* **Prelude.**

Promenade, *v. t.* विहृ 1 P, विचर् 1 P, विहारार्थं परिभ्रम् 1, 4 P. **-s.** विहारः, परिभ्रमणं. **2** विहारस्थानं.

Prominent, *a.* प्रधान, प्रमुख, श्रेष्ठ, मुख्य, विशिष्ट, परम; *See* **Principal. 2** सुस्पष्ट, सुप्रकाश, सुव्यक्त, सुदृश्य. **2** उन्नत, उदग्र, उत्तुंग, प्रलंब, साभोग, उत् pr.; *See* **Projecting. -ly,** *adv.* प्राधान्येन, विशेषतः. सुप्रकाशं, सुस्पष्टं, उन्नतं. **-Prominence,** *s.* प्राधान्यं, विशिष्टता, श्रेष्ठता, उत्कर्षः, परमपदं. **2** उन्नति *f.*, उत्सेधः, उत्तुंगता, आभोगः.

Promiscuous, *a.* प्र-सं-कीर्ण, संकुल, अविविक्त, निर्विशेष, अपरिच्छेद, अभेद, संमिश्रित 'p. union ' संकरः, सांकर्यं. **-ly,** *adv.* निर्विशेषं-षेण, संकीर्णं, अभेदेन, अक्रमेण, अपरिच्छेदेन. **-ness,** *s.* संकीर्णता, संकुलता, अभेदः, संकरः.

Promise, *v. t.* सं-प्रति-आ-श्रु 5 P, प्रति-ज्ञा 9 A, (with dat. of persons); स्वी-अंगी-कृ 8 U, अभ्युपगम् 1 P, अभ्युप-इ 2 P, संविद् 2 A, संगॄ 6 A, उ (ऊ) रीकृ, उररीकृ, परि-,पण् 1 A; the plan p. s to succeed ' उपायः सफलो भवेदित्यनुमीयते or अहं आशंसे; 'a p. ing boy' वर्धिष्णुर्बटुः, आशानिबंधनं. **-s.** प्रतिज्ञा, समयः, सं-प्रति-श्रवः, वचनं, संविद् *f.*, नियमः, संगरः, संकेतः, अभिसंधा, अभ्युपगमः, स्वीकारः, उरीकारः, अंगीकारः, परिपणनं. **2** आशा, आशंसा; 'hollow p. ' मुधावचनं, शब्दपांडित्यं, ' breaking a p. ' प्रतिज्ञा-वचन-भंगः, संविद्-व्यतिक्रमः; विसंवादः; keep or fulfil a p. ' प्रतिज्ञां पा c. (पालयति) or शुध् c., *See* **Keep, Fulfil:** 'p.breaker प्रतिज्ञालंघिन्-व्यतिक्रामिन्, विसंवादिन्; give a p. orally ' वाचा प्रतिज्ञा, वाग्दानं कृ. **-ory,** *a.* प्रतिज्ञाविशिष्ट.

Promontory, *a.* उदग्रभूमि *f.*, भूशिरस्-नासिका.

Promote, *v. t.* वि-,वृध् c., उपकृ 8 U, पुरस्कृ, प्रवृत् c., साध् c., उपचि 5 U, प्रयुज् 10; (a person) सं-,उन्नम् c. (नमयति), उन्नतिं नी 1 P or प्राप् c., पदं वृध् c. पदोत्कर्ष-प्रतिपत्तिं-प्राप् c., अधिकपदे नियुज्. **3 Prompt,** q. v. **-er,** *s.* प्रवर्तकः, उपकर्तृ *m.* *See* **Patron. -ion,** *s.* उपकारः, पुरस्कारः, प्रवर्तनं, साहाय्यं, वर्धनं, वृद्धि *f.*, उपचयः, उन्नतिः, उत्कर्षः, पदवृद्धिः, पदोन्नतिः, प्रतिपत्ति *f.*, श्रेष्ठपदावाप्ति *f.* **-ive,** *a.* प्रवर्तक, साधक, उपकारिन्.

Prompt, *a.* सत्वर, अविलंब; क्षिप्र, अविलंबित, अदीर्घसूत्र; (of persons) उद्यत, उद्युक्त, अविलंबिन्, आशुकारिन्, प्रत्युत्पन्नमति. सप्रतिभ, पटु, उद्यमिन्, उद्योगिन्. **-v.** *t.* प्र-उत्सह् c., प्रणुद् 6 P or c., प्रचुद् 10, प्रवृत् c., प्र-उद्-युज् 10 उत्तिज् c., प्र-रुच् c., आकृ c., उद्दीप् c., उत्था c. (उत्थापयति). प्र-उद्-बुध् c.; ' p. ed by hunger ' क्षुद्बोधित. **2** प्र-अनु-बुध् c., सूच् 10. **-er,** *s.* प्रोत्साहकः, प्रवर्तयितृ *m.*, प्रयोजकः, &c. **2** अनु-प्र-बोधकः, सूचकः; ' who seldom wanted a p. ' यः सदा प्रत्युत्पन्नमतिः, वचो.

धननिरपेक्षः. -**ing**, *s.* प्रेरणं, प्रोत्साहनं, उत्तेजनं, &c. **2** सूचना, प्रबोधनं. -**ness**, -**itude**, *s.* औत्सुक्यं, अविलंबः, उत्साहः क्षिप्रता. **2** प्रतिभा, प्रत्युत्पन्नमति *f.*, पटुता 3 उद्यमः, उद्योगः. -**ly**, *adv.* सत्वरं, अविलंबेन, क्षिप्रं, सद्यः, आशु, अचिरात्, सप्रतिभं.

Promulgate, *v. t.* प्रकाश् c., वि-,घुष् 10, कृत् 10, प्र-ख्या c. (ख्यापयति); *See* **Proclaim.** -**ion**, *s.* प्रकाशनं, घोषणं, कीर्तनं. -**or**, *s.* प्रकाशकः, घोषकः.

Prone, *a.* प्रवणं शील, आलु in comp., उद्यत, उन्मुख; *See* **Inclined, Apt**; 'p. to fall' पतयालु, पातुक, पतनशील. **2** (Bent) नत, नम्र, अधोवदन, अधोमुख-अवाङ्मुख-(खी *f.*). -**ness**, *s.* प्रावण्यं, प्रवृत्ति *f.*, उन्मुखता, शीलता, आलुता in comp. **2** अधोमुखता, नम्रता.

Prong, *s.* शूलः-लं, कंटकः, अग्रं, शिखा.

Pronoun, *s.* सर्वनामन् *n.*

Pronounce, *v. t.* उच्चर् c., उदीर् c., उदा-व्या-हृ 1 P, गद् 1 P, वद् 1 P प्र-,वच् 2 P, प्र-ख्या 2 P, कृत् 10; 'p. judgment' निर्णयं कथ् 10; उत्तरं दा 3 U, &c. **2** निश्चयेन वद्, दृढं प्रति-ज्ञा 9 A; 'imperfectly p. ed' ग्रस्त, असंपूर्णोच्चरित, लुप्तवर्ण-पद. -**Pronunciation**, *s.* उच्चारणं, उदाहरणं, उदीरणं; 'science of p.' शिक्षा; 'easy of p.' सुखोच्चार्य.

Proof, *s.* *See* under **Prove.**

Prop, *s.* आश्रयः, शरणं, आधारः, अवष्टंभः, आ-अव-लंबः-बनं, उपघ्नः. —*v. t.* धृ 1 P, 10, आ-अव-लंब् 1 A, अवष्टभ् 9 P: 'a tree that p. s another creeper' उपघ्नतरु.

Propaganda, *s.* धर्मप्रसारकसंस्था.

Propagate, *v. t.* विस्तृ c., प्रवृध् c., वि-प्र-तन् 8 U; वि-प्र-सृ c.; (opinions) प्रचर्-ल् c., प्रवृत् c. or संचर् c., प्रचलीकृ, प्रसृ c. **2** परंपरया उत्पद् c. or प्र-सू 2 A, प्रसवपरंपरया जातिं वृध् c. शावकान् प्रसू or जन् c. or उत्पद् c. -**ion**, *s.* प्र-,वर्धनं, प्रसारः, विस्तारः, वितति *f.*, प्र-,वृद्धि *f.*, प्रचारः-रणं. **2** परंपरोत्पत्ति *f.*, प्रसूतिपारंपर्य-क्रमः; प्रजा-संतानवृद्धि *f.* -**or**, *s.* प्रचारकः, प्रवर्तकः.

Propel, *v. t.* प्रेर् c.,:प्र-,नुद् 6 P, or c., संचल् c., प्रचुद् 10, सं-,चर् c., कृष् 1 P; *See* **Prompt.**

Propense, *a.* प्रवण, उन्मुख, आसक्त, उद्यत. -**ity**, *s.* प्रवणता, प्रवृत्ति *f.*, उन्मुखता, प्रावण्यं, प्रवाहः, शीलता-आलुता in comp.: 'p. to fall' पतयालुता; 'good p. सुशीलं, साधुवृत्तिः; 'evil p.' व्यसनं, दुर्गुणः, दुःशीलं.

Proper, *a.* स्वीय, निज, आत्मीय, स्व-आत्म in comp. **2** युक्त, योग्य, उचित, उपपन्न, अनुरूप, न्याय्य, संगत, सदृश (शी *f.*), यथार्ह, यथोचित, समंजस, पर्याप्त, सांप्रतिक (की *f.*); oft. ex. by pot. pass. part.; 'to be p.' युज् pass., उपपद् 4 A: 'it is p.' स्थाने; स्थाने व्रीडिता अप्सरसः (V. 1.), स्थाने भवान् अकिंचनत्वं व्यनक्ति (R. v. 16). -**ly**, *adv.* युक्तं, उचितं, यथार्हं, सम्यक्, स्थाने, न्यायतः, सांप्रतं, यथायोग्यं, धर्मेण. **2** यथार्थतः, परमार्थतः; तत्त्वतः, वस्तुतः; 'p. speaking' वस्तुतः, यथार्थदृष्ट्या. -**ty**, *s.* धर्मः, गुणः, लक्षणं, स्वभावः, विशेषः, रूपं, स्वरूपं, धर्मः, सहज-प्रकृति-गुणः. **2** स्वत्वं, स्वाम्यं, अधिकारः, प्रभुत्वं. **3** संपत्ति *f.*, द्रव्यं, अर्थः, धनं, वित्तं, वसु *n.*, विभवः; द्रव्य-अर्थ-जातं, रिक्थं; 'woman's p.' स्त्रीधनं, 'landed p.' भूमिधनं, भूमिः, स्थावरं धनं; 'public p.' गण-सामान्य-द्रव्यं; 'p. in cattle' गोधनं. -**Propriety**, *s.* युक्तता, औचित्यं, उपपत्ति *f.*, न्यायः, सामंजस्यं, योग्यता, याथार्थता, पात्रता, संगति *f.*, 'p. of conduct' विनयः, मर्यादा, अनतिक्रमः, सुचरितं.

Prophesy, *v. t.* भावि कथ् 10 or सूच् 10 or प्रदृश् c., अनागतं नि-आ-विद् c.; *See* **Predict.** -**Prophecy**, *s.* भाविकथनं-सूचनं, भविष्यद्वादः, आदेशः, भविष्यार्था, सिद्धादेशः. -**Prophet**, *s.* सिद्धः, भविष्यद्वादिन् *m.*, अग्रनिरूपकः, भाविकथकः, अनागत-विद्-दर्शिन्; 'saying of a p.' सिद्धादेशः. -**ess**, *s.* अनागतदर्शिनी, भविष्यद्वादिनी. -**ic**, -**ical**, *a.* (*s.*) in comp.

Prophylactic, *a.* रोगहारिन्-हृत्.

Propinquity, *s.* सन्निधिः, संनिकर्षः, सामीप्यं; *See* **Nearness.**

Propitiate, *v. t.* प्रसद् c., आराध् c., अनुरंज् c., सांत्व् 10, अनुनी 1 P, प्र-,शम् c. (शमयति), सं-परि-तुष् c. -**ion**, *s.* प्रसादनं, आराधनं, अनुरंजनं, सांत्वनं, अनुनयः; प्र-उप-शमः-मनं. -**or**, *s.* प्रसादकः, आराधयितृ *m.*, अनुरंजकः &c. -**ory**, *a.* शमक, सांत्वक, शांतिकर (री *f.*), शांतिप्रद; 'p. rite' शांतिक्रिया. -**propitious**, *a.* सु-प्रसन्न, सदय, अनुकूल, हितकाम - बुद्धि, अभिमुख (खी *f.*), प्रवणीकृत, अनुग्राहिन्, वरद. **2** शुभ, मंगल, कल्याण (णी *f.*), शर्मद, शुभंकर. -**ly**, *adv.* प्रसन्नं, अनुकूलं, सदयं, सानुग्रहं. -**ness**, *s.* प्रसादः, आनुकूल्यं, आभिमुख्यं, शुभता.

Proportion, *s.* प्रमाणं, परिमाणं; आनुगुण्यं, आनुरूप्यं, परस्पर-अन्योन्य-संबंधः-अन्वयः-अनुषंगः-सादृश्य-समता; अन्वयः, संबंधः; संधानं, संयोगः, संमिति *f.* (of limbs &c.) **2** अंशः, विभागः; *See* **Part. 3** अनुपातः, संबंधसाम्यं; 'in p. to' ex. by अनुगुण, अनुरूप, सदृश, प्रमाणतः, अनुसारेण, यथा in comp.; 'in p. to one's strength' यथाशक्ति, शक्त्यनुसारेण, शक्तितः; 'spend in p. to your gains' आयप्रमाणेन व्ययं कुरु; ' p. of limbs ' अंगसंयोगः, अवयवसंगतिः. **-**_v. t._, **-ate,** _v. t._ अनुरूपी-सदृशी-कृ 8 U, समीकृ, संमा 3 A, 2 P. **-al,** _a._ समप्रमाण, परस्परानुगुण. **-ate,-able,-ed,** _a._ अनुरूप, अनुगुण, सदृश, संमित, सम, तुल्य, अनुसारिन्; ' with jars p. to their size (strength)' स्वप्रमाणानुरूपैर्घटैः (S. 1). ' her body beautiful, being p.' चतुरश्रशोभि तस्या वपुः (K. I. 32). **-ately, -ably,** _adv._ अनुरूपं-पेण, अनुगुणं, अनुसारेण, सदृशं, यथाप्रमाणं, यथाभागशः.

Propose, _v. t._ प्र-स्तु 2 U, उपन्यस् 4 U, उपक्षिप् 6 P, प्रति-ज्ञा 9 A, सूच् 10, कर्तव्यं निर्दिश् 6 P or अभि-धा 3 U. **2** उद्दिश्, आकांक्ष् 6 P; _See_ **Intend. -al,** _s._ प्रस्तावः, उपन्यासः, उपक्षेपः, अभिधानं, प्रतिज्ञा, वचनं, कर्तव्यनिर्देशः. **-ition,** _s._ **Proposal,** q. v. **2** प्रतिज्ञा, सिद्धांतः, प्रमेयं.

Propound, _v. t._ प्रति-पद् c., उपन्यस् 4 U. उपक्षिप् 6 P, निर्दिश् 6 P, प्रति-ज्ञा 9 A.

Proprietor, _s._ स्वामिन् _m._ प्रभुः, ईशः, पतिः, अधिकारिन् _m._ _See_ **Owner. -ship,** _s._ स्वाम्यं, प्रभुत्वं, स्वामित्वं, अधिकारः. **-Proprietary,** _a._ स्वाम्यधीन, प्रभुनिष्ठ, स्वामिगत; ' p. right ' स्वाम्यं, अधिकारः, स्वत्वं.

Propulsion, _s._ प्रेरणा, चोदना.

Prorogue, _v. t._ व्याक्षिप् 6 P. (नियतकालं यावत्) विसृज् 6 P or त्यज् 1 P **-Prorogation,** _s._ कार्यत्यागः-निवृत्ति _f._, व्याक्षेपः.

Proscribe, _v. t._ घोषणापूर्वं दंडं आदिश् 6 P or बहिष्कृ 8 U or निर्वस् c., ' here is Jivasiddhi being disgraced and p. ed from the city ' एष जीवसिद्धिः सनिकारं नगरान्निर्वास्यते (Mu. 1). **2** निषिध् 1 P, निवृ c. **-Proscription,** _s._ सघोषण दंडाज्ञा.

Prose, _s._ गद्यं. **-**_a._ गद्यात्मक, गद्यरूप. गद्य in comp. **-Prosaic,** _a._ गद्यरूप, गद्यात्मक; गद्य in comp **2** नीरस, विरस, रस-सत्त्वहीन.

Prosecute, _v. t._ (नित्यं-अनवरतं) प्रवृत् c., अनुसृ 1 P, अनु-ष्ठा 1 P, अनु-सेव् 1 A, निर्वह् c., अनुशील् 10; ' p. studies ' अध्ययनक्रममनुसृ; ' p. one's efforts ' अनवरतं उद्यम् 1 A or प्रयत् 1 A; ' p. one's undertaking ' प्रारब्धं उद्वह् 1 P, प्रतिपक्षं निर्वह् c. **2** अभियुज् 7 A, 10, अभिशंस् 1 P; सूच् 10, निविद् c. **-ion,** _s._ अनुशीलनं, प्रवर्तनं, नित्यानुष्ठानं, नित्यप्रवृत्ति _f._, निर्वाहणं, अविरतानुसरणं. **2** अभियोगः, निवेदनं; 'p. of effort ' नित्योद्योगः; ' p. of study ' नित्याध्ययनं, अध्ययनक्रमः. **-or,** _s._ निर्वाहकः. **2** अभियोक्तृ _m._, वादिन् _m._, अर्थिन् _m._, अभिशंसकः.

Proselyte, _s._ परधर्माश्रयिन्, स्वधर्मत्यागिन्, पक्षांतर-मतांतर-ग्राहिन्; _See_ **Convert. -ize,** _v. i._ स्वधर्मं ग्रह् c., **-ism,** _s._ मतांतरग्रहणं, धर्मांतरस्वीकारः.

Prosody, _s._ छंदस् _n._, छंदःशास्त्रं. **-al,-ical,** _a._ छांदस (सी _f._), छंदः in comp. **-ian,** _s._ छंदःशास्त्रज्ञः.

Prospect, _s._ आलोकः, दर्शनं, चक्षुर्विषयः, दृग्गोचर-प्रदेशः विषयः. **2** आयति _f._, उत्तरापेक्षा; ' he has good p. s before him ' शुभा तस्यायतिः. **3** आशा, प्रत्याशा, आशंसा, अपेक्षा. **-ive,** _a._ उत्तर, उत्तरकालीन, भाविकालप्राप्य, उत्तरकालसापेक्ष; _See_ **Future. -ively,** _adv._ उत्तरकालापेक्षया.

Prosper, _v. i._ सं-, ऋध् 4, 5 P, प्र-वि-वृध् 1 A, स्फाय् 1 A, एध् 1 A, प्र-उप-चि pass., समृद्धिं-वृद्धिं या 2 P or उप-इ 2 P; ' I hope your (commercial) business is p. ing ' अपि प्रचीयंते संव्यवहाराणां लाभाः (Mu. 1). **2** सिध् 4 P, सं-पद् 4 A, सफलीभू 1 P, कृतार्थीभू. **-**_v. t._ वृध् c., प्र-उप-चि 5 U. एध् c., उपकृ 8 U, अनुग्रह् 9 P, सफलीकृ, साध् c., सिद्धिं नी 1 P. **-ity,** _s._ सं-, ऋद्धि _f._, संपद् _f._, संपत्ति _f._ अभ्युदयः, श्रीः, लक्ष्मीः, वि-, भूति _f._, सौभाग्यं, वैभवं, पुण्योदयः, ऐश्वर्यं; ' time of p. ' संपत्-समृद्धि-उदय-कालः-समयः. **2** समृद्धिः, उत्कर्षः, उन्नति _f._, उदयः, प्र-उप-चयः, वि-सं-वृद्धि _f._, साफल्यं, कृतार्थता, सिद्धि _f._ **3** क्षेमः-मं, कौशल्यं, कल्याणं, शुभं, शिवं, हितं, भद्रं. **-ous,** _a._ समृद्ध, श्रीमत्, समृद्धिमत्, लक्ष्मीवत्, सश्रीक, ऐश्वर्यशालिन्; (state &c.) वार्धिष्णु, प्र-उप-चीयमान, एधमान, वर्धमान; in p. days ' संपत्सु, अभ्युदयकाले, भूतिसमये, समृद्धिकाले. **2** सफल, सिद्ध, कृतार्थ, सिद्धार्थ; (happy) सुस्थ, निरापद, क्षेम, कुशल, कल्याण (णी _f._), शिव, भद्र, मंगल. शुभ, सौभाग्यवत्, धन्य. **-ously,** _adv._ समृद्ध्या, अभ्युदयेन, सुसंपदा, सौभाग्येन, शुभं, भद्रं.

Prostitute, _s._ वेश्या, वेशवधूः, गणिका, वारपण्य स्त्री-अंगना-योषित्, भोग्या, सामान्यस्त्री रूपाजीवा; (false to her husband) पुंश्चली, बंधकी, असती, कुलटा, स्वैरिणी, पांसु(शु)ला, धर्षिणी, इत्वरी. **-**_v. t._ निंद्यकर्मार्थं प्र-उप-विनि-युज् 1 A, 10 or व्यापृ c. **-ion,** _s._ वेश्याजीवः, वेश्या-गणिका-वृत्ति _f._, वारसेवा, बंधकीत्वं, पौंश्चल्यं, &c.

Prostrate, _a._ प्रणत, भूमिगत, साष्टांगप्रणत-पतित; ' lie or fall p. ' _See_ (_v._); ' p. on the bed ' शयनगत, शयने अवमूर्धशय, 'lying p. at the feet' चरण or पाद-पतित or प्रणत. **2** अवसन्न, क्षीण. **-**_v. t._ (Oneself)

दंडप्रणामेन-साष्टांगपातं-नम् 1 P or प्रणिपत् 1 P, दंडवत् पत्; नीचैः प्रणम् or प्रणिपत्. 2 नि-अव-पत् c.; भूमिं गम् c. (गमयति). 3 (Strength) अवसद् c ; ध्वंस् c., प्र-वि-नश् c., ह्व 1 P; क्षि 1, 5 P. **-ed,** *a.* प्रणिपतित, भूमिगत, निपातित, &c. 2 क्षीणबल-शक्ति, हृत or नष्ट-शक्ति or ओजस्. **-ion** *s.* दंडप्रणामः अष्टांगप्रणामः-प्रणिपातः, साष्टांगप्रणामः-वंदनं, प्रणिपातः, प्रणामः. 2 (Of spirits) अवसादः, ग्लानि *f.*, विषण्णता, उद्वेगः; 'p. of strength' शक्तिपातः-क्षयः, सत्त्वहानि *f.*

Protect, *v. t.* रक्ष् 1 P, अव् 1 P, परि-,त्रै 1 A, गुप् 1 P, पा 2 P, पा c (पालयति), परि-प्रति°-; तॄ c. 2 संवृध् c., परि-,पुष् c. **-ion,** *s.* गोपनं, गुप्ति *f.*, पालनं, त्राणं, रक्षा, रक्षणं, अभ्युपपत्ति *f.*, संवर्धनं, परिपोषणं. 2 शरणं, आ-संश्रयः, आ-अव-लंबः, आधारः; 'go for p.' आश्रि 1 U, आलंब् 1 A, शरणं गम् 1 P or प्रपद् 4 A; paper granting p. अभयपत्रं. **-or,** *s.* रक्षकः, गोप्तृ *m.*, पालयिता, रक्षिता, रक्षिन्, पालकः, त्राता, शरणं, शरण्यः; आश्रयः, पः-पालः in comp. **-Protege,** *s.* आश्रितः, पालितः, उपजीविन् *m.*, पोष्यः, शरणं गतः.

Protend, *v. t.* विस्तॄ c., प्रसृ c.; *See* **Extend**.

Protest, *v. i.* दृढं-दृढोक्तिपूर्वं-वद् 1 P or आख्या 2 P; p. against दृढं विरुद्धं वद्, दृढं-दृढोक्तिपूर्वं नि-प्रति-षिध् 1 P, दृढं असंमतिं प्रकाश् c. or ज्ञा c.; 'I strongly p. against this order' अयमादेशोऽन्याय्य इति सनिश्चयं वदामि 'p. in writing' असंमतिलेखं-विप्रतिपत्ति-पत्रं-प्रकाश् c. **-***s.* दृढनिषेधवाक्यं, अस्वीकार-असंमति-वादः, विरुद्धवादः, अस्वीकारप्रकाशनं; 'written p.' असंमतिपत्रं. **-ant,** *s.* रोमीयमतविरुद्धः. **-ation,** *s.* दृढवचनं-उक्तिः-वादः, विरुद्धवचनं, निषेधोक्तिः.

Proteus, *s.* कामरूपः.

Prototype, *s.* आदर्शः, मूलं, मूलप्रतिमा.

Protract, *v. t.* विलंब् c., व्याक्षिप् 6 P; *See* **Delay.** 2 प्र-,तन् 8 U; प्रसृ c., दीर्घीकृ 8 U. **-ed,** *a.* सुदीर्घ, विलंबित, चिरस्थित, चिर in comp.: p. note तानः; 'p. sound' प्लुतः. **-ion,** *s.* विलंबः, व्याक्षेपः.

Protrude, *v. i.* प्र:-निः-सृ 1 P, निर्गम् 1 P, उद्भिद् pass., प्रलंब् 1 A, बहिर्वृत् 1 A or स्था 1 P. **-***v. t.* Causal of roots above. **-ing,** *a.* बहिर्लंब, बहिःस्थ. **-Protrusion,** निःसरणं, उद्भेदः, प्रलंबनं. **-Protuberance,** *s.* वि-,स्फोटः, गंडः, शोथः, शोफः, श्वयथुः, (on the skin). 2 प्रलंबनं, उत्सेधः, उत्तुंगता, आभोगः, उन्नति *f.* **-Protuberant,** *a.* उन्नत, उत्तुंग, उच्छ्रित, उच्छून, प्रलंब; 'having p. breasts' तुंग-उन्नत-स्तनी, घट-कुंभ-स्तनी; oft. ex. by उत्सेधः; पयोधरोत्सेधविशीर्णसंहति (K. v. 8) the continuity being broken by her p. breasts.' **-Protuberate,** *v. i.* प्रलंब् 1 A; *See* **Project,-ing** &c.

Proud, *a.* *See* under **Pride.**

Prove, *v. t.* उप-प्रति-पद् c., साध् c., वि-भू c., प्र-मा 3 A, 2 P, प्रमाणीकृ 8 U, सत्याकृ, स्था c. (स्थापयति). 2 प्र-,दृश् c., ख्या 10, निर्दिश् 6 P, प्रकाश् c., व्यंज् 7 P or c.; 'he was p. ed guilty' अपराधी स्थापितः; 'good men p. their usefulness by deeds, not by words' ब्रुवते हि फलेन साधवो न तु कंठेन निजोपयोगितां (N. II. 48), कर्मणा न तु वाङ्मात्रेण दर्शयंति. 3 परीक्ष् 1 A, निरूप् 10, निर्णी 1 P, निश्चि 5 U, प्रति-इ c.; *See* **Test.** **-***v. i.* सं-उत्-पद् 4 A, वृत् 1 A, सं-,भू 1 P; निर्णी-निश्चि-प्रती-pass.; 'the tilled ground p. ed a treasure indeed' कृष्टा भूमिरेव कोषस्थानं बभूव, कोषत्वमापद्यत. **-er,** *s.* साधकः, विभावकः. **-Proof,** *s.* साधनं, प्रमाणं, उपपत्ति *f.*, उप-प्रति-पादनं; 'written p.' लेखप्रमाणं, साधनपत्रं; 'burden of p.' साधनधर्मः, क्रियानिर्णयः; 'the burden of p. lies on both parties' द्वयोरपि वादिनोः क्रिया प्राप्नोति (V. M. 6.). 2 लक्षणं, चिह्नं. 3 परीक्षा-क्षणं, निर्णयः, निश्चयः; 'to put to the p.' परीक्ष्. 4 स्थूल-प्रथम-मुद्रणं. 5 अभेद्यता, अहार्यता, अविकार्यता; 'p. against advice' उपदेशाहार्य; 'water p.' जलेनाभेद्य. **-less,** *a.* निष्प्रमाण, साधनहीन.

Provenance, *s.* उत्पत्ति *f.*, संभवः, उद्गमस्थानं.

Provender, *s.* पाथेयं; खाद्यं, पशुभोज्यं, शुष्कतृणादि *n.*

Proverb, *s.* जनप्रवादः, लोकवादः, आभाणकः, जनोक्ति *f.*, न्यायः, वचनं, उक्तिः. **-ial,** *a.* लौकिक (की *f.*), लोकप्रसिद्ध-प्रचलित, लोक-जन in comp., न्यायरूप. **-ially,** *adv.* लोके, जनरूढ्या.

Provide *v. t.* (पूर्वं) सं-,युज् 7 U, 10, संभृ 3 U, प्र-उप-कॢप् c., सनाथीकृ 8 U, द्रव्यसामग्रीं उपपद् c. or वि-धा 3 U or कृ; *See* **Prepare.** 2 (पूर्वं) नियम् 1 P, प्रति-ज्ञा 9 A, परिपण् 1 A, संकेतं-समयं-कृ; निर्दिश् 6 P; *See* **Enjoin, Ordain;** (for, against) gen. ex. by अर्थं-अर्थे in comp.; 'should p. wealth against times of want' आपदर्थं धनं रक्षेत्; 'who p. s for the future' अनागतविधाता; 'p. against' निवारणाय सज्जीभू, प्रतिकारोपायं कॢप् c. **-ed,** *a.* (पूर्वं) संभृत, परिकल्पित; युक्त, उपेत, सहित, अन्वित,

सनाथ, सनाथीकृत; ' he is duly p. for तस्य समुचिताः संविधाः कृताः, उपकरणसामग्रीयुक्तः, अन्नवस्त्रादियुक्तः. 2 पूर्वं निर्दिष्ट-परिपणित, पूर्वं संकेतित; ' p. that ' यदि, चेत्, एतेन समयेन. **-ence,** *s.* विधिः, परमेश्वरः; *See* **God.** 2 सुविमर्शः, दूरदर्शित्वं, पर्यवेक्षणं, पूर्वविवेकः-विचारः, सुसमीक्षा, दूर-दीर्घ-दृष्टि *f.* **-ent,** *a.* दूरदर्शिन्, विमृश्यकारिन्, विवेकिन्, दूर-दीर्घ-दृष्टि. **-ential,** *a.* ईश्वर-विधातृ-कृत-प्रयुक्त-घटित. **-entially,** *adv.* विधिवशात्, ईश्वरेच्छया, दैवात्, दिष्ट्या. **-ently,** *adv.* सविवेकं, सुसमीक्ष्य, सुविमृश्य, दूरदृष्ट्या. **-Provision,** *s.* परिकल्पनं, विधानं, उपपादनं. 2 पूर्वोपायः, पूर्वकल्पना, संविधा-धानं. 3 समयः, संकेतः, प्रतिज्ञा, पणः, नियमः, अभिसंधिः. 4 (P. *s.*) सामग्री, संभारः, संचयः, संग्रहः, साहित्यं, संविधा, उपस्करः, उपकरणजातं; (for journey) पाथेयं, भोज्यं, भक्ष्यं, भक्ष्यादिसामग्री, गमनसंविधा; (for army) वीवधः. *-v. t.* **Provide,** q. v. **-al,-ary,** *a.* सामयिक (की *f.*), अल्पकालस्थायिन्, आपात in comp., आपाततः नियुक्त. **-ally,** *adv.* आपाततः, समयानुरूपेण, स्तोककालं. **-Provisory,** *a.* सप्रतिज्ञ, सामयिक. **-Proviso,** *s. See* (*s.*) (3).

Province, *s.* विषयः, राष्ट्रं, देशः, चक्रं, मंडलं. 2 नियोगः, कार्यं, कर्मन् *n.*, कर्तव्यं, अधिकारः. 3 प्रकरणं, अंगं, विषयः (fig. also), (सर्वत्रौदरिकस्याभ्यवहार्यमेव विषयः V. 3. **-ial,** *a.* देशीय, देश्य, राष्ट्रीय, राष्ट्रिक-दैशिक-(की *f.*), देश-राष्ट्र in comp. *-s.* देशस्थः, ग्रामस्थः. **-ialism,** *s.* ग्रामीणभाषा, असंस्कृतभाषा.

Provoke, *v. t.* प्र-,कुप् c., क्रुध् c., क्रोधं-कोपं-उत्पद् c. or उद्दीप् or उत्तिज् c. 2 उत्पद् c., जन् c., (जनयति), प्रवृत् c., उत्तिज् c.; *See* **Excite, Cause.** 3 धृष् 5 P, आह्वे 1 A. **-ing,** *a.* प्रकोपक, उद्दीपक, उत्तेजक, क्रोधावह, संतापकारिन्, संतापक. **-ingly,** *adv.* Ex. by (*v.*). **-Provocation,** *s.* प्रकोपः, क्रोधोद्दीपनं, कोपोत्तेजनं; कोपकारणं-हेतुः. 2 उद्दीपनं, उद्बोधनं. **-Provocative,** *a.* उद्दीपक, उद्बोधक. *-s.* दीपनं, अग्निवर्धनं, क्षुदुद्बोधनं, प्ररोचनं.

Provost, *s.* अध्यक्षः, अधिकारिन् *m.*, अधीशः.

Prow, *s.* पोताग्रभागः,

Prowess, *s.* शौर्यं, वीर्यं, वि-परा-क्रमः, पौरुषं, ओजस् *n.*, रणोत्साहः-शौर्यं; ' personal बाहुवीर्यं, भुजबलं.

Prowl, *v. i.* (भक्ष्यार्थं) परि-,भ्रम् 1, 4 P, पर्यट् 1 P. **-ing,** *s.* परिभ्रमणं, पर्यटनं.

Proximate, *a.* समीप, निकट, आसन्न, संसक्त, सन्निकृष्ट. **-ly,** *adv.* समीपं, संसक्तं. **-Proximity,** *s.* सन्निधिः, सन्निकर्षः, सान्निध्यं, नैकट्यं, संसक्ति *f.*; *See* **Nearness.**

Proximo, *adv.* आगामिनि (मासे)

Proxy, *s.* प्रतिनिधिः-पुरुषः, प्रतिहस्तः; ' by p. ' प्रतिनिधिद्वारा.

Prude, *a.* (Woman) अतिविनीता, विनयाभिमानिनी, सूक्ष्माचारनिष्ठा. **-ry,** *s.* अतिविनीतता, विनयाभिमानः, मिथ्याविनयः. **-ish,** *a. See* (*a.*).

Prudent, *a.* दूरदर्शिन्, विमृश्य-समीक्ष्य-कारिन्, विवेकिन्, दूर-दीर्घ-दृष्टि, परिणामदर्शिन्, सदसद्विवेकिन्; बुध, मनस्विन्, नीतिज्ञ, विज्ञ, प्र(ज्ञा)ज्ञ, मनीषिन्, सावधान, कृतधी; *See* **Wise,** also. 2 (Of acts) समीचीन, श्रेयस्, वरं *ind.* **-ial,** *a.* सविवेक, विवेक-समीक्षा-प्रयुक्त. **-ly,** *adv.* विमृश्य, समीक्ष्य, सविवेकं, दूरदर्शितया, परिणामदृष्ट्या, प्राज्ञवत्. **-Prudence,** *s.* दूरदर्शिता, दूर-दीर्घ-दृष्टि *f.*, विवेकः, प्रसमीक्षा, समीक्ष्य-विमृश्य-कारित्वं, सदसद्विवेकः, नीति *f.*, मनीषा, मति-बुद्धि *-f.*

Prune, *v. t.* अग्राणि लू 9 U or अव-च्छिद् 7 P or निकृत् 6 P. **-ing,** *s.* अवच्छेदः, निकृंतनं; ' p.- knife ' विटपच्छेदनी छुरिका.

Prurigo, Prurient, *See* **Itch,-y.**

Pry, *v.* (Into) सूक्ष्मं निरीक्ष् 1 A or निरूप् 10 or दृश् 1 P; निपुणं अनुसं-धा 3 U or अन्विष् 4 P or चर्च् 6 P. **-ing,** *s.* सूक्ष्म-निरूपणं-अन्वेषणं, सूक्ष्मचर्चा.

Prythee, *adv.* अयि, ननु, (ननु मां प्रापय पत्युरंतिकं K. iv. 32).

Psalm, *s.* स्तोत्रं, गेयं, गीतं, भक्ति-धर्म-गीतं. **-ist,** *s.* गीत-स्तोत्र-कारः. **-Psalter,** *s.* गीतसंहिता-संग्रहः.

Pseudo, prefix, Ex. by मिथ्या, कपट, कूट-छद्म, कृतक, कृत्रिम in comp.; *See* **False.** **-nym,** *s.* कृतकनामन्. *n.*

Pshaw, *interj.* धिक्, अपेहि.

Psychic, *a.* आध्यात्मिक.

Psychology, *s.* अध्यात्मविद्या, आन्वीक्षिकी.

Puberty, *s.* यौवनं, वयस् *n.*, तारुण्यं, यौवनदशा-अवस्था, प्रौढदशा; ' a woman attained to p. ' स्त्रीधर्मिणी, उदक्या; *See* under **Menstrual.** **-Pubescent,** *a.* प्राप्तयौवन, प्रौढ, तरुण.

Public, *s.* लोकाः, जनाः, प्रजाः, प्रकृतयः. (pl.): लोकः. जनः. प्रजा; ' in p. प्रकाशं. लोकसमक्षं, प्रकटं, सर्वप्रत्यक्षं. *-a.* प्रजा-लोक-संबंधिन्; साधारण (णी *f.*,) सामान्य, सर्वजनीन-य, सार्वलौकिक (की *f.*). लोक-जन-गण in comp.; ' p. odium जनद्वेषः. p. good ' लोकहितं; ' p. property गणद्रव्यं. 2 प्रसिद्ध, लोक-जन-प्रसिद्ध, सर्वत्र प्रचलित. बहुलीभूत, लोकविश्रुत. प्रकाशीभूत,

Repulse, *v. t.* निराकृ 8 U, निः-प्रति-सृ c., अवधीर् 10: प्रत्यादिश् 6 P, प्रत्या-ख्या 2 P, परा-प्रति-हन् 2 P, भंज् 7 P, वि-द्रु c. (army). **-ion,** *s.* निराकरणं, निःसारणं, प्रत्यादेशः, अवधीरणं-णा, प्रतिघातः, प्रतिहननं; विद्रावणं, पराजयः, भंगः. **-ive,** *a.* अ-

विप, क्लिष्ट, निंद्य, बीभत्स, बीभत्सावह; *See* **Hideous. 2** प्रतिघातिन्, प्रतिसारिन्.

Repute, *v. t.* मन् 4 A, अभि-सं-°,गण् 10; *See* **Consider,** ' r. ed as authors ' कर्तृत्वेनाभिमताः. **-s., -ation,** *s.* कीर्ति *f.*, ख्याति *f.*, प्र-वि-°, यशस् *n.*, प्रतिष्ठा, प्रथा, प्रतिपत्ति *f.*, गौरवं, प्रसिद्धि *f.*; ' of established r. ' लब्धप्रतिष्ठ; ' good r. ' सुख्यातिः; ' bad r. ' दुष्कीर्तिः, अप-अ-कीर्तिः, वाच्यता, कौलीनं, दुर्नाम. **-able,** *a.* सं-, मान्य, प्रशस्य, माननीय, आदरणीय. **2** यशः-कीर्ति-कर (री *f.*), कीर्ति-मान-प्रद. **-ed,** *a.* अभिमत, जन-लोक-विश्रुत, सर्वज्ञात, जनप्रसिद्ध.

Request. *v. t.* याच् 1 A, अर्थ् 10 A. प्र-अभि-°, वि-ज्ञा *c.* (ज्ञापयति), सविनयं नि-आ-विद् *c.* **-s.** प्रार्थना, अभ्यर्थना, याचना, विज्ञापना, विज्ञप्ति *f.*, नि-आ-वेदनं, याच्ञा. **2** आकांक्षा, इच्छा, अभिलाषः, अपेक्षा; ' in general r. ' सर्वाभीप्सित, बहुशः इष्ट.

Require, *v. t.* प्रार्थ् 10 A. प्रच्छ् 6 P. याच् 1 A. **2** (Need) वि-,अपेक्ष् 1 A, आकांक्ष् 1 P; oft. ex. by उपयोगः, प्रयोजनं, कार्यं, with instr.; or अर्ह् 1 P: or by pot. pass. part.; ' that it is affection and should r. a cause is a contradiction ' स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत् (Mal. 1); ' I do not r. his help ' न मम तस्य साहाय्येन प्रयोजनं; ' r. s a careful consideration ' निपुणमवेक्षणीयः, निपुणावेक्षणमर्हति. **-ment,** *s.* Ex. by (*v.*); ' all the r. s of man ' यद्यन्नरैरपेक्ष्यते or इष्यते. **-Requisite,** *a.* आवश्यक (की *f.*), अवश्यक, आकांक्षित, अपेक्षित. **-s.** अवश्यकवस्तु-द्रव्यं, अपेक्षितं. **-Requisition,** *s.* प्रार्थना-नं, अपेक्षा, आकांक्षा.

Requite, *v. t.* प्रति-दा 3 U, प्रतिफलं दा, प्रत्युपकृ 8 U, निस्तॄ *c.*: *See* **Recompense, Repay;** (grudge &c.) प्रतिकृ, निर्यत् 10, शुध् *c.*, साध् *c.* **-al,** *s.* प्रतिदानं, प्रतिफलं, निस्तारः, निष्कृति *f.*, प्रत्युपकारः, पारितोषिकं, निर्यातनं. **2** प्रति(ती)-कारः, प्रतिक्रिया, शुद्धि *f.*; साधनं.

Rescind, *v. t.* विलुप् *c.*, खंड् 10, निरस् 4 U, निवृत् *c.* **-Rescission,** *s.* वि-,लोपः, खंडनं, निरसनं; *See* **Repeal.**

Rescript, *s. See* **Counterpart.**

Rescue, *v. t.* मुच् 6 P or *c.*, मोक्ष् 10, वि-निर्-°, निस्तॄ *c.*, उद्-हृ 1 P or धृ 10: परित्रै 1 A, रक्ष् 1 P: *See* **Protect. -s.** वि-मुक्ति *f.*, मोचनं, मोक्षः-क्षणं, उद्धारः; परि-, त्राणं, रक्षणं, निस्तारः, तारणं; ' on, on, to the r. ' सत्वरं परित्रायध्वं. **-er,** *s.* उद्धर्तृ *m.*, त्राता, रक्षकः, मोक्षकः.

Research, *s.* अन्वेषणं-णा, निरूपणं, अनुसंधानं, जिज्ञासा, मार्गणं, विचारणा.

Resemble, *v. t.* सं-वद् 1 P (with instr.), अनुकृ 8 U (with gen.), अनुहृ 1 P (with acc.): ' the characters r. each other ' संवदंत्यक्षराणि (Mu. 5): gen. by तुल्य, सदृश, समान, उपम, अनुरूप in comp., (' Like ', q. v.): भव पितुरनुरूपो गुणैः (V. 5) ' r. your father in qualities ': देहबंधेन स्वरेण च रामभद्रमनुहरति, अस्य मुखं वत्सा मुखचंद्रेण संवदत्येव (U. 4). **2** उप-प्रति-मा 3 A, 2 P, समीकृ. **-ance,** *s.* सादृश्यं; सारूप्यं, तुल्यत्वं, संवादः, साम्यं, औपम्यं, उपमा, अनुकारः, अनुहारः, तुला; साधर्म्यं (in qualities): 'to bear r.' सादृश्यं-तुलां-अधिरुह् or समारुह् 1 P: *See* (*v.*): (तुलां यदारोहति दंतवाससा K. v. 34). **2** प्रतिकृति *f.*, प्रतिरूपं, आलेख्यं; *See* **Picture. -ing,** *a.* संवादिन्, (न केवलमस्मदंगसंवादिनी आकृतिः U. 6): अनुरूप, तुल्य, सम, समान, अनुकारिन्, अनुहारिन्.

Resent, *v. i.* अभि-प्रति-क्रुध् 4 P (with acc.) क्रुध्-कुप्-रुष् 4 P, अपकारापेक्षया कुप्. **-ful,** *a.* क्रोधिल, क्रोधशील, समन्यु, सासूय, प्रत्यपकारबुद्धि. **-ment,** *s.* कोपः, क्रोधः, रोषः, अमर्षः, मन्युः; *See* **Indignant,** &c.

Reserve, *v. t.* सं-प्रतिसं-हृ 1 P, निग्रह् 9 P. **2** (आकालांतरात्) सं-चि 5 U, नि-धा 3 U. संग्रह्, रक्ष् 1 P, अवशिष् 7 P or *c.*, त्यज् 1 P, (temporarily): आपदर्थे धनं रक्षेत् ' should r. his money for times of want. ' **3** गुप् 1 P. सं-वृ 5 U, अपह्नु 2 A, न स्पष्टीकृ, न विशदीकृ. **-s.** संवरणं, संवृति *f.*, नि-अप-ह्नवः, मनोगुप्ति *f.* **2** नि-,यंत्रणं-णा, निग्रहः, निरोधः; ' without any r. ' विवृतं, निर्व्याजं, अनियंत्रणं, निर्यंत्रणं,. **3** (Of disposition) वाग्यंत्रणं,कथा-आलाप-विरक्ति *f.*, पराङ्मुखता, अल्पभाषणं, वाग्यतत्वं. **4** संचयः, संग्रहः. **5** (Of an army) प्रति-परिग्रहः, प्रत्यासा(स)रः, पार्ष्णित्रं सैन्यं. **-ation,** *s.* गोपनं, निग्रहः, संहारः, गुप्तिः, अपवारणं **2** नि-अप-ह्नवः, मनोगुप्तिः, संवरणं, संवृतिः. **3** परिवर्जनं, अपवादः, व्यावृत्ति *f.* ' with this r. only ' अयमेव तस्यापवादः. **4** संग्रहः-हणं, संचयः. **-ed,** *a.* रक्षित, गुप्त, अवशेषित. **2** संवृतिमत्, गूढभाव, गुप्तांतःकरण, अनुत्तानहृदय, संवरणशील; वाग्यत, यंत्रितवाक्, कथा or आलाप-विरक्त or विमुख, अल्पभाषिन्, अल्पालापिन्. **-edly,** *adv.* गूढभावेन, संवृतचेतसा. **-Reservoir,** *s.* जलाशयः, तडागः-गं, जलाधारः, तोयाधारः, वापी.

Resetter, *s.* लोप्त्रग्राहिन् *m.*

Reside, *v. i.* वस् 1 P, नि-प्रति-°; अधि-ष्ठा 1 P, अधिवस् (with acc.); निली 4 A; आश्रि 1 U, वृत् 1 A; *See* **Dwell.** 2 सद् 1 P; अवशिष् pass. **-ence**, *s.* स्थिति *f.*, वसाति *f.*, वर्तनं, अधिष्ठानं, वासः; ' r. abroad ' प्रवासः. 2 वसतिः, वासस्थानं, नि-, वासः, गृहं, आ-नि-लयः, आश्रयः, अधिष्ठानं, स्थानं, निकेतनं; *See* **House**, ' change of r.' स्थलांतरगमनं. **-ent**, *s.* नि-,वासिन्, or by deriv.; 'r. of this or that place' अत्रत्यः; तत्रत्यः; आयोध्यिकः, कौशांबीयः, &c. **-a.** नि-,वासिन्, स्थ, वर्तिन् in comp.; आश्रित, कृतालय. **-Residue**, *s.* अव-, शेषः-षं-शिष्टं. **-al,-ary**, *a.* अव-शिष्ट, शेष in comp.

Resign, *v. t.* परि-,त्यज् 1 P, उत्-वि-सृज् 6 P, हा 3 P, प्रत्यादिश् 6 P, पराक्षिप् 6 P, *See* **Abandon.** 2 सं-,ऋ c. (अर्पयति), आयत्तीकृ, आ-नि-विश् c., समा-धा 3 U, न्यस् 4 U, निक्षिप्, प्रति-पद् c. 3 क्षम् 1 A, सह् 1 A: 'of those who r. themselves to you ' त्वय्यावेशितचित्तानां, त्वत्समाहितचेतसां; ' r. one 's claims ' स्वत्वं निवृत् c., अधिकारं त्यज्; ' r. oneself to his fate ' दैवाधीनीभू. **-ation**, *s* परि-,त्यागः, उत्सर्गः, प्रत्यादेशः, पराक्षेपः; ' r. of one's claim ' स्वत्वनिवृत्तिः; ' written r. ' त्यागपत्रं-लेखः. 2 समर्पणं, निक्षेपणं, न्यसनं, निवेशनं. 3 क्षमा, क्षांति *f.*, संतोषवृत्ति *f.*; ' r. to God ' ईश्वराधीनता; ईश्वरेच्छानुवर्तनं. **-ed**, *a.* त्यक्त, अर्पित, न्यस्त, &c. 2 क्षमावत्, तितिक्षु, शांत, ईश्वरेच्छाधीन, ईश्वरन्यस्तचित्त.

Resilient, *a.* उत्पतिष्णु. 2 स्थितिस्थापक. 3 उल्लासित.

Resin, *s.* अ-,रालः, सर्जरसः, यक्षधूपः; *See* **Pitch.**

Resist, *v. t.* प्रति-बंध् 9 P, प्रति-वि-रुध् 7 U, नि-,वार् 10, प्रत्यव-स्था 1 A; प्रतिकृ 8 U, प्रत्या-व्या-हन् 2 P; बाध् 1 A, निग्रह् 9 P, प्रतिष्टंभ् 9 P, परिपंथीभू; *See* **Oppose.** **-ance**, *s.* प्रति-वि-रोधः, प्रतिबंधः, प्रति(ती)-कारः, प्रतियोगः, पर्यवस्थानं, प्रतिष्टंभः, प्रतियत्नः. प्रत्याघातः. **-er**, *s.* प्रतियोगिन् *m.*, प्रतिबंधकः. **-less**, *a.* अनिवार्य, दुर्निवार, अप्रतिकार, अनवग्रह, दुर्निग्रह.

Resolve, *v. i.* निश्चि 5 U, निर्णी 1 P, व्यवसो 4 P, अध्यव-सो, संक्लृप् c., मतिं-बुद्धिं-कृ 8 U; *See* **Determine.** **-v. t.** वि-ली c., वि-द्रु c. (melt); गल् c., क्षर् c.; सागरे नद्यो विलीयंते 'rivers are r. ed into the sea. ' 2 वि-युज् 7 A, 10, विश्लिष् c., व्याकृ, वि-भिद् c., पृथक् कृ; *See* **Separate.** 3 (Doubts) छिद् 7 P, अपाकृ, अपनी 1 P, निरस् 4 U; *See* **Dispel.** **-s. Resolution**, q. v. **-ed**, *a.* विश्लेषित, व्याकृत, &c. 2 कृतनिश्चय-संकल्प-मति-बुद्धि, व्यवसित, निश्चित, निर्णीत, संकल्पित. **-ent**, *s.* द्रावणं, शोथहृत्. **-er**, *s.* विभेतृ *m.*, छेत्ता, छिद् *m.*, in comp. **-Resolute** *a.* दृढ or स्थिर or निश्चय-संकल्प, स्थिरधी मति, धीर, धृतिमत्; *See* **Resolved** also. **-ly**, *adv.* दृढं, सनिश्चयं, स्थिरचेतसा. **-ness**, *s.*; *See* below. **-Resolution**, *s.* निश्चयः, निर्णयः, संकल्पः, व्यवसायः, सर्गः, अध्यवसायः; स्थिर or दृढ-निश्चयः or संकल्पः, मति *f.*, सम-अव-धारणा. 2 स्थिरता, स्थैर्यं, धैर्यं, धृति *f.*, निर्बंधः, स्थिरमतित्वं, अभिनिवेशः. 3 विश्लेषणं, वियोजनं, विभेदनं. 4 उपन्यासः, प्रतिज्ञा, उपक्षेपः.

Resonant, *a.* मुखरित, प्रतिध्वानित, प्रतिनादित, अनुनादिन्, संघुष्ट. **-Resonance**, *s.* अनु-प्रति-नादः, प्रतिध्वनिः-स्वनः.

Resort, *v. i.* (To) सेव् 1 A, नि-परि-°, श्रि 1 U, आ-सं-समा-उपा-°, उप-अभि-गम् 1 P or इ-या 2 P, अभि-उप-सृ 1 P; जुष् 6 A, (frequently). **-s.** आश्रयणं, सेवनं, गमनं, &c. 2 आश्रयः, शरणं, आयतनं, अभिगमनस्थानं. 3 गति *f.*, उपायः, शरणं.

Resound, *v. i.* प्रति-नद्-स्वन्-ध्वन् 1 P, अनु-रस् 1 P; *See* **Echo.** **-v. t.** प्रतिध्वन् c. &c.; निनादेन पूर् 10: ' r. ing the directions ' दिशः प्रतिनिनादेन पूरयन्, दिशः प्रतिध्वानयन्. **-ing**, *a.* **Resonant**, q. v.

Resource, *s.* उपायः, गति *f.*, प्रयुक्ति *f.*, कल्पना, साधनं; ' having no other r. ' अनन्यगतिक. 2 (r. s) विभवः, द्रव्यसाधनं, आयः, वित्त-द्रव्य-सामग्री, अर्थः, धनं; ' of small r. s ' अल्पविभव.

Respect, *v. t.* पूज् 10, अर्च् 1 P, 10; सं-मन् c., आदृ 6 A, सेव् 1 A, भज् 1 U, सं-भू c., सत्कृ 8 U, पुरस्कृ. 2 अपेक्ष् 1 A, उद्दिश् 6 P; *See* **Refer, Relate.** **-s.** अपेक्षा, उद्देशः, संबंधः, अनुषंगः, विषयः; ' with r. to the result ' फलापेक्षया, फलमुद्दिश्य. 2 सं-,मानः, पूजा, अभि-,अर्चनं, आदरः, संभावना, प्रश्रयः, गौरवं, पुरस्कारः, सत्कारः, अर्हणा, अर्चा, भक्ति *f.* 3 दृष्टि *f.*, अवेक्षा. 4 विषयः, प्रकरणं; वस्तु *n.*. अर्थः. 5 (r. s) नमस्कारः, प्रणामः, प्रणति *f.*, अभिवंदनं, प्रणिपातः, सभाजनं; ' in this r. ' अत्र विषये; ' in all r. s ' सर्वथा; ' pay one's r. s ' प्रणम् 1 P, सभाज् 10, प्रणिपत् 1 P. **-able**, *a.* पूज्य, माननीय, &c.; विशिष्ट, आर्य, सप्रतिष्ठ, गुरु; ' a r. person ' आर्य-सु-जनः; ' of a r. family ' अभिजात, अभिजनवत्, कुलीन. 2 मध्यम, सामान्य, नातिगुरु. **-ably**, *adv.* आर्य:

उदार, in comp.; आर्यवत्, शिष्टवत्, सगौरवं; 'r. dressed' उदारनेपथ्यभृत्, आर्यवेषधारिन्. **-ful,** *a.* सादर, सप्रश्रय, सगौरव, सविनय, आदर-मर्यादा-शील, मानपुरःसर, आदर-मान पूर्व. **-fully,** *adv.* सादरं, सप्रश्रयं, सविनयं. **-ing,** *a.* उद्दिश्य, अधिकृत्य, अपेक्ष्य; *See* **Regarding.** **-ive,** (Own) *a.* Ex. by स्व-स्व, ('Own' q. v.); 'they went to their r. houses' स्वं स्वं गृहं ते जग्मुः 'in their r. places' स्वेषु स्वेषु स्थानेषु. **2** सापेक्ष, अकेवल, अविविक्त, अन्यसंबद्ध; इतरेतर-अन्योन्य in comp. **-ively,** *adv.* यथाक्रमं, यथानुक्रमं, पौर्वापर्येण, प्रत्येकं प्रत्येकं.

Respire, *v. i.* उत्-नि-श्वस् 2 P, प्र-अन् 2 P. **-ation,** *s.* श्वासः, श्वासोच्छ्वासः, प्राणः. **-atory,** *a.* श्वास in comp.: 'r. organ' श्वासेंद्रियं.

Respite, *s.* विरामः, विश्रामः, विरति *f.*, अवकाशः, विलंबः, विच्छेदः, प्र-उप-शमः. **-***v. t.* विश्रामं-अवकाशं-दा 3 U.

Resplendent, *a.* देदीप्यमान, विभ्राजमान, अतितेजस्; *See* **Bright, Splendid.**

Respond, *v. i.* प्रति-वच् 2 P, प्रति-वद् 1 P, उत्तरं दा 3 U; *See* **Reply.** **-ent,** *s.* प्रतिवादिन् *m.*, प्रत्यर्थिन्, उत्तरवादिन् *m.*, **-Response,** *s.* उत्तरं, प्रतिवचनं, प्रतिवाक्यं. **2** प्रतिवादः, उत्तरं. **-Responsible,** *a.* अनुयोगाधीन, अनुयोज्य, आह्वानाधीन, प्रष्टव्य; oft. by उत्तरं दा; 'you are r. for this act' अस्य त्वयैवोत्तरं दातव्यं. **2** धूर्वह, धूर्वोढृ, धुरंधर, धुरीण. **-Responsibility,** *s.* भारः, भरः, धुर् *f.*; 'the whole r. of the kingdom' राज्यस्य समस्तो भरः, राज्यधुरा. **2** अनुयोगाधीनता, प्रष्टव्यता. **-Responsive,** *a.* उत्तरदायिन्. **2** संवादिन्.

Rest, *v. i.* विश्रम् 4 P, वि-आ-रम् 1 P. (कार्यात्) निवृत् 1 A; निश्चलीभू 1 P, स्थिरीभू, निश्चेष्टीभू. **2** (Lean against) आलंब् 1 A, उपा-समा-आ-श्रि 1 U; नि-उप-धा pass.; 'with her face r. ing on her left hand' वामहस्तोपहितवदना (S. 4): oft. by भरं कृ 8 U (with loc.): 'r. ing on his three hoof (legs)' खुरत्रये भरं कृत्वा (H. 2): दंडे भारं निधाय, यष्टिमवलंब्य, &c. **3** प्र-उप-शम् 4 P, सुखिन्-निर्वृत-स्वस्थ-*a.* भू. **4** शी 2 A, स्वप् 2 P, सं-विश् 6 P, नि-द्रा 2 P, नि-ली 4 A. **5** स्था 1 P, भू, वृत्; 'r. with' अवलंब्, अपेक्ष् 1 A, अधीन-आयत्त-*a.* भू: *See* **Depend** (on): 'further than this r. s with fate' भाग्यायत्तमतः परं (S. 4). **-***v. t.* विश्रम् c., शी c., संविश् c. **2** निविश् c., न्यस् 4 U, अवलंब् c., स्था c., आ-नि-धा 3 U; चापे विजयाशंसां निदधौ 'r. ed his hope of victory on his bow'; सकलरिपुजयाशा यत्र बद्धा सुतैस्ते (Ve. 5) 'on whom your sons had r. ed their hopes of overthrowing all enemies.' **-***s.* विश्रा(श्र)मः, विश्रांति *f.*, कार्य-व्यापार-निवृत्तिः. **2** (Of a body) स्थिरता, निश्चलता, निश्चेष्टता, अचलता. **3** सुखं, सौख्यं, स्वास्थ्यं, निर्वृति *f.*, प्र-उप-शमः-शांति *f.*: *See* **Ease.** **4** अवलंबनं, आधारः, स्थानं. **5** निद्रा, शयनं, संवेशः-शनं. **6** अव-, शेषः-शिष्टं; अन्य, इतर, अपर (*a.* pl.) (of persons): आदि, प्रभृति, in comp. **7** यति *f.*, अवसानं; 'at r.' निश्चल, निश्चेष्ट, अचल, स्थिर; सुस्थ; प्र-उप-शांत, निर्वृत, विश्रांत; निर्व्यापार, निरुद्योग. **-ing,** *a.* आलंबित, आश्रित, नि-उप-हित, स्थित; स्थ, वर्तिन् in comp.: 'r.-place' शयन-विश्राम-स्थानं. **-less,** *a.* व्याकुल, पर्या-समा-कुल, परिप्लव, अशांत, विह्वल, अस्वस्थ, व्यग्र, अनिर्वृत, उद्विग्न. **2** चपल, चंचल, चल; सदागति, सास्पंद. **3** उन्निद्र, विनिद्र, निर्णिद्र; 'passes r. nights' उन्निद्रा रजनीं गमयति (Mal. 3). **-lessly,** *adv.* अनिर्वृतं, व्यग्रं; चंचलतया. **-lessness,** *s.* अनिर्वृतिः, अस्वास्थ्यं, उद्वेगः, व्यग्रता, चापल्यं, चांचल्यं, &c.

Restaurant, *s.* उपाहारगृह.

Restitution, *s.* प्रतिदानं, प्रत्यर्पणं, प्रत्यानयनं.

Restive, Restiff, *a.* दुष्ट, दुर्मार्गप्रस्थित, अदम्य, दुर्दम, प्रतीप, दुर्वृत्त, दुर्विनीत, उद्धत.

Restore, *v. t.* पुनर्-प्रति-दा 3 U or ऋ c. (अर्पयति), प्रति-पद् c., निर्यत् 10, परावृत् c., प्रत्यानी 1 P: पुनर्लभ् 1 A, प्रति-पद् 4 A, प्राप् 5 P, (when passively used) प्रत्यर्पितस्वांगः 'with his body r. ed to him': स्मरं वपुषा स्वेन नियोजयिष्यति (K. iv. 42) 'will r. to Cupid his body': 'r. ed the universe to the rule of Indra' पुनरपि त्रिभुवनमिंद्रवशमगात् or नीतं, इंद्रशासनायत्तं कृतं; 'r. ed to its pristine splendour' पुराणशोभामधिरोपितायां (वसतौ) (R. xvi. 42). 'r. to life' जीव् c., सोच्छ्वास-*a.* कृ 8 U, असून् प्राप् c.: 'r. ed to consciousness' लब्धसंज्ञ, प्राप्तचैतन्य. **-ation,** *s.* प्रतिदानं, प्रत्यर्प प्रतिपादनं, निर्यातनं, परावर्तनं, प्रत्यानयनं, उद्धारः, पूर्वावस्थाप्रापणं, &c. **-ative,** *a.* अग्निवर्धन (नी *f.*), सत्त्व-बल-वर्धन. **-s** बलवर्धनं, बल्यं, वाजीकरणं. **-er,** *s* प्रति दातृ *m.*, प्रत्यर्पयिता.

Restrain, *v. t.* सं-अव-नि-रुध् 7 U, निग्र 9 P, नि सं-यम् 1 P, नि-प्रति-बंध् 9 P, आ-

वृ 5 U, संहृ 1 P, नि-,यंत्र् 10; *See* **Forbid, Control,** also. 2 (Legally) आसिध् 1 P. रुध्. **-er,** *s.* नियंतृ *m.*, निग्रहीता, निरोधकः. **-Restraint,** *s.* निग्रहः, नि-अव-रोधः, सं-नि-यमः, नि-,यंत्रणं-णा, प्रतिबंधः, स्तंभः, प्रतिरोधः, बाधा, यमः, जयः, दमः (of the senses). 2 आसेधः; 'r. of speech' वाग्यमः, वाक्संयमः.

Restrict, *v. t.* निरुध् 7 U, नियंत्र् 10, अवधृ 10, नि-सं-यम् 1 P, निबंध् 9 P, परि-मा 3 A. 2 P, निग्रह् 9 P, 'my actions being thus r.ed on all sides' एवं सर्वतो निरुद्धचेष्टाप्रसरस्य मे (Mu. 3); बाध् 1 A, व्यावृत् *c.* (scope) अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः (R. xv. 7) 'can r. the scope of a rule.' **-ed,** *a.* नियत, समर्याद, सावधिक, परिमित &c.; *See* **Limited. -ion,** *s.* सीमा, इयत्ता, नियमः, मर्यादा, अवधिः, परिच्छेदः, निबंधः, निरोधः, अवधारणा, व्यावृत्ति *f.*, यंत्रणा; 'without r.' स्वैरं, यथेच्छं, अनियंत्रणं. **-ive,** *a.* व्यावर्तक, नियामक, परिच्छेदक, अवधारण; तुशब्दोऽवधारणार्थः, व्यावृत्त्यर्थकः (S. B.) 'has a r. sense.'

Result, *v. i.* अव-पर्यव-सो 4 P, वि-,परिणम् 1 U; *See* **End.** 2 उत्पद्-निष्पद् 4 A, प्र-सं-उद्-भू 1 P, जन् 4 A, प्रवृत् 1 A; *See* **Produce;** gen. ex- by (*s.*); 'it will r. in nothing' तन्निरर्थकं भवेत्; 'it will r. in his destruction' तस्य नाश एव फलं भवेत्. -*s.* परिणामः, फलं. 2 अर्थः, गुणः, निष्पन्नं, सिद्धि *f.*: अंतः, अवसानं, शेषः, उदर्कः; पाकः; 'good r.' शुभफलं. 3 सिद्धांतः, मथितार्थः, निश्चितार्थः; 'producing no r.' निष्फल, निर्गुण, व्यर्थ. **-ing,** *a.* ज, जन्य, उद्भव, फल in comp.: *See* **Produced.**

Resume, *v. t.* पुनः-भूयः-आदा 3 A or ग्रह् 9 U or आप् 5 P or लभ् 1 A, प्रत्याहृ 1 P: 'let us r. (the thread of) our discourse' प्रकृतं-प्रस्तुतविषयं-अनुसंदधाम or अनुसराम; oft. by पुनः-भूयः-आरभ् 1 A or कृ, with other words; 'r. ed their fighting' पुनर्योद्धुमारेभिरे; अतः परं पुनः कथयिष्यामि (M. 4) 'I shall r. my story from this point afterwards'; 'he r.ed his discourse' पुनर्वक्तुं प्रचक्रमे. -*s.* सारः, संग्रहः, सारार्थः. **-Resumption,** *s.* प्रत्यादानं, पुनर्ग्रहणं, प्रत्याहारः.

Resurrection, *s.* पुनरुज्जीवनं, मृतोत्थापनं.

Resuscitate, *v. t.* पुनर्जीव् c. or उत्था c. (उत्थापयति), उज्जीव् c., प्रत्युद्-जीव् c., **-ion,** *s.* पुनर्जीवनं, उत्थापनं, उज्जीवनं, प्रत्युज्जीवनं.

Retail, *s.* अल्पशः विक्रयः, पण्यक्रयः. -*v. t.* अल्पशः विक्री 9 A or पण् 1 A. **-er,** 'r.-dealer' *s.* अल्पशः पण्यविक्रयिन् *m.*, खंडवणिज् *m.*

Retain, *v. t.* धृ 1 P, 10, रक्ष् 1 P, धा 3 U; ग्रह् 9 U. 2 (Servants) वेतनं दत्वा नियुज् 7 A, 10, व्या-पृ c., उप-नी 1 A, (कर्मकरानुपनयते S. K.); (in memory) चित्ते-मनसि कृ 8 U or नि-धा or निविश् *c.*, अवधृ. **-er,** *s.* अनुयायिन् *m.*, अनुगः, अनुचरः, पार्श्वकः, अनुगामिन् *m.*, अनुजीविन् *m.*, सेवकः, भृत्यः, किंकरः, आश्रितः; *See* **Servant,** 'body of r. s.' परिवारः, भृत्य-अनुयायि-वर्गः. **-Retention,** *s.* धारणा-णं, ग्रहणं. 2 (Faculty) *See* below; 'r. of urine' मूत्रसंगः. **-Retentive,** *a.* धारणावत्, धारणक्षम; 'r. faculty' धारणाशक्ति *f.*, धारणा, मेधा, धारणावती धीः; ग्रहणसामर्थ्यं. 2 धर, ग्राहिन् in comp., धारक.

Retaliate, *v. t.* प्रति-कृ 8 U, प्रत्यपकृ; (वैरं) निर्यत् 10, शुध् *c.*, साध् *c.*; प्रति-हिंस् 7 P. **-tion,** *s.* प्रतिक्रिया, प्रति(ती)कारः, प्रत्यपकारः, प्रतिहिंसा, वैरसाधनं-शुद्धिः-निर्यातनं.

Retard, *v. t.* प्रति-नि-रुध् 7 U, स्तंभ् 9 P, प्रतिबंध् 9 P, बाध् 1 A, नि-वृ *c.*; *See* **Obstruct.** 2 विलंब् c., व्याक्षिप् 6 P, गतिं अवरुध् or स्तंभ्. **-ation,** *s.* निरोधः, प्रतिबंधः, वेग-गति-रोधः, विलंबः, व्याक्षेपः. **-ed,** *a.* निरुद्ध, विलंबितगति, अवरुद्धवेग.

Reticence, *s.* मौनं, संवृति *f.*, मूकभावः, वाग्यमः. **-Reticent,** *a.* मौनावलंबिन्, संवृतिमत्, यंत्रितवाच्, वाग्यत; *See* **Reserved.**

Reticular, *a.* जालाकार, जालरूप. **-Reticulation,** *s.* जालकर्मन् *m.*

Retina, *s.* नेत्रांतः पटलं.

Retinue, *s.* परिजनः, परिवारः, परिबर्हः, परिच्छदः, अनुयायि-भृत्य-वर्गः, परिचराः, अनुचराः.

Retire, *v. i.* अपक्रम् 1 U, 4 P, अपगम् 1 P, अप-या-इ 2 P, चल् 1 P, परावृत् 1 A; एकपार्श्वे स्था 1 P. 2 विश्रामार्थं उद्योगाद्-विरम् 1 P or कार्यं-अधिकारं-त्यज् 1 P, विविक्तवृत्तिं सेव् 1 A, सेवां त्यज्; 'r. from the world' सर्वसंगं परित्यज्, संन्यस् 4 U, विविक्ते वस्; शांतिमार्गोत्सुकोभूत् (R. vii. 71) 'wished to r. from the world'. **-ed,** *a.* विविक्त, गुप्त, विजन, गूढ, प्रच्छन्न, एकांत, निभृत, निर्जन; *See* **Lonely,** 'a r. spot' रहःस्थानं, विविक्तं. 2 (Disposition) संवृतिमत्, गूढ, अनुत्तान; *See* **Reserved.** 3 त्यक्तकर्मन्, विविक्तसेविन्, त्यक्ताधिकार; 'a. r. person' संन्यासिन् *m.*, मुक्तसंगः, **-ment,** *s.* अपसरणं, अपक्रमणं, अपगमनं, &c. 2

निर्जन-विविक्त-स्थानं, रहःस्थानं. **3** विविक्तवृत्ति *f.*, अधिकार-कार्य-त्यागः; विविक्तसेवनं; संन्यासः. **-ing,** *a.* अपक्रामिन् &c. **2** विविक्त-प्रिय-सेविन्, अधृष्ट; *See* **Reserved.**

Retort, *v. i.* प्रत्युत्तरं दा 3 U, प्रत्यवस्कंद् 1 P, प्रत्याक्षिप् 6 P, प्रतिकृ 8 U, प्रत्यभि-युज् 7 A, 10. **-s.** प्रत्युत्तरं, प्रत्यवस्कंदनं, प्रत्यपवादः, प्रत्यभियोगः, प्रत्यारोपः. **2** बकयंत्रं.

Retrace, *v. t.* (One's steps) प्रत्यावृत्, निवृत्, 1 A; *See* **Return.**

Retract, *v. t.* प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P (word, promise, &c.) निवृत्; c., निवृत् 1 A (with abl.): व्यतिक्रम् 1 U, 4 P, अतिचर् 1 P. **-ion,** *s.* प्रत्याख्यानं, प्रत्यादेशः, निवर्तनं, उक्त-त्यागः-व्यतिक्रमः.

Retreat, *v. i.* अप-या 2 P- गम्-सृ 1 P, अपक्रम् 1 U, 4 P, प्रतिनि-नि-प्रत्या-वृत् 1 A: *See* **Retire.** **2** प्र-वि-द्रु 1 P -अपधाव् 1 P, पलाय् 1 A. **-s.** अपसरणं, अपक्रमः-मणं, अपयानं, परावर्तनं, परावृत्ति *f.*, अपगमः, प्रतिनिवृत्तिः. **2** पलायनं, प्र-वि-द्रावः. **3** शरणं, आश्रयस्थानं, निलयः, विविक्त or निर्जन-देशः or स्थानं.

Retrench, *v. t.* न्यूनीकृ 8 U, ह्रस् c., अल्पीकृ, अवच्छिद् 7 P, अवकृत् 6 P, खंड् 10, अप-चि 5 U. **-ment,** *s.* अवच्छेदः, खंडनं, व्यवच्छेदः, न्यूनव्ययः. व्ययापचयः.

Retribution, *s.* प्रति(ती)कारः, प्रतिफलं; *See* **Revenge. -Retributive, -Retributory,** *a.* प्रतिकारिन्, प्रतिकार in comp.

Retrieve, *v. t.* पुनः प्राप् 5 P or लभ् 1 A, प्रत्याहृ 1 P, उद्धृ 1 P, प्रति-,समा-धा 3 U; *See* **Recover,** 'irretrievably gone' असन्निवृत्तये गतं.

Retrocede, *v. i.* परावृत् 1 A; *See* **Return.** **-Retrocession,** *s.* परावर्तनं.

Retrograde, *a.* प्रतीप, प्रतिलोम, वक्र, परावृत्त, विपरीत, प्रतीपगामिन्; 'in a r. direction' वि-,प्रतीपं; 'turn in a r. direction' प्रतीपयति (D.), परावृत् c. **-v. i.** परावृत् 1 A, प्रतीपं गम् 1 P; विपरीतं या-इ 2 P. **3** **Decline, Decay,** q. v. **-ation, Retrogression,** *s.* प्रतीपगमनं, विपरीतगमनं-गति *f.*

Retrospect, *s.* अतीतपर्यालोचनं, सिंहावलोकनं, अनुदर्शनं, भूतावलोकनं. **-ive,** *a.* अनुदर्शिन्, गतावलोकिन्. **2** भूतापेक्ष, गतकालसापेक्ष.

Return, *v. i.* नि-प्रत्या-प्रतिनि-वृत् 1 A, प्रति-या 2 P, पुनर्या, पुनर्-इ 2 P, प्रत्यागम्-परापत् 1 P, प्रति with words for 'Come' 'Go', q. v. : 'it is gone never to r.' असन्निवृत्त्यै तदतीतमेव (S. 6): 'r. to life' चेतनां लभ् 1 A or प्रतिपद् 4 A, सोच्छ्वास-*a.* भू. **2** **Answer,** q. v. **-v. t.** प्रति-दा 2 P, 3 U, प्रति-ऋ c. (अर्पयति), निर्यत् 10, प्रति-पद् c. **2** पुनः आनी; 'r. good for good' प्रत्युपकारं कृ 8 U; 'r. an injury' प्रत्यपकृ, प्रतिहिंस् 7 P. **-s.** निवृत्ति *f.*, प्रत्यागमनं, प्रत्यावृत्तिः, परापतनं पुनरागमनं, निवर्तनं, प्रत्यायानं. &c.: 'on your r.' प्रतिनिवृत्ते त्वयि. **2** प्रत्यर्पणं, प्रतिदानं, निर्यातनं, प्रतिकारः. प्रत्युपकारः. **3** परिवर्तः, परावृत्ति *f.*, पर्यायः, आवर्तः. **4** फलं, लाभः, प्राप्ति *f.*, उदयः, उत्पन्नं; 'in r.' प्रति in comp.; 'injury in r.' प्रत्यपकारः; 'benefit in r.' प्रत्युपकारः; 'in r. for' विनिमयेन, परिवर्तनेन.

Re-unite, *v. t.* पुनः संयुज् 7 U, 10 or संधा 3 U. **-Re-union,** *s.* पुनः संयोगः-समागमः-संसर्गः.

Reveal, *v. t.* वि-वृ 5 U, प्रकाश् c., व्यंज् 7 P or c., आविष्कृ 8 U, व्यक्तीकृ, प्रकटीकृ; ख्या c., ज्ञा c. (ज्ञापयति); 'the missiles r. ed themselves to us' स्वतःप्रकाशान्यावयोरस्त्राणि (U. 6); 'the sacred hymns were r. ed to the sages' ऋषयः मंत्राणां द्रष्टारः, मंत्रान् स्वयं ददृशुः; 'r. a secret' रहस्यं प्रकाश् c. or भिद् 7 P &c. **-er,** *s.* प्रकाशकः, व्यंजकः, भेदकः. **-Revelation,** *s.* विवरणं, प्रकाशनं, व्यक्तीकरणं, आविष्करणं. **2** श्रुतिप्रकाशः; ऐशोन्मेषः.

Revel, *s.* निर्भरं पानगोष्ठीसुखं, संपीति *f.*, तुमुलः पानमहोत्सवः. **-v. i.** अनु-भू 1 P or सेव् 1 A with (*s.*). **-ry,** *s.* *See* (*s.*) above.

Revenge, *s.* प्रत्यपकारः, प्रति(ती)कारः, प्रतिहिंसा, प्रतिद्रोहः, वैरसाधनं-निर्यातनं-शुद्धि *f.*, प्रतिक्रिया. **2** (Desire for r.) जिघांसा, प्रत्यपकारबुद्धि *f.* **-v. t.** (Persons) वैरनिर्यातनं or वैरसाधनं-शुद्धिं कृ 8 U (with gen.): प्रतिहिंस् 7 P, प्रतिद्रुह् 4 P, प्रत्यपकृ. **2** (Insult &c.) निर्यत् 10, साध् c., शुध् c., प्रतिकृ, निस्तॄ c. **-er,** *s.* प्रत्यपकारकः, प्रतिहिंसकः. **-ful,** *a.* प्रतिकारपरायण, प्रत्यपकार or प्रतिहिंसा-शील or बुद्धि, प्रत्यपकारेच्छु, अक्षमिन्, अमर्षण. **-fully,** *adv.* प्रत्यपकारबुद्ध्या.

Revenue, *s.* करः, बलिः, आयः, उदयः: भागधेयः, राजस्वं.

Reverberate, *v. i.* प्रतिध्वन्-नद् 1 P, अनुनद्-गर्ज् 1 P. **-v. t.** प्रतिध्वन् c. &c. **2** प्रतिक्षिप् 6 P, प्रतिहन् 2 P. **-ion,** *s.* प्रतिध्वनिः-नादः-शब्दः. **2** प्रतिक्षेपः.

Revere, *v. t.* सं-,मन् c., पूज् 10, सं-भू c. पुरस्कृ 8 U, सत्कृ, भज् 1 U. उपास् 2 A. आदृ 6 A, अर्च् 1 P, 10. **-ence,** *s.* संमानः, अर्चना, प्रश्रयः, पूजा, सत्कारः, आदरः.

सपर्या,पुरस्कारः, उपासना; अर्हणा, भक्ति *f*.; 'his r.' तत्रभवान्, भगवान्, 'your r.' अत्रभवान्, 'act of r.' नमस्कारः, नमस्या, प्रणिपातः, प्रणामः, अभिवंदनं. —*v. t. See* (*v.*). **—ed,** *a.* पूज्य, अर्चनीय, सं-,मान्य, आर्य, पूजार्ह, नमस्य, उपास्य; oft. ex. by सुगृहीतनामन् (when dead) पूज्यपाद; 'r. sir' भगवन्. **—ent,-ential,** *a.* भक्तिमत्, सादर, सप्रश्रय, मानपुरःसर, भक्तिपूर्व; 'with a r. bow' भक्तिप्रणामं कृत्वा. **—ently,** *adv.* भक्त्या, भक्तिपुरःसरं, सादरं, सप्रश्रयं.

Reverie, *s.* ध्यानं, चिंतनं, भावना.

Reverse, *s.* पृष्ठं, पृष्ठभागः. 2 परिणामः, विकारः, परिवृत्ति *f*.: 'r.s of fortune' दैवदुर्विपाकः, भाग्यविपरिणामः, अत्याहितं, आपद्-विपद् *f*.; *See* **Misfortune.** 3 विपर्ययः, व्यत्ययः, व्यत्यासः, विपर्यासः, व्यतिक्रमः, वैपरीत्यं, वि-प्रति-पक्षः; 'if r. be the case' विपर्यये तु; 'r. of' ex. by इतर in comp.; 'r. of red' रक्तेतर, &c. —*a.* विपरीत, व्यत्यस्त, वि-प्रति-लोम, प्रतीप, विपर्यस्त, विरुद्ध, व्यतिक्रांत, विप्रति-पक्ष; 'r. order' विपर्ययः, व्यतिक्रमः, प्रातिलोम्यं; 'in the r. order' वि-प्रति-लोमं, विपर्यासेन, व्यत्यासेन. —*v. t.* परिवृत् c., विपर्यासं नी 1 P, परावृत् c., विपर्यस् 4 U, व्यत्यस्; अधोमुखीकृ 8 U; *See* **Overturn, Change,** (in law) प्रत्यादिश् 6 P, परावृत् c., अधरीकृ, खंड् 10, प्रतिक्षिप् 6 P. **—al,** *s.* परा-परि-वृत्ति *f*. -वर्तनं. **—ed,** *a.* विपर्यस्त, परिवृत्त, वि-प्रति-लोम, अधरोत्तर, अधोमुख, &c.; *See* (*a.*); 'my fortune being r.' परिवृत्तभाग्यतया, भाग्यविपर्यासात्, &c. **—ion,** *s.* परा-प्रत्या-वृत्तिः-वर्तनं, विपर्यासः. **—ly,** *adv.* विपर्ययेण, वि-प्रति-लोमं, व्यतिक्रमेण, व्यत्यासेन.

Revert, *v. i.* प्रत्या-परा-नि-वृत् 1 A, प्रत्यागम् 1 P. —*v. t.* **Reverse,** q. v. **—Reversion,** *s.* प्रत्यावृत्ति *f*., परावर्तनं, पुनरागमनं. 2 उत्तराधिकारः. **—ary,** *a.* उत्तरभोग्य; 'r. right' शेषभोगाधिकारः; 'r. heir' उत्तराधिकारिन्.

Review, *v. t.* (Book) गुणदोषं वि-विच् 3, 7 U or निरूप् 10 or परीक्ष् 1 A. 2 पुनः ईक्ष् or दृश् 1 P or आ-अव-लोक् 1 A, 10, पुनः विचर् c. or परीक्ष् or निरूप् 10 or अनुसं-धा, प्रत्यालोच् 10. —*s.* गुणदोषविवेचनं, गुणागुणविचारः-निरूपणं-परीक्षा; परीक्षा-क्षणं, निरूपणं. 2 पुनरीक्षणं, पुनर्दर्शनं, प्रत्यालोनचं, पुनः विचारः- निरूपणं-परीक्षा. **—er,** *s.* गुणदोषविवेचकः.

Revile, *v. t.* निर्-,भर्त्स् 10 A, गर्ह् 1, 10 A, आ-अधि-क्षिप् 6 P, अप-वद् 1 A, निंद् 1 P, आक्रुश् 1 P. **—er,** *s.* निर्भर्त्सकः, निंदकः, अपवादकः. **—ing,** *s.* निर्-,भर्त्सनं-ना, गर्हणं-णा, अपवादः, आक्रोशः, आ-अधि-क्षेपः; उपालंभः, वाक्पारुष्यं, *See* **Abuse, Reproach.**

Revise, *v. t.* पुनः दृश् 1 P or ईक्ष् 1 A or विचर् c.; *See* **Review.** 2 (पुनः) शुध् c., सं-वि-परि-शुध् c. **—al,-ion,** *s.* पुनर्दर्शनं, पुनः परीक्षा, संशोधनं.

Revive, *v. t.* जीव् c., प्रत्युत्-उत्-सं-°, (fig. also); पुनः जीव् c., प्र-वि-बुध् c., चेतनां-संज्ञां-लभ् c. (लंभयति) or प्राप् c., प्रत्या-समा-श्वस् c., पुनः उत्-स्था c. (उत्थापयति). उद्-धृ 10. 2 पुनः प्रवृत् c., नवीकृ 8 U. —*v. i.* प्रत्युत्-उत्-सं-जीव् 1 P, पुनः जीव्; संज्ञां-चेतनां-लभ् 1 A or प्राप् 5 P or आ-प्रति-पद् 4 A प्र-वि-बुध् 4 A, सं-उत्था 1 A, प्रत्या-समा-श्वस् 2 P. 2 पुनः प्रवृत् 1 A. **—al,** *s.* संजीवनं, प्रत्युत्-उत्-जीवनं, (fig. also); संज्ञाप्राप्ति *f*., चेतनागमः, चेतनालाभः, प्र-अव-बोधः. 2 पुनरुत्थानं. समुत्थानं, पुनः स्वास्थ्यं, पुनः स्वास्थ्यप्राप्तिः. 3 उद्धारः, पुनःप्रवृत्तिः.

Revoke, *v. t.* निवृत् c., खंड् 10, निरस् 4 U. **—Revocation,** *s.* निवर्तनं, खंडनं, प्रत्यादेशः; *See* **Repeal.**

Revolt, *v. i.* अभि-,द्रुह् 4 P, व्युत्था 1 A, कोपं उत्पद् c., शासनं अति-इ 2 P or उल्लंघ् 1 A, 10. —*s.* राजद्रोहः, प्रकृतिकोपः; *See* **Rebellion. Mutiny,** 'fall into r.' (fig.) विसंवादिन्-विरोधिन्-*a.* भू 1 P. **—ing,** *a.* बीभत्स, अतिगर्ह्य, अतिद्वेष्य; 'a r. scene,' बीभत्सालोकः.

Revolve, *v. i.* परिवृत् 1 A; वि-व्या-आ-वृत्, परि-भ्रम् 1, 4 P, घूर्ण् 6 P, 1 A, वि-परि°, लुठ् 6 P; 'that matter (idea) constantly r. ing in his mind' तस्य चार्थस्य सततं मनसि विपरिवर्तमानत्वात् (Ka. 67). —*v. t.* Causal of roots above. 2 (मनसा) विचर् c., वितर्क् 10, विमृश् 6 P, आलोच् 10: *See* **Consider.** **—ing,** *a.* परिवर्तिन्, परि-,भ्रमिन्. **—Revolution,** परिवर्तः-र्तनं, परिवृत्ति *f*., आवर्तः. आवृत्तिः, घूर्णनं. 2 (Of time &c.) परि-आ-वर्तः, पर्यायः, चक्रं, भ्रमणं, भ्रांति *f*., युगशतपरिवर्तान् 'for r.s of ages;' 'r. of time' कालचक्रं, कालावर्तः. 3 गति *f*., प्रवृत्तिः; 'r. of a planet' (time) भगणः. 4 राज्यपरिवर्तः-परिवृत्तिः. **—ary,** *a.* (*s.*) in comp. **—ist,** *s.* राज्यपरिवृत्तिवादिन्. **—ize,** *v. t.* सर्वथा-साकल्येन-परिवृत् c. **—Revulsion,** *s.* विरागः, विरक्ति *f*.

Reward, *s.* पारितोषिक, प्रतिफलं, प्रतिदानं; दक्षिणा, मूल्यं, वेतनं; 'the r. due to a spiritual teacher' गुरुदक्षिणा; 'deserving a r. ' दक्षिण्य, दाक्षिणीय. —*v. t.* पारितोषिकं &c. दा 3 U, परितुष् c., दानेन संतुष् c. or सं-भू c., मूल्यं दा. 2 सफलीकृ 8 U. कृतार्थयति (D.); ' his labour was r.ed ' तस्य प्रयत्नः सफलो बभूव.

Rhapsody, *s.* असंगतप्रबंधः, असंबद्धकविता. **-ic,-ical,** *a.* असंगत, असंबद्ध, निरन्वय. अनन्वित.

Rhetoric, *s.* अलंकारशास्त्रं-विद्या, साहित्यशास्त्रं. **-al,** *a.* आलंकारिक (की *f.*). अलंकाररूप, अलंकार in comp.: 'r. style' अलंकारयुता-आलंकारिकी-भाषासरणिः; 'r. expression' अलंकारः. वाक्यालंकारः. **-ian,** *s.* अलंकारशास्त्रज्ञः. 2 वाग्मिन् *m.*, प्रवक्तृ *m.*: *See* **Orator.**

Rheum, *s.* (Of the eye) दूषि-षी *f.*, दूषिका. 2 श्लेष्मन् *m.*, कफः; क्लेदनः, क्लेदकः. **-y,** *a.* (Eye) क्लिन्नाक्षि *n.*, चुल्लः, चिल्लः. पिल्लः; ' having r. eyes ' क्लिन्नाक्ष, चुल्ल, चिल्ल, पिल्ल. 2 श्लेष्मल-ण, कफिन्. **-Rheumatic,** *a.* वातीय, वात in comp. 2 वातकिन्; वातुल, वातग्रस्त, वातोपहत, वात-वायु-ग्रस्त. **-Rheumatism,** *s.* संधिवातः-वायुः (of the joint); वातः. वायुः. वातव्याधिः-रोगः.

Rhinoceros, *s.* गंडः, गंडकः, खड्गिन् *m.* ' the female r. ' खड्गधेनुः.

Rhombus, *s.* तुल्यचतुर्भुजः.

Rhyme, *s.* यमकः-कं, मित्राक्षरं. 2 पद्यं. कविता. **-er,** *s.* कविता-पद्य-कारः, कुकविः.

Rhythm, *s.* तालः, लयः. **-ical,** *a.* लय-ताल-अनुगत; तालबद्ध.

Rib, *s.* पर्शुका, पार्श्वकं, पार्श्वास्थि *n.*: ' the r.s taken together ' पंजरः-रं. 2 पोलिंदः 3 शलाका (of umbrellas). 4 रेखा.

Ribald, *a.* *See* **Obscene** &c.

Ribbon, Riband, *s.* पट्टबंधः, दुकूलपट्टः.

Rice, *s.* (Plant) शालिः. कलमः, नीवारः. व्रीहिः (various kinds). 2 तंडुलः, धान्यास्थि *n.* 3 (Boiled) अन्नं, ओदनः-नं. भक्तं; *See* **Food.** ' r. with milk and sugar ' पायसं, परमान्नं; ' scum of r. ' मासरः, आचामः, निस्र(स्रा)वः, भक्तमंडः; ' scorched r. ' भिस्सटा, दग्धिका; ' fried r. ' धानाः (*f.* pl.); ' ear of r. ' कणिशः-शं, धान्यशीर्षकः.

Rich, *a.* धन-वित्त-द्रव्य-वत्, धनिन्, धन-वित्त-शालिन्, सधन, महा-बहु-धन. अर्थवत्, धनिक, धनाढ्य, विभवसंपन्न, धनसमृद्ध. श्रीमत्, लक्ष्मीवत्; समृद्ध, धनेश्वर, लक्ष्मीश; संपन्नवत्. शालिन्, युक्त in comp. with **Wealth,** q. v. 2 (Costly) महार्ह-र्घ. बहुमूल्य, महामूल्य, अतिप्रतापवत्. 3 आढ्य. बहुल, प्रचुर. पूर्ण, बहु, समृद्ध. संपन्न, मय in comp.: ' r. perfume ' बहलामोदः; ' r. in beauty ' रूपाढ्य; गुणाढ्य, बहुलरत्न, &c. 4 सत्व-सार गुण-वत्, स्फीत., बहुफलप्रद, उर्वरा (भूमिः), सस्याढ्य. 5 उज्ज्वल, सुप्रकाश, अतिशोभन (colours). 6 घृत-प्लुत-पूर्ण. **-es,** *s.* धनं, अर्थः, विभवः, वित्तं, द्रव्यं; *See* **Wealth.** 2 धनाढ्यता, सधनता, धनबाहुल्यं. **-ly,** *adv.* बहुधनेन, प्रभूतं, भूरि, महामूल्येन, अतिशोभया, अतिप्रतापेन, सश्रीकं; ' r. decorated ' अतिशोभया प्रसाधित, सविशेषमंडित. **-ness,** *s.* धनाढ्यता, सश्रीकता, सधनता, स्फीतता, महार्घता, अतिशोभा. प्रतापः; बाहुल्यं, समृद्धि *f.*, संपद् *f.*: ' r. of beauty ' रूपसंपद्, लावण्यातिशयः; ' r. of expression ' वचसामुदारता (Mal. 1).

Rick, *s.* (Of corn or hay) राशिः, संचयः.

Rickets, *s.* बालग्रहः.

Rickety, *a.* शिथिलसंधि, अस्थिर, अदृढसंधि; (building) जीर्ण, जर्जरित.

Rid, *v. t.* मुच् 6 P or c., मोक्ष् 10, वि-,शुध् c., उद्-हृ 1 P: ' to get r. of ' अप-नी 1 P, निराकृ, त्यज् 1 P, अप-हा 3 P, निः-सृ c., अपास् 4 U: oft. by निर् pr.; ' r. of thorns ' निष्कंटकीकृ; ' r. of difficulties ' निर्विघ्नीकृ. **-a.** वि-,मुक्त, वर्जित, हीन, रहित, गत, वीत, हृत, निर्, अ in comp.: कंटकहीन, निःशल्य, &c. **-dance,** *s.* मुक्ति *f.*, मोक्षः, उद्धारः, शोधनं.

Riddle, *s.* प्रहेलिका, प्रवह्लिका, प्रश्नदूती; गूढं, कूटप्रश्नः. 2 शोधनी, चालनी. **-*v. t.*** शुध् c. 2 व्यध् 4 P. *See* **Perforate.**

Ride, *v. i.* अश्वेन संचर् 1 A or गम् 1 P or या 2 P or चल् 1 P, अश्वेन &c. वह् pass. **-*v. t.*** (अश्वं &c.) आ-अधि-समा-अध्या-रुह् 1 P, अध्या-आ- क्रम् 1 U, 4 P, अधिष्ठा 1 P, अध्यास् 2 A. **-*s.*** अश्वेन संचरणं or विहरणं. **-er,** *s.* अश्वारोहः, अश्वारोहिन् *m.*, अश्वारूढः. 2 आरोहिन् *m.*, आरूढः. **-ing,** *s.* अश्वारोहणं. **-*a.*** आरूढ, आरोहिन्, आरोह. आश्रयिन् in comp.

Ridge, *s.* कटकः-कं, उत्संगः. 2 पृष्ठं. 3 सेतुः, धरणः, आलि *f.*, पिंडलः. **-y,** *a.* सकटक.

Ridicule, *v. t.* उप-अव-हस् 1 P, उपहास्यतां नी 1 P, उपहासास्पदं कृ 8 U, अवहासास्पदीकृ, आ-अव-क्षिप् 6 P: *See* **Contemn,** also; ' I shall be r.-ed ' गमिष्याम्युपहास्यतां (R. 1. 3); ' to be r. ed ' उपहास्यतां गम् 1 P or या 2 P. **-*s.*** उप-अव-हासः-हसनं, आ-अव-क्षेपः, अवज्ञा. अवहेलना, उपहास्यता. **-ous,** *a.* अव-उप हास्य, हासास्पदीभूत, हासयोग्य, उपहासार्ह, हासास्पदं, हासकर (री *f.*), हासोत्पादक.

Rife, *a.* सर्वत्र प्रचलित, प्रवृत्त, प्रचल, बहुल.

Riff-raff, *s.* अधमाः, प्राकृत-पृथग्-जनाः.

Rifle, *s.* आग्नेयास्त्रं. -*v. t.* अप-हृ 1 P; *See* **Rob.**

Rift, *See* **Fissure.**

Rig, *v. t.* सज्जीकृ 8 U, उपकरणैः उपक्लृप् c. 2 *See* **Frolic. -ging,** सज्जा, सामग्री, परिच्छदः, रज्ज्वादिसाधनं; पोतसज्जा.

Right, *a.* दक्षिण, वामेतर, सव्येतर, अपसव्य; 'to the r.' दक्षिणतः; दक्षिणेन; 'r. hand' अग्रहस्तः-करः, दक्षिणपाणिः. 2 उचित, न्याय्य, युक्त, उपपन्न, सम्यच्, यथान्याय धर्म्य, साधु, समंजस, सत्-सु in comp.; 'r. path' सन्मार्गः, सुपथः. 3 सत्य, यथार्थ, अवितथ, तथ्य; *See* **True;** 'Priyamvada is r.' or 'says r.-ly' अवितथमाह प्रियंवदा (S. I): 'you are r.' सत्यं-यथार्थं-आह-भवान्. 4 सरल, ऋजु, अवक्र; 'r. angle' समकोणः, ऋजुकोणः. -*s.* दक्षिणपार्श्वः-दिक्; दक्षिणः, अपसव्यं; 'on the r.' दक्षिणतः, दक्षिणस्यां दिशि. 2 न्यायः, धर्मः, न्याय्यता, न्यायिता, औचित्यं, याथार्थ्यं, नीति *f.*, युक्तता. 3 सत्यता, तथ्यता, शुद्धता. 4 अधिकारः, स्वत्वं, स्वाम्यं, सत्ता; oft. ex. by अर्ह् 1 P; 'a woman has no r. to independence' न स्त्री स्वातंत्र्यमर्हति. -*adv.* युक्तं, न्यायतः, स्थाने, साधु, उचितं, यथोचितं, यथान्यायं, उपपन्नं, सम्यक्; 'I acted r. in delivering her into the charge of the queen' एनां देवीहस्ते निक्षिपता मया युक्तमेवानुष्ठितं (Rat. 1). 2 सत्यं, यथार्थं, सरलं, ऋजु; सु-अति pr. -*interj.* साधु, युक्तं, भद्रं, बाढं. -*v. t.* ऋजूकृ 8 U, सुस्थीकृ, समा-प्रतिसमा-धा 3 U. -*v. i.* सरल-ऋजु-*a.* भू 1 P. **-eous,** *a.* न्यायपरायण-पर, साधुवृत्त, पवित्र, न्यायाचार, सुशील; (of acts) न्याय्य, युक्त; *See* **Just. -eously,** *adv.* न्यायतः, धर्मेण. **-eousness,** *s.* सदाचारः, साधुवृत्तं. **-ful,** *a.* अधिकारिन्, स्वत्वविशिष्ट. 2 **Just,** q. v. **-fully,** *adv.* साधिकारं. **-ly,** *adv.* उचितं, सत्यं, यथार्थतः, परमार्थतः, यथार्थं, स्थाने, युक्तं, यथाधर्मं, यथान्यायं, न्यायतः, सम्यक्. 2 सत्यं; *See* **Truly.**

Rigid, *a.* कठोर, कर्कश, उग्र, दारुण, परुष. 2 दृढ, घन, कठिन, अशिथिल, अमृदु. **-ity, -ness,** *s.* कठोरता, कठिनता, दृढता, घनता, काठिन्यं. **-ly,** *adv.* दृढं, कठिनं, अशिथिलं; *See* **Strict.**

Rigmarole, *s.* अनर्थककथा.

Rigour, *s.* दृढता, काठिन्यं, अशैथिल्यं. 2 उग्रता, कठोरता, कर्कशता, निष्ठुरता. **-ous,** *a.* कठोर, निष्ठुर, उग्र, परुष, तीक्ष्णदंड, असौम्य, कर्कश, कठिन. 2 सूक्ष्म; *See* **Strict. -ously,** *adv.* उग्रं, निष्ठुरं, परुषं.

Rile, *v. t.* क्षुभ् c., कुप् c.

Rill, *s.* क्षुद्रसरित् *f.*, क्षुद्रनदी, कुल्या.

Rim, *s.* प्रांतः, अंतः, धारा, कर्णः (of ships).

Rime, *s.* *See* **Hoar-frost.**

Rind, *s.* त्वच् *f.*, वल्कः-ल्कं, वल्कलः-लं, शल्कं, चर्मन् *n.*, कंचुकः.

Ring, *v. i.* रण्-क्वण् 1 P, वि-रु 2 P, शिंज् 2 A. -*v. t.* चल् c., वद् c., आहन् 2 U, नद् c., क्वण् c., 'r. the bell' घंटां वादय, घंटानादं कुरु. -*s.* अंगुली(रि)यं-यकं, ऊर्मिका; 'signet r.' अंगुलिमुद्रा, मुद्रा. 2 वलयः-यं, मंडलं, चक्रं; 'dancing in a r.' मंडलनृत्यं. 3 मंडलं (of persons). 4 रंगः. 5 शिंजितं, क्वणितं, क्वणनं, नि-,क्वा(क्व)णः, रवः, नादः; 'r.-leader' नायकः, अग्रणीः, मुख्यः, प्रवर्तकः, मुखरः, प्रधानराजद्रोहिन् *m.* (of conspirators); 'r.-worm' दद्रुमंडलं, मंडलकुष्ठं; 'having r.-worm' दद्रु(द्रू)णः, दद्रूरोगिन्.

Ringlet, *s.* अलकः, चूर्णकुंतलः, कुरलः.

Rinse, *v. t.* जलेन प्रक्षल् 10, (जलं) उपस्पृश् 6 P, आचम् 1 P. **-ing,** *s.* आचमनं, उपस्पर्शः.

Riot, *s.* संमर्दः, संक्षोभः, तुमुलं, कोलाहलः, विप्लवः. 2 यथेच्छपानोत्सवः, विषयसुखातिरेकः, तुमुलोत्सवः. 3 सं-अव-मर्दः (संभूय कृतः); राजाभिद्रोहः, प्रजाक्षोभः, प्रकृतिकोपः; 'to run r.' मर्यादां अतिक्रम् 1 U, 4 P or अति-इ 2 P. -*v. i.* संक्षोभं इ 2 P, संरंभं गम् 1 P, तुमुलं कृ 8 U. 2 सुखोपभोगे निमग्न-*a.* भू 1 P, तुमुलरवेण उत्सवं सेव् 1 A or कृ. **-er,** *s.* तुमुलसंक्षोभकारिन् *m.* **-ous,** *a.* तुमुल-क्षोभ-कारिन्, तुमुलोत्सवकारिन्. **-ously,** *adv.* तुमुलशब्देन, सकोलाहलं.

Rip, *v. t.* वि-,दॄ 9 P or c., विपट् 10, निर्भिद् 7 P, निष्कृत् 6 P; *See* **Tear.** -*s.* विदरः, विपाटनं.

Ripe, *a.* पक्व, परि-वि-सु-°, पक्वतां आपन्न, परिणत, पाकोन्मुख (खी *f.*), फलोन्मुख, प्रौढ; 'r. in years' परिणतवयस्, प्रवयस्, प्रवृद्ध, वयोवृद्ध; 'r. to meet one's doom' विनाशोन्मुख, पक्व. 2 सिद्ध, संपन्न, *See* **Perfect.** 3 सिद्ध, सज्ज, सन्नद्ध; *See* **Ready. -Ripen,** *v. i.* पाकं इ 2 P or व्रज् 1 P, पाकाभिमुख-पाकोन्मुख-*a.* भू 1 P, पच् pass., उपचि pass.; 'coldness r.-ed into downright hatred' अनादरः (कालक्रमेण) उपचीयमानः साक्षाद्द्वेषस्य परां कोटिं इयाय. -*v. t.* पच् 1 P, कृ with (*a.*); *See* **Mature. -ness,** *s.* परि-वि-पाकः, परिणति *f.*, परिणामः, पक्वावस्था, पक्वदशा.

Riparian, *a.* नदीतटसंबंधिन्.

Ripost, भंगेभाषणं, सरसोक्ति *f.*

Ripple, *s.* तरंगः, वीचि-ची *f.*, ऊर्मि *f.*, भंगः. -*v. i.* क्षुभ् 4 P, 1 A, चलोर्मि-सतरंग-*a.* भू 1 P. **-ing,** *a.* चलोर्मि, क्षुब्ध, प्रचलदूर्मि, सतरंग, तरंगाकुल, उत्तरंग.

Rise, *v. i.* उत्था 1 P, समुत्था 1 A, (in all senses); ' r. ing from the bed ' सुप्तोत्थित, मुक्तशयन; ' do not r. to receive their elders ' नाभ्युत्तिष्ठंति गुरून् (Ka. 108). **2** उद्गम् 1 P, उद्-इ 2 P, उदय् 1 A, उत्पत् 1 P, ऊर्ध्वं गम् or व्रज् 1 P, उद्-वृत् 1 A; आ-अधि-रुह् 1 P, आक्रम् 1 A (पूर्वदिशं); उन्नम् 1 P. **3** प्रति-भा 2 P, निर्भा, प्रादुर्भू 1 P, आविर्भू, दृश्-लक्ष्-pass. **4** प्र-, जन् 4 A, उत्पद् 4 A, प्रवृत्, उद्-सं-प्र-भू, निः-प्र-सृ, निः-गम्. **5** (Advance) उत्था, प्र-,वृध् 1 A, उपचि-pass., अधिकीभू, प्रबलतर-*a.* भू; 'r. ing enemy' उत्तिष्ठमानः शत्रुः. **6** प्रतिपत्ति-उन्नति-प्राप् 5 P, उन्नम्, उत्कृष् pass. **7** (Against) अभिद्रुह् 4 P (with acc.), द्रुह् (with dat.), व्युत्था 1 A. **8** (As sea) क्षुभ् 1 A, 4 P, ऊर्मिमालाकुल-क्षुब्ध-*a.* भू. -*s.* सं-,उत्थानं (fig. also). **2** उदयः, उद्गमः-मनं, उत्पातः, ऊर्ध्वगतिः; ' he owes his r. to me ' मत्तः लब्धोदयः; ' r. and fall ' पातोत्पातौ. **3** उत्पत्ति *f.*, प्रभवः, उद्भवः, संभवः, उद्गमः, प्रवृत्ति *f.* प्र-उप-क्रमः, आरंभः. **4** वृद्धि *f.*, उपचयः, आधिक्यं. **5** उन्नति *f.*, उत्कर्षः, प्रतिपत्ति *f.* पदवृद्धिः, उदयः; ' to give r. to ' उत्पद् c., जन् c. **-ing,** *s.* उत्थानं, उदयः, उद्गमः &c.; ' r. to receive another' अभ्युत्थानं, प्रत्युद्गमः. **2** प्रजा or प्रकृति-क्षोभः or प्रकोपः; *See* **Mutiny. 3 Tumour,** q. v.; ' r. ground' उन्नतभूमिः, उच्चस्थानं, उत्सेधः.

Risible, *a.* हासजनन (नी *f.*), हास्यास्पदं, हासकर (री *f.*), हासोत्पादक.

Risk, *s.* संशयः, संदेहः, शंका, भयं, संकटं, ' run the r. of losing all ' सर्वनाशसंशये आत्मानं पत् c. -*v. t.* संशये निक्षिप् 6 P or पत् c.; *See* **Danger.**

Rite, *s.* क्रिया, विधिः, कर्मन् *n.*, कार्यं, आचारः, संस्कारः, नियमः, कल्पः; ' scriptural r. ' शास्त्रविधिः-कर्म, शास्त्रोक्तक्रिया. **-Ritual,** *a.* वैधिक-नैयमिक -(की *f.*), विध्यनुरूप, शास्त्रोक्त, विधि-क्रिया in com . -*s.* क्रियासंस्कारः-विधिः-पद्धतिः-शास्त्रं. . **t,** *s.* संस्कारशास्त्रज्ञः.

Rival, *v. t.* स्पर्ध् 1 A, प्रति-परि-°, with instr.), संघृष् 1 P, अहमहमिकया-परस्परजिगीषया-यत् 1 A, वि-,जि desid. (जिगीषति); oft. by प्रतिद्वंद्विन्, प्रतिस्पर्धिन्; ' with hands r. ing young foliage (in beauty) ' किसलयोद्भेदप्रतिद्वंद्विभिः करतलैः (S. 4); चंद्रच्छायाप्रतिस्पर्धी or -प्रतिद्वंद्वी &c. -*a.*, -*s.* प्रति-,स्पर्धिन्, प्रतियोगिन्, वि-,जिगीषु, प्रतिपक्ष, सपत्न, परस्परसंघर्षिन्, अभिभवेच्छु; by प्रति in comp.: ' r. combatant ' प्रतियोधः; ' r. army ' प्रतिबलं &c.; ' r. woman ' सपत्नी; ' a r. Kesava ' अपरः केशवः, प्रति-केशवः; ' a r. to *Sri* ' प्रत्यादेश इव श्रियाः (V. 1). **-ry,** *s.* प्रतिस्पर्धा, प्रतियोगिता, वि-,जिगीषा, अहमहमिका, प्रतिद्वंद्विता, संघर्षः, सापत्न्यं, प्रतिपक्षता; विरोधः, वैरं.

Rive, *v. See* **Tear.**

River, *s.* नदी, सरित्, सिंधुः, आ(अ)पगा, निम्नगा, तरंगिणी, स्रोतोवहा, तटिनी, ह्रादिनी, स्रोतस्विनी, धुनी, शैवलिनी, द्वीपवती, स्रवंती, निर्झरिणी ' a small r. ' कुल्या, अल्प-कृत्रिम-सरित्; ' confluence of r. s ' संभेदः, सिंधुसंगमः; ' watered by r. s ' नदीमातृक.

Rivet, *v. t.* कील् 10, कीलेन बंध् 9 P, दृढं बंध्; अभिनि-विश् c., सस्ज् c.; ' to be r. ed ' कीलित-दृढबद्ध-*a.* भू, सस्ज् 1 U (sight); स्थाने खलु सज्जति दृष्टिः (M. 1); ' all eyes were r. ed on him ' नेत्रव्रजाः तस्मिन्निपेतुः (R. vi. 7), तस्मिन् दृष्टिः सक्ताभूत्; बध्नाति मे चक्षुः चित्रकूटः (R. xiii. 47), दयिते प्रत्युप्तस्य चक्षुषः (U. 3); आलिखित इव रंगः (S. 1) ' the audience is r. ed (to the spot) with attention,'. -*s.* कीलः-लकः-कं, शलाका.

Rivulet, *s.* क्षुद्र-कु-सरित् *f.*, अल्प-क्षुद्र-नदी.

Road, *s.* मार्गः, पथिन् *m.*, अध्वन् *m.*, वर्त्मन् *n.*, वीथि-थी *f.*, रथ्या, सरणि-णी *f.*, पदवी, पद्धति-ती *f.*; ' high r. ' राजमार्गः-पथः; ' common r. ' प्रचारः; ' difficult r. ' दुर्गसंचरः, संक्रमः, दुर्गमार्गः; ' dreary, lonely r. ' प्रांतरं, शून्यमार्गः; ' crossing of r. s ' चतुष्पथं, शृंगाटकं; *See* **Way.**

Roam, *v. i.* परि-,अट् 1 P, परि-,भ्रम् 1, 4 P, वि-सं-चर् 1 P; 'r. about' इतस्ततः विचर् 1 P or चर् or भ्रम्. **-ing,** *s.* परि-,अटनं, परिभ्रमणं, विचरणं.

Roar, *v. i.* गर्ज् 1 P, स्तन् 1 P, नर्द् 1 P, रस् 1 P, रु 2 P, नद् 1 P, अनु-हुंकृ 8 U (of lion): ' a r . ing river ' घर्घररवा सरित्. **2** वि-आ-उत्-व्याकुश 1 P, प्रणद् घुष् 10; ' r. ing with pain ' आर्तनादं मुच्. -*s.*, **-ing,** *s.* गर्जितं, स्तनितं, गर्जनं-ना, नर्दनं, विरावः, महा-दीर्घ-गंभीर-शब्दः-नादः; घनध्वनिः, दीर्घरावः-घोषः; हुंकारः. **2** नादः, वि-आ-क्रोशः, निर्घोषः, शब्दः, स्वरः, ध्वनिः.

Roast, *v. t.* भ्रस्ज् 6 P; ' r. on a spit ' शूलाकृ 8 U. **2** तप् 1 P or c., दह् 1 P, **-ed,** *a.* भ्रष्ट, भृष्ट; ' r. on a spit ' शूल्य.

शूलाकृत, भटित्र, शूलसंस्कृत.

Rob, *v. t.* चुर् 10, मुष् 9 P, लुंट्-ठ् 1 P, 10, अपहृ 1 P, (with gen. of person). **-ber,** *s.* दस्युः, चो(चौ)रः, स्तेनः, तस्करः, लुंटाकः, मोषकः; *See* **Thief.** **-bery,** *s.* अपहरणं, मोषणं, स्तेयं, चौर्यं, स्तैन्यं, अपहारः, लुंठनं.

Robe, *s.* वसनं, वस्त्रं. *-v. t.* वसनं परि-धा 3 U, वस् 2 A; *See* **Dress.**

Robust, *a.* दृढदेह, व्यूढोरस्क, दृढांग (गी *f*), वज्रदेह, मांसल, सवीर्य, ससत्त्व, उपचित; 'r. body' उपचितं गात्रं, सिंहसंहननं. **-ly,** *adv.* सवीर्यं, ससत्त्वं. **-ness,** *s.* दृढांगता, वीर्यं, मांसलता.

Rock, *s.* स्थूलशिला, शिलोच्चयः, बृहदुपलः, महाप्रस्तरः, शैलः; शिला, पाषाणः, ग्रावन् *m.*, उपलः, अश्मन् *m.*, प्रस्तरः, (small): *See* **Stone,** ' r.-salt ' सैंधवः-वं, शीतशिवं, सिंधुजं, माणिमंथं. *-v. t.* दोलनेन स्वप् *c.* (rock to sleep); दोलयति-आंदोलयति (D.), इतस्ततः प्र-वि-सं-चल् *c.* *-v. i.* दोलायते (D.), इतस्ततः वि-प्र-चल् 1 P: *See* **Waver.** **-y,** *a.* शिलामय (यी *f.*), शिलापूर्ण, अश्मर, औपल (ली *f.*), (*s.*) in comp.

Rocket, *s.* हंसतारा, अग्निबाणः.

Rod, *s.* दंडः, शलाका (of metal) यष्टि *f.*, वेत्रं (of cane.)

Rodent, *a.* दंशक.

Rodomontade, *s.* गर्वितवाक्यं, उद्धतवचनं.

Roe, *s.* मीनांडं, मत्स्यांडं, मत्स्यगर्भः. 2 मृगी, हरिणी.

Rogue, *s.* धूर्तः, कितवः, जाल्मः, शठः, खलः, वंचकः, प्रतारकः, कापटिकः, कूटकः, कूटकारः, दुर्जनः, दुरात्मन् *m.*, कुहकः. **-ery, -ishness,** *s.* कैतवं, शाठ्यं, दौर्जन्यं, वंचनं, &c. **-ish,** *a.* धूर्त, शठ, कितव; *See* (*s.*) **-ishly,** *adv.* धूर्ततया, शाठ्यात्, सकैतवं.

Roisterer, *s.* तुमुलकारिन् *m.*

Role, *s.* भूमिका, कर्मन् *n.*

Roll, *v. i.* वि-लुठ् 6 P, वि-लुठ् 1, 4 P, 2 परि-व्या-वि-वृत् 1 A, परि-,भ्रम् 1, 4 P, घूर्ण् 6 P, 1 A; (about) प्र-वि-चल् 1 P, घूर्ण्, वि-लुल् 1 P; ' with eyes r. ing about ' घूर्णल्लोचन, लोलाक्ष, विलोलदृष्टि. 3 (On, by &c.) व्यति-इ 2 P, गम् 1 P, अति-व्यति-क्रम् :1 U, 4 P, परि-,आ-वृत्, परि-इ; ' as days r. ed on ' दिनेषु गच्छत्सु, गच्छता कालेन; ' a cloud r. s on through the air ' मेघः खमाक्रमितुं प्रवृत्तः (Mr. 5); ' which has r. ed out at the feet of the Vindhya ' विंध्यापादे विशीर्णा (Me. 19). *-v. t.* व्या-परि-वृत् c., घूर्ण् c., भ्रम् c., &c.; ' r. down ' रयेण नी 1 P, ' r. ing down corpses ' प्रेतवाहिनी (नदी). 2 लुट्-ठ् c., वि-प्र-°, 3 पिंडीकृ 8 U, संपुटीकृ, संपिंड् 10. 4 आ-परि-वेष्ट् c., अवगुंठ् 10, आ-प्रा-वृ 5 U. *-s.* लुठनं, परिवर्तनं, &c. 2 पिंडः, गोलः-लकः, नाली. 3 नामावलि-ली *f.* **-er,** *s.* परि-,वर्तनी, वर्तनयंत्रं-चक्रं. 2 वेल्लनी (for flour). 3 पटः. **-ing,** *s.* लोठनं, परि-व्या-वर्तनं, घूर्णनं, परि-,भ्रमणं, &c. *-a.* घूर्णत् वि-,लोल, प्रचलित,

Rollic, *v. i. See* **Frolic.**

Romance, *s.* आख्यायिका, काल्पितकथा. *-v. t.* आख्यायिकां लिख् 6 P or प्रबंध् 9 P. **-Romantic,** *a.* अद्भुत, विचित्र, आश्चर्यभूत. 2 शूर, विक्रांत; अद्भुतप्रिय, अशृंखलवृत्ति. 3 असंभव, काल्पित.

Romp, *v. i.* प्रगल्भं क्रीड् 1 P, उद्धतं खेल् 1 P, (U. 4). *-s.* उद्धतखेलनं, प्रगल्भ-अविनीत-क्रीडा. 2 प्रगल्भा, अविनीता, निर्लज्जा; क्रीडाशीला.

Roof, *s.* छदिस् *f.*, पटलं; ' the wooden frame of a r. ' गोपानसी, वल(ड)भी; ' the edge of a r. ' वलीकं, नीध्रं. 2 तालु *n.* (of the mouth). *-v. t.* पटलेन आच्छद् 10. **-ed,** *a.* सपटल, पटलाच्छन्न. **-less,** *a.* निष्पटल; (fig.) निराश्रय.

Rook, *s.* काकः, वायसः. 2 *See* **Cheat,** *s.* 2. **-ery,** *s.* काकाश्रयः.

Room, *s.* वेश्मन् *n.*, प्र-,कोष्ठः, शाला, कक्षः-क्षा, कुटी, गृहं; 'upper r. ' चंद्रशाला, शिरोगृहं; ' inner r. ' गर्भागारं, वासगृहं, अंतःकोष्ठः. 2 प्र-,देशः, स्थानं, आस्पदं, भूमि *f.*, पदं; स वासवेन इतो निषीदेति विसृष्टभूमिः (K. III. 2) ' Vasava made r. for him ' &c.; ' there is r. for doubt here ' शंकास्थानमेतत्. 3 अवकाशः, अवसरः, प्रसरः, विषयः, अंतरं, स्थलं; ' want of r. ' अनवकाशः, स्थलसंकोचः; ' giving no r. for envy ' अदत्तावकाशो मत्सरस्य; 'make r.' अंतरं दीयतां, अपसर. 4 (Stead) स्थानं, भूमिः; *See* **Instead of.** **-y,** *a.* विशाल, विस्तीर्ण, विपुल, असंबाध, सावकाश.

Roost, *s.* वासयष्टि *f.*, पक्षिनिवासः, निलयन or शयन-देशः or स्थानं. *-v. i.* शी 2 A, स्वप् 2 P, निली 4 A, निवस् 1 P, आश्रि 1 U.

Root, *s.* मूलं, in all senses; तरुमूलं, कमलमूलं &c.; अंघ्रिः, पादः. (Foot, q. v.); बु(ब्र)ध्नः; शिफा, जटा (fibrous); ' bulbous r. ' कंदः-दं; ' to the r. s ' आमूलं, मूलतः, समूलं; 'the r. of a branch ' अवरोहः. 2 अधोभागः-देशः, तलं, मूलं, जातं in comp. (of animals only). 3 मूलं, बीजं, योनि *f.*, आदिः, निदानं, कारणं, आदिबीजं-कारणं-हेतुः, प्रकृति *f.*; ' having for its r. ' मूल, हेतु, &c. in comp.; वित्तमूलः कलहः, &c. 4 (Of a word) मूलं, प्रकृतिः; शब्द-

योनिः; 'r.-meaning' मूलार्थः, यौगिकार्थः, व्युत्पत्तिसिद्धः. 5 (Of numbers) मूलं, पदं; 'to extract a r.' मूलं कृ 8 U. –v. i. 'take r.' मूलं बंध् 9 P. –v. t. दृढं निखन् 1 P or रुह् c.: ex. by 'r.-ed'. 2 (Up) उन्मूल् 10, समूलं उद्-हृ 1 P, उत्पट् 10, उत्खन्, व्यपरुह् c., उच्छिद् 7 P. –ed, a. दृढ-बद्ध-मूल, रूढ-भूत-मूल.

Rope, s. रज्जु f., गुणः, दामन् f. n., शुल्वं, वराटकः-कं, संदानं, वटः-टी-टं; 'the rope and bucket of a well' उद्घाटनं, घटीयंत्रं; 'r.-dancer' सूत्रायणः, कलायणः; 'r.-ladder' रज्जुसोपानं; 'r.-maker' रज्जुकारः. –y, a. रज्जुधर्मन्, श्यान, सांद्र.

Rosary, s. अक्षमाला, अक्षसूत्रं, जपमाला-सूत्रं.

Rose, s. जपापुष्पं, ओड्रपुष्पं; (tree or flower) जपा-वा; सेवती, शतपत्री; 'r.-apple' जंबु-बू f.; (fruit) जंबुफलं, जांबवं. –y, a. पाटल, जपावर्ण. 2 जवारूप. –Roseate, a. 'r.-coloured' पाटल, जपासवर्णः. 2 बहिः रमणीय, दृष्टिमनोहर.

Rot, v. i. पूतीभू 1 P, वि-,गल् 1 P, विली 4 A, दुर्गंध a. भू. –v. t. गल् c., विली c., पूतीकृ 8 U. –Rotten, a. पूतिगंधि, दुर्गंध, विगलित, विलीन; पूतीभूत, दुष्ट, दूषित. 2 क्षीणसत्त्व, असार, निःसत्त्व.

Rotate, v. i. भ्रम् 1, 4 P. चक्रगत्या भ्रम्, परिवृत् 1 A; *See* **Revolve.** –ion, s. भ्रमणं, भ्रांति f., आ-परि-वर्तः-वृत्ति f., चक्रावर्तः, चक्रगतिः. 2 पर्यायः, क्रमः, आनुपूर्व्यं; 'in r.' पर्यायेण, पर्यायवृत्त्या, चक्रवत्, पर्यायानुसारेण, अनुपूर्वं. –ory, -Rotary, a. चक्रावर्तिन्, चक्रगति.

Rote, s. आवृत्ति f., अभ्यासः, आवर्तनं; 'learn by r.' (अर्थज्ञानं विना) कंठस्थ-a. कृ 8 U, अभ्यस् 4 U; 'learnt by r.' कंठस्थ, अभ्यस्त.

Rotund,-ity, *See* **Round,-ness.**

Rough, a. नतोन्नत, विषम, असम, अश्लक्ष्ण. 2 रु(रू)क्ष, परुष, कर्कश, कठिन, असमसृण, असौम्य, अमृदु, दुःस्पर्श; (in disposition) निष्ठुर, उग्र, कटु, कठोर; (in manners) असभ्य, अशिष्ट, असंस्कृत, स्थूल, घन; 'r. measurement' स्थूलमानं. 3 अपटु, अदक्ष, अनिपुण, अकुशल, स्थूल. 4 (Sea) क्षुब्ध, तरंगाकुल, उत्तरंग, वायुक्षुब्ध, पवनाहत. 5 लोमश, लोमावृत, स्थूललोमन्; 'r.-cast' स्थूलं कल्प् c. or वि-धा 3 U; 'r.-draw' स्थूलं लिख् 6 P; 'r.-hew' स्थूलं तक्ष् 1, 5 P or छिद् 7 P; 'r.-rider' अश्वशिक्षकः. –en, v. t. रूक्षी-स्थूली-कृ 8 U. –ly, adv. रूक्षं, परुषं, कर्कशं, स्थूलं, निष्ठुरं, &c. –ness, s. वैषम्यं, रूक्षता, पारुष्यं, कर्कशत्वं, उग्रता, कठोरता, स्थूलता, अदक्षता; संक्षोभः, ऊर्मिप्रलोठनं, &c.

Round, a. वर्तुल, गोल, वृत्त, वृत्ताकार, निस्तल, मंडलाकार, चक्राकृति, वृत्त-गोल-रूप, वलयाकार. 2 पीन, पीवर, उन्नत. 3 अवक्र, असंदिग्ध, परिस्फुट, निश्चित, परिच्छिन्न, व्यक्त; *See* **Decided.** 4 (Number) समग्र; शून्यांतक. –s. मंडलं, चक्रं, वर्तुलं, गोलः, वलयः-यं. 2 परिभ्रमणं, परिवर्तः, पर्यायः, आवृत्ति f., आवर्तः. 3 चक्रमार्गः-गतिः f.; (of a ladder) भंगि f., आरोहणं, सोपानं. –prep. परितः, अभितः, (with acc.); समंततः, समंतात् (with gen.). –adv. परि in comp. (with verbs). 2 चक्रवत्, मंडलाकारेण, वलयरूपेण, चक्ररूपेण; 'turn r.' परिवृत् c., परिभ्रम् c.; 'turning r.' चक्रभ्रांतिः, परिभ्रमणं, मंडलावृत्तिः; 'to get r.' मतं परिवृत् c. 3 सर्वतः, समंततः, समंतात्, विश्वतः, सर्वदिक्षु; 'the whole year r.' समग्रवर्षं. –v. t. वर्तुलीकृ 8 U, गोलीकृ. 2 परिगम् 1 P, परि-या-इ 2 P. 3 समा-धा 3 U; संस्कृ; 'well-r. ed' सुवृत्त; (fig.) सुसमाहित, सुसंस्कृत; 'r.-about' वक्र, कुटिल, असरल; समंततः, अभितः; &c. –ly, adv. अवक्रं, सपरिच्छेदं, सुव्यक्तं, स्पष्टार्थं. –ness, s. वृत्तता, गोलत्वं, वर्तुलता, पीनता, अवक्रता, स्पष्टता, &c.

Rouse, v. t. (From sleep) वि-प्र-बुध् c., जागृ c., उत्था c. (उत्थापयति), निद्रां भंज् 7 P or भिद् 7 P. 2 उत्पद् c., जन् c., उद्-प्र-बुध् c., उत्तिज् c., उद्युज् 10, उत्था c., उद्दीप् c., प्रोत्सह् c.; 'r. to action' क्षुभ् c., चेष्ट् c., प्रचुद् 10, कार्ये प्रवृत् c. –v. i. **Awake,** q. v. –s. पानोत्सवः, सग्धि f., सपीति f.

Rout, v. t. भंज् 7 P, वि-द्रु c., प्र-वि-ध्वंस् c., प्र-पलाय c. –s. भंगः, विध्वंसः, विद्रावः, सैन्यभंगः, व्यूहभेदः, बलव्यसनं. 2 जनसंमर्दः; *See* **Mob.** 3 कोलाहलः, तुमुलरवः, कलकलः. –ed, a. विद्रावित, भग्न, प्रपलायित; भग्नव्यूह, उत्पिंजल, समुत्पिंज, कादिशीक.

Route, s. *See* **Road.**

Routine, s. क्रमः, पर्यायः, अभ्यासः; 'daily r.' दिनक्रमः, दैनिककार्यपरिपाटी-परंपरा; 'r. work' नित्यकर्मन् n. 'usual r.' नित्यक्रमः, नित्याभ्यासः.

Rove, v. i. पर्यट् 1 P, परि-,भ्रम् 1, 4 P, प्र-वि-चर् 1 P. –er, s. परिभ्रमकः, पर्यटनकृत् m., भ्रमणशीलः. 2 दस्युः, चौरः. –ing, s. परि-,भ्रमणं-अटनं, विचरणं.

Row, v. t. (नौवहन) वह् c., प्रेर् c., संचल् c., प्रचुद् 10, प्रणुद् c. –v. i. नौकां वह् c. or प्रेर् c. &c. –s. राजिः, पंक्तिः, श्रेणिः-णी, आवलिः-ली, ततिः, माला, (all f.); *See* **Line.** 2 कलहः, संमर्दः, तुमुलरवः, कोलाहलः

-er, *s.* नाविकः, पोतवाहः, क्षेपणिधरः, दंडधरः.

Rowdy, *a.* दुर्वृत्त. 2 कलहप्रिय.

Rowel, *s.* कंटकः.

Sorcery, *s.* ऐंद्रजालं, माया, कुसृति *f.*, योगः, अभिचारः (black art). **-er,** *s.* ऐंद्रजालिकः, मायाकारः, अभिचारविद्. **-ess.** *s.* योगिनी, मायिनी, अभिचारिणी.

Sordid, *a.* नीच, कृपण, कुत्सित, अधम, दीन, जघन्य, निम्न; *See* **Mean.** 2 मलिन, मलीमस.

Sore, *s.* क्षतं, व्रणः-णं, अरुस् *n.*, ईर्मं. **-a.** सरुज, जातव्यथ, दुःखित, क्षत, सव्रण; सवेदन, सव्यथ, स्पर्शासह. 2 पीडाकर (री *f.*), कष्ट-क्लेश-प्रद, दुःखद. 3 उग्र, तीव्र, दारुण, गुरु; 's. throat' कंठपाकः, कंठरुज् *f.* **-ly,** *adv.* भृशं, अतीव, नितांतं, उग्रं, दारुणं, सुतरां, बलवत्.

Sorrel, *s.* चुक्रः, सहस्रवेधिन् *m.*, अम्लवेतसः, शतवेधी. **-a.** पिंगल, पिशंग.

Sorrow, *s.* शोकः, शुच् *f.*, दुःखं, खेदः, क्लेशः, आधिः, संतापः, आर्ति *f.*, व्यथा; *See* **Grief. -v.** *i.* शुच् 1 P, खिद् pass., व्यथ् 1 A; *See* **Grieve. -ful,** *a.* सशोक, शोकार्त-आकुल-अन्वित-उपहत-आविष्ट, दुःखित, संतप्त, दुःखिन्, दुःखार्त, उद्विग्न, विषण्ण, दीन, दुर्मनस्, खिन्न, अवसन्न, म्लान, विमनस्. 2 शोच्य, शोचनीय, शोकास्पदीभूत, दुःखावह. **-fully,** *adv.* सशोकं, सखेदं, सोद्वेगं, सदुःखं. **-Sorry,** *a.* दुःखित, दुःखिन्, खिन्न, कष्टापन्न, &c.; *See* **Sorrowful.** 2 दीन, अनु-,शोच्य, कृपण, अनुकंप्य; 's. for one's past conduct' सानुशय, अनुतप्त; 'I am s. to hear this' इदं श्रुत्वा दुःखितोस्मि; 'I am s. to inform you' &c. इति भवते निवेदनं मे दुःखमावहति, निवेदयन्नहं कष्टापन्नोस्मि; 's. horse' कदश्वः; 's. fare' कदन्नं.

Sort, *s.* प्रकारः; विशेषः, भेदः in comp.; जाति *f.*, विधा in comp.; *See* **Manner;** 'a s. of tree' वृक्षविशेषः-भेदः; 'out of s. s' अस्वस्थ-अन्यत्रस्थ-शरीर. **-v.** *t.* यथाक्रमं-यथावर्गं रच् 10 or विन्यस् 4 U, वर्गक्रमेण न्यस्. **-v.** *i.* युज्-उपपद्-pass., ex. by अनुरूप, युक्त; *See* **Becoming, Proper.**

Sortie, *s.* अवस्कंदः, अवपातः; *See* **Sally.**

Sot,-Sottish, *a.* पानमूढ, पानासक्त, मदोन्मत्त, सदापानरत. 2 **Foolish,** q. v.

Soul, *s.* आत्मन् *m.*; 'individual s.' प्रत्यगात्मा, विज्ञानात्मा; 'rational s.' चिदात्मा 'supreme s.' परमात्मा, ब्रह्मन् *n.*; 'animating s.' जीवात्मा, प्राणः, चेतनः, जीवः; 'embodied s.' देहिन् *m.*, शारीरात्मा, शरीरिन् *m.*, प्राणात्मा, क्षेत्रज्ञः. 2 आत्मा, चेतस् *n.*, चित्तं, मनस् *n.*, हृदयं; *See* **Mind;** 'possessed of a large s. महात्मन्, उदारचेतस्; 'oneness of s.' चित्तैक्यं, ऐक्यभावः; 'the whole s.' सर्वात्मा, सर्वभावः. 3 जीवनं, सारः; तत्त्वं, सार or तत्त्व-भागः or अंशः, सारभूतः. 4 (Self) आत्मा, स्वः. 5 वीर्यं, बलं, उत्साहः, तेजस्. 6 **Person,** q. v. 'the departed s.' प्रेतः, प्रेतनरः; 'heart and s.' प्र-नि-कामं, सर्वात्मना, सर्वभावेन; *See* **Heart;** 'he throws his heart and s. into the work' सुसमाहितेन चेतसा-सर्वात्मना कार्यं प्रवर्तते-व्याप्रियते.

Sound, *s.* शब्दः, नि-,नादः, ध्वनिः, नि-,स्व(स्वा)नः, निर्ह्रादः, स्वरः, निनदः, निर्-,घोषः, रावः, रवः, वि-संरावः नि-,स्वा(ध्व)नः, स्वनितं; 'musical s.' निक्वा(क्व)णः, क्वणितं; 'confused s.' कोलाहलः, कलकलः, तुमुलरवः; 'rattling s.' रणः, रणितं. 2 संधिसागरः. **-a.** सुस्थ, अरुग्ण, कल्प, निरामय, अनामय, नीरोग, नीरुज, प्रकृतिस्थ, व्याधिरहित; (in body) अक्षतशरीर, अविकलेंद्रिय (in mind) अनुपहतचित्त, अविलुप्त, अवातुल, अविक्षिप्त. 2 अक्षत, अजातक्षत, अ-

निर्-व्रण, क्षत-व्रण-हीन. 3 ससार, सारवत्, सारगर्भ. 4 अविकल, अन्यून, अखंड, अभिन्न. 5 तीक्ष्ण, तीव्र, निर्भर, प्र-,गाढ, सु-अति pr.; ‘s. sleep’ गाढनिद्रा; ‘s. beating’ तीक्ष्णदंडः, अतिताडनं. 6 निर्दोष, निश्छिद्र, विशुद्ध, दोषहीन. 7 गाढ, ग(गं)भीर, अगाध, सुपरिणत, परिपक्व. 8 (Argument &c.) अखंड्य, सप्रमाण, दृढ-सु-प्रमाण, न्याय्य, धर्म्य, युक्तिसिद्ध. 9 (In views) विशुद्धाचार, सत्यमार्गानुयायिन्. —v. i. नि-,नद् 1 P, ध्वन् 1 P, स्वन् 1 P, क्वण् 1 P, ह्राद् 1 A, वि-,रु 2 P, स्तन्-रस्-1 P, शब्दं कृ 8 U, शब्दायते (D.). —v. t. ध्वन् c., स्वन् c., नद् c.; वद् c., आ-ध्मा 1 P, मुखमारुतेन पूर् 10, (trumpet, conch &c.); (drum) तड् 10, आहन् 2 U; ‘the drum being s.-ed’ आहतायां भेर्यां; (bow) आस्फल् c. 2 परीक्ष् 1 A, सूक्ष्मं-निपुणं-निरूप् 10 or अनुसंधा 3 U, ज्ञा desid. (जिज्ञासते). 3 उद्घुष् 10, प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रकटीकृ; ‘s. the depth’ तलं अवगाह् 1 A; ‘s. the depth of water’ जलवेधं परि-मा 3 A, 2 P. **—ing**, *a.* शब्दन, मुखर, शब्दायमान, निनादिन्, निनदत्, घोषण, गर्जत्, निर्ह्रादिन्, शब्दकर (री *f.*); ‘s. lead’ लंबः, लंबसीसकं. —*s.* ध्वाननं, शब्दनं, वादनं. 2 वेधपरिमाण, तलावगाहनं. **—ly**, *adv.* तीव्रं, तीक्ष्णं, अत्यंतं, प्र-,गाढं; निर्भरं, दृढं, सुखेन, सु-अति pr. **—ness**, *s.* स्वास्थ्यं, कल्यता, आरोग्यं, अक्षतत्वं, निर्व्रणत्वं, अवैकल्यं, अन्यूनता, अखंडत्वता, निर्दोषता, &c.; ‘s. of mind’ चित्तस्वास्थ्यं, अविप्लवः.

Soup, *s.* जू(यू)षः-षं.

Sour, *a.* अम्ल, शुक्त, अम्लरस; ‘s. to the teeth’ दंतशठ. 2 कर्कश, परुष, दारुण, रूक्ष, अरुंतुद; सदावक्र, वक्र-वाम-शील, कर्कशस्वभाव, दुष्प्रकृति. —*v. t.* अम्लीकृ 8 U. 2 कर्कशीकृ, वक्रीकृ. —*v. i.* अम्लीभू 1 P, कर्कशीभू. **—ness**, *s.* अम्लता, कार्कश्यं &c.

Source, *s.* प्रभवः, योनि *f.*, मूलं, कारणं, हेतुः, प्रसूति *f.*, उद्भवः, संभवः, आदिः, उद्गमस्थानं; *See* **Origin**; ‘to have s. in’ प्र-भू 1 P, प्र-,जन् 4 A, उत्पद् 4 A (with abl.); लोभात्क्रोधः प्रभवति, लोभात्कामः प्रजायते (H. 1); ‘the s. of the Ganges is in the Himalaya’ हिमवतो गंगा प्रभवति (S. K.).

Souse, *v. t.* सहसा प्लु c. or मस्ज् c. (मज्जयति) or जलेन सिच् 6 P. —*v. i.* **Pounce**, q. v.

South, *s.* दक्षिणा, दक्षिणदिक्-दिशा-आशा, अवाची; ‘to the s.’ दक्षिणतः, (with gen.). **—a.**, **—ern, —erly**, *a.* दक्षिण, अवाच्, अवाचीन, अवाच्य, दाक्षिणात्य; ‘in a s. direction’ दक्षिणेन (with acc. or gen.); ‘s. country’ दाक्षिणापथः; ‘s.-east’ दक्षिणपूर्वा, आग्नेयी; (*a.*, -ern-erly,) दक्षिणपूर्व, आग्नेय; ‘s.-west’ दक्षिणपश्चिमा, नैर्ऋती; (*a.*, -ern, -erly) दक्षिणपश्चिम, नैर्ऋत. **—ward, -wards**, *adv.* दक्षिणाभिमुखं, दक्षिणतः, दक्षिणस्यां दिशि.

Souvenir, *s. See* **Memorial.**

Sovereign, *s.* स्वर्णमुद्रा. 2 अधिराजः, अधीश्वरः, अधिपतिः, महाराजः, अधीशः, सार्वभौमः, नृपतिः, सम्राज् *m.*, oft. by राजा, पालः, नाथः, &c.; *See* **King.** —*a.* परम, श्रेष्ठ, मुख्य, प्रमुख; *See* **Principal.** 2 उत्कृष्ट, गुणावह (medicine &c.); ‘s. medicine’ परमौषधं, महौषधं. **—ty**, *s.* प्रभुत्वं, राज्यं, आधिपत्यं, साम्राज्यं, ईशत्वं, स्वाम्यं, ईश्वरत्वं, इंद्रता in comp.; ‘s. of beasts’ मृगेंद्रता. 2 (Authority) मुख्य-श्रेष्ठ-अधिकारः, प्रधानाधिकारः.

Sow, *s.* सू(शू)करी, वराही, कोली. —*v. t.* वप् 1 P, आ-नि-°, (बीजानि) विकॄ 6 P, आरुह् c.; ‘s. dissensions’ भेदं जन् c., भेदबीजानि वप्; ‘s. dragon's teeth’ कलहबीजं वप्; ‘as you s., so you reap’ यो यद्वपति बीजं हि सोपि तल्लभते फलं; *See also* **Reap. —er**, *s.* वप्तृ *m.*, वापिन् *m.* वापकः. **—ing**, *s.* वपनं, वापः, उप्ति *f.*, बीजारोपणं.

Space, *s.* आकाशः-शं, शून्यं, दिगंतरं, रिक्तं, अंतरिक्षं, नभोमंडलं; ‘infinite s.’ अनंतं, महाकाशं; ‘finite s.’ घटाकाशं. 2 (Intervening s.) अंतरालं, मध्यं, अभ्यंतरं, अंतरं, अभ्यंतरावकाशः, व्यवधानं. 3 अवकाशः, अवसरः, प्रसरः, विषयः, स्थानं, स्थलं, भूमि *f.* 4 प्र-,देशः, दिश्-शा, दिग्भागः; ‘pervading all s.’ सर्वदिग्व्यापिन्, अभिव्यापिन्. 5 अंतरं, अध्वन् *m.*, देशः; ‘s. of time’ अंतरं, अवधिः, कालावधिः, कालांतरं; oft. ex. by अभ्यंतरं; ‘in the s. of six months’ षण्मासाभ्यंतरे. **—Spacious**, *a.* विस्तीर्ण, विशाल, विपुल, विस्तृत, पृथु; *See* **Large. —ness**, *s.* विस्तारः, विस्तृति *f.*, वैपुल्यं.

Spade, *s.* खनित्रं, अवदारणं, स्तंबघ्नः.

Span, *s.* किष्कु-वितस्ति-*m. f.*; ‘life's s.’ जीवितावधिः; gen. ex. by words for ‘Transitory’ q. v.; ‘the s. of life is short’ आयुः कल्लोललोलं (Bh. II. 82), कतिपयनिमेषायुषि जने (सति) (Bh. II. 40); जीवितं तरलं &c. —*v. t.* प्र-परि-मा 3 A, 2 P.

Spangle, *s.* रजतपत्रं, धातुतारा. —*v. t.* **Adorn**, q. v.

Spank, *v. t.* चपेटेन प्रहृ 1 P or तड् 10. —*v. i.* सवेगं चल् 1 P or विसृप् 1 P.

Spar, *s.* स्फटिकमृत्तिका. 2 दीर्घयष्टि *f.*-काष्ठं, दारुखंडः. —*v. i.* परिहासेन मुष्टीमुष्टि युध् 4 A.

Spare, *v. t.* रक्ष् 1 P, सं-चि 5 U, (money); न व्यय् 10 (व्ययपति) or विक्षिप् 6 P, परिमितं प्र-विनि-युज् 7 A, 10; 'does not s. time' कालं विक्षिपति-हरति; 'will you s. three hours for me' अपि भवान्मदर्थं प्रहरमेकं विनियोजयिष्यति. 2 मुच् 6 P, (वधात्, छेदात् &c.), त्यज् 1 P, हा 3 P, वि-उत्-सृज् 6 P. 3 उपेक्ष् 1 A, न अपेक्ष्, सुखेन त्यज्; oft ex. by 'not' with other words; 'but s. this tree' इमं वृक्षं तावन्मा छिन्द्धि; 's. him' मुच्यतामसौ, न हंतव्यः; 'he can now be s.ed from my service' तस्य सेवया न मे प्रयोजनमधुना, तस्य सेवां नापेक्षे; *See* **Dispense.** 4 अव-,शिष् c., उद्-वृत् c. –*a*. उद्वृत्त, अव्यापृत, अधिक, अतिरिक्त. अव-,शिष्ट. 2 अल्प स्तोक, परि-,मित. अबहुल. 3 क्षाम, कृश. परि-,क्षीण, निर्मांस, शुष्क; *See* **Lean.** **-ing,** *a.* मितव्यय, अल्प-परिमित-व्ययिन्; परिमित, अल्प; 's. of words' अल्पभाषिन्; परिमितालाप. **-ingly,** *adv.* मितं, अल्पं, मितव्ययेन, अल्पशः, स्तोकशः; 'eating s.' मिताहार, मितभुज्. **-ness,** *s* कृशता, क्षीणता.

Spark, *s.* वि-,स्फुलिंगः अग्नि or ज्वलन-कणः or कणिका; कणः, कणिका, लवः, लेशः, अणुः. 2 **Fop,** q. v. **-Sparkle,** *v. i.* स्फुर् 6 P, प्र-वि-°, तेजःकणान्-स्फुलिंगान्-उत्क्षिप् 6 P or विकॄ 6 P; *See* **Shine** also; 's.-ing fitfully' क्षणनष्टदृष्टाः (Mr. 5.). **-ing,** *a.* स्फुरत्, स्फुरितप्रभ,दीप्तिमत् &c.; 's. wit' पुरःस्फुरंती मतिः, मतिविलासः.

Sparring, *s.* मुष्टियुद्धं, मुष्टीमुष्टि युद्धं. 2 विचारः.

Sparrow, *s.* चटकः, कलविंकः; 'female s.' चटका.

Sparse, *a.* विरल, अबहुल, अनिचित.

Spasm, *s.* (अंग) संकोचः, आक्षेपः, आकर्षः, उद्वेष्टनं, व्यासः; 's. in the leg' पिंडिकोद्वेष्टनं; शूलं (with pain). **-Spasmodic,** *a.* सोद्वेष्टन, आकर्षिन्, आक्षेपक, by (*s.*); 's. contraction' आकर्षः, संकोचः.

Spatter, *v. t.* अवसिच् 6 P or अवकॄ 6 P, (पंकादिना.)

Spattle, Spatula, *s.* प्र-वि-लेपनी.

Spavin, *s.* संधिशोथः.

Spawl, *s.* निष्ठ्यूतं; *See* **Saliva.**

Spawn, *s.* अंडं, मीनांडं, भेकांडं, &c. –*v.* अंडानि मोक्ष् 10 or प्रसू 2, 4 A.

Speak, *v. t.* वद् 1 P, वच् 2 P, भण्-गद् 1 P, भाष् 1 A, ब्रू 2 U, आलप् 1 P; *See* **Say;** वाचं-गिरं-उदीर् c. or उद्-गॄ 6 P; 's. of' अभि-धा 3 U. कथ् 10, निर्दिश् 6 P, वर्ण् 10; 's. ill of' अपभाष्, परि-अप-वद् 1 A. निंद् 1 P; 's. out' स्पष्टं-स्फुटं-वद्, प्रकाशं ब्रू; 's. well of' प्रशंस् 1 P; *See* **Praise;** 's. with.' 's. together' संवद्, संभाष्, संमंत्र् 10 A. **-er,** *s.* प्र-, वक्तृ *m.*, वाग्मिन् *m.*, वादिन् *m.* **-ing,** *s.* भाषणं, भाषितं, वचस् *n.*, उक्ति *f.*, व्याहारः; *See* **Speech** below. **-Speech,** *s.* वाच् *f.*, वाक्शक्ति *f.*, वाणी, गिर् *f.* 2 वाक्, वचः, गीः, वाणी, उक्तिः, व्याहारः, भाषणं, वचनं, आलापः, वाक्यं, भारती, सरस्वती, व्याहृति *f.* 3 भाषा, उक्तिः; 'eloquence of s.' शब्द-पद-लालित्यं; 'covert s.' भंगिभाषणं, व्याजोक्तिः; 'opening of s.' वाङ्मुखं; 'goddess of s.' वाग्देवी, भारती, सरस्वती; 'part of s.' शब्दजातिः-भेदः. **-ify,** *v. i.* **Harangue,** q. v. **-less,** *a.* मूक, वाग्हीन, स्तंभितवाक्. *See* **Mute.**

Spear, *s.* शूलः-लं, कुंतः, प्रासः, तोमरः, शक्ति *f.*, शल्यं; 'head of a s.' फलं, शूलाग्रं; 's.-man' शूलिन् *m.*, शूलधरः-भृत्, शूलपाणिः, प्रासिकः, कौंतिकः, शाक्तीकः, शक्तिधरः-ग्रहः. –*v. t.* शूलेन व्यध् 4 P.

Specie, *s.* मुद्रा, नाणकं.

Species, *s.* जाति *f.*, प्रकारः, भेदः, विशेषः; 'of the same s.' स-एक-जातीय; 'a s. of animal' प्राणिविशेषः-भेदः; 'genus and s.' -सामान्यविशेषौ. **-Special,** *a.* विशेष in comp., असामान्य, असाधारण (णी *f.*), अव्यापक, वैशेषिक (की *f.*), विशिष्ट, अवच्छेदक; 's. duty' विशेषधर्मः; विशेषनियमः, समयविशेषः, &c. 2 लोकोत्तर, लोकबाह्य. 3 तद्धेतुक, तन्निमित्तक, तदुद्दिष्ट. 4 जातिवाचिन्, जाति in comp.; 's. characteristic' जातिधर्मः-लक्षणं. **-ly,** *adv.* विशेषतः, विशेषेण; सविशेषं, कार्यतः, प्रयोजनापेक्षया. **-ity,-ty,** *s.* विशेषः, विशेषधर्मः, विशिष्टता. **-Specific-, -al,** *a.* विशेष, जाति in comp.; विशिष्ट, असामान्य, जाति-व्यक्ति-गत; 's. gravity' विशिष्टगुरुत्वं; 's. character' जाति-विशेष-धर्मः-लक्षणं. –*s.* 's. medicine' अमोघगुणमौषधं, विशिष्टौषधं. **-ically,** *adv.* जातितः, विशेषतः, सविशेषं. **-Specify,** *v. t.* (सविशेषं) निर्दिश 6 P, कथ् 10, अभि-धा 3 U, उदाहृ 1 P. विशिष् 7 P or c., एकैकशः परिसं-ख्या 2 P or कथ्; विशेषं कथ् or ब्रू 2 U, अवच्छिद् 7 P. **-ied,** *a.* निर्दिष्ट, अवच्छिन्न, निर्दिष्ट उक्तलक्षण &c.; 'will be s. further on' अग्रे वक्ष्यते **-ication,** *s.* विशेषनिर्देशः-कथनं-वर्णनं, व्यवच्छेदः, परिसंख्या, विशेषः.

Specimen, *s.* आदर्शः, प्रतिमा, प्रतिरूपं.

Specious, *a.* सत्यसंकाश-आभास-सन्निभ आपातरमणीय, बहिः रमणीय, सुदृश्य. बाहिरेव मनोरम. **-ly,** *adv.* सत्याभासपूर्वं **-ness,** *s.* सत्याभासः.

Speck, Speckle, *s.* बिंदुः, चिह्नं, अंकः, कलंकः; तिलकः-कं. 2 शकलः-लं, कणः, लवः, अणुः, सूक्ष्मबिंदुः; 's. s of clouds' मेघशकलानि. –*v. t.* चित्र् 10, चित्री-कर्बुरी-कृ 8 U; बिंदुभिः चित्र्. –**ed,** *a.* चित्र, चित्रित, कर्बुरित, चित्रविचित्र, बिंदुचित्रित-चिह्नित, शबलीकृत, चित्रांग (गी *f.*); 'having a s. belly' चित्रोदर, पृषदुदर.

Spectacle, *s.* दृश्यं कौतुकं, आलोकः, चमत्कारः, स्थानं, दृष्टिविषयः. 3 (S. s) उपनेत्रे, दृष्टिसहायौ.

Spectator, *s.* प्रेक्षकः, प्रेक्षकजनः-लोकः, द्रष्टृ *m.*: (in an audience &c.) पारिषद्यः, सामाजिकः, पार्षदः.

Spectre, *s.* भूतः, पिशाचः, छाया, वेतालः, प्रेतः; 'to raise a s.' वेतालं उत्था *c.*, छायां उद्धृ *c.*

Specular, *a.* आदर्शगुणक.

Speculate, *v. i.* विचर् *c.*, वितर्क् 10, विमृश् 6 P; *See* **Consider.** 2 बहुलाभापेक्षया क्री 9 U; अविचारेण दैवाधीनं कर्म कृ 8 U. –**ion,** *s.* विचारः, वितर्कः, विमर्शः, परिकल्पना. 2 कल्पना, प्र-,युक्ति *f.*, उपायः. –**ive,** *a.* विचारवत्, विचार-ध्यान-शील. 2 काल्पनिक-मानसिक- (की *f.*), अव्यवहार्य, अप्रवर्तनीय, अव्यवहारानुरूप, व्यवहारायोग्य. –**or,** *s.* कल्पकः, विचारकः. 2 **Philosopher,** q. v.

Speculum, *s.* *See* **Mirror.**

Speed, *s.* वेगः, प्र-,जवः, रंहस् *n.*, रयः, जवनं, त्वरा, रभसः, तरस् *n.*, शीघ्रता, तूर्णि *f.* –*v. i.* त्वर् 1 A, शीघ्रं-सवेगं गम् or चल् 1 P. 2 सिध् 4 P, सफलीभू 1 P; *See* **Prosper, Succeed. 3 Fare,** q. v. –*v. t.* त्वर् *c.* (त्वरयति). 2 पुरस्कृ, उपकृ, सिध् *c.* (साधयति); शुभं-कल्याणं-कृ 8 U. 3 **Ruin, Kill,** q. v.; 'God s. !' शिवास्ते पंथानः संतु (P. I. 1), शिवस्ते पंथाः भूयात् (S. 4); विजयी भव. –***Speedy,*** *a.* शीघ्र, त्वरित, सत्वर, अविलंबित, द्रुत, सजव, वेगवत्, जवन, महावेग, शीघ्रगति; *See* **Prompt** also; better by 's.-ly'. –**ily,** *adv.* आशु, शीघ्रं, सत्वरं, झटिति, त्वरितं, तूर्णं, अविलंबं, सपदि. 2 सरभसं, सवेगं. –**iness,** *s.* जवनता, वेगवत्त्वं, शीघ्रता &c.

Spell, *s.* मंत्रः, अभिचारमंत्रः (magic); मोहनं, आकर्षणं; 's.-bound' अभिमंत्रित, मंत्ररुद्धवीर्य. –*v. t.* अभिमंत्र् 10 A, अभिचर् *c.*, मंत्रैः वशीकृ 8 U, वि-,मुह् *c.* 2 अक्षराणि निर्दिश् 6 P, यथाक्षरं सं-ख्या 2 P or पठ् 1 P or लिख् 6 P. –**ing,** *s.* वर्ण or अक्षर-वि न्यासः or रचना; 'having a double s.' द्विरूप, 'variation in s.' पाठांतरं, पाठभेदः.

Spend, *v. t.* उत्-वि-सृज् 6 P, परि-,त्यज् 1 P, व्यय् 10 (व्यययति), विनि-युज् 7 A, 10; 'good men, like clouds, take (things) for s.-ing (them).' आदानं हि विसर्गाय सतां वारिमुचामिव (R. iv. 86); 's.-ing on proper objects' पात्रे व्ययः. 2 अव-,सद् *c.*, क्षि 5 P or *c.*, नश् *c.*, अप-चि 5 U, क्षीणीकृ 8 U, विक्षिद् 6 P; *See* **Exhaust;** 'spent with toil' श्रमखिन्न, श्रमावसन्न. 3 (Time) क्षै *c.* (क्षपयति), गम् *c.*, नी 1 P, या *c.*, अतिवह् *c.*; *See* **Pass;** 's. in vain' क्षिप्, हृ 1 P. –**ing,** *s.* व्ययः, वि-,उत्-सर्गः, त्यागः, विनियोगः; यापनं, हरणं, विक्षेपः. –**Spendthrift,** *s.* अतिव्ययिन् *m.*, त्यागशीलः, मुक्तहस्तः, अर्थनाशिन् *m.*

Spermatic, *See* **Semen,** &c.

Spew, *v. t.* वम् 1 P, छर्द् 10, नि-,ष्ठिव् 1, 4 P.

Sphere, *s.* गोलः-लं, वर्तुलं, मंडलं; *See* **Orb:** 'celestial s.' व्योम-नभो-मंडलं. 2 नियोगः, विषयः, अधिकारः, धर्मः, प्रकरणं. 3 संस्थिति *f.*, अवस्था, दशा (in life). –**Spherical,** *a.* गोलाकार, वर्तुल, गोल. –**Spheroid,** *s.* उपगोलः, अंडाकृतिः. –**al,** *a.* गोलप्राय-कल्प, उपगोल. –**Spherule,** *s.* गोलकः, लघु-क्षुद्र-गोलः.

Sphygmograph, *s.* नाडीस्फुरण (स्पंदन)-लेखनयंत्रं.

Spice, *s.* गंधद्रव्यं; 'the three s. s.' त्रिजातकं. –*v. t.* वास् 10, अधि-सु-°. –**ed,** -**y,** *a.* वासित, सगंध, सुगंध, मिष्ट, सुरस.

Spider, *s.* तंतुवायः, तंतुनाभः, तंत्रवापः, ऊर्णनाभः, लूता, मर्कटकः, जालिकः, कोश(ष)कारः, अष्टापदः.

Spike, *s.* शस्यमंजरी, कणिशः-शं, धान्यशीर्षकं. 2 महाकीलः, शंकुः, शूलः-लं, कंटकः. –*v. t.* कील् 10. –**ed,** *a.* शंकुयुक्त; कीलित, शंकुबद्ध. –**y,** *a.* तीक्ष्णाग्र, सूच्यग्र, कीलनिचित.

Spikenard, *s.* जटामांसी, तपस्विनी, जटिला, लोमशा, म(मि)षि-षी-सि-सी *f.*, नलदा.

Spill, *s.* शलाका. –*v. t.* (अकस्मात्) अधः क्षिप् 6 P; अव-,पत् *c.*, निः-,स्रु *c.*; 's. blood' रुधिरं स्रु *c.*, रक्तपातं कृ 8 U. –*v. i.* स्रु 1 P, पत् *c.* pass.

Spin, *v. t.* (तंतून्) कृ 8 U, जन् *c.*, तन् 8 U, सृज् 6 P, वे 1 P, कृत् 6 P; 'the spider s.s out its web (threads) from itself' तंतुनाभः स्वत एव तंतून् सृजति (S. B. 477). 2 निष्कृष् 1 P, निर्गम् *c.* 3 परिवृत् *c.*, परि-,भ्रम् *c.*, घूर्ण् *c.* –*v. i.* भ्रम् 1, 4 P, परिवृत् 1 A. –**ner,** *s.* तंतुवायः-पः, कर्तकः. –**ning,** *s.* तंतुवायः-वापः, तांतवं, तंतुकरणं.

Spindle, *s.* तर्कु *f.*, तर्कुटी-टं; 's.-shanked' क्षामजंघ, पृश्नि-दीर्घ-जंघ.

Spine, *s.* पृष्ठवंशः, कशेरु *m. n.*, कशेरुका, पृष्ठास्थि *n.*

Spinous,-Spiny, *a.* सकंटक.

Spinster, *s.* सूत्रकर्तिका. 2 अनूढा, अविवाहिता.

Spiracle, *s.* छिद्रं, सूक्ष्मरंध्रं, वायुमार्गः.

Spire, *s.* व्या-आ-वर्तनं, आवर्तः, व्यावर्तनरेखा. 2 शिखरं, शृंगं, शिखा. **-al,** *a.* वि-,आवर्तिन, चक्राकार. **-ally,** *adv.* चक्राकारेण.

Spirit, *s.* प्राणाः, असवः,(pl.). 2 आत्मन् *m.*, देहिन् *m.*, क्षेत्रज्ञः; *See* **Soul**; the supreme s.' परमात्मा, ब्रह्म. 3 चित्तं, मनस्-चेतस् *n.*, वृत्ति *f.*, भावः; 'low-s.-ed' लघुचेतस्, क्षुद्रमनस् 'proudness of s.' चित्तसमुन्नति *f.*, चित्तोद्रेकः; *See* **Pride**; 'in good s.s', 'in high s.s' सोल्लास, प्रहृष्ट, प्रमुदितचित्त; हर्षवृत्ति; 'high s. s.' उत्साहः, उल्लासः, प्रफुल्लता, प्रहर्षः; 'low s. s' विषादः, उद्वेगः; 'in low s. s' उद्विग्न, विषण्ण, उदासीन; *See* **Dejected.** 4 सत्त्वं, तेजस् *n.*, वीर्यं, प्रभावः, ऊर्जः, उत्साहः. 5 भावः. भावार्थः, उद्देशः; 'he obeyed my order in s. only' भावार्थमेव गृहीत्वा ममाज्ञामनुष्ठितवान्. 6 सारः, तत्त्वं, सत्त्वं, सारांशः,जीवितं; जीवनं; 'Ojas is the s. (soul) of prose' ओजः गद्यस्य जीवितं (Kav.). 7 प्रकृति *f.*, शीलं, स्वभावः, वृत्तिः; 'gentle s.' स्वभावसौजन्यं, शांतशीलता; 'of a noble s.' उदारप्रकृति. 8 भूतः, वेतालः; 'evil s.' रक्षस् *n.*, राक्षसः, पिशाचः, अपदेवता. 9 प्रेतः, परेतः, छाया. 10 (Of style) ओजस् *n.*, ऊर्जः; रसः. 11 (S.s) सुरा, मद्यं, *See* **Liquor.** -*v. t.* (up) आश्वस् c., उज्जीव् c., उत्तिज् c. **-ed,** *a.* सत्त्ववत्, सोत्साह, तेजस्विन्, वीर्यवत्, ससत्त्व; 'a s. speech' ऊर्जिताश्रयं वचनं. 2 ओजस्विन्, सरस. **-edly,** *adv.* सोत्साहं, ससत्त्वं. **-less,** *a.* निःसत्त्व, तेजोविहीन; निस्तेजस्, निर्वीर्य, नीरस. **-uous,** *a.* मादिन्, मादक; 's. liquor' सुरा, मदिरा, &c. **-Spiritual,** *a.* अध्यात्म in comp.,(अध्यात्मज्ञानं), आध्यात्मिक (की *f.*): निरवयव, निराकार, चिद्रूप, अमूर्त, परम. 2 पारत्रिक-पारलौकिक-पारमार्थिक-(की *f.*), मानसिक-सात्त्विक-(की *f.*). 3 धार्मिक(की *f.*), धर्म in comp.; असांसारिक-अलौकिक-(की *f.*); 's. preceptor' उपाध्यायः; 's. father' धर्मतातः-पितृ *m.* **-ism,** *s.* ब्रह्मवादः, ज्ञान-निवृत्ति-मार्गः. **-ist,** *s.* ब्रह्मवादिन् *m.* **-ity,** अमूर्तता, असांसारिकता, परमार्थनिष्ठा. **-ly,** *adv.* परमार्थदृष्ट्या, परमार्थतः; 's. minded' परमार्थदृष्टि-बुद्धि, परमार्थासक्त, ब्रह्मनिष्ठ संसारव्यापृत.

Spit, *v. t.* नि-,ष्ठिव् 1, 4 P, उद्वम् 1 P, निःसृ c.,उद्-गॄ 6 P. 2 शूला कृ 8 U, शूले आरुह् c. -*v. i.* ष्ठिव्, श्लेष्माणं-लालां निःसृ. -*s.*, **-ting,** *s.* निष्ठ्यूति *f.*, नि-,ष्ठीवः-वनं, उद्वमनं, उद्गिरणं; 's. ing-pit, spittoon' प्रतिग्राहः, पतद्ग्रहः. 2 शूलः-लं; 'roasted on a s.' शूल्य, शूलाकृत, भटित्र. **-Spittle,** *s.* नि-ष्ठ्यूतं, ष्ठीवनं, मुखस्रावः, लाला; *See* **Saliva.**

Spite, *s.* वि-,द्वेषः, ईर्ष्या, असूया, द्रोहः, मात्सर्यं; 'in s. of' अनादृत्य (with acc.), gen. ex. by gen. or loc. abs.; पश्यतोपि गुरोः, तिष्ठत्सु लोकपालेषु वुवूर्षति नलं पतिं; 'snatches away, in s. of our looking on' मिषतां नः आच्छिनत्ति (K. ii. 46). -*v. t.* वि-,द्विष् 2 U; द्रुह् 4 P. ईर्ष्य् 1 P (with dat.). **-ful,** *a.* सासूय, विद्वेषिन्, मत्सरिन्, सेर्ष्य, द्रोहबुद्धि, दुष्टभाव; *See* **Malicious.** **-fully,** *adv.* सासूयं, द्वेषात् द्वेष-द्रोह-बुद्ध्या, सेर्ष्यं, मात्सर्यात्.

Splash, *v.* आस्फल् c., (आस्फालितं यत्प्रमदाकराग्रैः R. xvi. 13), क्रीडया तड् 10; इतस्ततः विक्षिप् 6 P. -*s.*, **-ing,** *s.* आस्फालनं, विक्षेपः, आस्फालनशब्दः-नादः; 'the log fell down with a s.' काष्ठखंडः पतितो जलमास्फालयत्.

Spleen, *s.* प्लीहन् *m.*; प्लीहा, गुल्मः; 'enlargement of the s.' प्लीहाभिवृद्धि *f.*, प्लीहोदरं. 2 संरंभः, मन्युः; 's.-wort' प्लीहघ्नः, प्लीहशत्रुः. **-Splenetic,** *a.* प्लीहरोगिन्. 2 वक्र-कर्कश-शील, पिशुन, कर्कश.

Splendid, *a.* भासुर; उज्ज्वल, भास्वत्, अतितेजस (सी *f.*), अतिशोभन, सुप्रभ, अतिप्रभ, अतिदीप्तिमत्; महातेजस्; 'a s. dress' उज्ज्वलवेशः, उदारनेपथ्यं. 2 श्रेष्ठ, प्रशस्य, परम, विशिष्टतम, अभिनंद्य (success). 3 महाप्रताप, प्रतापवत्; *See* **Majestic.** **-ly,** *adv.* उज्ज्वलं, सुप्रभं, अतिशोभया, अतिप्रतापेन; 's. dressed' उज्ज्वलवेशधारिन् **-Splendour,** *s.* शोभा, तेजस् *n.*, श्रीः, प्रभा, औज्ज्वल्यं, भासुरत्वं, अति-शोभा-कांति-दीप्ति *f.*, महातेजः, प्रतापः, विभूति *f.*, वैभवं.

Splice, *v. t.* संयुज् 7 U, 10.

Splint, -er, *s.* (काष्ठ-) खंडः, शकलं, विदलं, भिन्नं. -*v. t.* वि-दृ 9 P or c.; *See* **Tear.** -*v. i.* वि-दल् 1 P. स्फुट् 6 P, विभिद् pass.

Split, *v. i.* स्फुट् 6 P. वि-,दल् 1 P, भंज्-विभिद्-विदृ-pass., त्रुट् 4. 6 P, शकलीभू 1 P, -*v. t.* स्फुट् c., वि-,दृ 9 P or c., वि-,पट् 10, वि-,भिद् 7 P or c., भंज् 7 P, खंड् 10, वि-,छिद् 7 P, त्रुट् c., विदल् c. (दलयति), शकलीकृ 8 U. -*s.* वि-,भेदः, भंगः, विवरः, स्फु(स्फो)टनं.

भिदा, छिद्रं, रंध्रं. **-ting,** *s.* विदारणं, विपाटनं, विदलनं, &c.

Spoil, *v. t.* मलिनीकृ 8 U, कलुषी-आविलीकृ, मलिनयति-कलुषयति-आविलयति (D.). दुष् c. (दूषयति), (fig. also), विकृ; विप्रकृ; भ्रंश् c. (सत्पथात्). 2 अत्यंतं लल् 10, अत्यंतं छंदं अनुवृत् 1 A or अनुरुध् 4 A. 3 लुंट् 1 P. 10, अप-हृ 1 P. 4 नश् c., उद्-विध्वंस् c., उच्छिद् 7 P, दुष् c. *-v. i.* दुष् 4 P. नश् 4 P. *-s.* युद्धलब्धं धनं, लुंटितं लोप्त्रं, लोप्त्रं, अपहारः, ' s. of cattle ' गोग्रहः. **-ed, -Spoilt,** *a.* दूषित, मलिनीकृत, नाशित, उच्छिन्न. 2 अतिलालित, दुर्ललित; लालनात् दूषित. **-er,** *s.* अपहारकः, लुंटाकः, दूषकः, उच्छेदकः.

Spoke, *s.* अरः-रं, सक्थि *n.*; 's. s are fixed on to the nave ' नाभौ अराः प्रतिष्ठिताः; ' a wheel having long s. s ' दीर्घसक्थि चक्रं.

Spokesman, *s.* मुखं, (त्वं मम मुखं भव V.1), वक्तृ *m.*

Spoliate, *v. t.* लुंट् 1 P, 10, अपहृ 1 P. **-ion,** *s.* अप-हारः-हरणं, लुंठनं.

Sponge, *s.* **Sponger,** q. v. **-y,** *a.* विरल-शिथिल-अवयव. **-Sponger,** *s.* परान्नपुष्टः, परपिंडादः, पात्रेसमितः.

Sponsor, *s.* धर्मप्रतिभूः-प्रतिनिधिः.

Spontaneous, *a.* यादृच्छिक-ऐच्छिक- (की *f.*), स्वेच्छानुरूप, स्वतःप्रवर्तित, यदृच्छा or स्वेच्छा-मूलक or पूर्वक, कामहेतुक, अयत्नकृत-भूत, यदृच्छा-स्वेच्छा-काम-in comp. **-ly,** *adv.* स्वेच्छातः, स्वेच्छया, यदृच्छया, स्वेच्छानुसारेण, स्वयं, स्वतः, स्वेच्छापूर्वं, कामतः, अंतःप्रवृत्त्या, अयत्नेन, सहजावबोधेन. **-ness, -Spontaneity,** *s.* यदृच्छा, स्वेच्छा, कामः, रुचि *f.*

Spoon, *s.* चमसः-सं, कंबि-बा *f.*, दर्वि-र्वी *f.*, खजाका; *See* **Ladle;** ' wooden s. ' दारुहस्तकः, तर्दू *m.* **-ful,** *s.* Ex. by (*s.*); 'two s. s ' दर्वीद्वयं, चमसद्वयमात्रं.

Spoor, *s.* श्वापदपद्वी, वनपशुपद्धति *f.*

Sporadic, *a.* *See* **Single.**

Sport, *v. i.* वि-हृ 1 P, क्रीड् 1 P, विलस् 1 P, रम् 1 A, खेल् 1 P. 2 मृगयां कृ 8 U, आच्छोदनं कृ. 3 परिहस् 1 P. *-s.* विहारः, क्रीडा, खेला, केलि *m. f.*, लीला, विलासः; ' boys' s. ' कूर्दनं, क्रीडा, लीला. 2 मृगया, आच्छोदनं; आखेटः; ' to make the better s. ' मृगयारसं वर्धयितुं, मृगयां अधिकफलदां कर्तुं. 3 अव-उप-हासः, विडंबना; *See* **Mockery.** 4 परिहासः, लीला, केलिः, नर्मन् *n.*; ' in s. ' परिहासेन, लीलया; ' uttered in s. ' नर्मालापः, परिहासजल्पितं. **-ive,** *a.* (Of persons) क्रीडाशील-पर, विलासपर, खेलनपर, विहारिन्, विहार-केलि-प्रिय; *See* **Playful.** 2 उपहासगर्भ, नर्मप्राय, सपरिहास. 3 सविलास, सलील, सहेल, सखेल, उल्लसित. **-ively,** *adv.* सखेलं, लीलया, सलीलं, सविलासं. **-Sportsman,** *s.* मृगया-सेविन् *m.*-विहारी-शीलः, मृगयुः, व्याधः, लुब्धकः, शकुनिलुब्धकः.

Spot, *s.* स्थानं, स्थलं, पदं, प्र-,देशः, आस्पदं, भूमि *f.*, क्षेत्रं; ' on the spot ' तत्रैव. 2 बिंदुः, अंकः, लांछनं, चिह्नं, लक्षणं, पदं; ' s. on the body ' तिलकः-कं; ' s. on the moon ' लक्ष्मन् *n.*, अंकः. 3 कलंकः, दूषणं. *-v. t.* बिंदुभिः चिह्न् 10 or चिह्नयति (D.), कर्बुरीकृ 8 U, शबलीकृ, कल्माषयति (D.); oft. by चित्र-*a.*; ' s.-ted deer ' चित्रो मृगः, बिंदुलांछितो मृगः, चित्रांगः, कर्बुरितगात्रः, &c. 2 कलंकयति (D.), दुष् c. (दूषयति). 3 **Soil, Spoil,** q. v. **-less,** *a.* निष्कलंक, अकलंक, विशुद्ध, निष्कल्मष, निर्मल, अकलुष, अमलिन; अनिंद्य, निरवद्य, अनघ.

Spouse, *s.* परिग्रहीतृ *m.*, परिणेतृ *m.*, वरः, भर्तृ *m.*, पतिः. 2 भार्या, वधूः; *See* **Wife.** **-al,** *s.* विवाहः, परिणयः, पाणिदानं-ग्रहणं; *See* **Marriage.**

Spout, *s.* नाली, प्रणालः-ली. *-v. t.* उत्क्षिप् 6 P, उदस् 4 U, बलवत् निरस् or निःसृ c. or उत्क्षिप् (fig.), उद्-गॄ 6 P, उद्वम् 1 P, निः-सृ c., विसृज् 6 P. *-v. i.* सवेगं उद्वम् 1 P or निर्गम्, निःसृ 1 P , उत्सिच्-उत्क्षिप्- pass.

Sprain, *v. t.* अतियत्नेन (संधीन् &c.) वितन् 8U, आक्षिप् 6 P, अभिहन् 2 P. *-s.* संध्यभिघातः, स्नायुवितानः, अतिवितानः.

Sprat, *s.* नल-तल-मीनः.

Sprawl, *v. i.* सांगविक्षेपं स्वप् 2 P.

Spray, *s.* शी(सी)करः, तुषारः; 'bearing s. s ' शीकरिन्, शीकरासारवाहिन्. 2 विटपः, शाखा, प्रशाखिका.

Spread, *v. i.* प्र-वि-सृप् 1 P, प्र-वि-सृ 1 P, वितन्-विस्तृ-विस्तॄ-pass., व्याप् 5 P, विजृंभ् 1 A, प्रचर् 1 P; (disease) संक्रम् 1 U, 4 P, संचर्, वि-सृप्; प्ररुह् 1 P, वृध् 1 A. *-v. t.* स्तृ 5 U, स्तॄ 9 U or c., वि-सं-आ-°; अव-वि-कॄ 6 P, (net &c.); वि-प्र-सृप् c., वि-प्र-सृ c., तन् 8 U, प्र-वि-सं-आ-°, प्रवृध् c. 2 (Opinions &c.) प्र-सृ c., सं-प्र-चर् c., प्रवृत् c., प्रकाश् c., बहुलीकृ 8 U. *-s.* प्रसारः, प्रसरः, अभि-,वृद्धि *f.*, प्रवर्तनं, विस्तारः. **-ing,** *a.* प्र-वि-सारिन्, प्रसर्पिन्, प्रतानिन्, प्ररोहिन्; ' a s. creeper is वीरुध् ' लताप्रतानिनी वीरुत्. *-s.* प्रसरः, विसर्पणं, वितति *f.*, प्रतानः, प्रवर्धनं.

Sprig, *s.* विटपः, शाखा, पल्लवः-वं, दलं, उपशाखा.

Sprightly, *a.* उत्साहवत्, प्रफुल्ल, सोत्साह, सोल्लास, प्रमुदित, उल्लसित, उल्लासवृत्ति. **-iness,** *s.* उल्लासः, प्रहर्षः. प्रफुल्लता.

Spring, *s.* वसंतः,-कालः-समयः, सुरभिः, मधुः, पुष्प-समयः-कालः, मधुमासः; 's. of life' प्रथमं वयः, अक्षतं यौवनं, अयातयामं वयः. 2 उत्सः, निर्झरः, स्रोतस् *n.*, वारिप्रवाहः, प्रस्रवणं; 's.-water' नैर्झरं जलं, निर्झरवारि. 3 प्रभवः, उद्भवः, मूलं, उत्पत्तिस्थानं, योनि *f.*; *See* **Origin.** 4 उत्प्लवः, प्लवः, प्लुतं-ति *f.*, उत्प्लुतः, वल्गितं. 5 स्थितिस्थापकत्वविशिष्टः पदार्थः. -*v. i.* उद्भिद् pass.; प्ररुह् 1 P, स्फुट् 6 P, अंकुरयति (D.), *See* **Shoot.** 2 उत्पद् 4 A, प्र-,जन् 4 A, प्र-,सं-उद्-भू 1 P. प्रवृत् 1 A, उद्-इ 2 P, निःसृ 1 P; also by भव, संभव, उद्भव, जात, ज in comp.; 'sprung from a noble family' कुलज, कुलोद्भव, कुलसंभव, &c.; 'sprung from a royal family' राजवंश्य, राजवंशज. 3 परावृत्, परापत् 1 P, उत्पत्. 4 प्लु 1 A, वल्ग् 1 P; 's. up' उत्पत्, उत्प्लु; 's. over' लंघ् 1 A, 10, उत्प्लुत्य अति-इ; 's. upon' सवेगं आपत् 1 P or आक्रम् 1 U, 4 P, सरभसं आस्कंद् 1 P. 5 **Split, Start,** q. v. -*v. t.* उत्था c. (उत्थापयति), प्रबुध् c. 2 उद्-भू c., उत्पद् c., जन् c. 3 **Burst, Split,** q. v.

Springe, *s.* पाशः; *See* **Snare.**

Sprinkle, *v. t.* सिच् 6 P, आ-नि-अव-,° सं-प्र-अभि-उक्ष् 1 P; अवकॄ 6 P. **-er.** *s.* सेक्तृ *m.*, सेचकः, प्रोक्षकः. **-ing**, *s.* प्रोक्षणं, आ-अव-सेकः; 's. of' ex. by विरल *a.*, (विरलतुषारकणाः).

Sprite, *s. See* **Ghost.**

Sprout, *s.* मंजरी. 2 पल्लवः-वं, किस(श)लयः-यं; अंकुरः, प्ररोहः, उद्भिद्-अभिनवोद्भिद्-*m.*, उद्भिज्जः. -*v. i.* उद्भिद् pass., प्ररुह् 1 P, स्फुट् 6 P, उत्-,फुल्ल् 1 P, विकस् 1 P. **-ed**, *a.* उद्भिन्न, अंकुरित, पल्लवित, स्फुटित. **-ing**, *a.* उद्भिद्-ज्ज-द, प्ररोहिन्, अंकुरित. -*s.* उद्भेदः; प्ररोहः.

Spruce, *a.* विनीत, विनीतवेश; *See* **Neat.**

Spume,-y, *See* **Froth,-y.**

Spur, *s.* कंटकः. 2 नखः-खं (of a cock). 3 प्रोत्साहनं, उत्तेजनं, प्रचोदनं, उत्साहहेतुः-कारणं; *See* **Incitement, Incentive;** , 'on the s. of the moment' पूर्वं अविचार्य or अनालोच्य, अविचारपूर्वं. -*v. t.* कंटकेन उत्सह् c., प्रतुद् 6 P. 2 (On) प्रोत्सह् c., प्रचुद् 10; *See* **Prompt.**

Spurious, *a.* कृत्रिम, कल्पित, कपट-कूट-मिथ्या in comp.; *See* **Counterfeit, False.**

Spurn, *v. t.* (Away) लत्ताप्रहारेण प्रत्याख्या 2 P or निःसृ c. or प्रत्यादिश् 6 P. 2 प्रत्या-ख्या, अवधीर् 10, तिरस्कृ 8 U, निर्-अव-धू 5, 9 U, निराकृ, धिक्कृ, सावज्ञं प्रत्यादिश्; *See* **Scorn, Contempt.**

Spurt, *s.* हठोद्यमः, महाप्रयत्नः. 2 सवेगः जलोत्क्षेपः. -*v. t.* सवेगं उत्क्षिप् 6 P or उदस् 4 U. -*v. i.* सवेगं निःसृ 1 P or निःस्रु 1 P.

Sputter, *v.* अंबूकृ 8 U, सनिष्ठीवं वद् 1 P or उच्चर् c. -*s.*,**-ing**, *s.* अंबूकृतं, निष्ठीवनं.

Sputum, *s. See* **Spittle** under **Spit.**

Spy, *s.* चारः, चरः, अप(व)सर्पः, स्पशः, प्रणिधिः, गूढ or गुप्त-चरः or गतिः, गूढ-गुप्त-पुरुषः; पिशुनः, सूचकः, कर्णेजपः, रहस्याख्यायिन् *m.* (slanderous); 'see as a s.' अपसृप् 1 P, (स मया पौरजानपदानपसर्पितुं प्रयुक्तः U. 1); 'the king sees by s. es' चारचक्षुर्महीपालः. -*v. t.* दृश् 1 P, ईक्ष् 1 A; *See* **See.** 2 निरूप् 10, निरीक्ष्, अवेक्ष्, अनुसं-धा 3 U.

Squab, *a.* ह्रस्वस्थूल.

Squabble, *See* **Quarrel.**

Squad, *s.* नवसैन्यदलं.

Squadron, *s.* (सैन्य-) गणः, गुल्मः-ल्मं, दलं, व्यूहः. 2 पोतावली, नौसमूहः.

Squalid, *a.* मलिन, कुत्सित, अमेध्य, अप-निकृष्ट, अधम, जघन्य; *See* **Dirty.**

Squall, *s.* चीत्कारः, चंडरवः, कलकलः, उत्क्रोशः, उच्चनादः-रवः. 2 (Of wind) चंडवातः, प्रभंजनः, प्रकंपनः. -*v. i.* उत्-,प्रा-क्रुश् 1 P, उच्चैः रु 2 P or घुष् 10; *See* **Scream.**

Squander, *v. t.* अप-व्यय् 10 (व्यययति), विक्षिप् 6 P, मुधा क्षै c. (क्षपयति) or हृ 1 P, अमितं व्यय्, अतिव्ययं कृ. **-er**, *s.* अपव्ययकारिन् *m.*, अमितव्ययकारी, विक्षेपिन् *m.* **-ing**, *s.* अपव्ययः, विक्षेपः; अति-अमित-व्ययः.

Square, *s.* (In Arith.) वर्गः, कृति *f.*, द्विघातः; 's. root' वर्गमूलं, पदं; 'the root of the sum of their s.s' तत्कृत्योर्योगपदं; 'take the s. root' पदीकृ, (Li.). 2 (In geometry) वर्गः, समचतुरस्रः, समचतुर्भुजः. 3 चत्वरं, अंगनं-णं; *See* **Courtyard;** 's. formed by 4 houses' संजवनं, चतुःशालं. -*v. t.* वर्गीकृ 8 U, वर्गयति (D.), द्विः हन् 2 P or गुणयति (D.). 2 समीकृ, शुध् c.; समा-धा 3 U, प्रति-सं-आ-युज् 7 U, 10. -*v. i.* संवद् 1 P, युज्-उपपद्- pass.; *See* **Suit.** -*a.* समचतुर्भुज, समचतुरस्र. 2 **Just,** q. v.

Squash, *v. t.* संमृद् 9 P, संपीड् 10, संपिष् 7 P. चूर्ण् 10 -*s.* संमर्दः, संपीडनं, चूर्णनं.

Squat, *v. i.* उत्कटुकासनं कृ 8 U, अवसक्थिकासनं कृ; अवनतसक्थि आस् 2 A or उपविश् 6 P. 2 **Cower,** q. v.

Squeak, Squeal, *v. i.* कर्कशं रु 2 P or नद् 1 P, वाश् 4 A. -*s.* कर्कशरवः-नादः, वाशितं, चीत्कारः.

Squeamish, *a.* विवमिषु,वमनोन्मुख (खी *f*). 2 **Fastidious,** q. v. **-ness,** *s.* विवमिषा.

Squeeze, *v. t.* नि-सं-पीड् 10, संमृद् 9 P, निष्पिष् 7 P: (out) निर्गल् c., निष्कुष् 1 P, निर्दुह् 2 U; *See* **Crush, Press. -ing,** *s.* संपीडनं, संमर्दः-र्दनं, निर्गालनं, निष्पेषः, निष्कर्षः.

Squelch, *v. t.* निर्दल् 1 P, विध्वंस् 1 A. **-s.** आघातः, प्रहारः.

Squib, *s. See* **Satire.**

Squint, *v. i.* तिर्यक् दृश् 1 P or प्रेक्ष् 1 A, वक्रं वीक्ष्. **-s.** तिर्यक्-वक्र-दृष्टि *f.*: 's. eyed' वक्रदृष्टि, वालेर, केकर, केदर; तिर्यग्दृष्टि.

Squire, *s.* महाजनः, आर्यः, श्री pr. 2 साभ्रहनिकः.

Squirm *v. i. See* **Writhe.**

Squirrel, *s.* काष्ठमार्जारः-बिडालः, वृक्षशायिका, चमरपुच्छः.

Squirt, *s.* धारायंत्रं. **-***v. t.* उदस् 4 U, उत्क्षिप् 6 P, बलेन निःसृ c. or निरस्.

Stab, *v. t.* (छुरिकया &c.) व्यध् 4 P, भिद् 7 P, क्षण् 8 P, छुर् 1 P, 's. in the secret' परोक्षे मर्मभेदं कृ 8 U. **-s.** क्षतं, वेधः, त्वग्भेदः.

Stable, *a.* स्थिर, निश्चल, अचल, दृढ, स्थावर; *See* **Firm. -s.** मंदुरा, वाजि-अश्व-शाला; (for elephants) वारि, गजबंधनी; (for cattle) गोशाला, गोष्ठ; 's.-keeper' अश्वपालः, मंदुरापालः. **-Stability,** *s.* स्थैर्यं, दृढता, सं-,स्थिति *f.*, स्थायित्वं. प्रतिष्ठा; *See* **Permaneuce.**

Stack, *s.* राशिः, सं-,चयः, संघः, उत्करः, चिति *f.* **-***v. t.* राशीकृ 8 U, समाहृ 1 P, आ-सं-चि 5 U.

Staff, *s.* दंडः, यष्टि *f.*, वेत्रं (cane), लगुडः (wooden). 2 आलंबः-बनं, आधारः, आश्रयः. 3 वर्गः, गणः, अधिकारिगणः &c.; 's. of teachers' शिक्षकवर्गः-समुदायः

Stag, *s.* हरिणः, मृगः, कुरंगः-गमः, एणः.

Stage, *s.* रंगः,-भूमि *f.*, शाला; नाट्यशाला; नेपथ्यं; 'behind the s.' नेपथ्ये. 2 मंचः-चक्रः. 3 (On a journey) वसति *f.*, (तिस्रो वसतीरुषित्वा R. VII. 33), प्रयाणकं; विश्रामस्थानं, अवस्थानं. 4 पदं, स्थानं, आस्पदं, वृत्ति *f.*, दशा, अवस्था. 5 (State of existence) आश्रमः, (वानप्रस्थाश्रमः); 'last s.' चरमावस्था; 'first s.' उपक्रमः, प्रथमारंभः; 's.-coach' अध्वगयानं, पथिकयानं; 's.-manager' सूत्रधारः; 's.-player' रंगोपजीविन् *m.*, नटः, नर्तकः.

Stager, *s.* ज्ञानवृद्धः, वृद्धः.

Stagger, *v. i.* प्रस्खल् 1 P, विचल् 1 P, भ्रम् 1, 4 P, घूर्ण् 1 A, 6 P, दोलायते (D.); सभयं-सचकितं-परावृत् 1 A. 2 विशंक् 1 A, विक्लृप् 1 A. **-***v. t.* विचल् c., भ्रम् c., शंकाविकल्पं-उत्पद् c.

Stagnant, *a.* स्थिर, निश्चल, निष्प्रवाह, निश्चेष्ट, गति or प्रवाह-हीन or रहित. **-Stagnate,** *v. i.* स्थिरीभू 1 P, ex. by (*a.*) with भू; 'when the stream of knowledge s. s' यदा ज्ञानस्रोतसो गतिरोधः भवति, ज्ञानस्रोतोगतिः कुंठिता भवति. **-ion,-Stagnancy,** *s.* अप्रवाहः, निश्चलता, गति-प्रवाह-अभावः, निश्चलता, स्थैर्यं.

Staid, *a.* धीर, ग(गं)भीर, स्थिर; *See* **Serious.**

Stain, *v. t.* (lit. and fig.) दुष् c. (दूषयति), कलंकयति-मलिनयति-आविलयति-कलुषयति (D.), मलिनी-कलुषी-कृ 8 U, लिप् 6 P, लांछ् 1 P, समली-मलीमसी-कृ; 'what is the use of life s. ed by infamy (ignominy)' उपक्रोशमलीमसैः प्राणैः किं (R. II. 53); 's. ed by blood' रक्तमलिन; 'with s. ed hands' लिप्तहस्त. 2 रंज् c. **-s.** कलंकः, अंकः, दूषणं, लांछनं, चिह्नं, कलुषं, मलं, मालिन्यं. 2 निंदा, उपक्रोशः, वाच्यता, वचनीयं, गर्हा. **-less,** *a.* निष्कलंक, निर्मल, अदूषण, अकलुष, कलंक-लांछन-हीन, निर्दोष, निरवद्य.

Stair, *s.* सोपानं, आरोहणं, पर्वन् *n.*, भंगिः-गी *f.*: 'flight of s. s,' 's.-case,' 's.s' सोपानपथः-मार्गः-पद्धति *f.*,-परंपरा-पद्वी-पंक्ति *f.*, निश्रेणी, अधिरोहिणी.

Stake, *s.* ग्लहः, पणः 2 कीलः, शंकुः, शूलः-लं; स्थाणुः, स्थूणा, शलाका. 3 संशयः, संदेहः; 'his life was at s.' संशयस्थं जीवितं तस्य, संशयितजीवित आसीत्,जीवितं संशयदोलाधिरूढं. **-***v. t.* पण् 1 A, (with gen. of thing staked); शतस्य पणते 's s a hundred'. 2 शूलेन-कीलेन व्यध् 4 P or बंध् 9 P, कील् 10.

Stale, *a.* यातयाम, परि-,उषित, रात्र्यंतरित; निःसार, नीरस, असरस; दुष्ट (जलं). 2 जीर्ण, पुराण, उच्छिष्ट. **-***v. i.* मिह् 1 P, मूत्र् 10.

Stalk, *s.* कांडः-डं, नालः-लं-ली; बंधनं, वृंतं, प्रसव-शस्य-बंधनं. 2 साटोपगति *f.*, धीरोद्धता गतिः. **-***v. i.* साटोपं परिक्रम् 1 U,4 P, उद्धतं-सगर्वं-चल् or गम् 1 P, धीरोद्धतं गम्; 's. ing-horse' **Pretext,** q. v.

Stall, *s* पण्यवीथिका, पण्यगेहं, आपणः, विपणि *f.*; *See* **Shop** 2 शाला, स्थानं; (for horses) मंदुरा, अश्वस्थानं; (for cattle) गोष्ठं, गो-शाला-स्थानं.

Stallion, *s.* बीजाश्वः सवृषणः अश्वः.

Stalwart, *a.* दृढांग, प्रबल, 2 धीर, धृतिमत्.

Stamen, *s.* केसरः, पुंकेसरः.

Stamina, *s.* (fig.) सारः, सत्त्वं, तेजस् *n.*, बलसाधनं-हेतुः.

Stammer, *v. i.* स्खल् 1 P, असमंजसं जल्प् 1 P, स्खलद्वाक्येन-अस्पष्टवर्णैः-अस्फुटस्वरेण-गद्गदवाचा-वद् 1 P, अस्पष्टं-अस्फुटं-वच् 2 P. **-er,** *s.* अव्यक्त-अस्पष्ट-वादिन् *m.*, स्खलत्-गद्गद-वादी, स्खलितस्वरः. **-ing,** *s.* स्खलनं, अस्पष्ट-अव्यक्त-भाषणं.

Stamp, *s.* मुद्रा, मुद्रिका, मुद्रायंत्रं. 2 मुद्रा, चिह्नं, अंकः, न्यासः, पदं. 3 पादप्रहारः -आघातः-विष्टंभः. 4 स्व-,रूपं, आकारः, आकृति *f.*, प्रकृति *f.*, संस्कारः; 'of the common s.' सामान्यप्रकृति, प्राकृत; 'of high s.' महाप्रभाव, महानुभाव; 'of the same s.' समानरूप, तुल्य-स्वभाव-प्रकृति. **-v.** पादेन पादतलेन-प्रहृ 1 P or आ-अभि-हन् 2 U, पादप्रहारं कृ 8 U. 2 अंक् 10, मुद्रयति-चिह्नयति- ((D.), लांछ् 1 P; 's.-ed with infamy' दुष्कीर्तिचिह्नित, उपक्रोशमलीमस, अपयशांकित. 3 क्लृप् c., रच् 10, संनि-धा 3 U. 4 पादतलेन मृद् 9 P or चूर्ण् 10 or पिष् 7 P. **-ed,** *a.* अंकित, लांछित. समुद्र, कृतमुद्र, मुद्रांकित.

Stampede, *s.* ससंभ्रमं पलायनं.

Stanch, *a.* दृढ, स्थिर, धीर, अचल; 'a s. adherent' बद्धानुरागः सहायः, दृढपक्षः; *See* **Firm.** **-v.** *t.* प्रवाहं-प्रस्रावं स्तंभ् 9 P or रुध् 7 U, शुष् c. **-v.** *i.* शुष् 4 P, स्तब्धप्रवाह *a.* भू 1 P.

Stanchion, *s.* क्षुद्रस्तंभः-स्थाणुः.

Stand, *v. i.* स्था 1 P, पद्भ्यां स्था. 2 वृत् 1 A, विद् 4 A, अव-स्था 1 A; *See* **Remain.** 3 भू 1 P, अस् 2 P, वृत्. 4 निवृत्, विरम् 1 P, स्तंभ् pass., स्थिर-रुद्धगति-कुंठित- *a.* भू; 'this will remain a s.-ing stigma (on me)' वचनीयमिदं व्यवस्थितं (K. 5. 21); 'this argument will not s. long' इयं युक्तिर्न चिरं स्थास्यति, अचिरात् खंडयिष्यते. **-v.** *t.* सह् 1 A, मृष् 4 P, 10. *See* **Bear;** 'to s. the test' निकषपरीक्षां तृ 1 P, निकषे परीक्ष् pass. 2 उप-नि-रुध् 7 U; प्रति-वि-रुध्. **-against,** प्रत्यव-स्था, बाध् 1 A; विरुध् *See* **Oppose.** **-by, -near,** साहाय्यं कृ, संरक्ष् 1 P, परि-,त्रै 1 A, उपकृ; अनुग्रह्. 2 स्था, अव-स्था; अनुरुध् 4 A, अनुवृत्; 's. by your lord's orders' शासने तिष्ठ भर्तुः (V. 5) *See* **Obey.** **-for,** स्थाने-भूमौ स्था or वृत्. 2 पदं आप् desid. (ईप्सति). **-off,** अप-सृ 1 P, दूरतः स्था. **-on,** आ-अव-लंब् 1 A, आ-स्था (A). आश्रि 1 U. **-out,** प्रलंब्, उत्क्रम् 1 P; *See* **Project.** 2 **Persist,** *q. v.* **-over,** व्याक्षिप् pass. 2 अधि-ष्ठा, अध्यास् 2 A; 'his name s. s over all' स सर्वेषां मूर्ध्नि तिष्ठति. **-to,** संवद् 1 P; 'does not s. to reason' सयुक्तिकं-सोपपत्तिकं न भाति. **-up,** उत्था. **-s.** आधारः, भाजनं, पात्रं, उपष्टंभः, आश्रयः; 'ink-s.' मसीपात्रं-धानी; 's. of a lamp' दीपाधारः-वृक्षः. 2 मंचः. 3 अव-,स्थानं, पदं, स्थिति *f.*, अव-,स्तंभः, गतिरोधः-स्तंभः, कुंठनं; 'come to a s.' स्तब्ध-शांत *a.* भू; 'bring to a s.' स्तंभ् 9 P or c., गतिं रुध् or वृ c.; 'at a s.-still' कुंठित, प्रतिहत-रुद्ध-गति; 'make a s. against' प्रतिबंध् 9 P, प्रत्यव-स्था (A), प्रति-विरुध्. **-ing,** *s.* अव-,स्थितिः, अवस्थानं, स्थायित्वं; 'of long s.' चिरस्थायिन्, दीर्घकालीन, पुराण; *See* **Old.** 2 स्थानं, पदं, आस्पदं, पदवी, प्रतिष्ठा; 'high s.' उच्चपदं, महती प्रतिष्ठा; 'who has obtained a s.' लब्धप्रतिष्ठः. **-a.** सनातन, चिर-नित्य-स्थायिन्; *See* **Lasting.** 2 स्थित, उत्थित, दंडवत् स्थित. 3 स्थ, स्थायिन्, वर्तिन्, अव-,स्थित in comp. 'with the hair s. on their end' पुलकित रोमांचित, कंटकित.

Standard, *s.* ध्वजः, पताका, केतुः, केतन, वैजयंती; 's.-bearer' ध्वजिन्, पताकिन्. 2 मानं, प्र-,परि-°, सूत्रं, विधिः, नियमः; 'a s. person' प्रमाणपुरुषः, प्रमाणं; 's. authors' प्रमाणभूताः (विशिष्टाः) ग्रंथकृतः

Stanza, *s.* श्लोकः.

Staple, *a.* प्रधान, मुख्य, विशिष्ट. **-s.** **Market,** q. v. 2 लोहपुटः.

Star, *s.* तारा, तारका, नक्षत्रं, ज्योतिस् *n.*, उडुः, भं, ऋक्षं; 'the s. s collectively' उडुगणः, भगणः; 'shooting s.' नक्षत्रपतनं, उल्का; 's. under which one is born' जन्मनक्षत्रं; 's.-light' ताराप्रकाश, तारकिन्; (*s.*) ताराप्रकाशः. **-v.** *t.* तारासनाथ *a.* कृ 8 U, तारकयति (D.); 'the breast s.-ed with drops of tears' अश्रुबिंदुतारकितपयोधरा; 'the s.-red heaven' तारासनाथं-तारकितं-नभः. **-ry,** *a.* तारासंकुल-मय (यी *f.*)-आकीर्ण-सनाथ, तारकित. 2 तारानिभ, तारा in comp.; 's. firmament' नभोमंडलं, नक्षत्रमंडलं.

Starboard, *s.* नौदक्षिणपार्श्वः.

Starch, *s.* मंडः-डं. **-v.** *t.* मंडयति (D.), मंडेन लिप् 6 P.

Stare, *v. i.* सूक्ष्मं-बद्धलक्ष्यं-स्थिरदृष्ट्या-अनिमेषलोचनाभ्यां-ईक्ष् 1 A or दृश् 1 P or आलोक् 1 A, 10, अनन्यदृष्ट्या निरीक्ष्, स्निग्धं निर्वर्ण् 10. **-s.** स्थिरदृष्टि *f.*, बद्ध-अनिमेष-दृष्टिः, अनन्यदृष्टिः. **-ing,** *a.* बद्ध-स्थिर, अनन्य-अनिमेष-दृष्टि-बद्धलक्ष्य, विवृत-उत्फुल्ल-नयन-लोचन &c., उन्मीलिताक्ष.

Stark, *a.* समग्र, पूर्ण, केवल, अत्यंत, अशेष. 2 रूक्ष, विषम. **-adv.** केवलं, अत्यंतं

Start, *v. i.* प्र-स्था 1 A, प्र-या 2 P, प्र-, चल् 1 P; यात्राभिमुखं प्रवृत् 1 A; 's. on a journey' (Mal. 6). 2 स्फुर् 6 P. सहसा

कंप् 1 A or स्पंद् 1 A; 's. back' ससाध्वसं परावृत् or अपसृ 1 P, सचकितं व्यपसृ, चकित-*a.* भू; संत्रस्त-भयचकित-*a.* भू; 's. aside' स्वस्थानात् विचल् or भ्रंश् 1 A, 4 P or च्यु 1 A; अभिजगतयः शब्दं सहते (S. 1) 'not s.ing aside &c.;' 's. up' सहसा उत्था; (in sleep) सहसा अवबुध् 4 A.; (an idea) सहसा उद्भू or उत्पद् 4 A. -*v. t.* प्रवृत् c., प्र-स्तु c., संचल् c., प्रचर् c. 2 उद्विज् c., संत्रस् c., चकित-*a.* कृ 8 U, उत्था c. (उत्थापयति), भी c.; अकस्मात् त्रस् c. or कंप् c. 3 **Propose**, q. v. -*s.* प्रस्थानं, प्रस्थानारंभः. 2 कंपः-पनं, स्फुरणं, साध्वसोत्कंपः, सहसाकर्षः, आकस्मिकप्रकंपः; चकितं; 'gave a sudden s.' (सहसा) ससाध्वसं चकितो बभूव; 'with a s.' चकितं, सचकितं. 2 प्रवर्तनं, आरंभः, प्रचारः; 'to get or have the s. of' पूर्वं (with abl.) प्र-स्था or प्रारभ् 1 A; 'by s. s' सातत्यं विना, प्लुतैरिव, आकस्मिकयत्नैः.

Startle, *v.* *See* **Start**; 's.ing news' उद्वेगकरी वार्ता; in a very s.ed manner' चकितचकितं.

Starve, *v. i.* क्षुधया पीड् or अर्द् pass., आहाराभावात् मृ 6 A or अव-,सद् 1 P or नश् 4 P, क्षुधया अवसद्; (oneself) आहारं-अशनं-त्यज् 1 P, प्रायोपवेशनं कृ 8 U; 'likely to s.' आसन्नमृत्युरिव, अनशनेन मुमूर्षुरिव; (fig.) अव-,सद्. -*v.t.* अनशनेन मृ c. or नश् c.; 'be sure, I shall s. myself (to death)' मया प्रायोपवेशनं कृतं विद्धि (P. IV. 1). **-ation**, *s.* अनशनं, अनाहारः, आहाराभावः, क्षुधावसादः, क्षुत्क्षामता. **-ed, -ing**, *a.* क्षुधापीडित-अर्दित-आर्त, क्षुधावसन्न, निराहार, निरन्न.

State, *s.* अवस्था, दशा, भावः, स्थिति *f.*, वृत्ति *f.*, गति *f.*; त्वं-ता affixed. 2 राज्यं, राष्ट्रं, राजन् in comp.; 's. affairs' राजकार्याणि; 's.-servant' राजसेवकः. 3 ऐश्वर्यं, आडंबरः, आटोपः, प्रतापः, वैभवं, विभूति *f.*, श्रीः, गौरवं. -*v. t.* कथ् 10, आचक्ष् 2 A, वच् 2 P, वद् 1 P, नि-आ-विद् c., निर्दिश् 6 P, वि-ज्ञा c. (ज्ञापयति), वर्ण् 10, उपन्यस् 4 U; *See* **Tell**, **Say**. **-ed**, *a.* कथित, उक्त, निर्दिष्ट, वर्णित, &c.; 'as above s.' यथानिर्दिष्ट. 2 नियत, व्यवस्थित. **-ly**, *a.* सप्रताप, सश्रीक, सवैभव, उज्ज्वल; *See* **Majestic**; **Grand**. 2 साटोप, उद्धत, सखेल; 's. in gait' साटोपगामिन्, खेलगति-गामिन्, हंसगामिन्. -*adv.* साटोपं, उद्धतं, सखेलं, सलीलं, सप्रतापं. **-ment**, *s.* उपकथनं, आ-नि-वेदनं, उक्ति *f.*, वचनं, उपन्यासः, निर्देशः, विज्ञापना; 'clearness of s.' उपन्यासशुद्धिः. **-Statesman**, *s.* नीतिज्ञः-विद् *m.* -विशारदः, राजकार्यकुशलः-धुरंधरः, राजनीतिनिपुणः. **-ship**, *s.* नीतिज्ञता, नीति *f.*

Station, *s.* स्थानं, अव-,स्थिति *f.*, आस्पदं, स्थलं, पदं, अवस्थानं. 2 दशा, पदं, अवस्था, वृत्ति *f.*, पदवि-वी *f.*; 'high s.' उन्नतपदं, परमस्थानं, उन्नतावस्था; 's. of life' जाति *f.* 3 अधिकारः, नियोगः, पदं, पदविः-वी. 4 निवेशः. -*v. t.* स्था c. (स्थापयति), अव-सं-प्रति-°, निविश् c.; 's. in any post' पदे-अधिकारे-नियुज् 7 A. 10. **-ary**, *a.* स्थिर, अचल, निश्चल, अचर, स्थावर; अजंगम. 2 अवर्धिष्णु, अवर्धमान.

Stationer, *s.* लेखनसाधनविक्रयिन् *m.* **-y**, *s.* लेख-लिपि-साधनं-सज्जा-सामग्री.

Statue, *s.* प्रतिमा, प्रतिकृति *f.*, मूर्ति *f.*; *See* **Image**. **-Statuary**, *s.* कारः in comp. with (*s.*), तक्षकः. 2 मूर्तिविधानं-करणं.

Stature, *s.* प्रमाणं, परिमाणं, उच्चता, मूर्ति *f.*, आकृति *f.*, आकारः; 'of low s.' अल्पप्रमाण; 'of dwarfish s.' वामनाकृति, खर्व, ह्रस्व; 'short in s.' ह्रस्व-अल्प-मूर्ति

Status, *s.* स्थिति *f.*, पदवी.

Statute, *s.* विधिः, नियमः, व्यवस्था; *See* **Law**, **Rule**. **-Statutory**, *a.* विधिप्रोक्त, व्यवस्थाकल्पित, नियत.

Stave, *s.* काष्ठखंडः-डं, फलकः-कं. -*v. t.* स्फुट् c., छिद्रयति (D.).

Stay, *v. i.* वस् 1 P, स्था 1 P, वृत् 1 A, अध्यास् 2 A; *See* **Dwell**. 2 विरम् 1 P; अलं with instr. or gerund. -*v. t.* स्तंभ् 9 P, प्रतिबंध् 9 P, उप-नि-रुध् 7 U, विलंब् c., नि-प्रति-वृ c.; नि-प्रति-षिध् 1 P; 's. one's progress' मार्गं निरुध् (Mr. 5.). 2 आ-अव-लंब् 1 A, आश्रि 1 U, आधृ 10, अव-उप-स्तंभ्; *See* **Prop**. **-s., -ing**, *s.* नि-,वासः, अवस्थानं, अव-,स्थिति *f.* 2 आलंबः, आधारः, आश्रयः, उपघ्नः, उप-अव-ष्टंभः. 3 प्रतिष्टंभः, निरोधः, गतिरोधः, प्रतिबंधः. **-Stays**, *s.* अंगिका, चोलः-लं, कूर्पासकः.

Stead, *s.* स्थानं, भूमि *f.*; *See* **Instead (of)**.

Steadfast, *a.* स्थिर, दृढ, सतत, अचल; निश्चल, धीर, स्थिरबुद्धि-वृत्ति, अचंचलवृत्ति; 's. in friendship' दृढसौहृद. **-ly**, *adv.* दृढं, स्थिरं. **-ness**, *s.* स्थैर्यं, धैर्यं, धृति *f.*

Steady, *a.* स्थिर, दृढ, अचल, निश्चल, धीर, अस्खलित, धृतिमत्; सतत, अविश्रांत, अविरत; अविरतोद्योग, सदोद्यमिन्; 'of s. action' स्थिरकर्मा; 's. in resolution' स्थिर-दृढ-निश्चय-संकल्प. 2 अनुद्विग्न, अक्षुब्ध, अनाकुल, प्रशांत. -*v. t.* स्थिरीकृ 8 U, दृढयति (D.), दृढीकृ, व्यव-स्था c. (स्थापयति). **-ily**, *adv.* स्थिरं, दृढं, धीरं, अनवरतं, अविरतं, नित्यं, सदा, अविश्रांतं. **-iness**, *s.* स्थैर्यं, धैर्यं, अचापल्यं,

नित्यता, सातत्यं, अविच्छेदः, अविरति *f.*; 's. of conduct' अव्यभिचारः, आचारमर्यादा.

Steal, *v. t.* चुर् 10, मुष् 9 P, अपहृ 1 P, स्तेन् 10. —*v. i.* चुर्, स्तेयं वि-धा 3 U. 2 (Away) अलक्षितं-निभृतं-गम् 1 P or अपक्रम् 1 U, 4 P or अपसृ 1 P; निःशब्दं चल् 1 P; 'the night, the quarters of which (gradually) stole away' अविदितगतयामा रात्रिः (U. 1); 's. over, -upon' अलक्षितं समाक्रम् or अभिभू or ग्रस् 1 A; 'sleep gently stole upon my eyes' शनैर्निद्रा निमीलितलोचनं मामकार्षीत्. **—er,** *s.* अपहर्तृ *m.*, अपहारकः, स्तेनः, स्तेयकृत्, चो(चौ)रः, मोषकः, तस्करः, हारी in comp.; 's. of hearts' हृदयचौरः. **—ing,** *s.* स्तेयं, चौरकर्मन् *n.*, स्तैन्यं, चौर्यं, मोषः, अपहारः. **—th,** *s.* अपहारः &c. 2 छलं, गूढं कर्म, चोरिका, निह्नवः, निभृत-प्रच्छन्न-कर्म; 'marriage by s.' चोरिकाविवाहः. **—thily,** 'by s.' *adv.* छलेन, निभृतं, प्रच्छन्नं, अलक्षितं, अप्रकाशं, निगूढं, रहसि. **—thy,** *a.* निभृत, प्रच्छन्न, गुप्त, गूढ, रहस्य, अलक्षित, अप्रकाश, अव्यक्त.

Steam, *s.* बाष्पः; 's.-boat' 'steamer' अग्निनौका, बाष्पीयनौः. —*v. i.* बाष्पायते (D.), बाष्पं उत्-सृज् or उत्क्षिप् 6 P or उद्-गॄ 6 P. —*v. t.* बाष्पेण व्याप् c., स्विद् c.

Steed, *s.* अश्वः, तुरगः, वाजिन् *m.*; *See* **Horse.**

Steel, *s.* चित्रायस, सारलोहं, पिंडायसं, तीक्ष्णायसं, शस्त्रकं. 2 शस्त्रं, शस्त्रकं; 's.-yard' तुलादंडः, मापनदंडः. —*a.* तीक्ष्णायस (सी *f.*). —*v. t.* कठिनीकृ 8 U, दृढी-निर्दयी-कृ.

Steep, *a.* दुरारोह, उत्सर्पिन्, पातुक, प्रवण, अतट. —*s.* प्रपातः भृगुः, अतटः. —*v. t.* नि-, मस्ज् c. (मज्जयति), स्ना c. (स्न-स्ना-पयति), जलेन आप्लु c. or सिच् 6 P. 2 सं-धा 3 U, वास् 10, भू c.; 's.ing indigo' नीलीसंधानं-पाचनं; 's. ed in perfumes' वासित, भावित.

Steeple, *s.* शिखरं शृंगं, (of a palace &c.)

Steer, *s.* वत्सतरः, दम्यः. —*v. t.* चल् c., वह् c., मार्गं उपदिश् 6 P (with gen.); नी 1 P. मार्गं निश्चि 5 U or निर्णी; 's. one's course' स्वमार्ग-कर्तव्यं-निर्णी; 'he who s. s the vessel of state' (निर्बाधं) राज्यधुर्वहः, भुवनराज्यभारनौकर्णधारः (Ka. 56). **—er,-Steersman,** *s.* कर्णधारः-वाहः, कर्णिन् *m.*, नाविकः.

Stellar, *a.* तारा in comp.; *See* **Starry.** **—Stellate,-ed,** *a.* तारोपम.

Stem, *s.* बंधनं, वृंतं, प्रसवबंधनं. 2 प्र-, कांडः-डं; स्तंभः, नालं-लः. —*v. t.* प्रतिबंध् 9 P, प्रति-रुध् 7 U, प्रति-स्तंभ् 9 P, प्रत्यव-स्था 1 A, प्रतिकूलयति-प्रतीपयति (D.); *See* **Oppose.**

Stench, *s.* पूति *f.*, पूतिगंधः, दुर्गंधः.

Stentorian, *a.* अतितार, अत्युच्च; उच्चस्वन.

Step, *s.* पदं, पद or पाद-न्यासः or विक्षेपः, क्रमः, पद-चरण-पातः, विक्रमः (as in त्रिविक्रमः); 'Vishnu took 3 s s' विष्णुस्त्रीणि पदानि विचक्रमे. 2 पदं, क्रमः, (distance also); पर्यायः, परिपाटी; 'at every s.', 's. by s.' प्रति-अनु-पदं, पदे पदे, पदात्पदं, क्रमशः, पदशः; 'by s. s' क्रमशः, शनैः शनैः, क्रमेण; 'the first s.' प्रथमारंभः, उपक्रमः, प्रथमप्रचरणः. 3 (Of a ladder) भंगि *f.*, सोपानं, आरोहणं; 'flight of s. s' अधिरोहिणी; *See* **Ladder, Staircase.** 4 उपायः, प्रतिपत्ति *f.*, क्रिया; तदस्य कात्र प्रतिपत्तिः (Mal. 3); 'not knowing what s. s to take' प्रतिपत्तिमूढः, विषादलुप्तप्रतिपत्ति (R. III. 40); 's.-brother' वैमात्रः-त्रेयः, विमातृजः, अन्योदर्यः; 's.-child' अन्योदर्यं अपत्यं 's.-daughter' सपत्नीसुता; 's.-father' मातुः पतिः; 's. mother' विमातृ *f.*, सपत्नीमाता; 's.-sister' वैमात्री-त्रेयी, विमातृजा, अन्योदर्या; 's.-son' सपत्नीसुतः. —*v.* पादं विन्यस् 4 U or निक्षिप् 6 P, पादन्यासं-पदविक्षेपं कृ 8 U. 's.ing over his body' तच्छरीरे पादन्यासं कृत्वा. 2 क्रमशः चल् 1 P or गम् 1 P; (over) आक्रम् 1 U, 4 P; व्याप् 5 P 'as much space as I can s. over in three steps' यावतीं भूमिं त्रिपदेनाहं व्याप्नुयां-आक्रमेयं-तावतीं; 's. in between' अंतरा आगम् or पत् 1 P; 's. towards' प्रतिपद् 4 A. **—ping,** *s.* पादन्यासः &c.; 's-stone' सोपानशिला प्रस्तरः.

Stereotyped, *a.* स्थिर, अपरिवर्तनीय, दृढसंकल्पित.

Sterile, *a.* वंध्य, अफल, निष्फल. **—ity,** वंध्यता, निष्फलत्वं.

Sterling, *a.* यथार्थ, परमार्थ, वास्तविक (की *f.*); अकृत्रिम, सारभूत.

Stern, *s.* पृष्ठभागः. —*a.* निष्ठुर, रूक्ष, दारुण, परुष, कठिन, कठोर, उग्र; निर्दय, क्रूर; 'in a decisive and s. tone' परिच्छेदनिष्ठुर; 'of s. stuff' अभेद्यसार. **—ly,** *adv.* निष्ठुरं, कठोरं, दारुणं, उग्रं. **—ness,** *s.* नैष्ठुर्यं, कठोरता, पारुष्यं.

Sternum, *s.* उरोस्थि *n.*

Sternutation, *s.* *See* **Sneeze.** **—Sternutatory,** *s.* नस्यं.

Stertorous, *a.* घर्घरायमाण.

Stethoscope, *s.* हृत्परीक्षणयंत्रं, हृदयस्फुरणश्राविणीनालिका.

Stew, *v.t.* मंदं पच् 1 P. —*s.* चिंता, मनस्तापः.

Steward, *s.* परिचारकः. 2 अर्थाधिकारिन् *m.*, कार्याधीशः. **-ship**, *s.* कार्याधीशत्वं.

Stibium, *s.* सौवीरं, कापोतं, स्रोतोंजनं, यामुनं.

Stick, *s.* दंडः, यष्टि *f.*; वेत्रं, वेत्रयष्टिः (cane); काष्ठं, काष्ठखंडः, लगुडः. **-***v. i.* सं-लग् 1 P, संश्लिष् 4 P, संज् pass., आ-सं-अनु-°, आ-सस्ज् 1 P, अनुबंध् 9 P, संसक्ती-संलग्नी-भू 1 P. 2 मस्ज् 6 P, निरुध्-स्तंभ् pass.; 'the wheels stuck fast into the mire' पंके गाढं निरुद्धानि चक्राणि. 3 विकल्प् 1 A, विशंक् 1 A; *See* **Doubt**; 's. out' प्रलंब् 1 A; *See* **Project**. **-***v. t.* निविश् c., अनुबंध्, आ-सं-संज् c., संलग्नीकृ 8 U. 2 मस्ज् c. **-y**, *a.* स्निग्ध, चिक्कण, श्यान, सांद्र, संलग्नशील.

Stickle, *v. i.* पक्षं ग्रह् 9 U. 2 **Contend**, q. v.

Stiff, *a.* कठिन, संहत; दृढ, घन, अनम्र, अशिथिल, स्तब्ध. 2 परुष, रूक्ष, कर्कश. 3 असुगम, दुर्बोध, दुर्ज्ञेय, गहन; 's.-hearted, -necked' प्रतिनिविष्ट, स्तब्ध, दृढनिश्चय. **-en**, *v. t.* कठिनीकृ 8 U, घनीकृ, स्तंभ् 9 P or c. **-***v. i.* कठिनीभू 1 P; 'remain with your body s. ed' स्तंभितगात्रास्तिष्ठ. **-ly**, *adv.* दृढं, कठिनं. **-ness**, *s.* काठिन्यं, दृढता, &c.

Stifle, *v. t.* श्वासं नि-,रुध् 7 U, श्वासरोधं कृ. 2 स्तंभ् 9 P or c., निग्रह् 9 P, नियम् 1 P, नियंत्र् 10; *See* **Choke, Suppress**; 'with s. ed words' स्तंभितवाक्.

Stigma, *s.* कलंकः, अंकः, लांछनं, दूषणं. **-tize**, *v. t.* निंद् 1 P, परिवद् 1 A, दुष् c. (दूषयति), कलंकयति (D.), अपकीर्त्या अंक् 10; *See* **Stain.**

Stile, *s.* सोपानमार्गः-पद्धति *f.*

Stiletto, *s.* *See* **Dagger**

Surge, *v. i.* उल्लल् 1 P, उद्भ्रम् 1 P, उत्क्षिप् pass.; 's. ing waters' कल्लोलाकुलं-तरंगक्षुभितं-जलं. **-s.** कल्लोलः, महोर्मि *f.*

Surgeon, *s.* शल्यतंत्रविद्, शस्त्रवैद्यः. **-Surgery,** *s.* शल्यं, शल्यतंत्रं-शास्त्रं, शस्त्रविद्या. **-Surgical,** *a.* (*s.*) in comp.

Surly, *a.* कर्कश, रूक्ष, परुष, प्रतीप, वक्र, दुःशील.

Surmise, *v.* आ-,शंक् 1 A, तर्क् 10, सं-भू c. **-s.** वि-,तर्कः, आ-,शंका.

Surmount, *v. t.* तॄ 1 P, सं-उत्-, अतिक्रम् 1 U, 4 P, लंघ् 1 A, 10, पारं गम् 1 P.

Surname, *s.* उपनामन् *n.*, कुलनाम. **-v. t.** Ex. by (*s.*); 's. ed Vyasa' व्यासकुलोत्पन्नः, व्यासोपनामा.

Surpass, *v. t.* अति-शी 2 A, अतिक्रम् 1 U, 4 P, अतिरिच्-विशिष्-pass., जि 1 P; *See* **Excel.** **-ing,** *a.* अति in comp.; 's. the strength of man' अतिमानुष; *See* **Beyond.**

Surplice, *s.* धौतावारः, उपरिच्छदः.

Surplus, *s.* उद्-वृत्तं, उद्वर्तः, अतिरिक्तभागः.

Surprise, *v. t.* वि-स्मि c. (स्मापयति, स्मापयते), साश्चर्य-*a.* कृ, विस्मयेन उपहन् 2 P, विस्मयाकुल-आश्चर्यचकित-*a.* कृ. 2 अतर्कितं-सहसा-आपत् 1 P or आसद् c. or अवस्कंद् 1 P; सन्निपत्याभियुक्तः (U. 3) 'was s. ed and attacked.' **-s., -al,** *s.* विस्मयः, आश्चर्यं, चमत्कारः, चमत्कृति *f.*, अद्भुतं. 2 अतर्कितः आपातः-अवस्कंदः, सहसाक्रमः-अवस्कंदनं. **-ed,** *a.* विस्मित, विस्मापित, विस्मयाकुल, साश्चर्य, आश्चर्यचकित, विस्मयोपहत-अन्वित-आपन्न; 'to be s.' विस्मि 1 A. 2 सहसाक्रांत. **-ing,** *a.* आश्चर्य-विस्मय-कर (री *f.*), अद्भुत, विचित्र, आश्चर्य-विस्मयावह.

Surrender, *v. t.* उपा-हृ 1 P, उपा-नी 1 P, सं-,ऋ c. (अर्पयति), निक्षिप् 6 P, प्र-दा 3 U, प्रति-पद् c. 2 परि-,त्यज् 1 P, उत्सृज् 6 P, हा 3 P, संन्यस् 4 U. 3 (Oneself) शरणं गम् 1 P or या 2 P or प्र-पद् 4 A, वशं गम्-या. **-s.** समर्पणं, प्रदानं, परि-,त्यागः, उत्सर्गः. 2 प्रणति *f.*, वशीभवनं.

Surreptitious, *a.* मोषेण-चौर्येण-छलेन-कृत-प्रकाशित-निवेशित, &c. **-ly,** *adv.* छलेन, सकपटं.

Surround, *v. t.* परि-वृ 5 U or c., परिक्षिप् 6 P, परि-इ 2 P, परिगम् 1 P, परि-,वेष्ट् 1 A or c., परि-सृ 1 P; oft. by मेखला, रसना, वलय in comp.; 'the earth s. ed by ocean' समुद्ररसना-उदधिवलया-रत्नाकरमेखला-उर्वी. **-ing,** *a.* समंततः वर्तिन्, आभोग-पर्यंत-वर्तिन्; परिसरस्थ; *See* **Near.** **-s.** परिवेष्टनं, संवलनं.

Surtout, . उत्तरीयं, प्रावारः.

Surveillance, *s.* अवेक्षा-क्षणं, निरूपणं.

Survey, *v. t.* प्र-,परि-,मा 3 A or c. (मापयति). 2 (With the eye) संदृश् 1 P, परि-अव-ईक्ष् 1 A, विलोक् 1 A, 10, निरीक्ष्, निरूप् 10. **-s.** अव-आ-लोकः-कनं, निरीक्षा, निरीक्षणं. 2 मापनं. **-or,** *s.* क्षेत्र-भू-मापकः.

Survive, *v. i.* अति-जीव् 1 P; जीव् with पश्चात् (with gen.) or उत्तरं (with abl.): 's. danger' आपदं उत्तॄ 1 P. -*v. i.* धृ pass., अव-स्था 1 A. **-al,** *s.* अतिजीवनं, अवस्थानं. **-ing,** *a.*, **-or,** *s.* शेष, अवशिष्ट, अतिजीविन्, ध्रियमाण, अवस्थित.

Susceptible, *a.* योग्य, उचित, ग्राहिन्, ग्रहण-वेदन-क्षम-शक्त, गमनीय, ग्राहक; *See* **Admit** (of); 'I am made s. of an emotion' विकारस्य गमनीयास्मि संवृत्ता (S. 1): 'youth is s.' विकारि यौवनं (Mal. 1); 's. of anger' सुलभकोप, क्रोधशील, शीघ्रकोपिन्. **-*Susceptibility,*** *s.* ग्राहकत्वं, ग्रहण-वेदन-शीलता-क्षमता.

Suspect, *v. t.* शंक् 1 A, वि-आ-परि-°, सं-शी 2 A, न प्रति-इ 2 P or विश्वस् 2 P: 'excessive affection s. s evil' अतिस्नेहः पापशंकी (S. 4). 2 मन् 4 A, वि-, तर्क् 10. **-*Suspicion,*** *s.* आ-, शंका, संदेहः, संशयः, विकल्पः, वि-,तर्कः. **-*Suspicious,*** *a.* आ-,शंकिन्, जातशंक, शंका or संशय-शील or बुद्धि, साशंक, संदिग्धचित्त-मति, अविश्वासिन्. 2 आशंक्य, शंकावह, शंकास्थानं-आस्पदं-पात्रं.

Suspend, *v. t.* उद्-,बंध् 9 P, प्र-अव-लंब् c., वि-अव-सञ्ज् c.: विटपविषक्तवल्कलेषु (S. 1) 'the bark-garments s. ed from the branches'; आंदोलयति (D.). 2 व्याक्षिप् 6 P, विलंब् c. 3 (From office) नियतकालं यावत् अधिकारात् निष्कस् c. or प्रच्यु c. or भ्रंश् c. **-ed,** *a.* उद्बद्ध, प्र-अव-लंबित, विषक्त, आंदोलित, &c.: 's. ed in a loop' काचित, शिक्यित; 's. ed from the neck' कंठलंबिन्-लग्न. **-*Suspense,*** *s.* अनिश्चयः, संदेहः, संशयः, विकल्पः, दोलावृत्ति *f.*, द्वैधीभावः; धृतद्वैधीभावकातरं मे मनः (S. 1) 'my mind is held in s. and hence anxious'; 'being in s.' दोलायमान, संशयदोलारूढ, संदेहदोलास्थ. **-*Suspension,*** *s.* उद्बंधनं, अवलंबनं. 2 विलंबनं, व्याक्षेपः. 3 विच्छेदः, निवृत्ति *f.*, निरोधः.

Sustain, *v. t.* भृ 3 U, सं-वृध् c., पा c. (पालयति) &c. 2 सं-,धृ 10, (शोकक्षोभं हृदयं प्रलापैरेव धार्यते U. 3); सं-स्तंभ् 9 P or c.; *See* **Support;** 's. life' प्राणधारणं-प्राणयात्रां-कृ 8 U, जीवितं धृ, प्राणसारं भृ; *See* **Live, Maintain.** 3 प्रवृत् c. 4 प्रति-उप-पद् c., *See* **Prove.** 5 सह् 1 A, अनु-भू 1 P. **-*Sustenance,*** *s.* जीवनं, उपजीविका, वृत्ति *f.*, अन्नं, आहारः; *See* **Maintenance, Living.**

Sutler, *s.* सैन्यानुगामिन्-*a.* वणिज् *m.*

Suture, *s.* संधिः, सीवनं.

Suzerain, *s.* अधीशः, अधीश्वरः.

Swaddle, *v. t.* क्षौमेण परिवृ c. or परि-वेष्ट् c.; 's.-ing clothes' बालपरिवेष्टनं.

Swagger, *v. i.* प्र-,गल्भ् 1 A, विकत्थ् 1 A; *See* **Boast.**

Swain, *s.* ग्रामिकः, असभ्यः, ग्रामीणः. 2 **Agriculturist,** q. v.

Swallow, *v. t.* ग्रस् 1 A, नि-, गॄ 6 P. **-*s.*** ग्रासः, गिलनं. 2 निगरणस्रोतस् *n.*, अन्नमार्गः; 's.-wort' अर्कः, वसु(:सु)कः, आस्फोटः, गणरूपः, विक्षी(क्षि)रणः, मंदारः, अर्कपर्णः.

Swamp, *s.* कच्छभूः, अनूपो देशः, अनूपभूः. -*v. t.* आ-प्लु c.: *See* **Plunge. -y,** *a.* कच्छ, अनूप.

Swan, *s.* मरालः, राजहंसः, श्वेतगरुत् *m.*

Sward, *s.* शाद्वलं, सतृणभूमि *f.*

Swarm, *s.* संघः, समूहः, गणः, वृंदं, कुलं; *See* **Multitude.** -*v. i.* गणशः संनिपत् 1 P or संमिल् 6 P, संघशः गम् 1 P or या 2 P. **-ing,** *a.* (with) व्याप्त, संकुल, आ-सं-कीर्ण, जुष्ट, उपसेवित.

Swarthy, *a.* श्याम, कृष्ण, कृष्णवर्ण.

Swathe, *s.* पट्टः, दीर्घखंडः. -*v. t.* (पट्टेन) वेष्ट् 1 A or c., परिवृ c., परिच्छद् 10.

Sway, *s.* शासनं, आधिपत्यं, ईशत्वं, प्रभुत्वं, वशः-शं, अधीनता. -*v. t.* शास् 2 P. 2 प्रवृत् c., प्र-, नी 1 P. प्रेर् c., प्रयुज् 10, प्रचुद् 10: *See* **Influence, Subject;** 'not s. ed by avarice' अवशो लोभस्य, अनाकृष्टः लोभेन, लोभाप्रेरित, &c. -*v. i.* प्रेंख् 1 P, इतस्ततः चल् 1 P or कंप् 1 A; नम् 1 P, आ-प्र-लंब् 1 A.

Swear, *v. i.* शप् 1, 4 U, शपथं शप्. -*v. t.* शप् c., शपथं ग्रह् c. **-er,** *s.* शपथकृत् *m.* **-ing,** *s.* शपथं, शापः.

Sweat, *v. i.* प्र-,स्विद् 4 P: *See* **Perspire.** 2 परिश्रम् 4 P: तम् 4 P (tire). -*v. t.* स्विद् c. -*s.* स्वेदः, घर्मः, स्वेदजलं. 2 परिश्रमः, आयासः; 'by the s. of thy brow' आत्मनः परिश्रमेण. **-ing, -y,** *a.* सस्वेद, घर्मलिप्त, स्वेदवत्.

Sweep, *v. t.* मृज् 2 P or c., सं-परि-प्र-°; 's. away' अव-अप-मृज्, अपवह् c., (रयेण) अपनी; 's. across', 's. over' जवेन अतिक्रम् 1 U, 4 P or अति-इ 2 P. -*s.* प्रसरः, गोचरः, विषयः; *See* **Range. -er,** *s.* संमार्जकः, खलपूः, बहुकरः. **-ing,** *s.* सं-,मार्जनं-ना, मलापहरणं. **-ings,** *s.* अवकरः, अव(प)स्करः, मलं, संकरः, उच्छिष्टं.

Sweet, *a.* मधुर; मिष्ट, सुरस, स्वादु, मधुमय (यी *f.*), (of taste only). 2 चारु, मंजुल, ललित, कोमल, मनोज्ञ; *See* **Pleasant,** 's. smile' चारु-मधुर-स्मितं; 's. song' चारुगीतं, &c. -*s.* मधु *n.*, मिष्टं, आस्वादः. 2 सुखं, सौख्यं; 's. s of royalty' राज्यसुखानि; 's.-heart' वल्लभ, प्रणयिन्, दयित, कांत, रमण (णी *f.*), प्रियतम; 's.-meat

मिष्टान्नं, मोदकः, वायनं; 's.-smelling' सुगंधि, सुरभि; 's.-speaking, -toned, -voiced' मंजुलस्वन, चारुभाषिन्, प्रियंवद, मधुरवाक्. **-en**, *v. t.* मधुरीकृ 8 U, मिष्टीकृ, स्वादूकृ. —*v. i.* मधुरीभू. **-ly**, *adv.* मधुरं, चारु, मधुर in comp.; 'smiling s.' चारुहासिन्. **-ness**, *s.* माधुर्यं, स्वादुता, &c.

Swell, *v. i.* श्वि 1 P or pass., प्र-उत्-°, स्फाय् 1 A, वृध् 1 A, उत्सृप् 1 P; प्र-उप-चि pass., बहुली-भू 1 P; 'a heart s. ing with joy' हर्षोत्फुल्लं हृदयं; *See* **Increase**. —*v. t.* श्वि c., स्फाय् c. (स्फावयति), धूप् c. (with air), उद्-प्र-आ-ध्मा 1 P; *See* **Puff**. **—s., -ing**, *s.* स्फीति *f.*, वृद्धि *f.*, उपचयः. 2 श्वयथुः; शोथः; शोफः, गंडः. 3 (Of the sea) ऊर्मिप्रलोठनं, संक्षोभः. **-ing**, *a.* शूयमान, उत्सर्पिन्; 'a s. sea' प्रचलदूर्मिमालाकुल. **—Swollen**, *a.* शून, स्फीत, प्रवृद्ध, &c.

Swelter, *v. i.* घर्मेण अभिभू or बाध् pass.

Swerve, *v. i.* प्र-वि-चल् 1 P, भ्रंश् 4 P, 1 A, पराङ्मुखीभू 1 P, च्यु 1 A, व्यति-इ 2 P, व्यतिक्रम् 1 U, 4 P, (with abl.); अतिचर् 1 P, अति-वृत् 1 A (with acc.); *See* **Deviate**; 's. ing from the right path' सन्मार्गभ्रष्ट, &c.

Swift, *a.* जवन, वेगवत्, त्वरित, सत्वर, शीघ्र-द्रुत-लघु-गामिन्, प्र-,जविन्, शीघ्रग, प्रजवन, तरस्विन्, महावेग; 's. of foot' धावने महाजव; 'as s. as the wind' वायुगति, वायुवेग. **-ly**, *adv.* शीघ्रं, जवेन, सवेगं, सत्वरं. **-ness**, *s.* शीघ्रता, वेगः, तरस् *n.*

Swig, Swill, *v.* अतिपानं कृ 8 U.

Swim, *v. t.* तॄ 1 P; प्लु 1 A: 'swam across the sea with their arms' पयः अतारिषुर्भुजैः (Si. xii. 77); 's. ing against the waves' बाहुभ्यां लहरीभिद्रवन्; 'the Earth s. s in blood' रुधिराप्लाविता मही. —*v. t.* तॄ (with acc.), पारं गम् 1 P. **-mer**, *s.* तरण-प्लवन-कृत् *m.* **-ming**, *s.* तरणं, प्लवनं; 's. against the current' प्रतीपतरणं.

Swindle,-er, *See* **Cheat**.

Swine, *s.* शू(सू)करः, वराहः. **-ish**, *a.* सौकर (री *f.*), सूकरशील-वृत्ति.

Swing, *s.* दोला-ली, प्रेंखा, प्रेंखोलनं, हिंदोलः; काचः, शिक्यं (with a loop). 2 दोलनं, प्रेंखणं. 3 रयः, वेगः, गति *f.* —*v. t.* प्रेंख् 1 P, दोलायते (D.), इतस्ततः सं-वि-चल् 1 P. —*v. t.* प्रेंख् c., आंदोलयति-प्रेंखोलयति (D.), इतस्ततः सं-वि-चल् c. **-ing**, *a.* प्रेंखत्, दोलायमान; काचित, शिक्यित.

Swinge, *v. t.* बलवत् तड् 10, प्रतुद् 6 P, पक्षं ग्रह् 1 P.

Swirl, *v. i.* घूर्ण् 6 P, 1 A, भ्रम् 1, 4 P.

Swish *v. t.* वेत्रेण तड् 10 or हन् 2 P or प्र-हृ 1 P.

Switch, *s.* पिंजा; पल्लवः.

Swoon, *v. i.* मुह् 4 P, प्र-वि-ध्या-°, मुर्च्छ् 1 P. **—s.** मूर्च्छा, मोहः; 'he fell in a s.' मोहपरायणो बभूव, मूर्च्छापन्नः. **-ing**, *a.* मूढ, मुग्ध, मूर्च्छापन्न, मोहवश.

Swoop, *s.* अवपातः, सहसाक्रमणं-आपतनं. —*v. i.* सहसा अवपत्य ग्रह् 9 U or आक्रम् 1 U, 4 P.

Sword, *s.* असिः, खड्गः, निस्त्रिंशः. कृपाणः, करवा(पा)लः, चंद्रहासः, रिष्टिः, मंडलाग्रः, कौक्षेयकः; 's.-belt' खड्गबंधनं; 's.-stick' कूटासिः; 's.-man' खड्गिन्, खड्गधरः, आसिकः.

Syce, *s.* अश्वबंधः-पालः.

Sycophant, *s.* चाटुकारः-पटुः, अतिलालनपरः, अत्यनुरोधिन् *m.* **—Sycophancy**, *s.* चाटूक्ति *f.*, चाटुकारित्वं; *See* **Flatter,-y**.

Syllable, *s.* अक्षरं; 'of one s.' एकाच्, एकाक्षर; 'of many s. s' अनेकाच्, बह्वक्षर.

Syllabus, *s.* सारः, संक्षेपः, सारांशः.

Syllogism, *s.* न्यायः. **—Syllogistic**, *a.* न्यायसंगत, न्याय्य, न्याय in comp.

Sylph, *s.* तन्वंगी, तनुगात्री. 2 विद्याधरी, दिव्यांगना.

Sylvan, वन्य, आरण्यक.

Symbol, *s.* चिह्नं, लक्षणं, लिंगं, संज्ञा, प्रतिरूपं. **-ic**, *a.* लाक्षणिक-सांकेतिक (की *f.*), संकेतरूप.

Symmetry, *s.* सौष्ठवं, चतुरस्रता, यथाप्रमाणता, अंगसंयोगः, अवयवसंगति *f.* **-ical** *a.* सम, चतुरस्र, सम-यथा-स-प्रमाण, संगतावयव.

Sympathy, *s.* सहानुभवः, संवेदनं, अनुकंपा, समदुःखता, समदुःखिता; समसुखिता. oft. by समदुःख-सुख; 'the birds even screamed as if out of s.' विहगाः समदुःखा इव चुक्रुशुः (R. viii. 39). 2 स्वभाव-प्रकृति-साम्यं, आनुगुण्यं, साधर्म्यं आनुरूप्यं. **-etic**, *a.* समदुःख-दुःखिन्, सदय, स्निग्ध, सहदुःखिन्,-सुखिन्. **-ize**, *v. i.* सह-सम-दुःखिन्-*a.* भू &c.: *See* (*s.*); 'I s. with you in your distress' त्वद्दुःखदुःखितोऽहं; त्वत्समदुःखभागहं; 'many s. with us in our success' बहवः अस्मदभ्युदयेन सुखभाजो भवंति-मोदंते-प्रीयंते &c.

Symphony, *s.* एकतानता, स्वरैक्यं, साम्यं; *See* **Harmony**. **-ious**, *a.* सम or संगत-स्वर or तान.

Symposium, *s.* सह-पान-भोजनं.

Symptom, *s.* लिंगं, लक्षणं; *See* **Indication.** **-atic,** *a.* सूचक, बोधक.

Synagogue, *s.* समाजः, सभागृहं.

Synchronous, *a.* एक-सम-कालीन. **-Synchronism,** *s.* यौगपद्य, समकालीनता. **-Synchronize,** *v. i.* युगपत्-एककाले-वृत् 1 A or भू 1 P or जन् 4 A.

Syncope, *s.* मूर्छा.

Syndicate, *s.* सभा, संसद् *f.*, सदस् *f. n.*

Synod, *s.* समाजः, सभा, परिषद् *f.* **-ic,** *a.* चंद्र in comp.; (चंद्रमासः).

Synonym, *s.* पर्यायः, तुल्यार्थशब्दः, पर्यायशब्दः. **-ous,** *a.* समानार्थ, तुल्य-एक-अर्थ, सहार्थ.

Synopsis, *s.* सारसंग्रहः-पत्रकं. **-Synoptical,** *s.* सारभूत.

Syntax, *s.* कारकप्रक्रिया, वाक्यरचनाविचारः.

Synthesis, *s.* संयोगः, संकलनं. **-Synthetical,** *a.* सांयोगिक (की *f.*); संयोग in comp.; संयोगात्मक.

Syphilis, *s.* उपदंशः.

Syringe, *s.* शृंगं-गकं, वस्ति *m. f.*

Syrup, *s.* मधुरं, मधु *n.*, लेह्यं.

System, *s.* पद्धति *f.*, रीति *f.*, सरणि-णी *f.*, क्रमः, पर्यायः; *See* **Manner.** **2** कल्पना, प्रयोगः. **3** शाखा. **4** (Of the body) कायव्यूहः. **5** (Of philosophy) दर्शनं; 'the solar s.' सौरं जगत्. **-atic,** *a.* अनुज्झितक्रम, यथापद्धति, यथाक्रम, क्रमानुगत. **-atically,** *adv.* यथाक्रमं, यथापद्धति. **-atize,** *v. t.* व्यव-स्था c. (स्थापयति), यथाक्रमं रच् 10 or विन्यस् 4 U; *See* **Method, -ize,** &c.

Systole, *s.* हृत्संकोचः.

T.

Tabard, *s.* तनुत्रावारः.

Tabasheer, *s. See Manna.*

Tabby, *a.* चित्र, शबल, कर्बुरित.

Tabernacle, *s.* पटवेश्मन् *n.*, पटमंडपः, दूष्यं; (fig.) अचिरस्थायी आवासः.

Tabes, *s.* क्षयः, क्षयथुः.

Tablature, *s. See* **Picture.**

Table, *s.* फलकः-कं, आधारः, मंचः; 't. for writing' लेखनाधारः, लिपिसज्जाधारः. **2** पत्रं. **3** (Of metal &c.), पत्रं, फलकं; 'sitting at the same t.' सहभोजिन्, पांक्तेयः; 't. of contents' सूची-चि-पट-पत्रं, सूचि-ची *f.*, अनुक्रमणिका; 't. of numbers' अंकपत्रं-जालं; 'be at ' भुज् 7 A; 'to keep good t.' भोजनविशेषान् उपकल्प् c.; 't.-land' अधित्यका, ऊर्ध्वभूमि *f.*, मालं क्षेत्रं, सानु *m. n.*, प्रस्थः; 't.-talk' विश्रंभालापः-कथा. **-Tablet,** *s.* पट्टिका, पट्टः, फलकः, पत्रं; 'on the t. of your heart' हृत्पट्टिकायां. **-Tabular,** *a.* पत्राकार

Taboo, *See* **Interdict.**

Tabor, *s.* मुरजः, मृदंगः.

Tacit, *a.* तूष्णीं दत्त, मानस (सी *f.*); 't. consent' मानसाज्ञा; 't. obedience' निर्विकल्प-निर्विवाद-आज्ञापालनं. **-ly,** *adv.* तूष्णीं, जोषं, मूकभावेन, मनसा; निर्विकल्पं.

Taciturn, *a.* संवृतिमत्, मौनिन्, अनालापशील, तूष्णीक, तूष्णींशील, भाषणविरक्त, मितवाक्-कथ. **-ity,** *s.* संवृति *f.*, मौनं, मूकभावः, अनालापः, मितवाक्, कथाविरक्ति *f.*, वाग्यमः.

Tack, *v. t.* आ-बंध् 9 P, वि-आ-नह् 4 P. **2** (a vessel) नौमार्गं परि-व्या-वृत् c. **-***s.* कीलकः, गुणः. **-ing,** *s.* नौमार्गपरिवृत्ति *f.*

Tackle, *s.* (नौ-)सज्जा, रज्ज्वादिसामग्री. **-***v. t.* सज्जीकृ 8 U, संनह् c. **-ing,** *s. See* (*s.*) above.

Tact, *s.* कौशलं, नैपुण्यं, वैदग्ध्यं, युक्ति *f.*, चातुर्यं; *See* **Skill.** **-Tactics,** *s.* युक्तिकौशलं; (of war) बलविन्यासकौशलं, व्यूहरचनाविद्या. **-Tactician,** *s.* युक्तिकुशलः, व्यूहपंडितः.

Tactile, *s. See* **Tangible.**

Tadpole, *s.* भेकशिशुः-शावकः.

Tag, *s.* अग्रं.

Tail, *s.* लांगू(गु)लं, पुच्छः-च्छं, लूमं; वालहस्तः, वालधिः (bushy end). **-ed,** *a.* पुच्छिन्, लांगूलयुक्त.

Tailor, *s.* सौचिकः, तुन्नवायः, सूचिकः; 't.'s work' सूच्या सेवनं, सूचिकर्मन् *n.*

Taint, *v. t.* दुष् c. (दूषयति), लिप् 6 P, कलंकयति (D.). **-***s.* दूषणं, कलंकः, दोषः; *See* **Stain.**

Take, *v. t.* ग्रह् 9 U, प्रति-परि-° (in all senses) अगृहीते राक्षसे (Mu. 1); उपदेशं गृहाण &c ; आ-दा 3 A प्रति-इष् 6 P; स्वी-अंगी-कृ 8 U. **2** धृ 1 P, 10, आ-अव-लंब् 1 A. **3** (A word in a sense) परि-, ग्रह; तत्राथशब्द आनंतर्यार्थः परिगृह्यते (S. B. 23) 'is taken in the sense of' &c. **4** नी 1 P, वह् 1 P, हृ 1 P. **5** उपलभ् 1 A, अवगम् 1 P **6** अनुभू 1 P; *See* **Suffer, Affect.** **7** लभ्, प्राप् 5 P, अधिगम्, आ-सद् c.; *See* **Get.** **8** **Captivate,** q.v.; 't. food' आहारं सेव् 1 A; 't. the field' रणभूमिं अवतॄ 1 P, रणांगणे युध् 4 A; 't. rest' विश्रम् 4 P; 't. root' मूलं बंध् 9 P; 't. heart' समाश्वस् 2 P, धैर्यं अवलंब्-अवष्टंभ् 9 P; *See* **Courage;** 't. fire' दह् pass., अग्निं उप-इ

2 P; ' t. in hand' प्रतिपद् 4 A, उ(ऊ)रीकृ ' t. place '; *See* **Happen**; ' t. part in ' हस्तं धा 3 U, संगिन्-सहकारिन्-सहाय-*a.* भू; ' took part in the massacre ' विशसने सहायो बभूव; ' t. aim ' सं-धा 3 U; ' t. one's way ' सिध्-साध् c. (साधयति), साधयामो वयं (.1); ' t. effect ' फल् 1 P, सफलीभू 1 P; ' t. possession of ' आक्रम् 1 U, 4 P, आविश् 6 P; ' t. to task' निर्भर्त्स् 10 A, परुषं निगद् 1 P. **–***v. i.* सिध् 4 P, संपद् 4 A, गुणं आवह्. 2 आश्रि 1 U, व्रज् 1 P. **–away,** अप-वि-नी 1 P, अप-, हृ 1 P, अप-ऊह् 1 U, विसृज् c.; *See* **Remove. –back,** सं-प्रतिसं-हृ, प्रत्या-दा, प्रत्यानी. **–down,** अवरुह् c., नि-अव-पत् c., अधो नी. 2 लिख् 6 P. **–for,** मन् 4 A; *See* **Consider;** ' mischievousness is t.en for assiduity ' चापल्यमुद्योगिता मन्यते. **–in,** ग्रह्, सेव्; (in the stomach) ग्रस् 1 A: नि-,गॄ 6 P. 2 विप्र-लभ् 1 A; *See* **Cheat. –off,** अपनी, अवहृ c., उन्मुच् 6 P, अवकृष्. **–out,** बहिर्नी, अपनी. **–to,** सेव्, आश्रि, अवलंब्. **–up,** प्रतिपद्, अंगी-स्वी-कृ. 2 आरभ् 1 A, प्रवृत् c. 3 **Occupy, Engross,** q. v. **–upon,** (oneself) अंगीकृ, प्रति-पद्, उ(ऊ) रीकृ; (निर्वाहः प्रतिपन्नवस्तुषु Mu. 2). **–er,** *s.* ग्रहीतृ *m.*, ग्राहिन्-हारिन्-हृत् in comp. **–ing,** *a.* मोहिन्, मनोहारिन्, चित्ताकर्षिन्, मनोज्ञ; *See* **Charming.** 2 ग्राहिन्, &c. **–***s.* आदानं, ग्रहणं, स्वीकारः.

Tale, *s.* कथा, उप-,आख्यानं, आख्यायिका. 2 परि-,गणना, संख्यानं; ' t.-bearer ' सूचकः, कर्णेजपः; ' t.-bearing ' पैशुन्यं, उपजापः.

Talent, *s.* मति *f.*, बुद्धि *f*, धीशक्ति *f.* प्रज्ञा, बुद्धि or मति-प्रभावः or विभवः, बुद्धिकौशलं. 2 गुणः. **–ed,** *a.* धीमत्, प्रज्ञ, सुधी, गुणिन्, गुणवत्.

Talisman, *s.* कवचः-चं, माया, रक्षाकरंडकः.

Talk, *v. i.* आ-सं-लप् 1 P, सं-,भाष् 1 A, संवद् 1 P, संमंत्र् 10 A; *See* **Converse. –***s.* आलापः, संवादः, सं-,कथा, सं-,भाषणं, कथाप्रसंगः. 2 किंवदंती, प्रवादः; *See* **Report;** ' idle t. ' प्र-,जल्पितं, प्रलापः; ' popular t. ' जनप्रवादः; 'fine t.' शाब्दपांडित्यं; ' mere t. ' वाङ्मात्रं. **–ative,** *a.* बहुभाषिन्, जल्पनशील, जल्प(ल्पा)क, वावदूक. **–ativeness,** *s.* वावदूकता, जल्पकता, बहुभाषित्वं. **–er,** *s.* कथकः, वक्तृ *m.*, आलापिन् *m.*

Tall, *a.* उच्च, तुंग, उन्नत, उच्छ्रित, प्रांशु; ' t. in stature ' उच्च or दीर्घ-देह or मूर्ति; 't.person' प्रांशुः. **–ness,** *s.* उच्चता, उत्तुंगत्वं, उन्नति *f*, उच्छ्रायः; ' t. of stature ' देहदीर्घता-उच्चता.

Tallow, *s.* (मेदादीनां) वसा, वपा; ' t.-chandler ' वसाविक्रयिन् *m.*

Tally, *v. i.* सं-वद् 1 P, तुल्य-अनुरूप-अनुगुण-*a.* भू 1 P; 't.-ing of hands ' अक्षरसंवादः. **–***s.* *Match,* q. v.

Talon, *s.* नखः-खं, नखरः-रं.

Tamarind, *s.* चिंचा, तिंतिडी-डिका, अम्लिका, आम्लि(म्ली)का.

Tamarix, *s.* पिचुलः, भाबुकः.

Tambour, –ine, *s.* *See* **Drum** (1).

Tame, *v. t.* वि-नी 1 P, दम् c. (दमयति), निग्रह् 9 P, वशीकृ 8 U; (fury) शम् c. (शमयति). **–***a.* विनीत, दांत, वशग, अधीन. 2 ग्राम्य, गृहपुष्ट, गृह्य-गृह-ग्राम-in comp; 't. dove' गृहकपोतः; 't. hog' ग्राम्यशूकरः, विड्वरः. 3 निस्तेजस्, नष्टवीर्य; नीरस, निःसत्त्व; *See* **Spiritless. –ed,** *a.* दांत, शांतक्रौर्य, विनीत. **–er,** *s.* विनेतृ *m.*, दमयिता. **–ing,** *s.* दमनं. **–ly,** *adv.* नष्टवीर्यवत्, कापुरुषवत्, क्लीबवत्. **–ness,** *s.* वशता, गृह्यता, &c.

Tamper, (with) *v. i.* *Meddle,* q. v. 2 (Witness &c.) कपटेन-छलेन-वशीकृ 8 U; दुष् c. (दूषयति), अन्यथा कृ, विकृ.

Tan, *v. t.* श्यामीकृ 8 U, सं-धा 3 U, शुध् c.; परिष्कृ c. **–ner,** *s.* चर्मकारः, चर्मशोधनकृत् *m.*

Tangent, *s.* स्पर्शः, स्पर्शरेखा.

Tangible, *a.* स्पर्शनीय, स्पृश्य. 2 स्पर्शवेद्य, प्रकट, सुस्पष्ट, विभाव्यमान.

Tangle, *v.* **Entangle,** q. v. **–ed,** *a.* जटिल, संमिश्र, संकुल, संकीर्ण.

Tank, *s.* तडागः-गं, जलाशयः, कासारः, वापी, दीर्घिका (large t.); *See* **Pond.**

Tankard, *s.* चषकः.

Tantalize, *v. t.* आशां-तृष्णां-वृध् c., आशां वर्धयित्वा विप्रलभ् 1 A, जाताशाः खंड् 10 or भंज् 7 P. 2 (general) **Cheat,** q. v.

Tantamount, *a.* सम, तुल्य, समार्थक, तुल्यार्थक.

Tantrum, *s.* निष्कारण वैरभावः or दुःशीलं.

Tap, *v. t.* लघु आ-अभि-हन् 2 U or प्र-हृ 1 P. 2 छिद्रयति (D.), छिद्रं कृ 8 U. **–***s.* मृदु-लघु-चपेटः, लघ्वाघातः-प्रहारः.

Tape, *s.* दीर्घपट्टः-बंधनी.

Taper, *s.* दीपिका, क्षुद्रदीपः.

Tapering, *a.* वृत्तानुपूर्व (K. I. 35): गोपुच्छाकार,शुंडाकृति.

Tapestry, *s.* चित्रयवनिका.

Tapeworm, *s.* कृमिः, अंत्रकीटः.

Tapis, *s.* *See* **Tapestry.**

Tar, *s.* अ-,रालः, सर्जरसः; *See* **Pitch.**

Tardy, *a.* चिरक्रिय, दीर्घसूत्रिन्, मंद; *See* **Slow.**

Target, *s.* क्षुद्रचर्मन् *n.* 2 शरव्यं, लक्ष्यं-क्षं. **-eer,** *s.* चर्मधरः.

Tariff, *s.* (पण्य-) शुल्कपत्रिका.

Tarnish, *v. t.* दुष् c. (दूषयति). कलंकयति (D.); *See* **Stain.** -*v.* i. मलिनीभू 1 P, दुष् 4 P.

Tarpaulin, *s.* सर्जरसलिप्तं शाणं.

Tarry, *v. i.* विलंब् 1 A, चिरं(रा)यति (D.); अव-स्था 1 A.

Tart, *a.* अम्ल, शुक्त. -*s.* अम्लीष.

Tartar, *s.* दंतशर्करा, मलं, पिप्पिका.

Task, *s.* कार्यं, नियुक्तं कर्म, कर्तव्यं, कार्यभा-(भ)रः, व्रतं; 'one who does a t. imposed' व्रातीनः; 'to take to t.' अधिक्षिप् 6 P, निर्भर्त्स् 10 A; *See* **Reproach.** -*v. t.* कार्यभारं न्यस् 4 U, गुरुकार्ये नियुज् 7 A, 10.

Tassel, *s.* कौशेयसूत्रगुच्छः.

Taste, *v. t.* आ-,स्वाद् 1 A or c., रस् 10, प्राश् 9 P, लिह् 2 U. -*v. i.* Oft. by (*s.*). -*s.* आ-,स्वादः, रसः. 2 आ-,स्वादनं, रसनं. 3 (Sense of t.) रसनं, रसनेंद्रियं, रुचि *f.* 4 अभि-,रुचिः, प्रवृत्ति *f.*, शीलं, व्यसनं; 't. s differ', 'different men have different t. s' भिन्नरुचिर्हि लोकः; 'he was not to her t.' स न तस्या रुचये बभूव (R. vi. 44); 'of like t. s' समानशील. 5 रसज्ञता, रसिकता; 'devoid of t.' अरसिक, अरसज्ञ. **-er,** *s.* आस्वादकः. **-y, -ful,** *a.* रुचिकर (रि *f.*), स्वादु, मिष्ट, सरस, सुरस, रुच्य. 2 हृद्य, मनोहर, हृदयग्राहिन्. **-fully,** *adv.* सकौशलं; रसज्ञतया, यथारुचि. **-less,** *a.* नीरस, विरस, रसहीन.

Tatter, *s.* चीरं, चीरचीवरं, नक्तकः, कर्पटः; *See* **Rag.** **-ed,** *a.* जीर्ण, जर्जरित.

Tattle,-er, *See* **Babble,-er.**

Tattoo, *v. t.* रञ्ज् c. -*s.* पटहप्रणादः.

Taunt, *v. t.* आ-अधि-क्षिप् 6 P, निंद् 1 P, उपालभ् 1 A; *See* **Censure.** 2 सोल्लुंठनं-सोत्प्रासेन-वद् 1 P; 'enough of t. ing' अलमलमुपालभ्य. -*s.* आ-अधि-क्षेपः, उपालंभः, सोल्लुंठनोक्ति *f.* **-ing,** *a.* साक्षेप, सोपालंभ, आक्षेपगर्भ; *See* **Sarcastic.**

Taurus, *s.* वृषभः,-राशिः.

Taut, *a.* दृढं आतत.

Tautology, *s.* पुनरुक्ति *f.* पुनरुक्तत्वं, पौनरुक्त्यं. **-ous,** *a.* पुनरुक्त, पुनरुक्तभूत.

Tavern, *s.* गंजा, शुंडापानं, शुंडा; पथिकाश्रमः; 't. keeper' शौंडिकः.

Tawdry, *a.* बहिरुज्ज्वल, बाह्यशोभन, मिथ्याशोभायुक्त.

Tawny, *a.* पिंग, पिंगल, पिशंग (गी *f.*), कपिल, कडार, कद्रु.

Tax, *s.* करः, बलिः; शुल्कः-ल्कं, राजस्वं. 2 भारः. -*v. t.* करं न्यस् 4 P (with loc.) or दा c. (दापयति) or ग्रह् 9 U (with abl.). 2 आयस् c., अत्यंतं पीड् 10. 3 निंद् 1 P, दोषं ग्रह् 9 U; *See* **Censure.** **-able,** *a.* करार्ह, शुल्क-कर-अधीन. **-ation,** *s.* करग्रहणं-आधानं, शुल्कसंस्थापनं.

Teach, *v. t.* अधि-इ c. (अध्यापयति), शिक्ष् c., पठ् c., उपदिश् 6 P, शास् 2 P. **-er,** *s.* अध्यापकः, शिक्षकः, गुरुः, उपदेष्टृ *m.*, शास्तृ *m.*; 'religious t.' उपाध्यायः, आचार्यः. **-ing,** *s.* अध्यापनं, शिक्षा-क्षणं, उपदेशः.

Teak, *s.* अर्णः; 't.-wood' अर्णं, अर्णकाष्ठं.

Team, *s.* युग्मं or by pl.

Tear, *s.* अश्रु-स्रु *n.*, बाष्पः, अस्रं, नेत्रांबु *n.* -जलं-उदकं, नयनवारि, and sim. comp.; 'with t. s in eyes' सबाष्पं, सास्रं, बाष्पाकुलनयन-*a.*; 'starting of t. s' बाष्पोद्गमः, उद्बाष्पत्वं; 'flood of t. s' धाराश्रु, अश्रुधारा; 'having the eyes filled with t. s' बाष्पाकुल, अश्रुनयन, सास्र, अश्रुमुख, अश्रुपरिप्लुतेक्षण, पर्यश्रु. **-ful,** *a.* सबाष्प, साश्रु अश्रु-संकुल-पूर्ण-परिप्लुत. **-fully,** *adv.* सास्रं, सबाष्पं, साश्रु.

Tear, *s.* छिद्रं, विदरः, भिदा; *See* **Rent.** -*v. t.* वि-,दॄ 9 P or c., वि-,शॄ 9 P, विदल् c., भिद्-निर्भिद्- 7 P; 'she tore her hair for grief' विललाप विकीर्णमूर्धजा (K. iv. 4); 't. to pieces' शकलीकृ, चूर्ण् 10. **-down,** अवकृष् 1 P, निकृष्. **-off,** आच्छिद् 7 P, अपनी 1 P, व्यपरुह् 1 P, निर्हृ 1 P; 't. off the hair' केशान् उल्लुंच् 1 P; *See* **Pull** also; 'I am unable to t. myself off from the cane-bower' निर्गंतुं सहसा न वेतसगृहाच्छक्तोस्मि (S. 3). **-up,** उन्मूल् 10, उत्-वि-पट् 10, उद्-धृ 1 P, उच्छिद्, उत्खन्, व्यपरुह् c. -*v. i.* विदॄ-विभिद्-pass. 2 सवेगं चल् 1 P. **-ing,** *s.* वि-,दारणं, विभेदनं, पाटनं, &c.

Tease, *v. t.* दु 5 P, क्षुभ् c., अर्द् 1 P or c., बाध् 1 A, पीड् 10; *See* **Injure.**

Teat, *s.* वृंतं. 2 चूचुकं, स्तनाग्रं.

Technical, *a.* पारिभाषिक-सांकेतिक-(की *f.*). **-ity,** *s.* पारिभाषिकशब्दः, परिभाषा. 2 पारिभाषिकत्वं. **-ly,** *adv.* परिभाषानुसारेण.

Technology, *s.* परिभाषा. 2 शिल्प-कला-विज्ञानं; 'school for t.' शिल्पशाला.

Tedious, *a.* अतिदीर्घ, दीर्घसूत्र, दीर्घतर; 'passes the night grown t. by sorrow' गमयति रजनीं विषाददीर्घतरां (S. 4). 2

श्रमावह, क्लांति-खेद-कर (री *f.*). 3 मंद, मंथर, दीर्घसूत्रिन् चिरक्रिय. **-ly,** *adv.* अति-सु-दीर्घं. **-ness,** *s.* अतिदैर्घ्यं, श्रमावहता; दीर्घता ex. by (*a.*).

Teem, *v. i.* **Abound,** q. v. **2** बाहुल्येन उत्पद् c. or प्र-सू 2, 4 A. **-ing,** *a.* परिपूर्ण, पूर्णगर्भ, आढ्य, समाकुल. आकीर्ण, प्रचुर; *See* **Abundant.**

Teetotal, *a.* मद्यनिवृत्तिविषयक. **-(l) er,** *s.* मद्यात् निवृत्तः, निवृत्तमद्यः.

Tegument, *s.* आवेष्टनं, आवरणं, कवचः-चं, पुटः-टं.

Telegram, *s.* विद्युत्प्रेरितवार्ता, विद्युत्संदेशः-वार्ता. **-Telegraph,** *s.* विद्युद्यंत्रं विद्युद्वार्तावहः.

Teleology, *s.* मीमांसा, हेतुविद्या

Telephone, *s.* दूरभाषणयंत्रं.

Telescope, *s.* दूरदर्शनयंत्रं.

Tell, *v.t.* कथ् 10. आचक्ष् 2 A, शंस् 1 P, आ-नि-विद् c., आ-,ख्या 2 P or c. (ख्यापयति) (with dat.); वर्ण् 10, कीर्त् 10, श्रु c., नि-,गद् 1 P, व्या-उदा-हृ 1 P, अभि-धा 3 U, निरूप् 10: *See* **Say** also. **2** गण् 10, सं-परिसं-ख्या; 't. beads' जप् 1 P. **-***v. i.* सिध् 4 P, सफलीभू 1 P, गुणं-कार्यं-कृ, यशः-सिद्धिं-दा 3 U. **2** (upon) गुणं-कार्यं-जन् c. or उत्पद् c.; अवसद् c; अप-चि 5 U, क्षि 5 P or c. **2** दुर्बलीकृ; *See* **Impair;** 't.-tale' सूचकः, पिशुनः, कर्णेजपः. **-er,** *s.* कथकः, आख्यायकः. **-ing,** *s.* कथनं, शंसनं &c.

Temerity, *s.* साहसं, क्षिप्रकारिता, असमीक्ष्य-अविमृश्य-कारिता; *See* **Rashness.**

Temper, *v. t.* संमिश्र् 10, संयुज् 10, संसृज् 6 P. **2** मृदूकृ 8 U, स्निग्धीकृ, प्र-,शम् c. (शमयति), लघूकृ, लघयति (D.), नियम् 1 P; *See* **Moderate.** **-***s.* शीलं, प्रकृति *f.*, स्व-,भावः; 'good t.' सुशीलं, सद्भावः, सौजन्यं; *See* under ' **Good. 2** समता, अक्षोभः, असंभ्रमः, संयमः, रोषाभावः, चित्त-स्वास्थ्यं,-समता; 'to lose t.' क्षुभ् 4 P, कुप्-क्रुध् 4 P. **3 Anger,** q. v. **-Temperament,** *s.* प्रकृतिः, स्वभावः, देह or शरीर-प्रकृतिः or स्वभावः; 'of a choleric t.' पित्त-प्रकृति. **-Temperate,** *a.* परि-,मित, समर्याद, नियत. **2** प्र-,शांत, अक्षुब्ध, धीर, अकोपन, अचंड. **3** संयत, संयमिन्, संयतवृत्ति, संयमशील; 't. in eating' मिताहार, अल्पाहार, मिताशिन्, संयताहार; 't. in drinking' &c.; *See* **Moderate. 4** समशीतोष्ण, मंदोष्ण. **-ly,** *adv.* धीरं, शांत्या, अक्षोभेण, निरुद्वेगं, शांतचेतसा. **-Temperance,** *s.* संयमः, निग्रहः, परिमितता, नियमः, नियतत्वं, मिताहारः, मिताशनं, मितपानं, पानाप्रसक्ति *f* , &c.

Temperature, *s.* उष्ण-घर्म-परिमाण.

Tempest,-ous, *See* **Storm,-y.**

Temple, *s.* देवालयः, देवतायतनं-निकेतनं, सिद्धायतनं, देवगृहं-भवनं-मंदिरं; and sim. comp.; मठः, विहारः (Jaina t.); 'endowment of a t.' देवस्वं. **2** कुंभः, कपोलः, शंखः.

Temporal, *a.* ऐहिक-सांसारिक-ऐहलौकिक-प्रापंचिक-लौकिक- (की *f.*).

Temporary, *a.* अचिरस्थायिन्, अचिर-अल्प-कालिक (की *f.*), अशाश्वत (ती *f.*), असनातन (नी *f.*), अचिर, अनित्य, क्षणिक. **-ily,** *adv.* स्वल्पकालं, अचिरं, अशाश्वतं.

Temporize, *v. i.* यथाकालं-यथासमयं-व्यवहृ 1 P; छंदोऽनुवृत् 1 A **-ing,** *a.* समयानुवर्तिन्, कालानुरोधिन्.

Tempt, *v. t.* प्र-वि-लुभ् c., वि-आ-कृष् 1 P, वि-,मुह् c.; *See* **Allure. 2** परीक्ष् 1 A. **-ation,** *s.* प्र-वि-लोभनं, आकर्षणं, विकारहेतुः; विकारहेतौ सति विक्रियंते येषां न चेतांसि त एव धीराः (K. 1. 59) 'there being t. s &c.'; 'liable to t. s' प्रलोभनास्पदं. **-er,** *s.* प्र-वि-लोभकः मोहकः. **-ing,** *s.* आकर्षिन्, वि-,मोहिन्, प्रलोभिन्.

Ten, *a.* दशन्; 'in t. ways' दशधा; 't. times' दशकृत्वः. **-th,** *a.* दशम (मी *f.*).

Tenable, *a.* रक्षणीय, प्रतिपादनीय.

Tenacious, *a.* ग्राहिन्, संलग्नशील. **2** धारणावत्; *See* **Retentive. 3** साग्रह, प्रतिनिविष्ट, आग्रहिन्; दृढसंकल्प, स्वमताग्रहिन्; *See* **Obstinate. 4** श्यान, सांद्र, चिक्कण. **-ness,-Tenacity,** *s.* ग्राहकत्वं, धारणाशक्ति *f.* **2** ग्राहः, (एको ग्राहस्तु मीनानां), आ-,ग्रहः, अभिनिवेशः, दृढता, श्यानता.

Tenant, *s.* भूम्यधिवासिन् *m.*; (in general) गृहनिवासिन्. **-***v. t.* परभूमिं अधिवस् 1 P or अधि-ष्ठा 1 P.

Tend, *v. i.* प्रवणी-भू 1 P, प्रवृत् 1 A, प्रवह् 1 P, उद्दिश् 6 P, अभिसं-धा 3 U; oft. by आलु, शील in comp.; 't. ing to fall' पतयालु, पतनशील, पिपतिषु; 't. ing to the same object' तदुद्दिष्ट; 't.s to the centre' केंद्राभिमुखीभवति. **2** (to) आवह् 1 P; क्लृप् 1 A, संपद् 4 A (with dat.), (निष्पन्नप्रायमपि प्रभुप्रयोजनं न मे धृतिमावहति Rat. 1); कल्पते रक्षणाय &c.; oft. by dat. with or without भू; *See* **Lead.** **-***v. t.* चर् c., पा c. (पालयति), रक्ष् 1 P (of cattle only). **-ency,** *s.* प्रवृत्ति *f.*, प्रवणता, प्रावण्यं, स्वभावः, शीलता-आलुता in comp.

Tender, *a.* सुकुमार, कोमल, मृदु, पेलव; *See* **Delicate, Soft. 2** सुलभवेदन-दुःख, दुःखज्ञ, मृदु. **3** बाल, कौमार (री *f.*). **4** सदय, करुणार्द्र, करुण, स्निग्ध, दयालु, 't.-

hearted करुणात्मक, कोमल-मृदु-चित्त, क्लिन्नहृदय, दयार्द्रचित्त -*v. t.* उपानी 1 P, उपहृ 1 P. 2 उपक्षिप् 6 P, उपन्यस् 4 U. -*s.* उपन्यासः, प्रस्तावः. **-ly,** *adv.* सकरुणं, सदयं, सानुकंपं, सादरं, करुणार्द्रदृष्ट्या. **-ness,** मार्दवं, कोमलता, स्निग्धता, कारुण्यं, दयालुता, वात्सल्यं, &c.

Tendon, *s.* शि(सि)रा; स्नायु *f.*, स्नसा. **-Tendinous,** *a.* शिराल; स्नायुमय (यी *f.*)

Tendril, *s.* तंतुः; (of creepers) प्रतानं, किसलयः-यं; *See* **Shoot.**

Tenement, *s.* भवनं, आयतनं; 'earthly t.' देहः. 2 स्थावरं.

Tenet, *s.* मतं, अभिप्रायः.

Tenour, *s.* भावः, भावार्थः, अभिप्रायः, तात्पर्यं. 2 क्रमः, अन्वयः.

Tense, *s.* कालः. -*a.* आतत. **-ion,** *s.* आततिः *f.*

Tent, *s.* वस्त्र-पट-वेश्मन् *n.*, दूष्यं-ष्यं, पटमंडपः-गृहं; 'royal t.' उपकार्या, उपकारिका; 'pitch a t.' दूष्यं रच् 10 or उप-क्लृप् c.

Tentative, *a.* परीक्षार्थं कृत, तत्कालोपयुक्त.

Tenuous, *a.* *See* **Thin. -Tenuity,** *s.* *See* **Thinness.**

Tepid, *a.* कोष्ण, कवोष्ण, ईषदुष्ण, मंदोष्ण.

Tercentenary, *a.* त्रिशतवर्षावर्तिन् -*s.* त्रिशतसांवत्सरिको विधिः.

Tergiversation, *s.* वाक्छलं, अपलापः; *See* **Prevarication.**

Term, *s.* पर्यंतः, अंतः. 2 मर्यादा, अवधिः, सीमा; 'the utmost t.' परमावधिः; 't. of life' आयुर्मर्यादा, आयुःसीमा; 'the t. of life is small' स्वल्पं आयुः. 3 कार्यनिर्वाहसमयः-कालः. 4 पदं, शब्दः, संज्ञा. 5 व्यवहारः, वृत्ति *f.*, भावः; 'on friendly t.s' मित्रभावेन, सद्भावेन, प्रीत्या, सुखेन; 'ill t.s' अप्रीति *f.*, विरोधः, असंतोषः. 6 (Math.) पदं. 7 अवयवः (of a syllogism). 8 (T. s) समयः, संकेतः, संविद् *f.*, प्रतिज्ञा. -*v. t.* आ-ख्या 2 P, अभि-धा 3 U. आह्वे 1 P; *See* **Call, Name. -less,** *a.* निरवधि, अनंत. **-inable,** *a.* अंत्य, सीमा in comp. **-inal,** *a.* अंत्य, अंतिम. **-inus,** *s.* अंतः, सीमन् *f.* **-Terminate,** *v. t* अव-सो 4 P, समाप् c. -*v. i.* समाप् pass. **-ion,** *s.* अंतः, अवसानं, परिणामः, निष्ठा, समाप्ति *f.*, निवृत्ति *f.* 2 प्रत्ययः.

Termagant, *s.* अतिकलहप्रिया, कर्कशा, चंडी; *See* **Shrew, Scold.**

Terminology, *s.* परिभाषा.

Terpsichorean, *a.* नृत्यसंबंधिन्.

Terrace, *s.* अलिंदः,-भूमि *f.*, प्रघा(घ)णः. 2 **Roof,** q. v. 3 वितर्दि *f.*, वेदिका.

Terraqueous, *a.* जलस्थलात्मक.

Terrene, Terrestrial, *a.* पार्थिव (वी *f.*), भौमिक (की *f.*), भौम (मी *f.*), भू in comp. 2 लौकिक, ऐहिक: (की *f.*); *See* **Worldly.** 3 भूचर, स्थलज, भूलोकस्थ; 't. globe' भूगोलः.

Territory, *s.* प्र-,देशः, राष्ट्रं, राज्यं, भूमि *f.* **-ial,** *a.* राष्ट्रीय; by (*s.*) in comp.

Terror, *s.* सं-,त्रासः, भयं, साध्वसं, शंका. 2 भयहेतुः- स्थानं, शंकास्थानं; 'a t. to the wicked' शठान् व्यथयिता (Mr. 9). **-Terrible,-Terrific,** *a.* घोर, दारुण, भीषण, भीम, उग्र, कराल, विकट. **-Terribly,** *adv.* दारुणं, बलवत्, घोरं, उग्रं. **-Terrify,** *v. t.* सं-,त्रस् c., भी c.. *See* **Fright, -ful,** &c.

Terse, *a.* लाघवान्वित, संक्षिप्त, लघुपद. **-ness,** *s.* लाघवं, संक्षेपः.

Tertian, *s.* तृतीयकः-ज्वरः, त्र्यैहिकाविषमः (t. ague).

Tertiary, *a.* तृतीयक, तृतीयिन्.

Test, *v. t.* परीक्ष् 1 A, (मायां मयोद्भाव्य परीक्षितोऽसि R. II. 62), विमृश् 6 P, (शास्त्रे प्रयोगे च मां विमृशतु M. 1). -*s.* परीक्षा, विमर्शः, प्रतीति *f.* 2 प्रमाणं, (something whereby to t.) निकषः, निकषग्रावन् *m.*: 'this should be put to t.' एतत्प्रतीतिकल्पाद्या; *See* **Touch.**

Testaceous, *a.* कंबुविशिष्ट, शंखवासिन्.

Testament, *s.* मृत्युलेखः-पत्रं, इच्छापत्रं. 2 संहिता. **-ary,** *a.* मृत्युपत्रदत्त.

Testator, *s.* मृत्युलेखकर्तृ *m.*

Testicles, *s.* अंडः,-कोषः-शः, मुष्कः, वृषणः फलं (in dual).

Testify, *v. t.* साक्ष्यं दा 3 U, प्रमाणयति (D.), प्रमाणीकृ 8 U. 2 प्रकाश् c., विद् 5 U, व्यंज् 7 P or c., प्रकटीकृ; आविष्कृ, (by words) ब्रू 2 U, वच् 2 P &c

Testimony, *s.* साक्ष्यं, प्रमाणं, प्रामाण्यं **-Testimonial,** *s.* प्रमाणपत्रं-लेखः.

Testy, *a.* *See* **Fretful.**

Tetanus, *s.* धनुर्वातः.

Tete-a-tete, *s.* रहः-संलापः-प्रत्यासत्ति *f.*

Tether, *s.* बंधनरज्जु *f.*-सूत्रं. -*v. t.* (रज्ज्वा) बंध् 9 P.

Tetrad, *s.* चतुष्टयं, चतुष्कं.

Tetragon, *s.* चतुर्भुजः, चतुरस्रं. **-al,** *a.* चतुरस्र, चतुष्कोण.

Text, *s.* मूलं, मूलपंक्ति *f.*, मूलग्रंथः. 2 उक्ति *f.*, सूत्रं, वचनं, वाक्यं **-ual,** *a.* मौलिक (की *f.*), मौल (ली *f.*).

Textile, *a.* तांतव (वी *f.*), तंतुनिर्मित

Texture, *s.* विन्यासः, वि-,रचना-नं, कृति *f.*, वापः-यः. 2 तंतु-सूत्र-गुणः. 3 तांतवं.

Tew *v. t.* *See* **Ply.**

Than, *conj.* Ex. by abl. of word following it; मतिरेव बलाद्गरीयसी &c.; with 'better' ex. by न च, न तु, न पुनः; *See* **Prefer, Better**; oft. ex. by अपेक्ष्य (with acc.), अपेक्षया in comp.

Thank, *v. t.* उपकृत-अनुगृहीत-*a.* अस्मि इति वद् 1 P, ('Say,' q. v.); कृतज्ञतां दृश् c. or आविष्कृ 8 U कृतोपकारं स्तु 2 U or प्रशंस् 1 P; 't-ed his deliverer' भवतानुगृहीतः-उपकृतः-अस्मि इति रक्षितारमुवाद; '(I) t. you', 'thanks' अनुगृहीतोऽस्मि, महानयं प्रसादः. 't. God' दिष्ट्या. **-s.** (Thanks) कृतज्ञतादर्शनं-प्रकाशनं, उपकारस्तुति *f.*, धन्यवादः; better ex. by (*v.*); 'accept my t. s' by (*v.*). **-ful,** *a.* कृतज्ञ, कृतवेदिन्, उपकारज्ञ, कृतज्ञतादर्शिन्. **-fully,** *adv.* कृतज्ञतापूर्वं, कृतज्ञतया. **-less,** *a.* अकृतज्ञ, कृतघ्न. **-Thanksgiving,** *s.* *See* (*s.*).

That, *a.* तद् (सः-सा-तत्). 2 यत् ((यः-या-यत्), oft. by comp.; 'he t. has strength' सबल, बलिन् &c. *-conj.* इति (after assertions) यथा, यत् (at beginning) with or without इति; sometimes not ex. 2 (Purpose) इति with pot. mood or अर्थं-र्थे in comp.; 'Oh t.' *See* **Would.**

Thatch, *s.* छदिस् *f.*, पटलं, तृणपटलं-छदिः. *-v. t.* तृणादिना आ-, छद् 10. **-er,** *s.* तृणपटलकारः.

Thaw, *v. i.* द्रु 1 P, वि-ली 4 A. *-v. t.* द्रु c., द्रवीकृ, वि-ली c.; *See* **Melt.** *-s.* हिम or तुषार-स्रुति *f.* or स्रावः.

The, (Article) Ex. by तत् (सः-सा-तत्) or अदस् (असौ-अदः); gen. not ex. 2 (With comp. adj.) by यथा यथा-तथा तथा; यथा यथा यौवनमतिचक्राम तथा तथा अनपत्यताजन्मा अवर्धतास्य संतापः (Ka. 59), 't. older he grew, t. greater his torment' &c.; 't. sooner, t. better' यथा यथा लघु कार्यं संपाद्यते तथा तथा अधिकं श्रेयो भवेत्; 't. more so' विशेषतः, विशेषेण.

Theatre, *s.* रंगः, -भूमि *f.*, -शाला, नृत्य-नाट्य-शाला, नाटकगृहं. **-Theatrical,** *a.* नाटक, नाट्य in comp.; 't. performance' नाटकप्रयोगः.

Theft, *s. See* under **Thieve.**

Theism, *s.* ईश्वरवादः, आस्तिकपवादः, आस्तिक्यं. **-Theist,** *s.* ईश्वरवादिन् *m.*, आस्तिकः.

Theme, *s.* विषयः, प्रकरणं, वस्तु *n.*, प्रबंधः.

Then, *adv.* तदा, तदानीं, तस्मिन्काले. 2 ततः, अनंतरं, अथ. 3 तर्हि; तत्; 'now and t.' कदापि, कदाचित्; 'so t.' एवं, तर्हि; 'what t.' ततः किं. **-Thence,** *adv.* ततः, तस्मात्, तस्मात् स्थानात्; 't.-forth', 't.-forward' ततः प्रभृति-आरभ्य, तदाप्रभृति.

Theocracy, *s.* ईश्वरप्रभुत्वं, ईश्वरकर्तृकत्वं.

Theogony, *s.* देवोत्पत्ति *f.*-वंशः.

Theology, *s.* ईश्वर-ब्रह्म-ज्ञानं, परमार्थविद्या, अध्यात्म-ज्ञानं-विद्या. **-ian,** *s.* परमार्थविद् *m.*, ईश्वरज्ञानविशारदः, ब्रह्म-विद्-ज्ञानिन्, वेदांती, अध्यात्मवादी. **-ical,** *a.* ex. by (*s.*) in comp., आध्यात्मिक-पारमार्थिक- (की *f.*).

Theorem, *s.* प्रमेयोपपाद्यं.

Theory, *s.* मतं, सिद्धांतः; वादः; 't. of evolution' परिणामवादः; नास्तिकमतं &c. 2 कल्पना, तर्कः, मनःसृष्टि *f.* 3 आगमः, शास्त्रं, उपपत्ति *f.* (as opp. to 'practice' प्रयोगः), द्वावेवाप्यागमिनौ प्रयोगनिपुणौ च (M. 3) 'well-versed in t. and practice'; oft. मंत्रतंत्रं 't. and practice.' **-Theoretical,** *a.* व्यवहारायोग्य, काल्पनिक- अव्यावहारिक- (की *f.*). **-ally,** *adv.* कल्पनापूर्वं. **-Theorize,** *v. t.* मतं उपक्लृप् c.

Theosophy, *s.* ईश्वरवादः-ज्ञानं. **-ist,** *s.* अध्यात्मविद्.

Therapeutic, *a.* शांतिकर (री *f.*), रोगघ्न (घ्नी *f.*); 't. s' भेषजशास्त्रं.

There, *adv.* तत्र, तस्मिन्स्थाने, तत्स्थले. 2 (Expletive) by अस्ति. *-interj.* पश्य, पश्य; 'here and t.' इतस्ततः; 't.-about' (t. s) तत्रैव कुत्रापि; तत्स्थानसमीपे; (with number) उप-आसन्न in comp.; *See* **Nearly, About;** '20 or t.-abouts' उप-आसन्न-विंशाः (नराः) &c., 't.-after' ततः, तदनु, ततः परं, तदनंतरं; 't.-at' तेन, तत्र; तदुपरि; ततः; 't.-by' तेन; तेनोपायेन, तद्द्वारेण; 't.-fore' अतः, तस्मात्, तस्मात् कारणात्-हेतोः, ततः; तत्, इति हेतोः, अनेन कारणेन-हेतुना; 't.-in' तस्मिन्विषये; 't.-of' तत्रत्य, ततस्त्य, तत्रस्थ (*a.*); तस्य, अस्य, तदीय; 't.-upon' ततः, &c.

Thermal, *a.* उष्णतासंबंधिन्.

Thermometer, *s.* उष्णमापनयंत्रं.

Thesis, *s.* प्रतिज्ञा, पूर्वपक्षः. 2 प्रबंधः.

Thews, *s. See* **Muscle,** (1). 2 शरीरबलं

Thick, *a.* घन, निबिड, अविरल, सांद्र, गाढ; नीरंध्र, श्यान. 2 स्थूल, महत्, विपुल; *See* **Large.** 3 मंद, जड, स्थूल; *See* **Dull;** 't.-headed' मंदधी; 't.-skinned' कठिन, सहिष्णु; मंद, स्थूल. 4 पंकिल, कलुषित, आविल. 5 (Of a solid body) घन. *-s.* तुमुलं, शिरस् *n.*, मूर्धन् *m.*, संकुलं; 'in the t. of the fight' रणशिरसि, रणसंमर्दे-मूर्ध्नि. *-adv.* अविरतं, निरंतरं, अविरलं, निबिडं, by (*a.*) in comp.; 't. sown' घनोप्त, सांद्राच्छादित &c; 't-set' सु-, संहत, उपचित.

-en, *v. t.* घनीकृ 8 U, निबिडीकृ &c. -*v. i.* घनीभू 1 P, निबिडीभू; 'the horizon t.-ed' दिङ्मंडलं (अभ्रपटलैः) घनीकृतं, अभ्रपटलाकीर्णं. **-et**, *s.* गहनं, गुल्मः-ल्मं, निबिडारण्यं, वृक्ष-तरु-गहनं. **-ly**, *adv.* निरंतरं, अविरलं, निबिडं, गाढं. **-ness**, *s.* घनता, सांद्रता, संहति *f.*, &c. 2 वेधः, घनता, पिंडत्वं. 3 (Of voice) स्वरभंगः.

Thieve, *v. t.* चुर् 10, मुष् 9 P, स्तेन् 10. **-ish**, *a.* अपहरण or चौर्य-शील or वृत्ति. चौर्यासक्त. **-ishness**, *s.* चौर्यासक्ति *f.* **-Thief**, *s.* स्तेनः, चोरः, चौरः, तस्करः, दस्युः, मोषकः, कुंभीलकः, पा(प)टच्चरः, प्रतिरोधिः, परास्कंदिः, मालिम्लुचः, ऐकागारिकः. **-Theft**, *s.* स्तेयं, मोषः, चौर्यं, चो(चौ)रिका, स्तैन्यं.

Thigh, *s.* ऊरुः (*m.*), सक्थि *n.*; 'having beautiful t.s' वामोरुः-रू.

Thimble, *s.* अंगुलित्राणं, अंगुलिमुखत्रं.

Thin, *a.* प्र-,तनु, सूक्ष्म, विरल, अस्थूल, श्लक्ष्ण. 2 कृश, क्षीण, शांत; 'grown t.' तन्वंग-कर्शितांग-(गी *f.*); 'having a t. waist' तनुमध्यम, क्षीणमध्यम; *See* **Slender**. -*v. t.* विरलयति (D.), ऊनी-विरली-कृ 8 U, संख्यां अप-चि 5 U or क्षि 5 P or c. 2 तनूकृ, तक्ष् 1, 5 P, उल्लिख् 6 P. **-ly**, *adv.* विरलं, असंहतं. **-ness**, *s.* तनुता, सूक्ष्मता, वैरल्यं, कार्श्यं; क्षीणता.

Thing, *s.* वस्तु *n.*, द्रव्यं, पदार्थः, अर्थः. 2 विषयः, अर्थः.

Think, *v.* चिंत् 10, ध्यै 1 P, विमृश् 6 P, आ-पर्या-लोच् 10, वि-,तर्क् 10, वि-चर् c., मनसा क्लृप् c., सं-,भू c. 2 मन् 4 A, गण् 10; *See* **Consider**; 't. much of' बहु मन्; 'I t. so' इति मे मतिः; 'dose not t. of going to his capital' नगरगमनाय मतिं S. 2); 't. of' स्मृ 1 P, मनसि कृ 'I never thought of winter' हेमंतः समुपस्थास्यति इति चिंता नैव मनसि कृता, इति नचालोचितं. **-er**, *s.* सूरिः, मुनिः; (lit.) चिंतकः; *See* **Philosopher**. **-Thought**, *s.* (act) चिंता, ध्यानं; आलोचनं; (result also) विचारः, विमर्शः, विचारण-णा, भावना, मनोव्यापारः, चित्तचेष्टा. 2 मतं, अभिप्रायः, मनोरथः. 3 मति *f.*, बुद्धि *f.*, कल्पना, विचारः, संकल्पः, मनोगतं, चित्तं, मनस् *n.*, तर्कः, चित्त-मनो-वृत्ति *f.*, भावना; 'one's inmost t.s' अंतर्गतं मनः; 'evil t.' कुमतिः; 'benevolent t.' परहितबुद्धिः; 'swift as t.' मनोजव; 'beyond t.' अचिंत्य; 'in t., word or (actual) deed' मनोवाक्कायकर्मभिः. **-ful**, *a.* चिंताशील, विचार-विवेक-शील, विमृश्य-समीक्ष्य-कारिन्, असाहसिक (की *f.*), सावधान, अप्रमत्त. 2 चिंता-कुल-पर-निमग्न, ध्यानपर. **-fully**, *adv.* विचिंत्य, विमृश्य, विचार्य, समीक्ष्य, सविवेकं, पर्यालोच्य. **-fulness**, *s.* सविचारता, विवेकिता, समीक्ष्यकारिता. **-less**, *a.* प्रमत्त, अनवहित, असावधान; *See* **Negligent**. 2 निश्चिंत, वीतचिंत. 3 असमीक्ष्य-अविमृश्य-कारिन्, क्षिप्रकारिन्, विवेक-विचार-हीन, सरभस, मूढ. **-lessly**, *adv.* मोहात्, रभसा, अविमृश्य, अविवेकेन, अविचारेण. **-lessness**, *s.* अविवेकः, अविचारः, रभसः, मोहः.

Thirst, *v. t.* तृष् 4 P, (fig. also); पा desid. (पिपासति), उदन्यति (D.). -*s.* तृष्णा, (fig. also); द्रव्यतृष्णा, जीविततृष्णा &c.; पिपासा, तृषा, तृष् *f.*, उदन्या, पानेच्छा. **-y**, *a.* तृषित, पिपासित, तृषार्त-आकुल-आतुर, सतृष्ण, पिपासु, उदकार्थिन् तृष्णाविष्ट-आक्रांत.

Thirteen, *a.* त्रयोदशन्. **-th** *a.* त्रयोदश (शी *f.*).

Thirty, *a.* त्रिंशत् *f.* **-ieth**, *a.* त्रिंश (शी *f.*), त्रिंशत्तम (मी *f.*).

This, *pron. a.* एतद् (एषः-एषा-एतत्), इदं (अयं-इयं-इदं); 't. way', 't. way' इतः इतः.

Thistle, *s.* गोक्षुरः-रकः, गोकंटकः, वनशृंगाटः, स्थाणुकंटकः; पलंकषा, इक्षुगंधा, श्वदंष्ट्रा, (plant).

Thither, *adv.* तत्र. **-ward**, *adv.* तं देशं प्रति.

Thong, *s.* वरत्रा, न(व)ध्री, चर्मरज्जु *f.*

Thorax, *s.* उरः-वक्षः *n.*, -स्थलं.

Thorn, *s.* कंटकः-कं, शल्यं; शिताग्रः, तरु-द्रुम-नखः; (fig.) कंटकः, शल्यं; 'he is a t. in your side' अंतःप्रत्युप्तं शल्यं-कंटकं-इव स त्वां पीडयति; 'there is no rose without a t.' सुखं नाम दुःखमिश्रितमस्त्येव, दुःखासंभिन्नं सुखं नैव प्राप्यते. 2 कंटलता-वृक्षः; 't.-apple' धत्तूरः, धुस्तूरः, उन्मत्तः, कितवः, धूर्तः, कनकाह्वयः, मातुलः, मदनः; (fruit) मातुलपुत्रकः. **-less**, *a.* निष्कंटक. **-y**, *a.* कंटकावृत, कंटकाकीर्ण, कंटकित, सकंटक.

Thorough, *a.* संपूर्ण, सम्यच्, साद्यंत, पर्याप्त; *See* **Complete**; 't.-bred' अभिजात, अतिकुलीन; (horse) आजानेयः, कुलीनः; 't.-fare' राजमार्गः, घंटापथः, संसरणं; सर्वसामान्यपथः, सर्वगम्यमार्गः. **-ly**, *adv.* सम्यक्, संपूर्णं, साद्यंतं; by पार in comp.; 'who has t. learnt the lores' विद्यानां पारदृश्वनः (R. I. 23); 't. mastered all lores' ततार सर्वा विद्याः (R. III. 30). **-ness**, *s.* पूर्णता, परिपूर्ति *f.*, निःशेषता.

Thou, *pron.* त्वं; 'to t. and thee' त्वंकृ 8 U; 'do not t. your elders' गुरुषु त्वंकारं न प्रयोजयेत्. **-Thine**, *a.* त्वदीय, तावक (की *f.*), तावकीन, त्वत्क, भवदीय, त्वत् in comp.

Though, *adv.* अपि, यद्यपि; ' as t. ' इव.

Thousand, *a.*, *s.* सहस्रं, दशशतं; ' t.s of times ' सहस्रशः-वारं; ' in a t. ways or parts ' सहस्रधा; ' ten t. ' अयुतं; ' hundred t. लक्षं; ' by t. s. ' सहस्रशः. **-th,** *a.* सहस्रतम (-मी *f.*).

Thrall, *s.* दासः. **-dom,** *s.* दास्यं, दासवृत्ति *f.*, दासत्वं; *See* **Slave,-ery.** **2** वशता, पारतंत्र्यं, अधीनता.

Thrash, *v. t.* परुषं-बलवत्-तड् 10 or प्र-हृ 1 P. **2** निस्तुषीकृ 8 U, पू 9 U: *See* **Thresh**.

Thread, *s.* सूत्रं, तंतुः, (fig. also), (आशातंतुः), गुणः,तंत्रं; 't. of a story' कथाप्रबंधः-अनुबंधः-संदर्भः-अन्वयः,अनु-,संधानं,प्रबंधार्थः; ' t.-bare सूत्रदरिद्र; अयं पटः सूत्रदरिद्रतां गतः (Mr 2), सूत्रशेष; जर्जर. **-***v. t.* सूत्र् 10: गु(गुं)फ् 6 P. ग्रंथ् 9 P: ' t. one's way ' मंदं मंदं प्रसृ 1 P **-y,** *a.* सूत्र-तंतु-मय (यी *f.*).

Threat, *s.* तर्जनं, तर्जितं, भर्त्सनं, अपकारगिर् *f.* **-en,** *v. t.* सं-,तर्ज् 1 P, 10 A, निर्-, भर्त्स् 10 A, भी c. **-***v. i.* प्रत्या-सद् 1 P, लग्न-*a.* संपद् 4 A, उपक्रम् 1 P; ' war t. s' प्रत्यासीदति रणप्रसंगः; *See* **Impend.** **-ening,** *a.* भर्त्सनकृत; अनिष्टावेदिन्; प्रत्यासन्नभय, विभीषक. **-eningly,** *adv.* तर्जयत्-*v*.

Three *a.* त्रि (तिसृ *f.*); ' aggregate of t. त्रयं, त्रितयं, त्रिकं, त्रयी, 't. months' त्रिमासं, मासत्रयं; ' two or t. ' द्वित्र, त्रिचतुर, &c.; ' t.-cornered ' त्रिकोण, ' t.-eyed ' त्रिलोचनः, त्रिनयनः; &c.: ' t.-fold ' त्रिगुण; ' t.-fourths ' त्रिपादः, पादत्रयं; ' 2 and t.-fourths ' पादोनत्रयं. **-Third,** *a.* तृतीय. **-***s.* तृतीयभागः-अंशः. **-ly,** *adv.* तृतीयस्थाने. **-Thrice,** *adv.* त्रिः, त्रिवारं.

Thresh, *v. t.* मृद् 9 P, परि-,पू 9 U, निस्तुषीकृ 8 U, कंड् 10. **2** तड् 10, प्र-हृ 1 P. **-ed,** *a.* निस्तुषित, निस्तुष, पूत, बहुलीकृत. **-ing,** *s.* पावनं, बहुलीकरणं, कंडनं, निस्तुषीकरणं; ' t. floor ' खलधान्यं; ' t. instrument ' मुसलः-लं, अयोग्रं, कंडनी.

Threshold, *s.* देहली, द्वारपिंडी, गृहावग्रहणी; (fig.) प्रारंभः.

Thrift, *s.* मितव्ययः-व्ययिता. **2** सं-वि-वृद्धि *f.* **-y,** *a.* मितव्ययिन्, अल्पव्यय; *See* **Frugal.**

Thrill, *s.* प्र-,कंपः, स्फुरणं, हर्षः; (of joy, horror, &c.) रोमांचः, पुलकः; उद्धर्षः; ' t. of joy ' हर्षरोमांचः, पुलकोद्गमः, रोमहर्षः, ' a t. came over her body ' तस्या गात्रं रोमांचितं-पुलकितं-कंटकितं-बभूव; 'with a t. of horror ' सत्रासरोमांचितगात्रः. **-***v.* स्फुर् 6 P, हृष् 4 P, प्र-,कंप् 1 A: gen. ex. by पुलकित, रोमांचित, कंटकित, (*a.*);' be t.-ed with joy ' आनंदपुलकिततनुर्बभूव. **-ing,** *a.* लो(रो)महर्षण (णी *f.*), पुलकित, रोमांचित, &c.

Thrive, *v. i.* प्र-,वृध् 1 A, प्र-उप-चि pass., संऋध् 4, 5 P, उन्नतिं-उत्कर्षं-प्राप् 5 P: *See* **Prosper, Flourish.** **-ing,** *a.* वर्धिष्णु, प्र-उप-चीयमान. समृद्ध.

Throat, *s.* कंठः, गलः, कृकः, निगरणः; 'relating to t. ' कंठ्य; ' up to the t. ' आकंठं, आकंठात्.

Throb, *v. t.* प्र-,स्पंद् 1 A, स्फुर् 6 P, वेप् 1A, कंप् 1 A. **-bing,** *s.* स्पंदः, स्पंदनं: स्फुरणं, स्फुरितं, कंपः.

Throe, *s.* यातना, वेदना, व्यथा; (of delivery) प्रसववेदना, प्रसवकालव्यथा.

Throne, *s.* सिंहासनं, नृपासनं, &c.: भद्रासनं; ' ascended the ancestral t. ' भेजे पैतृकमासनं (R. xvii. 28); ' getting the t. ' राजपदावाप्ति *f.*; ' having lost his t. ' छत्रभ्रष्टः. **-***v. t.* अभिषिच् 6 P, राज्ये अभिषिच्, सिंहासनं आरुह् c.; ' t. ed king ' अभिषिक्तो राजा.

Throng, *s.* जनसंमर्दः-संकुलं, लोकनिवहः. **-***v. t.* आ-समा-कॄ 6 P, संबाध् 1 A. **-***v. i.* जनाकीर्ण-जनसंबाध-*a.* भू; *See* **Crowd.** **-ed,** *a.* आ-समा-कीर्ण, जनसंकुल-संबाधित.

Throttle, *v. t.* गलं निष्पीड् 10, गलनिष्पीडनेन व्या-पद् c., गलहस्तयति (D.).

Through, *prep.* Ex by instr. or abl. **2** मध्येन, अंतरेण; ' t. the branches ' विटपांतरेण. **3** पारं, तीरांतरं यावत्. **4** मुखेन; द्वारेण, द्वारा, in comp ; सखीमुखेनोचे ' spoke t. her friend '. **-***adv.* समग्रं, साद्यंतं, शेषं यावत्, आसमाप्तेः; oft. by पारं गम् or दृश् 1 P; ' he has learnt the Vedas t. ' श्रुतिपारं गतः, श्रुतिपारदृश्वा, ' to get t. ' तारयति-पारयति (D.), समाप् c. **-Throughout,** *prep.* Ex. by सर्व, समस्त; *See* **All;** आ or यावत् in comp.; ' t. one's life ' यावज्जीवं-वेन, आजीवितांतात् ' t. the town ' अखिले नगरे, नगरे सर्वत्र. **-***adv* सर्वत्र, अशेषतः; सर्वत्र वैतालीयं छंदः ' the metre is Vaitālīya t. '

Throw, *v. t.* प्र-,क्षिप् 6 P, प्र-,अस् 4 P, पत् c., प्र-,मुच् 6 P, विसृज् 6 P, ईर् c , प्रेष् c., (with loc. of place); ' t. a glance ' दृष्टिं-चक्षुः-क्षिप् or दा 3 U or पत् c.; ' t. into disorder ' पिंजली-आकुली-कृ 8 U, व्यूह भंज् 7 P; ' t. dice ' अक्षान् आवप् 1 P or पत् c. **-about,** उत्-वि-क्षिप्, इतस्ततः चल् c.; बाहूत्क्षेपं ' t. ing about the arms. ' **-away,** निः-वि-क्षिप्, अपास्,

अप-हा 3 P, अपव्यध् 4 P, त्यज् 1 P; (time) क्षिप्, ह्व 1 P, यां c. (यांपयति). 2 निरस्, प्रत्याख्या 2 P; *See* **Reject**; ' it was t.-ing words away ' निरर्थकं-मोघं-एव तद् भाषणं, वागायासमात्रकं भाषणं; ' kindness was not thrown away upon him ' सोऽनुग्रहं कृतज्ञतयास्मरत्; ' to be thrown away upon ' विफलीभू 1 P, विफलतां गम् 1 P, लयं-क्षयं-नाशं-गम्-या &c.; गता नाशं तारा उपकृतमसाधाविव जने (Mr. 5); असत्पुरुषसेवेव दृष्टिर्विफलतां गता (Mr. 1). **-down,** पत् c., अधः क्षिप् or पत्; प्र-भ्रंश् c., प्र-च्यु c. **-off** निः-प्र-क्षिप्, अव-निर्-धू 5, 9 U, निराकृ. अपव्यध्, अप-सृ c.; ' t. one off his guard ' असावधान-*a.* कृ; ' t. off the veil or mask ' स्वरूपं प्रकटीकृ or वि-वृ 5 U or प्रकाश् c. **-out, Reject,** q. v. 2 निः-,सृ c., अपास्. 3 (Hints) सूच् 10, उप-क्षिप्, उपन्यस्, व्यंज् c. **-up,** उदस्, उत्क्षिप् &c.; (from the stomach) उद्वम् 1 P, उद्-गृ 6 P; 'I have thrown a wall around ' उपक्षिप्तो मया भित्तिबंधः (M. 5). **-s.** प्र-,क्षेपः-पणं, प्रासनं, प्रेरणं; &c. **-er,** *s.* क्षेप्तृ *m.*, प्रासकः.

Thrum, *s.* दशाः-वस्तयः (pl.).

Thrush, *s.* सारिका, शरारि *f*

Thrust, *v. t.* अपव्यध् 4 P, प्र-सृ c., प्र-क्षिप् 6 P; ' t. away ', ' t. out ' निरस् 4 U, निः-सृ c., बहिष्कृ 8 U; (the hand &c.) प्र-सृ c.; ' t. into ' प्र-नि-विश् c.; ' t. on ' प्रणुद् c., c. प्रचल् c. **-s.** आघातः, प्रहारः ताडनं; (with fist) मुष्टिप्रहारः-आघातः.

Thumb, *s.* अंगुष्ठः; ' under one's t. ' आयत्त, वश्य. **-v. t.** अंगुष्ठेन परामृश् 6 P or स्पृश् 6 P or अंक् 10.

Thump, *v. t.* आहन् 2 U, तड् 10, प्र-हृ 1 P. **-s.** आ-अभि-घातः, प्रहारः.

Thunder, *s.* मेघगर्जनं, घनध्वनिः, जीमूतस्तनितं, मेघगर्जितं; and sim. comp.; वि-, स्फूर्जथुः- थुः, स्फूर्जितं, स्तनितं, रसितं;गर्जितं, गर्जनं-ना; 't.bolt' वज्रः-ज्रं, कुलिशं, भिदुरं, पविः, अशनि *m. f.*, शतकोटिः, स्वरुः, शंबः, ह्लादिनी, दंभोलिः; ' t. clap ' वज्रनिर्घोषः-निर्घातस्वनः-निष्पेषः; *See* (*s.*); 't.-storm' अशनिवर्षः-पातः; ' t.-struck ' अशनिताडित,वज्राहत, *See* **Astounded.** **-v.** गर्ज् 1 P, स्तन् 1 P, वि-स्फुर्ज् 1 P; ' shouldst t. reproof ' यत्त्वं (साक्षेपमिव) नदसि सिंहनादैः (Mr. 5). **-er,** *s.* वज्रिन् *m.*, कुलिशभृत्, वज्रपाणिः.

Thursday, *s.* गुरुवासरः.

Thus, *adv.* एवं, इत्थं, इति, अनेन प्रकारेण, अनया रीत्या.

Thwack, *See* **Smack.**

Thwart, *v. t.* खंड् 10, वि-प्रति-हन् 2 P, मोघीकृ 8 U.नि-प्रति-वि-रुध् 7 U:प्रतिकूलयति-प्रतीपयति (D.): क ईप्सितार्थस्थिरनिश्चयं मनः प्रतीपयेत् (K. v. 5); *See* **Frustrate, Baffle.**

Tiara, *s.* मुकुटं, किरीटः, मौलिः.

Tick, *s.* यूका. 2 **Credit,** q. v.

Ticket, निर्देशनी, अभिज्ञानपत्रं.

